FG 119
Scan Date
Scan By
www.facts.ae Facts.

ഞ്ഞു-ഭൂമ്പന്നരെ മുണ്ടാണി
(കുറു-അർപ്പ്)
(സരസ്വതീകണ്ഠാഭരണം)

[Paṇḍita Bhūdānkita
Nīlakaṇṭha] Tīrtha Swāmī
Mīmātupuṣa

॥ श्रीमल्लक्ष्मीनारायणाभ्यां नमः ॥

।सरस्वतीकण्ठाभरणे।

श्रीमद्भोजनरेन्द्रविरचिते ।

परिच्छेदत्रयं

पण्डितवर्यरत्नेश्वरमिश्रविरचितया रत्नदर्पणाख्यया ।

व्याख्यानुगतं



ज्योतिषोपाह्वभैरवशर्म्मणा ।

॥ श्रीकाश्यां ॥

जैनप्रभाकरनाम्नि मुद्रायन्त्रालये
वैशाखसुदि ८ भौमे १९४३ संवत्सरे ।
मुद्रितम् ।



(V) Nīlakaṇṭha Tīrtha
Mūvātupuzhai
3/8.

॥ श्रीमद्गुरुचरणारविन्दाभ्यां नमः ॥



इह किल यद्यपि सकलकविकुलललामभूतैर्विपश्चिदपाश्चात्त्यैराद्रियमाणादृढव्युत्पत्तिसम्पादनचणा विजयन्ते संख्यातिशायिनः साहित्यग्रन्थाः, परं तेषु—

" प्रायेण सामग्र्यविधौ गुणानां
पराङ्मुखी विश्वसृजः प्रवृत्तिः "

इति न्यायेन केचन व्यष्ट्या निर्भरं रसरीतिगुणदोषशब्दार्थालङ्कार निरूपणपराः, केचन समष्ट्या संक्षेपेणैव तद्व्युत्पादका इति, नास्तिप्रचलितो निरुक्तनिखिलविषयाणां समष्ट्या विस्तरेण च प्रतिपादकः कोपि सन्दर्भ इति तदन्वेषणपरो निजगृहे एव मन्मातुलचरणपूज्यपादगुरुवरवज्रटङ्कोपनामक श्रीद्वपापाशास्त्रिसकाशादासाद्य कविकुलतिलकनिखिलविद्वन्मण्डलीमण्डितास्थानमण्डपेन महनीययशसा भोजनरेन्द्रेण विरचितं सरस्वती

कण्ठाभरणाभिधं ग्रन्थं, निजमनोरथसिद्धिं ततः सम्भावयन् बहुभिर्मान्यकोटिप्रविष्टैर्बुधवरैःप्रेरित एतत्प्रकाशनाय, वर्द्धितोत्साहश्च शोधनादिसाहाय्यप्रदानेन श्रीमज्ज्यौतिषोपाह्व तात्याशास्त्रिप्रमुखै र्मुद्रणव्ययादिसाहाय्यसम्पादक ज्यौतिषोपाह्वभैरवशास्त्रिभिश्च समानशीलैः सुहृद्वरैर्निर्धार्य तत्प्रकाशनं स्थलविशेषेषु न व्याख्यानमन्तरा साधारणजनसाधारण्येन सुबोधोयं ग्रन्थ इति श्रीमहाराजरामसिंहनरेन्द्राज्ञाकारिणा श्रीमत्कविवरेण्येन रत्नेश्वरमिश्रेण विरचितां रत्नदर्पणाख्यां व्याख्यां तदनुगां विधाय समासाद्य च श्रीयुतविद्वद्वरजगन्नाथपाठकसकाशाच्छुद्धतमं पुस्तकान्तरं प्रावर्तिषि तन्मुद्रणे, प्रालभे च तत्तत्स्थलेषु विशयोच्छेदं, चित्रप्रकरणे नानाविधेतरप्रबन्धदुर्लभं चित्राकारतत्त्वं, कामधेन्वादिचित्रेषु चाऽङ्क संहतिविन्यासप्रपञ्च रहस्यं, निखिलबुधजनशिरोभूषण मानवल्ल्युपाख्यश्रीमद्गुरुवरश्री६ गङ्गाधरशास्त्रि महाशयचरणेभ्यः। येन प्रकाश्य निष्टङ्कं चित्राकारान् प्रदर्श्य चाङ्कविशेषान् संशोध्य च महता परिश्रमेण महानुभाववन्दनीयचरणश्रीमद्गुरुवरपण्डितश्री६ वागेश्वरशर्म्मप्रसादात् समापितवानस्मि निष्प्रत्यूहं सव्याख्यं परिच्छेदत्रयम् ।

एतदग्रेच भूयसा प्रयत्नेनापि व्याख्याया अद्य त्वंशलाभादेतावदेव प्रकाश्य विरतवानस्मि । आशासे च सहजसौजन्यपात्रैर्विद्यानुरागिभिर्धीरवरैरग्रेप्येतद्व्याख्याप्रतिपादनसाहाय्यप्रदाने तत्सहित मूलग्रन्थप्रकाशनम् । प्रार्थयेच सप्रश्रयं गुणानुरागिणो यत्प्राचीनतमैतद्ग्रन्थरत्नसंशोधने प्रवृत्तस्य ममाऽनवधानजन्यानि मुद्रणाङ्कुरयोजकादिदोषजनितानि च स्खलितानि हंसन्यायेन समुपेक्ष्यो पादाय केवलं कविसन्दर्भयोर्गुणान् कण्ठाभरणीकृत्य कण्ठाभरणं समवलोक्य च तत्प्रभां रत्नदर्पणे आरोहन्तु रसिकजनशिरांसि सफलयन्तु च ममापि परिश्रमं वाग्देवताकृपाकटाक्षभूताश्चतुरवरा इति शम् ॥

संवत् १९१३ वैशाखशुक्लेऽष्टमीभौमे

संशोधकः प्रकाशकश्च
द्राविडवीरेश्वरशास्त्री

Ātmārāma

॥ श्रीगणेशायनमः ॥

॥ सटीकं सरस्वतीकण्ठाभरणम् ॥

ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयम् ।
यस्याः सूक्ष्मादिभेदेन वाग्देवीं तामुपास्महे ॥ १ ॥

॥ श्रीगणेशाय नमः ॥ एकेन यस्य यमिनः प्रमदेव देहमर्द्धेन रा जति पुमानिव चाऽपरेण । तत्वक्रमादथच न प्रमदा पुमान्वा श्रे यांसि वर्द्धयतु स स्मरशासनो वः ॥ १ ॥ श्रीरामसिंहदेवेन दोर्दण् डदलितद्विषा । क्रियतेवन्तिभूपालकण्ठाभरणदर्पणः ॥ २ ॥ क ण्ठाभरणमनर्घ्यं वाग्देवीरत्नदर्पणोत्सङ्गे । अस्मि न्प्रथयतु निभृतं प्रकाशसर्वाङ्गलावण्यम् ॥ ३ ॥ ग्रन्थारम्भेसमुचितेष्टदेवतानमस्का रेण शिष्टाचारमनुवर्त्तते । ध्वनिरिति । वाचामधिष्ठात्रीदेवी द्यो तमाना स्वप्रकाशशब्दब्रह्मरूपा भारती । कथमुपास्यते । सूक्ष्मा दिभेदेन ध्वन्यादिभेदेनच विवक्षितोनमस्कारः शब्दब्रह्मणश्चतस्रो भिदा भवन्ति । सूक्ष्मा पश्यन्ती मध्यमा वैखरी चेति । तत्राऽवि कारदशा सूक्ष्मा । सार्हसर्वस्यप्राणापानान्तरालवर्त्तिनी विगत प्रादुर्भावतिरोभावा सम्यक्प्रयोगपरिशीलनात्मना कर्मयोगेन मन नादिना ज्ञानयोगेनच सम्यगधिगम्यते । सेयमाकीर्यमाणाऽपि नि त्यमागन्तुकैर्मलैः । अन्त्या कला हि सोमस्य नात्यन्तमभिभूय ते । तस्यां विज्ञातमात्राया मधिकारो निवर्तते । पुरुषे षोडशक ले तामाहुरमृतां कलामिति । तस्य ब्रह्मणोऽनाद्यविद्यावशादाद्यः परिणामः पश्यन्तीरूपो जायते सहि वर्णविभागादक्रमः । स्व

यंप्रकाशश्च । पूर्वापरे स्वावस्थे पश्यतीति पश्यन्तीत्युच्यते। ततः परमविद्योपादानादन्तःसंकल्परूपक्रमवान् श्रोत्रग्राह्यवर्णोन्निर्व्यक्तिरहितस्तृतीयः परिणामो मध्यमारूपो जायते । सा किलद्वयोः परिणामयोर्मध्ये सदा तिष्ठतीति मध्यमेत्युच्यते । अन्तरं दूरप्रसृतायामविद्यायां स्थानकरणप्रयत्नव्यज्यमानश्रोत्रसंवादिवीणादुन्दुन्निनादपरिचयगद्गदाव्यक्ताकारादिवर्णसमुदायात्मकस्तृतीयः परिणामो वैखरीरूपो जायते । विशिष्टं खमाकाशं राति प्रयच्छतीति विखरो देहेन्द्रियसंघातः । तथाच श्रुतिः । " नहवैसशरीरस्य प्रियाप्रिययोरपहतिरस्ति । अशरीरंवावसन्तंप्रियाप्रियेनस्पृशत इति„तत्रनवावैखरीति । तदेतासामवस्थानामाद्यास्तिस्रो नित्या अतीन्द्रियाः । तदुक्तम् । स्थानेषुविवृते वायौ कृतवर्णपरिग्रहा । वैखरी वाक् प्रयोक्तृणां प्राणवृत्तिनिबन्धना । केवलं वक्षुपादानक मरूपाऽनुपातिनी॥ प्राणवृत्तिमतिक्रम्य मध्यमावाक् प्रवर्त्तते । अविज्ञागात्तु पश्यन्ती सर्वतः संहृतक्रमा । स्वरूपज्योतिरेवान्तः सूक्ष्मा सा चानपायिनीति„श्रुतिरप्याह । " चत्वारिवाक्परिमिता पदानितानिविदुर्ब्राह्मणायेमनीषिणः । गुहात्रीणिनिहितानेङ्गय न्तितुरीयंवाचोमनुष्यावदन्ति„ इत्यादिकमागमसमुच्चयादेवावसेयम् । का पुनस्ता वाचो यासामियमधिष्ठात्रीत्यतउक्तम् । ध्वनिर्वर्णाः पदंवाक्यमित्यास्पदचतुष्टयम् । यस्याइति । आस्पदमधिष्ठानमवच्छेदः । ध्वन्यादिनिरवच्छिन्ना परा वाक् तद्व्यवहारहेतुः । साहित्यप्रसिद्धाभिधानध्वननलक्षणाव्यवहारकारित्वमेकस्मिन्वर्णे न निरूप्यते इति बहुवचनम् । पदवाक्ययोरस्तिप्रत्येकमपि तथाभाव इति तान्यामेकवचनमुपात्तम् । तदयमत्रतात्पर्यसंक्षेपः । साहित्यस्वरूपनिरूपणाय किलैषग्रन्थारम्भः । साहित्यं च शब्दार्थयोः संबन्धः । तत्रशब्दएवकइत्यपेक्षायामयंविज्ञागोध्वनिरित्यादिः । अर्थस्तुस्तम्भकुम्भादिलक्षणो लोके शास्त्रे च प्रसिद्धः । संबन्धःकश्चिदनादिः । सर्वस्वायमानस्तुसंबन्धोनान्यत्रेत्यस्मिन्नायतते । स चतुर्विधः। दोषहानं गुणोपादानमलंकारयोगो रसाभियोगश्चेति ॥१॥ प्रे

निर्दोषं गुणवत्काव्यमलंकारैरलंकृतम् । रसान्वितं कविः कुर्वन्कीर्तिं प्रीतिं च विन्दति ॥ २ ॥ दोषाः

ज्ञातप्रवृत्त्यङ्गसंबन्धप्रयोजने दर्शयति निर्दोषमिति । प्रीतिःसंपूर्णकाव्यार्थस्वादसमुत्थ आनन्दः काव्यार्थभावनादशायां कवेरपिसामाजिकत्वाङ्गीकारात् । सहृदयश्लाघया वा प्रीतिस्तदृष्टप्रयोजनम् । कीर्तिरदृष्टद्वारास्वर्गफलेत्यदृष्टम् । यदाह । कीर्तिंस्वर्गफलामाहुरिति । अङ्गिनः काव्यस्य प्रयोजनाव्याख्यानेनाङ्गभूतस्यास्यप्रयोजनसंबन्धउक्तः । यद्यपि काव्यशब्दोदोषाज्ञावादिविशिष्टावेदशब्दार्थंवृत्ते तथापि लक्षणया शब्दार्थमात्रे प्रयुक्तः । लक्षणाप्रयोजनंचाज्ञिधेयानामुद्देशः । त्रिधाहि शास्त्रशरीरम् । उद्देशो लक्षणंपरीक्षाचेति । उदाहरणव्याख्याग्रन्थः सर्वत्र परीक्षापर इत्यस्मद्गुरवः । प्रयोजनाभिसंबन्धपरादेवोद्देशो लभ्यतेऽति न विरोधः । अतएव दोषाद्युद्देशक्रमेण परिच्छेदाः । निर्दोषदोषात्यन्ताभाववत् । अवयवैकदेशवर्त्तिनाश्चित्रेणैवकामिनीशरीरस्य वर्णमात्रगतेनापि दोषेण काव्यवैरस्यनियमात् । अतएवामङ्गलप्रायाणामपि दोषाणां प्रथममुपादानम् । अयमेवहिप्राचः कवेर्व्यापारो यद्दोषहानं नाम । गुणवदिति । भूम्निप्रशंसायांवामतुप् । अलंकृतमित्येव वक्तव्ये अलंकारैरिति प्रसिद्धालङ्कारपरिग्रहार्थम् । तथालंकारैरित्येव वाच्ये प्रसिद्धानामपिवक्ष्यमाणानामेवोपादानार्थमलंकृतपदम् । रसान्वितंरसेननित्यसंबद्धम् । नास्त्येव तत्काव्यं यत्र परंपरयापि विज्ञावादिपर्यवसानं न भवतीति काश्मीरकाः । एतेन काव्यलक्षणमपि कटाक्षितम् । ईदृशंकाव्यं तत्कुर्वन् कविरितिकवेरपिलक्षणमिति ॥२॥ अथोद्देशक्रमेण दोषाणां सामान्यलक्षणं विभागं चाह । दोषाः पदानामिति । हेयाइत्यनेनेनसामान्यलक्षणम् । येहेयास्ते दोषा इत्यज्ञिप्रायात् । अज्ञिमतप्रतीतिव्यवधायकतयाविघ्नभूतः शश्वत्काव्ये हेयतामासादयतिसएवदोषः । अयमेवार्थो मुख्यार्थहतिर्दोषइतिपदेनान्येषामज्ञिमतः । सच पदवाक्यवाक्यार्थविषयतया पूर्वं त्रिवि

पदानां वाक्यानां वाक्यार्थानां च षोडश । हेयाः काव्येकवीन्द्रैर्ये तानेवादौ प्रचक्ष्महे ॥ ३ ॥ असाधु चाप्रयुक्तं च कष्टं चानर्थकं च यत् । अन्यार्थकमपुष्टार्थमसमर्थं तथैव च ॥ ४ ॥ अप्रतीतमथक्लिष्टं गूढं नेयार्थमेव च । संदिग्धं च विरुद्धं च प्रोक्तं यच्चाप्रयोजकम् ॥ ५ ॥ देश्यं ग्राम्यमिति स्पष्टाः दोषाः स्युः पदसंश्रयाः । अथैषां लक्षणं सम्यक् सोदाहरणमुच्यते ॥ ६ ॥ शब्दशास्त्रविरुद्धं यत्तदसाधु

धः । पदपूर्वकत्वाद्वाक्यस्य तत्पूर्वकत्वाद्वाक्यार्थस्य युक्तः क्रमः । वर्णमात्रदोषो नोल्लेखीत्युपेक्षितवान् । अवान्तरविभागे तुक्रियमाणे प्रत्येकं षोडशभिन्नरूपाधिभिः संकुलमित्याह । षोडशेति । काव्यप्रकाशकारादिभिरुक्तानामधिकानामिहान्तर्भावः । अनन्तर्भावेतु दोषत्वमेव नास्तीत्यभिप्रायो नतुदेशीरागन्यायेन स्वमतप्रकाशनम् । प्रतीतिव्यवधायकानां सर्वदातद्रूपत्वात् । उक्तमेवाभिसंधानंतानेवादाविति विभागमन्तरेण विशेषलक्षणानवतारात् पददोषान् विभजते । असाध्विति । मुख्यार्थहतौमिथोनपेक्षासूचनयासमासः । अतएवलाघवेऽनादरः । कथंपदप्रतीकदोषा नगण्यन्तइतिशङ्कामभिप्रेत्याह । स्पष्टाइति । पदसंश्रयाः पदान्वयव्यतिरेकानुविधायिनः ॥ एवंवाक्यादावपि गुणादावपीदमेवाश्रितत्वम् । विभागप्रयोजनमाह । अथैषां लक्षणमिति । परीक्षांप्रतिजानीते । सम्यगिति । लक्षणदोषशून्यंलक्षणानुपपत्तिर्निर्णीजनमेवाहि परीक्षापदार्थः । कथमेतत्संपन्नस्य इत्यतआह । सोदाहरणमिति । शब्दस्वरूपलक्षणः प्रथमनिरस्योदोषइत्याशयेन प्रागुद्दिष्टस्यासाधोर्लक्षणमाह । शब्देति । शब्दाः शिष्यन्तेप्रकृतिप्रत्ययविभागपरिकल्पनयाज्ञाप्यन्ते येन तच्छब्दशास्त्रंत्रिमुनिव्याकरणं तेनविरुद्धंतदाम्नातप्रातिस्विकविशेषपरित्यक्तमतोनदेशीयपदानामसाधुत्वम् । तथाचप्राच्यैर्नाथते

प्रचक्षते। यथा। भूरिभारभराक्रान्त बाधतिस्कन्धए ष ते। तथा न बाधते स्कन्धो यथा बाधति बाधते ॥७॥ अत्र बाधतेरात्मनेपदित्वाद्बाधत इति स्यान्न पुनर्बाधतीति। कविभिर्न प्रयुक्तं यदप्रयुक्तं तदुच्यते। यथा। कामचीकमथाः केमी त्वामजिह्वायकीयिषन्। ससस्ति किं यचन्ती मे शम्बःकम्बं धरिष्यति। अत्रा चीकमथाअजिह्वायकीयिषन्ससस्तिवचन्तिधरिष्यति शंबःकंबमिति शब्दानुशासनसिद्धान्यपि कभिर्न प्रयु

कुचयुगं पत्रावृतं मा रुथा इति अन्यकारकवैय्यर्थ्यमिति "सलील पाणिद्वयलोलनालमानत्तिंतातास्रदलंदधल्लीमिति घतादृशमेवोदा हृतम्। अत्र केचिदाहुः। बाधतिधातुं संस्कारप्रच्यावनेन बाधते इति बाध तिबाध स्तस्यसंबोधनंबाधतिबाधेति ते तव वचनमिति शेषइति। तदसत्। नेयार्थत्वप्रसंगात्। अन्येतुबाधतिर्बाधतेयथेति पठन्ति। इदंतत्वम्। विद्यमानस्याप्यर्थवत्त्वस्याविवक्षायां गवि त्ययमाहेत्यादाविव प्रातिपदिकसंज्ञानप्रवर्त्तते। कविभिरिति। अस्तिहिकिंचित्यदंयत्राप्रयोज्यत्वेनेवहेयता। यद्येवंलोकेप्रयुज्यमा नस्य साधुतैवप्रसक्ता इत्यतउक्तं कविभिरिति। काव्ये यस्या प्रयो ज्यत्वमेव दुष्टत्वबीजं तदित्यर्थः। तथाभूताचपदजातिरलंकारकारस मयादृश्यते। तथाचैकेनपुंदैवतशब्दोऽपरेणाचीर्णशब्दउदाहृतः। एवमन्यदप्यप्रयुक्तमित्याशयवान्किंचिदुदाहरति। कामचीकमथा इति। उदाहरणत्वान्नैकोत्रश्लोकोगवेष्यः। एकपद मात्रप्रयोगस्तुत्या ज्यःसमयविरोधान्नादादित्याराध्याः। अचीकमथाइतिकर्मणिलङन्तस्य लुङि चङि द्विर्वचनसन्वद्भावदीर्घत्वह्रस्वत्वणिलोपेषु रूपम्। कांना यिकांकामितवानसीत्यर्थः। अमीचकेत्वामात्मनोह्वायकमेषितुमिष्ट वन्तः। ह्वायकशब्दात्क्यच्। ततःसन्। ततोलङिअजिह्वायकीयिष न्निति रूपम्। सःकश्चित् सस्ति। स्वपितिषससस्तिस्वप्नेइतिधातो

ज्यन्ते। पदंश्रुतेरसुखदंकष्टमित्यभिशब्दितम्। यथा। वर्वर्ष्टिजलदो यत्रयत्रदर्द्धर्ष्टिचातकः। पोपुल्लूतिनीपः कालो यं चर्कर्ति हृदयं मम। अत्रवर्वर्ष्ट्यादीनि क्रिया पदानि श्रुत्यसुखदानि श्रुयन्ते ॥ ३ ॥ पादपूरण

रूपम्। कंबः शम्बमिति। कंशंशब्दौजलवाचकौताभ्यांकंशंभ्यां वभयुस्तितुतयसइतिमत्वर्थीयोवप्रत्ययः। तत्राद्येनजलधरोजलाशयं सेक्ष्यतीत्यर्थः। शम्बःकम्बमिति क्वचित्पठ्यते। तत्रकल्याणवान्कपालिनंसेक्ष्यतीत्यर्थोबोद्धव्यः। घृसेचनइत्यस्यधातोर्घरिष्यतीति रूपम्। सहि धातुर्घृतघृणाघर्मेभ्यो नान्यत्र युज्यत इति पूर्वाचार्याः। कविभिरित्यनेनासाधुशङ्काव्यावर्तितेत्याह। शब्दानुशासनसिद्धान्यपीति। पदमित्यादि। दुर्वचकवर्णारब्धपदंकष्टोच्चारणीयतयाकष्टमुच्यते। श्रुतेरसुखदमिति। दूषकताबीजोद्घाटनम्। कदर्थिताहितेन श्रुतिशक्तिर्नतद्वाक्यप्रतीकपरामर्शक्षमेति। काव्यप्रकाशकृतापदैकशः कष्टउक्तः। यथा। तङ्गच्छसिद्ध्यै। अपेक्षतेप्रत्ययमङ्गलब्ध्यै इत्यत्रध्यै ध्यै इति तत्राह। पदमिति। नहि समस्तवस्तुकटुत्वएवपदंकष्टत्वमासादयति। कार्त्ताथ्यमित्यादौतदुदाहृते तदभावात्। एकदेशकष्टतया पदकष्टत्वमिति चात्रापि नदण्डवारितमिति भावः। वर्वर्ष्टि। पुनःपुनर्वर्षति। वृषेर्यङ्लुगन्तस्यरूपम्। दर्धर्ष्टिपुनःपुनर्धृष्टोभवति। त्रिधृषाप्रागल्भ्यइत्यस्यतत्रैवरूपम्। दर्द्रष्टीतिपाठेदृशेर्यङ्लुक्यमागमेचरूपम्। पुनःपश्यति। नीयःकदम्बः। पोफुल्लूति। फुल्लविकसनइत्यस्यतत्रैवरूपम्। एवंभूतोवर्षासमयोममविदूरकान्तस्यहृदयंचर्कर्त्ति। पुनःपुनरतिशयेनवा छिनत्ति। कृतीछेदनइत्यस्यरूपम्। भूयसां कष्टपदानां सप्रभिव्याहाराद्वाक्यदोषइति भ्रान्तिः स्यात्तत्राह। क्रियापदानीति। कथमेवंविभागोवसीयत इत्यत आह श्रूयन्तइति। श्रोत्रप्रत्यक्षेणैव पदमात्रगामितया कष्टत्वमनुभूयत इत्यर्थः। पादपूरणेति। द्योतनोयमर्थमन्तरेण प्रयुक्तमव्ययमनर्थकमभिमतमतएवप्राच्यैश्चादिपदमव्ययमितिप्रयोगबीजकथनार्थंनहि नि

मात्रार्थमनर्थकमुदाहृतम्। यथा। बिभर्तियश्चदेहार्द्धं प्रियोमिन्दुंहिमूर्द्धनि। सवैदेवः खलुत्वांतु पुनातु मदनान्तकः। अत्रच वैहिखलुतुइत्येतानि पदानि पादानेव पूरयन्ति ॥ ४ ॥ रूढिच्युतं पदं यत्तु तदन्यार्थमिति श्रुतम्। यथा। विभजन्ते न येभूपमालम्भन्ते न

मूलः प्रयोगः सज्ञवति वृत्तनिर्वहणसमर्थः। प्रायेणाव्ययपदानिचेत्यत्वा तत्पूरयति तदुक्तम्। कुकविप्रबन्ध इव श्लिष्टपदप्रचारः प्रकटतुहिनचयोजनाकीर्णश्चेति। बिभर्त्तीति। चः समुच्चयादिषु चतुर्षु प्रसिद्धप्रयोगो नच तेषामन्यतमो प्यत्र संज्ञवति। नाप्युच्चावचार्थंग इति ज्ञापलेनार्थान्तरमपि। एवंहि प्रकृतिष्वत्रसेयम्। एतेनैतदप्यपास्तम्। यदाहुरेके। पदादिविशेषानुपदानात्पदैकदेशोऽप्यनर्थको ऽनिमतः। तथाच। आदावब्जनपुञ्जजलिप्लवपुषांश्वासानिलोल्लासितप्रोत्सर्पद्विरहानलेन च ततः संतापितानां दृशाम्। संप्रत्येवनिषेकमश्रुपयसा देवस्य चेतोजुवो जन्नीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणाइत्यत्रदृशामितिबहुवचनमनर्थकंकुरङ्गेक्षणाया एकस्याएवोपादानात्। नचात्र व्यापारे दृक्शब्दो वर्त्तते। अब्जनपुञ्जलेपादीनामनन्वयापत्तेः। तथा कुरुतइत्यात्मनेपदमनर्थकमकर्त्रभिप्रायक्रियाफलादिति। अपिच। बहुत्वकर्त्रभिप्रायफलाज्ञावेकथनंद्वयोरसाधुत्वमिति राजमार्गएव ज्ञमः। नहि स्वरूपत एव किंचिदसाधुसाधु वा संज्ञवति। रूढिच्युतमिति। शक्तिमनपेत्यप्रयुक्तं रूढिच्युतम्। अतएवयदभिसंधायप्रयुज्यतेनकथंचनयतस्यासावर्थइति अन्वर्थमन्यार्थमितिनाम। एतदेव धातुविशेषोवान्तरमुपसर्गविशेषयोगतो योगवानित्यादिनान्यैरुक्तम्। विभजन्त इति। भजिःसेवार्थो विरुपसर्गस्तद्गतविशेषद्योतकस्ततश्च यथा विद्योततइति। अत्र विशिष्टधात्वनुरूपप्रयोगाज्जिघ्रानं तथात्रापि ज्ञविष्यतीति ज्ञमो बीजमत्र शब्दशक्तिस्वज्ञावात्। क्वचिदुपसर्गोपसंदानेन धातुरर्थान्तर एव वर्त्ततेयदाहुः। उपसर्गेणाधात्वर्थोबलाद

तेप्रियम्। आवहन्ति न ते दुःख प्रस्मरन्ति नये प्रियाम्। अत्रविभजतेर्वण्टने आलभतेर्मारणे आवहतेः करणे प्रस्मरतेर्विस्मरणे रूढिर्नतु विशेषसेवायाम भितोलाभे समन्ताद्वहने प्रकृष्टस्मरणेचेति ॥५॥ यत्तु तुच्छाभिधेयंस्यादपुष्टार्थं तदुच्यते। यथा। शतार्धप ञ्चांशभुजो द्वादशार्धार्धलोचनः। विंशत्यर्धार्धमूर्द्धा वः पुनातुमदनान्तकः।अत्रदशबाहुस्त्रिलोचनःपञ्च वक्त्रइति तुच्छमेवाभिधेयमतुच्छशब्दैरुक्तमितिअपु ष्टार्थम्॥६॥असंगतं पदं यत्तदसमर्थमिति स्मृतम्। य

न्यत्रनीयते । प्रहाराहारसंहारविहारपरिहारवदिति तदाह । अत्रविभजतेरित्यादि । नन्वर्थापेक्षित्वेपदार्थदूषणमेवंविधमिति वामनः । नैतत् । पदस्यैवान्वयव्यतिरेकवत्वात् । नह्यत्रान्व यस्यापराधःकश्चित् । किंतुशब्द एव वृत्तिस्खलितादिभिरपराध्य ति । यदिचार्थायत्तितामात्रेणार्थदोषत्वं कथमसाधुप्रभृतीनाम पि शब्ददूषणता । नहि तानि स्वरूप तयवतथाऽपित्वर्थविशेषो विशेषएवाश्वगोश्वादिवदिति ।° अर्थदोषास्तुयथा भवन्ति तथा व क्ष्यामः । यत्तुतुच्छाभिधेयमिति । स्तोकशब्दाभिलप्यार्थेबहुतरशब्दव हुलमित्यर्थं । नहि तथाक्रियमाणमल्पीयसीमपिप्रकर्षतां पुष्यतियन त्याज्यनस्यादित्यपुष्टपदेन सूचितम्। शतस्यार्धं पञ्चाशत्तेषा पञ्चत सोंशोदश। समासेपूरणप्रत्ययलोप । असंगतमिति। कथंपुनरिदम न्यार्थाभिधीयते । अत्राराध्याः । अन्यार्थंकेवलंयोगाद्रूढिर्बलवती । असमर्थं तु केवलयोगाद्योगरूढिः । तदपरेदूषयन्ति । तथापि रूढिच्युतिः साधारण्येवतदवान्तरविशेषइयमन्यदिति । तन्न । ज्ञा वानवबोधात् । किंचि द्व पदमपवादकारणबलादवगम्यमानमपि योगमनपेक्ष्यैवक्वचिदर्थविशेषे वर्त्तते । यथा गौरिति । नहि गमन स्य वाक्यार्थं प्रवेशः संभवति । किंचित्पुनरसतिबाधहेतौ बुध्यमा

था। जलं जलधरे क्षारमयं वर्षति वारिधिः। इदं बृंहितमश्वानां कुकुद्मानेषहेषते। अत्रजलधरोमेघो वारिधिःसमुद्रोबृंहितंगजानां हेषितमश्वानामितिलोकप्रसिद्धं तदिहसमुद्रमेघाश्ववृषभविषयतया प्रयुज्यमानमसंगतार्थत्वादवाचकमित्यसमर्थम् ॥ ७ ॥ अप्रतीतं तदुद्दिष्टं प्रसिद्धं शास्त्रएव यत्। यथा। किं भाषितेन बहुना रूपस्कन्धस्य सन्ति मे न गुणाः।गुणनान्तरीयकंच प्रेमेति न तेऽस्त्युपालम्भः। अत्ररूप

नस्य त्यागायोगाद्योगविशिष्टमेवोपाधिमभिधत्ते । यथापङ्कज मिति । तत्राद्य प्रकारे रूढिरेव सर्वस्वमिति तत्परित्यागे रूढिच्युतम् । द्वितीये तु योगमात्रे प्रयुक्तमसंगतं शक्तिशून्ये प्रयुक्तं शक्त्यैकदेशे प्रयुक्तमिति जिनोक्तार्थस्तदेतत्सर्वं व्याख्यानेन स्फुटयति । अत्रजलधरेति । जलधरादिपदानिजलधारणादिविशिष्टमेघत्वादौ रूढानिधानशक्तीनिकथमेतदवसितमितिचेत्तत्राह । लोकप्रसिद्ध मिति । लोकाधीनावधारणत्वाच्छब्दार्थसंबन्धस्येतिभावः । ततश्चय द्विशिष्टस्य योगस्य शक्तिविषयतया न तेन सकेतः । यत्रच समुद्रादौ प्रयोगो न तदुपाधिभिःसमुदत्वाद्यैःसंभूय शक्त्यासङ्केतः। क्षारादिपदोपसंदानेनच समुद्रादौ प्रयोग इत्याह । तदिहेति । अतएव न तदवस्यस्य पदं वाचकमतएवचात्रमत्वादसमर्थमितिसंज्ञयैव व्यवह्रियतइति संक्षेपः ॥७॥ अप्रतीतमिति । शास्त्रमात्रप्रसिद्धं शास्त्रव्यवहारिभिः संकेतितमित्यर्थः । प्रतीताप्रतीतसमभिव्याहाररूपंद्विवाक्यमशास्त्रज्ञविषयं प्रयुक्तमभिमतार्थप्रतीतिं न जनयितुमीष्टे । तत्राप्रतीतानामेवापराधोऽतःपरिस्खलनखेददायितयाजघतिदुष्टत्वम् । अतएवाप्रयुक्ताद्बहिर्भावः । किंभाषितेनेति । रूपस्कन्धवाचोयुक्ति सौगतसमयप्रसिद्धा । तेषां रूपंवेदनासंज्ञा संस्कारो विज्ञानमितिपञ्च स्कन्धाः । तत्रापिरूपस्कन्धपदार्थएकाद

स्कन्धनान्तरीयकशब्दयोः शास्त्रप्रसिद्धत्वादन्यत्रा
प्रतीयमानयोः प्रयोगादप्रतीतम् ॥ ८ ॥ दूरेयस्या
र्थसंवित्तिः क्लिष्टं नेष्टंहि तत्सताम्।यथा।विजितात्म
भवद्वेषिगुरुपादहतोजनः। हिमापहाभित्रधरैर्व्याप्तं
व्योमाभिनन्दति। अत्र विना गरुत्मता जित इन्द्र
स्तस्यात्मभवोऽर्जुनस्तस्य द्वेषीकर्णस्तस्यगुरुः सूर्यस्त
त्पादैरभिहतो लोकआकाशमभिनन्दति। कीदृशम्।
हिमापहोवह्निस्तस्यामित्रोजलं तद्धारयन्ति ये मेघा

शपदार्थकः। पञ्चेन्द्रियाणि पञ्च विषयाविज्ञप्तिरेकादशीतिप्रक्रि
या। अन्तरमितिविनार्थे गहादौ पठ्यते। तत्रनवइति छे स्वार्थिके
च कनि नञ्समासे पृषोदरादित्वान्नलोपाभाव इति भाष्यटीका।
प्रेम्णोव्यापकागुणानसन्तिमे नचव्यापकमन्तरेणव्याप्यंभवतीति व्या
पकानुपलब्धिप्रयुक्तत्वात्प्रेमाभावस्य तथोपालम्भे वाच्यता नास्ती
ति भावः। शास्त्रएवेत्यवधारणेन यद्व्यावर्त्यते तदाह। अन्यत्रे
ति। लोक इत्यर्थः ॥८॥ दूरइति। दूरंचिरंविलम्बइत्यनर्थान्तरम्।
क्लेशोद्विविधः। पदविषयोवाक्यविषयश्च। आद्यः सामान्यशब्दस्यप्र
करणादिकमनपेक्ष्य क्वचिदन्निप्रेतविषये प्रयोगः। तथासति वाचक
तायामपिस्फुटिति प्रतिपत्तिर्नभवति। किंतु परस्परान्वयपर्यालो
चनयाचिरेणेतिविरसत्वम्। यदाह। नेष्टं हि तत्प्रसितानामिति।
अयमेवार्थो व्यवधानपदेनवामनादिभिरुक्तः। द्वितीयस्तुव्याकीर्णा
दिपदेनाऽन्यथावक्ष्यते। विजितेति। विशब्देनपक्षिसामान्यवचने
नतद्विशेषोगरुडात्मा विवक्षितः। तज्जितोपिविशेषएव। एवमन्य
त्रापि। नचाऽत्राऽपिकिंचिज् झटितिप्रतीत्यनुगुणं नियमकारण
मस्तीति युक्तमेव व्यवधानम्। हिमापहो वन्हिरिति। हन्तेर्डप्र
त्ययेरूपम्। तथाचचन्द्रगोमी डप्रकरणे हन्तेर्डइत्येव सूत्रितवा
न्। हिमापहो वन्हिरिति। क्विपि व्यभिचारं दृष्ट्वाब्रह्मभ्रूणेत्यादि

स्तैर्व्यांप्रमिति व्यवहितार्थप्रत्ययंक्लिष्टमेतत् ॥ ९ ॥ गूढार्थमप्रसिद्धार्थं प्रयोगंब्रुवतेबुधाः। यथा। सहस्रगो रिवानीकं भवतोदुःसहंपरैः। हरेरिव तवाभानूति ना न्यतेजांसि तेजसि।सहस्रगुशब्देनसहस्राक्ष उक्तः।नच गोशब्दस्याक्षिणभूयसीप्रसिद्धिः । हरिशब्देनचसहस्रां शुः सोपिनतेननाम्ना बहुभिरुच्यतइतिगूढत्वम् १०॥ स्वसंकेत प्रकल्प्यार्थं नेयार्थमितिकथ्यते। यथा। मुखां शंयन्तमास्थाय विमुक्तपशुपङ्क्तिना । पङ्क्त्यनेक

सूत्रितंचन्द्रगोमिना ॥ ८ ॥ गूढार्थमिति । यस्यपदस्य द्वावर्थौप्रसिद्धश्चा प्रसिद्धश्चतच्चेदप्रसिद्धे प्रयुक्तं तदा गूढार्थम् । अप्रसिद्धार्थप्रयोगमिति। अप्रसिद्धेर्थे प्रयोगो यस्येति गमकत्वाद्बहुव्रीहिः । तव तेजस्विनाऽन्य तेजांसि म्लान्तीति योजना । गौःशराऽक्षिपयःस्वर्गपशुन्नेदवचःसुचे त्यास्नातोपि तथानाऽक्ति प्रयुज्यते यथा पशुन्नेदादावित्याह । नच गोशब्दस्येति । हरिः कृष्णेच सिंहेच नेकाऽर्कनुजगेषु चेति स्वसंकेतितस्यापि हरिशब्दस्य नतथा रवौप्रसिद्धिर्यथाऽन्यत्रेत्याह। सोपिनेति ॥ १० ॥ स्वसंकेतेति। कल्पितार्थं नेयार्थमिति सूत्रयित्वा वामनेन व्याख्यातम् । अश्रौतस्यार्थस्य कल्पनाकल्पनाऽकल्पितार्थं म् । अस्यार्थः । यत्पदंनानार्थस्वपर्यायलक्षणयाविवक्षितप्रतीतिप र्यन्तं नीयते तत्कल्पितार्थमितिकेचित् । तदयुक्तम् । स्वपर्यायेत्य स्यव्यर्थत्वादव्यापकत्वाच्च । तस्मात्प्रयोजनं विना लक्षणया प्रयु क्तमित्येवार्थः । यदाहकाव्यप्रकाशकारः । नेयार्थंयत्त्वशक्तितइति यस्मिन्निषिद्धं लाक्षणिकमिति । प्रयोजनं विना रूढं लक्षणापरिग्र हे न दोषः । तथाच द्विरेफरथाङ्गनामादिपदानां रेफद्वयानुगतत्व मरादिशब्दलक्षणाद्वारेणषट्पदादौ वृत्तिर्वृद्धव्यवहारपरंपरानुपा तिनीति तेषां प्रयोगोऽयुक्त एव । अतएव तुरङ्गकान्तामुखहव्यवाह ज्वालेव जित्वा जलमुल्ललासेत्यादिकमपि नेयार्थमितिकाश्मीरकाः।

जनामध्रतुकाजितउलूकजित्। अत्रपङ्क्तिशब्देनद
शसंख्या अनेकजनामेत्यनेन चक्रं तध्रइत्यनेनरथस्ता
भ्यांदशरथस्तस्यतुकूबालकोलक्ष्मणस्तेन जित उलूक
जिदिन्द्रजित् किंकृत्वा मुखांशवन्तमास्थायहनुमन्तं
किंभूतेन विमुक्तपशुपङ्क्तिना विमुक्तेषुपङ्क्तिना
अत्रपशुशब्देनगोशब्दोलक्ष्यतेतेनेषवस्तदिदं स्वसङ्के
तकल्पितार्थं नेयार्थमुच्यते॥ ११ ॥ नयत्पदं निश्च
यकृत्संदिग्धमितितद्विदुः।यथा। नीललोहितमूर्त्तिर्यो
दहत्यन्ते जगत्त्रयम्।सएवहि महादेवस्त्रिषुलोकेषु पू
ज्यते। अत्रवह्निरर्कः शिवोवेतिनानिश्चीयते १२॥विप

तदेतत्खपदेन दर्शितवान्। मुखस्यांशो हनुरत्राभिमतः। पङ्क्ति
रिति दशाक्षरंछन्दःदशसंख्यालक्ष्यते । अनेकजोद्विजश्चक्रवाकस्त
स्यनामचक्रंरथैकदेशस्तद्वारयतीतिधारयतेर्मूलविभुजादित्वात्कः ।
ताभ्यामिति। पङ्क्तिरनेकजनामयस्येत्यर्थात्। तुकतोकंतोक्मामित्य
पत्यनामानि । उपलक्षणतयैकदेशंव्याचष्टे । अत्रपशुशब्देनगोशब्दो
लक्ष्यतइतिप्रकृतापेक्षया । तेनेषवः प्रत्याय्यन्तइतिशेषः ॥ ११ ॥
नयत्पदमिति। पदस्वरूपमेव संदिह्यमानमत्र । तथाहि। सएवहि
महादेव इत्यत्र सकिमेषहिमहादेव इति च्छेदो विधीयतां मह्या
देवइति वाबाधकबाधकप्रमाणाभावेसंदिह्यते । न च विशेषण
नियमहतुः । बहूनर्कावपि हि भगवतो नीललोहितमूर्त्तिंभूतौ हि
मापहौ च न निश्चयकृदितिदूषणताबीजप्रदर्शनम् । यदैको विव
क्षितस्तदा दोषः। साधुचर इत्यत्रापि भूतपूर्वेचरडितिचरट्प्रत्यये
किं पूर्वंसाधुरथवाचरेष्टप्रत्यये साधुष्चरतीति पदमेव संदिह्यते
तेनपदावयवःसंदिग्धइति केनचिदुक्तंतदप्यपास्तम् ॥ १२ ॥
विरुद्धमिति । विपरीतं प्रकृतोपमर्दैकमर्थकल्पनं यत्र । तथाहि ।
अनुत्तमेत्यादौप्रकरणादिभिस्तुतिपरत्वे व्यवस्थिते उत्तमत्वाज्ञाबा

रीतंविरुद्धार्थप्रकल्पनमिहोच्यते।यथा।अनुत्तमानुभावस्यपरैरपिहितौजसः।अकार्यसुहृदोस्माकमपूर्वास्तवकीर्तयः।अत्रानुत्तमा इत्यनेन यथोत्कृष्टस्तथा ऽपकृष्टोपि। अपिहितमित्यनेनयथानाच्छादितंतथाच्छादितमिति।अकार्यसहृदित्यनेनयथाकार्यमनन्तरेणसुहृदेवमकार्येयः सहृत्सोप्युच्यते।अपूर्वाःकीर्तयइत्यनेन यथाद्भुताः कीर्तय एवमकीर्तयोप्युच्यन्ते॥ १३॥ अप्रयोजकमित्याहुरविशेषविधायकम्।यथा। तमालश्यामलक्षारमत्यच्छमतिफेनिलम्। फालेन लङ्घ

दिना विरुद्धेनार्थेन तत्रपर्यवसाययितुं नशक्यते । संशययुगपद्विवक्षायामपि न विरोधः । स्तुतिनिन्दयोर्योगपद्यमसम्भावितमतएवैकस्य संभवेत्परस्य बाधएव यथा । चिरकालपरिप्राप्तलोचनानन्ददायिनः । कान्ताकान्तस्य सहसा विदधाति गलग्रहमिति गलग्रहशब्दस्य कण्ठग्रहप्रतिदृन्द्विन्यर्थे विवक्षिते पूर्वप्रक्रान्तानन्ददायित्वं बाध्यते । अत्रानुत्तमइति बहुव्रीहितत्पुरुषाभ्यामपिहितमिति षष्टिभागुरिरित्यादिना विकल्पनाकारलोपविधानात् । अपूर्वाइति । पक्षान्तरेऽकारपूर्वाः । नियामकसद्भावे तुगुण एव । यथा । अपूर्वंयद्वस्तुप्रथयतिविनाकारणकलामिति शब्दरूपान्तरमेवविरुद्धोपचायकमित्यन्वयव्यतिरेकाभ्यां शब्ददोषतात्पर्यवस्थितिः॥ १३॥ अप्रयोजकमित्याहुरिति । तदेवाहिकथीनामुपादेयं यद्वाक्यार्थप्रकृष्टकाष्ठांपुष्णाति । अन्यथाऽनङ्गनिधानेऽवाच्यवचनमेवस्यात्सार्थकत्वादनन्वयत्वाच्च । नवृत्तपूरणमात्रप्रयोजनतानातिशयमिति । सागरलङ्घनद्वारोहनूमतः प्रकर्षोवाच्यः । नचतमालश्यामलत्वादिविशेषणानिकथं चित्प्रकर्षमर्पयन्तियानिदूरत्वादीनि तथानतेषामुपादानम् ॥ १४ ॥ तद्दृश्यमिति । अव्युत्पत्तिमत् । प्रकृतिप्रत्ययविभागशून्यंलोकमात्रप्रयुक्तंपदमनादेयंनव

यामासहनूमानेषसागरम्।अत्रतमालश्यामलमित्यादीनिसागरविशेषणानि तानि न हनूमतो लङ्घनेऽतिशयं सूचयन्ति ॥१४॥ तद्देश्यमिति निर्दिष्टं मद व्युत्पत्तिमत्पदम्। यथा। गल्लौ लावण्यतल्लौ ते लडहौ मडहौ भुजौ। नेत्रे वोसहकन्दोट्टमोट्टायितसखेसखि। अत्रगल्लतल्लादयः शब्दाअव्युत्पत्तिमन्तो देश्या दृश्यन्ते ॥१५॥ अश्लीलामङ्गलघृणावदर्थं ग्राम्यमुच्यते। अत्राश्लीलमसभ्यार्थमसभ्यार्थान्तरं च यत्। असभ्य

ति। तद्द्विविधम्। अभागंत्रागवत्त्वेति। आद्यदेश्यम्। द्वितीयं ग्राम्यमितिविज्ञागः। व्युत्पन्नानामन्यादृशीच्छायादेश्यानांचनतादृशीतिदेश्यवद्यपदसमभिव्याहारे प्रायेणछायावैरूप्यंबन्धस्यभवतीतिसहृदयहृदयसाक्षिकंदोषबीजम्। तल्लमल्यसरः ललहंसमनोहरंमडहंकुशंवोसट्टंविकसितंकन्दोट्टनीलोत्पलंमोट्टायितंविलासः ॥ १५ ॥ अश्लीलेति। देश्यातिरिक्तंलोकमात्रप्रयुक्तंग्राम्यं तत्त्रिधाव्रीडाजुगुप्सातङ्कदायित्वात्। तत्राद्यमश्लीलंश्रीर्यस्यास्तिश्लीलंसिध्मादेराकृतिगणत्वाल्लच्। कपिलकादिपाठाल्लत्वम् नश्लीलमश्लीलं व्रीडादायित्वेनाक्रान्तमित्यर्थः। द्वितीयंघृणावदर्थकम्। जुगुप्सादायिप्रत्याय्यमस्येति। तृतीयममङ्गलार्थंमातङ्कदायित्वाप्यमस्येतिकृत्वाऽश्लीलपर्यायोऽसभ्यशब्दः। सभायांसाधुरित्यर्थंतेनापिशास्त्रेव्यवहारइतिप्रदर्शनार्थंमसत्यशब्देनाश्लीलमनूद्याचष्टे। तत्रासभ्यमिति। अर्थस्यासभ्यत्वात्पदमप्यसभ्यम्। सचार्थः क्वचित्प्रकृतोप्रकृतोपिश्लेषोपस्थितएकदेशात्स्मृतिमात्रारूढोवा। तत्रयथाक्रमंसभ्यादयस्त्रयः। एवममङ्गलादयोपि। सूर्यसुतायमुना। अत्रसिन्धुर्गङ्गा। तयोर्मध्येपारेमध्येषष्ठ्यावेतिअव्ययीभावः। अर्धंहरेरर्द्धंहरस्येतिशरीरैक्ये। काटशब्दस्यासभ्यार्थत्वेतद्विशेषणानामप्यसभ्यत्वमिति तान्यादायव्याचष्टे। अत्रचलत्राकारेति ॥ १६ ॥ * ॥

स्मृतिहेतुश्चत्रिविधंपरिपठ्यते। तेष्वसभ्यार्थंयथा। छत्राकारशिराः शिरालसरलस्थूलप्रकाण्डो महान्मध्ये भानुसुताभ्रसिन्धुविपुलाभोगो वटः पातुवः। कायैक्ये विकटप्रसारितमहाजङ्घंमहीसुप्तयोर्यः खण्डेन्दुकिरीटकैटभजितोःकाटश्रियंकर्षति। तदेतच्छत्राकारशिराःकाटइत्यादेरसभ्यार्थत्वादसभ्यार्थम्१६॥ असभ्यार्थान्तरंयथा। विद्यामभ्यसतो रात्रावेति याभवतः प्रिया। वनितागुह्यकेशानां कथं ते पेलवन्धनम्। तदेतद्याभवतःप्रियागुह्यकेशानांपेलवन्धनशब्दानामसभ्यार्थान्तरत्वादसभ्यार्थान्तरम्॥१७॥ असभ्यस्मृतिहेतुर्यथा। उत्कम्पयसि मांचूतपिकवाक्काटवेनकिम्।कृतः

विद्यामिति। यारात्रौविद्यामभ्यसतोमन्त्रमावर्त्तयतस्तवप्रिया समायातिसायक्षिणी। अतः कथंतेघनंपेलवंकोमलंस्वल्पंमितियावत्। किंतुयक्षिणीप्रसादाद्बहुधनंतवोचितमित्यर्थः। प्रकृतपदानित्वसभ्यार्थान्तराणितान्युद्धृत्यव्याचष्टे। तदेतद्याभवतः प्रियेति। असभ्यार्थप्रकाशनमेवषष्ठ्याआक्रोशइत्यर्थः। किंयाभवतः प्रियेति। एकंपदंयाभोमैथुनंतद्वतः प्रियेत्यर्थात्। योनिर्वनितायागुह्यस्तस्यकेशाः। पेलशब्दोमुष्कयोः प्रसिद्धः। तत्रबन्धनमिति॥ १७॥ उत्कम्पयसीति। हेचूतवृक्षकोकिलस्यवाचाकटुत्वेनदुःखदायित्वात् किंमां भापयसि। ननुतवकृकाटिकायाग्रीवायापादंदत्वाचलितामम प्राणास्तेनमयाजितम्। व्यर्थस्तवायंपरिश्रमइतिवाक्यार्थोविवक्षितः। काटवशब्देकाटएकदेशः कृकाटिकाशब्देकाटिकेतिलोपः। काट काटिका॥१८॥ खेटकइति। अतृप्तःसुखस्येयत्तापरिच्छेदाभावात् खेटकेग्रामेयद्भक्तंसूपश्चोत्पद्यतेतस्यपत्तनस्यनगरस्य यावलभीतस्यां सुहितार्थयोगेषष्ठीनिषेधाल्लिङ्गादनुमीयते तृप्त्यर्थयोगेषष्ठीभव

कृकाटिकायां ते पादः प्राणेन यास्यता। तदिदंकाट
वकृकाटिकापदयोरसभ्यस्मृतिहेतुत्वादसभ्यस्मृतिहे
तुता१८॥लोकेषुयदशस्तार्थमशस्तार्थान्तरंचयत्।अश
स्तस्मृतिहेतु श्चामङ्गलार्थंत्रिधैवतत्। तेष्वशस्तार्थंय
था। खेटके भक्तसूपस्य वलभ्याः पत्तनस्यच। अतृप्तो
हंमरिष्यामि हेहलेभाषितस्य च। अत्रमरिष्यामीतिप
दमशस्तार्थम् १९॥ अशस्तार्थान्तरंयथा प्रवासयति
याकान्तं वसन्ते गृहसंस्थितम्। विना शपथदानेन
पिशाची सा नचाङ्गना। अत्र प्रवासयतिसंस्थितं
विनाशपथदानेनपिशाचीपदानामऽशस्तार्थान्तरत्व
म् २०॥ अशस्तस्मृतिहेतुर्यथा। मारीचोयं मुनिर्यस्य
कृत्याकालान्तकालये। पत्न्यांसङ्क्रन्दनादीनां सुता
नामाप्तयेभवन्। अत्रमारीचकृत्याकालान्तकसङ्क्र
न्दनपदानामशस्तार्थस्मृतिहेतुत्वम् ॥ २१ ॥

ति। अन्येतुव्याचक्षते। भक्तसूपपदनामादक्षिणापथेविषय स्तत्सद्म
निखेटकेवलभीनामकस्य चिद्विरूपाक्षाधिष्ठानस्यतत्रैवपत्तनस्यहेहले
स्त्रीणामव्यांजमन्योन्यप्रेमातिशयगर्भस्य भाषितस्येति ॥ १९ ॥
प्रवासयतीति। शपथदानेनविनाप्रवासयति। अन्यत्रप्रहिणोतिगृ
हेसम्यक् स्थितंप्रियंसाङ्गनान किंतुपिशाचीवदनुचितकारिणी
त्यर्थोभिमतः। अन्यत्रप्रवासनमुच्चाटनंसंस्थानंविनाशः विनाश
स्यपन्थास्तस्यदानम्। पिशितमश्नातीतिपिशाची। पृषोदरादि
त्वात्। तदेतद्व्याचष्टे। अत्रप्रवासयतीति ॥ २० ॥ मारीचोयमिति।
मरिचेरपत्यंमारीचः काश्यपः संक्रन्दनादीनिन्द्रादीन्द्वादशपुत्रा
नादित्यानुत्पादितवान्। तच्चकालान्तकस्यभगवतोमहादेवस्यालये
याः कृत्याः क्रियाः भगवदाराधनरूपास्तासांफलमित्यर्थः। मारी
चशब्देमारकदेशः कृत्याइतिसुबन्तपदेकृत्येत्येकदेशः कालान्तका

पदमर्थंघृणावन्तंयदाहा र्थान्तरंचयत्।घृणावत्स्मृतिहेतुर्यत्तद्घृणावदिह त्रिधा॥तेषु घृणावदर्थं यथा। पर्दते हदते स्तन्यं वमत्येष स्तनन्धयः। मुहुरुत्कौति निष्ठीवत्यात्तगर्भा पुनर्वधूः। पर्दतेहदतेवमति निष्ठीवतीतिशब्दानां घृणावदर्थत्वम् ॥ २२ ॥ घृणावदर्थान्तरं यथा॥ बाष्पक्लिन्नाविमौ गण्डौ विपूयापाण्डरौ तव॥ प्रियोग्रे विष्ठितः पुत्रि स्मितवर्चोभिरर्चति॥ अत्र क्लिन्नगण्डविपूयाविष्ठितवर्चः पदानाङ्घृणावदर्थान्तरम्॥२३॥ घृणावत्स्मृतिहेतुर्यथा। प्रत्यार्द्रयन्तोरूढानि मदनेषुव्रणानिनः। हृदय

लयइत्यत्रान्तकतिसंक्रन्दनेशब्दक्रन्दनेति॥ २१॥ उत्कौति। उत्कारंकरोति। निष्ठीवति थूत्करोति। आत्तगर्भापुनर्वधूरिति। बालस्य स्तन्यवमनादिनिदानसूचनम्। अतएवनगर्भिण्याः पिबेत् क्षीरंपारगर्भिककृत्तुतदिति वैद्यकम्॥ २२॥ बाष्पेति। विपूयोमुञ्जः विशेषेणस्थितोविष्ठितः। स्मितवर्चोहास्यतेजः। तवकपोलौदृष्ट्वापुरःस्थितस्तवप्रियईषद्धास्यंकुर्वन्कपोलयोर्हास्य ज्योत्स्नयापूजाकरोतीत्यर्थः। अन्यत्रबाष्पेणोष्मणाक्लिन्नोमृदूभूतः। गण्डोव्रणः। विशिष्टः पूयोविपूयस्तेनपाण्डरः विष्ठितोविष्ठासञ्जातास्य। वर्चः पुरीषम्। यत्स्मरणात् बाष्पादीनांघृणावतिवृत्तिस्तदेवपृथक्कृत्याह। अत्र क्लिन्नेति॥२३॥ प्रत्यार्द्रयन्तइति। अन्योन्यलग्नोवृक्षसमूहः षण्डः। रूढानीत्यनेनमदनेषुव्रणानांविशेषितत्वात्। मदनेषुभागमपहायव्रणभागमात्रेणरूढव्रणस्मृति र्भवन्तीपदादेवेतिविवक्षितवान्। पुरीषण्डशब्देपुरीषेत्यकदेशः॥ २४॥ तदेवंपददोषाल्लँक्षयित्वाक्रमप्राप्तवाक्यदोषालक्षणीयाइतितान्विभजते। शब्दहीनमिति। उक्तेनैवप्रयोजनेनासमासद्वन्द्वगर्भबहुव्रीहिसमासौ। एवंगुणादिविभागवाक्येष्वपिप्रयोजनमवसेयम्। भिन्नलिङ्गवचनेत्यादौतुद्वन्द्वलक्षणस्यस

क्लेदयन्त्येते पुरीषखण्डमह द्रुपाः ॥ अत्रारूढव्रणक्लेदपुरीषखण्डपदानाङ्घृणावत्स्मृतहेतुत्वम् ॥ २४ ॥ शब्दहीनं क्रमभ्रष्टं विसन्धि पुनरुक्तिमत् । व्याकीर्णं वाक्यसंकीर्णमपदं वाक्यगर्भितम् । द्वे भिन्नलिङ्गवचने द्वे चन्यूनाधिकोपमे । भग्नच्छन्दोयतौ च द्वे अशरीरमरीतिमत् । वाक्यस्यैते महादोषाः षोडशैव प्रकीर्तिताः । अथैषां लक्ष्म संक्षेपात्सनिदर्शनमुच्यते । उच्यते शब्दहीनन्तद्वाक्यं यदपशब्दवत् । यथा । नीरन्ध्रङ्गलितवतिक्षयंपृषत्कैर्भूतानामधिपतिना शिलावितानेः । गाण्डीवीकनकशिलानिभंभुजाभ्यामाजघ्ने

मासस्यपूर्ववर्त्तिनांभिन्नादिपदानांप्रत्येकसन्चयः । यमनंयतिरिति भग्नच्छन्दोभग्नयतिरितिकेचित् । तथाचव्यतिकीर्णार्थः स्यात् । अरीतिमदिति । रीतिरस्यास्तीतिनित्ययोगेमतुप् । नित्ययोगप्रतिपादनंहिदूषकतावीजोद्घाटनायोपपद्यते । अतएववहुव्रीहौलाघवंत्रनादरः । असाधुदवसाधुमत्वस्यप्राथम्याल्लक्षणमाह । उच्यतइति। अपशब्दत्वंपदएवनियतंवाक्येसंस्कारप्रसक्तेरभावादपशब्दत्वंनवाक्यदूषणम् । तथाहि । कर्त्तरिकृदितिनियमात्कर्मणिक्तवतुरसाधुः । अकमकाच्चेत्यनुवृत्ता आडोयमहनइत्यात्मनेपदमकर्मकएव प्राप्नुयाद्भकर्मकाच्चेतिवाक्यैकवाक्यतापर्यालोचनयाऽस्याङ्गकर्मण्यसाधुः कथं वाक्यदूषणता । नहि वाक्यान्तः पातितामात्रेण सायुज्यते ऽतिप्रसङ्गादित्याशङ्क्योक्तम् । तौचति । नहि यथा बाधृधातुः परस्मैपदान्त इत्येवासाधुत्वं तथात्र पदान्तरसन्निधानापेक्षत्वेऽध्यवसीयते । भूतानामधिपतिनाशिलावितानइति यावन्नानुसंधीयते तावद्गर्भितवतीति किंकर्त्तरिकर्मणिवेतिसंदेहानिवृत्तेः । तथा गाण्डीवीविषमविलोचनस्यवक्तइत्येतावत्प्रतीत्य कथमाजघ्नइत्यस्याङ्गकर्म

विषमविलोचनस्य वक्षः । अत्र गमितवतीति क्तवतोः कर्मणि , आजघ्नइति आत्मनेपदस्यास्वाङ्गकर्मणि प्रयोगादपशब्दौ तौ शिलावितानव्यक्षवक्षः सम्बन्धाद्वाक्यदोषौ जायमानौ असाधुनाम्नः पददोषाद्विद्येते ॥ १ ॥ क्रमभ्रष्टंभवेदार्थः शब्दो वा यत्र तत्क्रमः । यथा । तुरङ्गमथमातङ्गंप्रयच्छास्मै मदालसम् । कान्तिप्रतापौ भवतः सूर्याचन्द्रमसौः समौ । अत्र मातङ्गमथतुरङ्गमिति वक्तव्ये तुरङ्गमथमातङ्गमित्यर्थः । कान्ति प्रतापौचोक्त्का सूर्याचन्द्रमसोःसमाविति शाब्दः क्रमभ्रंशो लक्ष्यते ॥ २ ॥

णि आत्मनेपदमध्यवसानयोग्यमियमेवंविधवाक्यदोषतायदनेकपदनिरूप्यतानामबाधतीत्यत्रापिकिंबाचशब्दात्क्विबन्तात्तिप् । उतबाधृधातुरिति संदेहइति कुदेश्यम् । स्कन्धादिपदसन्निधानेपि तस्यानिवृतेः । तेन त्वामनुनाथलेकुचयुगमित्यादिक्रमव्रत्यमुदाहरणंप्रमादात् काव्यप्रकाशकृता पददोषेषु लिखितम् । यथाच । उदपूतितः को न हीयतइति रुद्रटेन । तत्र ह्यपादानेचाहीयरुहोरितितसिप्रत्ययनिषेधः । सचपदान्तरसंनिधानेनैवेति स्वयमालोचनीयम् । शिलावितानव्यक्षवक्षइत्युपलक्षणम् । अधिपतिगारुडोविशब्दावपि बोद्व्याविति ॥ १ ॥ क्रमभ्रष्टमिति । अर्थादागतः क्रम आर्थः । शब्दादागतः शाब्दः । अर्थक्रमभ्रंशः कथंशब्ददूषणमतआह । इति वक्तव्यइति । मातङ्गोदीयतामथ तद्दानसामर्थ्यं नास्ति तदा तुरङ्ग इति वक्तव्ये रचनावैपरीत्यमात्रमत्रापराध्यति । नार्थइतियुक्ताशब्ददोषता ॥ २ ॥ विसंहितमिति । विशब्दोविगमंवैपरीत्यंचद्योतयति । तेनार्थद्वयंसंपद्यते । परः सन्निकर्षः संहिता । तयातत्कार्यंलक्ष्यते । संधानंसंधिः । अर्द्धमात्राकालव्यवधानंतथा चसंहिता

विसंहितोविरूपोवा यस्य सन्धिर्विसन्धि तत् । यथा । मेघानिलेन अमुना एतस्मिन्नद्रिकानने । मज्जज्यर्युद्गमगर्भासौ तर्वाल्युर्वी विधूयते । अत्र मेघानिलेन अमुना एतस्मिन्नसंहितयाविवक्षामी त्यभिसन्धानंविसन्धिः। मज्जज्यर्युद्गमगर्भासौइत्या दौतु विरूपसन्धानंविसन्धिः ॥ ३ ॥ पदस्यपदार्थ स्याभिन्नौ यत्र तत्पुनरुक्तिमत् । यथा । उक्ता

कार्यशून्यसंधानंयत्रेत्यर्थः । संहितैकपदेनित्येतिसमयादन्यत्रविकल्पः । ततोनासाधावन्तर्नावः । वैरूप्यं द्विविधम् । दुर्वचकत्वमश्लीलत्वंच । तत्राद्यमुपलक्षणतयोदाहृतम् । द्वितीयंयथा उड्डीय गगनं दूरं चलन्डामरचेष्टितः । अयमुत्पतते पत्री ततोत्रैव रुचिं कुरु । ननु यदिसंधिकार्यं वैकल्पिकं कथमत्रदोष इत्यतआह । नसंहितामिति । यदि संहिताप्रतिषेधःस्यात्तदा सकृद्विसंधिकरणेन तथावैरूप्यं भवतीति कवेरपराधो नसंभाव्यते यदितु प्रतिषेधो नास्ति असकृद्दोषादानं तदा व्यक्तवैरूप्यप्रतिभासात्कथं नदोषइत्यर्थः । नविवक्षामीत्युपलक्षणम् । विवक्षाया मप्यसकृत्प्रयोगो विरसएव । यथा । ततउदितउदारहारहारी ति । विशेषं वैशेषिके वक्ष्यामः ॥ ३ ॥ पदंपदार्थश्चाभिन्न इति । पदमभिन्नमभिन्नतात्पर्यार्थाभिधेयमितिविशेषः । तेन तात्पर्यभेदे लाटानुप्रासोऽभिधेयभेदे यमकंच न दोषः । पदार्थोऽभिन्नपर्यायशब्दोपात्तइतिशेषः । तेन पूर्वस्माद्विशेषः स्वाभिधेयतात्पर्यकपदावृत्तिः पर्यायोपादानं च द्वयमपि शब्दपुनरुक्तमिष्यते तथा च परमार्षं सूत्रं " शब्दयोः पुनर्वचनंपुनरुक्तमन्यत्रानुवादादिति„ ॥ युक्तंचैतत् । एकस्याभिधेयस्य द्विरभिधानं दोषः । तद्वाभिधानं तेनैवपदेन पर्यायेण वासंभवतीति शब्दमादायैव तस्य व्यवस्था पुनरुक्तिरत्रैव पदे भवति तत्कोत्र मत्वर्थइत्यतउक्तम् ।

नुन्मनयन्त्येते गम्भीराःस्तनयित्नवः।अम्भोधरास्त डित्वन्तो गम्भीराः स्तनयित्नवः । अत्र उक्तानुन्म नयन्तीत्यर्थपुनरुक्तम् । गम्भीराःस्तनयित्नवइति शब्दपुनरुक्तम् ॥ ४ ॥ व्याकीर्णन्तन्मिथोयस्मिन्वि भक्तीनामसङ्गतिः । यथा । दण्डे चुम्बति पद्मिन्या हंसःकर्कशकण्टके। मुखंवत्गुरवङ्कुर्वंस्तुण्डेनाङ्गानि

यत्रतदिति । यत्र समुदायेऽवयवः पुनरुक्तरूपः समतुबर्थः । अ तएव नानापदनिरूपणीयतया वाक्यदूषणमिति स्फुटोर्थः । वि कल्पितंचेदं लक्षणमेकस्यैवदूषणधुरारोहणात्तमत्वात् । संकीर्णार्थं त्वेकमुदाहरणम्। अर्थमादायैव पुनरभिधानं पुनरुक्तमिति विज्ञा वयितुं लक्षणक्रमवैपरीत्येन प्रथममर्थपुनरुक्तमुदाहृतमित्याशयवान् व्याख्यानेपि तमेव क्रममाद्रियमाणआह । अत्रोत्कानिति । उत्कउ न्मनाः । उन्मनयन्तीति । उन्मनसंकुर्वन्तीतिणिचिकृष्टवद्भा वेटिलो पे च रूपम् । अम्भोधराइतिविशेष्यपदम्। शेषाणिविशेषणानि । गम्भीरामांसलाः स्तनयित्नवः शब्दायमानाः । तडित्वन्तःप्रकृष्ट द्युक्ताः ॥४॥ व्याकीर्णंतदिति । पदानामक्लेशेप्यर्थप्रतीतिहेतुभूताका ङ्क्षावट्टिन्नक्तिव्यवधानादनाङ्क्षान्वितविन्नक्तिसन्निधानाच्च । नाहत्यप दानि विशिष्टार्थज्ञानजननसमर्थानि भवन्ति विलक्षणलक्षणक्लेशप दानिन्नमकराणीति वदतामाराध्यानामयमेवाभिप्रायो बोद्धव्यः । विन्नक्तिव्यवधानमात्रकृतस्तुक्लेशः प्रायेण पदैकवाक्यतायामुत्पद्यते । दण्डइति । आधारविन्नक्तिराधेयविन्नक्तिमपेक्षते नतु चुम्बतीति क्रिया विन्नक्तिम्। सापि कारकविन्नक्तिमाकाङ्क्षति । पद्मिन्याइति सम्बन्धविभक्तिकमेवतत्रबोद्धव्यम् । क्लेशेनयोत्रावगम्यतेतमन्निमतम र्थमावेदयति । अत्रकर्कशेति । अतएव नापार्थकत्वेन संकरःसमुदा यार्थस्यप्रतीयमानत्वात् । अस्ति कश्चिदुच्चारणयोर्विशेषोयेनवाक्या र्थप्रतीतिः क्वचिदाहत्य भवति । क्वचित्तुनेति स एव विशेषः । संनि

घट्टयन् । अत्र कर्कशकण्टके दण्डे ङ्गानिघट्टयन् हंसःपद्मिन्यामुखंचुम्बतीतिवक्तव्येयथानिर्दिष्टरूपे विघट्टितविभक्तिकयुक्तित्वाद्व्याकीर्णम् ॥५॥ वाक्यान्तरपदैर्मिश्रंसंकीर्णमितितद्विदुः। यथा। काअंखाअइखुहिओकूरम्पेल्लेइणिब्भरंरुठ्ठो । सुणअङ्गेण्हइकण्ठेहक्केइअणत्तिअण्ठेरो। अत्रकाकंक्षिपतिक्रूरंखादतिकण्ठेनप्तारङ्गृह्णातिश्वानम्भीषयतइत्यादौ वक्तव्येयथोक्तपदविन्यासः संकीर्यते ॥६॥ विभिन्नप्रकृ

धानं व्यवधानमिति व्याख्यायते । कार्यदर्शनादर्शनाभ्यां चोन्नीयत इत्याशयवानाह। यथोक्तरूपेणेति ॥५॥ वाक्यान्तरपदैर्मिश्रमिति । वाक्यारसंवलितानिपदानिवाक्यान्तरमनुप्रविश्यतथाप्रतीतिं विघ्नन्ति यथा समुदायएव दूषितोभवति। कूरंभक्तं क्षुधितः खादति ॥ काकंच निर्भरं रुष्टः सन्क्षिपति श्वानंच निवारयति नप्तारं च कण्ठेगृह्णाति स्थविरजातिः। आकांक्षाक्रमेण किंचित्पदंकस्यचिद्वाक्यस्य संबद्धमिति ज्ञायतएव तदाह ॥ अत्रकाकंक्षिपतीति । शब्ददोषत्वं प्रकाशयति । इतिवक्तव्यइति । यथोक्तपदविन्यासइत्यनेन संकीर्यतइत्यस्यार्थोविवक्षितः । एवंप्रकारः संकरइत्यर्थः॥ विजातीयसंवलने लोके संकरव्यवहारः ॥६॥ विभिन्नेति । षोढा पदं भवति । प्रकृतिस्थं कोमलं कठोरं ग्राम्यं नागरमुपनागरंच तत्रानेकदीर्घस्वरकृतगौरवमेकसंयोगकृतगौरवंपदं प्रकृतिस्थम्। यथानीहारतारानीकाशसारसोत्यादि। हस्तपल्लवकङ्कणकर्पूरादिच । यथाच । पाडिवआमाणंसिणिवे आलगोलेत्यादित्यज्झतुज्झउत्ताविलविहत्थतिअछेत्यादि च। एकस्वरकृतगौरवं गुरुशून्यंवाकोमलम्। करेणुतारकसरोजनिकरादि। मधुरमसृणसरससरलेत्यादि च। यथा नीहारवाणइवाणवेणीत्यादि । परकुअलडहतलिणेत्यादि च सानुस्वारविसर्गदीर्घस्वरकृतगौरवंसंयोगबहुलंवाक्कठोरम् ॥ यथाशुद्धंपयः पाचयां

तिस्थादिपदयुक्त्यपदंविदुः। यथा। आउज्झअपिट्ठिअएजहकुक्कुलिणाममज्झभन्नाले। पेक्खन्तहलाउलकलणिआहहाकरससकन्देमि। तदेतत्प्रकृतिस्थकोमलकठोराणांनागरोपनागराणांग्राम्याणांवापदानामयुक्ते

वन्नूवताः पिब। आहिषातामित्यत्र। अच्छाच्छतत्रस्थव्यूढोरस्कप्रलम्बेत्यादिच। यथाच। आईइयइत्यादिउप्पिच्छउप्पुपुअएक्कमेक्कमित्यादिच प्रसिद्धमादायग्राम्यादित्रयंजनवति। प्रसिद्धिस्त्रिधा। सार्वलौकिकीपण्डितजनगामिनी। तदुपजीवित्रिचतुरलौकिकगामिनीचेति। तत्रसर्वलोकप्रसिद्धंग्राम्यम्। देशीपदानिसर्वाण्यवसंस्कृतेषुहस्तविवाहजगिनीहारकङ्कणादिकं तुंजअंजहलिद्दासाहज्जादिकंच। एतदपभ्रंशसमानप्रसिद्धिकमतिप्रसिद्धंचेति गीयते। ग्राम्यवैपरीत्येन नातिप्रसिद्धं नागरंनगरेणोपमितमितिकृत्वातिप्रसिद्धाभावेनोपमा। इदमेवनात्यप्रसिद्धमुपनागरमित्युच्यते। यथा। आद्यशकिंज्ञारुखुरलीलातङ्केत्यादि। सुंदेवअच्छेवगुप्पन्तीविवलाआइत्यादिच। शृङ्गारप्रकाशेतु ज्ञाषाणामपिभेदो पदमित्युक्तम्। इहतुशब्दजात्यौचित्यविवेचनेनगतमितिग्रन्थकर्तुराशयः। तदेवस्थिते प्रतिपदं कवीनां कोपि क्रमोनिर्वाह्योनत्वकस्मादेवालूनविशीर्णभावोविधेयः। तदिदमाह विभिन्नेत्यादि। युक्तिरुचितायोजना सा प्रकृतिस्थादीनां विभिन्नाऽन्यथानीता ऽत्युक्तिरिति यावत्। यतइत्यत्यर्थयुक्तेरिति। आउज्झअइति। आवर्ज्य केशेषुनमयित्वा। आउज्झअइतिपाठे निर्नतस्य। पिट्ठिअए ताड्यते। जहकुक्कुलि। यथाकुक्कुरीनामशब्दः प्राकाश्ये प्रकाशमेव ताडितमित्यर्थः। मज्झभन्नाले ममज्ञतांपक्खन्तहलाउलकणिआह। अनादरेषष्ठी। राजकुलनियुक्तान्प्रेक्षमाणाननादृत्येत्यर्थः। हाशब्दः खेदे। कस्यक्रन्दामिकस्यफूत्करोमीत्यर्थः। अत्रप्रथमेपादे आउज्झअइत्युपनागरंप्रकृतिस्थंच। आउज्झीतिपाठेग्राम्यंप्रकृतिस्थंच। भ-

रपदम् ॥ ७ ॥ वाक्यान्तरसगर्भं यत्तदाहुर्वाक्यगर्भि तम्। यथा। योग्योयस्तेपुत्रः सोयंदशवदन लक्ष्मणेन मया। रक्षैनंयदि शक्तिर्मृत्युवशं नीयते विवशः ॥ अ त्रयोग्योयस्ते पुत्रोलक्ष्मणेन मया मृत्युवशं नीय तइति वाक्यस्य रक्षैनं यदि शक्तिरिति वाक्यान्तरेण

त्तालइत्यपितथा । तृतीयपादेपेक्खतंहतिकठोरमुपनागरंच । राउ लक्कणिआहेतिग्राम्यंप्रकृतिस्थंचहति ग्राम्यंकोमलंच। कस्सेतिप्रकृतिस्थमुपनागरंच । कन्देमीतिग्राम्य प्रकृतिस्थंच तदिहैकरूपयवक र्मकरवधूलक्षणेग्राम्येवक्तरि यकरूपएववाक्यार्थेसर्वदोषतिरोधायकरसदीप्यभावेचयथा ज्ञाषाणां व्यतिकरोदूषणं तथा ग्राम्यादीनामिति । सहृदयमात्रवेद्यश्चायंपन्था इत्यवहितैर्ज्ञेवितव्यम् । एतेषां चस्वरूपं स्वयमेवगुणीज्ञावप्रस्तावे लेशतः प्रकाशयिष्यतितेनेह संक्षिप्तवान् । नैवंविधः कदापिव्यतिकरो महाकविगिरामाजानिकः प्रवर्तते। तथाहि । त्यजतोमङ्गलक्षौमे दधानस्यचवल्कले । ददृशुर्विस्मितास्तस्यमुखरागं समंजनाः ॥ अत्र प्रथमादिषुपादेषु क्षौम चीरविस्मितरागपदानिउपनागरागिशेषाणिग्राम्याणि । प्रतिपादंच प्रकृतिस्थकोमलाभ्यामेव निर्वाहः। यवमन्यत्रापिप्रत्येकं द्वन्द्वसमुदायैः प्रतिपादमुपक्रमोपसंहारनिर्वाहक्रमःस्वयमुपलक्षणीयइत्यास्तान्तावत् ॥ ७ ॥ वाक्यान्तरेति । मध्यप्रविष्टंवाक्य पूर्वोत्तरज्ञागाज्यामेकीज्रूतस्यगर्ज्यमाणमेकस्वरसप्रसूतांप्रतीति विघ्नयदात्मनासहैवसमुदायविरसकक्षामारोहयति । वाक्यान्तरवाक्य स्यविशेषांविवक्षितः प्रतीतिव्यवधायकइतियावत् । योग्यइति । मयेति । कारकविज्ञक्तेः क्रियाकाङ्क्षणशीलायास्तामसंगमव्यमध्ये रक्षैनंशक्तिरित्येतावतागर्ज्यस्यानोयेनविरसीकरणमित्याह । अ त्रयोग्योयइति । यवंवाक्यरूपतान्नङ्गहेतून्दोषानभिधायतत्रैवकाव्यज्ञावप्रत्यूहहेतवोन्निधातव्यास्तेच गुणान्नङ्गद्वारकाश्चलंकारज्ञ

सगर्भत्वाद्गर्भितम् ॥ ८ ॥ यत्रोपमाभिन्नलिङ्गा भिन्नलिङ्गन्तदुच्यते । भवेत्तद्भिन्नवचनं यद्भिन्नवचनोपमम् । यथा । अविगाह्योसि नारीणामनन्यमनसामपि । विषमोपलभिन्नोर्मिरापगेवोत्तितीर्षतः । अत्रापगेव त्वमविगाह्योसीतिलिङ्गभेदः । नारीणामुत्तितीर्षतइतिलिङ्गभेदोवचनभेदश्च तदिदंद्वयोरेकमेवोदाहरणम् ॥ ९ ॥ अथाभिन्नलिङ्गस्यैव यथा । वापीवविमलं व्योम हंसीव धवलः शशी । शशिलेखेव हंसोऽयं हंसालिरिव ते यशः ॥ १० ॥ भिन्नवचनस्यैव यथा । सरांसीवामलं व्योम काशाइव

ङ्गद्वारकाश्छन्दोभङ्गद्वारकायतिभङ्गद्वारकाश्चेतिचतुर्धाविप्रयन्ते । ततश्च यद्यपिप्रथमंगुणभङ्गद्वारकावक्तुमुचितास्तथापि तेषां बहुत्वाद्दुरूह त्वाच्चसूचीकटाहन्यायेनपश्चात्करणमलंकारनेदादिषुच मध्येप्रतियोगिद्वाराऽलङ्कारभङ्गस्यप्राधान्यमिति तद्वारा दोषाख्यँकथयति । यत्रोपमेति । उपमाग्रहणमुपलक्षणमित्यग्रे वक्ष्यामः । उपमाउपमितिः सादृश्यभिन्नोपमानवाचिनउपमेयवाचिनश्च लिङ्गं स्त्रीपुन्नपुंसकंयस्यसा तथोक्ता । एवंभिन्नवचनोपमामित्यत्रापि व्याख्येयम् । अविगाह्योसीति । अविगाह्यतामात्रमत्रसादृश्यंविवक्षितमेतदुपयुक्तमेव विशेषणमुपमानोपमेययोरुपादानयोग्यमित्यतस्मादेव विकृतवचनन्नेदनिबन्धनःप्रयोजनमाकाङ्क्षति । तथातदनुसंधानप्रवणस्यप्रकृतप्रतीतिराच्छाद्यतइतिदूषणसिद्धिः । एतेन दूषणता व्याख्याता । विभागवाक्येसहितावस्त्वयोरुद्देशादिहच मिलितयोरुदाहरणात्तथाभावोदोषत्वमिति भ्रान्तिंनिरस्यति । तदिदमिति । एकमुदाहरणंनत्वेकः संभिन्नउपाधिः प्रत्येकमेवत्वक्षिप्तसमर्थत्वादित्यर्थः । एतदेवानुसंधायविभागवाक्येद्वेपदम् ॥ ९ ॥ तत्किमुदाहरणस्यसंकीर्णत्वमेवनेत्याह । अथभिन्नलिङ्गस्यैवेति । द्वयमपिनिगद

सितः शशी । शशीव धवला हंसी हंसीव धवला दिशः ॥ ११ ॥ न्यूनोपमामिहन्यूनमुपमानविशेषणैः। यथा । संहअचक्कवाअजुआविअसिअकमलामुणालसंछण्णा । वावीबहुव्वरोअणविलित्तथणआसुहावेइ । अत्र नेत्रबाहूपमापदानांवधूविशेषणत्वे नानुक्तत्वादिदंन्यूनोपमम् ॥ १२ ॥ अधिकंयत्पुनस्तैः स्यात्तदाहुरधिकोपमम् । यथा । अहिणवमणहरविरइअवलअविहूसाविहाइणववहुआ । कुन्दलएव्वसमुप्फुल्लगुच्छपरिणित्तभमरगणा । इदम्भ्रमरगणस्यो

व्याख्यातम् ॥ ११ ॥ जातिप्रमाणधर्मतोन्यूनताउपमानस्यन्यूनोपमत्वम् । तत्रजातिप्रमाणन्यूनतार्थदोषः । धर्मन्यूनतातुधर्माभिधायकपदन्यूनतालक्षणाशब्ददोषएव । एतेनाधिकत्वं व्याख्यातमित्याशयवानाह । न्यूनोपममिहेति । इहशब्दोयेपुमध्येषूपमानस्यस्तोकविशेषणतयोपमेयन्यूनेत्युक्तन्तथाधिकोपममितिवक्ष्यति । संहतचक्रवाकयुगाविकसितकमला मृणालसंछन्ना । वापीवधूरिव रोचनाविलिप्तस्तनी सुखयति । अत्र चक्रवाकयुगोपमानमपदमेवपरमुपात्तम् । रोचनाविलिप्तस्तनीत्यनेन कमलस्योपमानंनेत्रपदंमृणालस्योपमानं वाहुपदंचनोपात्तं तदपिच सविशेषणमुपादेयं भवति । येनविकासादिसमभिव्याहारसामञ्जस्यमपि स्यादिति । पदानामितिबहुवचनाभिप्रायः । अतएव धर्माणामेकनिर्देशेऽन्यसंवित्साहचर्यादितिनावतरतिव्यभिचारात् । किमर्थं तस्योपमानमनुसन्धेयमित्यपिनवाच्यम् । मात्रापिनानर्थिका कविनोपादेयेति साहित्यविदाम्नायव्यवस्थितावुपमेयविशेषणस्योपमानविशेषणतयाप्रयोजनचिन्तायांपूर्ववदेव प्रतीतिप्रत्यूहस्य सुलभत्वादनुक्तत्वादितिशब्दप्रधानकतामाचष्टे । एवमुत्तरत्र ॥ १२ ॥ अभिनवमनोहरविरचितवलयविभूषा विभाति नववधूः । कुन्दलतेवस

पमानविशेषणस्याधिक्यादधिकोपमानम् ॥ १३ ॥
भग्नच्छन्दइति प्राहुर्यच्छन्दोभङ्गवद्वचः । यथा ।
यस्मिन्पञ्चपञ्चजनाआकाशश्चप्रतिष्ठितः । तमेव
धीरोविज्ञाय प्रज्ञाङ्कुर्वीत ब्राह्मणः । अत्र पञ्च
मवर्णस्यलघोः स्थाने गुरोः करणाच्छन्दोभङ्गः॥१४॥
अस्थानेविरतिर्यस्य तत्तु भग्नयतीष्यते । यथा ।
ब्रह्मेन्द्रोपेन्द्रादिगीर्वाणवन्द्योभक्तानां भूयाच्छ्रिये
चन्द्रचूडः । स्त्रीणां सङ्गीतं समाकर्णयन्केतूद स्ता
म्भोदंसदध्यास्तईशः । चतुर्थस्थाने यतौ कर्त्तव्या

मुत्फुल्लगुच्छपरिनिर्यद्भ्रमरगणा ॥ यद्यप्येकस्य विशेषणाधिक्ये वि
शेषणन्यूनत्वे वाऽन्यविशेषणस्य न्यूनाधिकभावोनियतस्तथाप्यु
पमानगतमेवद्वयं निरूप्यते । तत्रहि दृष्टमुपमेये प्रतिबिम्बक
ल्पमुपस्थाप्यतेतेनान्तोनोपमेयेतयोर्निरूपणमिति ॥ १३ ॥ भग्न
च्छन्दइति । वाचां श्रव्योवच्छेदश्छन्दस्तस्यैवोपमानयुक्तादयस्तेनै
वगुरुलघुनिवेशक्रमेण श्रव्यताभवतीत्याशयात् । तस्य विपर्यास
श्छन्दोभङ्गोव्यक्तएववैरस्यहेतुः । आहुरिति । पञ्चोदाहरणत्वावच्छे
दविपर्यासत्वेचभग्नवृत्तव्यवहारादिदमेव निमित्तमस्यावधार्यतइ-
त्यर्थः । पञ्चेति । पञ्चजनाःपुरुषास्ते देवपितृगन्धर्वराक्षसासुर
भेदात्पञ्च । अथवा निषादपञ्चमब्राह्मणादिचतुष्टयभेदात् । त
मेवात्मानंब्रह्मापरपर्यायंविज्ञाय श्रवणमनननिदिध्यासनैरुपास्यप्रज्ञां
प्रकृष्टंज्ञानं साक्षात्कुर्वीत । अत्रपञ्चमवर्ण इति । "पञ्चमंलघुस
र्वत्र सप्तमं द्विचतुर्थयोः । षष्ठं गुरुं विजानीयाच्छेषास्त्वनियतामता"
इत्यनुष्टुप्छन्दसोलक्षणम् ॥ १४ ॥ अस्थानइति । श्रव्यः पठितिवि
च्छेदोयतिर्विच्छिद्यविच्छिद्यपठ्यमानाभारतीस्वदते । श्रव्यतोपलक्ष
णार्थञ्च द्विमुनिवेदादिसञ्ज्ञया तत्रतत्र विविच्यते । तथाचास्ति
कश्चिद्विशेषोयेनक्रियमाणापिविरतिर्नसौभाग्यपदं युष्यतिसचविशेषो
नाम भागभेदोऽस्वरसन्धिकृतश्चप्रायेणएतेषां स्वभावविशेषादेवस्था

यां तदन्यत्रकरणाद्भग्नयतीदम् ॥ १५ ॥ क्रियापद विहीनं यदशरीरन्तदुच्यते। यथा। सेलसुआरुद्धद्धम्मु द्धाणाबद्धमुद्धसलिलेहम्। सीसपरिठ्ठिअगङ्गंसंज्झा पणअम्पमहणाहम्। क्रियापदाभावादशरीरमिदम् ॥१६॥ गुणानान्दृश्यते यत्र श्लेषादीनांविपर्ययः। अरीतिमदिति प्राहुस्तत् त्रिधैव प्रचक्षते। शब्दार्थो भययोगस्य प्राधान्यात्प्रथमं त्रिधा। भूत्वाश्लेषा दियोगेन पुनस्त्रेधोपजायते। अत्र यः श्लेषसमता सौकुमार्यविपर्ययः। शब्दप्रधानमाहुस्तमरीतिम तिदूषणम्। तत्र। विपर्ययेण श्लेषस्य सन्दर्भः शि

नेक्रियमाणापि विरतिरन्यत्रैवपरं प्रकाशते। न तत्र कथञ्चन सौभाग्य मुन्मीलयति। स्थानपरिभाषयाव्यावर्तितत्वात्। तदिदमुक्तम- स्थानइति। वामनोप्याह ॥ विरसविरामंकष्टमिति। सदोगृहरू पासभाकेतूदस्ताम्भोदंध्वजदण्डोत्क्षिप्तजलधरमित्युच्चैस्त्वम्। वेदच्छे दाशालिनीमोथतौगौइत्युपलक्षणंश्रव्यविरतेः। अत्रद्वितीयपादेधातु भागभेदःशेषपादत्रये नामभागभेदाः। नचात्र स्वरसंधानमस्तीति॥१५॥ क्रियापदेति। क्रियेत्युपलक्षणम्। प्रधानपदहीनमितिबोद्धव्यम्। प्रधानाविमर्शेहिवाक्यशरीरमेवननिष्पन्नंस्यात्। शैलेति। वाक्येक्रिया प्रधानमितिदर्शनेतत्पदानुपादानादत्रप्रधानाविमर्शः शैलसुतयाऽव रुद्धमर्द्धंयस्य मुद्धाणोमूर्द्धातत्राबद्धाभुग्नाशशिलेखायेनशीर्षेप्रतिष्ठाग ङ्गायेनयश्चसन्ध्यायैप्रणतस्तंप्रमथनाथं प्रमथागणास्तेषांनाथम्। कर्म विभक्तेःक्रियामन्तरेणाचरितार्थत्वात्क्रियायानमस्काररूपायाव्यभिचा रेणार्थापत्तिविषयतानुपपत्तेरिति। अस्यांच गाथायां स्त्रीमयव्यापा ररूपताभगवतः प्रतीयतेइतिरहस्यमाराध्यामन्यन्ते॥१६॥ गुणभङ्ग द्वारकदोषनिरूपणावसरोयमित्याशयवानाह। गुणनामिति। समा ध्यादिभङ्गोपितर्हिदोषस्स्यादित्यतआह। श्लेषादीनामिति। श्लेषप्र सादसमतासौकुमार्यार्थव्यक्तिसाधुर्यकान्त्युदारतौजसाम्। एतद्यो

थिलोभवेत् । यथा । आलीयन्मालतीमाला लोलालिकलिला मनः । विमूलयति मेमूलान्नमालमलिने वने । अत्र भिन्नानामपिपदानामेकपदता प्रतिभासहेतुरनतिकोमलोबन्धविशेषः श्लेषः । तद्विप

गाद्वाक्यंवक्रकरूपतामासाद्य काव्यव्यपदेशं लभतेतेषांगुणानां भङ्गः काव्याभासत्वपर्यवसायीदोषः । सेच श्लेषादयो नवैव । तेषामन्यतमाभावे काव्यस्याभासत्वात् । तेषांहिविपर्ययेरीतिरवश्यंभज्यते । तस्यागुणवत्पदरचनारूपत्वादतएव पानकरसन्यायेन सम्भूय चित्रास्वादपर्यवसानत्वमंगुणसंवलनमेवरीतिरितिलोचनकारः ॥ रीतिःसारूपतया काव्यस्यात्मेत्युच्यते । यथाचित्रस्यलेखाउत्तुङ्गप्रत्यङ्गलावण्योन्मीलनक्षमा तथा रीतिरितिद्वितीयेविस्तरः । तत्त्रिधेति । तदितिकाकाक्षिगोलकवत्पूर्वापराभ्यामभिसंबध्यते । यत्रगुणानांविपर्ययस्तदरीतिमत् । तत्त्रिधेत्यर्थः । त्रिधाभूतंभूयस्त्रिधाप्रपञ्चते तेननवभेदास्तदेतद्विवृणोति । शब्दार्थेति । योगशब्दः प्रत्येकमन्वीयते । शब्दप्रधानत्वमर्थानपेक्षशब्दनिरूप्यत्वम् । वाक्यगुणस्यश्लेषादित्रयस्य । एवशब्दानपेक्षार्थनिरूपणीयत्वंतादृशस्यकान्त्यादित्रयस्य । एतेनौजःप्रभृतित्रिकस्यउभयप्रधानताव्याख्याता । सेनायमर्थः शब्दार्थोभयप्रधानतया सामान्यतस्त्रिधाभूत्वाश्लेषादित्रिकविवक्षयाप्रत्येकंत्रिधाभवतीति । तेषुशब्दस्यप्रायस्यात्तत्प्रधानकगुणभङ्गः प्रथमं विवेक्तव्य इत्याह । तत्रेति । अरीतिमतीति । निर्द्धारणेसप्तमी । जात्यभिप्रायमेकवचनम् । विपर्ययेणेति । श्लेषःसंघानंघटनमित्यनर्थान्तरम् ॥ नचैतावतैवगुणत्ववाक्यमात्रसाधारण्यात् । तेनबहूनामपि पदानामेकताप्रतिभासहेतुत्वमनतिकोमलत्वंच विशेषणमिच्छन्ति । विशेषमर्थगुणकाण्डेवक्ष्यामः । एवंभूतविशेषणविपर्यासे शिथिलो बन्धोतिकोमलोविकीर्णप्रायश्चेत्यर्थः । आलीयमित्यादौ दन्त्यवर्णप्रायतयाऽतिकोमलत्वं विकीर्णतावक्ष्यत्येव । नास्य निरूपणे क्वचिदप्यर्थापेक्षेतिस्फुटयन्नाह । अत्र

र्ययेण शब्दप्रधानोयं श्लेषविपर्ययः ॥ १७ ॥ भवेत्स एव विषमः समतायां विपर्ययात्। यथा। कोकिलालापवाचालोमामेति मलयानिलः। उच्छलच्छीकराच्छाच्छनिर्झराम्भःकणोक्षितः। अत्र पूर्वार्द्धस्य मृदुबन्धत्वादुत्तरार्धस्य च गाढबन्धत्वात्समबन्धेषु विषममितिविषमोनामशब्दप्रधानः समताविपर्ययो दोषः॥१८॥ सौकुमार्यविपर्यासात्कठोरउपजायते। यथा। असितर्तितुगद्रिक्षित्स्वःक्षिताम्पतिरद्रिदृक्। अमिद्रिःशुभ्रदृग्दृष्टैर्द्विषोजेघ्रीयिषीष्ट वः। अत्रार्ति

भिन्नानामिति । श्लेषस्यशब्दप्रधानतयातद्विपर्ययोपि शब्दप्रधानो भवतीत्याह । शब्दप्रधानोयमिति । अन्यतरविशेषणहानावपि श्लेषाभावो भवत्येव । तेन पूर्वार्द्धस्य लेशत ऐक्यप्रतिभानसंभवेपि अतिकोमलतया दुष्टत्वम् ॥ १७ ॥ भवेदिति । सएवसंदर्भो मृदुमध्यकठोरवर्णनिर्व्यूढास्तिस्रोबन्धजातयस्तत्रैकरूपे वाक्यार्थे एकैवजातिरूपादेवेतिविपर्यासोवैराग्यहेतुरेव । उच्छलन्तः सीकरायस्मात्तथाऽच्छाच्छमत्यच्छंद्वयमपिनिर्झराम्भोविशेषणम् । मलयमारुतस्योद्दीपनविभावभूतस्यवर्णमात्रवैरूप्यमस्येत्याशयवानाह । एतत्पूर्वार्द्धस्येति । शब्दप्रधानतामस्यविवृणोति । समबन्धेष्विति ॥ १८ ॥ सौकुमार्यविपर्यासादिति । अकठोराक्षरप्रायतावन्यस्यसुकुमारत्वन्तद्विपर्ययेकठोरता श्रुतिकटुत्वंभवति । असितर्तीति । ऋगतावितिधात्वनुसारादृतिर्वर्त्म । असितारुक्मात्ऋतिर्वर्त्मयस्यरुक्मवर्त्मावद्रिस्तस्यतुगपत्यम् । अद्रिच्छिदिति । क्रौञ्चदारणत्वात् । स्वर्गेशियन्तिनिवसन्तियेदेवास्तेषांपतिस्सेनानीत्वाद् । अद्रिदृग्द्वादशलोचनत्वात् । सएवंभूतो भगवान् कुमारोऽमिद्रिरस्त्रिभिरूर्ध्वैः शुभ्रदृग्दृष्टैर्धवलाक्षिविलोकितैस्सकोपनिभालनेतारकाभागस्योर्द्धतयानयनात्तथाभावोजातिर्वोयुष्माकंद्विषःशत्रूञ्जेघ्रीयिषीष्ट अत्यर्थंभृशं पुनर्वा वध्यादित्यर्थः। हन्तेर्यङिघ्रीभावेआशीर्लिङिरूपम्। स्वतन्त्रस्य

कठोरत्वादसौकुमार्यंसुप्रतीतमेव॥१९॥ या तु कान्ति प्रसादार्थं व्यक्तीनामन्यथास्थितिः। अर्थप्रधानः प्रोक्तस्य वाक्ये गुणविपर्ययः। अप्रसन्नम्भवेद्वाक्यं प्रसादस्य विपर्ययात्। यथा। अनङ्गकमलञ्चक्रे मयमाना मरालिका। यस्यानत्यर्जुनाब्जन्मसदृक्षाङ्गोव लक्षगुः। अत्र शब्दानामनतिप्रसिद्धत्वादनतिप्रसन्नत्वमिति सोयमर्थप्रधानः प्रसादविपर्ययोदोषः॥२०॥

पदस्य श्रुतिकटुता पद दोषः। इहतुपदानामतथाभावेऽतिदृब्छिइत्यादीनांवर्णानांपरस्परसंनिधानेघटनैव कठोरेत्याह। अत्रातिकठोरत्वादिति ॥१९॥ यातुकान्तीति ॥ कान्तिप्रसादार्थंव्यक्तीनामितिप्रसादात्पाठः। विवरणक्रमानुरोधेन प्रसादार्थंव्यक्तिकान्तीनामितिपठनीयम्। अप्रसन्नमिति। श्रुतमात्रस्यैव यस्यार्थश्चित्ते प्रतिफलतिस प्रसन्नः शब्दः। तथाचाऽर्थस्यप्राकट्यंस्फुटिति प्रतिबन्ध्योग्यत्वम्। पश्चादिवगतिर्योवः पुरस्तादिववस्तुनइतिसहृदयव्यवहारार्थविषयत्वंप्रसादोऽर्थनिरूपणीयइतिभवत्यर्थप्रधानः। नचासौ पदमात्रमुल्लिखतीति वाक्यांशोभवति। तेनतद्विपर्ययोपि वाक्यगामी। अर्थस्य यत्नस्फुटितिप्रतीतिरुपजायते। तत्रतत्र महाराज शब्दएवापराध्यतीति वाक्यदोषेषु परिगणनमन्यच्छतयाचशब्दानां प्रतीतिःस्खलन्तीदूषणतासस्य स्थापयति'। अनङ्गकमिति। नविद्यतेऽङ्गंयस्येत्यनङ्गकमाकाशन्मयमानागच्छन्ती। अयमर्थेतिदण्डकेषुपठितान्मयधातोः शानच्। मरालिकाहंसी। अलंचक्रेशोभितवती। ननुहंस्यागमनपथालङ्करणकालोत्रिस्तस्यांचतुषारकिरणएव तदलङ्कारकारीकिमनया वराक्येत्यत आह। यस्येति। यदत्यर्जुनंनभवति अब्जन्म तोयभवं नीलोत्पलमितियावत्। तत्सदृशलाञ्छनोवलक्षगुर्बलक्षोगौःकिरणो यस्यशुभ्रांशुश्चन्द्रस्तेनासौ सकलङ्कतया नतथालङ्कारायथेयमित्यर्थः।पञ्चमेतिवाक्यार्थकर्मकर्मके पठन्ति। तन्नयुक्तम्। चक्रइतिपरोक्षतास्वरसभङ्गापत्तेः। उक्तयुक्त्या वाक्यदोषत्वमा

वाक्यम्भवति नेयार्थमर्थव्यक्तेर्विपर्ययात्। यथा। म
ही महावराहेणलोहितादुद्धृतोदधेः। इतीयत्येव नि
र्दिष्टे नेयालौहित्यहेतवः। तदिदन्निगदेनैवव्याख्या
तमित्यर्थप्रधानो ऽयमर्थव्यक्तिविपर्ययः॥२१॥कान्ते
र्विपर्ययाद्वाक्यङ्काम्यमित्यपदिश्यते। यथा। विरहे
तेविषीदन्तन्तिषीदन्ततन्तवान्तिकेकन्येकामयमान
म्मान्त्यन्नकामयसेकथम्।इदमुक्तेर्ग्राम्यन्तयाकान्ति
हीनमित्यर्थप्रधानोयङ्कान्तिविपर्ययोदोषः॥ २२॥

ह। अत्रशब्दानामिति। नचमयमानादीनांश्लिष्टता। तल्लक्षणविर
हात्। नापिगूढार्थत्वंततएव॥ २०॥ वाक्यमिति। संपूर्णं वाक्य
त्वमर्थव्यक्तिंकरोतीति वक्ष्यति। सर्वस्य वाक्यस्य विशेषणविशेष्य
भावबोधकत्वनियमे यावतां विशेषणविशेष्यभावोभिमतस्तावत्प्र
तिपादकपदोपादानंसंपूर्णता। साच विशेषणविशेष्यभावानुरूपार्थ
निरूपणीयतयार्थप्रधानेतितद्विपर्ययोपितत्प्रधानइतिपूर्ववन्नेयम्। अ
तएवविवक्षितवाक्यान्यथानुपपत्यानेयः कल्पनीयोर्थोयस्येति नेया
र्थमित्यर्थो ऽपि घटते। महीति। पूर्वार्द्ध एवकाव्यंनिर्वर्तितम्।
नचतावता विवक्षितार्थलाभः। तथाहि। समुद्रमध्यात्पृथिव्यामु
द्वियमणायां महासुरविमर्दे तेषां दंष्ट्रयापाटनेन रुधिरशबलतया
लोहितत्वमुदधेरितिवाक्यार्थो ऽभिप्रेतः। लक्षणाया अभावान्नेया
र्थत्वंपददूषणमत्रसम्भावनामारोहति। दूषणताबीजंचात्रस्फुटमे
व। अशरीरंतुक्रियापदशून्यमित्युक्तंतदेतत्सर्वमभिप्रेत्याह। तदि
दंनिगदेनैवेति॥२१॥ कान्तेरिति। रसस्य दीप्तिः कान्तिरग्रेविवरिष्य
ते तेनार्थप्रधानताव्यक्ता। तस्यामस्तिवाक्यवाच्ययोर्व्यापारः। वा
क्यंविदग्धोक्तिकंव्यापियते। अतथाभूतस्यरसाव्यञ्जकत्वनियमात्।
तथाहि। कन्येति संबोधनेन रसविरोधिनीविलसिताद्यमतीयते।
कामयमानमित्यनेनानावरणमुच्यमानोर्थः कथंनवैरस्यमावहतीत्या
दिकमुन्नेयम्। तदिदमाह। इदमुक्तेर्ग्राम्यन्तयेति॥ २२॥

ओजोमाधुर्यमौदार्यन्नप्रकर्षाय जायते। यस्मिंस्त माहुरुभयप्रधानंतद्विपर्ययात् । वाक्येयङ्खण्डयन् रीतिम्भवत्योजोविपर्ययः । असमस्तमिति प्राहु र्दोषन्तमिह तद्विदः ॥ यथा । स्मरःखरःखलःका न्तःकायःकोपश्चनःकृशः । च्युतोमानोधिकोरागो मोहोजातोसवोगताः । अत्रसत्यसमस्तपदाभिधा ने सत्यपिचार्थसौकुमार्ये श्लेषादिगुणसामग्र्यभा वान्न वैदर्भीरीतिः । नापि यथोक्तलक्षणाभावा द्गौडी यादयइति खण्डितरीतित्वादयमोजोवि

वाक्येयमिति। ननु समासभूयस्त्वमोजोभिधास्यते तत्कथमस्याभावो र्थप्रधानोपि कथञ्चदोष इत्यत आह। खण्डयन्रीतिमिति। रीति र्भङ्गपर्यवसायी तस्याभावोदूषणन्नतु तन्मात्रमित्यर्थः । एतदुक्तम्भ वति। शब्दार्थयोरुचिता प्रौढिरोजः। यदाह"रौद्रादयो रसा दी प्त्या लक्ष्यन्ते काव्यवर्त्तिनः । तद्व्यक्तिहेतुशब्दार्थावाश्रित्यौजोव्यव स्थितमिति। तत्रार्थव्यक्तिमर्थगुणेषुविवेचयिष्यामः। शब्दस्यतु पा रुष्यशैथिल्यव्यतिकरलक्षणा साच क्वचित्समासदीर्घतया व्यज्यते। यथा। चञ्चद्भुजभ्रमितच ण्डगदाभिघातसञ्चूर्णितोरुयुगलस्य सुयो धनस्येति। क्वचिदन्यथापि प्रकाशते। यथा। योयःशस्त्रम्बिभर्त्तीत्यादि। तदेवन्तत्वव्यवस्थितौ पूर्वाचार्यव्यवस्थित्या गुणकाण्डेसमासभूयस्त्व मोजोलक्षणंव्य भिचरितगुणमध्ये समासरचनासौष्ठवंवक्तृक्षमतयागुण इत्यभिप्रायाद्विशेषंतत्रवक्ष्यामः।तदिदमिति।रीतिंखण्डयतीति। नहि प्रौढेरभावे गुणसम्बन्धनात्मिका रीतिर्नामेति विपर्ययपदेन साधारणे नपारुष्यशैथिल्येदर्शयति । अत्रेति । एतदेवाचार्यमतेन द्रढयति । यदाहेति । यद्यप्यत्रानुप्रासोस्ति तथापि रीतिमन्तरेण मृतशरीरइ व काव्येनालङ्करणतामध्यास्ते । ततश्च न प्रकृतः कोपि चमत्कारा विर्भाव इति नास्यैव काव्यताम्प्रयोजयतीत्यर्थः । दाक्षिणात्यावैद र्भीमाहुः । पारावरीणास्तेहि विशिष्टरीतिस्वरूपमवधारयितुं क्षमाइ

पर्ययः । शब्दार्थप्रधानोगुणविपर्ययदोषोभवति । यदाह । इत्यादिबन्धपारुष्यं शैथिल्यञ्च नियच्छति।अतोनैनमनुप्रासन्दाक्षिणात्याः प्रयुञ्जते॥२३॥ माधुर्यव्यत्ययोयस्तु जायते रीतिखण्डनात् । तदनिर्व्यूढमित्युक्तङ्काव्यसर्वस्ववेदिभिः । यथा ॥ नखिनाञ्च नदीनां च शृङ्गिणां शस्त्रपाणिनाम् । विश्वासोनैव कर्तव्यः स्त्रीषु राजकुलेषु च । अत्र नखिनांच नदीनाञ्चेति षष्ठ्यन्ताच्चकारेणरीतेरुप

ति॥२३॥ माधुर्यव्यत्ययइति। शब्दार्थयोश्चित्तद्रुतिविधायित्वम्माधुर्यम्। निचुलितत्वमिवार्द्रतापदाभिधेया चेतसोवस्था तत्कारितामाधुर्यम्। साच शृङ्गारकरुणान्यतरप्रकाशानुगुणव्यापारावेशेन भवति। यदाह। शृङ्गार एव मधुरः परः प्रह्लादनोरसः। तन्मयंकाव्यमाश्रित्यमाधुर्यम्प्रतितिष्ठति। शृङ्गारे विप्रलम्भाख्ये करणे च प्रकर्षवत्। माधुर्यमात्रतां याति यतस्तत्राधिकम्मन इति। तत्र शब्दस्य माधुर्यंपृथक्पदतया व्यज्यते। दीर्घसमासस्य यत्नान्तरसाध्यतया सुकुमाररसप्रकाशसामग्रीबहिर्भावात्।ततश्च शब्ददूषणप्रस्तावे पृथक्पदतामात्रप्रत्ययो यद्युच्यते गौडीयादुष्टा स्यादिति रीतिखण्डनपर्यवसायितयाऽभिधानम्। भवतिहि कदाचित्कवेः शक्तिवशात्सोल्लेखेपि समासे रसव्यक्तिः। यथा। यातेद्वारवतीन्तदा मधुरिपौ तद्दत्तसङ्गानताङ्कालिन्दीतटरूढवञ्जुललतामालिङ्ग्यसोत्कण्ठया। उद्गीतङ्गुरुत्राप्यगद्गदगलत्तारस्वरं राधया येनान्तर्जलचारिभिर्जलचरैरप्युत्कमुत्कूजितम्। एवञ्चास्खलितप्रतीतिविषयस्यैव सन्दर्भस्य रसत्वम्पदघटनारूपस्यच सन्दर्भस्यानिर्वाहादेव प्रतीतिः स्खलतीत्याह। तदनिर्व्यूढमिति। काव्यसर्वस्वरसप्रकाशस्तद्वेदिभिस्तदुपायभूतघटनास्वरूपवेदिभिः। एतदेवव्याख्यानेन स्फुटयति। अत्रेति। नखिनान्नदीनाञ्चेति चकारेणोत्तरत्र तत्परित्यागेऽनुपपत्तिर्जागर्त्ति तदेवप्रतितेः सवलनमेवमुत्तरत्रापि। अस्तु तर्हिवस्त्वस

क्रमे शृङ्गिणांशस्त्रपाणिनामितिचकारानिर्वाहात्स्त्री
षुराजकुलेषुचेति षष्ठीपरित्यागादमधुरार्थत्वाच्चमा
धुर्यविपर्ययनामायंशब्दार्थप्रधानोगुणविपर्ययोदो
षः । यदाहुः । मधुरं रसवद्वाचि वस्तुन्यपि रस
स्थितिः । येन माद्यन्ति धीमन्तोमधुनेव मधुव्र
ताः । यया कयाचिच्छ्रुत्यायत्समानमनुभूयते । तद्रू
पादिपदासत्तिः सानुप्रासा रसावहा ॥ २४ ॥ य
स्तुरीतेरनिर्वाहादौदार्यस्य विपर्ययः । वाक्यन्तद
नलङ्कारमलङ्कारविदोविदुः । यथा । दीर्घपुच्छश्चतु
ष्पादः ककुद्माल्लम्बकम्बलः । गोरपत्यम्बलीवर्द
स्तृणमत्ति मुखेन सः । तदिदमपुष्टार्थत्वादनुत्कृष्ट

त्वप्येकदिङ्माधुर्यसंपत्तौ काव्यताप्रतिलम्भइत्यतआह । अमधुरा
र्थत्वाच्चेति । स्पष्टमेतच्छब्दार्थप्रधानताम्माधुर्यस्य पूर्वाचार्यसंम
त्या द्रढयति । यदाहेति । माद्यन्ति आर्द्रचित्ता भवन्ति । मधुरसादृ
श्यादयं व्यवहार इत्यत आह । मधुनेति । इदञ्च घटनायामाधुर्यं
परमं रहस्यमित्याह । यया कयाचिदिति । ओष्ठ्यकण्ठ्यादिकं वा तद्रू
पसमानश्रुतिकमादौ यस्यतथाभूतस्य पदस्य प्रत्यासत्तिस्तद्रूपाहीति
पाठेव्यक्त एवार्थः । अतएव सानुप्रासा ततश्च रसावहेत्यर्थः । यदाह
कङ्कणादिविमुक्तापि कान्ता किमपि शोभते । कुङ्कुमेनाङ्गरागश्चे
त्सर्वाङ्गीणः प्रवर्त्तत इति । विकटतामात्रभावस्यादोषत्वाद्विशेषयन्ना
ह ॥२४॥ यस्तुरीतेरिति । काव्यरूपताप्रयोजकं शब्दार्थयोर्वक्रताउदार
तानहि वक्रतामन्तरेण काव्यपदवीप्राप्तिस्तदाह । यत्तु वक्रं वचः
शास्त्रे लोके च वचएवतत् । वक्रं यदनुरागादौतत्रकाव्यमिति श्रुति
रिति । तदेतदलङ्कारसामान्यमस्याभावे निरलङ्कारता भवतीत्या
ह । अनलङ्कारमिति । दीर्घपुच्छइत्यादौ प्रकृतोदाहरणे द्वयोरव
क्रत्वं स्फुटयति । यथेति । विविच्य गुणप्रस्तावे कथयिष्यामः । अ
र्थपोषमाह । उत्कर्षवानिति । उभयप्रधानतामुपसंहरति । काव्ये

विशेषणमनुदारंनिरलङ्कारमाचक्षते। सोयमौदार्यवि
पर्ययोनाम शब्दार्थप्रधानोगुणविपर्ययोदोषः। यदा
ह। श्लाघ्यैर्विशेषणैर्युक्तमुदारंवाक्यमिष्यते। यथा
लीलाम्बुजक्रीडासरोहेमाङ्गदादयः। उत्कर्षवान्गु
णःकश्चिदुक्तेर्यस्मिन्प्रतीयते। तदुदाराह्वयं तेन सना
था काव्यपद्धतिः॥२५॥ अपार्थं व्यर्थमेकार्थं ससंशय
मपक्रमम्। खिन्नञ्चैवातिमात्रञ्च परुषं विरसन्त
था। हीनोपमम्भवेच्चान्यदधिकोपममेव च। अ
सदृक्षोपमञ्चान्यदप्रसिद्धोपमन्तथा। निरलङ्कारम
श्लीलं विरुद्धमिति षोडश। उक्तावाक्यार्थजा दो
षास्तेषां वक्ष्यामि लक्षणम्। समुदायार्थशून्यंयत्तद

ति॥२५॥ तदेवंवाक्यदोषाल्लक्षयित्वा क्रमप्राप्ता वाक्यार्थदोषा
लक्षणीयाइति तान्विभजते। अपार्थमिति। उद्देशे दोषाणां व्यासे
नोक्तिः। पूर्वोक्तप्रयोजनानुरोधेनेति। समुदायिपदानांविशेषणवि
शेष्यभावःसमुदायार्थः। तेनशून्यं पदजातमपार्थकंपदार्थानामसंसर्गे
णपदानामसंसर्गोभिधीयते। तेनार्थदोषत्वम्। जरद्गवइति। कम्बलपा
दुकाभ्यामिति लक्षणे तृतीया। नच ताभ्यां वृद्धोक्षस्यसम्बन्धः। कथ
ञ्च तस्य मंगलानान्धवलादीनाम्। मद्रकाणामितिपाठे गीतकविशे
षाणां वा सङ्गतिःकथं वा पुत्रकामायास्तत्प्रश्नसंसर्गः कथञ्च राज
न्निति सम्बोधनंघटते पुत्रकामायाश्च रुमालवणार्घप्रश्नः। रुमाल
वणाकरः। तथाचप्रयोगः। रुमाघासकान्तादिलवणात्मवदिति॥१॥
व्यर्थमिति। विज्ञातो वाविगतोवा ऽर्थोभिधेयम्प्रयोजनं यस्य तद्व्यर्थं
स्वतन्त्रञ्च दूषणमिति वैशेषिके वक्तव्यम्। तथाहि। आहिषातामिति।
अंहेर्गतिकर्मणोलुङिरूपम्। सच प्राचुर्यप्रयोगः प्राप्त्यवछिन्नं व्यापार
प्रचयमभिधत्ते। तथाचार्थ सिद्धायाम्प्राप्तौ शब्देनोपादानमनुचितं लो
कानुसारेण काव्ये दृशिश्चाक्षुषएव ज्ञाने प्रयुज्यते। यथा। मया तावद्दृ
ष्टो न खलु कलिकन्दर्पनृपतेर्गुणैस्तुल्यः कोपि क्वचिदपि किमश्रावि

पार्थं वचः स्मृतम् । यथा । जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मङ्गलानि । तं ब्राह्मणी पृच्छति पुत्रकामा राजन्नुमायां लसुनस्यकोर्घः । अत्र समुदायार्थःकोपिनास्तीत्यपार्थमिदम् ॥ १ ॥ व्यर्थमाहुर्गतार्थं यद्यच्चस्यान्निष्प्रयोजकम् ॥ यथा । आहिषातां रघुव्याघ्रौ शरभङ्गाश्रमं स च । स्वामहौषीत्तनुं वह्नौ दृष्ट्वातौ रामलक्ष्मणौ । अत्राहिषातान्दृष्ट्वेत्येताभ्यामेवाप्ताविति रघुव्याघ्रावित्यनेनै

भवता । इति प्रश्नं श्रुत्वा क्वणितमिव कर्णान्तिकमगान्मृगाक्षीणाञ्चक्षुश्चटुलभवता चान्ततरलम् । यथावानेवादर्शि नचाश्रावि । फलम्मलयभूरुहः । चक्षुश्चप्राप्तमेवगृह्णतीत्यर्थलब्धायाम्प्राप्तौ कथं शब्देनोपादानम् । तदिदमुक्तमेताभ्यामेवेति । रघुव्याघ्रादिप्रकरणादिकमासाद्य विशेषपर्यवसायि यौगिकत्वान्नतु विशेषे एव शक्तम् । "उपगम्य रघुव्याघ्रः कच्छभूभागचारिणीम् । लुलुभे मुनिधेनुन्तां वेलामिव महर्णाव „इति महर्षिप्रयोगात् । एतेन पुष्पवदादिपदवद्वचनभेदोप्यपास्तः । एवञ्च प्रकरणादिना रघुव्याघ्रपदं रामलक्ष्मणपरमेवेति पूर्वार्द्धे तयोरेव प्रक्रान्तत्वादुतरार्द्धे सर्वनाम्ना परामर्शोयुज्यते नतु स्वशब्देन । तनुप्रभृतिशब्दानां सम्बन्धिशब्दत्वात्समभिव्याहृतशब्दार्थसंबन्धकत्वं लोके व्युत्पन्नम् । यथा "करौ धुनाना नवपल्लवाकृतीर्वृथाकृथा मानिनि मा परिश्रममिति । शब्दान्तरसन्निधानमुक्वचित्ताद्रूप्यावगमोभवति । यथा । उमास्तनोद्भेदमनुप्रवृद्धोमनोरथोयः प्रथमम्बभूव । तमेवमेना दुहितुःकथञ्चिद्विवाहदीक्षातिलकञ्चकार । तदिहान्यस्यानुपादानाच्छरभङ्गसम्बन्धिन्येव तनुःप्रतीयते जुहोतिश्च वह्न्याधारकमेव हविर्द्रव्यत्यागमभिधत्ते तेन वह्नावित्यपि न वाच्यम् । गतार्थशब्दं व्याचष्टे । गम्यतइति । अस्मिन्नेवोदाहरणे निष्प्रयोजनत्वमाह । नचेति । शरभङ्गाश्रमगमनन्तनुहोमश्चात्र वाक्यार्थद्वयन्नप्रयोजनवत् । अस्य वाक्यस्यचरितार्थत्वात् । कि

व रामलक्ष्मणाविति तनुमित्यनेनैवस्वामितिग्रहौ षीदित्यनेनैव ब्रह्माविति गम्यतइति गतार्थत्वम् । नच शरभङ्गाश्रमगमनन्तनुहोमोवा ग्रतः कथाश रीरोपयोगीति निष्प्रयोजकत्वमतोयंव्यर्थनामा वा क्यस्य महावाक्यस्यच दोषोभवति । आर्ष्याच वृ त्या लब्धस्य शास्त्रेतिहासादौ शब्दवृत्या भणनम पौनरुक्त्यायेत्यर्थपुनरुक्तेर्भिद्यते ॥ २ ॥ उक्तभि न्नार्थमेकार्थम् । यथा । प्रसाधितस्याथ मुरद्विषो भूदन्यैव लक्ष्मीरिति युक्तमेतत् । वपुष्यशेषेखिल लोककान्तासानन्यकान्ताह्युरसीतरातुइत्युक्तैकार्थमे वाह।कपाट विस्तीर्णमनोरमोरःस्थलस्थित श्रीलल

म्प्रयोजनान्तरगवेषणयत्यत आह । अतइति । यद्वाक्यपोषणाद्यत्नो पयिकपदमप्रयोजकवचसाप्रागुक्तन्तथाचप्रबन्धाद्यर्थपोषपर्यवसायि वाक्यमेव । इहाप्यवाच्यवचनस्य स्फुटत्वात् । नवाश्रमगमनत नुहोमौ करियमाणवीररसोचितकथाशरीरे कामपि शोभामावहतइत्यर्थ यतइति वाक्यस्य महावाक्यस्यचेति यथासङ्ख्यमन्वयः । कथम्पुनर्ग तार्थम्प्रसाधितस्येत्यादेरर्थपुनरुक्तादिद्यतइत्यतआह।आर्ष्याचेति । शब्दवृत्त्येवावगतस्यशब्दवृत्त्यापुनरुक्तम् । अर्थतोलब्धस्यशब्दवृत्त्या भणनमित्येकः प्रकारः । अर्थतोलाभंव्युत्पादयति । शास्त्रेति । अस्य रघुकुलगुरुः शरभङ्गाश्रमगमनमितिहासादवगतः प्राप्तस्यैव ज्ञानजन कत्वं शास्त्रात् । शरभङ्गस्यन्यिन्येव तनुर्लोकव्युत्पत्तेस्तेन नियमेन ह्यर्थतः प्राप्तिर्भवतीत्यभिप्रायः ॥२॥ उक्तान्निति । वाक्यान्तरो क्तान्निन्नस्तात्पर्यार्थोयस्य तत्तथोक्तम् । तथाहि । प्रसाधितस्येत्यादि श्लोके श्लेषोपहितेन व्यतिरेकेण काप्यपूर्वालक्ष्मस्य लक्ष्मीरुत्कालेव नूवेति तात्पर्यार्थः । तेनैव प्रकारेण कपाटेत्यग्रिमश्लोके सएवास्ति तुल्यार्थत्व उपादानान्निन्नार्थत्वेपि तदिदमाह । अनयोःश्लोकयो रिति । महावाक्ये श्लोकद्वयरूपे एकमन्यतरद्दुष्यति हेयस्यत्वी

नस्य तस्य। आलिङ्गिताशेषजनोबभूवसर्वाङ्ग सङ्गि न्यपरैवलक्ष्मीः । अनयोः श्लोकयोरभिन्नार्थमेकं वाक्यंमहावाक्येदुष्यति ॥ ३ ॥ सन्दिग्धार्थं ससंश यम्। यथा। मनोरथप्रियालोक रसलोलेक्षणेसखि। आराद्वृत्तिरियन्माता नक्षमाद्रष्टुमीदृशम्। अत्रा रात्प्रभृतिशब्दानामुभयार्थत्वान्माता द्रक्ष्यतिनवेति संदिग्धम् ॥ ४ ॥ वाक्यंयत्तु क्रमभ्रष्टन्तदपक्रममु च्यते। यथा। काराविऊण खउरङ्गामउलोमज्जिओ अजिमिओअ। णक्खतन्तिहिवारेजोइसिअम्पुच्छि उच्चलिओ। अत्रक्षुरकर्मणोनन्तरन्नक्षत्रप्रश्नादिद

त्यथः ॥ ३ ॥ सन्दिग्धार्थमिति। शब्दस्वरूपनिश्चयपि वाक्यार्थोदोला यितइति अर्थदोषत्वम्। तथाहि। मनोरथेत्यादौ मनोरथे यः प्रियोवल्लभस्तदालोकरसेन लोलेक्षणे चपललोचने तव मातेयमारा द्वृत्तिर्दूरवर्त्तिनी। अतोनैतादृशं सानुरागाङ्गनाजनयोग्यन्द्रष्टुं क्षमाइति व्यवस्थापनान्नावलोकयितुंशक्ता ततोनिःशङ्कमालोकस्वेति वाक्यार्थ उतेयमाराद्वृत्तिःसमीपदेशवर्त्तिनीः। आराद्दूरसमीपयोः। तथाचेदृ शङ्कुलाङ्गनानुचितञ्चारित्रखण्डनन्द्रष्टुन्नक्षमा नसहिष्णुरतोमानय नचापलंकार्षीरिति। नानार्थपदप्रक्षेपात्साधकबाधकप्रमाणाभावा च्च सन्दिह्यतइत्याह। अत्रारात्प्रभृतिशब्दानामिति। नच मिथोविरो धिनोरेकत्र विवक्षा सम्भवति। नचास्ति प्रकरणादिकमेकनियाम कन्नचमातुःप्रकोपशङ्कया प्रियविलोकनरसोत्काया मनोरथभङ्गोन भ वतीत्यर्थः ॥४॥ वाक्यंयत्त्विति। कारयित्वा क्षौरङ्ग्रामउलोग्रामप्र धानपुरुषइति देशीयाः। ग्रामेपि वा यः कुटोऽव्युत्पन्नः। मज्जिओसु स्नातश्च जिमिओअ भुक्तवांश्च ततोनक्षत्रन्तिथिवारौ च ज्यौतिषि कम्प्रष्टुञ्चलितः। तिथिवारज्ञानानन्तरं क्षुरकर्म ततःस्नानभोजने इ ति लौकिकः क्रमस्तस्यविपर्यासोव्यक्त एव क्त्वाश्रुतिवचनात्। क्रि

मपक्रमम् ॥ ५ ॥ जात्याद्युक्तावनिर्व्यूढङ्खिन्नमाहु र्महाधियः । यथा । वेवाहिऊण बहुआसासुरअ न्दोलि आइणिज्जन्ती ॥ रोअइदिअरोतंसण्ठ वेइपाः सेण वच्चत्ते । अत्र प्रक्रान्तस्यनवपरिणय वती स्वरूपभणनस्यानिर्व्यूढत्वात्खिन्नत्वम् ॥ ६ ॥ यत्सर्वलोकातीतार्थमतिमात्रन्तदुच्यते । यथा । भृङ्गेण कलिका कोषस्तथा भृशमपीड्यत । ववर्ष विपिनोत्सङ्गेगोष्पदप्रंयथामधु । अत्रकलिकाको षगोष्पदप्रमधुवर्षस्यासम्भवादतिमात्रत्वम् ॥ ७ ॥

यमाणेपि रचनावैपरीत्ये न क्रमभ्रंशः समाधीयत इति नासौ शब्ददो षः । अत्रपूर्वार्द्धोपात्तानां क्रमोन विपर्यस्तः किन्तु क्षौरोत्तरार्द्धोक्त योरित्याह । अत्रक्षुरकर्मणइति ॥५॥ जातीत्यादिवाक्यार्थोद्विविधः । स्वतःसम्भवीकविप्रौढोक्तिनिर्मितश्च । तत्रासति विशेषहेतौ यज्जा तीयमर्थं बुद्ध्या व्यवस्थाप्य वचनोपक्रमस्तज्जातीयस्यैव समस्तवा क्यनिर्वाहोयुक्तो नत्वन्तरेण परित्यागेन भेदः । उपक्रान्तनिर्वाहा शक्तो लोके खिन्न इत्युच्यते । तदिदमुक्तञ्जात्यादीति । आदिपदे न स्वतः सम्भविविशेषाणामुपमादीनाङ्कविप्रौढिनिर्मितानाञ्च रू पकादीनाम्परिग्रहः । विवाह्य नववधूः सासुरअं श्वशुरगृहन्दोलि कयानीयमाना रोदितीति । स्वतःसम्भवी नवपरिणीता स्वभावलक्षणा र्थस्तावदुपक्रान्तस्तथासति योजन्माभ्यस्तपितृगृहवियोगवेदनादून मानसाया अत्यन्तापरिशीलितेन देवरेण संस्थापनप्रकारः स न जातौ निविशते । परिशीलितभर्तृकुलायाकुलायांवा । तस्यौचित्यात्तस्याए व हि किञ्च न वक्तव्यम्भवतीत्याह । अत्रप्रक्रान्तस्येति ॥६॥ यत्सर्वलो केति । गोष्पदप्रमितिपूरणिजन्ताद्वर्षप्रमाणऊलोपश्चास्या न्यतरस्या मिति णमुल् । ऊलोपश्च । कलिकामकरन्दपरिणामस्यै तावतोलोके न प्रसिद्धिः । नचैतत्खिन्नमेव । कलिकाकुसुमस्यानुपक्रमात् किन्तुस्व रूपभ्रमाल्लोकमर्यादातिरिक्तवृत्तमुपात्तमिति पृथगेव दोषः ॥ ७ ॥

यत्तुक्रूरार्थमत्यर्थंपरुषन्तुतदुच्यते। यथा। खाहिविस
म्पिअमुत्तंणिज्जसुमारीअपडउदेवज्जम्। दन्तखण्डि
अथणआखिविऊणसुअंसवइमाआ। अत्रखादवि
षमित्यादीनामभिधानात्पारुष्यम् ॥८॥ अप्रस्तुतर
संयत्स्याद्विरसन्तन्निगद्यते। यथा। तववनवासोऽ
नुचितःपितृमरणशुचंजहीहिकिन्तपसा।सफलययौ
वनमेतत्सममनुरक्तेनसुतनुमया। अत्रपितृमरणस
न्तप्तायाःसम्भोगप्रवर्तनमप्रकृतरसत्वाद्विरसम्॥९॥

यत्त्विति। खाद विषम्पिब मूत्रन्नीयस्वमार्यापततुते वज्रम्। इत्थं माता पुत्रमाक्रोशति किं कृत्वा क्षिप्त्वा भूमौ निरस्य। कुतोदन्त खण्डितस्तनी यतो बालो दन्तैर्मातुस्तनन्दशतीति जातिस्तस्याः पुनरेवं विधंपरुषाभिधायित्वमनुचितम्। अतिपारुष्यमेव चात्र वि रसताहेतुः। तेनातिमात्राद्भेदः ॥ ८ ॥ अप्रस्तुतेति। अप्रस्तुतः प्र स्तावमन्तरेण सूचितोरसो यत्र तत्तथा। एकरसप्रक्रमे हि विरोधि रसान्तरप्रस्ताव एव क्रियमाणोनौचित्यवान्। नचौचित्यमन्तरेण रसस्य पदसम्बन्धः सम्भवति। यदाह। अनौचित्यादृते नास्ति र सभङ्गस्य कारणम्। प्रसिद्धौ चित्यबन्धस्तु रसस्योपनिषत्परेति। तव वनवासइत्यादौ पितृमरणानुभवप्राप्तशोकप्रकर्षायाः शृङ्गार प्रस्तावना विरसायते। साहि स्वभावत एव करुणेन सहैकवाक्यस मावेशविरोधिनी। नचैकस्य बाध्यत्वमङ्गभावोवावगम्यते। नाप्यु भयोरन्यगुणीभावो ऽवगम्यते। येनायं विरोधः समाधीयताम्। युक्तिरत्रविदग्धैव। अर्थस्तु रसात्माविरोधेन पदम्बध्नाति ततः का न्तिविपर्ययाद्भेदः। नचकरुणोक्तिरुपक्रान्ता यतस्तदनिर्वाहे खेद सम्भावना स्यात्। किन्तु पितृमरणशुचञ्जहीहीत्यनेन शोका विष्टायां शृङ्गारप्रस्तावना। तथाचभिन्नमेव दुष्टता बीजन्तदे तत्सर्वमपि सन्धाय व्याचष्टे। अत्रेति ॥ ९ ॥ इदानीमनौचित्य रूपदूषणप्रस्तावः। अर्थालङ्कारेषूपमाप्रधानमिति प्रसिद्धा तस्या

हीनं यत्रोपमानं स्यात्तत्तु हीनोपमं स्मृतम्। यथा। क्वचिदग्रेप्रसरताक्वचिदाप्लुत्यनिघ्नता ॥ शुनेवसारङ्गकुलंत्वयाभिन्नन्द्विषत्कुलम्। अत्रशौर्यशालिनः शुनोपमितत्वाद्धीनोपममिदम् ॥ १० ॥ तदेवयस्मिन्नधिकन्तद्भवेदधिकोपमम्। यथा। अयम्पद्मासनासीनश्चक्रवाकोविराजते। युगादौ भगवान्ब्रह्माविनिर्मित्सुरिवप्रजाः। अत्रचक्रवाकस्यजगत्स्रष्ट्राब्रह्मणोपमितत्वादधिकोपममिदम् ॥११॥ यदतुल्योपमानन्तद्वदत्त्यसदृशोपमम्। यथा। णमहरंरो

मेवोपलक्षणतयाऽनौचित्यम्प्रपञ्चयति। हीनमित्यादि। हीनमपकृष्टमसज्जातीयमुपमानमित्युपमानप्रसिद्धा विशेषा उपमेयेप्रतिबिम्बकल्पाश्च प्रतीयन्त इत्युक्तम्। उत्कृष्टजातीयस्योपमेयस्य हीनजातीयेन सामान्यमभिधीयमानं शाब्दन्यायेन बोधयदनुचितमेवभवति। यथा। रणाश्वमेधे पशुतामुपागता इति। नन्वत्र रूपकबलेन वर्णनीयस्य पशुतावगम्यत इति युक्तमनौचित्यम्। क्वचिदग्र इत्यादौ प्रकृतोदाहरणे तु कथम्। नह्यत्र प्रस्तुतोपश्लोक्यस्य सारमेयतावगम्यते। अग्रे प्रसरणमापत्त्यनिहननञ्च सादृश्यमुपात्तमुचितमेवेति नैतत्। तत्वप्रतिबिम्बे सादृश्यप्रतीतिरपि शब्देन क्रियमाणा लोके कान्तिम्प्रति पुष्णाति नहि कदापि हीनेन सादृश्योक्तौ वर्णना सजीवा प्रतीयते। प्रतीतिमात्रपरमार्थञ्च काव्यदर्शनमिति ॥१०॥ तदेवेति। हीनेनोत्कृष्टंयथानोपमीयत इति लोकमर्यादा तथोत्कृष्टेन हीनम्। तथाहि। चक्रवाकोपमितिमनुसन्दधतां विशेषावगतिविधुराणाञ्च सहृदयानाम्प्रतीतिः स्खलन्ती जनयत्येव वैरस्यमिति सूक्ष्मेक्षिकया दूषणम् ॥११॥ इदमपरमायातमनौचित्यं यत्सादृश्यबुद्ध्या निबन्धेप्यसादृश्यपर्यवसानमित्याह। यदतुल्येति। यद्यपि बलवत्त्वादिना प्रतीयमानंहिमवद्भगवतोरस्तिसादृश्यन्तथापि वाच्योपमाभ्रमेणायन्निबन्धः साच न सम्पन्नानहिरोषेण विदग्धमन्मथशरीरदाहोवि

साणलणिदठ्ठमुद्धवम्महसरीरम्। वित्थअणिअंवणि गाअङ्गासोत्तंवहिमवन्तम्। अत्रकोपानलनिर्दग्धम न्मथशरीरस्यहरस्यनितम्बनिर्गतस्रोतसा हिमवद्गि रिणासहासादृश्यादिदमसदृशोपमम् ॥ १२॥ अप्रसि द्धोपमानंयदप्रसिद्धोपमंहितत्। यथा। कुमुदमिवमु खन्तस्यागौरिव महिषः शशीवकाव्यमिदम्। शर दिवविभातितरुणीविकसितपुलकोत्करासेयम्। अ त्रकुमुदमुखयोर्गोमहिषयोः काव्यशशिनोश्च प्रती यमाने शरत्तरुण्योश्च विधीयमानेसादृश्ये उपमानो पमेयस्याप्रसिद्धत्वादप्रसिद्धोपममिदम् ॥ १३ ॥ य

स्तृतनितम्बनिर्गतगङ्गास्रोतःप्रतिबिम्बभूतः। धातुरङ्गरञ्जितोगङ्गा प्रवाहोभिमतस्य भवति ललाटनेत्राग्निज्वालाप्रतिबिम्बमित्यपि न वाच्यम्। येनान्यत्वप्रसङ्गात्। नितम्बसम्बन्धोक्तिश्च न सङ्गतास्यात्। कथञ्चमन्मथशरीरदाहः प्रतिबिम्बायत इत्याशयेन व्याचष्टे। अत्रेति। विशेषणयोर्बिम्बप्रतिबिम्बभावाभावे विशिष्टयोरुपमानसम्भवतीति मत्वाविशेषणद्वयमदोषायैवेति व्याख्यातवान् ॥ १२ ॥ इदानीङ्कविस मयबहिर्भूतत्वेनोपमानौचितीमाह। अप्रसिद्धेति। कमलमुखयोरि व कुमुदमुखयोर्गोगवययोरिव गोमहिषयोः काव्यशब्दयोरिव काव्य शशिनोरस्तिसादृश्यं सौरभादिकमेवानुपात्तमपि प्रसिद्धतया प्रतीय मानम्। शरत्तरुण्योस्तु न तथा प्रसिद्धमिति विकसितपुलकाङ्कुराभा तीत्येताभ्यामुपात्तम्। पुलक इवाङ्कुराइति तत्राशयात्। विशिष्ट भानस्यच द्वयानुगतत्वेनैव प्रतीयमानत्वात्तथापि पद इवालङ्कारेपि कविभिरप्रयुज्यमानत्वमेव दोष इति व्याचष्टे। अत्रेति। प्रतीयमान इति। इवशब्दस्य द्योतकमात्रत्वात्। अभिधीयमानं व्याख्यातम्॥१३॥ वक्रताविशेषविशिष्टस्यैवार्थस्य काव्यकोटिनिवेशादवक्रोहेय इत्याह। यदिति। वक्तताव्यतिरेके ऽलङ्कारसामान्यमेव न स्यादिति निरल ङ्कारमित्युक्तम्। कोलाः खनन्ति मुस्तां गृध्राः खादन्ति मृतकमांसानि।

दलङ्कारहीनन्तन्निरलङ्कारमुच्यते। यथा। कोलाख णत्ति मोत्थं गिद्धा खाअन्तिमडअमंसाइं। उलुआह णत्तिकाएकाआउलुएविवाअन्ति। अत्रकोलादेः स्व रूपाद्यनभिधानाज्जात्याद्यलङ्कारासम्भवे निरलङ्का रनामायंवाक्यार्थदोषः सविशषणाद्गोरपत्यमित्या देर्वाक्याद्भिद्यते॥ १४॥ अश्लीलमितिनिर्दिष्टमश्ली लार्थप्रतीतिकृत्। यथा। उद्यतस्यपरंहन्तुस्तब्ध स्यविवरैषिणः। पतनञ्जायतेवश्यंकृच्छ्रेणपुनरुन्न तिः। अत्रोद्यतस्य परंहन्तुमितिसम्भोगारम्भविष यास्तब्धस्यविवरैषिणइतिवराङ्गविषयापतनञ्जाय तेवश्यमितिरेतोविसर्गविषया कृच्छ्रेणपुनरुन्नतिरि ति नष्टरागप्रत्यानयनविषया अश्लीलवाक्यार्थवि

उलूका घ्नन्ति काकान् काका उलूकानपि। वाअन्ति क्षिपन्ति खा दन्ति। वीगतिव्याप्तिप्रजनकान्त्यसनखादनेष्वितिधात्वनुसारात्। नन्वस्ति कोलादिस्वरूपमत्र। ततोजात्यलङ्कारेण वक्रत्वमाक्षिप्यते। विशेषस्य च सामान्यनान्तरीयकत्वात्कथमुच्यते निरलङ्कारमित्यत आह। अत्रेति। स्वंरूपञ्चमत्कारकारि कविप्रतिभामात्रप्रकाशनीयं रूपन्तदेवालङ्कारकक्षामधिशेते। नचात्र तथा किञ्चिदभिहितमतोन जात्यलङ्कारः। एवमन्योप्यलङ्कारो नास्ति। कथन्तर्हि वक्रताऽभाव रूप दीर्घपुच्छ इत्यादेः शब्ददोषाद्भिद्यते तदाह। सविशेषणादिति। तत्र विशेषणप्रयोगे शब्दानामेव वक्रता व्यतिरेकेणापवाद इतिश ब्ददूषणमिह तु न तथा। किन्तूक्तमेवस्वरूपन्न वक्रमिति वाक्यार्थ एव दुष्टः॥१४॥ अश्लीलमिति। उद्यतस्येति। परमन्यं हन्तुमुद्यतस्य विवरैषिणइति प्रमादकृतावधानस्य स्तब्धस्यात्मन्युत्कर्षाभिधानेना न्यानवधीरयतः पतनमावश्यकमुद्गमः कृच्छ्रादिति संसर्गोभिमतः। एषामेव पदार्थानां संसर्गान्तरमश्लीलमेवेत्याह। अत्रोद्यतस्येति। एतेन पददोषाद्भेद उक्तः॥१५॥ देशकालादेः काव्याङ्गत्वात्तद्विरोधेना

षयाप्रतीतिर्भवति ॥ १५ ॥ विरुद्धन्नाम तद्यत्र विरोधस्त्रिविधोभवेत् । प्रत्यक्षेणानुमानेनतद्वदागमवर्त्मना । यो देशकाललोकादिप्रतीपःकोपिदृश्यते । तमामनन्तिप्रत्यक्षविरोधंशुद्धबुद्धयः । तत्रदेशविरोधोयथा । सुराष्ट्रेष्वस्तिनगरी मथुरानामविश्रुता । अक्षोटनारिकेराद्यो यदुपान्ताद्रिभूमयः । अत्रसुराष्ट्रेषुमथुरानास्ति । तत्पर्यन्ताद्रिभूमिषु चाक्षोटनारिकेराणामभावात् । देशोद्भवनराष्ट्रादिरित्ययन्देशकृतःप्रत्यक्षविरोधः ॥ १६ ॥ कालविरोधो यथा । पद्मिनीनक्तमुन्निद्रारस्फुटत्यह्निकुमुद्वती । मधुरुत्फुल्लनिचुलोनिदाघोमेघदुर्दिनः । अत्रपद्मिन्यानक्तङ्कुमुद्वत्या अह्निमधौनिचुलानामुन्निद्रत्वाद्यभावान्निदाघस्यचामेघदुर्दिनत्वात् । कालोनक्तन्दिनर्तवइति कालकृतोयम्प्रत्यक्षविरोधः ॥ १७ ॥

र्थोदुष्टः । विरोधश्चबाधः । सप्रमाणेनैव ततो लोकादिविरोधस्यालङ्कारसमयसिद्धस्य प्रमाणविरोधपर्यवसायित्वं विवक्षन्नाह । विरुद्धमिति । तत्रदेशकालादौ प्रत्यक्षत एव वर्ण्यमानस्याभावोनिश्चीयत इति देशादिविरोधः प्रत्यक्षविरोधः । शूरसेनेषु मथुरा न सुराष्ट्रेषु । तत्पर्यन्तभूमीष्वक्षोटा नारिकेरा वा न सम्भवन्ति । अद्रीणां कथन्देशत्वमित्यत आह । देशोद्भवनराष्ट्रादिरिति ॥१६॥ पद्मिनीति । नक्तंरात्रौ मधुर्वसन्तः निचुला इज्जलाः । ते वर्षासु पुष्यन्ति न वसन्ते । यद्यपि क लस्वरूपमप्रत्यक्षं तथापि तदुपाधीनां व्यवहाराङ्गतेव प्रत्यक्षतावेत्याह कलोनक्तन्दिनर्तवइति ॥ १७ ॥ अन्ते प्रत्यक्षविरोधशब्दार्थं व्याचष्टे । प्रत्यक्षेणानुपलम्भादिति । कथमयं लौकिकविरोध इत्यत आह । जङ्गमेति । जङ्गमस्थावरंजीवच्छरीरं लोकः । तत्र जङ्गमङ्गवाह्यादि स्थावरं लतावृक्षादि राष्ट्रादावेव

लोकविरोधो यथा । आधूतकेसरोहस्तीतीक्ष्णशृङ्ग स्तुरङ्गमः । गुरुसारोयमेरण्डोनिःसारःखदिरद्रुमः । अत्र हस्तिहयैरण्डखदिराणाङ्केसरादिसद्भावस्य प्र त्यक्षेणानुपलम्भात् । जङ्गमस्थावरोलोक इति लोक कृतोयम्प्रत्यक्षविरोधः ॥ १८ ॥ युक्त्यौचित्यप्रति ज्ञादिकृतोयस्त्वहकम्न । अनुमानविरोधःसकवि मुख्यैर्निगद्यते । अत्रयुक्तिविरुद्धंयथा । सुरहिमहुपा णलम्पडभमरगणावद्धमण्डलीबद्धाम्। कस्समणंणा णन्दइकुम्भीपुठ्ठिअङ्कमलम् । अत्रकूर्मीपृष्ठेकमलो द्भूतेरयुक्तियुक्तत्वाद्युक्तिविरुद्धमिदम्॥१९॥औचित्य विरुद्धंयथा । पहंसुउत्तरिज्जेणपामरोपामरिएपरि

देशपरिभाषा इदम्प्रकारान्तरेण देशशब्देनाभिधीयते॥१८॥ युक्तीति । सामान्यतस्तावदनुमानविरोधो यत्प्रमाणाभावः नहि प्रमेयमात्रे प्रसिद्धम् । तदयमर्थो युक्तिः प्रमाणम् । सुरभिमधुपानलम्पटभ्रमर गणावद्धमण्डलीबन्धः। कस्य मनो नानन्दयति कूर्मपृष्ठोद्भूतङ्कमलम् । आधूतकेसरेत्यादौ उदाहरणे क्वचिदेव व्यक्तिविशेषे केसर दिसम्ब न्धप्रतिपादनङ्कथमन्यथा तेषामेरण्डत्वनिर्देशति । ततोभवति प्रत्य क्षेणैव विरोध इहतु न तथा । नहि विशेषतः कापि कूर्मपृष्ठव्य क्तिरस्तीति सामान्याकारेण विवक्षितम् । ततश्च कमलजातेः पङ्क जप्रभवाया एव निश्चयात्कूर्मपृष्ठादुद्गमे न कश्चित्प्रमाणाङ्कदापि कस्याप्यवतरतीत्य शयवान् व्याघट्टे । अत्रेति । अयुक्तियुक्तत्वादि ति । युक्तिः प्रमाणत्वेना सम्बद्धत्वादित्यर्थः॥१९॥ औचित्यविरुद्धमि ति । औचित्यं योग्यता तत्परामृश्यमानस्य विवक्षितविपरीतप र्यवसानमन्योनुमानविरोधः । तथाहि । पहांशुकोत्तरीयेण पामरः पामर्यांप्रोज्झति । अतिगुरुकक्रूरकुम्भीभरेण खेदार्द्रितं वहनमित्य त्रपूर्ववत्सम्बन्धग्राहकप्रमाणाभावः । कदाचिद्राजप्रसादादिना तथा सम्भवात्। किन्तु पामरोचित्यप्रतिसन्धाने पहांशुकावगुण्ठवनमनुचि

पुसइ । अइगरुअकूरकुम्भीभरेणसेउल्लिअंवअणम् । अत्रपामरस्यपट्टांशुकोत्तरीयाभरणानौचित्यादौचित्यविरुद्धमिदम् ॥ २० ॥ प्रतिज्ञाविरुद्धंयथा । यावज्जीवमहम्मौनीब्रह्मचारीचमेपिता । माताच ममवन्ध्यासीत्स्मराभोनुपमोभवान् । अत्रस्वयंवक्तुरेवयावज्जीवमहम्मौनीत्यादिपदानामुक्त्याप्रतिज्ञाविरोधात्प्रतिज्ञाविरुद्धमिदम् ॥ २१ ॥ धर्मार्थकामशास्त्रादिविरोधःकोपियोभवेत् । तमागमविरोधाख्यन्दोषमाचक्षतेबुधाः । तेषुधर्मशास्त्रविरोधोय

तम् । विद्यधनेपथ्यपरिग्रहादिनागरवृत्तापरिचय एव पामरत्वम् । ततश्चायमर्थो । भवति पट्टांशुकसम्बन्धायोग्ये यस्यामरत्वादिति । कूरम्भक्तम् । कुम्भीः कलशीः ॥२०॥ प्रतिज्ञाविरुद्धमिति । अन्युपगमवाक्यम्प्रतिज्ञा । यथा । यद्यदादिशति स्वामी तत्करोम्यविचारयन्निति । साध्यनिर्देशश्च । अयं सरमनोत्कर्षी पीनस्तनविमर्दनः । नाभ्पूरुजघनस्पर्शी नीवीविस्रंसनः कर इति । द्वयमपि प्रतिज्ञापदेनाभिमतम् । तत्राद्ये यावज्जीवमहम्मौनी इत्युदाहरणम् । आव्याहारो मौनम् । तदभ्युपगमवाक्येनैव बोध्यते । तथाहि । नायंमौनीब्रह्मचारित्वादित्यभ्युपगम्य मौनाभावपर्यवसन्नमिति तृतीयोयमनुमानविरोधः । द्वितीयपक्षकृतीकरणेन चतुर्थोदाहरणेब्रह्मचारीचमेपिता माताच ममवन्ध्येति वक्ता यस्यौरसः सुतः स पितृपदेनाभिमतो नच ब्रह्मचारित्वं सम्भवति । माताजनयेत्यभिधीयते नच तस्यावन्ध्यात्वं संभवति । परस्परव्याघातो विरोधः । अयञ्च पञ्चमप्रकारोपि व्याप्यकद्वारा विरोधः । यथा । स्मराभोनुपमइति । नहि स्मराभत्वं लोके प्रसिद्धङ्किन्तु स्मरतुल्यतां वदन्नोपमानत्वमभ्युपगच्छति । तद्यानुपमत्वेन विरुद्धम् । ततोव्याप्यकविरोधोयम् । यथावह्निरनुष्ण इति । आदिग्रहणाद्दृष्टान्तदारकोनुमानविरोधः सङ्गृहीतः ॥२१॥ वेदाध्ययनानधिकारादिति । अकृतव्रतबन्धे तु गुरावुपरते सति । नाभि

था । असावनुपनीतोपि वेदानधिजगे गुरोः । स्व भावश्चदुरुस्फटिकोनसंस्कारमपेक्षते । अत्रानुपनीत स्यवेदाध्ययनानधिकारादुर्मशास्त्रविरोधः ॥ २२ ॥ अर्थशास्त्रविरोधोयथा । कामोपभोगसाकल्यफ लोराज्ञामहीजयः । अहङ्कारेणजीयन्तेद्विषन्तःकि न्नयश्रिया । अत्रमहीजयस्यफलत्वेनकामोपभोगा नामर्थशास्त्रकारैरननुमतत्वाच् शत्रुविजयेचाहङ्का रस्याहेतुत्वादर्थशास्त्रविरोधः ॥ २३ ॥ कामशास्त्र विरोधोयथा । तत्रोत्तरोष्ठविम्बोष्ठिदशनाङ्कोवि राजते । पूर्णः सप्तस्वरः सोयम्भिन्नग्रामःप्रवर्त ते । अत्रोत्तरोष्ठेदशनाङ्कस्यकामशास्त्रकारैरननुज्ञा

व्याहारयेद्ब्रह्मस्वधानिनयनादृत इति धर्मशास्त्रम् ॥२२॥ अत्र मही जयस्येति । महीजयस्य धर्मः फलमिति नीतिशास्त्रे स्थितम् । अ हङ्कारोमानः स नः शत्रुविजयेसाधनम् । अरिषड्वर्गत्यागे हीन्द्रि यजयः । तथा विजिगीषुता । तयाच शत्रुपरिभवइति । यदाह । सरघुराट्टोबिललास इत्युपक्रम्य कौटिल्याचार्यः मानाद्रावणः परदा रानप्रयच्छन् दुर्योधनो राज्यांशञ्चेति ॥२३॥ अत्रोत्तरोष्ठ इति । उप रितनओष्ठ उत्तरोष्ठमत्तर्मुखनयनात्तच्च मुक्ता चुम्बनवद्दशनच्छे द्यस्थानानीति कामसूत्रम् । भिन्नग्रामरागाणामिति । भिन्नमार्गेषु सप्तस्वराणां समवायोनोपनिबद्धस्तथा सुप्रांशुस्तु धैवतत्यागः पञ्च सर्पभवर्जितः षड्जो दीप्यताञ्जातो भिन्नषड्ज उदाहृतः । तत्र ङ्गेप्याह । षाडवौडविके जाती भिन्नग्राम उदाहृतः । ततश्च षड्था पञ्चवा स्वरा भवन्ति भिन्नग्रामे न तु सप्त । कामशास्त्रविरोधश्चता वे कथङ्कलाविरोध उदाहियत इत्यत आह । तदंशत्वादिति । नी तादिकलाचतुःषष्टेः कामाङ्गतया कामसूत्रकारैरुपदेशाङ्गवति तद्विपरी धे कामशास्त्रविरोध इत्यर्थः । आदियहणाद्देवताभक्तितोयुक्तिर्नलाभ

नात्कामशास्त्रविरोधः । भिन्नग्रामागाच्च पूर्णसप्त स्वरानुपपत्तेः । कलाविरोधेपि तदंशत्वात्कामशास्त्र विरोधएव ॥ २४ ॥ एवम्पदानां वाक्यानां वाक्या र्थानाञ्चयःकविः । दोषान्हेयतया वेत्ति सकाव्यङ्क र्त्तुमर्हति । अलंकृतमपि श्रव्यन्नकाव्यंगुणवर्जितम् । गुणयोगस्तयोर्मुख्योगुणालङ्कारयोगयोः । त्रिविधा

ज्ञानसम्पदेत्यादिकस्योक्तादिशास्त्रविरुद्धमुदाहरणीयम् ॥ २७ ॥ दोषा णामप्रयत्नमुद्देशेप्यभिसन्धायकृतसंविशेषसंहारन्यायेन स्मृतवति । एवमिति । तदेवन्दोषलक्षणे वृत्ते कतिप्राप्ता गुणा लक्षयितव्याः । तदेवमीदृशः प्रसादादयो गुणाः । यत्काव्यस्यत्वलंकारा इति पूर्वप्र सिद्धो ऽर्थो निवार्यते । किमेवमित्थीभूतदोषविगमन क्रियाल ङ्कारेभ्यो गुणानाम्पूर्वनिपातः । रसस्य हि दोषाभावादिनियमसंस्कृत एव यदलाभ इत्यस्ति पश्चाद्भावे निश्चयमिति तत्राह । अलङ्कृत मपीति । रसाद्यलम्बिनोगुणाः, शब्दार्थावलम्बिनस्त्वलङ्कारा इति क्वाऽसौरेकाः । तदगमकम् । तथाहि । यदि काव्यस्य रसप्रधाना त्मकताभाश्रित्यायं विभागः । अलङ्कारा अपि तर्हि तत्प्रवणा एव । अथ नायनियमोयत्सर्वत्ररसःप्रधानमिति तदात्र गुणेष्वपि कथन्तदालम्बननियमः । किञ्चात्र प्रसादादिवच्छ्लेषादयोपि शब्दार्थ गता एव प्रत्यभिज्ञायन्ते तत्कथमयं विभागः । यद्यपिशब्दार्थौ ज्ञायन्ते तथापि रसप्रवणा इतिचेत् । किमिदं रसप्रवणत्वं रसाश्रित त्वन्ताबन्न संभवत्येव । रसप्रतीतिपर्यवसायित्वञ्च यथाक्वचिदलङ्कारेष्वपि तुल्यमित्यऽविचारितरमणीयोयम्मार्गः । शोभातिशयवतीति वाक्यं कश्चिद्विशेषः शोभापदाभिलप्योभवन्नस्तिऽत्रशब्दः शब्दार्थौ लिप्सीकरोति । ततश्च तथाभूतशोभानिष्पत्तिहेतवो गुणास्तदुत्कर्ष हेतवस्त्वलङ्काराः । यदाह । काव्यशोभायाः कर्त्तारोधर्मा गुणास्त दतिशयहेतवस्त्वलङ्काराइत्यत्रे । तदपिन । अत्र रसादिवद्व्याप्तेः । नहि सेषा रीतिशरीरान्तर्निवेशः कैश्चिदभ्युपगम्यते तत्राहालङ्का

श्चगुणाः काव्येभवन्तिक विसम्मताः । बाह्याश्चाभ्य
न्तराश्चैवयेचवैशेषिकाइति ॥ बाह्याःशब्दगुणास्ते
षुचान्तरास्त्वर्थसंश्रयाः । वैशेषिकास्तुतेनूनन्दो
षत्वेपिहियेगुणाः । चतुर्विंशतिराख्यातास्तेषु येश
ब्दसंश्रयाः। ते तावदभिधीयन्ते नामलक्षणयोगतः।
श्लेषःप्रसादःसमतामाधुर्यंसुकुमारता। अर्थव्यक्तिस्त
थाकान्तिरुदारत्वमुदात्तता। ओजस्तथान्यदौर्जित्य
म्प्रेयानथसुशब्दता॥ तद्वत्समाधिसौक्ष्म्यञ्चगाम्भीर्य
मथविस्तरः। संक्षेपसम्मितत्वञ्चभाविकत्वं तथा ग
तिः। रीतिरुक्तिस्तथाप्रौढिरथैषांलक्ष्यलक्षणे। तत्र।

रिकसमयानुपाती श्लेषाद्यन्यतमोगुणः । जात्याद्यन्यतमश्चालङ्कार
इति विभागः । तत एव च शोभाकारित्वेन गुणानामप्यलङ्कारप
क्षनिक्षेपङ्करिष्यति । उद्भूतगुणन्तु स्फुटालङ्कारहीनमपि चमत्का
रमावहत्येव । यथा । का त्वं शुभ्रे, कस्य परिग्रहो वा, किं वा मद
भ्यागमकारणन्ते । आचक्ष्व मत्वा वशिनां रघूणाम्मनः परस्त्रीवि
मुखप्रवृत्ति। यतो गुणयोगोमुख्यस्ततः प्रथममुद्दिष्टोलक्षितश्चैषःसा
मान्यगुणस्थितौ गुणान्विभजते । त्रिविधाश्चेति । शब्दः शरीरस्था
नीयोधिष्ठेयतया प्रथमप्रतिसन्धेयतया च बाह्यः । ततस्तदाश्रिता
गुणा अपि बाह्याः । अर्थस्त्वात्मतुल्योधिष्ठायकतया पश्चाद्ग्राह्य
तयाचाऽऽन्तरस्तेन तदाश्रिता गुणाअप्यान्तराः । अथेदानीं येषामग्रे
दोषत्वंततो गुणभावः । केचिद्विशेषमासाद्यते वैशेषिकाः । पूर्वन्दो
षा अपिविशेषयोगेन गुणीभवन्तीत्यभिप्रायात् । माधुर्योजः प्रसा
दास्त्रय एव गुणा इति ध्वनिकारस्य मतन्निरस्यति । चतुर्विंशतिरि
ति । परस्परसङ्कीर्णत्वादुपाधीनामितिभावः । नचैतदस्माकम्मनीषा
मात्रेण कल्पनमित्याह । आख्याताइति । निष्ठाप्रत्ययेनेदम्प्रथमता
द्योत्यते । उक्तविशेषादेव शब्दगुणानाम्पूर्वभाव इत्याह ॥ तेष्विति ।

गुणः सुश्लिष्टपदताश्लेषइत्यभिधीयते। यथा। उभौ य
दि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम्।
तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्यवक्षः।
अत्रभिन्नानामपिपदानामेकपदताप्रतिभासहेतुत्वे
नसन्दर्भस्यसुश्लिष्टत्वादयंश्लेषोनामशब्दगुणः॥१॥प्र
सिद्धार्थपदत्वंयत्सप्रसादोनिगद्यते। यथा। गाहन्ताम्म
हिषा निपानसलिलंशृङ्गैर्मुहुस्ताडितञ्छायाबद्धकद
म्बकम्मृगकुलंरोमन्थमभ्यस्यतु। विश्रब्धंक्रियतां व

अभिधानं द्विविधं विभागतोलक्षणतश्चेत्याह। नामलक्षणयोगतइ
ति। पदघटनव्यवस्थितौ गुणान्तरगवेषणमतः प्रथमं श्लेषलक्षणमा
ह। तत्रेति। श्लिष्टानि घटितानि पदानि यत्र तस्य भावस्तत्ता।
नच घटनामात्रस्य गुणभावइत्याशङ्क्यम्। सुपदं शोभना घटनेत्य
र्थः। शोभनत्वङ् घटनाया मसृणत्वमेकताप्रतिभानसामर्थ्यं यद्ब्राह्मं
सूत्रमुरः स्थलइति। बीजञ्चात्र श्रुत्यनुप्रासवत्त्वमलक्षितसन्धिता च।
तथाहि प्रकृतोदाहरणे उभावित्युकारभकारावोष्ठ्यौ। यदिव्यइ
त्याद्यन्तौ यकारौ तालव्यौ। नचायं वर्णानुप्रासः। ई षत्स्पृष्टत्वादि
भेदात्। मध्येदकारवकारौ दन्त्योष्ठ्यौ। म्रीत्यत्र मकारोभकारेण न
कारोदकारेण समानश्रुतिक इत्यादि बोद्धव्यम्। तथा पृथक्प्रवाहाविति
ककारस्य पवर्गगमनैकता प्रतिभासते। प्रवाहावाकाशेत्यौकारस्यावा
देशेन वर्णान्तरनिष्पत्त्या॥ एवम्पयसः पतेतामित्यादावुन्नेयम्। पृथगि
ति पार्श्वद्वये। तेनवक्षःस्थलदक्षिणवामभागयोर्लम्बमानोद्विसरोहार
इति लभ्यते। अस्यवक्षइति। अत्रास्येति पदेन नान्यस्य हारइत्यम
नुपमो नचान्यस्य वक्षः स्थलमाकाशवदुन्नतविस्तीर्णमिति भगवतः
सकलजगद्विलक्षणत्वध्वनिरित्याराध्याः॥१॥ प्रसिद्धार्थेति। अस्यार्थः प्रा
गेव विवृतः। प्रसादोद्विधा वाच्यविषयः, प्रतीयमानविषयश्च, । तत्र
प्रतीयमानविषयोयथा। एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी। लीला
कमलपत्राणि गणयामास पार्वती। अत्र श्रुतावगतादेव वाक्याल्लज्जा

राहपतिभिर्मुस्ताक्षतिः पल्वलेविश्रामंलभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः। गाहन्ताम्महिषानिपान सलिलमित्यादिप्रसिद्धार्थपदोपादानात्प्रसादः ॥२॥ यन्मृदुप्रस्फुटोन्मिश्रवर्णबन्धविधिम्प्रति । अवैष

दयोहस्तदत्ताइव प्रकाशन्ते। वाक्यविषयो द्विधा भवति। ग्राम्यैरेव ग्राम्य उपनागरैर्वा पदैः सन्दर्भनिर्वाहे। अद्योयथा। चन्द्रे कलङ्कः सुजने दरिद्रता विकाशलक्ष्मीः कमलेषु चञ्चला ॥ मुखाप्रसादः सधनेषु सर्वदा यशोविधातुः कथयन्ति खण्डितम्। द्वितीयमुदाहरति। गाहतामिति। अत्र प्रथमपादे गाहन्ताम्महिषा इति ग्राम्यम्। निपानसलिलमित्युपनागरम्। शृङ्गैरिति ग्राम्यम्। मुहुरित्युपनागरम्। ताडितमितिग्राम्यम्। द्वितीयपादे कदम्बकरोमन्थशब्दावुपनागरौ शेषाणि ग्राम्याणि। एवञ्च चरमयोरपि स्वतोविवेचनीयम्। गाहनं विलोडनन्तन्निःशङ्कमेव भवतीति विश्रम्भध्वनिः। अतएव त्रासाऽभावात्प्रकृतिप्रत्यापत्तौ। शृङ्गाभ्याम्पर्यायेण जलताडनम्महिषजातिः। छायाश्रयणं यूथबन्धश्च मृगजातिः। चिरपरस्परवार्त्तानभिज्ञानान्दिवानिष्पलायनेन रोमन्थोऽपरिचित इवासीत्तस्येदानीं शिक्षाक्रमेण यदिपरिचयः स्यादित्यभ्यस्यत्विति ध्वनिः। वराहपतिभिरिति। न यादृशतादृशानामस्मन्मृगयासंरम्भगोचरत्वमिति प्रकाश्यते। ननुचात्र कर्तृप्रक्रमभेदोदूषणङ्कस्मान्न भवति। नैतत्। आपातशौण्डेषु परिणतिभीरुषु च महिषेषु स्वभावभीतेषु मृगेषु न तथायं संरम्भते यथा पुनरावृत्तिचतुरेषु प्रकारकोविदेषु च वराहेषु। ततश्च तेषामुचितक्रियासु कर्तृतामात्रमेव न सोढवानिति साम्प्रतङ्कर्तृताभ्यनुज्ञानेन व्यज्यते। ततस्तृतीयायामौचित्यनिवेशिन्याम्प्रक्रमभेदोप्युचित एवेतिव्यक्तिविवेककारादीनामपि सम्मतः पन्थाः। इदञ्चेति च कारेणचेदस्मद्धनुरारूढमवतीर्णं वा तदैवसंरम्भगोचराणाम्भयविस्रम्भावितिकोपप्रकर्षः। अतएवास्मदिति बहुवचनं सजीवम् ॥२॥ यदिति। प्रतीत्यन्तेनमार्गोव्याख्यातः। अवैषम्येण भणनमित्यनेन वाग्भेदः स्वरे

स्येण भणनं समता साऽभिधीयते। यथा। यच्चन्द्रकोटि कर कोरकभारभाजि बभ्रामयभुणिजटापटले हरस्य। तद्वः पुनातु हिमशैलशिलानिकुञ्जझाङ्कारडम्बरविरा वि सुरापगाम्भः। अत्रोपक्रमादासमाप्तिस्फुटबन्ध स्यनिर्वाहात्समत्वम् ॥ ३ ॥ या पृथक्पदतावाक्ये त

षुहस्वान्त्याः व्यञ्जनेषु वर्गान्त्यादन्त्याश्च मृदवः कोमला वर्णाः। दीर्घाः स्वराः व्यञ्जनेषु णकारवर्जटवर्गरेफशषहा अदन्त्यसंयोगाश्च प्रस्फुटाः। शेषाणि व्यञ्जनानि दन्त्यसंयोगाश्चोन्मिश्रमध्यमावर्णास्तेषामन्यतमैर्व र्णैर्यावत्यनविधिस्तावति यदवैषम्येण उपक्रमनिर्वाहादिना करणेन भणनमुक्तिः सिद्धिः सासमता। नचेयन्दोषाभावमात्रमेकजातीयव र्णपरिचयप्रबन्धप्रवेशनिर्वाहाणां शक्तिव्युत्पत्तिरूपतयाप्रधानोत्कर्ष पर्यवसानात्। नच दोषाभावस्यैवंरूपता केनचित्प्रतिषिद्धा॥ अत एव श्लेषप्रसादयोरपि गुणभावः सिद्धः। ननुरक्ताशोकरुशोदरीक्तनुगतात्य क्त्वानुरक्तज्जनलो दृष्टेति मुधैव चालयसि किं वाताभिभूतं शिरः। उत्कण्ठाघटमानषट्पदघटासंघट्टदष्टच्छदस्तत्पादाहतिमन्तरेण भव तः पुष्पोद्गमोयङ् कुतः। इत्यत्र वैषम्यन्दोष एव स्यात्। नच्चत्र मुक्तस्थाने स्फुटता। तस्माद्यत्किञ्चिदेतत्। तदेवनिर्वाह्यत्रैविध्या त्समता त्रिरूपा भवति। ग्राम्या परुषा उपनागरिकाच। तत्रोन्मिश्र प्रायसन्दर्भनिर्वाहे ग्राम्या। यथा। पुरः पाण्डुच्छायन्तदनु कपि लिम्ना कृतपदन्ततः पाकोद्रेकादरुणगुणसंवर्द्धितवपुः। शनैः कोशार म्भे स्थपुटनिजविष्कम्भविषमे वने पीतामोदं बदरमरसत्वङ्कलयति। परुषा यथा। यच्चन्द्रेति। बालेन्दुमयू खमुकुलजालनिचुलितासु परमे श्वरजटावल्लरीषु न्नभणाऽऽद्ध्यासादिवाद्यापिहिमाद्रिकुञ्चेषु झाङ्का रिगङ्कारम्भ इति प्रतीयमानोत्प्रेक्षा। उपनागरिका यथा। वसने प रिधूसरे वसाना नियमक्षामसुखीधृतैकवेणिः। अतिनिकरुणस्य शुद्ध शीला मम दीर्घं विरहव्यथां व्यनक्ति। अत्रास्मत्सहाध्यायिनः पूर्वार्द्धमेवोपनागरिकोदाहरणत्वेन्यन्ते। उत्तरार्द्धेहि निष्ठेत्यादिवर्ण

न्माधुर्यमिति स्मृतम्। यथा। स्थिताःक्षणम्पक्ष्मसु ता
डिताधराःपयोधरोत्सेधनिपातचूर्णिताः। वलीषु त
स्याःस्खलिताःप्रपेदिरेचिरेणनाभिम्प्रथमोदबिन्दवः।
अत्रपदेषुसंहिताभावात्पृथक्पदत्वेनमाधुर्यम् ॥ ४॥

निवेशनादुन्मिश्रत्वमेव। इयमपरोन्मिश्रासन्दर्भजातिर्यत्कोमलकठो
रवर्णतुल्यतयानिर्वहणमिति॥ ३॥ पृथगिव पदानि यत्र भासन्ते स पृ
थक्पदः सन्दर्भ इत्युपमागर्भो बहुव्रीहिश्च। तस्यभावस्तत्ता। माधु
र्यमुक्तस्वरूपन्तच्छब्दगतम्पृथक्पदतया विछिद्यत इति। तदेव माधुर्य
युक्तमौचित्येन हि समासव्यतिरेक आकृष्यते कदाचिद नुद्धतो वा समा
सः॥ अनुद्धतिरनुल्लेखः। तदुक्तम्॥ अवृत्तिर्मध्यवृत्तिर्वामाधुर्ये घटमा
तथेति। अतएव समासनिवृत्तिपरमेतदिति वामनः। कश्चित्समासो र
सौचित्येनाकृष्टः परिभाव्यमानो मनीषिभिश्चमत्कारकारणम्भवति। य
था। तेषाङ्गोपवधूविलासुसुहृदां राधारहः साक्षिणां क्षेमन्तत्र कलिन्दशै
लतनयातीरे लतावेश्मनाम्। विछिन्ने स्मरतल्पकल्पनमृदुच्छेदोपयो
गेऽधुना ते नूनञ्जरठीभवन्ति विगलन्नीलत्विषः पल्लवाः। अत्र
तच्छब्दो येषां विलाससम्पत्तिस्वभावलब्धप्रकर्षाणामनुभव एव सा
क्षीति विशेषप्राधान्यविवक्षया न समासेनानिगमनात्। न या का
पि वधूरपि तु गोपसंबन्धिनी कृतगोपाचारचातुरीपराधीना नान्यत्र
नीरसायेक्वचन सौहार्द्दंकिन्तु विलासएव। सोपि न यःकश्चिद
पितु गोपवधूसम्बन्धीत्येवम्बहूनाम्पिण्डीभावविवक्षया समास एवो
चितः। एतावतैवच्छेदोप्युचित एव सर्वस्वायमानत्वात्। तत्सम्ब
न्धजनितस्य विशेषस्य पृथगेवोक्तिरुचिता। राधारहःसाक्षिणामि
त्यत्रापि समासः पूर्ववत्। यद्यपि राधासम्बन्धस्य वैवक्षिकम्प्राधान्य
मिति न समासस्तथापि प्रतिभासते तथापि यदन्यस्यराधारहसि
निवेशः क्षम इति भावयन्सुहृदामित्यपहायसाक्षिणामित्युक्तवान्।
साक्षीहि तटस्थ एव व्याप्रियते। तेनावश्यकर्त्तव्यसाक्षिताप्राधान्य
विवक्षया सम्भवति विरोधादित्यवसेयम्। स्थिताइति। पक्ष्मावस्थाने

अनिष्ठुराक्षरप्रायं सुकुमारमिति स्मृतम् । अत्रा । म
ण्डलीकृत्यबर्हाणि कण्ठैर्मधुरगीतिभिः । कलापिनः
प्रनृत्यन्तिकाले जीमूतमालिनि । अत्र सर्वकोमलत्व
ऽसतिश्लेषविपर्ययदोषशैथिल्याभावाद्बाहुल्याद्वर्णाना
मनैष्ठुर्यात्सौकुमार्यम् ॥५॥ यत्र सम्पूर्णवाक्यत्वमर्थ

ऽधरताडने स्तनतटनिपाते वलिभङ्गस्खलने नाभिनिम्नप्राप्तौजलबि
न्दूनाङ्कर्तृता निर्देशात्स्वाच्छन्द्यमुन्मीलितम् । तथाच गौर्या बाह्यसंवे
दनाभावस्तेन भगवद्गतो ऽनुरागप्रकर्षः प्रथमपादेन । निदाघता
पच्छिदा रजोहरणेन वसुन्धरा सौरभोन्मीलनेन मयूरकेकायिता दि
ना त्रिभुवनस्यापि ये चमत्कारास्पदमिति ध्वनितम् । तथाभूताना
मथ संवेदने पूर्व एवाभिप्रायः । ताडितेत्याकारेण च्छेदोन्मेषः पयो
धरेत्यादावोकारः । धकारतकारौ ॥४॥ अनिष्ठुरेति । समस्त एव गुम्फे
द्वित्राणि त्रिचतुराणि प्रस्फुटान्यक्षराणि निवेश्यन्ते स किलान्तरान्त
रोपदंशन्यायेन चित्रास्वादपर्यवसायी सुकुमार इति प्राचामतम् ॥
अतएव समताया भेदः । मृदीकापाकः पुनरन्यादृशोवर्ण्यते । अनि
ष्ठुरे सुकुमारव्यवहारोलोके दृष्टःमण्डलीकृत्येत्यादौ प्रथमपादे मण्डे
लि, कृत्येति, बर्हेति, । अत्र संयोगत्रयम् । द्वितीयपादे ठठेति,मैति,
च संयोगद्वयमुपन्यस्य गीतिदीर्घस्वरनिवेशोरूपाकरमादाय विशेष
शोभाहेतुः । तृतीयपादे केति न इति प्रतिनृत्यन्तीतिचदीर्घविस
र्गसंयोगा इति व्यक्तरम् । चतुर्थपादे दीर्घस्वरा एवान्तरान्तरेति सैव वा
सनः । ननु अनिष्ठुराक्षरमयत्वं सुकुमारतेति वक्तव्ये प्रायशब्दः केन
प्रयोजनेनेत्यत आह । अत्रेति । नचायमर्थगुणः स हि वाक्यार्थे
धर्मिणि निरूप्यते अयन्तु पदसमुदाय इति युक्तं शब्दगुणेषु परिग
णनम् । सम्भितत्वमन्यथाभविष्यति ॥५॥ वागर्थाविवेति । अत्र वन्दे
ऽन्युत्तमपुरुषवचनेनैवाहमिति प्राप्तमस्मद्युत्तम इत्यत्र स्थानिनीत्य
भिधानात् । किमिति कर्मापेक्षायाम्पार्वतीपरमेश्वराविति । तावपि कि
म्भूताविति यतोजगतः पितराविति । तेन लक्ष्मीनारायणादिवैधर्म्येण न

व्यक्तिं वदन्ति ताम् । यथा । वागर्थाविवसम्पृक्तौ वागर्थप्रतिपत्तये । जगतःपितरौ वन्दे पार्वतीपरमेश्वरौ। अत्रवाक्यपरिपूर्णतयाऽर्थसमर्पकत्वादर्थव्यक्तिः ॥ ६ ॥ यदुज्ज्वलत्वम्बन्धस्य काव्येसा कान्तिरुच्यते। यथा। निरानन्दःकौन्देमधुनि विधुरेबालबकुलेन साले सालम्बो लवमपि लवङ्गे न रमते। प्रियङ्गौनासङ्गंरचयतिनचूते विचरतिस्मरल्लँक्ष्मीलीलाकमलम

मस्कार्यत्वम्। एकशेषशब्देनैव मातृशब्दार्थः। स्त्रीपुंसयोरित्यौचित्याद्वागर्थाविवेति। किमर्थन्नमस्कुरुत इत्यत्र वागर्थप्रतिपत्तयइति। तदेवं यादृशोयावांश्च विशेषणविशेष्यप्रकारोभिमतः स सर्वएव वागित्याद्युपात्तशब्दसमुदायमात्रेण निष्प्रत्यूहमवगम्यत इत्यर्थव्यक्तिशब्दार्थव्याख्यानेन स्फुटयति । अत्रेति । अर्थसमर्पकत्वमित्यनेन शब्दगुणताव्यक्तीकृता॥६॥ यदुज्ज्वलत्वमिति। किम्पुनरिदमुज्ज्वलत्वन्नाम। केचिदाहुरनुप्रासबहुत्वमिति । तदसत् । तस्याः सुस्राव नेत्राभ्यां वारि प्रणयकोपजम् ॥ कुशेशयपलाशाभ्यामवश्यायजलं यथेत्यादावनुप्रासबहुलता सम्भवति एवं विधं हि पुराणच्छायमामनन्ति । कान्तिविपर्ययः पुराणीछाया। यथा । व्रजति गगनम्भल्लातक्या दलेन सहोपमामिति । अतएवाह । पुराणचित्रस्थानीयन्तेन वन्ध्यङ्कवेर्वच इति । तस्मादप्रहतपदैरारम्भः सन्दर्भस्यैव कान्तिः । तद्यथा। कुसुमस्य धनुरिति प्रहतम्। कौसुममित्यप्रहतम्। जलनिधाविति प्रहतम्। अधिजलधीत्यप्रहतम्। गुरुत्वमितिप्रहतम्। गौरवमित्यप्रहतमित्यादि। अतएव प्रहतशङ्का। चमत्कारित्वन्तु सहृदा ह्लादकत्वमस्ति हि तुल्येपि वाचकत्वे पदानाङ्कश्चिदवान्तरोविशेषोयमधिकृत्यकिञ्चिदेव प्रयुञ्जते महाकवयो नतु सर्वं यथापल्लवइतिवक्तव्ये किसलयमिति । स्त्रीतिवक्तव्ये कान्तेति कमलमिति वक्तव्ये राजीवमित्यादि । एतदेव महाकविभिरुपेयते । कत्तेमणामइच्चं सच्चङ्कविए समं समग्गेसु । सीमठेउण मुस्मितम्मिसच्चणवञ्चेअ। का

धुपानम्मधुकराः। अत्रबन्धस्यच्छायावत्वेनौजूज्वल्य न्तदेवकान्तिरुच्यते ॥७॥ विकटाक्षरबन्धत्वमार्यैरौ दार्यमुच्यते॥ यथा ॥ आरोहत्यवनीरुहम्प्रविशति श्वभ्रन्नगैःस्पर्धते खं व्यालेढि विचेष्टतेक्षितितले कु

न्तवर्णानुप्रासोपि कान्त एव भवतीतिमत्वा ऽनुप्रासोत्कटमुदाहर ति। निरानन्दइति। अस्ति कुन्दे मधुपरन्न कमलसजातीयमित्या सक्तोनानन्दमलभत। कुन्दस्येति प्रहतङ्कौन्दमित्यप्रहतम्। वाल त्वे बकुलकुसुमानान्न मधुप्रादुर्भाव इति एतत्काले रतिन्नप्राप्तवा निति विधुर इत्यनेन व्यज्यते। कालान्तरेपि शाले मधुनोऽसम्भवा दालम्बः प्रत्याशामात्रबन्धोपि न तस्यासीत्। आमोदप्रकर्षाद न्तः क्षणन्निपत्य रसमनासादयल्ँ लवङ्गमनुसरतीति लवमित्यनेन ध्वन्यते। एवमुत्तरार्द्धेपि पदस्वरसोगवेषणीयः। उक्तमेव विशेषम भिसन्धायव्याचष्टे। अत्रेति। छायौज्ज्वल्यङ्कान्तिरित्येकार्थतया लो के प्रसिद्धन्तदिह यथा शब्देषु सङ्गच्छते तथा पूर्वाचार्यप्रसिद्ध्याविवे चनीयमित्यभिप्रायः ॥७॥ विकटेति। विकटैरक्षरैर्बन्धो यस्य तस्यभाव स्तत्त्वम्। अस्ति तावन्नृत्यन्तीवपदानीति सहृदयानाङ्क्वचिदर्थे व्यवहा रः। सच न निर्विषयोनाप्यस्य विशेषइति तत्प्रमाणकमेव गुणान्तर मवस्थितमिति कश्चिद्व्याचष्टे। तथातु न कथञ्चित्स्वरूपमुद्भिद्यदर्शित म्भवति। अन्येतु विसर्गानुप्रासादिग्रन्थिलत्वमनेनाभिमतमित्याहुः॥ तदपिन। और्जित्याऽबहिर्भावप्रसङ्गात्। तस्मादिदमत्र वाच्यम् विकटानिविशालानि प्रभूतानीतियावत्। तथाभूतान्यक्षराणि दीर्घा नुस्वारादिरूपाणि सहृदयसंवेदनीयानि। अतएव नृत्यतुल्यता। य थाहि नृत्येङ्गानामङ्गुल्यादीनामाकुञ्चनप्रसारणक्रमेण रञ्जकत्वन्तथा त्रापि। तथाहि आरोहतीत्यादौ प्रथमपादे आकारोकाराभ्याम्प्रसारः। हत्येवेति सङ्कोचः। नीरुहइतीकारविसर्गाभ्याम्प्रसारणम्। नगैः स्पर्द्ध त इति विसर्गसन्ध्यक्षरैर्विकाशः। द्वितीयपादेपि प्रसारणेनोपक्रम्य तइति नैवनिर्वहणमन्तरान्तरवरोहक्रमोभवति। नचात्र यतीनां

ज्जोदरे लीयते। अन्तर्भ्राम्यतिकोटरस्यविलसत्याल म्बतेवीरुधःकिन्तद्यन्न करोतिमारुतवशंयातःकृशा नुर्वने।अत्र विकटाक्षरबन्धत्वेनृत्यद्भिरिवपदैर्यद्वाक्य रचना साउदारता॥८॥श्लाघ्यैर्विशेषणैर्योगोयस्तुसा स्याद्गुदात्तता।यथा। श्रुत्वायंसहसागतन्निजपुरात् त्रासेन निर्गच्छतांशत्रूणामवरोधनैर्जललवप्रस्यन्द तिम्यत्पुटाः। शुभ्रेसद्मनिपल्वलिन्युपवनेवाप्यान्तवा म्भोरुहिक्रीडाद्यौच सशाद्वलेविवलितग्रीवैर्विमुक्ताद्ध

सन्निवेशोभिमतः। मारुतवशं यात इत्यनेनोन्मादरोगगृहीत इति शब्दमूलानुस्वानबलेनावगम्यते। उन्मादगृहीतोपि वृक्षारोहणादिक मसमञ्जसमव्यवस्थितञ्च करोति। नवइत्यनेन यत्र सर्वथैव प्रतीका रासम्भवइति निरङ्कुशोन्मादचेष्टितमेवोपबृंहयति। नगैः स्पर्द्धते पर्व तोच्छ्रायमनुकरोतीतिदूरंप्रसृतउन्मादः। खंव्यालेढीत्यत्रापि तथैवाभि प्रायः। किन्तद्यद्दिति न शक्यते गणयितुमुन्मादचेष्टितानीति प्रकाश न्ते त्येतिग्रन्थिलाविच्छेदात्। प्रसारणस्य पर्यवसानं श्वेत्यनेन प्रविश तीति सङ्कोचः। अतएव परस्मैपदयोर्निरन्तरमावापः कान्तिविशेष करत्वादुपादेयएव भवतीति॥८॥ श्लाघ्यैरिति। उत्कर्षवानुदात्तौ लोके प्रसिद्धोबहुनात्मध्ये यः श्लाघते स उत्कर्षवांस्तेन श्लाघ्यत्वमुदात्तल क्षणन्तदिह काव्ये वाक्यार्थपोषायकतया सहृदयहृदयावर्जनक्षम त्वेन श्लाघाविषयत्वे विशेष्यत्वञ्च वाक्यार्थोऽतस्तद्विशेषणपदेषु य थोक्तरूपउत्कर्षोभिमतो ऽनुदारश्चायङ्गुणइति स्वरूपविशेषकृतात्का न्तिशरीरान्तर्गतात्मत्कारित्वाद्विद्यते मचात्र मुहृतिरभिमतेति नैक मपि कान्तिरूपमस्ति। अतएव पुराणाच्छायमुदाहरति। श्रुत्वेति। श्रुतिमात्रेणैवेयन्दशा दर्शनेतु न ज्ञायते कथम्भविष्यतीति। यमिति। नच्चन्यस्य श्रुतमात्रस्य तादृशप्रभावसम्भावना। सहसेति। यावत्की डासहचराणान्यबलगृहादीनामपिच प्रेमानुरूपमापद्यते तावानपि समयोनलक्ष्यइति ध्वन्यते। आगतमिति। निष्ठाप्रत्ययेन चेद्दिष्ठतिसि

शः। अत्र शुभ्रेपल्लविनि नवाम्भोरुहि इत्यादिश्लाघ्य विशेषणोपादानादुदात्तता ॥ ९ ॥ ओजःसमास भूयस्त्वम्। यथा।जयतिभुजगरज्जुग्रन्थिनिष्पीडिते न्दुस्रवदमृतनिवृत्तप्रेतभावैः कपोलैः। विरचितनुतिबन्धोमूर्ध्निसद्यः पुरारेः परिणतबहुकल्पब्रह्मणां

द्वमेवागमनमिति द्योतयति। निजेति। यस्यान्येनधर्षणं स्वप्नेपि न बुद्धिविषय आसीत्। सोपद्रवस्यापि यस्य न त्यागः कदापि कथञ्चिदभूदिति व्यज्यते। निर्गच्छतामिति। हृदयवैमुख्येन पुनः पुनरवतिष्ठमानानामसंभवद्रूपं निर्गमनमिति द्योत्यते शत्रूणामिति बहुवचनेन यदैकावस्कन्दमुद्दिश्यायम्प्रचलति तदा सर्वेषामियन्दशा भवतीति प्रत्याय्यते। अतएवासमासः सजीवः। वियोगखेदनादूलमानसामासुद्गतोपि वाप्यस्त्रावादन्तरैव विच्छिद्यतइति लघपदेनध्वन्यते। पुनः समागमाशंसनशीलानाममङ्गलभिया पाप्यस्तम्भोलवपदरहस्यमित्येके मन्यन्ते। अन्यस्य वाप्यस्य निर्गमनानुपपत्तौ पुटयोरार्द्रभावमात्रम्। शुभ्रइति। यत्र चन्द्रातपेनपल्लविताः कान्तयः क्षणादाविलासविहारेषु कामपि रसमात्रामुत्कर्षयन्तीति व्यनक्ति। तदनन्तरमेव वाप्यामित्याह। नवाम्भोरुहीति। पूर्ववत्सम्भोगोद्गारः सशाङ्कलइत्यनेन रतिकुतूहलोत्कण्ठितानामद्रिशृङ्गारोहणश्रान्तानान्तदेवास्तरणमिति प्रकटीक्रियते। विवलितग्रीवतयाच पद्मन्याम्यलायनमेव नतु शरीरवलनमपीति। शृङ्गाराङ्गयालकएव रसःस्थायीतिध्वनितम्। तदेतत्सर्वमभिप्रेत्याह। अत्रेति ॥ ८ ॥ अरीतिसत्करणोक्तमभिप्रेत्यौजोलक्षणमाह। ओजइति। वैपुल्यवृत्तेर्बहुशब्दस्येयसुनि भूयइतिरूपम्। तथाच समासस्य भूयस्त्वं वैपुल्यविकटत्वमितियावत्। नचैवं गौडीयारीतिरेवेयमिति वाच्यम्। क्वचित्समासभूयस्तामात्रस्यैवौचितीवशेन विशेषशोभावहत्वात्।यथा। वाद्यन्तिदिग्गजगण्डुकषणैर्भग्नस्रस्ताइति। नच समासाभावोनोचितः। नत्वेक एव समासोरूपभेदमादाय गुणत्वमनलङ्कारत्वञ्च प्रयोजयतीति किमनुपपन्नम्। एवम्प्रकृतोदाहरणेपि। त

ब्रह्मघोषः । अत्र भुजगरज्जुग्रन्थीत्यादिना समासभूयस्त्वादोजः ॥ १० ॥ और्जित्यङ्गाढबन्धता । यथा । अस्मिन्नीषद्वलितविततस्तोकविच्छिन्नभुग्नः किंचिल्लीलोपचितविततःपुञ्जितश्चोच्छ्रितश्च धूमोत्पीडस्तरुणमहिषस्कन्धनीलोदवाग्नेः स्वैरंसर्पन्सृजतिगगने गत्वरानभ्रभङ्गान्। अत्रगाढबन्धस्य स्पष्टमेव प्रतिभा

थाहि । परिणताः परिणामङ्गताः । बहूनाङ्कल्पानाम्ब्रह्माण इति चतुर्णाम्पदार्थानाम्मिश्रत्वे चत्वारि पदानि समवहुव्रीहिरूढिभिर्भुजगरज्जुभिरिति ग्रन्थिदृढताबोधनाय रूपकसतएव निवीत्युपसर्गस्तात्पर्यवान् । सद्योविरचितस्तुतीत्यनेन कपालानामसाधारणोव्यापारोबन्धो हि बाह्यरूपस्तासवादिकसन्तरेण न निष्पद्यते जीवनाभन्तरमेव त्रासायेशात्स्तुतिरूपएव ब्रह्मघोष उदचरदिति भगवतस्त्रैलोक्यग्रहे निरङ्कुशप्रभावः सद्यः पदेन सूच्यते । अथवा. चेद्रागमालामात्मलाभानन्तरमेव परमेश्वरस्तुतिरूपतात्पर्यबोधनमिति सर्वस्या अपिश्रुतेः परमेश्वरप्रवणत्वमनन्यसाधारणभक्तिप्रहृताच्च कविरभिप्रेति । पुरारेरित्यनेन संहारिरूपता भगवतः प्रकृतपोषानुगुणाप्रकाशिता ॥१०॥ और्जित्यमिति । ऊर्जितोमहाप्राणस्तस्य भावऔर्जित्यन्तत्र सन्दर्भस्य महाप्राणतागाढत्वसन्तरान्तराविलम्बितनयद्विः प्रयोगैः कुण्ठितत्वम्। गुणसामान्यलक्षणादतिप्रसङ्गोनास्ति । तथाहि । प्रकृतोदाहरणे प्रथमपादे विच्छिन्नभुग्नइत्यत्र तालव्यद्वयस्यकरणव्यदन्त्यसंयोगौ प्रस्फुटौ न्मिश्रौ । अन्ये मृदवः । द्वितीयपादे औष्ठ्ययोपध्मानीयतालव्यचतुष्कसंयोगाः प्रस्फुटाः स्वरव्यञ्जनमध्येविसर्गपाठ उभयसंज्ञाभिप्रायेणेति दुर्गसिंहः । तेन तदादेशस्यापि व्यञ्जनत्वमन्ये मृदवः । तृतीयपादे दन्त्योष्ठ्यदन्त्यकण्ठ्यसंयोगाउन्मिश्रा अन्ये मृदवः । चतुर्थपादे रेफान्तसंयोगामृदवोयइति न क्वापि कठोरता प्रतिभासते । तथाच प्रथमतृतीयाद्यामत्र द्वितीयचतुर्थयोर्गाढत्वम् । तथा । हस्ते लीलाकमलमलकम्बालकुन्दानुविद्धमित्यादेरगाढप्रथमतृतीययोरप्यस्ति धार

नादौर्जित्यम् ॥ ११ ॥ प्रेयः प्रियतराख्यानंचाटूक्तौ यद्विधीयते । यथा । सौजन्याम्बुनिधे बुधप्रिय गुण प्राकारधर्मद्रुमप्रारोहप्रतिपन्नवत्सल महात्यागि न्विवेकाश्रय।लक्ष्म्यावासमनस्विनीमनसिजव्यापा रदीक्षागुरो श्रीमन्मुञ्ज किमित्यमुञ्जनमुपस्प्रष्टुं दृशा

णीमहाप्राणताव्यक्तेत्याह। अत्रेति ॥११॥प्रेयइति। परप्रियाख्यानञ्चा टूक्तिस्तत्र यद्विधीयते स प्रेयोनामगुणः किन्तु क्रियत इत्याह। प्रि यतराख्यानमिति । प्रत्ययांशेतात्पर्यंलोकेसाधारणएवप्रियइत्युच्यमा नेयस्तत्रासाधारणः प्रकर्षोवसीयतेसइत्यर्थोभवति। एतेन लक्षणपदेइ यसुन्व्याख्यातः। उक्तिखण्डैरुपचितोर्थःसन्नसन्वाभवतुकविप्रतिकृष्टा सूक्तिरेकएवत्रिभुवनेभूयसीनामपामधिष्ठानमेवं भवानपि तत्स्थानीय स्यसौजन्यस्येति प्रतीयते। बुधप्रियेतिबहुव्रीहितत्पुरुषाभ्यामर्थद्वय मु पात्तम्।सूक्ष्मगुणप्रतिबिम्बभासितयायावदभिमतदायितयाचप्रीतिध्व नितयाचप्रकर्षमर्पयति। गुणप्राकारेति। यथाप्राकारेउपर्युपरिशिलादी नामवस्थितिरेवमहमहमिकयात्वयि गुणानामथवायथाप्राकारः कल त्रावेक्षणस्थानमेवंभवानपिगुणानामेवप्रोच्यते। धर्मद्रुमप्रारोहेति।प्रारो हः प्ररोहोङ्कुरः। तेनातिजरतोभग्नानेकविक्रमादित्यादिशाखस्यधर्म तरोस्त्वमग्रिमःसंतानोवलम्बः।यदिवाधोमुखीलम्बमानलताप्ररोहः। तथाच धर्मतरोरुपरिब्रह्मलोकादिवद्धविस्तारस्यभगवद्रूपःप्रारोहोभूप ष्ठमधिति ष्ठतीतिकोपिप्रीतौप्रकर्षः।प्रतिपन्नवत्सलेत्युपकर्त्तव्यतयाप्र तिपन्नः स्वीकृतस्तत्रवत्सलोझटितिस्नेहार्द्रन्तः करणस्तेनाङ्गीकृतभङ्ग भीरूतामात्रेण पुरुहूतादिवन्नापिश्लेषाविश्लेषान्विततयाबलिकर्णादिव त्किंतुभवान् सिन्धुरिववाञ्छितादिकमुपकारंकरोतीतिसमानंपूर्वेण। म हात्यागिन्निति।त्यागिनामपियःपूज्यः समहात्यागीतेननूनंदधीचिप्रभृ तयोविश्राणितार्थाअपि नतवतुल्यतामारोढुमीशतेइतिपूर्ववत्। विवे काश्रयइति। यथाकर्त्तव्य ताज्ञानंविवेकः।तस्याश्रयोविश्रान्तिस्थानंयदि त्वंमूलस्तम्भोनाभूस्तदा कमाश्रित्यविवेकप्रासादः पदमारोपयेदित्या

नार्हसि । अत्रसौजन्याम्बुनिधेइत्यादीनांप्रियार्था
नांपदानामुपादानंप्रेयः॥ १२॥ व्युत्पत्तिः सुप्तिङां
या तु सोच्यते सा सुशब्दता । यथा। तस्याजीवनि
रस्तुमातरवमाजीवस्य माजीवतोभूयाद्वाजननेः कि
मम्ब जनिनाजन्तोर्वृथाजन्मनः। यस्त्वामेवनवन्द
ते न यजते नोपैति नालोकतेनोपस्तौतिनमन्यतेन
मनुते नाध्येतिनध्यायति। सत्राजीवनिरजननिरि

दिकंस्वयमूहनीयमिति तदेतत्सर्वंसूचयन्नाह । प्रियार्थानांपदानामि
ति। प्रियार्थानांप्रीतिप्रकर्षार्थानाम्॥१२॥व्युत्पत्तिरिति । विशिष्टाउत्प
त्तिर्व्युत्पत्तिःसुबन्तानांतिङन्तानांचबहूनामपिचकारादिमन्तरेणघट
नासौष्ठवार्पकतयाचमत्कार कारित्वमित्यर्थः। आक्रोशेनञ्यनिः। किम
र्थमिदमाशास्यतेइत्यतआह।जीवतोवमाननमिति । जीवतोवमाननंमाभू
न्मरणमपितदपेक्षयावरमित्यर्थः। आयुः कर्मवशात्तथाभूतोपिजीविष्य
तीतियदितदाऽजननिरनुत्पत्तिरेव भूयात्कुतइत्यतआह । किमिति।
जनिनेतिपुल्लिङ्गनिर्देशश्चिन्त्यइकः स्त्रीप्रकरणेविधानात् । जनिरुत्प
त्तिररितिसाहचर्याच्च । कस्येदंसर्वमाशास्यतइत्यतआह।यस्त्वामेवेति।
त्वदन्यदेवताप्रणम्यजन्मादिकं विफलमितिवदतः कोपिभगवतीवि
षयेभक्तिप्रकर्षोवसीयते । अन्येतुव्याचक्षते कवेः पदपरिचयान्तरीव्यु
त्पत्तिः । पदंचसुप्तिङन्ततयाद्विविधं तयोरेकमुभयंवायत्रनिवेश्यमानं
व्युत्पत्तिमभिव्यनक्तितत्रसौशब्द्यमिति लक्षणार्थः । तथाहिअजीवनि
रितिसोपाधिसिद्धकृदन्तंजीवितसुपन्यस्यतदेवजीवस्यजीवतइति नि
रुपाधिसिद्धसाध्यार्थाऽभिधायिकृदन्तमुपन्यस्तवान् । मातरवमेति।
मातृत्वमुभयथोत् प्रेक्षितवान्।द्वितीयपादे जनिजीवमिशेषप्रिष्यजनि
नाजन्मेतितमेवप्रकारद्वयेनोपात्तवान्। एकैकधातुप्रपञ्चानांसुबन्तानां
दुर्घटमेकसन्दर्भप्रवेशंतत्तदुचितक्रियासंगमनेन विहितवानितिसुबन्त
व्युत्पत्तिरितिदिक्। अवमेतिअऽरित्वत्य नुषज्यते। वृथादिवापूर्वेणा
पिसंबध्यते । अथोत्तरार्द्धेतिङन्तव्युत्पत्तिः । तत्रपूर्वप्रकारभेदोनघटते

त्यादीनां सुबन्तानांवन्दतेयजत इत्यादीनान्तिङन्तानां च व्युत्पत्तिःसुशब्दता ॥ १३ ॥ समाधिःसोन्यधर्माणांयद न्यत्राधिरोपणम् । यथा । प्रतीच्छत्याशोकीं किसलयपरावृत्तिमधरः कपोलःपाण्डुत्वादवतरतितालीपरिणतिम् । परिम्लानप्रायामनुवदति दृष्टिः कमलिनीमितीयं माधुर्यं स्पृशति चतनुत्वं चभजते । अत्रप्रतीच्छत्यवतरति अनुवदति इत्यादिचेतनक्रियाधर्माणाम चेतनेष्वधरादिषूपचारेणा ऽध्या

अतः साभिप्रायाणामेवोत्प्रेक्षणंसावाच्या । तथाहि वन्दतइतिजायमानमात्राऽभिवाद्यतयात्रिभुवनमातृता । यजतइतिसस्तदेवतारूपत्वम् । उपैतीति । सर्वोपगम्यतयाजगच्छरण्यत्वम् । आलोकतइति । विश्ववर्त्तियावन्मनोहरत्वम् । स्तौतीति । समस्ताभिस्तदायिता । मन्यतइति । निखिलज्ञेयस्वरूपता । मनुतइत्यवधारणीयतयातत्त्वात्मकता । अध्येतीति । कान्तारादिस्मर्त्तव्यतयादुर्गादिभेदेन प्रपञ्च्यमानत्वम् । ध्यायतीति । निश्चासनविषयतया प्रत्यग्ज्योतीरूपतेतिपरापरभेदभिन्नाभगवत्सीस्तुताभवति । मन्यतेमनुतेइतियथासामान्यविशेषाभिधायिनौतथाऽध्येतिध्यायतीत्रापि । तिङन्तानांचदुर्घटोपिपरस्परमन्वयःकेनापिप्रकारेणघटितइतिपूर्ववद्वोद्धव्यः । तदेतदाह । अत्रेत्याऽऽदिपदसुभाभ्यां संबध्यते तेन जीवितवर्गोजनिवर्गश्चाभिमतः । मतिः सकृदेवावृत्तइतिनोक्तः भूयसाहिलोकेव्यपदेशोदृश्यतइति ॥ १३ ॥ समाधिरिति । सम्यगाधानमारोपणंसमाधिः । सम्यक्त्वंचवक्रतालोकातिगत्वंनतदधिकभावः । तदेदंलक्षणेस्फुटम् । कमलानिनिमीलन्तिकुमुदान्युन्मिषन्तिचेत्यादौव्यभिचाराच्च । तेनसंबन्धितानधर्मविशेषणमत्राभिमता । अलंकाराद्वेदश्चतुर्धेवक्ष्यते । प्रतीच्छतीति । प्रत्येषणंदीयमानस्यग्रहणंचेतनधर्मःसविरहवत्याश्चेतनेऽधरेसमारोपितः । किसलयकान्तिमितोमन्दीभूतामवगमयति । देयस्यदातुरपसरणेऽन्यत्रसंक्रान्तौचप्रत्येषणनिर्वाहाच्च । तथाचाऽशोककिसलयेन्योपिकोमलपाटलत्वमधरस्येतिमाधुर्यपोषः । तदभिमुखत्व

रोपणंसमाधिः ॥१४॥ अन्तः संजल्परूपत्वंशब्दानां सौक्ष्म्यमुच्यते। यथा। केवलं दधतिकर्तृवाचिनः प्रत्ययानिहनजातुकर्मणि। धातवःसृजतिसंहृशास्तयः स्तौतिरत्रविपरीतकारकः। अत्र श्रुतावगतवाक्यार्थस्यसृजतिसंहरतिशास्तिस्तूयतइतिशब्दानामन्तः संजल्परूपेणसूक्ष्मतयासूक्ष्मत्वम् ॥१५॥ ध्वनिमत्ता तु गाम्भीर्यम्। यथा। मौलौ धारय पुण्डरीकममि

र्त्तनमवतरणमपिचेतनधर्मः सोऽचेतनेकपोलेसमारोपितः किंचित्पाण्डुतामवद्योतयति। नचप्रत्येषणवत्सामस्त्येनग्रहणमपितुसंमुखीभावमात्रमित्याशयात्। तथाचपूर्ववन्माधुर्यंपुष्णाति अनुवादोपिचेतनधर्मएवसोऽचेतनायांदृष्टावारोपितः पर्युषितकमलच्छायामखण्डामेवात्रबोधयति। परप्रकर्षाभिमुखेपिविप्रलम्भेकदाचित्संकल्पोपस्थितप्राणनाथायां दृष्टौकान्तीभवतीतिप्रायःपदेनसूचितम्। स्पर्शस्यमाधुर्यविषयेऽसंभवात्स्पृशतीत्यप्यारोपः। प्रथमविग्रहशोभाविर्भावमभिव्यनक्ति। चेतनक्रियेति। प्रकृतापेक्षयाक्रियाक्रियावतोःसादृश्याभावान्नेयंगौणीकिंतूपचरितैव शुद्धेत्याह। उपचारेणेति। एतेनरूपकादिभ्योभेदः समर्थितः ॥१४॥ अन्तरिति। यथाकरितुरगादिरूपकाणांपाषाणशिलादावभिव्यक्तमवस्थितौसूक्ष्मरूपता तथाशब्दानांश्रूयमाणानामपि कथमन्यथावाक्यार्थभावनदशायांशेषनियमेनोन्मेषः। केवलमित्यादौ सृजतिसंहरतिशास्तयोधातवः कर्तर्येवभगवद्विषयेप्रयुज्यमानाः प्रत्ययान्प्रयोजयन्तिनकर्मणीतिवाक्यार्थोयदाभाव्यतेतदैवायंसृजतिसंहरतिशास्तिनतु सृज्यतेसंह्रियतेशिष्यतइतिशब्दाः प्रकाशन्ते। एवंस्तौतिर्विपरीतकारकः। अत्रस्तौतिः कर्मण्येवप्रत्ययप्रयोजकोनकर्तरीतिवाक्यार्थभावनासमयएवनायंकिञ्चित्स्तौतिकिन्तुसर्वैः स्तूयतएवेतिशब्दाउन्मिषन्ति तदेतदाह। अत्रश्रुतावगतस्येति। यावदेववाक्यंश्रूयमाणमवगम्यतेतस्यैवभावनापल्लवः पश्चादवसीयतइतिवटबीजन्यायमुपोद्बलयति। सोयंसहृदयप्रतीतिसाक्षिकोऽर्थः ॥१५॥ ध्वनिमत्तेति। ध्वननन्यनिर्व्यञ्जना

तं तन्वात्मनोविक्रमं चक्राङ्कंवह पादयुग्ममवनिन्दो घ्नासमभ्युद्धर । लक्ष्मींभूनिकटेनिवेशय भवज्याया न्दिवोकरुपतेर्विश्वान्तःकरणैकचौर तदपिज्ञातोह रिःखल्वसि । अत्रनाभ्यांपुण्डरीकधारणपरिमितवि क्रमत्वं चक्राङ्कितकरत्वं दंष्ट्रयावसुधोद्धारणं वक्षस्थ

त्माख्यापारः। सद्विविधः।शब्दध्वनिरर्थध्वनिश्च। येनशब्दएवध्वन्यतेसश ब्दध्वनिरभिमतइतिकेचित्तत्र। शब्दस्यैवध्वन्यतानङ्गीकारात्। नान्या पुण्डरीकधारणमित्यादिव्याख्याग्रन्थभङ्गप्रसङ्गाच्च । तस्माच्छब्दाश्रित ध्वननंशब्दध्वनिरर्थाश्रितञ्चार्थध्वनिरितिवक्तव्यम्। प्रभूतध्वनिसम्ब द्धपदकदम्बकस्यगाम्भीर्यम् । अथयाध्वनयतीतिध्वनिःशब्दात्मकोय आत्तिपदसमुदायस्तद्गाम्भीर्यम् तथाहिपुण्डरीकपदप्रस्तावात्सितच्छ त्रेनियताभिधानशक्तिकंकांस्यतालानुस्वानस्थानीयांसिताम्भोजशक्ति मुपजनयन्नोपलभ्यते। अनेकार्थनियताभिधानशक्तिकत्वाच्चातदाह।अ नेकार्थस्यशब्दस्यवाचकत्वेनियन्त्रिते।संयोगाद्यैरवाच्यार्थधीकृद्व्यापृति रञ्जनमिति।एवंविक्रमादिषु।तथापिविक्रमःपौरुषंपरिशिष्टःपादविक्षेप श्चचक्रं चक्रवर्तिचिह्नंरेखासन्निवेशलक्षणमायुधविशेषश्च। अभ्युद्धरणंस म्यग्लाभपालनप्रापणमुत्थापनञ्च।लक्ष्मीःसंपद्देवताविशेषश्च।ज्यायान्प्र शस्यतरोवयोज्येष्ठश्च । इदमेवाभिसंधायदिवौकसपतेरित्यन्तंव्याचष्टे।अ त्रेति।तदपीत्यपिशब्देनविरोधद्योतिनाहरिभावमाचरन्निति प्रतीयतेपु ण्डरीकधारणादेरुभयतुल्यत्वान्मौलावित्यादिविरुद्धमतस्तद्विपरीतस्था नीयं विष्णौध्वनयत्प्रसिद्धिबलान्नान्यादिकमेवध्वनयति । प्रसिद्धिरपि हि विशिष्टार्थप्रतिपत्तौकारणमेवेत्यभिप्रेत्यशब्दध्वनिप्रस्तावेप्यन्यद्वा ख्यातवान्। अन्यथातुप्रकृतासंगतिशङ्कयानवाच्यार्थपुष्टिः स्यात्। सोयं विरोधरूपमूलः प्रतीयमानव्यतिरेकोवाक्यार्थः शब्दध्वनिश्चात्रजीवभू तः।विश्रान्तःकरणैकचोरइत्यनेन त्रिभुवनमनोहरतादिवानिशमन्तःक रणानिचोरयन्नज्यासकौशलादिवाऽत्यन्तप्रसिद्धानिनारायणशब्दाभिगो पायसीतिप्रतीयमानोत्प्रेक्षा । ननुवस्तुध्वनिंशब्दशक्तिमूलमेके न मन्य

लनिवेशितलक्ष्मीकत्वमिन्द्रावरजत्वंच ध्वनतीति गाम्भीर्यम् ॥ १६ ॥ व्यासेनोक्तिस्तुविस्तरः । यथा। जनःपुण्यैर्यायाज्जलधिजलभावं जलमुचस्तथावस्थं चैनंनिदधतुशुभैःशुक्तिवदनैः । ततस्तां श्रेयोभिः परिणतिमसौ विन्दतु यथारुचिं तन्वन्पीनस्तनि हृदि

न्तेकथंतर्हि "पन्थिअ न एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे। उन्नअपओहरं पेक्खिअ उण जइ वससि ता वससु,, इत्यादौ वस्तुवर्णनं नत्द्यत्रश्लेषन्यायोनवासमासोक्तिन्यायः सम्भवति। किंचालंकारध्वनावपिशब्दशक्तिरेवोपयुक्तेत्यक्षणः शब्दध्वनिः । येतुवदन्ति शब्दस्याभिधाव्यतिरिक्तावृत्तिरेवनास्तीति, लक्षणापितैरनङ्गीकरणीयास्यात्। नचानङ्गीकर्त्तव्येति वाच्यम्। गङ्गायांघोषइत्यत्रसप्तम्यनन्वयापत्तेः। प्रकृत्यनुगतस्वार्थाऽभिधानंहिविभक्तीनां व्युत्पन्नमितिघोषप्रतियोगिकाधिकरणभावयोग्यः कश्चिदर्थोगङ्गापदस्यवक्तव्यः । तथाचकान्यानामलक्षणा। एवंपुण्यत्वादिप्रतीतिस्ततएवभवन्तीध्वननमुपस्थापयतीत्यादिकमस्माभिःकाव्यप्रकाशविवरणेविपञ्चितमिहतु ग्रन्थगौरवभियाविरम्यते॥१६॥ व्यासेनेति यत्रस्तोकेपिवाच्ये वचनपल्लवश्चमत्कारकारीतत्रसएवगुणकक्षाधिरोहक्षणमइति शब्दगुणेषुयुक्तोविवेक्तुमतएवोक्तिंविशेष्यतयानिर्द्दिशति। जनःपुण्यैरित्यादौकथमहमित्यादौ निर्द्दिष्टोपिवक्त्राभिप्रायरूपोर्थउक्तिपल्लवेनप्रकर्षमानीयते । तथाहिजनइतितटस्थोक्त्यानममेदृशानिभागधेयानियेनाहत्यमनोनिर्वहति। पुण्यैरिति। बहुवचनेनानेकजन्मोपात्तानामेवेदंफलम् । यायादितिसम्भावनाऽभिप्रायेणलिङामुक्ताफलपरिणतियोग्य जलधिजलप्राप्तिसम्भावनापिकस्यचिदेवधन्यजन्मन इतिप्रकाशितेकोपिकारणप्रकर्षः। जलमुचइत्यनेनयेषांनजलदानमेवव्यापारोऽपितुविश्वसंत। पच्छिदुराणामन्योपकारप्रवणतया शक्तिमुखपर्यन्तमपितुनयनमुपपद्यतइति। तथावस्थमित्यनेनयदैवस्मरावस्थातदैवजलधरैः पानमाशंसामात्रगोचरोनतुपूर्ववत्संभावनामात्रगोचरो तएव शुभैरिति। समयविलम्बनस्य प्राक्तनपुण्यमानहेतुकत्वादित्यादिस्वयमवसेयम्। एते

तवायंविलुठति॥अत्रकथमहंत्वत्कुचतटेविलुठामीत्य
भिप्रायस्य विस्तरेणप्रकाशितत्वादयंविस्तरः॥१७॥
समासेनाभिधानं यत्ससंक्षेपउदाहृतः। यथा। समा
रुतिसमानीतमहौषधिहृतव्यथः। लङ्कास्त्रीणांपुनश्च
क्रेविलापाचार्यकंशरैः। अत्रकथाविस्तरप्रतिपाद्य
स्यार्थस्य प्रकृतसंग्रामरसविच्छेदाशङ्कयाश्लोकार्द्धमा
त्रेणोक्तत्वात्संक्षेपः॥१८॥ यावदर्थपदत्वं चसम्मि
तत्वमुदाहृतम्। यथा। केचिद्वस्तुनिनोवाचिकेचि
द्वाचिनवस्तुनि। वाचिवस्तुनिचाप्यन्येनान्येवाचि
नवस्तुनि॥ अत्रार्थस्यपदानां चतुलाविधृतवत्तुल्य

नपदार्थेवाक्यरचनमिति यदन्यैर्गुणान्तरमभिहितन्तद्विस्तारमेकमेव। घ
टनासौष्ठवमात्रोपयुक्तस्तुपल्लवोविशेषगुणेष्वस्माभिरभिधास्यते। त्वकु
चतटेलुण्ठनमत्यल्पपुण्यस्यनसंपद्यतइत्येतावानेवार्थो विवक्षाविषय इ
तिकार्य्यविकाशस्यैवचमत्कारार्पणे प्रागल्भ्यमिति शब्दप्रधानकतया यु
क्तमत्रपरिसंख्यानमिति॥१७॥ संक्षेपेणेति। अस्तिकश्चिद्विशेषोयत्रवाक्य
संकोचः प्रकृतौचितीवशेनचमत्कारकारणं तथाहि समारुतीत्यादौ
मारुतिनायदोषधेरानयनंयच्चतया व्यथाहरणन्तदुभयमपीतिहासकथा
विस्तरेणप्रतिपादितमिहतुश्लोकार्द्धमात्रेणेतिशब्ददत्तभरएवायंगुणो य
द्यपिभवति तथापियावद्विवक्षितोपादानकाव्यरूपेणार्थसंकोचोवक्तव्यः
सचतथाविधवक्रोक्तिसंकोच एव भवतीत्युक्तावेवसंकोचउल्लिखति।
कथमयंसंकोचः प्राप्तोचितभाव इत्याह। प्रकृतेति। अतएवोपक्षिप्तमपी
तिहासार्थमपहायत्वराविष्टेनकविनाप्रकृतमुत्तरार्द्ध एवासंहितं पूर्वोत्त
रार्द्धसामञ्जस्यायसंक्षिप्यैवप्रकृतमप्युक्तम्॥१८॥ यावदिति। यावन्तिव
र्णानिविनाप्रकृतमनुसर्त्तुमेवनशक्यन्ते तावन्मात्रमयत्वंवाक्यस्यसंमित
त्वम्। अतःसंक्षेपाद्भेदः। कवेः शक्तिव्युत्पत्तिभ्यामसत्यपिपल्लवे कदाचि
द्घटनालावण्यमुन्मिषत्येव। यथापूर्वमुदाहृतम्। कात्वंशुभेकस्यपरिग्रहो
वेत्यादि। अर्थव्यक्तिसंकरशङ्काप्यतएवनिराकृता। अस्त्युत्तरस्यांदिशिदेव

त्वेनसम्मितत्वम् ॥ १९ ॥ भावतोवाक्यवृत्तिर्याभावि
कंतदुदाहृतम् । यथा । एह्योहिवत्सरघुनन्दनपूर्णच
न्द्रचुम्बामिमूर्द्धनिचिरंचपरिष्वजेत्वाम् । आरोप्यबाहु
दिदिवानिशमुद्वहामिवन्देथवाचरणपुष्करकद्वयंते ॥
अत्रप्रकर्षवशादनौचित्येनापिवन्देथवाचरणपुष्कर
कद्वयमित्यादीनामुक्तत्वाद्भाविकम् ॥ २० ॥ गतिर्ना

केचिदुदाहरन्तितदयुक्तम् । अनेननामपदयोः पल्लवरूपत्वात्संमितत्वा
भावेकथमाभासत्वं भवतीति विस्मृतव्यभिचारिगुणप्रकरणस्यभाषित
मुपेक्षणीयम् । केचिदितिसर्वनाम्नएवाभिमतकविविशेषेपर्यवसानं सा
मर्थ्येन सम्भवतीतिनाध्याहारशङ्का । शक्त इत्यादिक्रियापिसामर्थ्येना
वसीयते तदेतत्सर्वमभिप्रेत्याह । तुलाविधृतवदिति ॥ १८ ॥ भावत
इति । भावनादृशापन्ना चित्तवृत्तिर्भावः । भावनावासनाश्चाभिरित्य
नर्थान्तरम् । तथाह्युच्यते अनेनगन्धेनरसेनवासर्वभावितमितिहर्षादि
भावितचेतसोहिवीचिप्रायाउक्ति भेदाः प्रादुर्भवन्तियैरप्रत्यूहमेवभा
वोभिव्यज्यतेतदिदमुक्तंयाभावतो वाचः काव्यरूपायाः प्रवृत्तिर्निष्प
त्तिः सैवभाविकम् । भावप्रधानोनिर्देशः । तथाहिप्रकृतोदाहरणेए
हीत्येकेनैवयुष्मदर्थाविनाभाविनाऽभिमुखीकरणेवृत्तेद्वितीयस्ययदुप
दानम् । पूर्णचन्द्रेति यदग्रिमक्रियास्वनुपयुक्तस्यैवाभिधानम् । चुम्बा
मीतिकरिष्यमाणस्यापियोवर्त्तमानोपदेशश्चुम्बामीत्यत्रविशेषणमनु
पादायपरिष्वजेत्यत्रचिरमितियद्विशेषणोपादानं त्वमितियोग्यार्थ
स्यापिप्रयोगः पूर्वोपात्तवदुत्तरक्रियास्पर्द्धितया यदेकस्यै ववहनस्यभा
वणमेवसमस्तसमकक्षतयैवबहुनाभिधानम् । वत्सेत्यभिधाय चरणौव
न्देइतियाविरुद्धोक्तिर्यज्यते इत्यस्यावगतार्थस्यापि वचनंतत्सर्वमधर्म
सिद्धमेवेतिभावार्थस्यनिष्पादितयास्वादहेतुर्भवति । प्रवर्त्तन्ते हिलौ
किकानांस्नेहार्थानामुत्कलिकाप्रायावाचः स्वदन्तेच । यथा । इयं गेहे
लक्ष्मीरियममृतवर्त्तिर्नयनयोरसावस्याः स्पर्शोवपुषिबहुलश्चन्दनरस,,
इति । तदेतदभिप्रेत्यव्याचष्टे । अत्रेति । उद्भटत्वादत्तेनशेषाण्युपलक्ष

मक्रमोयः स्यादिहारोहावरोहयोः । यथा । वराहःक
ल्याणंवितरतुसवोयस्य शशभृत्कलाकोटीकान्तंक्रम
विदलदभ्युद्धृतिभिया । मिथःसंमूर्च्छद्भिश्चतुरुदधिक
ल्लोलपटलैरनामृष्टंदंष्ट्राशिखरमधिशेतेवसुमती॥अत्र
पूर्वार्द्धेस्वरस्यारोहादुत्तरार्द्धेचावरोद्गतिः॥ २१ ॥ उप
क्रमस्यनिर्वाहोरीतिरित्यभिधीयते।यथा। ग्राव्णा

यति । अनौचित्त्येनापिवन्दइति॥२०॥गतिरिति । केचिद्व्याचक्षते । यती
नामारोहावरोहौविवक्षितौ क्वचित्कविशक्तिवशाद्यद्यद्व्यारूढा अवरू
ढा इवप्रकाशन्ते । यथा । भुवोनीचैर्नीचैरवटपरिपाटीषुपततां स्फुरत्य
र्वागर्वागखिलभुवनेभोगितिलकः । क्रमादुच्चैरुच्चैर्गिरिशिखरभाजामपि
नृणामयंदूरेदूरेभवति भगवानम्बरमणिः । अत्रयतीनामारोहावरोहौ
तिलतन्दुलवत्प्रकाशते । इयंतुवृत्तौचितीवक्ष्यते । तथाचद्वितीयेसंगता
स्यात् । तस्मादयमर्थः । स्वराणामकारादीनामुपर्युपरितयाबोधः संनि
कृष्टानामिवप्रकाशनंगतिरिति । तथाचव्याख्यास्यति। स्वरस्येति । तथा
हिप्रकृतो दाहरणे वराहः कल्याणमित्यत्राकारद्वयंतुल्यजातीयं निर्द्दि
श्यसवो इत्यत्रोकारेणतुङ्गत्वमिवविधाय द्वितीयपादोपक्रमेकलाकोटी
कान्त मित्यत्राभिन्नजातीयारोहपरम्पराविहिता। उत्तरार्द्धेतु तथाना
स्ति। शेतेइत्यत्रापिनसोल्लेखआरोहःसोयमानुभविकोगुणः श्लोकार्द्धश्लो
कपा दश्लोकांशक्रमेण नरसिंहवद्भवति । अत्रोपलक्षणतया ऽऽद्यमुदाह
रति । अत्रपूर्वार्द्धमिति । क्रमैरितस्ततश्चरणविन्यासैर्विगलन्तीअसम्पद्य
मानायाऽभ्युद्धृतिरभ्युद्धरणन्तस्याया भीर्भयन्तयेतिकेचित् । अन्येतुवद
न्ति।क्रमेणविगलदभ्युद्धृतिभयमूर्द्धनयनेस्फुटनादिभयंयस्याःसाक्रमवि
गलदभ्युद्धृतिभियेति ॥२१॥ उपक्रमस्येति।यादृशीपदसन्निवेशस्वनोपक्र
म्यतेतादृश्यावृत्तनिर्वाहः क्वचिद्विशेषशोभावहोभवति।अवएवात्रनात्य
न्तनिर्वाहोभिमतः। एकदेशवृत्तेरप्यभिप्रायसमग्रकाव्यजीवभूतत्वादत
म्यएवनातिप्रसङ्गोपि तथाप्रकृतोदाहरणेप्रथमोत्थितायाअब्धिदुहितु
रव्याजसर्वाङ्गीणलावण्यमवलोकयिताकृष्णः स्वचक्षुषोःकृतार्थताङ्गमि

नासिगिरेः क्षतानपयसा नार्तासि नम्लायिता नश्वा
सैःफणिनोसि नत्वदनुगानायासिताकापि न। स्वंवे
श्मप्रतिगच्छतोरितिमुहुःश्रीशार्ङ्गिणोः सस्पृहंसाप्र
श्नोत्तरयुग्मपङ्क्तिरुभयोरत्यासृता पातु वः। अत्रप्र
त्येकप्रश्नपदानन्तरंनजोविनिवेशात्क्रमाभेदोरीतिः
॥२२॥विशिष्टाभणितिर्यास्यादुक्तिंतांकवयोविदुः।
यथा।कुशलंतस्याजीवतिकुशलंपृच्छामिजीवतीत्यु
क्तम्।पुनरपितदेवकथयसिमृतांनुकथयामियाश्वसि

तवान्। इदानीमधरोऽसुद्राभेदेनयदिवर्णमात्रामपिभारतीन्निश्चरन्ती
माकर्णयामि तदाश्रोत्रयोः सफलताभवेदितिमन्यते। नचेत्यमेवमु
ग्धाङ्गनानामालापः प्रवर्त्तते अपितुनायकसन्निधौभयादेवेतिप्रथम
म्पृच्छति। ग्राव्णानासिगिरेःक्षतेति। अनन्तरञ्चयदिनवह्यामि तदा
ग्राम्यामथवह्यामितदाधृष्टामाकलयिष्यतीतिजानत्या द्वयमुत्तरमौचि
त्यापन्नंस्यात्। शिरःकम्पएकाक्षरञ्च। तत्राद्यःकालिदासेनप्रयुक्तो
मूर्द्धकम्पभयमुत्तरन्ददाविति। द्वितीयङ्कविनायिनिवेशितन्नेति। एवंश्रु
जल्पितामृतस्तदनुबन्धेनकृतकृत्यमिवात्मानम्मन्यमानोधिकत्रासहेतुं
स्मारयन्पृच्छति। पयसेति।तदिदमुक्तमार्त्तेति।प्रकारान्तरेणोत्तरदाना
तसम्भवात्पुनरप्याह। नेति। तदनन्तरंव्याजसरसायाः कियदधिकव
चनश्रवणोत्कण्ठितः सर्वलोकप्रसिद्धयहेतुंस्मारयन्पृच्छति। म्लायितेति। अभिमतस्यानिष्टम्।स्वप्नेपिनसञ्ज्यतइतिदृष्टासीतिनोक्तम्। एव
मपिवचनपल्लवनेन समस्तमुग्धाङ्गनाप्रसिद्धेनवचनोन्मुद्रणप्रकारेणपृ
च्छति। त्वदनुगेति। सर्वाकारेणोत्तमतामभिज्ञायमानदृग्रः स्ववेश्म
प्रत्येवगतवान्नतुपृष्टवानिति। तदिदंसर्वमभिप्रेत्यव्याचष्टे।अत्रेति॥२१॥
विशिष्टेति। लोकोत्तराः सन्तिहिभणितिप्रकारा लोकप्रसिद्धाः। य
थासुप्तोसीतिप्रश्नेगृहेदेवकुलेवेत्यादि। एतत्प्रसिद्धिव्यतिक्रमेणतु
यात्काचित्कविप्रतिभयाभणितिराकृष्यते साभवतिलोकोत्तरा। तथाच
प्रतिभाकृष्टतयाचमत्कारित्वाद्गुणत्वम्। अतएवकवयइत्याह। कवि

ति । अत्रकुशलंतस्याइतिपृष्टेकुशलमकुशलंचेतिच
क्तव्येयेयंजीवत्यादियुक्तिभङ्ग्याजीवितमात्रशेषताप्रति
पादनप्रकारः सकाव्येशब्दगुणेषूक्तिसंज्ञांलभते॥२३॥
उक्तेः प्रौढः परीपाकः प्रोच्यतेप्रौढिसंज्ञया । यथा।अ
भ्युद्धृतावसुमतीदलितारिपूरःक्षिप्तक्रमकवलिताबलि
राज्यलक्ष्मीः।अत्रैकजन्मनिकृतंयदनेन यूनाजन्मत्र
येतदकरोत्पुरुषः पुराणः। अत्रप्रकृतिस्थकामलकठो
रेभ्योग्राम्योपनागरनागरेभ्योऽभ्युद्धृतादीनां प्रकृति

सहृदयानामेवतादृशोक्तिपरिचयसम्भवात् । तथाहि । प्रकृतोदाहर
णेकुशलप्रश्नेकुशलंवेति लोकप्रसिद्धमतस्तद्देववक्तुमर्हति । यत्तुतद
पह्नायजीवतीत्युपात्तमपरत्रापि श्रेतयैवोक्तेरतिभाकृष्टतयासाभि
प्रायमुन्नीयतइत्याह । अत्रकुशलमकुशलमित्यादि॥२३॥सम्प्रतिप्रकर्षका
ष्ठालक्षणंवाक्यस्यगुणंलक्षयति॥उक्तेरिति । उक्तिर्वाक्यन्तस्यायम्पाकः
साप्रौढिः । शब्दानाम्पर्यायपरिवृत्तौसहत्वम्पाकः । यदाह । यत्प्रदानि
त्यजन्त्येव परिवृत्तिसहिष्णुताम् । तंशब्दन्यायनिष्णाताः शब्दपाकम्प्र
चक्षतइति । प्रौढइति । उपक्रमसंहारयोर्निर्व्यूढः सचायन्नालिकेरस
दृकारमृद्वीकोपलक्षणैस्त्रिविधोगीयते । तद्यथा । नालिकेरफलम्पक्व
त्वचिकठिनंशिरास्वविवृतकोमलप्रायङ्कपालिकायाङ्कठिनतरन्तथाक
श्चित्सन्दर्भोमुखेकठिनस्तदनन्तरंमृदुप्रायस्ततःकठिनतरोनालिकेरपा
कइत्युच्यते । तथाहि । प्रकृतोदाहरणेप्रथमपादेऽभ्युद्धृतेतिवर्णच
तुष्टयमारम्भे कठिनं वसुमतीदलितेतिवर्णषट्कङ्कोमलन्तंरिम्पूरइत्य
नुस्वारेफदीर्घैरक्षरचतुष्टयङ्कठिनतरम् । अत्रापितमितिमृदुप्रायनिवे
शनेनकोमलकपालिकामुखभागसारूप्यन्द्रढयतीत्यस्मदाराध्याः । एव
न्द्वितीयादिपादत्रयेचतुरूषट्कचतुष्कैर्नालिकेरफलसाम्यमुन्नेयम् । क
थम्पुनरेवंविधः पाकःसम्भवतीत्यतआह । अत्रेति । अन्यासनिर्वृत्त
आन्यासिकः । का अङ्कर्तुंविचारयितुञ्चयेजानन्ति तदुपदेशेनकरणेयो
जनेच पौनःपुन्येनप्रवृत्तिरन्यासः । असावपिकथम्पाकविशेषोभव

स्यादीनां ग्राम्यादीनामुभयेषां वापदानामावापोद्वापाभ्यांसन्निवेशचारुत्वेनयोयमभ्यासिकोनालिकेरीपाकोमृद्वीकापाकइत्यादिवाक्यपरिपाकः साप्रौढिरित्युच्यते।तथाचैतद्वाक्यंनालिकेरीपाकइत्युच्यते । एवं सहकारपाकमृद्वीकापाकेअप्युदाहरणीयेइति ॥२४॥

तीत्यत आह । सन्निवेशचारुत्वेनेति । सन्निवेशोरचनातस्याश्चारुत्वन्तदपिकथमित्यत आह । आवापोद्वापाभ्यामिति । सन्दर्भमुप्रवेशनमावापस्ततः समुद्धरणमुद्वापः । केषामित्यतउक्तम् । पदानामिति । उद्धृतानामिति । बुद्ध्यापृथक्कृतानाम् । केऽन्यइत्यतउक्तम् । प्रकृतिस्यादीत्यादि । तेनायमर्थः । प्रकृतिस्यादिपदकोप्येतदेवोद्धर्त्तव्यंयद्घटनासौष्ठवेनपर्यायपरिवर्त्तनक्षमहते । भवतिहि सहृदयानामेवमन्यत्पदन्नास्तीतिव्यवहारः । सोयंरचनासिद्धिविशेषःकथमन्यथातज्ज्ञातीयमेवपदमन्यत्रसन्दर्भेनिवेशितन्नतथास्वदते । अतएवासौवाक्यगुणःकाठिन्यञ्चसंयोगैर्दीर्घैर्वास्वरैर्भवति । यथात्रैवोदाहरणेरिपूरहत्यादौ । सुप्तिङ्व्युत्पत्तिलक्षणास्तुवार्त्ताकपाकः कैश्चिदुक्तः सतुसुशब्दतालक्षणगुणएव । एवमिति । यथाद्राक्षाफलन्त्वचश्चारभ्यकोमलमन्तराद्विचतुरास्थिसम्पादित किञ्चित्काठिन्यमेवङ्कश्चित्सन्दर्भउपक्रमोपसंहारयोःकोमलएवमध्येकठिनएव । संयोगदीर्घस्वरमात्रकृतमनाक्कठोरभावोमृद्वीकापाकइत्युच्यते । यथा । अयि त्वदावर्जितवारिसम्भृतस्नवालमासामनुबन्धिवीरुधाम् । चिरोज्झितालक्तकपाटलेनते तुलांयदारोहतिदन्तवाससा । यथाच । अनवरतनयनजललवनिपतनपरिपीतहरिणमदतिलकम् । वदनमपयातमृगमदशशिकरणिंवहतिलोलदृशः । अतएव कविकल्पलताकारादिभिरुक्तोनीलकपित्थपाकश्चतुर्थोनास्ति । यद्वच्चपरिणतं सहकारफलमारम्भादेवकोमलमस्थनितुकठोरप्रायमेवमपरःसन्दर्भोमुखादारभ्यमृदुरन्तरेकठिनतरःसहकारपाकइत्युच्यते । यथा । कमलिनिकुशलन्ते, सुप्रभातंरथाङ्गाः, कुमुदिमिपुनरिन्दाबुद्गतेत्वंरमेथाः, । सखिरजनिगतासित्वन्तमोजीर्णमुच्चैरिति,

उक्ताः शब्दगुणावाक्येचतुर्विंशतिरित्यमी । अथैतानेववाक्यार्थगुणत्वेनप्रचक्ष्महे ॥ तेषांश्लेषइति प्रोक्तस्संविधानेसुसूत्रता ॥ यथा ॥ दृष्ट्वैकासनसंस्थितेप्रियतमेपश्चाद्उपेत्यादरादेकस्यानयनेनिमील्य विहितक्रीडानुबन्धच्छलः ॥ ईषद्वक्रितकन्धरःसपुलकप्रेमोल्लसन्मानसामन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति ॥ अत्रैकासनसंस्थितयोःप्रियतमयोर्विलासिना एकानयननिमीलनकेलिकर्म्मणा वञ्चितान्यातु वदनचुम्बनेन रञ्जितेतिसेयंविधानेसुसूत्रताश्लेषोनामवाक्यार्थगुणः ॥ १ ॥ यत्तुप्राकट्यमर्थस्यप्रसादःसोऽभिधीयते ॥ यथा । अयमुदयति

तरलितपक्षाः पक्षिणोऽवहरन्ति । अत्रैवोदाहरणेपिद्विधापिकठोरत्वमवसेयम् । तेमौत्रयएवशुद्धपाकाःव्यतिकरजन्मानस्तुभूयांसः । एत एवार्थपाकाः पञ्चमेप्रकारान्तरेणप्रतिपादयिष्यन्ते॥२४॥सूत्रकारएवार्थगुणप्रकरणेसङ्गतिङ्करोति । उक्ताइति । वृत्तकीर्त्तनंहेतुभावप्रदर्शनार्थम् । एतानेवश्लेषादिनामकानिति । एषामितिनिर्द्धारणेषष्ठी । वाक्यार्थशरीरभूतःश्लेषः प्रथमंलक्ष्यतइति । घटनाश्लेष,इतिसूत्रयित्वाऽसकौटिल्यानुल्वणत्वोपपत्तियोगोघटनेति,वामनेनव्याख्यातम् । अस्यार्थः । इदङ्कृत्वाइदङ्कर्त्तव्यमितिक्रमस्तत्रैवकौटिल्यंलोकातिगामिनीवकता । अवक्रयोःशब्दार्थयोः वचनमात्रत्वात् । अतिमात्रतयाप्रतिभासाभावोनुल्वणत्वंकथमेवमर्थःसङ्गच्छतइत्यनुपपत्तिसमाधानौपयिकविशेषनिवेशनमुपपत्तिस्तथाचक्रमेण कौटिल्येनानुल्वणतया उपपत्त्यायोजनमर्थस्यश्लेष,इतितत्रसंविधानक्रमानुल्वणत्वेनसूत्रशब्देनोपात्ते स्वपदेनकौटिल्यमुक्तमघटमानस्येववाक्यार्थस्यबुद्धिचातुर्येण घटनेतिवाक्यार्थः । दृष्ट्वेति । एकानायिका,अपरानायिकाच तत्सखीप्रच्छन्ननायकप्रेमपात्रन्तेनैकासनसङ्गतिः । प्रियतमेइतिदनुरञ्जनमेवजीवितसर्वस्वमितिमन्यमानस्ययुगपत्प्रवृत्तिः । आदरेणनिभृतपदन्यास

मुद्राभञ्जनःपद्मिनीनामुदयगिरिवनालीबालमन्दा
रपुष्पम् । विरहविधुरकोकद्वन्द्वबन्धुर्विभिदन्कुपि
तकपिकपोलक्रोडताम्रस्तमांसि ॥ अत्रपद्मिनीवि
काशकरणेउदयशैलावतरणेकोकशोकहरणेतमोवि
दारणेचानुक्तोपिसूर्यलक्षणोर्थःप्रकटमुपलक्ष्यते॥२॥
अवैषम्यंक्रमवतांसमत्वमितिकीर्तितम् ॥ यथा । अ
ग्रेस्त्रीनखपाटलङ्कुरबकंश्यामन्द्वयोर्भागयोर्बाला
शोकमुप्रोढरागसुभगम्भेदोन्मुखन्तिष्ठति । ईषद्ब
द्धुरजःकणाग्रकपिशाचूतेनवामञ्जरीमुग्धत्वस्यचयौ
वनस्यचसखेमध्येमधुश्रीःस्थिता । अत्रमधुश्रियो
मौग्ध्यंत्यागयौवनारम्भकृतानांविशेषणानामवैष

तातथाभूत्वायुगपत्करान्त्संनयनद्वयपिधानंलोकप्रसिद्धःकेलिः । ईष
दिति कस्यरागस्यथाचलतेनतुशरीरमपि । अन्यथाचलनङ्गानेना
यिकायाःकषायभावःस्यात् । निभृतरागोत्सुद्रणात् पुलकोद्गमः । अतए
वप्रेम्णास्वगोचरलोकोत्तरत्वाभिमानरूपेणतत्तदनेकभावोर्मिभिरान्दो
लनस्मनसउल्लासः साधुवल्वनकजानातीत्यभिप्रायिकसपत्नीगतधिक्का
रभावनयानिभृतहासोन्मेषः । वञ्चनाचातुर्यैणस्वमनीषितसंम्पाद
नन्धूर्त्तता । तदेतद्व्याचष्टे । अत्रैकासनेति ॥१॥ यत्तुप्राकृत्यमिति । स
मभिव्याहृतपदार्थसंसर्गात्मनिवाक्यार्थेदर्पणतलइवानुपात्तस्यापि वि
वक्षितस्यवस्तुतःप्रतिभासोर्थप्रसादः । नचैदमनुमानं समानसंवित्सं
वेद्यत्वात् । तदाह । अनुक्तोपिसूर्यलक्षणोर्थःप्रकटमुपलक्ष्यतइति
॥ २ ॥ अवैषम्यमिति । येनरूपेणालोकेर्थः प्रतीतस्तदनतिक्रमणन्त
स्योक्तिः सन्नता । वक्रताचात्रविशेषणमूहनीयमन्यथाभुक्काम्रजती
त्यतःकोविशेषःस्यात् । अग्रेमुग्धइति । कोषात्प्रथममुद्भिद्यमाना
कुरबककलिकाकान्तानखवत्पाटलाभवतीतिमधुश्रियोबाल्यम् । ततः
प्रौढिमापद्यमानासुकलिकासुश्यामोवृन्तभागःस्फुटितत्वाद्विधाऽवति
ष्ठतेइतियौवनम् । एवम्बालाशोकमित्यादौक्रमेणबाल्ययौवनचिह्नमोप

म्यात्समानता ॥ ३ ॥ माधुर्यमुक्तमाचार्यैःक्रोधादावप्यतीव्रता । यथा । भ्रूभेदेसहसोद्भूतेपि वदनन्नीतम्परान्नम्रतामीषन्माम्प्रतिभेदकारिहसितन्त्वोक्तं वचोनिष्ठुरम् । अन्तर्बाष्पजडीकृतम्प्रभुतयाचक्षुर्न विस्फारितङ्कोपश्चप्रकटीकृतोदयितयामुक्तश्चनोप्रश्रयः । अत्रत्रासवदत्तालक्षणस्यार्थस्यकोपेपि योयं विनयावलम्बेनकोपचिह्ननिह्नवस्तन्माधुर्यम् ॥ ४ ॥ अनिष्ठुरत्वंयत्प्राहुःसौकुमार्यन्तदुच्यते । यथा । सद्यःपुरीपरीसरेपिशिरीषमृद्वीसीताजवात्त्रिचतुराणिपदानिगत्वा । गन्तव्यमस्तिकियदित्यसकृद्ब्रुवाणारामाम्रुणःकृतवतीप्रथमावतारम् । अत्रसीतायाः

दर्शनमवसेयम् ॥ ३ ॥ माधुर्यम् । शृङ्गारकरुणौहिमधुरौततस्तद्व्यञ्जकोर्थोपिमधुरस्तस्यशर्करादिरससोदरम्माधुर्यम् । यथाहि । शर्करारसः सहृदयस्याऽसहृदयस्यवा, सुस्थस्याऽसुस्थस्यवा, झठितिरसनाग्रमपीतिचमत्कारमावहति । तथाचित्तद्रुतिसारचर्वणैकप्राणरसव्यञ्जकोर्थस्तेनतद्व्यञ्जनशक्तिसमुद्रेकनिर्वहणंवाक्यार्थस्य माधुर्यमितिपर्यवसितोर्थस्तद्वासनापरिपाकवशादुदयव्ययवतीषुदीप्तचित्तवृत्तिषुजागरूकास्वपिसमस्तन्यग्भावनयाविरोधःसम्पद्यतेइतिक्रोधादावप्यतीव तेत्युक्तम् । तथाहि भ्रूभेदइत्यादौगात्रस्खलितादिना कदाचिदपराद्धे नायकेप्रेमस्वभावादीर्ष्यारोषलक्षणव्यभिचारिप्रादुर्भावाद्हृदनुभावभ्रूभेदोद्गमोरतिप्रकर्षाद्भविष्णुनाऽवहित्थेनन्यग्भाव्यते । विरोधिविजयेहि भूयान्प्रकर्षःपरस्यभवति। अतएवपरामित्युक्तमेवमीषन्माम्प्रतिभेदकारिहसितमित्यादौमाधुर्यमुन्नेयम् । तदिदमाह । अत्रत्रासवदत्तालक्षस्येति ॥ ४ ॥ अनिष्ठुरत्वमिति । सामग्रीसम्भवेपिचित्तद्रुतिमनासादयन्नीरसःकठोरोभिधीयते । अतयाभूतस्तुझटितितन्मयीभवनयोग्यान्तःकरणःसुकुमारस्तदिदमुक्तमनिष्ठुरत्वमिति । प्राहुरित्यनेनप्रसिद्धिद्योतयति । सद्यइति ॥ सहगन्तुमुत्सुकाकथमेवंसुकुमारप्रकृतिः कान्तारेषुभ

पुरीपरिसरेपिकियदस्तिगन्तव्यमितिवचनमशृण्वतो रामस्यशिरीषमृदुतदङ्गावलोकनेनाऽश्रुणोऽवतारःसौकुमार्यमाह ॥ ५ ॥ अर्थव्यक्तिःस्वरूपस्यसाक्षात्कथनमुच्यते । यथा । पृष्ठेषुशङ्खशकलच्छविषुच्छदानारेखाभिरङ्कितमलक्तककलोहिताभिःगोरोचनाहरितबभ्रुबर्हिःपलाशमामोदतेकुमुदमम्भसिपल्वलस्य॥ अत्रकुमुदस्वरूपस्यसाक्षादिवप्रतीयमानत्वेनयत्स्पष्टरूपाभिधानमसावर्थव्यक्तिः ॥ ६ ॥ कान्तिर्दीप्तरसत्वंस्यात् । यथा । मागर्वमुद्वहकपोलतलेचकास्तिकान्तस्वहस्तलिखितामममञ्जरीति । शून्यापिकिन्नसखिभाजनमीदृशीनांवैरीनचेद्भवतिवेपथुरन्त

विष्यतीतिवार्यमाणापि हृदयवैमुख्येनपश्चात्तापमित्वरितङ्गमिष्यामीतिस्नेहमूढा त्रिचतुराणिपदानिजवाद्गतवती । अश्रुणः प्रथमावतारोभविष्यदश्रुपरम्पराप्रचारभूतः । सौकुमार्यमाहेति । अश्रुपातेनानुभावाश्रुनिमित्तभूताचित्तद्रुतिः करतलामलकवत्प्रकाश्यते ॥ ५ ॥ अर्थव्यक्तिरिति । स्वरूपंस्वमसाधारणङ्गविप्रतिभैकगोचरञ्चमत्कारिरूपंतस्यसाक्षात्कथनङ्गविशक्तिवशात्साक्षात्कारसोदरप्रतीतिजनकपदवत्त्वंसन्दर्भस्यार्थव्यक्तिनामागुणः । अर्थायथोक्तस्तस्यव्यक्तिः प्रत्यक्षायमाणताजातेर्भेदस्तृतीये वक्ष्यते । पृष्ठेपि । ईषद्विकस्वरस्य कुमुदस्यकिञ्चिद्विघटमानबर्हिःपलाशसम्बन्धिषु शीतातपासम्पर्कादत्यन्तविशदानान्दलानाम्पृष्ठानिपाकलोहितरेखाङ्कितानि दृश्यन्ते । अतएवामोदन्तेकिञ्चिदुद्भिदुरेणसुखेनगर्भपिण्डितमामोदम्मुञ्चतीति ॥ ६ ॥ कान्तिरिति । रसोभिमानात्माशृङ्गारस्तस्यदीप्तत्वंविभावानुभावव्यभिचारिभिःसम्यक्संचलितेन स्थायिना निरन्तरमुपचीयमानस्यपरमकोटिगमनम् । तथाहि । मागर्वमित्यादौयत्रभङ्गेषुबहुतरसूक्ष्मभङ्गविशेषमयस्वञ्जरीलिखितेन बहिर्विषयातिरोधानलक्षणादवस्थ्यात्प्रकाशनेन नायकस्यसपत्न्यामनुरागेविच्छायभावोक्तिः । स्वात्मनितुसहसाविर्भव

रायः । अत्रनायिकायाःसपत्नग्रामीर्ष्यानुबन्धेन प्रतिपादितस्य प्रियतमानुरागलक्षणशृङ्गारस्यदीप्त रसत्वङ्कान्तिः ॥ ७ ॥ भूत्युत्कर्षउदारता । यथा । प्राणानामनिलेनवृत्तिरुचितासत्कल्प वृक्षेवनेतोये काञ्चनपद्मरेणुकपिशेपुण्याभिषेकक्रिया । ध्यानं र त्नशिलागृहेषुविबुधस्त्रीसन्निधौसंयमोयद्वाञ्छन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥ अत्रमारी चाश्रमस्यसत्कल्पवृक्षादिपदैर्वैभवोत्कर्षस्यप्रतिपा दनमुदारता ॥ ८॥ आशयस्ययउत्कर्षस्तदुदात्तत्वमि ष्यते । यथा । पात्रेपुरोवर्तिनिविश्वनाथेक्षोदीयसि क्षमावलयेपिदेये । व्रीडास्मितन्तस्यतदातदासीच्चम

त्सात्विकप्रतिपादनेन जीवितसर्वस्वाभिमानात्मकरतिस्थायिभावप्र काशनेतस्याः सापेक्षभावेनायिकायाअपितदवस्थैवसाप्रतीयतेतदिदमा ह्प्रियतमानुरागेति । अनुरागेणलक्ष्यतेसप्रार्चिरिवार्चिषोपचीयतइत्य नुरागलक्षणः ॥ ७ ॥ भूतीत्यादि । भूतिस्सम्यत्तस्याउत्कर्षोलोकातिग प्रकर्षस्तस्यैव सहृदयचमत्कारार्पकतया गुणाधुराधिरोहणात्तमत्वात् । प्राणानामिति । उचितातपोयोग्या । वनस्यकल्पतरुसम्बन्धःसम्पत्तत्रै वसरूपदेनमुक्तास्तबकमाणिक्यमञ्जरीचीनांऽशुककिशलयादिविशेष द्योतिना प्रकर्षःपद्मप्रकरस्तोयसम्पत्तत्रैवकाञ्चनमयत्वे पद्मानाम्प्र कर्षः । बहुत्वंशिलावेश्मसम्पत् । तत्रैव रत्नरूपताप्रकर्षः सन्निधैःस्त्री प्रतियोगिकतासम्पत् तत्रैवविबुधेतिप्रकर्षस्तदिदमाह । सत्कल्प वृक्षादिपदैरिति ॥८ ॥ आशयस्येति । उत्कर्षः पूर्ववत् । उदाशयोलोके उदात्तइतिप्रतीतः । पात्रइति । विश्वनाथइतियदाज्ञावशंवदात्रिलोकी सोपियत्प्रार्थयतइति, बलयेपिइत्यपिशब्देनयस्यैकदेशःकुरुपाण्डव निधननिदानतयाविख्यातस्तत्रापिदेयेलज्जतइति । देवासुरकिन्नरा दिरयज्ञङ्गस्थावरप्रपञ्चोयदुच्छ्वासविलसितं सोपिचमत्कृतइति प दार्थानभिहितः प्रकर्षोभिधेयः ॥८॥ ओजइति ॥ अध्यवसायोनिश्चयस्त

पुरीपरिसरेपिकियदस्तिगन्तव्यमितिवचनंशृण्वतो रामस्यशिरीषमृदुतदङ्गावलोकनेनाऽश्रुणोऽवतारः सौकुमार्यमाह ॥ ५ ॥ अर्थव्यक्तिःस्वरूपस्यसाक्षात्कथनमुच्यते । यथा । पृष्ठेषुशङ्खशकलच्छविषुच्छदानांरेखाभिरङ्कितमलक्तकलोहिताभिः।गोरोचनाहरितबभ्रुबहिःपलाशमामोदतेकुमुदमम्भसिपल्वलस्य॥ अत्रकुमुदस्वरूपस्यसाक्षादिवप्रतीयमानत्वेनयत्स्पष्टरूपाभिधानमसावर्थव्यक्तिः ॥ ६ ॥ कान्तिर्दीप्तरसत्वंस्यात् । यथा । मागर्वमुद्वहकपोलतलेचकास्तिकान्तस्वहस्तलिखिताममम्ञ्जरीति । अन्यापि किन्नसखिभाजनमीदृशीनांवैरीनचेद्भवतिवेपथुरन्त

विष्यसीतिवार्यमाणापि हृदयवैमुख्येनपद्भ्यामितित्वरितङ्गमिष्यामीति स्नेहमूढा त्रिचतुराणिपदानिजवाद्गतवती । अश्रुणः प्रथमावतारोभविष्यदश्रुपरम्पराप्रचारभूतः । सौकुमार्य्यमाहेति । अश्रुपातेनानुभावाश्रुनिमित्तभूताचित्तद्रुतिः करतलामलकवत्प्रकाश्यते ॥ ५ ॥ अर्थव्यक्तिरिति । स्वरूपंस्वमसाधारणङ्कविप्रतिभैकगोचरञ्चमत्कारिरूपंतस्यसाक्षात्कथनङ्कविशक्तिवशात्साक्षात्कारसोदरप्रतीतिजनकपदवत्त्वंसन्दर्भस्यार्थव्यक्तिनामागुणः । अर्थोयथोक्तस्तस्यव्यक्तिः प्रत्यक्षायमाणताजातेर्भेदस्तृतीये वक्ष्यते । पृष्ठेपि । ईषद्विकस्वरस्य कुमुदस्यकिञ्चिद्विघटमानबहिःपलाशसम्बन्धिषु शीतातपासम्पर्कादत्यन्तविशदानान्दलानाम्पृष्ठानिपाकलोहितरेखाङ्कितानि दृश्यन्ते । अतएवामोदन्ते किञ्चिदुद्भिदुरेणमुखेनगर्भपिण्डितमामोदम्मुञ्चतीति ॥ ६ ॥ कान्तिरिति । रसोभिमानात्माशृङ्गारस्तस्यदीप्तत्वंविभावानुभावव्यभिचारिभिः सम्यक्संचलितेन स्थायिना निरन्तरमुपचीयमानस्यपरमकोटिगमनम् । तथाहि । मागर्वमित्यादौयत्रभङ्गेषुबहुतरसूक्ष्मभङ्गविशेषमयमञ्जरीलिखितेन बहिर्विषयातिरोधानलक्षणतादवस्थ्यात्प्रकाशनेन नायकस्यसपत्न्यामनुरागेविच्छायभावोक्तिः । स्वात्मनितुसहसाविर्भव

रायः । अत्रनायिकायाःसपत्नग्रामीर्ष्यानुबन्धेन प्रतिपादितस्य प्रियतमानुरागलक्षणशृङ्गारस्यदीप्त रसत्वङ्क्रान्तिः ॥ ७ ॥ भूत्युत्कर्षउदारता । यथा । प्राणानामनिलेनवृत्तिरुचितासत्कल्प वृक्षेवनेतोये काञ्चनपद्मरेणुकपिशेपुण्याभिषेकक्रिया । ध्यानं र त्नशिलागृहेषुविबुधस्त्रीसन्निधौसंयमोयद्वाञ्छन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥ अत्रमारी चाश्रमस्यसत्कल्पवृक्षादिपदैर्वैभवोत्कर्षस्यप्रतिपा दनमुदारता ॥ ८॥ आशयस्ययउत्कर्षस्तदुदात्तत्वमि ष्यते । यथा । पात्रेपुरोवर्तिनिविश्वनाथेक्षोदीयसि क्षमावलयेपिदेये । व्रीडास्मितन्तस्यतदातदासीच्चम

त्सात्विकप्रतिपादनेन जीवितसर्वस्वाभिमानात्मकरतिस्थायिभावप्र काशनेतस्याःसापेक्षभावेनायिकायाअपितदवस्थैवसाप्रतीयतेतदिदमा हुःप्रियतमानुरागेति। अनुरागेणलक्ष्यतेसप्रार्चिरिवार्चिषोपचीयतइत्य नुरागलक्षणः ॥ ७ ॥ भूतीत्यादि । भूतिस्सम्पत्तस्याउत्कर्षोलोकातिग प्रकर्षस्तस्यैव सहृदयचमत्कारार्पकतया गुणधुराधिरोहणाच्चसत्वात्। प्राणानामिति । उचितातपोयोग्या । वनस्यकल्पतरुसम्बन्धःसम्पत्तत्रै वसत्पदेनसुक्तास्तबकमाणिक्यमञ्जरीचीनांऽशुकशिशलयादिविशेष द्योतिना प्रकर्षःपद्मप्रकरस्तोयसम्पत्तत्रैवकाञ्चनमयत्वे पद्मानाम्प्र कर्षः। बहुत्वंशिलावेश्मसम्पत्। तत्रैव रत्नरूपताप्रकर्षः सन्निधैःस्त्री प्रतियोगिकतासम्पत् तत्रैवविबुधेतिप्रकर्षस्तदिदमाह । सत्कल्प वृक्षादिपदैरिति ॥८ ॥ आशयस्येति । उत्कर्षः पूर्ववत् । उच्चाशयोलोके उदात्तइतिप्रतीतः । पात्रइति । विश्वनाथइतियदाच्चावशंवदात्रिलोकी सोपियत्प्रार्थयतइति, बलयेपिइत्यपिशब्देनयस्यैकदेशःकुरुपाण्डव निधननिदानतयाविख्यातस्तत्रापिदेयेलज्जतइति । देवासुरकिन्नरा दिरयञ्जङ्गमस्थावरप्रपञ्चोयदुच्छ्वासविलसितं सोपिचसत्कृतइति प दार्थानभिहितः प्रकर्षोभिधेयः ॥८॥ ओजइति ॥ अध्यवसायोनिश्चयस्त

त्कृतोयेनसएवदेवः ॥ अत्रसकलक्ष्मावलयप्रदानेपि जातव्रीडतयाबलेराशयोत्कर्षप्रतिपादनादुदात्तत्वम् ॥ ९ ॥ ओजःस्वाध्यवसायस्यविशेषोर्थेषुयोभवेत् । यथा । तान्येवयदिभूतानिताएवयदिशक्तयः । ततःपरशुरामस्यनप्रतीमःपराभवम् ॥ अत्रपरशुरामोविजयतएवइत्यस्मिन्नर्थेस्वाध्यवसायप्रतिपादनमोजः ॥ १० ॥ रूढाहङ्कारमौर्जित्यम् ॥ यथा । उमावधूर्भवान्दातायाचितारइमेवयम् । वरःशम्भुरलंह्येषत्वत्कुलोद्भूतयेविधिः । अत्रइमेवयमितिआत्मान्वितव्रतचर्यादिसमुक्कयप्रौढहङ्कारप्रतिपादनादौर्जित्यम् ॥ ११ ॥ प्रेयस्त्वर्थैष्वभीष्टता । यथा । रसवदमृतङ्कः सन्देहोमधून्यपिनान्यथामधुरमधिकञ्चूतस्यापिप्रसन्नरसम्फलम् । सकृदपिपुनर्मध्यस्थः

त्रविशेषः पूर्ववत् । स्वपदेनवक्ताभिमतः । तानीति । यदिहन्तव्यजातीयसेवनविपर्यस्तम् । ताएवेति । प्रभावोत्साहमन्त्रजास्तद्वदर्थनिर्वहणप्रौढिप्रख्यात्कीर्त्तयःशक्तयोयदिनविलीनतामयासिषुः । परशुरामइति । अर्जुनभुजसहस्रच्छेदादिना यस्यपरशुरामवरदानेन त्रिभुवनेपिप्रसिद्धइत्यादि ॥१०॥ रूढेति ॥ ऊर्जितशब्दोहङ्कृतेप्रसिद्धस्तात्कालिकनिमित्तोपनिपात्तेवासनाविकाशात्तमोनिर्भेदस्थानेषुसुप्रबुद्धइव स्थायिभिरसंलक्ष्यमानःप्रथमप्रादुर्भूतोभिमानोहङ्कारइत्युच्यते । रूढःसूक्ष्मावस्थातोद्वितीयमाविर्भावदशामापन्नोऽहङ्कारोयस्यसरूढाहङ्काररस्तस्यभावस्तत्ता । सुगममुदाहरणम् ॥११॥ प्रेयइति । शब्दगुणेनुनिष्पादिवर्णनीयप्रीतिजनकत्वम्प्रदानामुक्तमिहतुवाक्यार्थस्यवक्तृप्रीतिगोचरत्वमुच्यतइतिविशेषः । प्रीतिरुक्तपूर्वा । तत्रैवाभिशब्देनप्रकर्षोद्योतितः । अभीष्टताप्रेयइतिप्रेयःपदप्रवृत्तिनिमित्तम् । रसवदितिप्रशंसायाम्मतुप् । अमृतमितियस्यप्रसादात्त्रिदशैरमरत्वमासादितम् ।

सन्रसान्तरविज्जनोवदतुयदिहान्यत्स्वादुस्यात्प्रि
यारदनच्छदात्॥अत्रामृतप्रभृतिभ्यःप्रियारदनच्छद
स्याभीष्टताप्रदर्शनम्प्रेयः ॥१२॥ अदारुणार्थपर्यायो
दारुणेषुसुशब्दता । यथा । देवव्रतेवाञ्छतिदीर्घ
निद्रांद्रोणेचकर्णेचयशोवशेषे। लक्ष्मीसहायस्यतवा
द्यवत्सवात्सल्यवान्द्रौणिरयंसहायः । अत्रमुमूर्षा
मरणादीनान्दारुणार्थानान्दीर्घनिद्रांवाञ्छतियशोव
शेषइत्यादिभिःसुशब्दैःपर्यायेणभणनंसुशब्दता । सा
चमुख्यार्थव्यतिक्रमस्यवाक्यार्थत्वान्नशब्दगुणः॥१३॥
व्याजावलम्बनंयत्तुसासमाधिरितिस्मृतः । यथा ।
दर्भाङ्कुरेणचरणः क्षतइत्यकाण्डेतन्वीस्थिताकति
चिदेवपदानिगत्वा । आसीद्विवृत्तवदनाचविमोच

नान्यथेति प्रत्यक्षसाक्षिकेवस्तुनिप्रमाणान्तरानुसरणम्।प्रसन्नरसमिति।
अम्लतालक्षणकाव्यार्थापगमेन परिणतिरित्यादि ॥ १२ ॥ अदारुणेत्या
दि । झटित्यातङ्कदायीदारुणस्तस्यसाक्षादभिधानेविवक्षितप्रतीति
स्खलनखेदसम्भवात्तदुपनीतस्यवस्तुनस्तदध्यासान्तरितस्यवाक्यार्थ
त्वादिति । सर्वत्रैवहिलक्षणायामर्थाध्यासोङ्गीक्रियते लौकिकीचेयं ल
क्षणेतिनप्रयोजनगवेषणमपीति। सुगममुदाहरणम्॥१३॥व्याजेति। चि
त्तवृत्तिषुबलादाविर्भवन्तीषु प्रकृतरसौचित्यविरोधिप्रकर्षात्प्रकटमना
वरणीयासुच यदन्यथासमर्थनन्तद्व्याजाव्यलम्बनम्प्रस्तुतोचितसमा
धानात्मकत्वात् । तथाहि । पूर्वानुरागे त्रपासाध्वसविवशायास्ताव
न्नायकसमीपादपसरणमौचित्यापन्नमनन्तरन्तूत्कण्ठातरलितायाःकथ
मालोकमात्रेणापिकृतार्थःस्यादिति परावर्त्तनम् । तत्रच मौग्ध्यभङ्गश
ङ्कायांदर्भाङ्कुरक्षतिप्रभृतिव्याजावलम्बनमेव कार्यसर्वस्वमाभासतइति
॥ १४ ॥ सूक्ष्ममित्यादि । वाक्यैकगोचरोर्थःकुशाग्रीयबुद्धितया सूक्ष्मस्त
स्यदर्शनमुपायवैलक्षण्यात्तत्तद्विशेषवतःप्रत्यक्षायमाणता। सूक्ष्मालङ्का

यन्तीशाखासुवल्कलमसक्तमपिद्रुमाणाम्। अत्रगम
नेसतिप्रियजनावलोकनाभिलाषिण्याःशकुन्तलाया
दर्भाङ्कुरचरणक्षतिवल्कलव्यासङ्गादिव्याजाबल
म्बनंसमाधिः ॥ १४ ॥ सौष्ठम्यमित्युच्यतेतत्तुयत्सू
क्ष्मार्थाभिदर्शनम् । यथा । अन्योन्यसञ्चलितमां
सलदत्तकान्तिसोल्लासमाविरलसंवलितार्धतारम् ।
लिलागृहेप्रतिकलङ्किलकिञ्चितेषुव्यावर्तमानविनय
म्मिथुनञ्चकास्ति । अत्रान्योन्यसंवलितमांसलदत्त
कान्तीत्यादिवाक्येदम्पत्योरनुरागलक्षणस्यसूक्ष्मार्थ
स्यदर्शनात्सौक्ष्म्यम् ॥ १५ ॥ शास्त्रार्थसव्यपेक्षत्व
ङ्गाभीर्यमभिधीयते । यथा । मैत्र्यादिचित्तपरिकर्म
विदोविधायक्लेशप्रहाणमिहलब्धसजीवयोगाः ।
ख्यातिञ्चसत्वपुरुषान्यतयाधिगम्यवाञ्छन्तिताम
पिसमाधिभूतोनिरोद्धुम् ॥ अत्रमैत्र्यादिपदानांशा
स्त्रार्थसव्यपेक्षत्वाद्गाम्भीर्यम् ॥ १६ ॥ विस्तरोर्थवि

राद्भेदस्तृतीयेकरिष्यते । सचायम्भाश्रोवासनीयश्च । भावनामात्रग
म्योभाश्रोयथा । उच्चइअगमहिआवट्ढसिज्जन्तरोसपरिआरअम् ।
पाणीपसरन्तमत्ताचंवफलिहचसअम्मुहम्बाला । एकाग्रताप्रकर्षगम्यो
वासनीयस्तमुदाहरति । अन्योन्येति । व्याजापसृतपरिवारे लीला
वेश्मनि तत्कालकलितमन्मथोन्माथंविदग्धमिथुनमुत्तरोत्तरमपनीय
मानत्रपासाध्वसतया प्रतिकलत्रवेन्दुवत्कान्तिविशेषमासादयति। वि
चित्रमभिचार्यनुप्रवेशेहर्षरुदितस्मितादीनामव्यवस्थिततया व्यति
रेकरूपकिलकिञ्चिताख्यशृङ्गारभावोन्मेषः ॥ १५ ॥ शास्त्रार्थइति । ए
कपुरुषार्थप्रयोजनकपदार्थश्रुत्यादनंविधिनिषेधश्रुत्युत्पत्तिफलकं शास्त्र
न्तदर्थसव्यपेक्षत्वम् । तदुक्तप्रक्रियानिरूपणाधीननिरूपणात्वंवाक्यार्थ
स्यगाम्भीर्यम् । मैत्री, करुणा, मुदितोपेक्षा, इतिचतस्रश्चित्तसम्मार्जनाः ।

काशःस्यात् ॥ यथा । संग्रामाङ्गणमागतेनभवताचा
पेसमारोपितेदेवाकर्णययेनयेनसहसायद्यत्समासादि
तम् । कोदण्डेनशराःशरैररिशिरस्तेनापिभूमण्ड
लन्तेनत्वम्भवताचकीर्तिरनघाकीर्त्या चसप्राब्धयः।
अत्रविपक्षवधात्सप्राब्धिव्यापिनीकीर्तिरर्जितेत्येता
वतोर्थस्यबहुविधंविकाशितत्वाद्विस्तरः ॥ १७ ॥
संक्षेपस्तस्यसंवृतिः ॥ यथा । श्रूयतान्धर्मसर्वस्वंश्रु
त्वाचैवावधार्यताम् । आत्मनःप्रतिकूलानिनपरे
षांसमाचरेत् । अत्रशास्त्रविस्तरप्रतिपादितस्यधर्म

अविद्याऽस्मितारागद्वेषाभिनिवेशाः,पञ्चक्लेशाः । चितवृत्तिनिरोधोयो
गःसएवव्युत्थानहेतुभिरनास्कन्दनीयःसबीजः । सत्वम्प्रधानम् । पु
रुषश्चिद्रूपस्तयोर्भेदःप्रथाख्यातिरिति, साङ्ख्यप्रक्रियाऽसैन्यादिपदाना
मिति । वाक्यार्थस्यैवयथोक्तरूपत्वेतत्प्रतिपादकपदानामवश्यन्त
थाभावोभवतीतिवैशेषिकाङ्गेदोवक्ष्यते ॥ १६ ॥ विस्तरइति । वाक्या
र्थस्यपल्लवभूततत्तत्सहृदयचमत्कारिविशेषप्रसारणंसंवृतविवृतपटवत्।
विस्तराख्योगुणः । विस्तरइवविस्तरःशब्दप्रपञ्चवदित्यर्थः । अन्यथा
विस्तारइतिस्यात् । संग्रामाङ्गणेत्यादौतुशत्रुशिरश्छेदात्सप्राब्धिव्या
पिनी त्वयाकीर्तिर्जितेत्येतावान्वाक्यार्थोलौकिकसाधारणतयाच चम
त्कारास्पदमितिसंग्रामाङ्गणसंगतिरेवनतथा यथावीरमात्रस्योचिता त
त्रापिचापसमारोपणमितिकाप्युत्साहशक्तिः।अतएवबलवदाश्रयप्रसक्त
लुण्टाकवधेनयदयसितन्तेनैवतदासादितमितिसोपस्कारकर्तृकर्मप्रप
ञ्चेनविकाशनमेवकाव्यपदवीप्राप्तिबीजन्तदिदमाह।बहुविधंविकाशित
त्वादिति । नात्रशब्दविकाशाधीनः प्रकर्षइतिशब्दविस्ताराङ्गेदः॥ १७ ॥
संक्षेपइति । तस्येत्यर्थस्य । समासेगुणीभूतस्यापिबुद्धाविभज्यपरामर्शः।
यथा । अथशब्दानुशासनम्। केषांशब्दानामिति । अशेषविशेषोपग्राहक
पुरस्कारेण वाक्यार्थस्याभिधानंविवृतसंवृतपटवत्संक्षेपः।श्रूयतामिति ।
अत्रनेनते नविशेषेणविस्तरतःप्रतिपादयिताऽस्यधर्म्मस्ययत्किञ्चिदात्म

स्यश्लोकार्द्धेनप्रतिपादितत्वादयमर्थसङ्कोचःसंक्षेपः ॥ १८॥ शब्दार्थौयत्रतुल्यौस्तःसम्मितत्वन्तदुच्यते ॥ यथा । इन्दुर्मूर्द्धिशिवस्यशैलदुहितुर्वक्रोनखाङ्कःस्तने देयाद्वोभ्युदयन्द्वयन्तदुपमामालम्ब्यमानम्मिथः । संवादःप्रणवेन यस्यदलताकायैकतायान्तयोरूर्ध्वद्वार विचिन्तितेनचहृदिध्यातःस्वरूपेणच ॥ अत्रप्रणव लक्षणस्यार्थस्यतुल्यत्वेन यथावद्विभज्यविनिवेशनं सम्मितत्वम् ॥ १९ ॥ साभिप्रायोक्तिविन्यासोभावि कत्वन्निगद्यते ॥ यथा । दृष्टिंहेप्रतिवेशिनिक्षणमिहा प्यस्मद्गृहेदास्यसिप्रायेणास्यशिशोःपितानविरसाः कौपीरंपःपास्यति । एकाकिन्यपियामितद्गुरमितः

नः प्रतिकूलमन्यस्यनाचरणीयमिति सामान्येनाभिधानमप्रवृत्तप्रवर्त्तने प्रगल्भायमानमतिसुन्दरमाभासते।नात्ररचनासङ्कोचप्रतिष्ठितङ्काव्यमिति शब्दगुणाद्भेदः ॥१८॥ शब्दार्थाइति। शब्दस्यार्थोतयोर्विभज्यविनिवेशनंसम्मितत्वमितिकेचित्। तन्न। शब्दग्रहणवैयर्थ्यप्रसङ्गात्। द्वित्वाविवक्षाप्रसङ्गाच्च।"पल्लविअंविअकरपल्लवेहिम्पपूफुल्लिअंवमुणहअच्छेहिम्। फलिअम्बिवपीणपओहरेहिंअज्जाइलावण्णम्,,*इत्यादौद्विप्रभृतीनामर्थानामविभज्यविनिवेशनसिध्यते।तस्माच्छब्दश्चार्थश्चशब्दार्थौ।तयोस्तुल्यत्वंयावदुद्देशशब्दार्थत्वं।अर्थस्यविभज्यतुलाधृतवत्प्रतिनिवेशः सम्मितत्वमिति।अर्थमुद्दिश्यशब्दतुलनङ्काव्यभावबीजंशब्दगुणः, शब्दमुद्दिश्यत्वर्थतुलनमर्थगुणश्च। तथाहिपरमेश्वरस्यमूर्द्धिबालेन्दुः, पार्वतीस्तनेनखाङ्कइतिपृथक्शब्देनोद्दिश्य तदुपमायोग्यतयाकायैकतायान्दलनंहृत्वद्वसनवसद्वारयोर्घ्यानेनयुगपत्सन्निधानमितिसम्यग्विभज्यतुलितस्यैवप्रणवस्यप्रतिनिर्देशइतितदिदमाह । अत्रेति । यथावदिति । येनप्रकारेणसङ्गच्छतेइति तदनतिक्रमेणेति ॥ १९ ॥ साभिप्रायइति । अभिप्रायविशेषप्रतिबद्धस्यवाक्यार्थस्योक्तिविन्यासउक्त्याविशेषोन्यासः शब्दगुणोपादानाभावार्थनिष्पादिताइहत्वर्थस्येतिविशेषः । तथाहि । दृष्टिमित्या

---

* पल्लवितमिवकरपल्लवाभ्यांप्रफुल्लितमिवसुग्धाक्षिभ्याम् ।
फलितमिवपीनपयोधराभ्यामार्यायालावण्यम् ॥ १ ॥

स्रोतस्तमालाकुलनीरन्ध्रास्तनुमालिखन्तुजरठच्छे
दानलग्रन्थयः। अत्रतमालमालाचलयितसरिन्नीरकृ
तसङ्केतायाःकुलटायाःस्तनौभाविनाम्परपुरुषनखक्ष
तानान्तलग्रन्थ्यालेखव्याजगोपनेनसाभिप्रायभणन
म्भाविकम् ॥ २० ॥ गतिःसास्यादवगमोयोर्थादर्था
न्तरस्यतु ॥ यथा । शुभेकोयंवृद्धो गृहपरिवृढः किन्त
वपिता नमेभर्तारात्रौव्यपगतदृगन्यच्चबधिरः । हुहुं
हुंश्रान्तोऽहंशिशयिषुरिहैवापचरकेङ्कयामिन्यांया
सिस्वपिहिननुनिर्दंशमशके। अत्रप्रश्नादर्थमवगम्यो
त्तरादर्थान्तरार्थावगमोगतिः ॥ २१ ॥ रीतिःसायस्
त्विहार्थानामुत्पत्यादिक्रियाक्रमः ॥ यथा । प्रथमम
रुणच्छायस्तावत्ततःकनकप्रभस्तदनुविरहोताम्यत्त
न्वीकपोलतलद्युतिः । प्रभवतिपुनर्ध्वान्तध्वंसक्षमः
क्षणदामुखेसरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छ

दौतनुमालिखन्तुजरठच्छेदानलग्रन्थय इत्युक्त्वाविन्यस्यमानस्यभा
विनलग्रन्थ्यालेख्यरूपार्थःकुलटास्वरूपानुसन्धानदत्तान्तः करणस्यप्र
तिपत्तुरनन्तरमेवस्वैरविहारचिह्नगोपनमभिन्यनक्ति ॥ २० ॥ गतिरि
ति । अर्थादर्थविशेषाद्हृदयसंवादिनइतियावत् । अर्थान्तरस्यतथाभू
तस्य । तेनयत्रसहृदयहृदयङ्गमादर्थात्कांस्यतालानुस्वानन्यायेन तादृ
शमर्थान्तरमवगम्यतेसागतिरितिलक्षणार्थः । शुभेकोयंवृद्धइति । सर्वा
कारमनवद्यायास्तावद्वास्यमपिनायमर्हतीतिहृदयानुकूलमर्थम्प्रश्नाद
वगत्यगृहपरिवृढइत्युत्तरम् । अस्मादपिमनायङ्कोपिकिन्तुगृहस्वा
मीतिहृदयसंवादिनमर्थमवधार्यकिन्तवपितेत्यादिकप्रश्नोत्तरशृङ्खलाग
वेषणीयातदेतद्व्याचष्टे । उत्तरादिति । उत्तरप्रत्युत्तरवाक्यात् । उत्तर
न्तुपदम्प्रश्नपदमेव ॥ २१ ॥ रीतिरिति । उत्पत्त्यादीनांक्रियाणांक्रमः
काव्यशोभावहत्वेनगुणः । नेदंवस्तुस्वभाववर्णनमितिजातेरर्थव्यक्तेश्च

नः । अत्रोदयादारभ्यचन्द्रस्योत्पत्यादिक्रियाक्रमो
रीतिः ॥ २२ ॥ उक्तिर्नामयदिस्वार्थोभङ्ग्याभव्यो
विधीयते ॥ यथा । त्वमेवंसौन्दर्यासचरुचिरतायाः
परिचितःकलानांसीमानम्परमिहयुवामेत्रभजथः ।
अपिद्वन्द्वन्द्वृष्ट्यातदितिसुभगेसंवदतिवामतःशेषञ्चे
त्स्याज्जितमिहतदानींगुणितया । अत्राभीष्टनाय
कनायिकासङ्गमस्यभङ्ग्याभणनमुक्तिः ॥ २३ ॥ वि
वक्षितार्थनिर्वाहःकाव्येप्रौढिरितिस्मृता॥यथा । त्व
द्वक्त्रेन्दुविलोकनाकुलधियाधात्रात्वदीयांश्रियन्नि
क्षिप्यप्रतिराजकेषुविदुषांलक्ष्म्यातयापूरितः । तेनै
तेनियतन्दरिद्रतिगृहेष्वेषामियन्द्रश्यतेनैनामाद्रिय
सेत्वमिच्छसितुतान्त्वामेवसाधावति । अत्रत्वद्व
क्त्रविलोकनाकुलेनधात्रात्वदीयालक्ष्मीःशत्रुषुनिक्षि
प्ताविदुषाञ्चलक्ष्मीस्त्वयोरोपितातस्त्वंविपक्षल
क्ष्मीमाद्रियसेसाचत्वामनुधावतियाचविदुषांलक्ष्मी
स्तयात्वमापूरितस्तेनतेदरिद्राः । अतएवत्वमेना

भेदः । सुगममुदाहरणम् ॥ २२ ॥ उक्तिरिति । स्वीयोभीष्टोर्थःस्वार्थ
स्तस्यसाक्षात्प्रतिपादनमनुचितमितिअर्थान्तरभङ्गिभिःप्रतिपादनस
र्थगुणः । भव्योमनोहरः । सुगममन्यत् । नायकनायिकासङ्गमस्येति ।
नायकस्यनायिकयातस्याश्चनायकेनेतिपरस्परोत्कण्ठाप्रकर्षोविवक्षि
तः । तेनैकशेषोनभवति ॥ २३ ॥ विवक्षितेति । कवेरभिमतस्यभूय
सोप्यर्थस्यस्वरूपेनैवयाक्येनप्रतिपादनम्प्रौढिः । तथाहि । त्वान्निर्माय
जगद्विलक्षणयस्तुनिर्वेहणचमत्कृतस्यधातुस्त्वद्वक्त्रेन्दुविलोकनन्तदा
सङ्क्रमत्वदर्थनिर्मितायाः श्रियः प्रतिराजकेषुक्रमणकमेणसञ्चारणन्त
त्पूर्वापरप्रतिसन्धातबलाद्विद्वज्जोलक्ष्मीमाकृष्येत्यादिकोभूयानर्थःस्तो
कैकवाक्येनोपनीतइति ॥ २४ ॥ सम्प्रत्यतिप्रसङ्गवारणार्थंक्रमप्राप्तावै

न्नाद्रियसेइयञ्चत्वद्विद्वद्गेहेष्वेवदृश्यतेइत्येतावतःप्र
भूतस्यार्थस्यानेकवाक्येनप्रतिपादितत्वाद्विवक्षिता
र्थनिर्वहणम्प्रौढिः ॥ २४ ॥ पदाद्याश्रितदोषाणांये
चानुकरणादिषु। गुणत्वापत्तयेनित्यन्तेऽत्रदोषगुणाः
स्मृताः। त्रिविधाअपितेभूयश्चतुर्विंशतिधा बुधैः॥
प्रोक्ता यथागुणत्वेन प्रविभज्यतथोच्यते। याम्लिष्ट
म्लेच्छितादीनाम्पददोषेष्वसाधुता। निरूपितानुक
रणेगुणत्वं साप्रपद्यते ॥ यथा। उन्नमय्यसकचग्रह
मास्यञ्चुम्बतिप्रियतमेहटवृत्या। हुंहुमुञ्चमममेति
चमन्दञ्जल्पितञ्जयति मानवतीनाम्। अत्रहुंहुमममे
त्यसाध्वोरपिम्लिष्टम्लेच्छितयोरनुगुणत्वाद्गुणत्व
म् ॥ १ ॥ गुणत्वमप्रयुक्तस्य तथाऽनुकरणम्भवेत् ॥

शेषिकगुणालक्षयितव्यास्तेचदोषाअपिसन्तोगुणीभावमापन्नाउच्यन्ते।
तत्रैषकवीनामालापः। सामण्णसुन्दरीणंविब्भममुव्वहइअविणओच्चे
अ। धूमोच्चिअपज्जलिआणम्बहुमओसुरहिदारूणम्*। दारुणानांगुण
त्वमितिशङ्कान्दर्शयन्नाह। पदादीति। पदवाक्यवाक्यार्थदोषाणां
गुणत्वापत्तयेनित्यंयेभवन्तितेनुकरणादिषुमध्येदोषगुणाःस्मृताइतिस
म्बन्धः। यद्यपिचानुकरणादिकाएवनगुणास्तथाप्यनुक्रियमाणाद्यभेदो
पचारेणोक्तम्। पदादिदोषेष्वन्त्यान्त्यस्यैकस्यनवधाभेदेचतुर्विंशतिप्र
काराः। यथेति। येनोपाधिनागुणीभवनमाचार्यैरुपपादितन्तत्तदु
पाधिविभागप्रदर्शनङ्करिष्यतइति। याम्लिष्टेति। इहद्वयेदोषानित्या
अनित्याश्च तत्रानुकरणमात्रानपवदनीयदोषभावाश्च्युतसंस्काराप्रयु
क्तादयोनित्याः।अनुकरणीयानुकरणापवादकहेतुकाःश्रुतिकटुत्वप्रभृत
यस्त्वनित्याः।येषुपददोषेषुम्लिष्टम्लेछितप्रभृतीनांयाऽसाधुतानिरूपि
तासागुणत्वमनुकरणेप्रपद्यतइत्यन्वयः। लुप्तैकदेशंम्लिष्टम्। अव्यक्त
रूपंम्लेछितम्।आदिग्रहणेनग्रस्तनिरस्तोपध्मातकम्पितादयः।हुंहुइति।

* सामान्यसुंदरीणांविभ्रममुद्वहतिअविनयोच्छ्रायः।
धूमोच्चयःप्रज्वलितानांबहुमतःसुरभिदारूणाम् ॥ १ ॥

यथा। दिवम्पत्काषिणोयान्तियेचीकमतभाषिणः। पत्काषिणोपिनोयान्तियेवचन्तिप्रयुञ्जते। अत्राचीकमतवचन्तीत्यादिपदानाङ्कविभिरप्रयुक्तानामप्यनुकरणत्वाद्गुणत्वम् ॥ २ ॥ यच्छुतेर्विरसङ्कष्टन्तस्य दुर्वचकादिषु ॥ गुणत्वमनुमन्यन्तेसानुप्रासस्यसूरयः॥ यथा। त्वाष्ट्रास्त्वाष्ट्रारिराष्ट्रेनभाष्ट्रेनादंष्ट्रिणो जनाः। धार्तराष्ट्राःसुराष्ट्रेनमहाराष्ट्रेनचोष्ट्रिणः। अत्रश्रुतिविरसत्वात्कष्टेपिदुर्वचकत्वाद्गुणत्वम् ॥ ३ ॥ यत्पादपूरणाद्यर्थमनर्थकमितिस्मृतम्। गुणत्वमनु

द्वितीयहुङ्कारेबिन्दुप्रोञ्छनान्म्लिष्टम्। ममेतिकिम्मुच्चमुञ्चेतिम्लिष्टमुतममेतिननिश्चीयते ॥ अनुकरणत्वाद्गुणत्वमिति॥अर्थविशेषेहिसाधुत्वव्यवस्थेति। यच्चाशक्तिजमसाधुरूपन्तस्यानुकरणेसाधुत्वमित्यतइत्युक्तमनुक्रियमाणान्तुस्वरूपपदानुकरणतयापूर्वार्थत्यागेनसाध्वेव।तस्यैवानुकरणस्यतत्कालरञ्जकमानवतीममभवचनानुकारतयाचगुणीकरणासामर्थ्यमिति ॥ १ ॥ पत्काषिणइति। पादमविकषन्तः। हिमकाषिहतिषुचेतिपादशब्दस्यषट्भावः। वचेर्वचन्तीत्येवरूपमप्रयुक्तत्वन्यथापि।सत्यन्त।मनवच्मीत्यादेरनुमतत्वात्। इत्यादिपदानामित्युदाहरणान्तराभिप्रायेण॥२॥यच्छुतेरिति।दुर्वचकयोगाइति।व्यावहारिक चतुःषष्ट्यान्दुर्वचकप्रयोगोनुमतस्तस्यानुप्रासघटकत्वेऽलङ्कारनिर्वहणक्षमतयाकविशक्तिव्यञ्जकस्यगुणीभावः।आदिपदेनरौद्रादिरसानुप्रवेशः। यदाह।शषौसरेफसंयोगौटवर्गश्चापिभूयसा।विरोधिनःस्युःशृङ्गारेतेनवर्णारसच्युताः। तएवविनिवेश्यन्तेबीभत्सादौरसेयदा। तदातन्दीपयन्त्येयतेनवर्णारसच्युता, इति।त्वाष्ट्राराक्षसास्त्वष्टुरपत्यं वृत्रस्तस्यारिरिन्द्रस्तस्यराष्ट्रेस्वर्गेमसन्ति। त्राष्ट्रेचणकादिभर्जनस्थानेनकुशठदंष्ट्राभवन्ति। असितचञ्चुचरणाहैमाधार्त्तराष्ट्रानविद्यन्ते। उष्ट्रिणउष्ट्रोपजीविनः ॥ ३ ॥ यत्पादपूरणेति। द्योतनीयमर्थमन्तरेणप्रयुक्तमव्ययपदमनर्थकमित्युक्तम्।पादपूरणार्थत्वन्तुदूषणताबीजम्।आदिग्रहणा

मन्यन्तेतस्यापियमकादिषु ॥ यथा । योषितामति तरान्तखलूनङ्गात्रमुज्ज्वलतयानखलूनम्, बभौमुखेना प्रतिमेनकाचनश्रियाधिकाताम्प्रति मेनकाचन, अ त्रखलुशब्दस्यचशब्दस्यचपादपूरणमात्रेपिप्रयोजने यमकत्वाद्गुणत्वम् ॥ ४ ॥ यत्तुरूढिच्युतत्वेनप्रोक्त मन्यार्थसञ्ज्ञितम् । प्रहेलिकादिषुप्रायोगुणत्वन्तस्य युज्यते ॥ यथा । खातयःकनिकालेतेस्फातयःस्फा र्ह्वलगवः । चन्द्रेसाक्षाद्भवन्त्यत्रवायवोममधारिणः । अत्र खातय इत्यादीनांघर्घरिकादौ धृङश्चानवस्थाने रूढिः । गूढार्थंतुप्रहेलिकादौ तन्नदुष्यतीति तेषान्दो

द्यपूरणम् । सतितूपयोगेतस्य तद्बीजाभावाद्दोषभावविरहोऽलङ्कारा रम्भेचगुणत्वन्तदिदमुक्तंयमकादिष्विति । आदिशब्दोनुप्रासचित्रादि परः।वाक्यालङ्कारार्थत्वमपिशब्दालङ्कारारम्भकत्वमेव । यदाह। आर्षा र्षिपुत्रकर्षिकवैदिकादिवाक्यानामलङ्कारहेतवोवाक्यालङ्कारार्थाइति। तेन "उत्फुल्लकमलकेसरपरागगौरद्युतेममहिगौरि । अभिवाञ्छित म्प्रसिद्धयतुभगवतियुष्मत्प्रसादेन" इत्यत्रहिप्रइत्येतयोर्नवाक्यालङ्कार प्रयोजकत्वमित्युक्तप्रायम् । योषितामित्यादावतितरान्खलूनंयोषि तांगात्रमुज्ज्वलतयानोनमित्येवपर्यालोद्वितीयपादेतदुभयमपियमका रम्भकंसत्प्रस्तुतोपयोगितयाकविव्युत्पत्तिपुरस्कारप्रवृत्तमपजहातिदो षभावमुपादत्तेचगुणत्वमिति ॥ ४ ॥ यत्त्विति । रूढिच्युतत्वेनद्वि तीयांसंज्ञाम्प्रयोजयति । आकीर्णामन्त्रणाद्युपयोगिनीप्रहेलिका तथा चतद्विद्यसभाषायांविदग्धैरुपन्यासैः स्वार्थाप्रत्यायकत्वलक्षणबीजा भावान्नदोषो गुणस्तुभवति । अनुकरणादिकमादिपदेनगृह्यते । खात योघर्घरिकाःकनीतिकन्यासंबोधनम् कालश्चरणःकर्णोटदेशभाषानुसा रात् । स्फातयःस्फीताःस्फार्होमनोहरोवल्गुर्ध्वनिश्चन्द्रआह्लादकोवा यवःप्राणाःधारिणोऽनवस्थितास्तदयंवाक्यार्थः । हेकनिकन्येतवाह्ला

षगुणत्वम् ॥ ५ ॥ तुच्छवाच्यमपुष्टार्थमितियत्प्राक् प्रकाशितम्। तस्यच्छन्दोनुरोधादौगुणत्वमवधार्यते ॥ यथा। द्विरष्टवर्षाकृतिमेनमर्थिनामुशन्तिकल्पोपपदम्महीरुहम्,, यमिन्द्रशब्दार्थनिषूदनंहरेर्हिरण्यपूर्वङ्कशिपुम्प्रचक्षते ,, अत्र द्विरष्टवर्षाकृतिकल्पोपपदम्महीरुहमिति हिरण्यपूर्वङ्कशिपुमित्यस्य तुच्छार्थत्वेपिच्छन्दोनुरोधाद्गुणत्वम् ॥ ६ ॥ प्रतिपादितमादौयदसमर्थमवाचकम्। तस्यापिखलुमन्यन्तेगुणत्वंसीत्कृतादिषु ॥ यथा। आशुलङ्घितवतीष्टकराग्रेनीविमर्द्दमुकुलीकृतदृष्ट्या। रक्तवैणिककराहततन्त्रीमण्डलक्वणितचारुचुकूजे। अत्रकूजित

दकचरणबद्धायथोक्तविशेषणाघर्घरिकाः साक्षाद्भवन्तिश्रोत्रेणप्रत्यक्षी क्रियन्तेअत्रप्रस्तावेसमप्राणाउद्दीपनप्रकर्षमसहिष्णवोधारिणोऽनवस्थिताइति । व्रणप्ररोहस्थानादौस्थात्यादिशब्दानांरूढिर्नतुघर्घरिकादावित्याह । अत्रेति । नामधातुविवक्षयाद्विधाख्यातम् ॥ ५ ॥ तुच्छेति । शब्दपल्लवनस्यप्रकृतरसाननुगुणत्वेनदोषत्वप्रसङ्गेकचिदनन्यगतिकतयाकवेरुत्प्रेक्षते । तथाहि । भिन्नसर्गान्तैरित्यादिमासर्गाणामौत्सर्गिकैकवृत्तनिर्वाहौचित्येसयोक्तसंज्ञिप्तशब्दाप्रवेशात्परुषेणतदर्थत्वस्यविवक्षितत्वाच्चशब्दविकाशेनदोषःकिन्तुगुणएव । प्रकृतोदाहरणे। द्विरष्टवर्षाकृतिमिति। कल्पोपपदम्महीरुहमितिचनिर्देशेनमन्यन्ते। षोडशादिशब्दानामपिवंशस्यप्रवेशत्वादनन्यगतिकत्वाभावात्। हिरण्यपूर्वङ्कशिपुमितितुसङ्गच्छते। नहिहिरण्यकशिपुशब्दोत्रप्रविशतिप्रदर्शनार्थन्तुद्वयमन्यदप्युपात्तम्। एवंविधः शब्दविस्तरोगुणतामासादयतीत्याशयातेनायमर्थः। पल्लवाख्यशब्दगुणेनावतुच्छतायचमत्कारकारितयागुणधुराधिरूढैवाविस्तरविवित्क्षविषयतयाकविशेषगुणस्यभवतीति जिज्ञासायान्तुच्छन्दोनुरोधोविहितःसोपिहिकादाचित्कः करोत्येवदोषभावव्यावृत्तिमिति ॥ ६ ॥ प्रतिपादितमिति ।

स्यपक्षिणोन्यत्रावाचकत्वेपिकामशास्त्रेनुमतत्वाद्गुणत्वम् ॥ ७ ॥ शास्त्रमात्रप्रतीपत्वादप्रतीतन्तदुच्यते । गुणत्वन्तस्यतद्विद्यसम्भाषादौविदुर्बुधाः ॥ यथा। सर्वकार्यशरीरेषुमुक्त्वाङ्गस्कन्धपञ्चकम् । सौगतानामिवात्मान्योनास्तिमंत्रोमहीभृताम् । अत्राङ्गस्कन्धपञ्चकइत्यस्यशास्त्रमात्राप्रसिद्धस्यापितद्विद्यसम्भाषायांगुणत्वम् ॥८॥ अर्थप्रतीतिकृद्दूरेक्लिष्टन्नामयदुच्यते।झटित्यर्थप्रतीतौतद्गुणत्वमुपगच्छति॥

अस्तिकश्चिदेवंविषयोयत्रासमर्थस्यचारुतयागुणभावः । तथाहि । यद्यपिगणपाठादव्यक्तशब्दःकूजितन्तथापिलोकेपक्षिविषयएवनियतन्तथाचाभिमतविषयेप्रयुक्तम्पक्षिविरुताकारमावेदयति । हारीतप्रभृतीत्यादिनाकामशास्त्रकारैः सीत्कारोपदेशनात् सीत्कारस्यचचतुः षष्टिकलात्वेनप्रवणतयात्यन्तमुपादेयत्वात् । तदाह । अन्यान्यप्याकृतिग्रहणान्युपलक्षयेदिति ॥ ७ ॥ शास्त्रेति ॥ शास्त्रमात्रप्रसिद्धानामाहत्यप्रतीत्यजननेनविवक्षितवाक्यार्थप्रत्ययपरिस्खलनङ्खेददायिनानामृदुदुष्टताबीजम् । यदितुकुतश्चिद्विशेषाज्झटित्येवप्रतीतिञ्जनयेत्तदाकथन्दोषः॥ अस्तिचप्रतिपत्तिव्युत्पत्त्यतिशयलक्षणोविशेषस्तदिदमुक्तम् । तद्विद्येति । मन्त्रणाद्यवसरेऔचितीवशात्तत्तत्पदानाङ्गुणत्वमपिनिर्वहति । शास्त्रप्रक्रियापेक्षित्वङ्गाम्भीर्यम् । शास्त्रव्यवहारसङ्केतितपदानाङ्गुणत्वमित्यन्यःप्रकार यथावद्विनियोगःकार्यस्तस्यप्रकारसाकल्यंशरीरंशब्दच्छलात्कायआत्मासारभूतःक्षेत्रज्ञश्च । कर्मणामारम्भोपायःपुरुषद्रव्यसम्पद्देशकालविभागोविनिपातप्रतीकारःकार्यसिद्धिरितिपञ्चाङ्गानि । रूपंसंज्ञासंस्कारोवेदनाविज्ञानमितिपञ्चस्कन्धाः ॥ ८ ॥ अर्थप्रतीतिकृदिति ॥ इहापितदेवदूषणताबीजंझटितिप्रतीतिजनने सतिसमाधीयते । समाधानोपायश्चपदान्तरसन्निधानमतिप्रसिद्धिर्वाप्रकरणंवा । तथाहि । प्रकृतोदाहरणेउत्तरार्द्धेहरिरित्यभिधानादात्मनःपदमितिहरेःपदमितिसम्पन्नमस्यचसामान्यशब्दत्वादाकाशविषया

यथा। अथात्मनः शब्दगुणङ्गुणज्ञः पदंविमानेनवि
गाहमानः। पितुःपदम्मध्यममुत्पतन्तीकाञ्चीगुण
स्थानमनिन्दितायाः। अत्रात्मनःपदंशब्दगुणमिति
पितुःपदंमध्यममितिचाकाशविषयाकाञ्चीगुणस्था
नमितिनितम्बविषयमिति सर्वप्रसिद्धेर्झटित्येवप्र
तीतिङ्करोतीतिक्लिष्टस्यास्यगुणत्वम्॥ ९ ॥ अप्रसि
द्धार्थसम्बन्धंयद्गूढार्थमितिस्मृतम् ॥ तद्व्याख्या
नादिषुप्रायोगुणत्वेनतदिष्यते ॥ यथा। अह्मारि
साविकइणोकइणोहलिवुढ्ढहालपमुहावि।मण्डुक्क
मक्कडाविहुहोत्तिहरीसप्पसिंहावि *। अत्रमण्डूकम

प्रतीतिर्यद्यपिझटिति नोत्पत्तुमर्हतितथापिशब्दगुणमितिविशेषणेन
पदार्थान्तराद्यवच्छिद्यविवक्षिताभिमुखीप्रतीतिरूपजन्यते। पितुःप
दमिति। यद्यपि पदमितिसामान्यन्तथाप्याकाशस्यैवमध्यमचरणवि
न्यासस्थानत्वेनप्रसिद्धेर्नतथोचितप्रतीतिव्यवधानम्। काञ्चीगुणस्था
नमिति। चरणादारभ्यवर्णनाक्रमेनितम्बएवकाञ्चीनिवेशनस्योचित
त्वान्नप्रतीतिव्यवधानम् तदिदमुदाहरणत्रयप्रयोजनमुदाहरणादेरने
कोत्रवाक्यार्थोगवेषणीयः। कथन्तर्हिसर्वप्रसिद्धेरितिब्रवीति। इत्थं
शब्दगुणशब्दस्य बहुव्रीहित्वादवश्यंविशेषपर्यवसानाय प्रसिद्धिरनुसर
णीयाऽवश्यञ्च वर्णनक्रमेपि काञ्चीगुणस्थानमनिन्दितायाइत्यत्र का
ञ्चीगुणस्थानशब्दस्यनितम्बविशेषपर्यवसानार्थङ्कवीनामौचित्यप्रसि
द्धिरङ्गीकर्त्तव्येति। ननुचात्मनः पदंशब्दगुणत्वमित्यत्रप्रसादःकस्मा
न्नभवति। एवमाहनभवतीति। उदाहरणस्यादूषणत्वात्सामान्यश
ब्दस्यविशेषपर्यवसानमन्यच्च। समभिव्याहृतपदार्थसंसर्गरूपेवाक्यार्थे
स्वच्छसलिलइवाभिमतविशेषप्रतिविम्बनमित्युपाधिद्वयस्यसङ्कराच्च
॥ ९ ॥ अप्रसिद्धार्थसम्बन्धमिति॥ तस्यगुणार्थस्यव्याख्यानन्तद्व्याख्या
नमत्राप्यतिप्रसिद्ध्याकृष्टस्यानतिप्रसिद्धार्थप्रतीत्यकरणन्दुष्टत।बीजम
भिधानीयन्तत्तुप्रतीतिपर्यवसानादेवनिवर्त्तते। भवतिचाभिधानको

* अस्मादृशाअपिकवयः कवयो हरिवृद्धशालप्रमुखा अपि। मण्डूकम
र्कटाअपिभवन्ति हरिसर्पसिंहाअपि ॥ ९ ॥

र्कटसर्प्पसिंहेष्वप्रसिद्धत्वाद्गूढस्यापिहरिशब्दस्यस्व यंव्याख्यातत्वाद्गुणत्वम् ॥१०॥ नेयार्थंयत्स्वसङ्केत क्लृप्तवाच्यन्तदीरितम् ॥ प्रहेलिकादिषुप्राज्ञैस्तद्गुणत्वेनगण्यते ॥ यथा॥ मोरुकलावेजवहइतहणामह सरिणाउ । उस्सीसप्पाअन्तिगउअणुणन्तिहिजाणुणाउ। अत्र मयूरबर्हकचन्द्रकसङ्केतेन कल्पितस्य चन्द्रनाम्नोनेयार्थत्वेपिप्रहेलिकत्वाद्गुणत्वम्॥११॥

षड्वव्याख्यानेझटितिप्रत्ययः।अस्मादृशाअपिमन्दप्रतिभानाकवयःक विशब्दवाच्याःहरिवृद्धशालिप्रमुखाश्च लोकोत्तरप्रतिभाशालिनस्तदव यवतांविख्यातेचाविख्यातेचशब्दाःसाधारणाभवन्तितद्यथाहरिशब्दए वेतिव्याख्यानम्। ततोदोषत्वाभावःप्रतिवस्तुलक्षणालङ्कारपर्यवसायि तयाचप्रकृतार्थानुगुणत्वेनगुणत्वलाभस्तदेतद्व्याचष्टे ॥ स्वयंव्याख्यात त्वाद्दोषाभावोगुणत्वम्पुनराभिप्रायिकात्प्रकृतानुगुणभावादितिबोद्ध व्यम् ॥ १० ॥ नेयार्थमिति । अत्रापिपूर्ववदेववासना । आकीर्णाम न्त्रणादौविदग्धानांलक्षणादयःप्रहेलिकाविशेषानुन्मीलयन्तउपयुज्य न्ते। तथाहि। मयूरःकलापेनवहतितस्यनामस्तत्सदृशनामा । उच्ची र्षात्पादान्तङ्कतोनुनक्यंयथानौका। जिअनाउइतिपाठे जितनौकइति सएवार्थोमयूरोबर्हभारेचन्द्रकंवहति। अनेनसङ्केतेनचन्द्रनामलभ्यते संविष्टस्यशिरोदेशउच्चीर्षंचरणदेशःपादान्तः । उच्चीर्षेणप्राचीदिग्ल क्ष्यते । प्राकिशराःशयीतेतिवचनादर्थात्पादान्तेनप्रतीची ततश्च प्रा च्याःप्रतीचीमर्द्धचन्द्रोगतइतिप्रातःकालोद्भेदोवाक्यार्थः । अणुणेन्ति इति । अजिणणाउ इति पाठे सुभगमानिनङ्कान्तमनुनयन्त्या मया ज्ञातइति खण्डितकामिनीखेदोक्तिः । नचैतासां लक्षणानामस्तिकि ञ्चित्प्रयोजनमितिनेयार्थत्वप्रसक्तौ प्रहेलिकाभावएवसमाधानहेतुः ननुचोच्चीर्षपादान्तपदयोरस्तुमयूरकलापइत्यादौतुकथम् । यमिति हिसर्वनामाभिमतमेवतावदुपस्थापयतिबर्हंबहूनाम्बहुलेकथमेकस्यप्र तीतिरिति । अभिधानेपिकदाचित्क्लिष्टस्यविशेषगुणःस्यात् । नात्रने

यदनिश्चयकृत्प्रोक्तंसन्दिग्धन्तद्गुणीभवेत् ॥ भवेद्वि
शेषावगमोयदिप्रकरणादिभिः ॥ यथा। महीभृतः पु
त्रवतोपिदृष्टिस्तस्मिन्नपत्येनजगामतल्पिम्,,संशार्ङ्ग
चक्रासिगदाब्जपाणिर्मेघच्छविःपातुजगन्तिशौरिः,
अत्रतस्मिन्नपत्येइत्यनिश्चितस्याप्यपत्यविशेषस्यस
न्दिग्धेगौर्यामितिप्रकरणेनगम्यते। मेघच्छविरित्य
स्यचनवश्यामादिपदानुपादानेपिशौरिसम्बद्धत्वा
न्नवमेघच्छविर्मेघश्यामच्छविरितिवाविशेषोनि

यार्थताकिन्तुतेनसङ्केतेनकल्पितस्यचन्द्रनाम्नइति । तस्यनाम्नःसदृश
नामेत्यनेनमुख्यवृत्त्यैवविवक्षितसदृशलाभादिति । अत्रेदंवक्तव्यम् ।
तस्यनाम्नइत्यनेनचन्द्रकपदमुपस्थापितन्नचतेनसहास्तिचन्द्रपदस्यसा
दृश्यमिति तत्र लक्षणाश्रयणीया तदिदमुक्तञ्चन्द्रसङ्केतेनकल्पित
स्यचन्द्रनाम्न इति । उपलक्षणतयाच एकदेशव्याख्यानम् । ॥ ११ ॥
यदिति । संशयकजातीयस्य सन्देहजनकत्वन्नामदूषकताबीजम् ।
तद्यदिकुतश्चिद्विशेषाद्विवक्षितप्रतीतिरप्रत्यूहमुपपद्यतेतदाभवत्येव
दोषाभावः । विशेषावगमोविशेषदर्शनन्तस्यैवसंशयविरोधित्वात् ।
महीभृतइत्यादावपत्यशब्दोयद्यपिगौरीशब्दोपितदितरदत्तपदइति
संशयकजातीयोभवति तथापितच्छब्दोपस्थापितएवविवक्षितविशे
षेपर्यवस्यन्नपजहातिदोषत्वम् । तच्छब्दएवकथन्तमर्थमुपनयतीत्यत्र
तुप्रकरणमेवजागर्दवस्यमस्ति।मेघच्छविरित्यत्रतुयद्यपिमेघपदंश्यामा
श्यामदत्तपदतयासंशयकजातीयन्तथापिप्रसिद्धपदनीलवर्णार्थगौरी
पदसमभिव्याहाराच्छब्दान्तरसन्निधिरपिविशेषेनियमयतितद्वाछविप
देवाविशेषेपर्यवस्यति । अत्रप्रकरणादीनांविशेषस्मृतिहेतुत्वात् । अ
तएवसूत्रेबहुवनादिपदानुपादानुपात्तास्तदेतदभिसन्धायव्याचष्टे । अ
त्रेत्यादि। एवन्नवमेघच्छविरितिचोक्तेयथानियमेनार्थप्रतीतिरप्रत्यूहा
भवति । यथामेघच्छविरित्युक्तइति । अतएवकविसमयप्रसिद्धविशेषा
वगमसामर्थ्यसम्पादनेनगुणत्वमिति । कथम्पुनरिदंक्लिष्टस्यवैशेषिक

श्रीयतेइत्यस्यापिगुणत्वम् ॥ १२ ॥ यत्तद्विरुद्धमित्युक्तंविरीतप्रकल्पनम् ॥ तथाभूताभिधानेनगुणत्वम्प्रतिपद्यते॥ यथा। अभिधायतदातदप्रियंशिशुपालोनुशयम्परङ्गतः । भवतोभिमनाःसमीहतेसरुषःकर्तुमुपेत्यमाननाम् । अत्रविपरीतार्थकल्पनंविरुद्धत्वेपिसन्ध्यर्थविग्रहार्थयोःस्फुटभिन्नार्थत्वेनाभिधानाद्गुणत्वम्॥१३॥ अप्रयोजकमित्युक्तमविशेषविधायकम्॥स्वरूपमात्रेत्रोक्तव्येतस्यापिगुणतेष्यते॥

त्रभवति कोवाक्यभूतेनभवति । किन्तुसंशायकत्वमापादयतःप्रतिभासोप्युक्तयुक्त्यानिवर्त्ततइत्यभिमतन्नचैवंरूपताक्लिष्टवैशेषिकेसम्भवति। एकस्यैवचित्रपदस्यसंशयशक्तिरितिनवाक्यार्थगामिता ॥ १२ ॥ यत्तदिति॥ एवंवस्तुप्रकृतमभिसन्धायवाक्यरचनेतदुपमर्दकवस्त्वन्तरप्रवेशेविरोधः । यत्रद्वेअपिवस्तुनीप्रकृतेवस्त्वन्तरमेववाप्रकृतन्तद्यथोक्तरूपाभावेकथन्दोषः । तथाहि । अभिधायेत्यादौदूतवाक्येसन्धिविग्रहयोर्मिथोविरोधिनोरपिविवक्षितंसदोषः।सरुषः सक्रोधस्यतवमाननाम्पूजांशिशुपालइच्छतिअनुशयः पश्चात्तापोऽभिमुखस्य सतयेतिसन्धिपक्षेविग्रहपक्षेतुअनुशयःक्रोधोभवतःसकाशादभिभूयशून्यंयभोयस्येति नित्यसापेक्षत्वात्समासःसरुषोमाननाउपयोगस्तदिह निसृष्टार्थस्योभयोपन्यासोयद्रोचतेतद्विधीयतामित्यभिसन्धायरचितइतिगुणत्वमित्युभयविवक्षापक्षेव्याख्यानम् । यदातुशासनहरोदूतस्तदोद्यतेद्यपिशस्त्रेषुयथोक्तवक्तारोदूताभवन्तीतिन्यायेनविग्रहार्थमेवाभिमतःविपक्षस्यापिप्ररोचनादूतकर्तव्येतिमुखेसन्धिःपर्यायभूतोयुक्तएव। तदिदंव्याख्यानेनस्फुटयति। अत्रेति।सन्धिरूपोर्थःसन्ध्यर्थःविग्रहरूपोर्थोर्विग्रहार्थयोरभिधानेनस्फुटएवभिन्नोर्थःप्रेयोजनम्यद्यद्वेपि यत्प्रयोजनमुक्तन्तदभिप्रायेणैतद्व्याख्यानम् ॥ १३ ॥ अप्रयोजकमिति । तदेवकविभिरुपादीयतइतियदभिप्रेतसन्धिमाधत्ते । यत्रवाक्यार्थप्रविष्टसपिनतथाभावमासादयतितदप्रयोजकमित्युक्तम् । तस्ययदिविशेष्यस्यरूपाभि

यथा। तेचाकाशमसिश्याममुत्प्लुत्यपरमर्षयः,। सा ग्रंवर्षसहस्रंसतपस्तेपेमहामनाः। अत्रासिश्याममि त्याकाशम्प्रति,साग्रमित्यनेनचवर्षसहस्रम्प्रतिविशे षानभिधानेपिदूरोत्पतनचिरतरतपश्चरणयोरुपयो गविवक्षायांगुणत्वम् ॥१४॥ यदव्युत्पत्तिमद्दृश्यमि तिपूर्वन्तिरूपितम् ॥महाकविनिबद्धंसत्तदप्यत्रगुणी भवेत् ॥ यथा। खण्डेषूद्दण्डपिण्डीतगरतरलनाःप्रा पिरेयेनवेलामालम्ब्योत्तालतल्लस्फुटितपुटकिनीब न्धबन्धुरोगन्धवाहाः,। पातालप्रतिमल्लगल्लविवरप्रक्षि

धानेपर्यवसानेनप्रयोगो न तर्हिदोषः । तथाहि । आकाशमित्यादौ नासिश्यामतारूपंविशेषमाकाशेकाञ्चिदपिविशेषमात्रामुन्मुद्रयतिआ काशस्यसर्वदातद्रूपानपायात् । एवमसमग्रस्यसहस्रत्वाभावात्साग्र मित्यपिनविशेषाधायकम् । आकाशसहस्रयोस्तुयदेवरूपमावेदनीय मित्यत्रैतावन्मात्राभिप्रायेणनास्तिदूषणन्तथापिनान्तरीयकयोरभिधा नेकिम्प्रयोजनंयेनानयोर्गुणभावसम्पत्तिरित्यतआह । दूरेइति । अति दूरेश्यामत्वमधिकम्प्रतिभाति । क्षणमात्रमपिनविरतिरासीदितिसा ग्रपदाभिप्रायोतएवनात्रपौनरुक्त्यम् । तर्हिवाक्यार्थेविशेषाधायक त्वमेवानयोरितिकथन्दूषणत्वसम्भावना । इत्थंयस्मिन्नुपादीयमा नेपिनाभिमतन्यूनतातत्पदमप्रयोजकम् । अस्तिचात्रद्वयोरपितज्जा तीयतायान्दोषत्वप्रसङ्गः । सप्रकृतोपयोगविवक्षायामेवनिवर्त्तते । सर्वथाप्रकृतानुपयोगेदूषणत्वानपायिताऽस्तिचात्रोचितएवोपयोगो योविषक्षितुमर्हतीत्याह । विवक्षायामिति ॥ १४ ॥ यदिति । सन्दर्भ च्छायावैषम्यमत्रकष्टताबीजमितिपूर्वमुक्तन्तत्रयदिसमानच्छायशब्दम ध्यनिवेशनेनप्रतिक्षिप्यतेतदाकथन्दोषः । तथाभूतानामेवपदानांस न्दर्भनिर्वाहकतयामहाकविनिबद्धमितिअतएवशब्दगमकतयागुणत्व लाभः । उद्दण्डत्वेनपिण्डीतगराणाङ्कठोरता । तादृशानामपितरलने नप्रौढिः । उत्तालेत्याद्यनुप्रासवत्प्रौढपदसजातीयमेवतल्लपदमेवङ्ग

प्रसन्नार्णवम्,,किरन्तःकावेरीलडहलरीशीकरकणम्। अत्रतल्लगल्ललडहलहरीप्रभृतीनामव्युत्पत्तिमत्वेनदेश्यत्वेपिमहाकविभिरङ्गीकृतत्वाद्गुणत्वम् ॥ १५ ॥ ग्राम्यंघृणावदश्लीलामङ्गलार्थंयदीरितम् ॥ तत्संवीतेषुगुप्तेषुलक्षितेषुनदुष्यति ॥ तत्रसंवीतंयथा ॥ तस्मैहिमाद्रेःप्रयतान्तनूजांयतात्मनेयोजयितुंयतस्व। योषित्सुतद्वीर्यनिषेकभूमिःसैवक्षमेत्यात्मभुवोपदिष्टम् । अत्रतद्वीर्यनिषेकभूमिरित्यश्लीलस्यापिसंवीतत्वाद्गुणत्वम् । यदाह । संवीतस्यहिलोकेषुनदोषान्वेषणक्षमम् । शिवलिङ्गस्यसंस्थानेकस्यासभ्यत्व वासना ॥ १६ ॥ गुप्तेयथा । सुदुस्त्यजायद्यपिजन्म

ल्लेत्यादौवोढव्यन्तदिदमाह । अत्रतल्लगल्लेत्यादि ॥ १५ ॥ ग्राम्यमिति । अत्रकेचिद्यथासङ्ख्यंव्याचक्षते । घृणावदादीनांत्रयाणांक्रमेण संख्यानगोपनलक्षणानिदोषत्वाभावबीजानीतितदसत् । घृणावदर्थादिमात्रएवाग्रेप्रतिसम्भेदत्रिकमुपादायसंख्यानादित्रिकस्योपदर्शनात् । एतादृशयथासङ्ख्यसूचनायैवलक्षणातिक्रमेणघृणावतःप्रथममुपादानम् । तस्मात्संख्यानंशिवसंख्यानंलोकानुमतिः।किञ्चित्यदन्दुष्टजातीयमपिलोकेनोपादानात्तादृप्यज्जहात्येव । प्रायेणलोकानुसारिकाव्यदर्शनम्भवत्यतःप्रतिस्वम्भेदत्रितयसम्बन्धादुपपन्नंयथासङ्ख्यंस्यादित्यभिधायपूर्वक्रमेणोदाहरति । अत्रेति । एतेनसंवीतेद्वित्त्यादिकम्बहुवचनंव्याख्यातम् । यथाशिवलिङ्गस्यसंस्थानइत्यत्र । यद्यपिमुख्यविधैवशिवलिङ्गपदमश्लीलएवार्थेतथाप्यविगानेनानादिप्रयोगयोगित्वान्नव्रीडादानङ्गमन्तथेहापि। तद्वीर्येति ॥ शिवलिङ्गेत्यत्रभगवत्सम्बन्धःप्रयोजकइतितुतुल्यमत्रापीत्याह । तदिति ॥ अत्रहिजगदन्तर्यामिणोभगवतस्तद्विरोधितयाप्रसिद्धिरूपजीव्यातदुपजीवनेव्रीडादायिनीप्रतीतिरनुत्थायिन्येव । अत्रैवाचार्यमतंलिखति । संवीतस्यहीति ॥ कस्यासभ्यत्वेनेति॥पावनासकललोकसाधारणंज्ञानम् ॥१६॥यस्यपदस्य

भूमिर्गजैरसम्बाधमयाम्बभूवे । सतेनुनेयःसुभगे
भिमानीभगिन्ययन्नःप्रथमोभिसन्धिः । अत्रजन्म
भूमिसम्बाधसुभगभगिनीशब्दानामश्लीलार्थान्तर
त्वेपिप्रथमार्थप्रभावभावनागुप्तत्वाद्गुणत्वम् । य
दाहावस्तुमाहात्म्यगुप्तस्यपदार्थस्यविभावनात् । भ
गिनीभगवत्यादिनासभ्यत्वेनभाव्यते ॥ १७ ॥ ल
क्षितंयथा । ब्रह्माण्डकारणंयोप्सुनिदधेबीजमात्म
नः । उपस्थानङ्करोम्येषतस्मैशेषाहिशायिने । अ
त्रब्रह्माण्डोपस्थानशब्दयोरसभ्यस्मृतिहेतुत्वेप्यन्यत्र
लक्षितत्वाद्गुणत्वम् ॥ एवमशस्तादीनामपिगुण
त्वंयथा । भद्रेमारिप्रशस्तंवदसदसिमुदानृत्यकृत्येमु
हूर्तेमृत्योरत्नैश्चतुष्कंविरचयरचयारात्रिकङ्कालरात्रे ।

व्युत्पत्तिलभ्यमर्थान्तरंग्राम्यं यस्यवासमभिव्याहारलभ्यन्तत्रगोपनंस
माधानबीजम् । तदुभयम्भवतिरूढेर्वाबलवत्त्वञ्जलधरादिष्विवतथा
तात्पर्योन्नयनप्रतिबन्धेनविपरीतार्थतात्पर्योन्नयनपर्यवसानंवा । य
थोदाहरिष्यमाणेतथाचप्रतीतेरप्रत्यूहेदूषणताबीजाभावस्तत्रप्रथमक
क्षापक्षीकरणेनाद्यमुदाहरति ॥ रूढ्युपस्थापितःप्राथमिकोर्थस्तस्यभा
वोझटितिवाक्यार्थज्ञानन्तस्यभावनावासना तयागोपनञ्चमत्कारार्पण
नतिरोधानममुमेवार्थमाचार्यमतेनस्वहस्तयति । वस्तुमाहात्म्येति ।
अविभावनादिति ॥ विरुद्धंव्रीडादायितयाभावनन्तस्याभावात् । तेनक्व
चिद्योगोपादानेपितयाभावसम्पत्तौनदोषः । एतदेवोदाहरणेनस्फुट
यति । भगिनीति । एतेनभगवतीतिपूर्वानुपात्तमुदाहरणंव्याख्यात
म् । द्वितीयगोपनमशस्तार्थान्तरेव्यक्तीभविष्यतीति ॥ १७ ॥ यस्यपदस्यैकदे
शोग्राम्यानुगामीतस्यस्मृतिहेतुतातत्रकुत्रचिदुक्तिवैचित्र्यादेकदेशोझ
टितिस्मारकःक्वचित्तथैवसमुदायशक्त्याविपरीतार्थोपस्थापनाज्झटिति
स्वार्थंसमुदायएवप्रतिपादयति । आद्योदूषणम् । द्वितीयस्तुवैजात्या

चामुण्डेमुण्डमालामुपनयविनयस्त्रायतामम्भैरवीर्ष्या
मेवन्देवेभवानीवहतिपरिजनव्याहृतिस्त्रायतांवः।अ
त्रमारीकृत्यादीनामपिपदानांसमस्तमङ्गलायतनस्य
भगवतोविश्वेश्वरस्यसंबन्धेनोक्तत्वाद्गुणत्वम्॥१९॥
यथावा। सत्पक्षामधुरगिरःप्रसाधिताशामदोद्धतार
म्भाः। निपतन्तिधार्तराष्ट्राःकालवशान्मेदिनीपृष्ठे।
अत्रधार्तराष्ट्राःकालवशान्मेदिनीपृष्ठेनिपतन्तीत्य
स्यामङ्गलार्थत्वेपिहंसानहंधार्तराष्ट्रानितिव्यपदिशा
मीतिवक्ष्यमाणवाक्यान्तरगुप्तत्वाद्गुणत्वम् ॥२०॥
यथाच। कोभिप्रेतःसुसंस्थानस्तस्याइतिननिश्चयः।
आशापिशाचिकैषातुकुमारीमावरीष्यति। अत्राभि
प्रेतासुसंस्थानमाशापिशाचीकुमारीतिपदानामश

भावाद्गुणः। तदेवंलक्षणंयत्राद्यैर्गाम्यत्वन्ततोन्यत्रैवबहुधालक्षणात्तदि
दमुक्तमन्यत्रलक्षितत्वादिति॥१८॥ पुनरपरेणप्रकारेणसंव्यानम्भवतीत्य
प्रशस्तेस्फोरयति।परमेश्वरस्यमङ्गलायतनत्वन्तत्सम्बन्धिमात्रस्यैवमङ्ग
लीभवननियमेनशास्त्रेतिहासादौप्रसिद्धत्वात्। तदुक्तम्।तथापिस्मर्तृ
णांवरदपरमम्मङ्गलमसीति। अयञ्चप्रकारोऽप्रशस्तार्थएवभवति। मा
र्योदयोमातृविशेषाः। आरात्रिकन्नीराजनदीपव्यासङ्गपात्रम्। परिज
नपदंसम्बन्धम्पुष्णाति॥१९॥द्वितीयङ्गोपनप्रकारमशस्तार्थान्तरंव्यजञ्ज
यति। यथावेति। पक्षःपतत्रम्परिकरश्च। आशादिक्प्रत्याशाच। म
दः क्षीबतादर्पश्च। निपातआगमनंशस्त्रादिहतानाम्मेदिनीसङ्गतिश्च।
रङ्गमङ्गलान्तःस्वस्त्ययनप्रवृत्तस्यसूत्रधारस्यमङ्गलार्थाधिकारवस्तुप्रस्ता
वनन्तावद्वृद्धिपूर्वकमत्रनसम्भवतिहंसानहमित्यादिनातात्पर्यस्यनिय
मितत्वात्। स्वशक्त्यातुपदार्थान्तरमाभासयन्तिपदानिदोषतयानप्र
तिभासते। तत्रवीप्यङ्गविशेषोपक्षेपस्यामुखशरीरत्वादौचित्यनिवेश
एवस्फुटङ्कारणमित्याशयोबोद्धव्यः। औचित्यविरोधेनसार्वत्रिकइ

स्तस्मृतिहेतूनामपिलोकैरन्य त्रलक्षितत्वाद्गुणत्व
म् ॥२१॥ एवंघृणावदर्थादीनामपिगुणत्वन्तत्रघृणा
वतीयथा। पद्मान्यर्कांशुनिष्ठ्यूताःपीत्वापावकवि
प्लुषः। भूयोवमन्तीवमुखैरुद्गीर्णारुणरेणुभिः।अत्र।
निष्ठ्यूतोद्गीर्णवान्तादिगौणवृत्तिव्यपाश्रयम्। अ
तिसुन्दरमन्यत्रग्राम्यकक्षांविगाहते ॥२२॥ घृणाव
दर्थान्तरस्ययथा। कामिनीगण्डनिःस्यन्दिबिन्दुरि
न्दुर्मतिर्मम।अन्यथाकथमेतस्यजगद्द्योतनीद्युतिः।
अत्ररागातिशयहेतुभूतयोः कामिनीकपोलचन्द्रम
सोःस्वरूपभावनामाहात्म्येनार्थान्तरभावनागुप्तेपि
गण्डनिःस्यन्दिबिन्दुरित्यस्यघृणावदर्थान्तरस्यापि
नदोषः॥२३॥घृणावत्स्मृतिहेतुर्यथा। विपूयरसनाव
न्तःपलाशाषाढधारिणः। ब्रह्मवर्चस्विनोयान्तिद्विज
पौगण्डकाइमे। अत्रविपूयपलाशपौगण्डकशब्दानां
घृणावत्स्मृतिहेतुत्वेप्यत्रलक्षितत्वाददोषत्वम्॥२४

तिनातिप्रसङ्गः ॥२०॥कोभिप्रेतइत्यादौपूर्ववदेववासना ॥२१॥ अथाप
रंसंव्यानप्रकारङ्घृणावदर्थैकथयति।ययेति॥२२॥गुणवृत्तिव्यापाराश्रयेण
वान्तरादिपदेषुप्रथमतएवान्य क्रियादिधर्माणामन्यत्रारोपेसमाधिप्रा
दुर्भावादनुत्थानन्दोषाभावत्वद्वारन्ततश्च मुख्यएवस्थानेजुगुप्सादायि
त्वम्पूर्वाचार्यश्लोकेनैवव्याचष्टे । अत्रेत्यादि । गुणवृत्तत्वमभिप्रेत्या
तिशयसम्पत्तौप्रकृतौचित्यात्कपोलस्यैवप्रतिभासस्तदिदमुक्तंरागाति
शयहेतुभूतयोरिति । तथाचजगन्नयनानन्दभूतस्यनिःशेषिताशेषत
मसश्चन्द्रमसोयदिदमभिप्रेतकामिनीकपोललावण्यबिन्दुमात्रतयाभा
नन्तदुचितमेवेति॥२३॥प्राच्यानामेववासनामभिसन्धायस्मृतिहेतुमुदा
हरति।ययेति॥आषाढोदण्डः।ब्रह्मवर्चसिनइति।ब्रह्महस्तिन्यांवर्चसइ

एवमन्यदपि द्रष्टव्यम्॥ अत्रच। किञ्चिदाश्रयसम्बन्धाद्भक्ते शोभामसाध्वपि। कान्ताविलोचनन्यस्तमलीमसमिवाञ्जनम्। यथा। अन्त्रप्रोतबृहत्कपालनलकङ्कूरक्कणत्कङ्कणप्रायप्रेङ्खितभूरिभूषणरवैराघोषयत्यम्बरम्। पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्बालोलस्तनभारभैरववपुर्दर्पोद्धतंधावति। अत्राश्रयस्यबीभत्सरसोचितत्वाददोषः। सन्निवेशवशात्किञ्चिद्विरुद्धमपिशोभते। नीलंपलाशमाबद्धमन्तरालेस्त्रजामिव। तद्यथा। अन्त्रैःकल्पितमङ्गलप्रतिसरास्त्रीहस्तरक्तोत्पलव्यक्तोत्तंसभृतःपिनह्यसहसाहृत्पुण्डरीकस्रजः। एताःशोणितपङ्ककुङ्कुमजुषःस

तिसमासान्तस्ततोमत्वर्थीयइनिःपौगण्डीवालः ॥२४॥ एवमन्यप्रकारमपिसंख्यानादिकंस्वयमुन्नेयमित्याह। एवमिति। अनित्योयन्दोषः। तेनयत्रदोषतानास्तितत्रविषयेरसप्रकाशसामग्र्यामन्तर्भावात्कथन्नगुणत्वमन्तर्भावश्चद्विधा प्रयोगविषयौचित्येनवावागनुभावौचित्येनवा। तत्रप्रथमन्दर्शयति। किञ्चिदिति। यथाञ्जनस्यनाञ्जनवल्यादिसङ्गतत्वेनशतशोभाश्यमानस्याप्युद्दीपनविभावना। भवतितुकान्ताविलोचनचुम्बितयानुसन्धीयमानस्य। तथापदस्यापिविषयेऽतद्विषयेचप्रयुज्यमानस्यतदेतद्व्याचष्टे। अत्राशयस्येति। द्वितीयमन्तर्भावप्रकारं व्युत्पादयति। सन्निवेशवशादिति। सन्निवेशोवागनुभावः। औचित्याकृष्टपदघटनातद्वशत्वन्तदाकृष्टत्वमतएवविरोधिसङ्गततयाविजातीययोरप्यौचितीवशेनकान्तिविशेषोन्मीलकत्वात् पत्रपुष्पव्यतिकरजमालासादृश्यन्दर्शयति। नीलमिति। अन्त्रैरित्यादौप्रत्युत्पन्नप्रदोषोन्मत्तप्रेताङ्गनावलोकस्यमाधवस्यालम्बनोद्दीपनविभावादिप्रकर्षबीभत्सरसोत्सेकस्तावदुपपन्नोयस्त्वयमकस्मादेवमङ्गलादिपदानां शृङ्गारानुयायिनामिहनिवेशःसकथन्दोषभावादपनेतव्यः कथंवागुणत्व

म्भूयकान्तैःपिबन्त्यस्थिस्नेहसुराःकपालचषकैःप्री
ताःपिशाचाङ्गानाः। अत्रशृङ्गारिणोहिजगदपिशृङ्गा
रमयमपश्यन्तीतिबीभत्सरसेपिमार्द्दवेनान्त्रादिप
दानामन्तरेषुनिवेशितानाममङ्गलप्रतिसरादिपदाना
मदोषः। अश्लीलादेरमीभेदाभिद्यन्तेयत्त्रिधात्रिधा।
भवन्तिनवतेनैतेपूर्वोक्तादशपञ्चच ॥ चतुर्विंशति
रित्येषा प्रोक्ता पदसमाश्रया । समासात्पूर्वदिष्टा
नान्दोषाणां गुणक्रूप्तये ॥ इत्येतत्पददोषाणामदो
षत्वमुदीरितम् । इदानीवाक्यदोषाणांगुणत्वमभि
धीयते ॥ तत्रशब्दविहीनस्यविवक्षावशतःक्वचित्।
निसर्गसुन्दरत्वेनगुणत्वम्परिकल्प्यते ॥ यथा । आ

मासादधितञ्चइत्यतोहेतुगर्भंव्याचष्टे । अत्रशृङ्गारिणइति । शृङ्गारवास
नानिविष्टःशृङ्गारीतयाचपूर्वंबीभत्सरसान्वयेपिप्रकृतशृङ्गारभङ्गीमनू
दित्येतदर्थमेवकविना ममहीत्यादिनाप्रतिज्ञायलीनेवेत्यादिवासमा
दृढत्वमुपपादितम्।अतएवप्रतिपदंरूपकमाविष्टाभिप्रायमेवंशृङ्गारम
यंशृङ्गाराङ्गतयारसतापन्नम्। उपपद्यन्तेयतश्चित्तस्यसादृश्यमात्रेणतद्रू
पतानुसन्धानम्। ततश्चकथन्नोद्दीपनताचवस्तुसत्त्वस्यानुपयोगित्वात्।
अतएवसूत्रितस्यबीभत्सस्य प्रकृतेनबाधात्प्रकृतार्थानुपोषइति।ननुक
थमुद्देशेचतुर्विंशतिर्धेत्युक्तं दोषाहिपूर्वंषोडशैवविभक्ताइत्यतआह।श्र
श्लीलादेरिति । निगदव्याख्यातम् । चतुर्विंशतिरित्येषेतिआदशब्दः सं
ख्यासङ्ख्येयेवर्त्तते ततःसङ्ख्यानेसङ्ख्येयेचेत्यभिधानात् केवलसङ्
ख्यानवचनत्वेनगवांविंशतिरितिवत्पदसमाश्रयेत्युपपन्नम् । क्रमप्राप्त
वाक्यदोषगुणीभावव्युत्पादनमवतारयति।इदानीमिति। यस्यवस्तुनो
नानारूपाणिविजातीयरूपाणितत्रतद्रूपविवक्षावैचित्र्याच्छब्दवैचित्र्यं
सङ्गच्छतइतिदोषत्वाभावः।एवंरूपतागमितवतीत्यादौकदापिनास्ती
तिदोषरूपतैषा।क्वचित्पुनरस्तिरूपान्तरमित्याह।क्वचिदिति।भवत्वेवङ्गु
णत्वन्तुकथमित्यतआह।निसर्गेति।नियतरूपविवक्षाहिमहाकवीनांन

क्षिपन्त्यरविन्दानिमुग्धेतवमुखश्रियम् । कोशद
ण्डसमग्राणाङ्किमेषाङ्गुलुदुष्करम् । अत्रनलोकाव्य
यनिष्ठाखलर्थतृनामितिकर्तृकर्मणोःषष्ठीप्रतिषेधेकि
मेतेषान्दुष्करमित्यपभाषणेपिसम्बन्धमात्रतोगुण
त्वम् । यदाह । इदंहिशास्त्रमाहात्म्यदर्शनालसचे
तसाम् । अपभाषणवद्वातिनचसौभाग्यमुञ्झति ।
॥ १ ॥ यत्नःसम्बधविज्ञानहेतुःकोपिकृतोयदि ।
क्रमलङ्घनमप्याहुर्नदोषःसूरयोयथा । बन्धुत्यागा

लावण्यमनुसन्यायंभवितुमर्हतितथाहिआक्षिपन्तीत्यादौषष्ठान्दुष्कर
मित्यत्रखलर्थयोगेनलोकाव्ययनिष्ठाखलर्थतृनामित्यनेनषष्ठीप्रतिषेधा
देषामिति कथंषष्ठीतिदुष्टजातीयतामादायशेषरूपविशेषविवक्षासमा
धानहेतुः । अस्तिहिषष्ठ्यर्थस्यसम्बन्धस्यद्वैरूप्यंसम्बन्धसामान्यंविशे
षश्चजन्यजनकभावादिः । तत्रसम्बन्धविशेषविहितषष्ठीसुपादायनलो
केत्यादिनानिषेधःसंबन्धसामान्यरूपमुपादायषष्ठीकेनवार्यते । अयमे
वसम्बन्धःशेषइत्युच्यते । एवन्तावन्नदोषत्वम् । यथाकोषसमग्राणां
राज्ञांविपक्षश्रीहरणमुपदिश्ययत्किमपिसम्बन्धिमात्रमेवनदुष्करन्तथा
षट्त्वानामितिसमर्थयामहे । कथमन्यथा दुरापत्वद्वदनश्रीहरणमिति
प्रकृतपोषलाभाद्गुणत्वमतिसुलभन्तदेतद्व्याचष्टे । अत्रेति । ननुसम्ब
न्धमात्रविवक्षायान्दोषतामाभूद्गुणत्वन्तुकथमित्ययोक्तमभिसन्धा
यपरमतंलिखति । इदंहीति । शास्त्रमाहात्म्यंविधिनिषेधयोःपरस्परा
सङ्कीर्णविषयत्वम् ॥१॥ यत्नइति । क्रमस्त्रंशेहियथाभिमतान्वयप्रतीति
प्रत्यूहोदूषणताबीजन्तद्यदिकुतश्चिद्विशेषादस्खलितैवप्रतीतिरुपजाय
तेतदाबीजाभावेनतथाभावोनिवर्त्ततएवसचविशेषःप्रतिपदमनुक्रमि
तुन्नशक्यतइतिकोपियत्नइतिसामान्येनप्रतिपादितम् । सोयंशब्द
क्रमलङ्घनापवादोर्थक्रमलङ्घनेत्वभिप्रायविशेषस्तथाहिबन्धुत्याग -
इत्यादौबन्धुत्यागतनुत्यागदेशत्यागात्क्रमेणोद्दिश्यतथैवानुदेशोप्यर्ह
तिनत्वादिमसुद्दिश्यततोऽन्त्यस्तोमध्यइतिउद्देशानुदेशलक्षणशास्त्र

स्तनुत्यागोदेशत्यागइतित्रिषु । आद्यन्तावायतक्लेशौमध्यमःक्षणिकज्वरः । आद्यन्तौमध्यमइतिसम्बन्धिनिज्ञानहेतोर्विधानान्नशाब्दक्रमलङ्घनदोषः । वक्तुश्चबन्धुत्यागदेशत्याग योस्तनुत्यागाद्भूरीयस्त्वेनाभिमतत्वादित्यर्थक्रमलङ्घनस्यापिगुणत्वम्॥२॥ विरूपसन्धियत्पूर्वंविसन्धिश्चनिरूपितम् । नचदुर्वचकेप्रायःप्रगृह्यादौचदुष्यति ॥ तत्रदुर्वचकेविरूपसन्धिर्यथा । नयन्तिवर्षास्वितिभर्गदुर्गयोःसुदुर्वचादुर्वचकप्रयुक्तः । अभेष्णगेड्जेखमपोग्रभोग्ररुग्ध्रु

क्रमन्नंशजातीयत्वेपिसम्बन्धज्ञानहेतुयत्नकरणादूषणत्वंव्यवस्थाप्यते । यत्नश्चायमेव यदादिपदैरुल्लेखस्तानिहितत्तत्स्थानविशेषगामिन एवप्रतीतिमुपजनयन्ति । अवश्यञ्चानेनक्रमेणात्रवक्तुमुचितन्तनुत्यागस्यविजातीयताविवक्षयापृथगेववक्तुमर्हत्वात् । एवञ्चानुपपत्तिर्लोकेबन्धुत्यागापेक्षयाशरीरत्यागस्यातिकृच्छ्रत्वेनप्रसिद्धिः । अतश्चमध्यमआयतक्लेशआद्यन्तौक्षणिकज्वरावितिवचनमुचितमितिआर्थक्रमभ्रंशःकथंनभवतितत्राह । वक्तुश्चेति । अभिमतमित्यनेनाभिप्रायविशेषोपवादहेतुर्यथारुचियथार्थित्वंयथाश्रुत्तिभिद्यते । आभासोऽर्थ एकस्मिन्ननुसंन्धानसाधित,, इतिन्यायादुपपन्नमैवैतदिति ॥ २ ॥ विरूपेति । विरूपोदुर्वाचकोविसन्धिर्विगतंसंहिताकार्यंदुर्वचकेकलाविशेषरूपतयानुमतेसंहिताकार्यनियमः । द्वितीयेकुत्रादूषणमित्याह प्रगृह्यादाविति । प्रगृह्यमीदूदेद्विवचनम्प्रगृह्यमित्यादिनायत्रप्रगृह्यसंज्ञाविहिताआदिग्रहणाद्विनापिप्रगृह्यसंज्ञायायत्रप्रकृतिभावविधानम् । यथोदाहरिष्यते । यत्रवावक्तुःखेदादिनाविच्छिद्यपाठेविरतिर्भवति । यथा । काएकशिरोरुहेति । तदेवन्दुर्वचकप्रगृह्यादीयथासंख्यं विरूपविसंन्धिविगतसन्धानयोरपवादकारणेइत्याह। अत्रेति । प्रयुज्यन्तइतिप्रयुक्तयोदुर्वचकाश्चताःप्रयुक्तयश्चेतिदुर्वचकप्रयुक्तयइतिकर्मधारयः ॥ सुदुर्वचाइति । अन्येनोच्चारयितुमशक्याः । स्वयमेवकविःप्रति

ङ्भ्रमब्रुगमुखिसध्र्यजोधनः । अत्रोत्तरार्धस्य विरूप सन्धित्वेपिदुर्वचत्वेनकलाविद्विरादृतत्वादुगुणत्व म् । यदाहुः । शुकस्त्रीबालमूर्खाणामुखसंस्कारसि द्धये । प्रहासायचगोष्ठीषुवाच्यादुर्वचकादयः । प्रगृ ह्यादौविगतसन्धिर्यथा । कमलेइवलोचनेइमेत्र्यनु बध्नातिविलासपद्धतिः । सइतोब्दऋतावृतप्रियोन ऋचस्त्वन्नयजूंषिऊहसे । अत्रविसन्धेःप्रगृह्यादि हेतुत्वादुगुणत्वम् । यदाह । नसंहितांविवक्षामीत्य सन्धानम्पदेषुयत् । तद्विसन्धीतिनिर्दिष्टन्तप्रगृह्या दिहेतुकम् ॥ ३ ॥ अनुकम्पाद्यतिशयोयदिकश्चि

क्षायउत्तरार्द्धेदुर्वचकान्याह । अभेडित्यादि ॥ हेअगेइन्द्रेपर्वतराजपुत्रि खमाकाशम भेड्भानान्नक्षत्राणामीडीश्वरश्चन्द्रः सोऽविद्यमानोयत्र-तिरोधानादसत्कल्पिताघन्द्रमसः केनपुनस्तिरोधानमित्याकाङ्क्षाया न्द्वितीयंविशेषणंअपोग्रेति । अपगतोग्रदीप्तिर्यउग्ररुचिरादित्यस्त दीयद्रोहकारिणोन्नपदवाच्यामेघायत्र । अप्सुरोहतीत्यब्रुट्पट्यन्त द्वन्मुखंयस्याइतिदेवीसम्बोधनम् । चेदीदृशन्तर्हिसध्र्यङ्सहचरोभ वास्माकमितिगौर्याउत्तरम् । कलारूपत्वेनविरूपसन्धानस्यगुणत्वमि त्याह । कलाविद्विरादृतत्वादिति । कमलेइवेत्यादावुदाहरणत्वान्नै कः श्लोकार्द्धः । पूर्वार्द्धेकमलेइत्यादित्रितयम्प्रगृह्यसंज्ञोदाहरणम् । उत्तरार्द्धेविनैवप्रगृह्यसंज्ञाम्प्रकृतिभावविधानंयत्रतत्त्रितयोदाहरणम् तथाहि अब्दऋतावितिनऋचइतिचऋत्यकइत्यनेनप्रकृतिभावः । यजूंषिऊहसइति । इकोसवर्णेशाकल्यस्यह्रस्वश्चेत्यनेन ॥ अपरमादि पदग्राह्यम्पूर्वमुदाहृतम् । अत्रापिसइतिबोद्धव्यम् । तदेतच्छास्त्रानु मतमपिघटनासौष्ठवेननिवेशनीयम् । नत्वन्यथाउक्तञ्चपूर्वमेवयत्प्र गृह्यादिहेतुकमपिनासकृत्प्रयोक्तव्यमिति ॥३॥ अनुकम्पेति । सम्भ्रमा दीयावद्बोधमित्यादिनापदद्विरुक्त्यादेरनुमतत्वान्नदोषत्वमभिप्रायव्य ञ्जननैयत्येनप्रकृतिपोषानुगुणतयागुणत्वम् । तथाहि । हन्यतइत्या

द्विवक्ष्यते। नदोषःनपुरुक्तेपिप्रत्युतेयमलङ्क्रिया।
हन्यतेसावरारोहास्मरेणाकाण्डवैरिणा । हन्यतेचा
रुसर्वाङ्गीहन्यतेमञ्जुभाषणी । हन्यतेहन्यतइतिश
ब्दपुनरुक्तञ्चारुसर्वाङ्गीवरारोहेत्यर्थपुनरुक्तन्तदुभ
यमपिअनुकम्पाद्यतिशयविवक्षायामदोषइतिगुण
त्वम् ॥ ४ ॥ पदानांव्युत्क्रमोयत्रक्रमेणव्युत्क्रमेणवा
तद्व्याकीर्णंविदुस्तस्यनदोषःक्वापितद्यथा । जुगुप्सत
स्मैनमदुष्टभावम्भवम्भवानक्षतसाधुवृत्तः। इतीवचा
चोनिगृहीतकण्ठैःप्राणैररुध्यन्तमहर्षिसूनोः । अ
त्रमास्मजुगुप्सतेतिवक्तव्येजुगुप्सतस्मैनमदुष्टभावमि
तिपदव्युत्क्रमस्यव्यस्तेपीच्छन्तिकेचिदितिलुङ्लङो

दौ हन्यतइति यद्यपि अधिधेयतात्पर्यमिति शब्दपुनरुक्तजातीयम्भ
वति । यद्यपि वरारोहेत्यभिधाय चारुसर्वाङ्गीत्यभिन्नाभिधेयता त्प
र्यम्पर्यायरूपत्वादर्थपुनरुक्तजातीयन्तथापि विरहवेदनादूनायामनु
कम्पातिशयादसकृदुपादानमहिरहिर्वुध्यस्वेति लोकानुसारात् । अ
नुकम्पाभयाद्यस्यहि तादृशीप दृरुक्तिरभिप्रायविशेषार्थनिष्पादि
तया गुणकक्षाधिरोहणक्षमेवेत्याशयवान्श्राचष्टे । तदुभयपीति ॥४॥
पदानामिति । एकस्मिन्वाक्येपदानामुचितसन्निवेशविपर्यासःक्रम
व्यंशःसद्विधाभवति । पूर्वापरभावनियतानान्तादृशक्रमप्रच्यावनेन
वा । यथाबहुतृणमित्यन्योर्थःतृणस्यद्वित्वन्यः । पूर्वापरनियमशून्या
नामितितादृगुच्चारणविपर्यासेनवा । यथाकपालमनुलिम्पतिदुकूलम्प
रिदधातीत्यत्रक्रमनियमोभिमतः । अनुलिम्पतिकपालम्परिदधाति
वस्त्रमित्यपिकृतेनतस्यैवार्थस्यलाभात् । यदातुकपालम्परिदधातिदु
कूलमनुलिम्पतीतिक्रियतेतदाभवतिसन्निधिविपर्यासस्तदेतद्व्याकीर्ण
सङ्कीर्णयोस्तुल्यन्तदिदमुक्तं क्रमेणव्युक्रमेणवासोत्तरेलङ्चेत्यनेनमा
शब्दादुत्तरंयत्रस्मशब्दप्रयोगस्तत्रलुङ्लङोर्विधानेपदक्रमनियमःकृत
स्तत्कथंस्मममेतिप्रयुक्तेसोर्थःप्रत्येतव्यइत्यतआह । व्यस्तइति ।

र्विशेषलक्षणाद्गुणत्वम् ॥५॥ पर्यायेणद्वयोर्यत्रवा क्यम्प्रश्नोत्तरादिषु । सङ्कीर्णन्तन्नदोषायवाकोवाक्य विदोविदुः । यथा । बालेनाथविमुञ्चमानिनिरुषं रोषान्मयाकिंकृतङ्किदोस्मासुनमेपराध्यतिभवान्सर्वं पराधामयि । तत्किंरोदिषिगद्गदेनवचसाकस्याग्र तोरुद्यतेनन्वेतन्ममकान्तवास्मिदयितानास्मीत्यतो

विशेषेणलक्ष्यतइतिविशेषलक्षणान्तस्यभावस्तत्वम् ॥ ५ ॥ पर्यायेणेति। यत्रवाक्यैकवाक्यतायामवान्तरवाक्येषुपरस्परपदार्थपूर्वेशेनयथाभिम तसंसर्गप्रतीतिःस्खलितभवतितत्रसंकरोदूषणंप्रतीतेरस्खलनेतुनदो षः।स्खलनञ्चानेकवक्तृकपर्यायप्रवृत्तवाक्यावयवसिश्रणेनभवतितदपि मिश्रणम्प्रश्नोत्तररूपमन्यादृशंवाभवतीत्याह । प्रश्नोत्तरादिद्विति॥विष यसप्तमीयम् ।वाक्येवाक्यंवाक्योवाक्यस्पृशोदरादित्वात्साधु।तत्रप्रश्नोत्त रादिरूपंवाक्योवाक्यमुदाहरति। बालेइति।अत्रबालेविमुञ्चमाम्प्रतिरु षमितिप्रथमप्रश्नवाक्यंनाथरोषान्मयाकिंकृतमितितादृशमेवोत्तरवा क्यम् । तत्रबालेइतिवाक्यप्रतीकानन्तरमेवनाथेतिवाक्यान्तरप्रतीक स्यनिर्देशःसङ्कीर्णजातीयतामाकारयितुमुद्यतःप्रश्नोत्तरप्रभावादपोद्य ते। सङ्कीर्णयोरपिवाक्ययोःपर्यायनिर्देशेभवत्येववाक्योवाक्यमितिचेन्न व्यतिकरस्याऽभिप्रायविशेषव्यञ्जकतयाचमत्कारकारित्वेनविजातीय त्वादतएवगुणत्वम्। तथाहि । बालेइतिपदम्परचित्तानभिज्ञायाः क्षुद्र सहचरीवचसिविश्वासभाजः सोपालम्भंसम्बोधनमाविष्करोति।एतदा कर्ण्यानन्तरमेवेर्ष्याकषायकामिनीवचनमुचितमितिनाथेतिसम्बोधनं साभिप्रायम्प्रभुरसिनपुनरस्मासुदत्ताशयोनवास्वाधीनतासौभाग्यभा गितिविवक्षितत्वात्।एवमुत्तरत्रस्वयमुन्नेयम्।उपलक्षणञ्चद्वयोरितिए कस्यापिवक्तुः प्रहेलिकादौतद्विद्यविषयेतदाभाषणस्योचितत्वात्।वि जातीयवाक्यद्वयसन्दंशपतितपदेकिमिदमनेनान्वीयतेऽनेनवेतिसन्दे हसङ्कीर्णतासंशयोपिसङ्करमध्यासीनस्वेतिगुरवः । अयमेतिपुत्रोरा ज्ञः पुरुषोपसार्यतामित्यत्रराजपदंसन्दंशपतितङ्किम्पूर्वेणाथपरेणान्वी

रुद्यते । अत्र सङ्कीर्णत्वेपि वाक्ये वाक्यत्वान्नदोषः ॥६॥ प्रकृतिस्थादिभेदेनग्राम्यादिभिरथापिवा । अ पदन्तस्यचानुज्ञाभाषाचित्रेविधीयते । यथा । हा तोजोज्जलदेउनैवमदनःसाक्षादयम्भूतलेतत्किन्दी सइसञ्चमाहतवपुःकामःकिलश्रूयते । एट्टूएकिञ्चले उभूतपतिनागौरीविवाहोत्सवेऐसेंसञ्चजिवोल्लहस्त कटकःकिन्दर्पणेनेक्ष्यते । अत्रग्राम्यःप्रष्टानगरमा गतोराजानंदृष्ट्वाग्राम्यैःप्रकृतिस्थैरेवापदैः प्राकृते नपृच्छति "हातोजोज्जलदेउइति,, नागरश्चतम

यतइतिसन्दिह्यतेराजगोत्रीरादौद्वयेनानुयोगोपदस्यनिश्चितइति ॥६॥ प्रकृतिस्थेति । विभिन्नेत्यादावपदलक्षणसूत्रेषणाभितिव्यतिकरण कत्वेननाभिप्रेतोऽपितुग्राम्यादित्रिकस्यवाप्रकृतिस्थादित्रिकस्यवेति विकल्पेनोपन्यासप्रयोजनमनुज्ञासम्पत्तिस्तेनदोषताभावगुणीभावौप्र तिपादितौ । विषयन्दर्शयति । भाषाचित्रइति । संस्कृतादिव्यतिकर स्यापदत्वेनाभिप्रेतत्वात् । संस्कृतादयो ग्राम्यादयःप्रकृतिस्थादयश्च भाषाशब्देनाभिमताः । यथाहिनानावर्णारव्यमालेख्यचित्रंयथावा भिन्नप्रकारतन्तुनिर्वातः पटश्चित्रपटस्तथानानाभाषाभिरारब्धङ्किञ्चि त्काव्यंचित्रमुच्यते । चित्रमाश्चर्यन्तत्कारिचचित्रम् । तेनरूपद्वयस म्पत्तौयुक्तिपोषःस्यादेवंयथौचित्याद्भटलानाभाषाव्यतिकरजमेकंसम्भव तीत्याशङ्कसंदेपात्सर्वंभाषासङ्करमेवोदाहरति । यथेति । सङ्करमौचि तीव्यव्याख्यानेनस्फुटयति । अत्रग्राम्यइति । ग्रामवासीकिञ्चिद्युत्प न्नश्च ।ग्राम्याश्चनगरवस्तुन्यद्भुतचमत्कारवन्तोजिज्ञासवश्चभवन्तीति जा तिः । तत्रराजानन्दृष्ट्वेति । अद्भुतवस्तुकथनेनचमत्कारः । पृच्छतीति । जिज्ञासावहुमानआदरश्चमत्कारेणैव ।यद्वा याःपृच्छतितेष्वेवबहुमानो धन्यास्तेयेनामगोत्रादिकमेतस्यजानन्तःसततमेनमवलोकयन्त्इत्याश यात् । प्रस्तुतग्राम्यप्रकृतेश्चास्यप्राकृतपदैरेवप्रश्नोयोग्यस्तदेतत्सर्व मादर्शयितुम्प्रश्नम्पृथक्कृत्यदर्शयति । हातोइत्यादि । हातोइतिमहा

नुजिघृक्षरुपनागरैःकोमलैर्वापदैःसवक्रोक्तिप्रत्याच

राष्ट्रभाषायांप्रश्नकाकुरयंसइत्यर्थे । सइतियोनामैतन्नगरनायकत्वेना स्मद्ग्रामेविबहुशोविख्यातकीर्त्तिरितिचमत्कारः । जोज्जलदेउइति । जिज्ञासासामान्यतश्चनगरसञ्चरिष्णुजनगोचरोयंप्रश्नः । अत्रसर्वाण्येव पदानिनातिहीनपात्रेग्राम्येप्रकृतिभवान्यपभ्रंशपदानि।देशीपदत्वेनस र्वेषाङ्ग्राम्यता।ह्रातोइत्यनेनस्वरकृतगौरवम्।जोज्जलदेउइत्येकसंयोग वर्णोपादितगौरवञ्चप्रकृतिस्थन्तदत्रप्राकृतग्राम्ययोरौचित्याल्लुप्तम्। प्र कृतिस्थेतुनौचित्यमुपयुज्यते ऽपितुसन्दर्भारम्भस्तेनप्रक्रान्तइतिविव क्षितम्।अधिकस्यप्रष्टव्यस्याभावादेतत्प्रश्नानन्तरमेवोत्तरावसरः। ततश्च नानौचित्यम्।प्रश्नोत्तरोपन्यासोहीति॥प्रकृत्यैवचनागरकाग्राम्यमतवि रोधिनोवक्रोक्तिरसिकाभवन्ति । यदितस्यग्राम्येजघन्यबुद्धिःकिमित्यु त्तरमेवदास्यतीत्यतउक्तमनुजिघृक्षुरिति । सबहुमानम्पृच्छति । ग्रा म्येयस्यदयातदानीमासीज्जिज्ञासानिवर्त्तकज्ञानजननमनुग्रहः । य द्यपिनागरस्यनागराणिपदानिप्रयोक्तुमर्हन्तितथापिग्राम्यानुग्रहेकर्त्त व्येतद्बोधयोग्यमेवाभिमतन्तुनागरकत्वंतर्हि ग्राम्यैरेवकुतोनब्रवीती त्यपि नवाच्यम् । सहसैवतथाकरणेग्राम्यमतविरोधोऽपितूपनागर करूपभङ्गप्रसङ्गात् । ततोमध्यमान्युपनागराणिप्रयोगयोग्यानीत्या ह।उपनागरैरिति। स्वभावतएवप्राकृतप्रकृतिस्थानांसंस्कृतप्रकृतिस्था नाम्प्रौढत्वम्भवति । येनयद्यपिग्राम्यप्रयुक्तजातीयान्येवसन्दर्भेकरू पतासिद्ध्यर्थंघटयितुमुचितानितथाप्यौचितीप्राप्तसंस्कृतपदनिवेशने यदिप्रकृतिस्थत्वमाद्रियेततत्श्लाघावैरूप्यंस्यादित्याशयेनकोमलप्रा याण्येवनिवेशितानीत्याह । कोमलैर्वैति । भूयसाञ्चपदेशोभवती तिलोकन्यायानुसारात्साक्षादित्येकस्य प्रकृतिस्थत्वेपि कोमलैरित्युक्त म् । साकाङ्क्षप्रश्नेचकिमर्थंलोकोत्तरो"जोज्जलदेउ,, नान्यःकश्चित्तादृ गितिभावोविवक्षितस्तत्रनेत्येवोक्तेनानुग्रहःकृतःस्यादित्यधिकमपि किञ्चिद्वक्तुमुचितमित्याह । सवक्रोक्तीति । एतेननागरकवृत्तिरूपबृ ंहितानैवेत्येवकारेणमनुष्यएवायत्नभवतिदूरेतद्विशेषरूपोजोज्जलदेव

ष्टे । नैवमदनःसाक्षादयम्भूतलेइति ॥ अथग्राम्य आहितप्रतिभःपूर्वपदानुरोधादर्धप्राकृतेनैवग्राम्यो पनागरैःप्रकृतिस्थकोमलैर्वापदैस्तमुपालभतेतत्किं दीसइसच्चमाहतवपुःकामः किलश्रूयतेइति। अथना गरोज्ञाततत्प्रावीण्यस्तत्पदानुरोधादेवार्द्धप्राकृतेन ग्राम्योपनागरनागरैःप्रकृतिस्थकोमलकठोरैर्वापदैः समाधत्ते । एदूएकिअलेउभूतपतिनागौरीविवाहो

इतिप्रकाशितम् । साक्षादिति । प्रत्यक्षेणावधार्यमाणःकिञ्चिद्युत्पन्न त्वेनग्राम्यस्योक्तत्वात् । कामश्चावृत्तसाक्षाद्भावलक्षणविरुद्धधर्मानुस न्धानेनमदनदाहव्यतिकरतासम्भवतीतिलब्धावसरंग्राम्यानुयोगमव तारयति । अथेति । शिक्षाविशेषस्पर्शिनीबुद्धिःप्रतिभा । सामेकान्त तोनागरकवृत्तपरिचयपराधीनस्माशङ्किष्टाइत्याशयशौटीर्येणनागरक प्रयुक्तजातीयैरेवपदैःप्रश्नोयोग्योनचैतावतैवसर्वथाप्रकृतित्यागोर्हती त्यतःस्वप्रयोगयोग्यान्यपिप्रयोगमर्हन्तितत्रार्द्धम्रकृतिवैशसेनार्द्धम्रा कृतमर्द्धग्राम्यञ्चप्रश्नवाक्यानुचितमित्याह । पूर्वपदानुरोधादिति । पूर्वम्परप्रयुक्तंपदन्तर्कितम् । सच्चिमासत्यः । यावतीग्राम्यस्यव्यु त्पत्तिरर्हतितावतीमुपन्यस्यति । श्रूयतइति । ऐतिह्यासिकमुखादेव माकर्णितन्नपुनरद्यापिनिर्णयोवर्त्ततेइत्यर्थः । तर्कित्वमितिप्रकृतिस्थं दीसदीतिकोमलंसच्चिमेतिप्रकृतिस्थंहतवपुरितिकोमलङ्कामःकिलेत्य पितथाश्रूयतइतिप्रकृतिस्थमित्यनन्तरन्नागरिकस्योत्तरावसरः।कथम्प रमार्थवादिन्युत्तरन्दातव्यमित्यनुपपत्तावयंसमाधानप्रकारोभवति।अ स्तिग्राम्यस्यकिलश्रूयतइत्येताव्यांसन्दिहानत्वङ्किञ्चिद्युत्पन्नत्वञ्चो क्तीतमितिकिमप्यलीकमेवबुद्धिकौशलात्तथाप्रतीयमानमभिधायप्रता रणमुपपद्यते । तन्मात्रपरत्वान्नसर्वाकारमधिकाव्युत्पत्तिराहत्यदर्श यितुमर्हतीतितर्कितमित्यादिपादेयावतीग्राम्यस्यव्युत्पत्तिस्तावदनु करणङ्कियदधिकव्युत्पत्तिपुरस्कारमर्हतीत्याशयवानुत्तरमवतारयति। अथेति । पादस्तर्कितमित्यादिग्राम्यप्रयुक्तस्तस्यानुरोधोव्युत्पत्त्यनु

त्सवेइति । अथग्राम्यःश्लोकसमाप्तेःपादस्यतदुत्तर स्यचानुरोधाद्ग्राम्याणि प्रकृतिस्थानिवा त्रिचतुरा णिपदानिप्राकृतेनोक्त्वापादार्धएवतिष्ठते " ऐसेंसच्च जिओल्लइति ।अथनागरोजितकाशीग्राम्योपनागर नागरैःप्रकृतिस्थकोमलकठोरैरेवपदैःश्लोकमुत्तरञ्च पूरयति " हस्तकटकःकिन्दर्पणेनेक्ष्यते ,, इत्यत्रच प्राकृतानांसर्वेषामपिग्राम्यत्वम् । प्रष्टुःसंस्कृतपदे

करणम् । पच्छापश्चात् । ऐएषः । ऐदूएइतिपाठेदूअंव्याजोनेनव्या जेनभूतपतिःपशुपतिः । ननुनकचिदेवंश्रूयतेतत्कथंग्राम्यस्यप्रबोधो भवतीत्याह । गौरीविवाहोत्सवइति । माश्रूयतासुपपत्त्यातुसिद्धो द्वितीयोयदिकामप्रादुर्भावोनस्यात्कथङ्गौरीपाणिग्रहेभगवतउत्साह इत्यतस्तेनैवकरुणासन्तानशान्तात्मनाभूयःसृष्टःस्यादित्यर्थः । पच्छे तिप्रकृतिस्थमेइतिकठोरङ्किअलेउइति कोमलंभूतपतिनेतितथा। गौ रीविवाहोत्सवइतिप्रकृतिस्थम् ऐंदूऐंइतिपाठेद्वयमपिकठोरम् । तद त्रकठोरनिवेशनंव्युत्पत्त्याधिक्यसूचनाय । एतावत्युक्ते परीक्षणव्युत्प त्तिर्नकिञ्चिद्ग्राम्यम्प्रतिभाति । नचतस्याद्यापिनिःशङ्कतावर्त्तते । त तोनागरकप्रामाण्यदत्तभरःप्रश्नोघटतइत्याशयवानवतारयति । अथ ग्राम्यमिति । प्रकृत्यापन्नएवतेनयथाप्रथमंहातोइत्यादिप्रश्नेगतिस्त थात्रापीतिग्राम्यप्रकृतिस्थयोरुपन्यासः । भाषाचित्रेणपरस्परसङ्घर्षा देकका्यरचनाप्रवृत्तंयोग्राम्यस्यापिश्लोकश्लोकसमाप्तिपदारम्भोयोग्य एव । यदिचायमेवसमस्तंनिर्वोढुंयत्नशेषशङ्कानिवृत्त्युपयुक्तमुत्तरन्ना गरस्यनिवेशितंस्यादितितदुत्तरानुरोधेनपादार्द्धएवविलम्बोप्युचितः। ऐसेंएवमित्यत्रार्थे,,काकुगर्भम् । सच्चजिओल्लइतिजिरवधारणे । सत्य मेवैतदुक्तम् । यदिसत्यपुरःसरम्ब्रूयास्तदाप्रत्येमीत्यर्थः । एवंग्रा म्यतापूतारणसिद्धौकिमत्रसर्वलोकसाक्षिकेवस्तुनिवक्तव्यैवपूर्वव्युत्प त्तिमात्रनिवेशनेनोत्तरन्दत्वाश्लोकपूरणमेवनागरस्योचितमित्याशयेनो त्तरमवतारयति । अथेति । हस्तेइतिप्रकृतिस्थङ्कटकमितिकोमलन्दर्प

षु॰वपुरित्युपनागरंशेषाणिग्राम्याणि। प्रतिवक्तुश्चह स्तविवाहगौरीपदानिग्राम्याणि। भूतपतिनेतिना गरंशेषाण्युपनागराणि। तदिदमीदृशिप्रमेयेतथैवो पक्रमान्नदुष्यति ॥ ७ ॥ वाक्यान्तरसगर्भंयद्वाक्य न्तद्वाक्यगर्भितम् ॥ रसान्तरतिरस्कारेतदिष्टन्नेष्ट मन्यथा ॥ यथा। दिङ्मातङ्गघटाविभक्तचतुराघा टामहीसाध्यतेसिद्धासाचवदन्तएवहिवयंरोमाञ्चि ताःपश्यत। विप्रायप्रतिपाद्यतेकिमपरंरामायतस्मै नमोयस्मादाविरभूत्कथाद्भुतमिदंयत्रैवचास्तङ्गत म्।अत्रयथोक्तामहीसाध्यतेसिद्धाचसाविप्रायप्रति

णेनेक्ष्यतेइत्येतेप्रकृतिस्थेइतिप्रकृतिस्थादीनांसुपरिचेयत्वाद्ग्राम्यादी न्येवव्याचष्टे। अत्रचेति। प्रकृतिव्यतिकराव्यतिकरत्वयोरौचित्याप न्नत्वाद्भाषासङ्करःशोभावहत्वेनगुणएवभवतीत्युक्तमुपसंहरति। तदि ति ॥ ७ ॥ वाक्यान्तरेति। रसान्तरंरसविशेषःप्रकृतरसानुसंहितो रसस्तेनतिरस्कारोदोषभावस्यतस्मिन्त्सतितथाकृतंवाक्यमिष्टमेवक वीनामुपादानयोग्यमेवाऽन्यथानेष्टन्दुष्टमेवेत्यर्थः। तेनायमर्थोभव ति। प्रकृतरसतिरोधायकत्वङ्किलदूषणताबीजन्तदतिरोधानेनैवनि वर्त्ततेप्रत्युतद्वितीयपरिच्छेदेवक्ष्यमाणगर्भादिवाक्ययोजनप्रकारसम्प त्तावलङ्कारलाभेगुणत्वम्भवति। तथाहि दिङ्मातङ्गानाङ्घटयाविभ क्ताःपृथगुद्भिद्यव्यवस्थापिताश्चत्वारआघाटायस्यांसा तथा तेनसप्तद्वी पावसुमतीसाध्यतइतिविवक्षितम्। येतावद्भरतभगीरथप्रभृतयःप्रथि तंप्रतापातिशयास्तेषान्तद्दूषणपरिनिष्ठितशक्तीनामेकस्यापिसमस्तक्षत्र वंशोन्मूलनेननवखण्डमेदिनीसिद्धौनोत्साहशक्तिःश्रवणगोचरतामया सीदितिलोकोत्तरापरशुरामस्योत्साहशक्तिरावेद्यतेसिद्धा साचेत्यनेन यावदेवाभिलषितन्तावदेवसिद्धमित्यहोविजिगीषुतेतिपूर्ववदेवाभिप्रा यः। नचेदसौसिद्धिमभिसन्धायप्रवृत्तोनुपदमेवसासम्पन्नेतिचकारेण द्योत्यते। एवमभिहितेऽभिप्रायेइत्यादिकमस्तिवाक्यशेषभूतन्तद्वि

* संस्कृतपदानांनैवमदनः साक्षादयंभूतलेइतिनागरंवपुरित्याद्युपन गरम्। इत्यपिक्वचित्पुस्तकेपाठः

पाद्यतइतिवक्तव्येयोयंवीराद्भुतरसवशम्प्रवृत्तेनव
दन्तएवहिवयंरोमाञ्चिताःपश्यतइतिवाक्येनप्रकृत
वाक्योक्तेरसमाप्तावेवविप्रायेत्यादिपदविच्छित्तिःसा
रसान्तरतिरस्कृतिरित्युच्यते। तथाचेदंवाक्यान्तरस
गर्भमपिवाक्यन्नदोषायभवति ॥ ८ ॥ यद्विन्नलिङ्ग
मित्युक्तंविभिन्नवचनञ्चयत् । उपमा दूषणन्तन्न
यत्रोद्वेगोनधीमताम् ॥ यथा । अन्यदाभूषणंपुंसः
शमोलज्जेवयोषितः । पराक्रमःपरिभवेवैयात्यंसु
रतेष्विव । अत्रपुंसोयोषितइवशमोलज्जेवपराक्र
मोवैयात्यमिवेतिलिङ्गभेदः । परिभवेसुरतेष्विवे

च्छिद्यैवमध्येवदन्तएवहिवयंरोमाञ्चिता इतिवाक्येनसगर्भतासानदो
षाय । अनेनहिवाक्येनलोकोत्तरवस्तुभावनात्मकविभावसंपत्तौप्रादु
र्भवन्वक्तुमभिमतोरसोव्यज्यते । सचवीरानुसन्धानहेतुर्वीराद्भुतयोः
समानभूमिकयोरन्योन्यानुगमेनप्रतिकूलताविरहता । तत्रयथाशृङ्गार
रौद्रबीभत्सानामेकप्रघट्टकेनसूत्रणे सन्निपातिनैरपिहास्यकरुणाभय।न
कैर्नतिरस्कारः।स्वाङ्गमव्यवधायकमितिन्यायात्तथेहवीरस्याद्भुतेनात
एवाद्भुतादुद्वेलस्यप्रादुर्भूतपुत्रकाऽङ्कुरलक्षणानुभावप्रदर्शनम्पश्यते
ति । नचात्रदोषोदाहरणेमयेतिकारकविभक्तेरुत्थिताकाङ्क्षायारन्ध्रे
नमित्यादिनास्वरसबाधस्तथात्रसम्भवतिसिद्धेत्येतावत्यपिदर्शितेवा
क्यार्थपर्यवसानात् । नचसम्पूर्णरसेवन्दन्तएवेत्यादिकमभिधातुमर्ह
ति । अद्भुताचपार्थिवानुभावस्यतन्मात्रपूरणापेक्षत्वात् । एवंरसानु
भावनातृप्तस्यतत्रैवपुनःपुनरुत्कण्ठायाञ्जिगीषुकरणीयलब्धपात्रप्रति
पत्तिविशेषस्फोरणेविप्रायप्रतिपाद्यतइत्युक्तम् । दानवीरोपिवीरए
वातएवाधिकस्यकर्त्तव्यस्याऽभावेकिमपरमित्यादिरुपसंहारस्तदेतत्स
र्वंव्याचष्टे ॥ अत्रेति ॥ ८ ॥ यद्विन्नेति । दोषप्रकरणानुरोधेनसमस्तवय
स्तोदाहरणम्बोद्धव्यम् । सहृयोद्वेजकत्वेनहिदोषतायत्रतुकथञ्चिन्न
थाभावोनभवतितत्रदोषत्वहानिरुचितैव । तथाहिस्त्रीपुंसयोरेवप्रकृ

तितुलिङ्गभेदोवचनभेदश्चदृश्यते । सचैषामेवपर स्परोपमानोपमेयभावविवक्षायाम्पर्यायान्तराभा वादन्यथाकर्तुमशक्यमितिसहृदयहृदयानुद्वेजकत्वा न्नदुष्यतीतिदोषस्यापिगुणत्वम्। तदिदन्द्वयोरप्येक मुदाहरणम् ॥ अथभिन्नलिङ्गस्यैवयथा । यस्यत्रि वर्गशून्यानिदिनान्यायान्तियान्तिच । सलोहकार भस्त्रेवश्वसन्नपिनजीवति। अत्रप्राग्वदेवपर्यायान्त राभावात्सलोहकारभस्त्रेवेतिनदोषः ॥९॥भिन्नवच नस्यैवयथा । प्राज्यप्रभावःप्रभवोधर्मस्यास्तरजस्त माः । मुक्तात्मानःशिवन्नेमिरन्येपिददताञ्जिनाः ।

तानुगुणोपमानोपमेयभावविवक्षायामावश्यकंलिङ्गवचनभेदयोरन्यत रदेकस्यपुंसउपमेयत्वेनदारशब्दस्यभिन्नवचनत्वनियमात्कलत्रपदम्भि न्नवचनमेव । पर्यायाणामपिलिङ्गभेदोनियतः । नचपुंवचनङ्किञ्चित्स मानस्वभावमस्तियेनायम्प्रकारोनिवर्तेत । नचैवंविधोपमामन्तरेणप्र स्तुतवाक्यार्थपोषः । एवमनन्यगतिकाभिन्नलिङ्गताभिन्नवचनतावा साहित्यसमयविदामुद्वेगन्नोत्पादयति । अतएवालङ्कारौचितीसम्पदा गुणत्वसिद्धिः । एवंशमलज्जयोःपराक्रमवैयात्ययोःपरिभवसुरतयोश्च बोद्धव्यमित्याशयवान्व्याचष्टे । अत्रेति । रतंरहःशयनम्मोहनमिति सुरतवाचिनांसर्वेषामेवनपुंसकतानदुष्यतीतिसहृदयहृदयानुद्वेजकत्वा दितिहेतुर्गुणत्वेत्वाभिप्रायिकःसचदर्शितएव । अथेति । धर्मार्थकामा स्त्रिवर्गः। वह्नितिग्मापनचर्मपुटोभस्त्रासायथावातेनपूर्यतेवातञ्चमुञ्च तिनतुकिञ्चित्पुरुषार्थमासादयतितथात्रिवर्गशून्येपिभस्त्रापर्यायस्यस मानलिङ्गस्याभावेन सहृदयानामनुद्वेगोलङ्कारसम्पत्त्यागुणत्वमुपपन्न मित्याह । अत्रप्राग्वदेवेति । अदोषइत्युपलक्षणङ्गुणश्चभवतीत्यपिबो द्धव्यम् ॥ ९ ॥ प्राज्येति । आर्हतानांनेमिनामाजिनविशेषोन्येजिना ऋषभनाथप्रभृतयःप्राज्यमुचितन्तथाभूतम्प्रभावः सिद्धिरूपोयस्यता दृशोनेमिःशिवन्ददतान्ददातु । दददानइतिधात्वनुसारात् । कस्मैइ

अत्रनेमिरन्येपीतिवचनभेददोषेपिददतामितिक्रियापदादेर्वचनश्लेषमाहात्म्यादृगुणत्वम्। नचेदंवाच्यमत्रेवादिर्नविद्यतइतिनोपमात्वम्इवस्यापिनासमुच्चयार्थेनतुल्यधर्मणान्तुधर्मस्यप्रभवइत्यादिभि

त्यपेक्षायान्मुक्तात्माइत्यत्रनःपक्षेवोयुष्मन्यंशिवन्ददतान्ददत्विति । धर्मस्यप्रभवमुत्पत्तिनिमित्तम् । नेमिः प्रभवःप्रभुतायथावदनुशासनेनजिनारजश्चतमश्चरजस्तमसीतेअस्तेक्षिप्तेयेनसतथाभूतोनेमिः। अस्तंरजोयैस्तेऽस्तरजसस्तेषुप्रकृष्टास्तमपिअस्तरजस्तमाः । मुक्तोनिरावरणआत्मा। आत्मशब्दआत्मवचनःस्वरूपवचनइतियाबहुब्रीहिस्तादृशोनेमिःजिनास्तुमुक्तात्मानइतिरूपम् । तदिहवचनभेदमन्तरेणवचनश्लेषाभावाद्भिन्नवचनत्वस्यावश्यकत्वेनदोषः । श्लेषलक्षणालङ्काराघटनयागुणत्वम्। ननुचलिङ्गादिभेदउपमायादूषणत्वमुक्तमिहत्वलङ्कारान्तरउदाहियतेतत्कथम्पूर्वापरसमञ्जसत्वन्नचात्रोपमासम्भवतित्सामग्र्यसम्भवात्। उपमानोपमेयसाधारणधर्मैवादिशब्दाःकिलतद्वटकास्तदत्रत्रितयसम्बद्धेत्वपीववद्वाप्रभृतिशब्दानुपादानात्कथमुपमेतिशङ्कामुत्थाप्यनिरस्यति॥ नचेति। इवादयोहिशब्दाःसादृश्यद्योतकास्तथाचक्वचित्प्रसिद्धस्यप्रकृतेसम्बन्धप्रतीतिस्तेज्योभवतिविम्बप्रतिबिम्बन्यायाश्रयणादेवञ्चनयुगपत्तुल्यरूपसम्बन्धोऽपिशब्दस्तुयुगपत्तुल्यरूपसम्बन्धंबोधयतीतिविभिन्नविषयत्वन्नहीवादिशब्दाभावेसादृश्यमेवनप्रतीयतेलुप्तोपमाप्रपञ्चभङ्गप्रसङ्गात् । अन्यतएवप्रतीतिसिद्धेरुपायान्तरवैयर्थ्यात् । किमितीहनेवादिपदम्प्रयुक्तमितिप्रश्नोवशिष्यतेतत्रेदमुत्तरमिवस्येत्यादि ॥ नेमिरन्येपीत्यपिशब्देनसमुच्चयोप्यवसीयते । सचयुगपदेकसम्बन्धाभिधानेनिर्वहति । तेनानेकमुद्दिश्यकिञ्चिदेकसम्बन्धाभिधानंसमुच्चयाभिधायिनोविषयः । एकमुद्दिश्यप्रसिद्धान्यधर्मविधानन्नुयथेवादिरितिविषयविरोधान्नप्रयुज्यतइति। स्यादेतदिवद्वायथादिशब्दायत्परास्तस्यैवोपमानताप्रतीतिस्तथाचानेनेदन्तुल्यमितिसाधारणधर्मविधिरूपाकथमुपमेत्यतउक्तन्तु

र्वचनश्लेषैर्विषयापहारात् । यथाग्रतोद्योतकलोप
उपमायाम् । कोमलापाटलौतन्विपल्लवश्चाधरश्च
ते । नन्वेषोपिश्लेषःकस्मान्नभवति । उच्यते । यत्र
द्वयोःसदृशयोरभिधानंसश्लेषोयत्रसदृशात्सदृशप्रति
पत्तिस्तदुपमानम् । यत्रद्वयोःसादृश्यमभिधीयतेप्र
तीयतेवासोपमेतिप्रबन्धेनाग्रेवक्ष्यामः । उपमालक्ष
णञ्चैतत् । यदुपमायामेवलिङ्गवचनभेदेनदूषणन्त
स्यसर्वालङ्कारसाधारणत्वात्केवलसादृश्यमलंकारइ
तिदर्शनेउपमायामुदाह्रियते ॥ १० ॥ यत्रोपमान

ल्यधर्मणान्विति । नात्रवचनश्लेषतुल्यधर्मोगमोपितुपृथाव्यवसितानामेवशब्दतन्त्रतेतिधर्मस्यप्रभवइत्यादिभिर्द्विवचनश्लेषैस्तथापिविषयोपहृतइति । यदिचेवादिमन्तरेणनोपमाप्रतीतिस्तर्हिप्रसिद्धमुपमोदाहरणमज्येतेत्याह। यथेति। अग्रतश्चतुर्थपरिच्छेदे। अत्रापुपमामनङ्गीकुर्वतोमतमाशङ्कते। नन्विति। इहापिचकारान्न्यांयुगपत्पल्लवाधरयोरेकधर्मविधानस्यतुल्यत्वादितिदेश्याभिप्रायः ॥ उक्तयुक्त्यादूषयति । उच्यतेइति॥तर्हिप्रकृतोदाहरणेनास्त्येवोपमाकथंवचनभेदस्यगुणीभावउदाह्रियतइत्याह । यत्रेति। यद्यप्यभिधीयमानन्नास्तिसादृश्यन्तथापिप्रतीयमानोपमाव्यवह्रियतामित्यर्थः। शब्दमात्रसाम्यंश्लेषसङ्कीर्णमेवेत्युपेक्षितवान् । ननुयत्रोपमयाकाव्यव्यपदेशस्तत्रप्रतीयमानसादृश्यमूरीक्रियते । यत्रत्वलङ्कारस्वभावव्यवस्थापितमेवकाव्यन्नतत्रापीत्याह । उपलक्षणमिति ॥ प्रतिपत्तिवैरूप्यस्यालङ्कारान्तरसाधारण्यादुपमातोऽन्यत्रापिलिङ्गवचनभेदोदूषणमेव । तद्यथासुखम्पद्मनिरूपकेसुखम्पद्मंवेतिसंशयेनसुखम्पद्ममेवेत्यपह्नवे । एवमन्येपि । अतएवद्वेभिन्नलिङ्गवचनेइत्यत्रनोपमाग्रहणम्।यद्येवङ्कथमुपमायामेवदूषणमुदाह्रियतइत्यतआह । केवलमिति ॥ चिरन्तनैर्हिभरतमुनिप्रभृतिभिर्द्वैएवयमकोपमेशब्दानुगतालङ्कारत्वेनेष्टे । तत्प्रपञ्चनमात्रन्तुपुनरन्यैरलङ्कारकारैःकृतमुपमायाःप्रभूतविषयतयाप्राधान्यात्त

धर्माःस्युर्नोपमेयेनसम्मिताः । तद्धीनोपममित्याहु स्तत्प्रसिद्धौनदुष्यति ॥ यथा ॥ समारुताकम्पितपी तवासाबिभ्रत्सलीलंशशिभासमब्जम् । यदुप्रवीरःप्र गृहीतशार्ङ्गःसेन्द्रायुधोमेघइवाबभासे । अत्रसेन्द्रा युध इति कार्मुकमात्रोपादानं वाससशङ्खयोस्त्वनुपा दानादूनोपमत्वन्तत्रेन्द्रविद्युतोरतिप्रसिद्धत्वाददोष त्वम् । यदाह । सर्वं सर्वेण सारूप्यन्नास्ति भाव स्यकस्यचित् । यथोपपत्तिंकृतिभिरुपमानम्प्रयुज्य ते।अखण्डमण्डलःक्वेन्दुःक्वकान्ताननमद्युति।यत्कि ञ्चित्कान्तिसाम्यात्तुशशिनैवोपमीयतेइति ॥११॥ क्रमेणनेमकृतिभिरेष्टव्यमधिकोपमम् । विशेषस्तूप मेयाङ्गमनुमानात्प्रतीयते ॥ यथा । सपीतवासाःप्रगृ

ह्योदाहृतमतिस्फुटम्भवतीतिसंक्षेपः॥१०॥ यत्रोपमानइति । उपमेयेनउ पमेयविशेषणेनसम्मितास्तुल्यसंख्याः । इन्द्रायुधमिन्द्रधनुरेकमुपमाने उपमेयेपीतंवासःशार्ङ्गमब्जःशङ्खइतित्रीणिविशेषणानितदिहाधिकवि शेषणविषयइतिजिज्ञासासमकालमेवाप्रसिद्धेन्दुबिम्बयोरुपमानयोर्मै घानुसन्धानात्स्खलनाभिमुखीप्रतीतिरवलक्ष्यते । ध्वननव्यापारोन्मे षाङ्गुणत्वलाभः।तदुक्तम्।मुख्यामहाकविगिरामलङ्कृतिर्नृतामपि। प्रतीयमानच्छायैषाभूषालज्जेवयोषितामिति । नचैवंस्तनितादीनामि तिकथम्प्रतीतिरितिवाच्यम् । प्रतीयमानस्यापिप्रतिपत्तिवैरूप्यसमा धावानौपयिकस्यानाकाङ्क्षितत्वेनादरादित्याह। सर्वंसर्वेणेति। यथोप पत्तिपर्यन्तोयावतोपमानविशेषणत्वेनप्रकृतमुपमेयविशेषणप्रतिबिम्ब तानीयतेतदतिक्रमेणैकप्रतीत्यनुरोधेकल्पितेनाप्युपमेयविशेषणेनेत्य र्थः।अन्यथाचन्द्रमुखादीनान्नोपमापर्यवस्येतेत्याह।अखण्डेति ॥ ११ ॥ अमुमेवप्रकारमधिकोपमेयेयोजयन्नाह । क्रमेणेति । यत्रोपमानेधि कविशेषणसंक्षेपस्तद्वाक्यमधिकोपममित्युच्यतेतत्रऋटिति प्रतिबिम्ब

हीतशार्ङ्गोमनोज्ञभीमंवपुरापकृष्णः । शतह्रदेन्द्रा
युधवान्निशायांसंसृज्यमानःशशिनेवमेघः।अत्रशशि
नोगृहणादधिकोपमत्वेप्युपमानत्वेनाविवक्षणाद्गु
णत्वम् । यदिवोपमानेधर्मोद्घाटनानुमानाच्छङ्खच
क्रगदाधरोविष्णुरितिप्रसिद्धेःशङ्खोऽनुमेयः॥१२॥ यदा
तीव्रप्रयत्नेनसंयोगादेरगौरवम् ॥ नच्छन्दोभङ्गमप्या
हुस्तदादोषायसूरयः। यथा। जहण्हा उंओ इस्सेअ
ब्भिन्नमुल्हसिअमंसुअद्धन्तम् । तहआणण्हासि
तुमंसच्छेगोलाणईतूहे । अत्रद्वितीयैकादशत्रयोविं
शतिवर्णानांसंयोगपरत्वाद्गुरुत्वेपिण्हल्हादिसंयो

भूतोपमेयविशेषणप्रतिसन्धानेनदोषस्तदेवतुकथमतउक्तम् । विशेष
स्त्विति। उपमेयांशेविशेषाविशेषणमुपादानादुपमानविशेषणात्प्रती
यते । शतह्रदाविद्युत् । उपमानत्वेनाविवक्षितत्वादित्यापाततः ।
उपमानविशेषणानांयावत्प्रतीतिनग्रहणमितिप्रकाशयितुम्पारमार्थि
कस्त्वयंसिद्धान्तइत्याह। यदिवेति। उपमानधर्मस्याधिकस्योद्घाटनम
भिधानन्तस्यानुपश्चान्मानंज्ञानन् । कथमेतदित्याह । अतिप्रसिद्धेरि
ति ॥ १२ ॥ यदाप्रयतनम्प्रयत्नःस्थानकरणव्यापारस्तस्यतीव्रत्वमुद्रेक
स्ततएवहिपिण्डाक्षरादीनामकठोरत्वमाभासते। आदिग्रहणादिवहि
ङ्कारौसानुस्वारौचकेवलौपदान्तेवर्तमानौतत्तद्भाषाविषयेऽवसेयौ ।
क्वचिदेवहिवर्णेतथावभासतेनतुसर्वत्रतदुपलक्षणमेवरहवञ्जणसञ्जो
ए इत्यादिकंछन्दोविचितौदर्शितम्। जहेति। स्नातुमवतीर्णेत्वयिअंशु
कार्द्धमुद्भ्रष्टंसदब्भृत्तमार्द्रीभूतंयथाचलत्वंस्थितेस्तथावगम्यतेनत्वन्त
र्जलञ्जलकेलिस्थानमवतीर्णइत्यभिप्रायशेषः । कथमन्यथागोदावरी
नद्याःस्वच्छञ्जलन्दृश्यतेइति । तूहन्तीर्थम् । अत्रद्वितीयैकादशादि
स्थानेषुयद्यपिसंयोगात्पूर्वभावेगुरुत्वंविद्यतेतथापितीव्रप्रयत्नोच्चारणी
यशकारहकारादिसंयोगमहिम्नानावच्छेदश्रव्यताकलुषीक्रियतइतिए
वमन्यदप्युदाहार्यम् । यथा [धवलाइंगलेत्तिधवलेहिंअणञ्जणसाम

गस्यातीव्रप्रयत्नोच्चारणेनपूर्वलघुत्वेनच्छन्दोभङ्गइति गुणत्वम् ॥ १३ ॥ वाक्यमस्थानविरतिप्राग्भग्नयतिसंज्ञया । समुद्दिष्टंयदधुनागुणत्वन्तस्यकल्प्यते ॥ यथा । शोभाम्पुष्पत्ययमभिनवःसुन्दरीणाम्प्रबोधः किञ्चिद्बालसमसरलप्रेक्षितङ्कामिनीनाम् । कार्याकार्याण्ययमविकलेनागमेनैवपश्यन्वश्यामुर्वीव हतिनृपइत्यस्तिचायम्प्रयोगः । अत्रपादत्रयेचतुर्थस्थानेयतौकर्त्तव्यायाम्पञ्चमस्थानेकृतत्वादपरत्रच पादस्यमध्यभागेनिबिष्टकेवलस्वरत्व।द्यतिभ्रंशेपिस्वरसन्धि कृतत्वादविभिन्ननामधातुशरीरत्वाच्छनदोषत्वम् । यदाह । स्वरसन्ध्यकृतेप्रायोधातुभेदेतदिष्यते । नामभेदेचशेषेषुनदोषइतिसूरयः । लुप्तेपदा

लेहिणिसालंआए । णखवत्तकुसुमाइं णहअलाओओसरइ] इत्यादि नामधातुभागेस्वरासन्थानेचपठितिविच्छेदोनभवतीत्युक्तंसतदुच्छ्वासमात्रेणसमाधीयते शोभांपुष्यतीति ॥ १३ ॥ कार्याकार्यैतिचनामभागमुच्छ्वासविच्छेदश्रव्यताचपरस्ययणादेशेनकिञ्चिद्भावेतिनृपइतिचस्वरसन्थानेविच्छेदोऽतएवश्रव्यत्वमपितदेतद्व्याचष्टे। अत्रेति। मन्दाक्रान्तामभनभयुगङ्गद्वयंवेदर्दिग्भिरितिचतुर्थदशमयोर्यतिराम्नाता । पञ्चमस्थानइति । प्रथमतृतीययोर्द्वितीयेतुषष्ठेयतिकरणादितिबोद्धव्यम् । ननुपदच्छेदेस्वरसन्थानपठितिविरामःसोल्लेखोलक्ष्यतेनतुचतुष्पादेतथास्तीतिकथंश्रव्यत्वमतआह । लुप्तइति । सन्धौविकारोयत्वयलोपादिकङ्कार्यन्तथाचपदान्तेसतिपदच्छेदएवायमिकारोवतिष्ठतइत्यर्थः। ॥१४॥ अशरीरमिति । प्रधानाविमर्शैर्हिदूषणमित्युक्तन्तदुपात्तानामेवपदार्थानाम्प्रधानगर्भीकरणेतत्प्रतिबन्धेऽवश्यविधेयमन्यस्मातिगुणीभावेवासमाधीयतेऽतएवविशेषाद्गुणत्वम् । तथाहिक्रियन्मात्रंजानुदग्नमित्यनयोःपरिमितंक्रियाप्रधानगर्भभूतानहिभवादृशाइत्यत्रतुस

न्तेशेषस्यपदत्वन्निश्चितंयथा । तथासंधिविकारा न्तम्पदमेवेतिवर्ण्यते ॥ १४ ॥ अशरीरंक्रियाहीनं क्रियापेक्षानयत्रतु । प्राशस्त्यादेरपेक्षावानदोषस्त त्रतद्यथा ॥ कियन्मात्रञ्जलंविप्रजानुदघ्नंनराधिप । तथापीयमवस्था तेनहिसर्वेभवादृशाः । अत्र त्रिषु पादेषुपदानि क्रियापदन्नापेक्षन्ते सापेक्षञ्चासमर्थं म्भवति । चतुर्थंतुनहीत्यादिभिःसन्तीत्यपेक्षते । न चैतावतामीषामसामर्थ्यम्भवति । यदाह । यत्रान्य क्रियापदञ्चास्तितत्रस्तिर्भवन्ती*परःप्रथमपुरुषःप्रयु ज्यतेइति ॥ १५ ॥ श्लिष्टमस्पृष्टशैथिल्यंशिथिलन्तद्वि पर्ययः । गौडीयैरिष्यतेतत्तुबन्धप्राशस्यगौरवात्

त्ताक्रियायाःसकलपदार्थाव्यभिचारादपेक्षितइतिसिद्धिस्तदिदमाचा र्यमतेनाह । यत्रान्येति । भवन्तीवर्त्तमाना । तदेतद् वाक्यंक्रि याप्रधानमितिदर्दशसप्रधानंविशेष्यमात्रन्तुवाक्यार्थइतिपरमार्थस्तेन राधारहःसाक्षिणामित्यादावावश्यकविधेयसाक्षिभावादिगुणतयारा धासम्बन्धादीनांवैवक्षिकप्राधान्यानामपिप्रधानत्वाविमर्षानदोषइ त्युक्तम्भवति ॥ १५ ॥ श्लिष्टमिति । पारुष्यशैथिल्याभ्यांविनाकृतंश्लिष्ट मित्युक्तंतस्यविपर्ययोविपरीतंवाक्यंशिथिलम्भवति । परुषमल्पप्रा णाक्षरोत्तरंवेत्यर्थः । एवंविधमपिचैतदनुप्राससौष्ठवात्पदानासेकता प्रतिभासेसमाधीयतेउद्भटानुप्रासतयाचकान्तिप्राधान्येगौडीयरीति प्राधान्येनगुणत्वमासादयतितदिदमुक्तम्। बन्धप्राशस्त्यगौरवादिति। गौडीयैर्गौडीयरीतिगोचरहेतुवाक्प्रकर्षशालिभिः । लीलेति । अत्र दन्त्यवर्णसयत्वेनालपप्राणाक्षरोत्तरतायामपिपदैकतापतिभासानुप्रास योरुद्रेकःकान्तिप्रकर्षोवसेयः ॥ १६ ॥ नदोषइति । अर्थालङ्कारकार णादर्थालंकाररूपम्।यत्रहिशब्दस्यार्थान्यथान्यथारूपमभजतेतत्रावश्य न्तदनुयायिनापदसन्दर्भेणभिन्नरूपेणभाष्यम् । एवमपिच्छायावैरूप्यंवै

---

* भवन्तीपरइति । लट्परोक्तिःसर्वत्राकाङ्क्षायांप्रयोक्तव्यइतिकैयटः

॥ यथा । लीलाविलोललल्लनाललितालकलासकाः । विलुप्तमालातीमालाजलकालानिलाववुः । अत्रशैथिल्यदोषेपिबन्धप्राशस्त्येनगौडैरादृतत्वाद्गुणत्वम् ॥ १६ ॥ नदोषःक्वापिवैषम्येप्यर्थालङ्कारकारणात् । पौरस्त्यैरादृतत्वाच्चशब्दाडम्बरतोपिवा॥यथा। चन्दनप्रणयोद्गन्धिर्मन्दोमलयमारुतः । स्पर्द्धतेरुद्धमद्धैर्यावररामाननानिलैः । अत्रसत्यपिवैषम्यदोषे शब्दालङ्कारगुणादर्थालङ्कारगुणात्पौरस्त्यैरादृतत्वाच्च गुणत्वम् ॥ १७ ॥ कठोरमपिबध्नन्तिदीप्तमित्यपरे पुनः । तेषाम्मतेनतस्यापिदूषणन्नैवविद्यते । यथा । न्यक्षेणपक्षःक्षपितःक्षत्रियाणांक्षणादयम् ।अत्रकठो

रस्यसेवावहतीत्याशङ्क्यशब्दाडम्बरइत्युक्तम् । आडम्बरउद्भटता । तस्याप्येकरीत्यनिर्वाहेदूषणमित्यत्रपौरस्त्यैरित्युक्तम् । शरावत्याःप्राग्देशभवाःपौरस्त्यास्तदीयहेवाकप्राचुर्यभाजएवहिखण्डरीतयः ॥ चन्दनेति । अत्रयद्यपिमलयानिलएकएववाक्यार्थस्तथापिचन्दनप्रणयेनप्रवृद्धसौरभेमन्दइत्याद्यांश्चङ्गाराङ्गताप्रतीतावुन्मिश्रःसंदर्भः । मलयमारुतइतिकोमलःवररामामुखानिलैरित्यपितथातत्राप्यारभटीप्रकाशनेस्पर्द्धतइतिस्फुटम् । एवंरुद्धमद्धैर्यइतितदेवंसमताविपर्यासेपि विशेषणानामर्थानांभिन्नभिन्नरसानुप्रवेशेपृथगर्थालंकाराःप्रकाशन्ते अस्तिचात्रशब्दाडम्बरवशादेवच्छायारूपाप्रतिभासःलाटीयाचरीतिः॥ १७ ॥ कठोरमिति सुकुमारताविपर्यासःकठोरःसंदर्भःप्रस्फुटतरवर्णप्रधानमितियावत् । सोयंदीप्तरसानुप्रवेशादौचित्येनगुणत्वंभजतइतिव्यक्तमपरेपौरस्त्याः ॥ न्यक्षेणसासस्त्येन ॥ १८ ॥ अविद्धद्विपर्ययःप्रत्यनीकभूतंवाक्यमादिग्रहणाद्यमकश्लेषप्रहेलिकाप्रकरणानि ॥ यादेवीपवित्रत्वेनाश्रिताऽनीचयातुङ्गयाबुद्ध्यामायायास्यअविद्याविस्तारस्य आयासंग्लानिंविच्छेदंयाचनीयाप्रार्थनीया यतोयातनंनरका

रेपिदीप्तत्वाद्गुणत्वम् ॥ १८ ॥ अविद्वदङ्गनाबाल
प्रसिद्धार्थम्प्रसादवत् । विपर्ययोस्याप्रसन्नंचित्रा
दौतन्नदुष्यति ॥ यथा । याश्रितापात्रनतयायात
नाच्छिदनीचया । याचनीयाधियामायायामायासं
स्तुताश्रिया । अत्राप्रसाददोषेपिचित्रत्वाद्गुणत्व
म् ॥ १९ ॥ अध्याहारादिगम्यार्थन्नेयार्थम्प्रागुदा
हृतम् । सगम्यतेप्रसिद्ध्यैन्नतद्दोषवदिष्यते ॥यथा।
माभवन्तमनलःपवनोवावारणोमदकलःपरशुर्वा ।
वाहिनीजलभरःकुलिशंवास्वस्तितेस्तुलतयासहवृक्ष
। अत्रदहत्यादीनामध्याहार्यतयानेयत्वेप्यतिप्रसि
ध्याप्रतीयमानत्वाद्गुणत्वम् ॥ २० ॥ असभ्यार्थ
म्मतङ्ग्राम्यन्तद्ग्राम्योक्त्यैवदुष्यति । विदग्धोक्तौतु
तस्याहुर्गुणत्वम्मनीषिणः ॥ यथा । कामङ्कदर्पचा

नुभवनीयंदुःखंछिनत्तिश्रियापिस्तुतेति । अष्टदलकमलबन्धोयम् * ।
तदिहतथावरासिन्निवेशस्यचमत्कारकारित्वेनप्रसादोपिसहृदयश्लाघा
विषयोगुणतामध्यास्तइति ॥ १९ ॥ अध्याहारेति । असंपूर्णंवाक्यं
नेयार्थमित्युक्तंतस्यैवंरूपताऽकटितिश्रुतार्थापत्तिप्रादुर्भावपरिहृवक्रसं
धानात्समाधीयते।,तथाहि माभवन्तमनलइत्यादौवृत्तसमधिष्याहारे
णदहनादीनांयोग्यतयाशीघ्रमेवधाक्षीदित्यादिक्रियान्वयोवसीयते।
स्वस्तिवचनेनचामङ्गलप्रत्यावनिरासातथाभूतक्रियानुपादानंवक्तुक्षम
तयागुणइति ॥ २० ॥ असभ्यार्थमिति । रसस्यादीप्तिःकान्तिविपर्य
योवचनापरार्धेनदूषणतामध्यास्तेससमाधीयतेत्रग्राम्योक्तिपरिहारे
णैवातस्यवोक्तिसमर्पितच्छायाविशेषयोगेगुणत्वलाभःसहृदयसभायां
नसाधुरसज्ञोवैदग्ध्यविधुरंग्राम्यन् ॥ २१ ॥ औजइति । दीप्तरसा
नुप्रविष्टार्थप्रतिपादकसंदर्भौचित्येन समासभूयस्त्वमोजोऽस्यविपर्य
योदीप्तिरप्त्यूहादेवसमाधीयते तदिदमुक्तं"दीप्तार्थंबध्नतियत्रतद्दीप्तं

---

* अयं द्वितीये परिच्छेदेदर्शयिष्यते ।

गडालोमयिवामाक्षिनिर्दयः।त्वयिनिर्मत्सरोदिष्ट्या सोयमस्मास्वनुग्रहः । अत्रग्राम्यत्वेपिग्राम्यार्थस्यविदग्धोक्त्या तिरस्कृतत्वाद्गुणत्वम् ॥ २१ ॥ ओजःसमासभूयस्त्वन्तद्दीप्तार्थेषुवध्यते । विपर्ययोस्यासमस्तन्तद्दीप्तञ्चेन्नदोषभाक् ॥ यथा । योयःशस्त्रम्बिभर्त्तिस्वभुजगुरुमदःपाण्डवीनाञ्चमूनां योयःपाञ्चालगोत्रेशिशुरधिकवया गर्भशय्याङ्गतोवा । योयस्तत्कर्मसाक्षीचरतिमयिरणेयश्चयश्चप्रदीपःक्रोधान्धस्तस्यतस्यस्वयमिहजगतामन्तकस्यान्तकोहम् । अत्रासमस्तत्वेपि प्रौढबन्धत्वाद्गुणत्वम् ॥२२॥ समस्तमसमस्तंवाननिर्वहतियद्वचः । तदनिर्व्यूढमस्याऽपिनदोषःक्षापितद्यथा ॥ प्रसीदचण्डित्यजमन्युमञ्जसाजनस्तवायम्पुरतःकृताञ्जलिः । किमर्थमुत्कम्पितपीवरस्तनद्वयन्तवयालुप्रविलासमास्यते । अत्रसमस्तरीत्यानिर्वाहादनिर्व्यूढत्वेपिरसान्तरपरिग्रहेणरीत्यन्तरपरिग्रहाद्गुणत्वम् ॥२३॥ अनलङ्कारमित्याहुर

श्चेन्नदुष्यतीति । सुगममुदाहरणम् । व्यूढः प्रौढः ॥ २२ ॥ समस्तमिति । उपक्रान्तरीतेरनिर्वाहेमधुरसपर्यंतापीतिः स्खलतीतिदूषणताबीजमुक्तं तथाभूतरसानुगुण्यभिचार्यनुप्रवेशव्यञ्जनौचित्यादुपक्रमनिर्वाहःसर्वस्वायमानोगुणतामासादयति । तथाहि प्रसीदेत्यादीप्रणयकेलिकुपितकामिनीप्रसादनायांशृङ्गारविरोधिसमासव्यतिक्रमेणरीतेरप्यक्रमेरोषलक्षणभावानुभावभूःस्तनकम्पवर्णनायांसमासोनुप्रविष्टस्तिव्यक्तःपूर्वरीतेरनिर्वाहः । रसान्तरंप्रकृतविजातीयरसंसंबद्धोव्यभिचारीभावः ॥२३॥ अनलंकारमिति । अनुत्कृष्टाप्रविष्टविशेषणवद्वाक्यंनिरलङ्कारोपूर्वोत्तरवाक्यसंगतिकरणप्रयोजनकृतयानदो

लङ्कारोऽभिप्रेतंवचः । पूर्वोत्तारानुसन्धाने तस्यसाधुत्वमिष्यते ॥ यथा । निशम्य ताःशेषगवीरभिधातुमधोक्षजः । शिष्याय बृहतामपत्युःप्रस्तावमदृशद्दृशा । अस्यानलङ्कारत्वेपिपूर्वापरानुसन्धानप्रयोजनभूतत्वाद्गुणत्वम् ॥ २४॥ वाक्यात्रयाणान्दोषाणांगुणीभावोयमीरितः । यथावाक्यार्थदोषाणामदोषःकथ्यतेधुना ॥ समुदायार्थशून्यंयत्तदपार्थम्प्रचक्षते । तन्मत्तोन्मत्तबालानामुक्तेरन्यत्रदुष्यति ॥ यथा । क्वाकृत्यंशशलक्ष्मक्वनुकुलम्भूयोपिदृश्येतसादोषाणामुपशान्तयेश्रुतमहोकोपेपिकान्तम्मुखम् । किंवक्ष्यन्त्यपकल्मषाःकृतधियोरेखैवसान्यादृशीचेतःस्वास्थ्यमुपैहिकःखलुयुवाधन्योधरन्धास्यति । अस्यसमुदायार्थशून्यत्वेनापार्थस्यापिउन्मत्तवचनत्वाद्गुणत्वम् ॥ १ ॥ यदप्रयोजनंयच्चगतार्थंव्यर्थ

षः । कथंतथाभूतस्यकाव्यत्वमित्यपिनवाच्यम् । अनुगतेनवक्रीभावेनतत्समर्थनात् । व्यक्तमुदाहरणम् ॥ २४ ॥ सूत्रकारएववाक्यार्थदोषगुणीभावविवेचनंसंगमयति । वाक्यात्रयाणामिति । सत्तादिववनान्यनुक्रियमाणानिचमत्कारमर्पयन्ति । अतएव च्छायालंकारप्रादुर्भावाद्गुणोऽनित्यदोषतयाचानुकरणान्यदपिगुणीभवनबीजमुन्नेयमित्युदाहरणेनव्यञ्जयन्नाह । क्वाकृत्यमिति । अत्रश्रुतिशालिनोनायकस्यवासनापरिपाकवशाद्विप्रलम्भावेशेपिप्रथमंप्रादुर्भावः । क्वाकृत्यंशशलक्ष्मणःक्वनुकुलमिति।तदेवंशान्तरसानुयायिनसनन्तरमेवबाधित्वाचित्तानुरञ्जकप्रकृतरसाव्यभिचारिणाऔत्सुक्यस्यप्रादुर्भावोभूयोपिदृश्येतसेति । एवंदोषाणामुपशान्तयेश्रुतमित्याद्यौचित्यादीनांपूर्वंपूर्वंपरादुर्भूतानामुत्तरोत्तरभाविभिश्चिन्ताप्रभृतिभिरपवादेप्रकृतवासनाप्रौढिरवसेया । उन्मत्तवचनत्वादिति । रसाविष्टचेतसस्तदुत्कालिका

मेवतत् । तस्यापिङ्गापिनिर्दोषःप्रयोगोदृश्यतेय
था ॥ गीताविदुरवाक्यानिधर्माःशान्तनवेरिताः ।
नश्रुताभारतेयेनतस्यजन्मनिरर्थकम् । अत्रगीताविदुरवाक्यादीनाङ्कथायाम प्रयोजकत्वेपीतिहासव्याजेनचतुवर्गप्रतिपादनस्यारम्भएवप्रतिज्ञानाद्गुणत्वं तदिदमप्रयोजनम् ॥२॥ एवङ्गतार्थमपियथा । हृत्कण्ठवक्त्रश्रोत्रेषुकस्यनावस्थितन्तव । श्रीखण्डहारकर्पूरदन्तपत्रप्रभंयशः । अत्रैकेनैवोपमानेनशौक्ल्यप्रतीतौशेषोपमानपदानांव्यर्थत्वेपियशसः स्मर्यमाणत्वगीयमानत्वस्तूयमानत्वश्रूयमाणत्वैर्हृदयादिषु श्रीखण्डादिवदस्थानस्यप्रतीयमनत्वाद्गुणत्वम् ॥३ रिश्रविषेणपूर्वोक्तंयदिभूयोपिकीर्त्यते। तदेकार्थरसा

प्रायाणांभावानामव्यवस्थयाकीर्त्तनमुन्मादः ॥ १ ॥ यदप्रयोजनमिति । प्रबन्धार्थपोषेनाधायकवाक्यमप्रयोजनमर्थलाभप्रतिपादकतयाकृतकरंव्यर्थम् । एवकारोभिन्नक्रमस्तच्छब्दाऽनन्तरंद्रष्टव्यः । दृश्यतइत्यनेनतत्रतत्रप्रकृतसङ्गतौसत्यांदोषाभावोबोधयइतिदर्शितम् । यद्यपिभगवद्गीतायांमोक्षाधिकारिणामस्त्येवप्रकृतशान्तरसपरिपोषकत्वंतथापितदन्तर्गतानांभूयसामाहत्यनास्तिभीष्मविदुरवाक्यानांतु धर्माधिकारेप्रकृतानांव्यक्तएवनिष्प्रयोजनस्तावःसोयंयथासम्भवीयते तद्विवृणोति। अत्रेति । इतिहासरूपेप्रबन्धेसत्यपिशान्तस्यवाक्यार्थाभावेनबहूनामितिहासानांत्रिवर्गाधिकारित्वाच्चतुर्वर्गप्रतिपादनमेवमर्हैरभिमतं धर्मादित्रितयस्यचप्रासंगिकतयानपूर्ववदस्यार्थैकताविरोधः । तदिदमुक्तंव्याजेनेति । एवंचश्रुत्यादयितव्यविषयजिज्ञासोपादानेधर्मार्थिप्रवृत्तयेवाक्यमिदंसफलतामासादयद्गुणएवभवति । एवङ्गतार्थमपीति ॥ २ ॥ श्रीखण्डेनैवोपमानेयशसःशुद्धत्वमवगतंश्वेषोपमानपदानि केवलकृतकराणीतिव्यर्थत्वप्रसङ्गेस्मरणादिविशेषविवक्ष

क्षिप्रचेतसान्तन्नदुष्यति ॥ यथा । असारंसंसारंप
मुषितरत्नंत्रिभुवनन्निरालोकंलोकंमरणशरणम्बान्ध
नम्। अदर्पङ्कन्दर्पञ्जननयननिर्माणमफलञ्जगज्जीर्णा
रण्यङ्कथमसिविधातुंव्यवसितः। असारंसंसारमित्यु
क्त्वापरिमुषितरत्नंत्रिभुवनन्निरालोकंलोकञ्जगज्जी
र्णारण्यमितियदुक्तन्तस्यविशेषानभिधायकत्वेपिर
साक्षिप्रेनबक्त्राभिहितत्त्वाद्गुणत्वम् ॥ ४ ॥ संशयायै
वसन्दिग्धंयदिजातुप्रयुज्यते। स्यादलङ्कारएवासौ
नदोषस्तत्रतद्यथा ॥ कत्तोलम्भइपन्थिअ सत्थरअं
एत्थ गामणिघरम्मि। उस्सअपओहरम्पेक्खिऊण
जइवससितावससु। अत्र केनापिपथिकयूनाप्रावृ
डारम्भे ग्रामणीवधूः पीनोन्नतस्तनीसत्थरअमिति
स्वस्तरकव्याजेनशस्तरतंयाचितातम्प्रत्याचक्षाणेव
यथोक्तंब्रूते कुतोत्रग्रामणीगृहे स्वस्तराःकुतोवाश
स्तंरतमुन्नतौपयोधरौममहृदये नभसिवापयोधरा
न्दृष्ट्वायदिवससितदावसेतितदन्यगोपनायह्यर्थैरेव

यातिरस्क्रियतेयथासंख्यादिभङ्गिसौभाग्येनचगुणीभावइति॥३॥अविशे
षेणेति। पूर्वोक्तपूर्वोक्ताभिन्नतात्पर्यकमविशेषेणतात्पर्यावृत्तिप्रयोजन
मन्तरेणतन्मयीभवनंचेतसआक्षेपः। असारंसंसारमित्यनेनस्थावरज
ङ्गमप्रपञ्चस्यनिःसारतांप्रतिपाद्य"जातौजातौयदुत्कृष्टंतद्विरत्नं प्रचक्ष
त"इति। परिमुषितरत्नमित्यत्रापितावानेवतात्पर्यार्थः।एवंनिरालोकं
लोकं जगज्जीर्णारण्यमित्यत्रापिद्रष्टव्यं सुगममन्यत्॥४॥संशयायैवेति।
मिश्रोविरुद्धार्थवाक्यंसंशयापादनेनदुष्यतीत्युक्तम् ॥ यदातुसन्देहएव
तात्पर्यमवधार्यते तदासएवरञ्जकतयालङ्कारतामारोहतीतिकत्थनंगु
णीभावइतितदिदमुक्तम्। स्यादलंकारएवेति।कुतोलम्भइतेपथिकस्वस्तरः

पदैःप्रयुक्तमितिसन्दिग्धस्याप्यस्यगुणत्वम्॥५॥ वाक्येप्रबन्धेचार्थानाम्पौर्वापर्यविपर्ययः।दोषःसोपक्रमोनामचित्रहेतौनदुष्यति॥ यथा। पश्चात्पर्यस्यकिरणानुदीर्णश्चन्द्रमण्डलम्। प्रागेवहरिणाक्षीणामुदीर्णोरागसागरः। अत्रपौर्वापर्यविपर्ययादपक्रमदोषस्यचन्द्रोदयम्प्रतिरागोद्दीपनप्रकर्षप्रकाशनत्वाद्दोषः॥ ६॥ यस्मिन्नीतिरनिर्वाहःखिन्नन्तदभिधीयते। नदोषस्तस्यतुङ्गापियत्रच्छायानहीयते।यथा॥ अभिनवबधूरोषःस्वादुःकरीषतनूनपादसरलजनाश्लेषस्तुषारसमीरणः। गलितविभवस्यज्ञेत्राद्यद्युतिर्मसृणारवेःविरहिवनितावक्त्रक्लैब्यम्बिभर्तिनिशाकरः। अत्रोपमानानिसामान्यवचनैःसमस्यन्तइतिप्र

शस्तरतंचात्रग्रामणीगृहेग्रामणीग्रामप्रधानं उन्नतपयोधरान्मेघान् पयोधरौन्नत्यौवादृष्ट्वायदिवससितद्वस। अत्रप्रष्टुःसंदेहजननेननिभृतानुरागप्रकाशनंपथिकविषयेप्रतीयते। द्व्यर्थैरिति। तदुक्तंद्व्यर्थैःपदैःविशुनयेच्चरहस्यवस्त्विति॥५॥ वाक्येइति॥अर्थानांकार्यकारणभूतानांतेषामेवपौर्वापर्यनियमाद्यइतिपूर्वार्द्धव्याहार्यम्।चित्रहेतावितिप्रसिद्धरूपविपर्यासेनहेतुवचनद्वारापक्रमवाक्यार्थपरिपोषाधानंचित्रहेतुःपर्यस्तविस्तार्यचन्द्रोदयरागोद्दीपनयोःसत्यपिहेतुहेतुमद्भावेनपौर्वापर्येप्रथमंरागसागरःपश्चाच्चन्द्रमण्डलमुदीर्णमितिविपर्यासप्रतीतिसमसमयमुद्दीपनविभावतानुसंधानाद् हिमांशोरतिशीघ्रकारिताप्रकाशनात् प्रकृतशृङ्गाररसोदीप्यते।एवंकुलकादिरूपंप्रबन्धातर्गतवाक्येष्वपिगुणत्वमवसेयम्॥६॥यस्मिन्निति।वाक्यार्थस्यधर्मिणोयदलङ्कारभङ्ग्याप्रक्रमस्थयानिर्वाहणाभावःखेदःसतुपूर्वालंकारविश्रान्तौप्रतीतेरस्खलनेनदोषः।गुणत्वंचतस्यभङ्ग्यन्तरैरपिप्रकृतालंकारेध्वननात्।तथाहिअभिनवबधूरोषस्वादुरसरलजनाश्लेषश्चक्रू इत्युपमानानिसामान्यवचनैःसमस्यन्तइतिस

क्रान्तरीतेरनिर्वाहेपिसमासव्यापारत्वेनैवेवशब्दत
द्धितयोःप्रयोगेप्रत्युतच्छायोत्कर्षइतिगुणत्वम् ॥७॥
लोकातीतइवार्थेयःसोतिमात्रइहेष्यते । वार्तादौ
तेनतुष्यन्तिविदग्धानेतरेजनाः ॥ तच्चवार्त्ताभिधा
नेषुवर्णनास्वपिविद्यते । कान्तञ्जगतितत्कान्तंलौ
किकार्थानुयायिवत् ॥ लौकिकार्थमतिक्रम्यप्रस्था
नंयत्प्रवर्तते । तदत्युक्तिरितिप्रोक्तङ्गौडानाम्मनसो
मुदे॥यथा।देवधिष्ण्यमिवाराध्यमद्यप्रभृतिनोगृहम्।
युष्मत्पादरजः पातधौतनिश्शेषकल्मषम् । अत्रा
तिमात्राख्येदोषेपिवार्ताभिधानेभिधेयस्यकान्तगुण
स्याभ्यनुज्ञानाद्गुणत्वम् । यथावा । अल्पन्निर्मि
तमकाशमनालोच्यैववेधसा।इदमेवंविधम्भाविभव
त्याःस्तनजृम्भणम्।अत्रातिमात्रेपिवर्णनार्थत्वाद्गु
णत्वम् । अथानतिमात्रङ्कीदृक् । उच्यते । वार्ते
तावत् । यथा । गृहाणिनामतान्येवतपोराशिर्भ
वादृशः । संम्भावयतियान्येवपावनैःपादपांसुभिः ।

मासद्वयेनोयमामुपक्रम्यमलिनविभवस्याज्ञेवेतिसमासत्यागाद्विरहिव
नितावक्रक्लैब्यंबिभर्तीतिचान्तरधर्मारोपेणोचमात्यागात्सत्यपिरीतेरनि
र्वाहेउपमायामेवपर्यवसानंसमाधानहेतुः।गुणत्वहेतुमाह।व्याख्यापर
त्वेनेति। गलितविभवाज्ञामसृणेतिसमासेकर्त्तव्येयोयमिवशदप्रयोगः
सइवार्थेपूर्वोसमासौबोधयति।क्लैब्यंबिभर्त्तीतिसामान्यालंकारेकथमन्य
धर्ममन्योवहतीतिप्रतिसंधानसमसमयंवक्त्रक्लैब्यमस्येत्यंतर्गतोपमाप्र
कटीभावेउपमासमासपदयोरपिसाप्रतीयतइति सेयंकविचातुरीप्रती
यमानच्छायामेवपुष्णातितदिदमुक्तम्।प्रत्युतेति॥७॥अनामयेप्रियालापे
वार्तंवार्त्ताचकीर्त्त्यते।वर्णनास्वपीत्यादिपदविवरणंदृश्यतेकान्तमित्य

अथवर्णनायांयथा।अनयोरनवद्याङ्गिस्तनयोर्जृम्भ
माणयोः। अवकाशोनपर्याप्तस्तवबाहुलतान्तरे॥८॥
परुषन्निष्ठुरार्थन्तुयदतीवविगर्हितम्। विरुद्धल
क्षणाद्यासुतदुक्तिषुनदुष्यति॥ यथा। हालाहलंवि
षम्भुङ्क्ष्वसखिमातत्रविश्वसीः। यद्वानदह्यसेकाष्ठैः
स्वल्पैस्त्वमपिमेमतिः। अत्रपारुष्येपिविरुद्धलक्ष
णयार्थान्तरस्यलक्षितत्वादगुणत्वम्॥९॥ अप्रस्तु
तरसम्प्राहुर्विरसंवस्तुसूरयः। अप्राधान्येतदेष्टव्यंशि
ष्टैःस्याद्रसवस्तुनोः॥ यथा। क्षिप्तोहस्तावलग्नःप्र
सभमभिहतोव्याददानोंशुकान्तंगृह्णन्केशेष्वपास्तश्र
णनिपतितोनेक्षितःसम्भ्रमेण।आलिङ्गन्योवधूतस्त्रि
पुरयुवतिभिःसाश्रुनेत्रोत्पलाभिःकामीवार्द्रापराधः
सदहतुदुरितंशम्भवोवःशराग्निः। अत्रक्रुधेश्रृङ्गा
रस्याप्रस्तुतत्वेपिशम्भुप्रभाववर्णनाङ्गभूतत्वेनद्वयोर
प्यप्राधान्यादवैरस्येनगुणत्वम्॥१०॥ हीनंयत्रोपमा

भिसंबन्धः।लौकिकार्थानुयायियज्जगतिलोकेकान्तमुच्यतेतथाभूतमति
क्रम्ययत्कवीनांप्रस्थानंप्रवर्त्ततेतदपिगौडानांमनसोमुदेप्रोक्तंशब्दाड
म्बरात्मकगौडरीतिप्रियाणांविदग्धकामाज्ञापकंसद्गुणीभवतीतिश्लो
कार्थः। धिष्ण्यंगृहम्। ननुप्रियालापवर्णनयोरेवंविधास्वलोकेकाव्ये व
वचनसंदर्भइतिनास्त्यतिमात्रतानतिमात्रतयोर्भेदइतिपृच्छति। अथे
ति॥७॥सुगममन्यत्। परुषमिति।विरुद्धलक्षणालौकिकीतत्याहिअटित्य
भिधानाविनाभावादपरुषार्थप्रतीतेरभिधानतःपारुष्यंनदोषोलक्षणाप्र
रिग्रहेणचगुणत्वम्। तदाहुः। अभिधेयाविनाभावप्रतीतिर्लक्षणेति
या। सैषाकाव्येदग्धवक्राजीवितंवृत्तिरिष्यते॥८॥ अ-स्तुतेति॥ अ
प्राधान्यइत्युपलक्षणं बाच्यत्वेपीतिचबोद्धव्यम्। रसवस्तुनोःपरस्पर

नंस्यादुपमेयंगुणाधिकम्। हीनोपमन्तदस्याहुःक वयःक्वाप्यदुष्टताम्॥ यथा। ततःकुमुदनाथेनकामि नीगण्डपाण्डुना। नेत्रानन्देनचन्द्रेणमाहेन्द्रीदिग लङ्कृता। अत्रोपमानस्यहीनतायामपिरागातिशय हेतुत्वाद्गुणत्वम्॥ ११॥ यत्रोपमानमुत्कृष्टमुपमे यन्निकृष्यते। ज्ञेयन्तदधिकौपम्यमस्यापिक्वाप्यदो षता। यथा। कान्त्याचन्द्रमसन्धास्त्रासूर्यन्धैर्येण चार्णवम्। राजन्ननुकरोषित्वंसौभाग्येनापिमन्मथ म्। अस्याधिकौपम्येपिराज्ञोलोकपालांशत्वेनशि ष्टैरादृतत्वाद्गुणत्वम्॥ १२॥ उपमानेनवैषम्याद्व वेदसदृशोपमम्। तस्याभ्यनुज्ञामिच्छन्तिव्यतिरे कोपमादिषु॥ यथा। प्रहितःप्रधनायमाधवान हमाकारयितुम्महीभुजा। नपरेषुमहौजसश्कुलादप कुर्वन्तिमलिम्लुचाइव। अस्यासदृशोपमत्वेपिव्य तिरेकोपपादकत्वाद्गुणत्वम्॥ १३॥ यस्योपमानं लोकेषुनप्रसिद्धन्तदिष्यते। अप्रसिद्धोपमंनामतत्क्व चिन्नैवदुष्यति॥ यथा। उद्भर्भहूणरमणीरमणोप

विरोधिरसत्यज्जकयोः। यद्वा। मिथोविरोधिरसरूपयोरेवस्तुनोस्त दाह। बाध्यानामङ्गभावं वाप्राप्तानासुविक्तसलेति॥१०॥हीनमिति। जातिप्रमाणाज्यामपकृष्टंहीनंचन्द्रापेक्षयाकामिनीकपोलस्यापकर्षेआ त्मनस्तुल्यतासुद्दीपनत्वप्रतिपाद्यमानःप्रकृतस्यङ्गारप्रकर्षमर्पयंश्चती तिगुणत्वम्॥ ११॥ एवमधिकोपमेपि॥ १२॥ उपमानेनवैषम्यमन्वये नसादृश्याभावात्। व्यतिरेकोपमादीत्यादिग्रहणाद्व्यतिरेकदृष्टान्तौ क्त्यादिपरिग्रहः॥१३॥ यस्योपमानमिति॥ लोकप्रसिद्धमेवकविभिरुप मानेकान्तंभवतितेनयत्रलोकेप्रसिद्धेनसहोपमावर्णनेसंभवदप्यप्रसि

मर्दभुग्नोन्नतस्तननिवेशनिभंहिमांशोः । बिम्बङ्क ठोरबिसकाण्डकडारगौरैर्विघ्नोः पदम्प्रथमसग्रकरै र्ध्यनक्ति। अस्यांप्रसिद्धोपमत्वेनदूषणत्वेपिद्वयोरपि स्मृङ्गारोद्दीपकत्वसाम्याद्गुणत्वम्॥१४॥ निरलङ्कारमि त्याहुरलङ्कारोज्झितंवचः । अर्थैार्जित्येषुतस्यापिक्व चिद्विद्दोषतामता॥ यथा । याञ्चादैन्यपराभवप्रणयि नीन्नेक्ष्वाकवःशिक्षिताःसेवासंवलितः कदारघुकुले मौलौनिबद्धोञ्जलिः । सर्वन्तद्विहितन्तथाप्युदधि नानैवोपरोधः कृतःपाणिःसंप्रतिमेहठात्किमपरंरूप ष्टुंन्धनुर्वाञ्छति ॥ अत्रनिरलङ्कारत्वेपिअर्थैार्जित्या द्गुणत्वम् ॥ १५ ॥ असभ्यार्थंयदश्लीलन्तदर्थान्त रवाचिवा।तस्येहदृश्यतेभूम्नाप्रयोगोनाभिदुष्यति॥ यथा । अद्यापितत्कनककुण्डलघृष्टगण्डमास्यंस्म रामिविपरीतरताभियोगे । आन्दोलनश्रमजलस्फु टघर्मबिन्दुमुक्ताफलप्रकरविच्छुरितम्प्रियायाः । अ

द्वेपमत्वंरसानुप्रवेशेनगुणीभवति।उद्भटेत्वेनत्तनाग्रश्यामिकातयालाञ्छनानुकरणमभिलषितम्॥ १४॥ निरलङ्कारमिति॥ दैन्यपराभवप्रणयिनीमित्याद्युत्कृष्टविशेषणयोगादस्तिशब्देऽस्पष्टेवक्रताऽर्थेतुनास्तिवक्रत्वंचालङ्कारइति।यद्यपिवाक्यार्थोनिरलङ्कारइवभासतेतथापि विशेषतोलङ्कारानध्यवसायेपिसामान्येनवक्रताप्रकाशतएव। नहिलौकिकशास्त्रीयवचनार्थवैपरीत्यमिहप्रतीयते। तदिदमुक्तमर्थौर्जित्यादिति॥ १५॥ अस्तिहिवयंयाचामहइतिउक्तेयाच्ञाभिक्षाकरोनालक्षिताइत्युक्तौनायकप्रकर्षाभिव्यञ्जकोविशेषइत्याह । असभ्यार्थमिति । क्वचित्प्राथमिकएवपदार्थसंसर्गोश्लीलःक्वचित्तुनतस्मिंस्तथाभूतेपिसंसर्गान्तरमितियदश्लीलमर्थान्तरवाचिवेत्युक्तम्। कविभिरविगीत

व्राह्मीलार्थैपिकविभिरविगीतत्वाद्गुणत्वम् ॥ १६॥ देशोद्रिवनराष्ट्रादिःकालोरात्रिदिवर्तवः । नृत्यगीत प्रभृतयःकलाःकामार्थसंश्रयाः॥ चराचराणांभूताना म्प्रवृत्तिर्लोकसंज्ञिता । हेतुविद्यात्मकोन्यायःसंस्मृ तिःश्रुतिरागमः ॥ तेषुतेष्वयथारूढंयदिकिञ्चित्प्रव र्तते । कवेःप्रमादाद्देशादिविरोधीत्येतदुच्यते ॥ विरो धःसकलोप्येषकदाचित्कविकौशलात् । उत्क्रम्यदो षगणनांगुणवीथींविगाहते ॥ तत्रदेशविरुद्धस्यगुणी भावोयथा। तस्यराज्ञःप्रभावेणतदुद्यानानिजज्ञिरे । आर्द्राश्मुकप्रवालानामारूपदंसुरशाखिनाम् । अत्रदे शविरुद्धत्वेपि तस्यराज्ञःप्रभावेणेतिकारणोपन्यासा द्गुणत्वम् ॥१८॥ कालविरुद्धस्ययथा । राज्ञांविना शपिशुनश्चारखरमारुतः। चुम्बत्कन्दम्बकुसुमैःस हसप्रच्छदोद्गमान्। अत्रकालविरुद्धत्वेपिराज्ञांविना शपिशुन इत्यनिष्टसूचकोत्पातरूपत्वाद् गुणत्वम् ॥१७॥लोकविरुद्धस्ययथा। ऐन्दवादर्चिषःकामीशि शिरंहव्यवाहनम् । अबलाविरहक्लेशविह्वलोगणय त्यलम् । अत्रलोकविरुद्धत्वेपिकामिभिस्तथासंवेद्य मानत्वाद्गुणत्वम् ॥ १९ ॥ युक्तिविरुद्धस्ययथा ।

त्वादिति।अविपरीतादिपरीतंरतसुत्कण्ठ्यतइतिशास्त्रकारैरात्मानात्तस्य शृङ्गारोद्दीपनतयाकविभिरादृततत्वादित्यर्थः॥१६॥देशेद्रीति। आदिपदे नद्वीपादिपरिग्रहः ।कामार्थसंश्रयाः । अर्थसंश्रयाः ।प्रवृत्तयोवस्थाविशे षाः। हेतुविद्यान्वीक्षिकी । अयथारूढंतथाचाप्रसिद्धम्॥१७॥कालविरु द्धस्येति। उपघातउत्पातः॥१८॥१९॥ससंकोचइति।यदिचन्द्रादिन्यःकुसु

ससङ्कोचश्चन्द्रादिवकुमुदराशेरशरणःससूर्यात्कोका
नांविरहइवलुप्तप्रतिविधिः । गुणेभ्यस्तेखेदप्रशमन
करेभ्योपियदयङ्खलानामुद्वेगस्तदिदमनृतादेवमरण
म् । अत्रयुक्तिविरुद्धत्वेपिच्छेकोक्त्यासम्भाव्यमानो
पमयातथाप्रतीतेर्गुणत्वम् ॥ २० ॥ औचित्यविरु
द्धस्य यथा । तेनाथनाथदुरुदाहरणातपेनसौम्या
पिनामपरुषत्वमभिप्रपन्ना ।जज्वालतीक्ष्णविशदाः
सहसोद्धिरन्तीवागर्चिषस्तपनकान्तशिलेवसीता ।
अत्रस्त्रीत्वादौचित्यविरोधेपितत्समयोचितत्वाद्गु
णत्वम् ॥ २१ ॥ वचनविरोधोयथा । परदाराभिला
षोमेकथमार्यस्ययुज्यते । पिबामितरलंतस्याःकदा
नुरदनच्छदम् । अत्रवचनविरोधेपिवक्तुस्तथावि
धावस्थत्वाद्गुणत्वम् ॥ २२ ॥ धर्मविरोधस्ययथा ।
पञ्चानाम्पाण्डुपुत्राणाम्पत्नीपाञ्चालकन्यका । स
तीनामग्रणीस्त्वासीद्दैवोपिविधिरीदृशः।अत्रधर्मवि
रोधेपिदैवोविधिरित्यनेनाभिहितत्वाददोषः॥२३॥
धर्मशास्त्रविरुद्धस्ययथा । नीतिरापदियङ्गम्यःपरस्त
न्मानिनोह्रिये । विधुर्विधुन्तुदस्येवपूर्णस्तस्योत्स
वायसः । अत्रापन्नःशत्रुरभियातव्यइतिनीतिस्तच्च
मानिनोह्रियेभवतिइतिविरुद्धमपिउद्भुतपुरुषभाषि

दसंकोचादयोभवेयुस्तदाभवद्गुणेभ्यःखलानामुद्वेगउपसीयतेनतुतथासं
भवतितेनायमलौकिकत्वादाश्रयमर्पयतीतिवाक्यार्थपरिपोषात्तथोप
न्यासोगुणएवेति॥२०॥२१॥वचनविरोधस्येति।अष्टमीकाश्रावस्था॥२२॥दै
वोहीति। सिद्धादेशाच्चसतीत्वंपञ्चालकन्यकायाः। तिरस्कृतमित्यत्रए

तत्वान्नदुष्यतीतिगुणत्वम् ॥ २४ ॥ कामशास्त्रवि
रुद्धस्ययथा । दोलातिप्रेरणत्रस्तवधूजनमुखोद्गत
म् । कामिनांलयवैषम्याद्गेयंरागमवर्धयत् । अत्र
त्रासतोलयवैषम्येनगेयस्यरागहेतुत्वेपिकामिनीमु
खोद्गीर्णत्वाद्रागविवर्धनत्वेनगुणत्वम् ॥२५॥ इत्थं
गुणाश्चदोषाश्चकाव्येदोषगुणाश्चये । आख्यातास्ते
स्फुटंसम्प्रत्यलङ्कारान्प्रचक्ष्महे ॥ १ ॥ युवतेरिवरू
पमङ्गकाव्यंस्वदतेशुद्धगुणन्तदप्यतीव । विहितप्रण
यन्निरन्तराभिःसदलङ्कारविकल्पकल्पनाभिः ॥ २ ॥
यदि भवतिवचश्रयुतंगुणेभ्योवपुरिवयौवनवन्ध्यम
ङ्गनायाः । अपिजनदयितानिदुर्भगत्वन्नियतमलङ्क
रणानिसंश्रयन्ते ॥ ३ ॥ दीर्घापाङ्गन्तयनयुगलम्भू
षयत्यञ्जनश्रीस्तुङ्गाभोगौप्रभवतिकुचावर्चितुंहारय
ष्टिः । मध्यक्षामेवपुषिलभतेस्थानकूर्पासलक्ष्मीःश्रो

वधापञ्चधाविवक्षितइत्यागमः ॥२३॥उद्गतपुरुषभाषितत्वादिति । पूर्व
पत्ततयासिद्धाग्तोपोद्गातत्वादित्यर्थः ॥२४॥ लयवैषम्यादिति । गीतस्य
कलाप्रकथनात्तस्यचविषमलयस्यारञ्जकत्वात्कथंरागवर्द्धनमितिदूष
णंदोलागतागतत्रस्तकामिनीगीतप्रभावोक्तेश्चमत्कारकारित्वात्तिरो
धीयतइतिगुणभावंवनीयतेभावान्तरालवर्त्तीकामोलयः ॥२५॥ननुगुणौ
रेवशब्दार्थयोःसनाथीकरणेकिमलङ्कारविवेचनप्रयासेनेत्यत्राह । यु
वतेरिति । अङ्गेत्याक्षेपसंबोधने। अलङ्कारसाहित्यबुद्धिसंगतिःप्रणयः।
विकल्पोविशेषस्तर्हिकिमुत्तरसिद्धैःपूर्वैरेतिन्यायेनत्यज्यन्तांगुणाइत्य
तआह॥२॥यदिभवतीति । विवृतमेतत्॥३॥तेचालङ्कारायथास्थानंनिवे
श्यमानाएवसहृदयरञ्जनक्षमाइतिकवीञ्शिक्षयंति।दीर्घेति।तेनशब्दा

णीविम्बेगुरुणिरशनादामशोभाम्बिभर्त्ति ॥ ४ ॥
इतिश्रीमहाराजाधिराजभोजदेवेनविरचिते
सरस्वतीकण्ठाभरणनाम्निशब्दालङ्कार
शास्त्रेगुणविवेचनन्नामप्रथमः
परिच्छेदः ॥

दिविषयविभागेनालङ्कारविवेचनंसप्रयोजनमेवेतितात्पर्यार्थः । शेषम तिरोहितम् ॥ २ ॥ इतिश्रीमिश्रश्वेश्वरविरचितेरत्नदर्पण नाम्निसरस्वतीकण्ठाभरणविवरणेदोषगुण विवेचनोनामप्रथमःपरिच्छेदः ॥

शुभंभूयात् ॥

॥ सटीके सरस्वतीकण्ठाभरणे ॥

॥ द्वितीयःपरिच्छेदः ॥

———०———

श्रीगणेशायनमः ॥ शब्दार्थोभयसंज्ञाभिरलङ्कारान्कवीश्वरः । बाह्यानाभ्यन्तरान्बाह्याभ्यन्तराश्चानुशासति॥१॥येव्युत्पत्त्यादिनाशब्दमलङ्कर्तुमिहक्षमाः। शब्दालङ्कारसंज्ञास्तेज्ञेयाजात्यादयोबुधैः॥२॥जातिर्गतीरीतिवृत्तिच्छायामुद्रोक्तियुक्तयः।भणितिर्गुम्फणा

श्रीगणेशाय नमः ॥ क्षेत्रमध्यंविशालाक्षीयस्याधिवसतिप्रिया । श्रविमुक्तप्रतिष्ठायतस्मैकामदुहेनमः॥१॥ आद्यस्फुरतुवाग्देव्याःकण्ठाभरणकौतुकम्। मयिप्रकृमनोवृत्तौतन्वानेरत्नदर्पणम् ॥२॥ एवंदोषगुणेषुनिर्णीतेष्वलङ्काराः प्राप्तावसरास्तत्रालङ्कारसामान्यलक्षणमाद्यपरिच्छेदेतद्विभागंदर्शयन्परिच्छेदत्रयंसङ्गमयति। शब्दार्थोभयसंज्ञाभिरिति। कृत्यंभूतलंक्षणेतृतीया मध्यमपदलोपीसमासः।तेनशब्दालङ्कारार्थालङ्कारोभयालङ्कारसंज्ञाभिरित्यर्थः । गुणप्रस्तावेबाह्यत्वादिकंविवृतं शब्दोवच्छेदकतयाप्रथमप्रतिसंधेयभावेनचशरीरस्थानीयोबाह्यस्ततस्तदाश्रयाअलङ्काराअपिबाह्याः। अर्थोविच्छेद्यतयापश्चादनुसंधेयतयाचात्मतुल्यआभ्यन्तरस्तेनतदाश्रयाअलङ्काराअप्याभ्यन्तराः। एतेनबाह्याभ्यन्तराव्याख्याताः। आश्रया श्रयिभावश्चयथातथोक्तमेव । उभयालङ्कारेषुयोगस्यप्रायिकत्वमाश्रित्यकवीश्वराणामनुशासनमुक्तमेतद्विवेचयिष्यते चतुर्थारम्भे ॥१॥शब्दालङ्कारसामान्यलक्षणमाह। येव्युत्पत्तीति । विशिष्टाव्युत्पत्तिर्व्युत्पत्तिर्लौपागमविकारादिप्रपञ्चः । अतएवहिसंस्कृतादिजातयोऽप्यवतिष्ठन्ते।आदिग्रहणाद्गुरुलघुसन्निवेशादयोगत्याद्यवच्छेदकयोविंशतिरूपात्ताः । बाह्यकङ्कणादिसाम्यादियंसंज्ञाप्रवृत्तेत्याह ।

शय्यापठितिर्यमकानिच॥३॥श्लेषानुप्रासचित्राणिवाक्वावाक्यम्प्रहेलिका। गूढप्रश्नोत्तराध्येयश्रव्यप्रेक्ष्याभिनीतयः॥४॥चतुर्विंशतिरित्युक्ताःशब्दालङ्कारजातयः। अथासांलक्षणंसम्यक्सोदाहरणमुच्यते॥५॥तत्रसंस्कृतमित्यादिर्भारतीजातिरुच्यते। सात्वौचित्यादिभिर्वाचामलङ्कारायजायते॥६॥संस्कृतेनैवकेप्याहुःप्राकृतेनैवकेचन। साधारण्यादिभिःकेपिकेचनम्लेच्छभाषया॥७॥नम्लेच्छितव्यंयज्ञादौस्त्रीषुनाप्राकृतंवदेत्। सङ्कीर्णन्नाभिजातेषुनाप्रबुद्धेषुसंस्कृतम्॥८॥देवाद्याःसंस्कृतम्प्राहुःप्राकृतङ्किन्नरादयः। पैशाचाद्यम्पिशाचाद्याःमागधंहीनजातयः॥९॥संस्कृतेनैवकोप्यर्थःप्राकृतेनैववापरः। शक्योरचयितुङ्कश्चिदपभ्रंशेनजायते॥१०॥पैशाचाशौरसैन्यन्योमागध्यन्योविब

शब्दालंकारसंज्ञाइति॥२॥जातिरित्यादि।तेचप्रतिविशेषंवक्ष्यन्ते॥३॥४॥शब्दालङ्कारजातयः।शब्दालङ्कारसामान्यानि॥५॥स्वरूपस्थितौरूपान्तरगवेषणमनुचितमतोजातेःप्राधान्यात्प्रथमंलक्षणमित्याह।तत्रेति।संस्कृतमितिभावप्रधानोनिर्देशः।भारतीग्रहणंस्पष्टार्थम्।नन्ववश्यंशब्देनसंस्कृताद्यन्यतमेनभवितव्यंतत्कोत्रकवेः शक्तिव्युत्पत्त्योरंशोयेनालङ्कारतास्यादित्यतआह।सेति।औचित्यादृष्टएवालङ्कारोऽस्तिचसंस्कृतादेरपितथाभावइतिभावः॥६॥यद्यप्यर्थौचितीपूर्वंदर्शयितुमुचितातथापिप्राधान्यमावेदयितुंपृथक्औचितीमाह।संस्कृतेनैवेति॥७॥विषयौचितीमाह।नम्लेच्छितव्यमित्यादि।म्लेच्छनमपशब्दःप्राकृतंसंस्कृतभवम्।अभिजातःशुद्धान्वयः॥८॥अथकेसंस्कृताद्युचितवक्तारइत्यतआह।देवाद्याइति।आदिग्रहणेनऋषिभूमिपतिप्रभृतयः॥९॥वाच्यौचितीन्दर्शयति।संस्कृतेनैवेति।यथाहि।देवतास्तुत्यादौसंस्कृतस्यगल्भतेनतथाप्राकृतादि।यथाचसूत्मवस्तुस्वरूपो

ध्यते। द्वित्राभिः कोपि भाषाभिः सर्वाभिरपि कश्चन॥११॥
नात्यन्तं संस्कृतेनैव नात्यन्तन्देशभाषया। कथाङ्गोष्ठी
षु कथयल्लँ लोके बहुमतो भवेत्॥१२॥ शृण्वन्ति लटभंला
टाः प्राकृतं संस्कृतन्द्विषः। अपभ्रंशेन तुष्यन्ति स्वेन
नान्येन गुर्जराः॥१३॥ ब्रह्मन्विज्ञापयामि त्वां स्वाधि
कारजिहासया। गौडस्त्यजतु वागाथामन्यैवास्तु स
रस्वती॥१४॥ केभूवन्नाढ्यराजस्य राज्ये प्राकृतभाषि
णः। काले श्रीसाहासाङ्कस्य केन संस्कृतवादिनः॥१५॥
गिरः श्रव्या दिव्याः प्रकृतिमधुराः प्राकृतधुराः सुभव्यो
पभ्रंशो सरसवचनम्भूतवचनम्। विदग्धानामिष्टेमग
धमथुरावासभणितीनिबद्धा यस्तेषां स इह कविराजो
विजयते॥१६॥ शुद्धा साधारणी मिश्रा सङ्कीर्णानन्यगा

दृङ्कने प्राकृतस्य सौष्ठवन्न तथा संस्कृतादेरित्यादि॥१०॥ द्वित्राभिः कोपि
काव्यसमस्याभेदस्यार्थः। सर्वाभिः कश्चन प्रकरणादेरर्थः॥११॥ विषयौचि
त्यमेव क्वचिद्विशेषे कान्तिप्रकर्षमर्पयतीत्याह। नात्यन्तमिति॥ समान
बुद्धिशीलवयसां विनोदार्थमासनबन्धो गोष्ठी॥१२॥ देशौचितीमाह। शृ
ण्वन्तीति। लटभम्मनोज्ञम्। स्वेन गुर्जरजातीयेन॥१३॥ ब्रह्मन्नित्यादिना
निन्दार्थानुवादेन गौडेषु प्राकृतानौचित्यं राजशेखरेणाव्यञ्जितम्॥१४॥ स
मयौचितीन्दर्शयति। केभूवन्निति। आढ्यराजः शालिवाहनः साहसा
ङ्को विक्रमादित्यः। ग्रन्थकृत्पूर्वजतया श्रीपदम्॥१५॥ ता इमाः परस्परस
ङ्कीर्णाः षडेव संस्कृतादिभाषा भवन्तीति सामान्यविभागमेतद्विरचनप्रयो
जनञ्चोपसंहरति। गिरइति। दिव्याः संस्कृता भूतवचनं पैशाचम्।
मथुरावासिभणितिः शौरसेनी। तेषामिति। तच्च भूतवचनं सचाप
भ्रंशस्ताश्च दिव्याद्या इति नपुंसकमनपुंसकेनेत्येकशेषः पाक्षिकं बहुवचन
म्। प्रतिभार्थप्राणनाजीवद्वर्णनानिपुणो हि कविः स एव हि सर्वपथीन
तादृगुक्तिसिद्धिसंपन्नः कविराजोऽत एव विजयते सकललोकशास्त्रवचन

मिनी। अपभ्रष्टेतिसाचार्यैर्जातिःषोढानिगद्यते ॥१७॥ तासूत्तमपात्रप्रयोज्यासंस्कृतजातिःशुद्धायथा। उन्नमितैकभ्रूलतमाननमस्याःपदानिरचयन्त्याः। कण्ठकितेनप्रथयतिमय्यनुरागंकपोलेन ॥१॥ मध्यमपात्रप्रयोज्याप्राकृतजातिःशुद्धायथा। तुज्झणआणेहिअअम्ममउणमअणोदिआअरत्तिंअ। णिक्किवतवेइवलिअंतुहवुत्तमणोरहाइअङ्गाइम्* ॥२॥ हीनपात्रप्रयोज्यामागधिकायथा। शदमाणुशमंशभालकेकुम्भशह

निर्मातृन्यःप्रकर्षेणावर्त्ततेइति ॥१६॥ संस्कृतादिषुयथायोगंशुद्धादिभेदेनजातिःषोढाभिद्यतइत्याह। शुद्धासाधारणीति। इह भाषारूपविषयभेदेनभिन्नाः संस्कारायानधिकृत्यपाणिनिवररुचिप्रभृतीनामनुशासनानिश्चवतिष्ठन्ते। तद्यत्रैकएवसंस्कारःप्रत्यभिज्ञायतेसाशुद्धा। संस्कारान्तराग्रहणात्। यत्रतुलक्षणसम्भेदेननानासंस्कारसम्पातःक्षीरनीरवत्सासाधारणी। रूपसाधारण्यान्नरसिंहवद्भाषाभेदव्यवस्थितभागद्वयात्मिकामिश्रा। रूपमिश्रणात्। तिलतण्डुलन्यायेनसङ्कीर्णा विजातीयवस्त्वन्तरव्यतिरेकएवलोकेसङ्कीर्णव्यवहारात्। यापुनःप्रकृतिभावेनापिभाषान्तरसम्पर्कान्नसहतेसानन्यगामिनी। संस्कारसंभेदेनवाप्रकृतिभावेनवानान्यंगच्छतियतोपशब्दरूपाऽपभ्रष्टा॥१७॥तासूत्तमेति। पात्रलक्षणमुत्तमादिभेदश्चपञ्चमेवक्ष्यते। उन्नमितैकेति। पदानिप्रकृतानङ्गलेखोचितानिनिर्ध्याजप्रेमगर्भाणि। अतएवावापोद्वापप्रतिसन्धाननिमग्नमानसायाश्चिन्तानुभावरूपंभ्रूलताविरेचितमिवासीत्। हस्ततलनिहितैककपोलायास्तादृक्पुलकितैककपोलदर्शनादतिस्नानात्माश्चङ्कारःसुप्रबुद्धइवतत्कालन्नायकस्यापीतिमिथोनुबन्धलक्षणाऽपूर्वानुरागकक्षामधिरूढारतिरेवकाव्यसर्वस्वायते। अत्रचकस्यचित्पद्यस्यभाषान्तरसाधारण्येपिभूयसासुदाहरणात्वमेवमन्यत्रापि ॥१॥ तुज्झेति। वलिअम्बलवत्कृतमभिमुखम् ॥ २ ॥ शदमाणुशेति। शतम्मानुषमांसभारःकुम्भसहस्रंवसाभिःसञ्चिता। अनिशञ्चपिबा

---

* तव न जाने हृदयंमम पुनर्मदनो दिवाच रात्रौच ॥ निकृप ! तापयति बलव त्त्वयिवृत्तमनोरथानिअङ्गानि ॥ १

श्शवशाहिशञ्चिदे। अणिशञ्चपिबामिशोणिदेव लिशशदेशमलेहुवीअदि ॥३॥ नात्युत्तमपात्रप्रयोज्या पैशाचीयथा।पणमतपणअपकुप्पितगोलिचलनग्ग लग्गपलिबिम्बम्। तससुणहतप्पणेसंएआतसतनु घलन्तुद्धम् ॥४॥ नातिमध्यमपात्रप्रयोज्याशौरसेनी यथा। तुंसिमएचूअंकुरदिण्णोकामस्सगहिअधणु अस्स। जुवइमणमोहणसहोपञ्चम्भहिवोसरोहो हि॰॥५॥ नातिहीनपात्रप्रयोज्योपभ्रंशःशुद्धोयथा। ल इअप्पुलपिउदुद्धलाकदुअंह्माणहुंछासि। पुत्तहमत्थे हत्थञ्जइदहिजम्मेविअआजाविअआसि। प्रायिक

मिशोणितंवर्षशतंसमरोभविष्यति। अत्रमांसादिलाभहेतुतयासमरा शंसनम्बीभत्समुद्रयद्वीनपात्रतान्द्रढयति ॥ ३ ॥ नात्युत्तमेति। उत्तमादपकृष्टस्मध्यमादुत्कृष्टन्नात्युत्तमम्। प्रणमत प्रणयप्रकुपित गौरीचरणाग्रलग्नप्रतिबिम्बम्। दशसुनखदर्पणेषेकादशतनुधरंरुद्रम्। एवन्नामदेवीकोपेभगवतः प्रणयकातरता येनयुगपदिवसर्वाभिरपिमू र्त्तिभिःप्रणमतीतिप्रतीयमानोत्प्रेक्षा ॥४॥ नातिमध्येति। हीनादुत्कृ ष्टस्मध्यमादपकृष्टन्नातिमध्यमम्। तुंसीति। कामस्यकामायेत्यर्थः। चतुर्थ्याःसंबन्धसामान्यविवक्षायांषष्ठीतिसूत्रात्षष्ठी ॥ ५ ॥ नातिहीने ति। हीनात्किञ्चिदुत्कृष्टस्मध्यमादपकृष्टन्नातिहीनम्। लइवप्पुलेति। लइगृहाण। वप्पुलेत्यनुकम्पास्नम्बोधने।पिबदुग्धम्।कुतोस्माकंळासि पदाभिधेयन्तत्कम्। पुत्तहुमत्थेइतिशपथःपुत्रस्यमस्तकेनाहंशपेयदि सक्रस्यव्यापकन्दधिजन्मन्यपिजातमासीदितिव्यापकानुपलब्धिःप्रयु क्ता। ननु प्राकृतादिषूत्तमादिपात्रव्यतिकरदर्शनात्कथमेषाव्यवस्थाघ टतइत्यतआह।प्रायिकमिति। यत्रप्रकृतनिर्वहणोचितविशेषाभिसन्धा नेनक्वचिदन्यथाप्रवर्त्ततेयथामालत्यांसंस्कृतमाश्रित्य।एषोस्मिभोःकार्य वशात्प्रयोगवशाच्चप्राकृतभाषीसंवृत्तइत्यादि,यत्रवाकवेर्व्युत्पत्तिकृत्तो भाषाविपर्यासःशक्त्यातिरस्क्रियतेयथामृच्छकटिकेविटस्यमध्यमपात्र

---

* त्वमसि मयाचूताङ्कुर दत्तः कामायगृहीतधनुषे ॥ युवतिज नमनमोहनसहचर पञ्चान्यधिकःशरोन्नूयाः ॥ १ ॥

ऽचैतत् । तेनकवेरभिप्रायशक्त्यादिभ्यःसर्वाअपिस
र्वप्रयोज्याभवन्ति । ताइमाःशुद्धाःषडेव ॥६॥ साधा
रण्यादयः पुनरनन्तास्तासुमध्यमपात्रभूमिकास्थोत्त
मपात्रप्रयोज्यासंस्कृतप्राकृतयोः साधारणीयथा ।
सरलेसाहसिरागंपरिहररम्भोरुमुज्वसंरम्भम् । वि
रसंविरहायासंसोढुंतवचित्तमसहम्मे ॥७॥ नात्युत्तम
भूमिकास्थोत्तमपात्रप्रयोज्यासंस्कृतपैशाचयोस्साधा
रणीयथा । चम्पककलिकाकोमलकान्तिकलापाथ
दीपिकानङ्गी । इच्छतिगजपतिगमनाचपलायतलो
चनालपितुम् । एवंसंस्कृतापभ्रंशादिसाधारण्यःप्रा
स्यापिसंस्कृतोक्तिः । यत्रबन्धौचितीपरवशाःसंस्कृतादिजातयोवि

पर्यस्यन्तेयथासर्गबन्धादौमध्यमादेरपिसंस्कृतमेवखण्डकथापरकथादौ
उत्तमादेरपिप्राकृतमेव,,बृहत्कथादौपैशाचमेव,,वस्तुबन्धादावपभ्रंश
एवेति।तत्रसन्धिसन्ध्यङ्गघटनासौष्ठवेनरसःपुष्यतीतिभरतमुनिप्रभृती
नामतिप्रकाशएवपन्थाः॥६॥साधारण्येति । संस्कृतस्यप्राकृतादिसाधा
रण्येपञ्चप्रकाराः प्राकृतस्यशौरसेन्यादिसाधारण्येचत्वारःशौरसेन्याः
पैशाच्यादिसाधारण्येत्रयःपैशाच्यामागध्यादिसाधारण्येद्वौ । मागध्या
अपभ्रंशसाधारण्येएकइति।द्विकल्पेपञ्चदशप्रभेदास्त्रिकल्पेविं
शतिश्चतुर्विकल्पेपञ्चदश पञ्चविकल्पेषट् षड्विकल्पेएकइतिसर्वमि
लनेसप्तपञ्चाशत्प्रकारासाधारणी । एवम्मिश्रादावपिलोष्टप्रस्तावकमे
णबहवोभेदाइतितावदुदाहरणेग्रन्थगौरवंस्यादितिदिङ्मात्रमुदाहर
ति । तास्विति । संभिन्नसंस्कारा भाषाप्रयोगेहिप्रयोक्तृप्रकृतिसम्भेदे
भवति । नचप्रकृतिसम्भेदस्तात्विकःस्वभावसङ्करप्रसङ्गादतउक्तम्मध्य
मपात्रभूमिकास्थेति । भूमिकावर्णिका । मध्यमपात्रप्रकृत्युचितोरा
गाद्यभिनयस्तत्रतिष्ठति तत्परिग्रहेण चित्रतुरगवत्सामाजिकानां स
म्यङ्मिथ्यासंशयसादृश्यप्रतीतिविलक्षणप्रतिपत्तिपदवीमवतरतीति
मध्यमपात्रभूमिकास्थमुपलक्षणञ्चेदमुत्तमभूमिकास्थमध्यमप्रयोज्यापी

कृतभाषादिसाधारण्यञ्चद्रष्टव्याः॥८॥ वक्तृविषयौचि
त्यादिप्रयोज्यामिश्रायथा। जयतिजनतामिवाञ्छि
तफलप्रदःकल्पपादपोगिरिशः। जञ्चइअतमल्लिअ
न्तीगिरितणआपणअकप्पलआ*। एवम्भाषान्तरा
णामपिमिश्रीभवोवगन्तव्यः॥९॥ दुर्विदग्धादिपा
त्रप्रयोज्यासङ्कीर्णायथा॥ अकटगुमटीचन्द्रज्योत्स्ना
कलङ्किलकोइलोलवइअमुहुर्याम्योवायुर्निवारअवा
इदा। अविसखिअलारक्ताशोकस्तवापिमनोमुदेन
कजनकजम्मानेनाद्यप्रियम्प्रतिजाहुदा। सेयंसंस्कृ
तमाहाराष्ट्रापभ्रंशयोरस्तलतशडुलवत्सङ्कीर्णाजातिः
। एवंप्राकृतापभ्रंशसंकरोपद्रष्टव्यः॥१०॥ क्रीडागो

यमेवएवमुत्तरत्र॥७॥ तवविरहाय।संसोदुम्ममचित्तमसहमितियो
जना। अनङ्गस्येयमानङ्गी॥८॥वक्तृविषयेति। यदौत्तमादिषुनानावक्तृ
भिरेकाकाव्यसमस्याक्रियते। भिन्नभाषोचितवर्णनीयविषयंवाकाव्यमे
कमुपकल्प्यते।यदावाशक्तिनिरूपणायकवेरेवनानाभाषामयङ्काव्यमा
रब्धंस्यात्तदाकथन्नालङ्कारपद्धतीमध्यास्तेतआह। मिश्रेति। तमल्लि
अन्तीतमालीयमाना॥९॥ दुर्विदग्धादीति। नागरकभावमवाप्तस्तद्भू
मिकामवलम्बमानोदुर्विदग्धः। आदिपदात्पूर्वोक्ताःसभस्यादयः। अ
कटमाश्चर्यम्। गुमटीमनोज्ञा। आस्फालितखड्गस्येवस्फुरणेलवइइ
तिमहाराष्ट्रदेशी। तथाचप्रयोगः। लवइअविज्जूमणोहरीत्यारा
ध्याः। अन्येतुलपतीत्यर्थमाहुरेवञ्चकलशब्दःपुप्यतीति। याम्योदक्षि
णोनिवाआरनिर्वञ्चकोवारकशुन्योवाइदावारकइति। अलाआगतः।
यदिहमानोनक्रियेतज्योत्स्नादयोमनोमुदमेवाधास्यन्तीतिप्ररोचना।
यदातुमनोनुदइतिपाठोऽपिशब्देननायकसाधारणमुत्कण्ठाकारित्वमु
क्त्वचन्द्रज्योत्स्नादीनामिति। अतोनकजनकजन्मार्थीनार्थंईर्ष्यारोष
लक्षणेनप्रतिकूलभावावलम्बिनामानेनतस्मात्प्रियमेवप्रतिजाहुदाया

* जयति च तमालीयमाना गिरितनया प्रणयकल्पलता॥

ष्ठीविनोदाद्यर्थानन्यगामिन्यसाधारणीचयथा। भी
ष्मप्रोक्तानिवाक्यानिविद्वद्वक्त्रेषुशेरते । गोसेतिवि
ब्भिरिच्छोलीतल्लतूहेविवल्लिदा।अत्रपूर्वार्द्धपदानिसं
स्कृतएवउत्तरार्द्धपदानिप्राकृतएवसेयमसाधारण्या
नन्यगामिनीजातिरुच्यते। भाषान्तराणाम्पुनरसा
धारण्यन्नास्ति॥११॥अप्रभ्रष्टाथथा। मुग्धकिंग्रहणकु
गृह्णतुन्धरिमुद्रानिजहस्ति।निश्चउसुन्दरितुहमुपरि
ममसुरतस्पृहमस्ति।सेयमपशब्दबहुलत्वेनापभ्रष्टा

मः । यदामनन्तिस्वयंवातत्रगमनमिति॥१०॥ क्रीडेति । काव्यसमस्या क्रीडाउक्तपूर्वागोष्ठीतत्रविनोदोमनोनुकूलेनसमयातिवाहनम् । आदिपदम्पूर्ववत् । ननुमाभूत्प्रकृतिभावेनभाषान्तरसम्भेदःसंस्कारसंपातेनतुभविष्यतितथाचकथंसाधारणीतोभिद्यतइत्यतआह । असाधारणीचेति । गोसेप्रभातेतिविब्भिरिच्छोलीकमलरजःपङ्क्तिस्तल्लमल्पसरस्तूहंतीयँविवल्लिदाप्रसारिता । नात्रपूर्वोत्तरार्द्धयोरैकमत्यमुदाहरणत्वात् । आराध्यास्तुयथासरस्तीरेकमलरजःपङ्क्तिःप्रसृताशोभतेतथाविद्वद्वक्त्रेषुभीष्मवाक्यानीत्युपमाकल्पनयाकथञ्चिदेकवाक्यतामाहुः । अत्रपूर्वार्द्धपदानीति।नभीष्मादयोनभिधानादिति भाषान्तरस्थानिभावस्यप्रतिषेधात्।एवंवाचस्पतिविशिष्टरसवसप्रचेतसपोतादयोद्रष्टव्याः। प्राकृतएवेति । महाराष्ट्रदेशीयत्वाद्देशीपदानाञ्चस्थानिभावासम्भवात् । भाषान्तराणाम्पुनरिति । सिद्धिर्महाराष्ट्रीतः,सिद्धिःशौरसेनीत, इत्युपक्रम्यानुशासनात्तद्भवरूपतैवस्फुटा । तत्समानान्तुसाधारण्यमेवेति॥११॥मुग्धेग्रहणकुरुतमूल्यबन्धकंगृह्णात्वंधारयमुद्रामङ्गुलीयकन्निजहस्ते। निश्चयःसुन्दरितवोपरिममसुरतस्पृहा।स्ति,,इत्यत्रतवोपरिसुरतस्पृहमस्तीत्यादिकमपशब्दबहुलत्वेनापभ्रष्टास्पष्टैव।सातुकथमलङ्कारइत्यतआह । सेयमिति । श्रोत्रियश्छान्दसआद्यपदेनबालादयःसर्वेएवहिलौकिकःपदार्थोभिनयकक्षामधिरूढःपरित्यज्यग्राम्यमभिमुखीभूतोविभावादिषुकथन्नालङ्कारस्तदिदमुक्तं प्रयोगतइति । न

प्यविद्वद्भिःश्रोत्रियाद्यैःप्रयुज्यतेइत्यपभ्रष्टाजातिः । अस्याश्चानुकरणेसाधुत्वमिष्यते ॥१२॥ १ ॥ पद्यङ्गद्य ञ्चमिश्रंचकाव्येयत्सागतिःस्मृता । अर्थौचित्यादि भिःसापिवागलङ्कारइष्यते ॥१॥ कश्चिद्गद्येनपद्येनक श्चिन्मिश्रेणशक्यते । कवितुङ्कश्चनद्वाभ्याङ्काव्येर्थःक श्चनत्रिभिः ॥ २ ॥ यादृग्गद्यविधौवाणःपद्यबन्धेन तादृशः । गत्यांगत्यामियन्देवविचित्राहिसरस्व

चापशब्दानान्दोषत्वमेवेतिवाच्यम्। अनुकरणेतुसर्वेषामितिदोषसामा न्यावलम्बिनागुणीभावेनास्यविषयीकृतत्वादिति ॥१२॥ नानावच्छिन्न जातिःकाव्यशरीरेनिविशतइतितदवच्छेदरूपाङ्गतिमनन्तरंलक्षयति। पद्यमित्यादि । पठितेःपदात्पदान्तरसञ्चारोगतिःसाकेनचिदौचित्यो पनिपातिनासन्दर्भपरिमाणेननियम्यते । ततस्तदप्युपचारेणगतिः । पठितिपरिमाणञ्चकाव्यंसमाश्रयतइतितदपिगतिस्तच्चपद्यादिभेदेन त्रिविधमिति संक्षेपः । अतएवगद्यबन्धेतुकैश्चिद्वृत्तमाश्रितंवृत्तंवर्त्तन मियत्तेतियावदिति । सर्वनामशब्दाहिकदाचिदुद्देश्यस्यलिङ्गमाश्रय न्तेकदाचित्प्रतिनिर्देश्यस्येतिकाव्येयत्सागतिरित्युक्तम् । तत्रपद्यञ्च तुष्पदीतिनलक्षणमुल्लालमात्रादौद्विपदपञ्चपदादिशरीरेतदभावात्। अपादःपदसन्तानोगद्यमित्यपिन। अपादत्वंह्यप्रत्यभिज्ञायमानवृत्त भागत्वंविश्रान्तिःचतुष्पदीव्यतिरिक्तत्वंवा। आद्येवृत्तगन्धिपद्यन्नस्या द्। द्वितीयेत्वतिप्रसङ्गः।तस्माच्छन्दोनियमवतीकाव्यमतथाभूतात्तुग द्यमितिविभागः । गद्यपद्यात्मकंवाक्यमिश्रम् । तदस्यागतेरलङ्का रत्वमुपपादयति । अर्थौचित्यादिरिति ॥१॥ तत्रार्थौचितीमाह । क श्चित्पद्येनेति । यथाह्यटवीवर्णनादौगद्यम्रगल्भतेतथानपद्यंयथाश्व काव्यप्रास्तावनिर्वहणोचितेर्थेपद्यमुत्सहतेनतथागद्यमित्यादि । य वङ्कथाख्यायिकादौगद्यमेवचस्पूप्रभृत्तौमिश्रमेवेत्यादिपदोपात्तबन्धौ चितीदृष्टव्या ॥२॥ आस्तान्तावदर्थौचित्यगवेषणंस्वरूपेणैवपद्यादि कल्परिस्फुरत्कविप्रतिभाविशेषावेदनेनसहृदयावर्जकमवसीयते । क

ती ॥३॥ यथामतियथाशक्ति यथौचित्ययथारुचि। कवेःपात्रस्यचैतस्याःप्रयोगउपपद्यते ॥४॥ द्रुताविलम्बितामध्यासाथद्रुतविलम्बिता । द्रुतमध्याच विज्ञेयातथामध्याविलम्बिता ॥५॥ सालघूनांगुरूणाञ्चबाहुल्यात्लघुत्वमिश्रणैः । पद्यैगद्यैचमिश्रैच षट्प्रकारोपजायते ॥ ६ ॥ तत्रवृत्तञ्चजातिञ्चपद्यमाहुरथोद्वयक्। समञ्चार्द्धसमञ्चैतद्विषमञ्चप्रचक्षते॥७॥गद्यमुत्कलिकाप्रायम्पद्यगन्धीतिचद्विधा॥ द्विधैवगद्यपद्यादिभेदान्मिश्रमपीष्यते॥८॥ललितान्ति

यमन्यथाक्वचिदेवकस्यचित्सौष्ठवमित्याह । यादृगिति । गत्याकृत्या मिति । पद्यैगद्यैमिश्रैचेत्यर्थः । विचित्राअप्यवस्थितसिद्धिका ॥३॥ प्रयोगव्यवस्थामुपपादयति । यथामतीति । मतिर्व्युत्पत्तिर्युक्तायुक्तविवेकइतियावत् । शक्तिःकवित्वबीजभूतःप्राक्तनःसंस्कार,,औचित्यन्दर्शितमेव । रुचिर्मनोनुकूलताप्रतिसन्धानम्।कवेःपात्रस्येति । यथायोगम् । तथाहिशक्तिव्युत्पत्तीकवेरेव । औचित्यम्पात्रस्यैवरुचिरुभयोरपीति ॥४॥ सचायंसन्दर्भावच्छेदोगुरुलघुसन्निवेशेनैवशोभतइतितमाश्रित्यविभागमाह।द्रुतेति।आद्यास्तिस्रःशुद्धाआसामेवमिश्रीव्यतिकरेणोत्तरास्तिस्रःसङ्कीर्णाः ॥५॥ कथमेषाव्यवस्थेत्यतआह।सालघूनांगुरूणामिति । बाहुल्यमल्पत्वम्मिश्रणञ्चतुल्यवत्प्रतिभानम् । नगद्यादिक्रमेवगतिःकिन्तुतदाधाराःपठितिसञ्चारइतिव्यनक्ति। पद्यैगद्यैचमिश्रैचेति॥६॥वर्णनियतञ्छन्दोवृत्तम्।मात्रानियतञ्जातिः।समप्रस्तावंसमम्। प्रथमतृतीययोर्द्वितीयचतुर्थयोश्चतुल्यप्रस्तावमर्द्धसमम् । उभयविरर्द्धविषमम् ॥७॥उत्कलिकाकल्लोलस्तत्प्रायमुच्चावचमिवप्रतिभासमानमित्यर्थः । यथासलीलकरकमलतालिकातरलवलयावलीकमिति। वृत्तगन्धिप्रतिभातवृत्तैकदेशम् । तदेतदल्पाख्यायासुत्पन्नेनसमासान्तेनव्यञ्जितन्तदयमर्थःसामान्यतःपद्यादिभेदेनगतिस्त्रिधा । तत्रापिजात्यादिभेदेनषट्प्रकारास्तेपिद्रुतादिभेदेनषट्त्रिंशदिति ॥८॥ ननुललि

ष्ठुरञ्चूर्णमाविद्धञ्चेतियोपरः ॥विशेषःसतुगद्यस्यरी
तिवृत्योर्भविष्यति। तत्रपद्यभेदेषुसमवृत्तेद्रुतागतिर्य
था॥अयिविजहीहि दृढोपगूहनन्त्यजनवसङ्गमभीरु
वल्लभम्। अरुणतरोद्गमएषवर्ततेवरतनुसम्प्रवदन्ति
कुक्कुटाः। सेयंसमवृत्ते लघुसंयुक्ताक्षरभूयस्त्वाद्द्रु
तागतिः॥१॥समवृत्तेविलम्बितायथा। प्रणम्यहेतु
मीश्वरम्मुनिङ्कणादमन्वतःपदार्थधर्मसङ्ग्रहः प्रचक्षते
महोदयः॥ सेयंस्थानेस्थानेगुर्वक्षरयोगाद्विलम्बि

तादयोगद्यभेदाःकैश्चिदलङ्कारकारैःपरिसंख्यातास्तेकस्मान्नोच्यन्त
इत्यतआह। ललितमित्यादि। सुकुमारसन्दर्भंललितम्। यथाकम
लिनीवनसञ्चरणव्यतिकरलग्ननलिननालकण्टकेवनक्वचिन्निर्भरम्पद
मादधातीति। प्रस्फुटसन्दर्भन्निष्ठुरम्। यथाउत्तम्भितकुटिलकुन्तल
कलापः श्मशानवाटमवतरतीति। अनुल्लिखितसमासंचूर्णंयथा।
अभासोहिकर्मणोकौशलमादधाति। नखलुसन्निपातमात्रेणोदबिन्दु
रपिग्रावणिनिम्नतामादधातीति। उद्भटसमासमाविद्धम्। यथा। कु
लिशशिखरखरतरस्वरप्रचयप्रचण्डचपेटपाटितमत्तमातङ्गमदच्छटाच्छु
रितचारुकेसरभारभासुरमुखेकेसरिणीति। रीतिवृत्त्योरितिविषयसप्त
मी। तथा। ललितङ्कैशिक्यादौ „ निष्ठुरमारभट्यादौ „ चूर्णंवैद
र्भ्यादौ„ आविद्धङ्गौडीयाप्रभृतौ „ यथायथमन्तर्भवतीतिनोक्तभेदाः
परिसंख्याताइत्यर्थः॥९॥उक्तप्रकारेषुकिञ्चिदुदाहरति। तत्रेति। नव
सङ्गमभीर्विति। सम्बोधनम्। भीरुशब्दादूङ् तस्मात्सम्बोधन
ह्रस्वेरूपम्। गर्भगृहस्थानालोकयतिचेत्तदाह। सम्प्रवदन्तीति। अत्र
प्रतिपादमष्टौलघवश्चत्वारोगुरव इति लघुबाहुल्येसंयोगाक्षरासुद्रेके
चताललयवदतिव्यक्तएवद्रुतभावः॥१॥ प्रणम्येति। अत्रयद्यपिपद
चतुष्टयेगुरुलघूनांसमसंख्यत्वमेवतथापिसंयोगाक्षरैरन्तरान्तरापठिति
दीर्घाभावोन्मेषादारोहप्राधान्येविलम्बिता। एवंव्युत्क्रमेणसमानि
कायामपिविलम्बितैव।यथामीनजालघटितानिसूर्यरश्मिबोधितानि

तागतिः ॥ २ ॥ तत्रैवमध्यायथा । आसीद्दैत्योह यग्रीवः सुहृद्वेश्मसुयस्यताः । वदन्तिस्मबलम्बाहोः सितच्छत्रस्मिताःस्त्रियः । सेयन्नातिलघ्वक्षरप्राय त्वान्मध्यागतिः ॥ ३ ॥ द्रुतविलम्बितायथा । अ वतुवः सचितुस्तुरगावलीस्फुरितमध्यगतारुणनाय का । समविलङ्घिततुङ्गपयोधरामरकतैकलतेवन भःस्त्रियः । सेयन्द्रुतायाःविलम्बितायाश्चगतेरन्त रानुप्रवेशाद्द्रुतविलम्बितागतिः ॥ ४ ॥ द्रुतमध्या यथा । अपितुरगसमीपादुत्पतन्तम्मयूरन्नसरुचि रकलापम्बाणलक्षीचकारासपदिगतमनस्कश्चित्रमा ल्यानुकीर्णरतिविगलितबन्धकेशपाशेप्रियायाः । सेयन्द्रुतायामध्यायाश्च गतेरन्तरानुप्रवेशाद्द्रुतम ध्यागतिः ॥ ५ ॥ मध्यविलम्बितायथा । दुन्दुभयो दिविदध्वनुरुच्चैरुच्चुक्राकपयश्चवल्गुः । सिद्धनि

मत्तषट्पदाकुलानिपश्यभीरूपङ्कजानि । तदिदमाह।सेयमिति। ते नविभागसूत्रेगुरुलघुमिश्रणमेवंरूपमपिबोद्ध्यमिति॥२॥आसीदिति । अत्रयद्यपिगुरवोबहवस्तथापिनद्रुतिर्नविलम्बनम्पठितैरित्यनुभवसा त्तिकोयत्नर्थस्तदेतदाह।नातिलघ्वक्षरेति॥३॥अवतुवइति । अरुणोग रुडाग्रजः शोणश्चनायकोनेता हारमध्यमणिश्च पयोधरा मेघाःस्त नौचतदेतस्मिन्द्रुतविलम्बिताख्येवृत्तेसमाख्यैवरूपम्बोधयतीति॥४॥ अपितुरगेति । उत्पन्नाविर्भवद्बर्हंगतोज्ज्वलविचित्रकोमलमयूर स्त त्कालन्याजप्रेमनिर्यन्त्रणकरुठग्रहविलुलितप्रियाकेशपाशवासनावि क्षाशहेतुःसर्वंश्यमानःकथम्बाणलक्ष्यतांसहतइतिचित्रप्रत्ययेनव्यज्य तइति । अत्रपादचतुष्केपिप्रथमन्द्रुतापश्चान्न्याचभागशःप्रत्यभिज्ञा यतइत्याह । सेयमिति ॥५॥ दुन्दुभयइति । अत्रापिप्रतिपादस्पूर्वम्म ध्याततोविलम्बिताचखण्डशःप्रतिभासतइतिदर्शयति । सेयमिति ।

कायकराब्जविमुक्तम्माल्यमथाङ्गदमूर्ध्निपपात । से
यम्मध्यायाः विलम्बितायाश्चगतेरन्तरानुप्रवेशान्म
ध्यविलम्बितागतिः॥६॥एवमर्धसमविषमयोर्मात्रा
छन्दस्सुगद्यमिश्रयोश्चलघुगुरून्मिश्रवर्णविन्यासवि
शेषभूयस्त्वेनद्रुतादिगतिवन्तोगवेषणीयाः। तत्रवि
षमवृत्तच्छन्दसिद्रुतायथा । अथवासवस्यवचनेन
रुचिरवदनस्त्रिलोचनम् । क्लान्तिरहितमभिराध
यितुंविधिवत्तपांसिविदधेधनञ्जयः ॥ ७ ॥ अर्द्धस
मच्छन्दसि विलम्बिता यथा । विहिताम्प्रियया
मनःप्रियामथनिश्चित्यगिरङ्गरीयसीम् । उपपत्तिम
दूर्जिताश्रयन्नृपमूचेवचनंवृकोदरः ॥८॥ उत्कलिका
प्रायगद्येद्रुतमध्याचयथा । व्यपगतघनपटलममल
जलनिधिसदृशमम्बरतलंविलोक्यते । अञ्जनचूर्णपु
ञ्जश्यामंशार्वरन्तमस्त्यायते ॥ ९ ॥ पद्यगन्धिगद्ये
वृत्तगन्धौमध्याजातिगन्धौद्रुतमध्यायथा।पातालता
लुतलवासिषुदानवेषुहर इवजितमन्मथोगुहइवाप्र
तिहतशक्तिरिति॥१०॥ गद्यादौमिश्रेगद्यपद्ययोर्द्रुत

इमामेव व्यवस्थामर्द्धमध्यमादिष्वप्यतिदिश्यतइतिदिङ्मात्रमुदाहरति
एवमिति ॥६॥७॥८॥ उत्कलिकाप्रायेति ।उच्चावचभावेनप्रतिभासमानमु
त्कलिका।यथा।सलीलकरकमलतालिकातरलयावलीकमिति। तथैवत
दपिप्रकृतोदाहरणमितिव्यक्तम्। पातालेत्यादौवसन्ततिलकाभागइव
हरइवेत्यादावार्याभागइवप्रतिभातीति॥९॥वृत्तगन्धौजातिगन्धाविति।
[तृतीयादिषुभाषितपुंस्कम्पुंवद्गालवस्य] इतिपुंवद्भावेननुम्नभवति
॥१०॥हन्तेति । आश्चर्यस्तिमितस्यहन्तेत्येववागनुभावस्ततोभिमानो
न्मेषेपुण्यवानस्मीतिअनन्तरंलोकोत्तरविभाववर्णनात्वरितस्ययदहमि

मध्यायथा । हन्तपुण्यवानस्मियदहमतर्कितोपमो दर्शनोल्लसितयानया । अविरलमिवदाम्नापौण्डरीकेणनद्धःस्नपितइवचदुग्धस्रोतसानिर्भरेण । कवलितइवकृत्स्नश्चक्षुषास्फारितेन प्रसभममृतमेघेनैवसान्द्रेणसिक्तः॥११॥पद्मादौमिश्रद्रुतविलम्बितायथा । असौविद्याधारःशिशुरपिविनिर्गत्यभवनादिहायातः सम्प्रत्यविरलशरच्चन्द्रमधुरः।यदालोकस्थानेभवतिपुरमुन्मादतरलैः कटाक्षैर्नारीणांकुवलयितवातायनमिव । अत्रबालसुहृदामकरन्देनसहविद्यामान्वीक्षकीमधीतेसएषमाधवोनामेति ॥१२॥ २ ॥ वैदर्भादिकृतःपन्थाःकाव्येमार्गइतिस्मृतः । रीङ्गताविति धातोःसाव्युत्पत्यारीतिरिष्यते ॥ १ ॥ वैदर्भीसाथपा

त्यादिगद्यापर्यवसानएवाविरलमित्यादिवृत्तमाविरासीदिति मध्येविच्छेदकारणानुपपत्तौ गद्यपद्याभ्यामेकवाक्यम्॥११॥असाविति।दूतीकल्पेकयाचित्प्रच्छन्नप्रार्थनीययाआसम्भोगमुन्नयेदित्याम्नातम् । तदिहोत्प्रेक्षामनोहरग्राम्यमालोकनमुक्तम् ।तेनैकस्मिन्वर्णनीयवस्तुनिवृत्तप्रपञ्चेनोक्तेप्रकृतसङ्गतिमात्रङ्गद्येनकृतवतीतियुक्तेयमानुपूर्वीवाक्यैकवाक्यताचेति ॥ १२ ॥ वैदर्भादीति । गुणवत्पदरचनारीतिः । गुणाःश्लेषादयःकाव्याव्यभिचारिणोनव । तेषामन्योन्यमीलनक्षमतयापानकरसइवगुडमरिचादीङ्खाडवइवमधुराम्लादीनांयत्सम्मूर्च्छनरूपावस्थान्तरगमनन्तत्संस्कारादेवहिलोकशास्त्रपदरचनातःकाव्यरूपाचरचनाव्यावर्त्तते । अतएवमृग्यतेकविभिरासंसारमितिमार्गपदेनोच्यते । वैदर्भादयोविदर्भादिदेशप्रभवास्तैःकृतमुखहेवाकगोचरतयाप्रकटितोनतुतत्तद्देशैःकाव्यस्यकिञ्चिदुपक्रियते । पन्थाइति । प्रतिष्ठन्तेहिमहाकविपदवीलाभार्थिनइति । ईदृशमेघरीतिलक्षणमानन्दवर्द्धनादीनामपिमतमेतदुपलक्षणतयासूत्रंव्याख्यातम् । कथम्पुनरुक्तमुपमादेरी

ञ्चालीगौडीयावन्तिकातथा। लाटीयामागधीचेति षोढारीतिर्निगद्यते ॥ २ ॥ तत्रासमासानिरश्लेषश्लेषा दिगुणगुम्फिता। विपञ्चीस्वरसौभाग्यावैदर्भीरीति रिष्यते ॥ ३ ॥ समस्तपञ्चषपदामोजःकान्तिवि वर्जिताम्। मधुरांसुकुमाराञ्चपाञ्चालीङ्कत्वयोवि दुः ॥४॥ समस्तात्युद्भटपदामोजःकान्तिगुणैधिता म्। गौडीयेतिविजानन्तिरीतिंरीतिविचक्षणाः॥५॥ अन्तरालेतुपाञ्चालीवैदर्भ्योर्यावतिष्ठते। सावन्ति

तिपदम्अवृत्तमित्यतआह॥रीङ्गतावितिरियन्तेपरस्परयागच्छन्त्यनयेतिकरणसाधनोयंरीतिशब्दोमार्गपर्यायइत्यर्थः॥१॥ एवंसिद्धेसामान्यलक्षणेविभागमाह। वैदर्भीति॥२॥ वक्ष्यमाणरीत्यावैदर्भीप्राधान्यमभिप्रेत्याह। तत्रेति। असमासाअनुल्लिखितसमासाः। निःशेषश्लेषादीतिश्लेषादयोनवगुणास्तैर्गुम्फिता। मिथोमिलनेनसम्मूर्च्छितैरनुपलक्ष्यमाणान्यतममात्रकैरपिपरस्परविभक्तस्वरूपभावेनसहृदयहृदयसंवादगोचरैरारब्धा। एवंविपञ्चीस्वरसौभाग्या। विपञ्चीवायूपासरस्वतीबिम्बप्रतिबिम्बभावेनद्विविधा। प्रतिबिम्बाधिष्ठानतयादार्ष्टांदियन्त्रमपिविपञ्चीत्युच्यतेतदीयाःस्वराःतन्त्रीकरणोत्थिताःस्थानक्रमवैपरीत्यानुमेयशरीराःप्रतिबिम्बभावाःषड्जादयस्तेषुश्रुतिसम्मूर्च्छनरूपेषुमिथोविभक्ताःश्रुतयःश्रोत्रज्ञकस्वरावस्थामापन्नाःसमस्तगान्धर्ववित्साक्षिकाःप्रकाशन्ते। अतएवबीजैवप्रधानंसलक्षस्वरजातस्यतत्रैवश्रुतिमण्डलोन्मेषादिति ॥३॥ यदानुपानकादिन्यायेनकविदंशउद्रिक्तोभवतितदारीत्यन्तरमुत्तिष्ठतीत्याह। समस्तेति। ओजःकान्तिविवर्जिताम्। ओजःकान्त्योर्विशेषेणवर्जिताम्। न्यग्भूतौजःकान्तिगुणामितियावत्। यतस्तत्प्रतिद्वन्द्विनोमाधुर्यसौकुमार्ययोस्तत्रौद्भवस्तदेतदाह। मधुरांसुकुमाराञ्चेति। अतएवौजःप्रकाशकःषडधिकेषुपदेषु समासोनक्षियते ॥४॥ समस्तेति। अत्युद्भटानिसौक्ष्म्येसमासानियस्मादोजःकान्त्योरुद्भवेनन्यग्भूतगुणसम्पत्केयंरीतिः ॥५॥ अन्त

कासमस्तैःस्याद्द्वित्रैस्त्रिचतुरैःपदैः॥६॥समस्तरीति
र्व्यामिश्रालाटीयारीतिरुच्यते । पूर्वरीतेरनिर्वाहेख
ण्डरीतिस्तुमागधी॥७॥तासुवैदर्भीयथा । मनीषिता
स्सन्तिगृहेषुदेवतास्तपःक्वत्सेक्वचतावकंवपुः । प
दंसहेतभ्रमरस्यपेलवंशिरीषपुष्पन्नपुनःपतत्त्रिणः ।
सेयमसमस्तपदासमग्रश्लेषादिगुणवतीवैदर्भीरीतिः
॥१॥ पाञ्चालीयथा । गात्राभिघातदलिताङ्गदजर्ज
राणाङ्गण्डस्थलीलुलितकुन्तलताडितानाम् । क्षोभ
स्फुटन्मुकुटकोटिविघट्टितानान्नादोभवञ्झणझणा
मुखरोमणीनाम् । सेयमोजःकान्त्यभावादाश्लिष्टश्ल
थपुराणच्छायामाधुर्यसौकुमार्यवतीसमस्तपञ्चषप
दापाञ्चालीरीतिः ॥२॥ गौडीयायथा । यस्यावस्क

रालइति । माधुर्यसौकुमार्ययोःकिञ्चिदुद्भवेननिमीलनाङ्गाधान्येन
वाऽन्तरालकल्पना।तांव्यनक्ति । द्वित्रैरिति । द्वेत्रीणिवात्रीणिचत्वा
रिवेतिवार्थेबहुव्रीहिः॥६॥समस्तेति।यद्यप्युपक्रान्तरीत्यनिर्वाहोत्राप्य
स्तितथापितिलतण्डुलवद्यावद्विभक्तरीतिसंवलनस्यकविसंरम्भगोचर
स्योत्तररीतेःपृथग्भावः । पूर्वरीतेरिति ॥ एकांरीतिमुपक्रम्ययदन्यया
सन्दर्भनिर्वहणमसावन्यएवप्रकारः । नचानिर्वाहोदोषश्छायावैरूप्या
भावात् । रीतिखण्डनेपिहिसन्दर्भसौभाग्यसम्पत्तिःशक्तिमेवाविकरो
ति॥७॥मनीषिताइति।अत्रदीर्घसमासाभावेकथमोजइतिकस्यचित्कुदे
श्यमपरीतिमत्प्रकरणएवेत्यपास्तम्।एतेनगुणनवकस्यसमकक्षतयासम्भे
दोक्षणइति । असमस्तपदेत्यनुल्लेखसमासपदेत्यर्थः । समग्रानवगुण
वतीतिनित्ययोगेमतुप् ॥१॥ गात्राभिघातेति । अत्राद्यतृतीययोःषड्
द्वितीयेचपञ्चपदानिसमस्तानि । ओजःकान्त्यभावादिति । ईषद
र्थेनञ् । अतएवमाधुर्यसौकुमार्ययोरुन्मेषःश्लिष्टाप्राप्तायथासङ्ख्यमो
जःकान्तिनिमीलनलब्धप्रादुर्भावाश्लथा । पुराणीचच्छायाययेतिविग्र

न्दलीलाचलितबलपरस्पन्दखर्वीकृतोर्वीसंरम्भोत्तं
सनायोन्नमितभरनमत्कन्धरासन्धिरासीत्। शेषोवि
स्फारफुल्लस्फुटपृथुलफणाफूत्कृताग्निस्फुलिङ्गस्फूर्ज
त्सन्दोहसन्दहितविकटशिखामण्डलीरत्नखण्डः ।
सेयमोजःकान्तिमतीसमस्तोद्भटभूरिपदाचगौडीया
रीतिः ॥ ३ ॥ आवन्तिकायथा। एतानिनिस्सहतनो
रसमञ्जसानिशून्यम्मनः पिशुनयन्तिपदानितस्याः ।
एतेचतीरतरवःकथयन्तितापमालम्बितोज्झितपरि
ग्लपितैःप्रवालैः। सेयंसमस्तद्वित्रिचतुष्पदावैदर्भीपा
ञ्चाल्योरन्तरालवर्तिन्यावन्तीनामरीतिः ॥ ४ ॥ ला
टीयायथा । अयमुदयतिमुद्राभञ्जनःपद्मिनीनामुद
यगिरिवनालीबालमन्दारपुष्पम् ॥ विरहविधुरको
कद्वन्द्वबन्धुर्विभिन्दन्कुपितकपिकपोलक्रोडताम्रस्त
मांसिसेयंसमस्तरीतिर्मिश्रालाटीयानामरीतिः ॥५॥
मागधीयथाकरिकबलनशिष्टैःशाकशाखाग्रपत्रैरुण
सरणयोमीसर्वतोभीषयन्ते। चलितशबरसेनादत्तगो

ह्नः ॥२॥ अवस्कदीध्राटकः । समस्तोद्भटभूतिपदेति । उद्भटताप्रौढिप्र
कर्षः ॥३॥ एतानीति । निःसहतनोरसमञ्जसानिमार्गतरवइतिद्वेद्वेपदे
आलम्बितेइत्यादौत्रीणिपदानिसमस्तानिमाधुर्यसौकुमार्ययोर्मनागुन्मे
षःपाञ्चालीभागः । इतरेषांसमकक्षतावैदर्भीभागः । अनयोः सम्भे
देनान्तरालकल्पनाप्यकैव ॥४॥ अयमिति । मुद्राभञ्जनइतिद्वाभ्यांसम
स्ताभ्यामावन्ती । उदयगिरीत्यादिनापञ्चकेनपाञ्चाली । प्रौढिप्रक
र्षणगौडीया । अयमुदयतीत्याद्यसमासेनवैदर्भीचपत्यभिज्ञायतइति
पूर्वोक्तसमस्तरीतिसम्भेदइति ॥५॥ करिकवलनेति।अत्रपूर्वार्द्धेयथोक्ता
वन्तीमुपक्रम्यचरमार्द्धेगौडीयापरिग्रहादुपक्रान्तरीतेरनिर्वाहःख

शृङ्गचण्डध्वनिचकितवराहव्याकुलाविन्ध्यपादाः ।
सेयमारब्धरीतेरनिर्वाहात्खण्डरीतिर्मार्गधी ॥६॥३॥
याविकासेथविक्षेपेसङ्कोचेविस्तरेतथा । चेतसोवर्त्त
यित्रीस्यात्सावृत्तिरसापिषड्विधा ॥ १ ॥ कैशिक्यारभ

टनं तथापिचनच्छायावैरूप्यमितिकविशक्तिव्यञ्जकत्वादलङ्कारभा
वइति । शाकोवृत्तविशेषः॥६॥ याविकाशइति । वृत्तिर्वर्त्तनंरसविषयो
व्यापारः काव्यस्य रसप्रवणत्वात् । सचव्यापारःसत्वाद्युद्रेकलक्षणोज
न्मान्तरानुभवभावितवासनासमुत्थः परिपूर्णोभविष्यद्रसास्वादसर्व
स्वायमानचित्तावस्थानिदानभूतोर्थगतः पञ्चमेभिध्यास्यते। शब्दगतः
पुनरत्रसङ्गतःसन्दर्भस्यरसप्रकाशकारणेषुप्रधानत्वात् । यदाह । क
विवागभिनेयश्चतदुपायोद्विधेयते । वस्तुशक्तिमहिम्नातुप्रथमोत्रवि
शिष्यते । वर्त्ततेनयाचितमितिकरणसाधनोयंवृत्तिशब्दइतिवर्तयित्री
त्यनेनप्रयोजकव्यापारप्रधानेनदर्शितम् । तत्रविषयवैचित्र्याद्विकाशा
द्याश्चतस्रश्चित्तावस्थाविषयोहिदीप्तमसृणमध्यमभेदेनत्रिविधः । विभा
वाद्युपधानमहिम्नातन्मयीभवनयोग्यंहिचेतःकदाचिद्विकसति । स
त्वाविर्भावोविकासः । न्यग्भूतरजस्तमोगुणंहिचेतःसत्वोद्रेकप्रकाशा
नन्दमयसंविद्विश्रान्तिमासादयति । ततःसत्वभागप्रतिष्ठितःशृङ्गारस्त
दाभासोपितामेवभूमिकामालम्बते । अतएवशुक्तिरजतवद्भावोदये
पिदोषमहिम्नैवकाव्यमहिम्नातद्व्यञ्जनात् । तत्समानभूमिकयाहा
स्योरसः प्रादुर्भवतीत्यभिसन्धायाह"शृङ्गाराद्धिभवेद्धास्यमिति,,भरतमु
निः । तेनविकासभूमिकौशृङ्गारहास्यौ । विकासात्प्रच्युतमप्राप्तगुणा
न्तरप्रादुर्भावंविक्षिप्तञ्चित्तमुच्यते । तत्रोचितविभावादिवैचित्र्याद्वा
विर्भवद्रजोगुणस्यचेतसोविक्षेपप्रच्युतिदशायांरौद्ररसोन्मेषः । अतए
वसमानभूमिकयारौद्राच्चकरुणोरसइत्याह । यदातुसत्वतमोनिमीलने
नकेवलरजःप्रतिष्ठञ्चेतस्तदाबहुमुखव्यापारोन्मेषाद्विक्षिप्ताख्यामवस्था
मासादयति । तद्भूमिकोवीररसस्तदवस्थामेवास्थायाऽङ्गतोपिप्रथत
इतिवीराच्चैवाद्भुतोत्पत्तिरित्युक्तंन्यग्भूतरजोगुणस्यप्रबुद्धतमसश्चेतसो

टीचैवसात्वतीभारतीतथा। मध्यमारभटीचैवतथा मध्यमकैशिकी ॥ २ ॥ सुकुमारार्थसन्दर्भाकैशिकीता सुकथ्यते। यातुप्रौढार्थसन्दर्भावृत्तिरारभटीतिसा॥३॥ कोमलप्रौढसन्दर्भाकोमलार्थाचभारती। प्रौढार्थाको मलप्रौढसन्दर्भांसात्वतींविदुः ॥४॥ कोमलेप्रौढसन्द र्भात्वर्थेमध्यमकैशिकी। प्रौढार्थाकोमलेबन्धेमध्य मारभटीष्यते ॥५॥ तत्रकैशिकीयथा। शशिरुचिषु दलेषुनागवल्लप्राविचकिलदामनिचन्दनेचहृद्ये।कुव लयिनिपुराणसीधुपात्रेत रलदृशामपतन्दृशःप्रिये च। सेयमर्थस्यसन्दर्भस्यचसौकुमार्यात्कैशिकीनाम वृत्तिः ॥१॥ आरभटीयथा। योयःशस्त्रम्बिभर्तिस्व

ऽवस्थाविशेषःससङ्कोचत्त्रासव्यवीभत्सःप्रादुरास्तेतदेकभूमिकश्चभ यानकइतिवीभत्साच्चभयानकइत्याह। तेसीचत्वारश्चित्तावस्थाविशे षाः ॥१॥ कथमविशेषणादेवसन्दर्भाद्वयन्तीत्याशङ्क्यविभागेनोत्तरमाह। कैशिक्येति। शुद्धिसङ्करान्यांरीतिवदत्रापिषट्प्रकाराः ॥२॥ सुकुमारे ति। चित्तद्रुतिकारित्वंसौकुमार्यंसुकुमारावर्थसदर्भौयस्यामितिविग्र हः एवम्प्रौढार्थसन्दर्भेत्यपि। चित्तदीप्तिर्विधायिताप्रौढिः। अर्थसौ कुमार्यादिनाविशेष्यमाणसन्दर्भःसुकुमारत्वादिः शब्दालङ्कारताम्प्रयो जयति। कोमलप्रौढोमध्यमःप्रकारान्तरविरहाच्चमध्यमभारत्यादयोम सम्भवन्ति ॥३॥४॥५॥ शशिरुचिधिति। नियमितादिषुसुग्धाङ्गनाचुम्ब नरसोत्सुकानामतिमनोज्ञाधररागसमर्पकेषुनागलत।दलेषुततोमान परिग्रहेवलितकादिचुम्बनविशेषार्थिनीनाङ्कचग्रहसौभाग्यसुन्दरेम ल्लिकादामितिततःसर्वाङ्गीणाश्लेषसौभाग्यार्थकचन्दनरसेऽनन्तरमीर्ष्यारो षवासनानिःशेषकेलियन्त्रणरतोत्कण्ठितानांसीधुपात्रे। ततःसर्वोप करणजीवितसर्वस्वेप्रियतमेसमकक्षतयैवदृश्यःपेतुरिति। कुवलयि नीतियुक्तःपाठः। कुवलयितेतिपाठेविशेषणाङ्गप्राधान्यविवक्षायांस ऽसेगुणीभावस्यानुचितत्वात्। सेयङ्कैशिकीमृणेशृङ्गारादौविनियु

भुजगुरुमदःपाण्डवीनाञ्चमूनांयोयःपाञ्चालगोत्रे शिशुरधिकयय।गर्भशय्याङ्गतोवा । योयस्तत्कर्मसा क्षीचरतिमयिरणेयश्चयश्च प्रतीपःक्रोधान्धस्तस्यत स्यस्वयमिहजगतामन्तकस्यान्तकोहम् । सेयम्प्रौ ढसन्दर्भार्थाभारभटीवृत्तिः ॥२॥ भारतीयथा । उत्ति ष्ठन्त्यारतान्तेभरमुरगपतौ पाणिनैकेनकृत्वाधृत्वा चान्येनत्रासोत्रिलुलितकबरीभारमंसेवहन्त्याः । भू यस्तत्कालकान्तिद्विगुणितसुरतप्रीतिनाशौरिणावः शय्यामालिङ्ग्यनीतंवपुरलसलसद्बाहुलक्ष्म्याःपुना तु । सेयमतिसुकुमारार्थेनातिसुकुमारसन्दर्भाभारती नामवृत्तिः ॥३॥ सात्वतीयथा । वन्द्यौद्वावपितावना र्यचरितप्राप्तप्रतापोदयौभीमोभीमपराक्रमःसचमुनि र्भास्वत्कुठारायुधः। एकेनामृतबुद्विदार्यकरजैःपीता न्यसृञ्जिद्विषामन्येनापिहताहिताखसरसिख।तङ्क्रु धःशान्तये । सेयम्प्रौढार्थानातिप्रौढसन्दर्भासात्व तीनामवृत्तिः ॥ ४ ॥ मध्यमकैशिकीयथा । किन्द्रा रिदैवहतकेसहकारकेणसंवर्द्धितेनविषपादपएषपा

ज्यतइति ॥१॥ योयइति । ओजःप्रधानतयाप्रौढःसन्दर्भः । यस्मादिय मारभटीदीप्तेरौद्रादौविनियुक्तातेमयुक्तंशब्दार्थयोःप्रौढत्वमिति ॥२॥ उत्तिष्ठन्त्याइति। सर्वाङ्गीणाश्लेषसमुत्सुकेप्रियतमेबहिर्व्यावर्त्तनमन्तर नुवर्त्तनञ्चमुग्धाङ्गनाजातिरितित्यायेननीवीबन्धकेशपाशसंयमार्थि न्यानिर्भरकेलिखेदेनभुजलतालंलसत्येवनतुव्यापारयितुमपिशक्ये तितत्कालिकोतिपोषः ॥ अत्रमसृणेपिरसेवृत्त्यौचित्येनसंदर्भस्यप्रौढि रुचितैव । दीर्घसमासोहिश्रृङ्गारादौनिषिद्धोनतुप्रौढिः। रेफश्चकारादि वर्णनिवेशातुकोमलतासन्दर्भस्येति । एवमुत्तरोदाहरणेष्वपिविशेषस्व

पः ॥ अस्मिन्मनागपिविकासविकारभाजिभीमाभ
वन्तिमदनज्वरसन्निपाताः । सेयंसुकुमारार्थैप्रौढस
न्दर्भामध्यमकैशिकीनामवृत्तिः ॥५॥ मध्यमारभटी
यथा।त्वंनागराजबहुमस्यनितम्बभागंभोगेनगाढमु
पवेष्टयमन्दराद्रेः सोढाविषह्यवृषवाहनयोगलीलाप
र्यङ्कबन्धनविधेस्तवकोतिभारः । सेयम्प्रौढार्थैसुकु
मारसन्दर्भामध्यमारभटीनामवृत्तिः ॥६॥४॥ अन्यो
क्तीनामनुकृतिच्छायासापीहषड्विधा । लोकच्छेकार्भ
कोन्मत्तपोटमत्तोक्तिभेदतः ॥ १ ॥ तासुलोकोक्ति

यसूहनीयइति ॥३॥४॥५॥६॥ अन्योक्तीनामिति । लोकेबिम्बप्रतिबिम्ब
योःप्रतिबिम्बच्चमत्कारितयाप्रसिद्धनतएवश्रव्यात्प्रेक्ष्यंज्यायइत्याह ।
शब्दालङ्कारकाण्डेवाक्यानुकरणमेवप्रतिबिम्बवाचिनाछायापदेनगुण
वृत्तेनाख्यायते ॥ तदेतदनुकरणमनुकार्यभेदादेवषोढाव्यवतिष्ठतइ
त्याह । छेकेति । छेकादीनांलोकविशेषाणामेवशोभाकारित्वेनपृथ
गुपादानेऽर्थात्तदितरानेकविचित्रतत्तदनुकार्यपरोलोकशब्दः । छेका
विदग्धाः।पोटास्त्रीपुंसलक्षणा । सहजकैलिरितिप्रसिद्धापोटा । भुजि
ष्यादासीत्यन्ये । अत्रकेचिदन्यच्छायायोनिजमपिकाव्यंछायालङ्कारव्य
वहारभूमिमाहुः । प्रकृतिपरिणामः,परपुरप्रवेशः, खण्डसंघात्यं चूडि
का,परिमल, इतिपञ्चयोनिजकाव्यभेदास्तत्रकिञ्चिद्विकृतार्थःप्रकृति
परिणामः । यथा । धुअमेत्तंमहुअरानुव्वणसमअहियओणअविमुक्का
ओ । णहयाअवसाहाओणिअअव्वाणवयडिगआओदिसाओ• । यथा
च । सिसिरपडिरोहमुक्कपरिहुत्तम्पअअवलिअक्कम् । इहरइअरयाअ
लिअंविअरदिदिसाहिङ्कहिअंवणाहअलम्• । अत्राकाशदिशंविस्तार
भणनन्मनाग्विकृतमुपलब्धतइतिप्रकृतिपरिणामनामायंयोनिजकाव्य
भेदः । भाषामात्रभिन्नःपरपुरप्रवेशोयथा । देवाधिपोवाभुजगाधिपो
वाधराधिपोवायदिहैहयःस्याम् । सन्दर्शनन्तेगुणकीर्त्तनन्ते सेवाञ्ज
लिन्तेतदहंविदध्याम् । यथाच । सविसोअणाज्जुणभिअंअमहिन्दम

२

च्छायायथा । शापान्तोमेभुजगशयनादुत्थितेशार्ङ्ग
पाणौमास।नेतान्गमयचतुरोलोचनेमीलयित्वा। प
श्चादावांविरहगुणितन्तन्तमात्माभिलाषन्निर्वेक्ष्या
वःपरिणतशरच्चन्द्रिकासुक्षपासु। सेयंलोचनेमीलयि
त्वेतिलोकोक्तेरनुकृतिर्लोकोक्तिच्छाया ॥१॥ छेको
क्तिच्छायायथा। योहिदीर्घासिताक्षस्यविलासललि
तभ्रुणः । कान्तामुखस्यावशगस्तस्मैनृपशवेनमः ।

वासुइअअप्पाणम् । सेडञ्जालदंसणगुणकहामुतइजणूपज्जत्तम्। अ
त्रभाषामात्रम्भिन्नमितिपरपुरप्रवेशनामायंयोनिजकाव्यभेदः । विकी
र्णमसमाहारःखण्डसंघात्यम् । यथा । द्वित्राण्यम्बुजिनीदलानि
सरसामुत्सङ्गमध्यासतेमौलौकिंशुकशाखिनस्त्रिचतुरानाबिभ्रतेकोर
कान् । गर्भग्रन्थिषुपञ्चषाःसुमनसोबध्नन्तिचूतद्रुमाःसम्प्राप्ताःप्रकटी
भवन्तिकुररीकण्ठेषुकूजोर्मयः । अत्रकाव्यचतुष्कादुच्छिद्यपादचतुष्टयं
ग्रथितमितिखण्डसङ्घात्यमामायंयोनिजकाव्यभेदः । तावन्तमर्थमु
पादायाधिकोवापश्चूलिका । यथा । कमलमनम्भसितत्रचकुवलयेता
निकनकलतिकायाम् । साचसुकुमारसुभगेत्युत्पातपरम्पराकेयम् ॥
तथाच । उभौरम्भास्तम्भावुपरिविपरीतौकमलयोस्तदूर्ध्वंरत्नाश्मस्थ
लमपिदुरूहङ्किमपियत् । ततःकुम्भौपश्चाद्विसकिसलयेकन्दलमथोत
दन्विन्दाविन्दीवरमधुकराःकिम्पुनरिदम् । अत्रस्थानेस्थानेधिकावा
पस्यप्रत्यभिज्ञानाच्चूडिकानामायंयोनिजकाव्यभेदः । बन्धच्छायामात्र
संवादीपरिमलः । यथा । अनेनयूनासहपार्थिवेनरम्भोरुकच्चिन्मनसो
रुचिस्ते । सिप्रातरङ्गानिलकम्पितासुविहर्त्तुमुद्यानपरम्परासु । य
थाच । यात्राप्रसङ्गादुपवीणयन्तीतस्याम्महाकालमविप्रतिष्ठम् । कृ
शाङ्गिवीणागुणसारणासुचिरात्कलाभ्यासफलंलभेथाः । अत्रसन्दर्भ
च्छायामात्रमनुकृतमितिपरिमलनामायंयोनिजकाव्यभेदः ॥१॥ शापान्त
इति । लोचनेमीलयित्वेत्यनेनलोकोक्त्यनुकारेणनयननिमीलनवदा
शुभावितासमागमसमयस्यप्रतिपाद्यते । तथाचसुकुमारतरकान्ताजी

सेयंतस्मैनृपशवेनमइतिविदग्धोक्तेरनुक्रतिश्चकोक्तिच्छाया ॥२॥ अर्भकोक्तिच्छायायथा । किंसःस्वर्गतरुःकोपियस्यपुष्पन्तिशाकरः । तेवृक्षाःकीदृशामातर्येषाम्मुक्ताफलम्फलम् । सेयमव्युत्पन्नशिशुजनोक्तेरनुकृतिरर्भकोक्तिच्छाया ॥ ३ ॥ उन्मत्तोक्तिच्छायायथा । दृष्टःकथंसुतनुकिङ्कुरुतेकिमस्मद्वार्तांसपृच्छतिशृणोतिनिवेद्यमानाम् । आस्तांकिमस्यकथयाकथयाशुतावदत्रागमिष्यतिनवाखलुसोभिमानी। सेयमसमञ्जसायाउन्मत्तोक्तेरनुकृतिरुन्मत्तोक्तिच्छाया ॥४॥ पोटोक्तिच्छायायथा । तिलकमसहास्मिसोढुंघनसारेणातिसारदोषोमे । लम्भयतिचदौर्बल्यङ्कुङ्कुमरागोममाङ्गानि । सेयमुत्तमपदारोपितनीचयुवत्युक्तेरनुकृतिःपोटोक्तिच्छाया ॥ ५ ॥ मत्तोक्तिच्छायायथा । पिपिप्रियससस्वयम्मुमुमुखासवन्देहिमेततत्यजदुदुद्रुतम्भभभभाजनङ्काञ्चनम् । इतिस्खलितजल्पितम्मदवशात्कुरङ्गीदृशःप्रगेहसितहेत

विताध्यवसायाभिप्रायः प्रवासविप्रलम्भाविष्टचेतसःप्रकाशितोभवतीति । उपलक्षणञ्चैतत्।वर्षाकालेचतुरोमासानित्यपिलोकोक्तिरेव ॥१॥ योहीति। कान्तामुखमेवजीवितसर्वस्वमभिमन्यमानस्तत्रालम्प्रत्ययशालिनःपशूनिवप्रतिशृङ्गारीविदग्धः ॥२॥ किंसदिति । नूनंत्रिजगद्वर्त्तिसकलार्थिसार्थकीकरणविख्यातकीर्त्तेःपारिजातप्रमुखस्यकस्यचिदेकस्तबकःसुधाभिराह्लादयन्त्रयमवलोकेदृश्यतइत्यादि ॥३॥ दृष्टइति । कथमित्यादिनातदेकतानतामाविष्कृत्यसहसैवास्तामित्यादिसम्प्रहाणङ्कथयतावदित्यादिनाचपुनरादानमसमञ्जसम् ॥४॥ उत्तमपदस्थानीययुवतिमनुकुर्वाणाउत्तमपदारोपितनीचयुवतिः ॥५॥ पिपिप्रियेति । अव्यक्तवृ

वेसहचरीभिरध्यैयत । सेयंस्खलत्यामत्तोक्तेरनुकृ
तिर्मत्तोक्तिच्छाया ॥६॥५॥ साभिप्रायस्यवाक्येयद्वच
सोविनिवेशनम् । मुद्रान्तांमुत्प्रदायित्वात्काव्यमु
द्राविदोविदुः ॥१॥ सास्मिन्पदस्यवाक्यस्यविभक्ते
र्वचनस्यच । समुच्चयस्यसंवृत्याषोढान्यासेनजायते
॥२॥ तासुपदमुद्रायथा । निर्माल्यंनयनश्रियःकुवल
यंवक्त्रस्यदासःशशीभ्रूयुग्मस्यसनाभिमन्मथधनुर्ज्यो
त्स्नास्मितस्याञ्चलः । सङ्गीतस्यचमत्तकोकिलरुता
न्युच्छिष्टमेणीदृशःसर्वाङ्गीणमहोविधेः परिणतंवि
ज्ञानचित्रञ्चिरात् । अत्रनिर्मात्यन्दासःसनाभ्यञ्च
लउच्छिष्टमितिपदानाङ्गौणवृत्तिव्यपाश्रयेणमुत्प्रदा

त्तिरूपंस्खलितजल्पितम्॥६॥ साभिप्रायेति । यद्यपिसम्पूर्णमेवकाव्यंव
क्त्रभिप्रायप्रतिच्छन्दकभूतम् । उक्तञ्च । वक्त्रभिप्रायंसूचयेयुरिति ।
तथापिनास्मिन्नितरसाधारणतयावाक्यार्थगोचरमभिप्रायमावेदयत्ये
वकाव्यसनाथीकरणक्षमवक्त्रभिप्रायविशेषप्रतिरूपकएकदेशनिवेशोदृ
श्यते। अतएवाङ्गुलीयादिमुद्रेवमुद्रेत्युच्यते । निरुक्तिमाह । मुत्प्रदा
यित्वादिति। मुद्युपपदेरातेर्दानकर्मणःकेरूपम् । मुद्रैवपदादिप्रका
श्यध्वनिव्यवहारभूमिरन्येषाम्॥१॥सास्मिन्नितिपदम्प्रातिपदिकंकृत्त
द्धितसमासरूपम् । विभक्तिवचनयोःसामान्यविशेषभावेपिपृथक्पृथ
गभिप्रायव्यञ्जकतयानिर्द्देशः।आस्तामित्यादिवचनसङ्कोचःसंवृतिः॥२॥
गौणवृत्तिव्यपाश्रयेणेति।निर्माल्यादिपदानामत्यन्ततिरस्कृतवाच्याना
मतिविच्छायत्वादिलक्षणाद्वारेणलावण्यविशेषध्वननात्सहृदयहृदया
वर्जकामान्निवेशोदृश्यते।एवम्।तालाजाअन्तिगुणाजालातेसहिअएहि
ङ्घेय्यन्ति। रविकिरणाणुग्गहिआइंहोन्तिकमलाइङ्कमलाइम्॰। तथा।
अमृतममृतञ्चन्द्रश्चन्द्रस्तथाम्बुजमम्बुजंरतिरपिरतिःकामःकामोमधू
निमधून्यपि।इत्यादावर्थान्तरसङ्क्रमणादिनातत्प्रकाश्योध्वनिरनुस

यिनांसाभिप्रायनिवेशादियम्पदमुद्रा ॥१॥ वाक्यमु
द्रायथा । यत्स्वच्छेसलिलात्मनिप्रतिफलद्देवेत्रिया
मापतौपीयूषाकृतिपर्यवस्यतिकिलज्योत्स्नेतितत्वा
न्तरम् । तिग्मन्धामचिरञ्चकास्तिदिवियत्तत्रा
स्तिदिव्यःपुमान्यंविज्ञातवतांत्रुटन्तिनिखिलाभूयो
भवग्रन्थयः । अत्रतत्रास्तिदिव्यःपुमानित्यादेर्वा
क्यान्तरस्यपूर्ववाक्योपकारित्वेनमुत्प्रदायकस्याभि
प्रायपूर्वन्निवेशादियंवाक्यमुद्रा ॥२॥ विभक्तिमुद्राय
था। श्रियःप्रदुग्धेविपदोरुणद्धियशांसिसूतेमलिनम्प्र
मार्ष्टि। संस्कारशौचेनपरम्पुनीतेशुद्धाहिबुद्धिःकिल
कामधेनुः। अत्रप्रदुग्धेरुणद्धिसूतेप्रमार्ष्टिपुनीतेइति
लिङ्विभक्तीनां(दुहिपच्योःसकर्मकयोरुपसङ्ख्यानं)

न्धेयः॥१॥यत्स्वच्छइति। आदित्यकलाएवप्रतिफलिताश्चन्द्रव्यपदेशंल
भन्तइत्यागमः। तदाह। सलिलमयेशशिनिरवेदीधितयोमूर्च्छितास्त
मोनैशम्।दलयन्तिदर्पणोदरविहताइवमन्दिरस्यान्तरिति। पूर्ववाक्यो
पकारित्वेनेति। देवेपीयूषकृतितत्वान्तरन्तिग्मधामचकास्तीतिचप
दगाधतयातर्कितमिति किलशब्दकटाक्षितमभिधानम्। तत्रकिंसम्ब
न्धमित्याकाङ्क्षाविपूरकन्तत्रास्तीत्यादिवाक्यम्। तथाहि। यएषआ
दित्यपथंव्याप्यपुरुषोदीप्यतइत्याद्युपनिषदर्थनिवेशनमभिप्रायपूर्वक
माभासते। एतेनान्येपिवाक्यप्रकाश्यप्रकाराःपरिगृहीताबोद्धव्याः॥
पूर्ववाक्येन्तर्भावितद्वित्वमवसेयमिति ॥२॥ श्रियइति। बुद्धिरूपाकाम
धेनुःश्रियःप्रथयतीत्युक्तेनतथाप्रकर्षोयथोक्तेतुविशिष्टःकवेरभिप्रायउ
न्नीयते। तथाहि। यथोदुम्बरःसलोहितम्फलम्पच्यतइतिकर्मकर्त्तरिफ
लोदुम्बरयोरैकात्म्यमवसीयतेतथेहापिश्रीरूपमात्मानम्बुद्धिःप्रकाश
यतीति।अतएवहि[दुहिपच्योःसकर्मकयोः] इतिबाह्यकर्मविशिष्टस्यैव
कर्त्तुःकर्मवद्भावःशिष्यते। [नदुहस्नुनमांयक्चिणौ]इतियगभावोपिवि

(रुधादिभ्यःश्नम्)इत्यादिभिर्विशेषलक्षणवतीनांयो गैःपरस्मैपदात्मनेपदपर्यायेणनिवेशोदृश्यते । श्रि योविपदोयशांसिमलिनंसंस्कारशौचेनेतिचसुह्विभ क्तीनाम् (श्रचिश्नुधातुभ्रुवांय्वोरियङुवङौ) इत्या दिविशेषलक्षणवतीनां विकृताविकृतानाम्मङ्गलाम ङ्गलार्थपरत्वेनमङ्गलार्थानामभिप्रायतःप्रयोगोलक्ष्य ते । तेनेयंविभक्तिमुद्राभवति ॥३॥ वचनमुद्रायथा । विश्वम्भराभगवतीभवतीमसूतराजाप्रजापतिसमो जनकःपितातेः । तेषांवधूरत्वमसिनन्दिनिपार्थिवा नांयेषाङ्कुलेचसविताचगुरुर्वयञ्च। अत्रवयमित्या त्मनिबहुवचनेनसविताचेतिसवितर्यैकवचनेनसवि तुरप्यहम्बहुमतइत्यभिप्रायोवक्तुरितीयंवचनमुद्रा॥४॥

शेषाभिप्रायनियतएवरूपद्वीत्यागमरूपः । सूतेइतिलुप्तः प्रमार्ष्टीतिवृ द्धियोजकःपुनीतेइतिस्वरूपेणविकृतश्चविकरणः।श्रात्मनेपदपरस्मैप दयोरेकान्तरितोनिवेशःश्रियइतिप्रकृतिभागेइयङादेशोविकारोविभ क्तावपिविकारोविपदइति प्रकृतिरविकृता । विभक्तिस्तुरुत्वेनविकृ ता । यशांसीतिद्वेअपिविकृते । मलिनमितिवैकल्पिकपरसवर्णविधौ ह्यनविकृतम् । संस्कारशौचेनेति प्रकृतिरविकृता । प्रत्ययस्त्विना देशेनविकृतः।तथाश्रियइतिमङ्गल्यम्। विपदइतिविपरीतमितिक्रमेण शुद्धायुद्विःकामधेनुरिति मङ्गलपरम्परानिवेशनेनोपसंहारश्चित्रांशुको ज्ज्वलइव प्रतिभासमानोनुबिम्बमिवकामपि कान्तिमभिव्यञ्जयतूप लक्ष्यते।मङ्गलामङ्गलार्थपदपरत्वेनेति । मङ्गलामङ्गलेभ्यःपदेभ्यःपरव र्त्तित्वेनेत्यर्थः ॥३॥ विश्वम्भरेति । अहङ्कारप्ररोहस्यपूर्वङ्कुणप्रयोजक त्वमुक्तम्। इहतुकवेरभिप्रायविशेषस्यालङ्कारघटकतेतिविभागः ॥ अ त्राशंसायामिति । गतमितिनिष्ठाप्रत्ययेनभूतताद्योतनादाशंसाप्रतीता वपिकथम्प्रकृतपोषइत्यतउक्तंसमुच्चयद्वारेणेति । तेनहितुल्यकक्षता

समुच्चयमुद्रायथा । जातश्चायम्मुखेन्दुस्तेभ्रुकुटिप्र णयीपुरः । गतश्च वसुदेव स्यकुलन्नामावशेषता म् । अत्र (आशंसायाम्भूतवच्च) इतिभूतवद्भावस्य हयग्रीवप्रभावातिशयंसूचितःसमुच्चयद्वारेणनिवेशा दियंसमुच्चयमुद्रा ॥५॥ संवृतिमुद्रायथा । मणिरत्न म्प्रसेनस्यतच्चानार्येणविष्णुना । लब्धंयेनाद्ययोगेनते नकिङ्कीर्तितेनवः । अत्रकथापिखलुपापानामलमश्रे यसेयतइतिकिन्तेनवःकीर्तितेनेतिसाभिप्रायसंवृति कारणादियंसंवृतिमुद्रा ॥६॥६॥ विधिद्वारेणवायत्रनि षेधेनचवापुनः । प्रतीयतेविशिष्टोर्थःसोक्तिरत्राभिधो यते ॥१॥विधेरथनिषेधात्स्यादधिकारा द्विकल्पतः। नियमात्परिसङ्ख्यायाउपाधेःसेहषड्विधा ॥२॥ ता सुविध्युक्तिर्यथा । शुश्रूषस्वगुरून्कुरुप्रियसखीवृत्तिं सपत्नीजने । अत्राप्राप्तौप्रापणवचनंविधिः ॥१॥ नि

प्रतीतौत्वच्छेदङ्गीकृतरोषत्तदासिद्धमेवसमीहितमिति । वस्तुरूपव सायविशेषप्रतीतौसमुच्चयएवमुद्रापदवीमारोहतीति । शेषंसुबोधम्॥ ४॥५॥६॥विधीतिउक्तिरभिधा । साद्वयीभावाभावविषयत्वात् । त द्धिगोरपत्यमयङ्गौरित्यतःकोभेदइत्याशङ्क्य विधिद्वारेणवेत्यादि । भा वज्ञानंविधिरभावज्ञानन्निषेधो लोकेगृहीतव्युत्पत्तिबलेन भावाभावा न्यतरसंवित्सरणिमारुह्यकाश्चैकगोचरेरसाद्यात्मनिपर्यवस्यन्तीभवत्यु क्तिरलङ्कारइतिभावः ॥१॥ सोयम्भावादिप्रपञ्चेनषोढाविधिःप्रथतइ त्याह। विधेरिति। उपाधिर्विशेषणंविध्यधिकारौशुद्धभावभेदौनिषेध नियमौशुद्धप्रतिषेधभेदौ। विकल्पपरिसङ्ख्ये सङ्कीर्णभेदाविति। त त्राप्राप्तप्रापणोविधिःप्रसक्तप्रतिषेधोनिषेधः क्रियाफलसम्बन्धोधिका रस्तुल्यकक्षयोरेकबाधेनान्यसम्बन्धोविकल्पोन्याबृत्तिफलकोविधिर्नि यमः शेषविधिनिषेधनान्तरीयकौविशेषनिषेधविधीपरिसङ्ख्या ॥२॥

पेधोक्तिर्यथा । भर्तुर्विप्रकृतापिरोषणतयामास्मप्रती पङ्गमः।अत्रप्राप्तौनिवारणन्निषेधः॥२॥अधिकारोक्ति र्यथा । भूयिष्ठम्भवदक्षिणापरिजने भोगेष्वनुत्सेकिनी यान्त्येवङ्गृहिणीपदंयुवतयोवामाः कुलस्याध यः । अत्रविधिनिषेधज्ञानाद्विधिनिषेधेयोग्यताधि कारः ॥ ३ ॥ विकल्पोक्तिर्यथा । एकोनेताक्षत्रियो वाद्विजोवाएकाविद्याध्यात्मिकीवात्रयीवा । एकाभा र्यावंशजावाप्रियावाएकस्मित्रम्भूपतिर्वायतिर्वा । सोयञ्जातिक्रियागुणद्रव्यावलम्बीचतुर्विधोविक ल्पः॥४॥ नियमोक्तिर्यथा । विवादोपार्थएवायम्पा र्थएवधनुर्धरः । योनकेवलमात्मीयैःपरैरप्यभिनन्द्य ते । सोयमयोगान्ययोगात्यन्तायोगव्यवच्छेदलक्ष

अप्राप्तौप्राप्तवचनमिति।अप्रवृत्तप्रवर्त्तनात्मकोहिविधिःकथमितरा पेक्षत्वेसङ्कच्छते।अतएवोच्यते।विधिरत्यन्तमप्राप्ताविति॥१॥ प्राप्तौनि वारणमिति। रोषेणप्रसजत्प्रतीपाचरणान्निवार्यते ॥२॥ विधिनिषेधज्ञा नादिति । विहितनिषिद्धक्रियाज्ञानेनतत्फलसम्बन्धयोग्यत्वमधिका रः ॥३॥ शुश्रूषस्वेति भूयिष्ठम्भवदक्षिणेतिद्वेविहितेमास्मप्रतीपङ्गम इतिभोगेष्वनुत्सेकिनीतिद्वेनिषिद्धे । विधिनिषेधयोग्यताविधिनिषेध फलसम्बन्धयोग्यत्वङ्गृहिणीपदप्राप्तिर्विहितक्रियाफलम् । कुलाधीभ वनन्तु निषिद्धक्रियाफलमिति । सोयमिति । जात्यादय एव पदार्था स्तेचविकल्पन्ते । कुतोजात्यादिनातद्व्यवस्था । वाशब्दःपाक्षिकभा वमाहेतिभावाभावसङ्करः॥५॥ अपार्थएवेति । विशेषणसङ्गतएवकारः केवलंविशेषणयोगस्यासम्भवेत्युत्पत्तिवशेनतदभावंव्यवच्छिन्द्योग्य त्यावृत्तावतिष्ठते । पार्थएवेतिविशेष्यसङ्गतएवशब्दस्तदन्यस्यधनुर्द्ध रतारूपंविशेषणंव्यावर्त्तयन्नन्ययोगव्यवच्छेदद्योतकोभवति । केवल मिति । अभिनन्दनस्यनायोगत्वात्ययोगंव्यवच्छिनत्ति । किन्तुतस्स

णस्त्रिःप्रकारोनियमः ॥ ५ ॥ परिसङ्ख्याक्तिर्यथा । पञ्चपञ्चनखाभक्ष्यावामेनाक्षणानपश्यति । काठिन्यमस्याःकुचयोःकिमसद्यन्नरोचते। तदिदंविधिनिषेधाभ्यांविशेषाभ्यनुज्ञानम्परिसंख्येत्युच्यते ॥६॥७॥ अयुज्यमानस्यमिथःशब्दस्यार्थस्यवापुनः । योजनाक्रियते यासौ युक्तिरित्युच्यते बुधैः ॥१॥ पदञ्चैव पदार्थश्चवाक्यंवाक्यार्थएवच । विषयोस्याःप्रकरणम्प्रबन्धश्चाभिधीयते ॥२॥ तत्र । योगकारणपर्यायाङ्गाङ्गिभावपरम्पराः । पदयुक्तेर्निमित्तंस्युर्निरूढाः पदसिद्धये ॥ ३ ॥ विरुद्धानां पदार्थानाञ्जात्यादी

स्वन्यस्बोधयन्नात्यन्तिकमयोगमत्यन्तायोगव्यवच्छेदोभिधीयते ॥५॥ पञ्चपञ्चेति । पञ्चनखेषुपञ्चभक्ष्यानान्ये । कुचयोरस्याःकाठिन्यंन यचनादाविविधिविशेषविधीशेषनिषेधमनुजानीतः । वामेननपश्यतिदक्षिणेनतुपश्यत्येव । किमसत्किमशोभनम् । यद्यस्मैनरोचतेऽइतरत्तुसदेयेतिविशेषनिषेधौशेषविध्यनुज्ञाविषयाविति॥६॥अयुज्यमानस्येति। पूर्वस्मैदैकवाक्यतातत्तोवाक्यैकवाक्यत्वमनन्तरंप्रकरणैकवाक्यत्वमितिप्रबन्धनिर्वहणंयावत्कविव्यापारः । तत्रगामश्वाजशुक्लान्दण्डेनेत्यादीनांलोकेगृहीतव्युत्पत्तीनामेवयद्यपिकाव्यानुप्रवेशस्तथापिभङ्गीभणितिसनाथान्येवकाव्यपद्धतिमध्यासतेऽइत्यग्रहतानामुपादेयत्वेयापाततःपरस्परमन्वयोनप्रतिभासतेतत्रावश्यङ्गविनास्वाभिप्रायप्रतिपत्तिरेवनिर्विशेषनिवेशनेनविवक्षितवाक्यार्थप्रतीत्यस्खलनंविधेयमतएवैचित्र्यादलङ्कारता। तदिदमुक्तम्। अयुज्यमानस्येति । आपाततिशेषः । योजनाश्रन्वयौपयिकरञ्जकविशेषनिवेशनन्तस्यविषयोऽर्थोशब्दःपदंवाक्यम्प्रकरणम्प्रबन्धोर्थःपदार्थोवाक्यार्थश्च॥१॥ युक्तिरित्याह । पदञ्चैवेति॥२॥योगेत्यादौद्वन्द्वगर्भःप्रत्येकमन्वीयते।योगोयोगरूढिःकारणङ्कार्यंकार्यकारणौ

नाम्परस्परम् । योजनायेहतांयुक्तिम्पदार्थविषयां विदुः ॥४॥ गर्भः सहनिगर्भेण संवृत्तिः ससमुच्चया । हेतवोवाक्ययुक्तीनां क्रियतामेवमादयः ॥ ५ ॥ य त्तदादेरुपादानंक्रियाभ्याससमुच्चयौ । क्रियासम भिहारश्च वाक्यार्थान्युज्यते मिथः ॥ ६ ॥ यदप्यद्धे यशैलादिवर्णनाभ्युपपत्तये । वाक्यंसंहप्रकरणवि षया युक्तिरिष्यते ॥७॥ प्रबन्धविषयाप्येवं युक्ति रुक्तामनीषिभिः । उदाहरणमालैषांरूपव्यक्त्यैनिद र्श्यते॥८॥तत्रयोगरूढिपरम्परादिनिमितापदयुक्ति र्यथा । प्राच्यान्निर्जितजम्भजिद्दिपशिरःसिन्दूर शोभान्दिशिप्रत्याख्यातहयाङ्गनास्यहुतभुग्ज्योतिःप्र तीच्यर्णवे । प्रातर्जातमदोन्मिषत्कमलिनीकिञ्जल्क

द्वये॥३॥ यद्यपिपदानामर्थद्वारकत्वसम्बन्धस्तथापितद्दीपयिकविशेषः क्वचित्पदैर्वेषसाक्षादवसीयतेक्वचित्पदार्थश्चित्यभिप्रेत्याह । विरुद्धाना मिति।एवंवाक्यवाक्यार्थयोरपिवाक्यसमध्यवर्त्तिप्रकृतरसानुगुणरससम र्पकंवाक्यान्तरम्॥४॥गर्भस्तस्यैकदेशभूतस्तथाभूतोनिगर्भः।उक्तरूपसंहा रवचनंसंवृतिः । तुल्यप्रधानभावानांयुगपदेकार्थसम्बन्धःससमुच्चयः।आ दिपदादन्वाचयादयः॥५॥यत्तदोरुद्देश्यविधेयगामिनोरादिग्रहणादिद मेतदासाङ्क्रियायामावृत्तिरभ्यासः। विजातीयानामेकदैकत्रसम्बन्धः समुच्चयः । समभिहारोभूयस्त्वस्यकर्षकृतियावत्॥६॥अतिसान्नतयाप्रति भासमानत्वमश्रद्धेयता । तदेतासांयुक्तीनामतिदुरूहत्वाह । उदा हरणमेवेति॥७॥जम्भजित्पदंकृदन्तत्वाद्यौगिकम् । तथाजम्भजिद्दिग्द त्यपिसभासत्वात् । तदेतदुभयंयोगेनातिप्रयुज्यमानरूढिमेवेषि षद्धितैरावतरूपेवस्तुनिनियम्यते । ह्याङ्गनेति । बहवोपत्नीः । आस्यमितिसुखपर्यायः। हुतभुगित्यनलपर्यायः।तेयस्यदक्षस्यदुहितरोत्र तासांप्रतिसन्धानेनाभिनतवदनासुखानलप्रतीतिरुक्तेति । तदप्यविज्ञ

कल्कोद्भटम्भानोःपूर्णनभःकटाहकुहरक्रोडम्महःपातु
वः॥ अत्रजम्भजिद्द्विपइतियोगरूढिपरम्परा । ह
याङ्गनास्यहुतभुगितिपर्यायपरम्परा । प्रातर्जात
मदोन्मिषत्कमलिनीकिञ्जल्ककल्कोद्भटमितिहेतुपर
म्परा । नभःकटाहकुहरक्रोडमित्यङ्गाङ्गिभावपरम्प
राचपरिस्फुरन्तीदृश्यते ॥१॥ विरुद्धजात्यादियोग
निमित्तापदार्थयुक्तिर्यथा । तन्नागेन्द्रकरोरुदोःक
रिशिरःपीनस्तनांसंवपुः स्त्रीपुंसाकृतियत्पितुस्तवमु
खेरम्योग्रमीक्षामहे । वाराह्याइतिनर्मणीभवदनः
पश्यन्यदास्यामुखन्नाभिष्टौतिहसन्ननिन्दतितदा
श्लिष्टोम्बयापातुवः । अत्रस्त्रीपुंसाकृतीतिविरुद्धजा
तियोजना । नाभिष्टौतिननिन्दतीतिविरुद्धक्रिया
योजना । रम्योग्रमितिविरुद्धगुणयोजना । मुखेव
पुरीक्षामहेइतिविरुद्धद्रव्ययोजनाचलक्ष्यते ॥ २ ॥

ञ्जल्कोन्मेषेतस्यकल्केतस्याप्युद्भटतायांहेतुभावइतिकार्यकारणपरम्प
रा । नभःकटाहोङ्गी । तस्याङ्गमेकदेशःकुहरन्तस्यापिक्रोडइत्यङ्गाङ्गि
परम्पराचयथाभिमतपदैकवाक्यतानिदानमितितदेतद्व्याचष्टे । अत्रे
ति। परिस्फुरन्तीकविशक्तिव्यञ्जकतयासहृदयहृदयेषुप्रतिफलन्ती॥१॥
नागेन्द्रकरवदूरुःपार्वतीभागेदोर्बाहुश्चदेवभागेकरिकुम्भवत्पीनःस्तनो
देवीभागे । अंसःस्कन्धश्चदेवभागे । एवंविधत्वत्पितुरीश्वरस्यवपुस्त्व
न्मुखे । एकविषाणतयाकरिकरिणीसमाहारात्मनिवीक्ष्यामहइतिवा
राह्याःपरिहासोक्तिः । वाराहीवराहप्रकृतिभूतोमातृविशेषः । इभ
वदनोविनायकः । स्त्रीत्वपुंस्त्वयोःपरस्परपरिहारेणोपलम्भाद्विरु
द्धयोरपित्वत्पितुरित्यनेनस्तुतिनिन्दयोःप्रतिषेधेनरम्यताभीषणतयो
र्भागव्यवस्थयामुखवपुषोःसादृश्येनाभितोभिप्रायप्रतिबिम्बितेनयोज
नातिहितेतितत्प्रतिपादकानाम्पदानामेकवाक्यतासिद्धिः । तदिय

वाक्यगर्भादिविषयावाक्ययुक्तिर्यथा । दिङ्मातङ्गे
त्यादौ। अत्रवदन्तएवहिवयंरोमाञ्चिताःपश्यतेति
वाक्यगर्भः। तत्रैवपश्यतेतिवाक्यान्तरेभावाविष्कार
वाचानिगर्भः । किमपरंरामायतस्मैनमइतिवाक्य
संवृतिः । यस्मादाविरभूत्कथाद्भुतमिदंयत्रैवचास्त
ङ्गतमितिवाक्यसमुच्चयः । सेयमेतेषांयोजनाद्वाक्य
युक्तिर्भवति ॥ ३ ॥ यत्तत्तदाद्युपादाननिमित्तावा
क्यार्थयुक्तिर्यथा।तिष्ठद्वारिभवाङ्गणेव्रजबहिःसद्मेति
वर्त्मेक्षतेशालामञ्चतमङ्गमञ्चवलभीमञ्चेतिवेश्मा

माह । अत्रेति॥२॥जातिक्रियेत्यादिनाक्रमेणविरोधप्रसिद्धेर्गुणविरोध
मुल्लङ्घ्यक्रियाविरोधोव्याख्यातः। आघाटःसीमा। गर्भोविवृतपूर्वस्त
त्रैवआश्चर्यरसाविष्टब्धस्यवक्तुःपश्यतेतिवाक्यान्तरन्निगर्भः।गर्भवाक्ये
नसमर्प्यमाणप्रकृतरसान्वयिनिरसेप्रकर्षाधायकोनिगूढोगर्भोनिगर्भइ
त्युच्यते । तदिदम्भावाविष्कारवाचीत्युक्तम्। विप्रायप्रतिपाद्यतेसस्य
न्नातैरभुज्यत इत्यादिवक्तव्ये किमपरमित्यस्यसंवृतित्वेन योजना ।
एवंहिकियदस्यमहानुभावस्यतादृशाचरितंप्राप्यतेतदिहमौनमेवो
चितमितिभूयान्प्रकर्षोवसीयते। यस्मादाविरभूत्कथाद्भुतमिदंयत्रैव
चास्तङ्गतमितिवाक्यद्वयस्यपूर्ववाक्यगततर्कार्थसमुच्चयवाचिनाचकार
रेणयोजनाव्यक्तैव । एवमादयइति । तद्यथा । वीथ्यङ्गानित्रयोदश
प्रस्तावनापरिचेयानि। सन्ध्यङ्गानिविलासाद्यानिचतुष्षष्टिसन्धयश्चरू
पकावयवभूतामुखप्रतिमुखगर्भविमर्षनिर्वहणाख्याःपञ्च । प्रकृतरसा
वस्थारूपाणिचपञ्चैव । बीजबिन्दुपताकाप्रकरीकार्याणितत्तत्प्रकर
णप्रबन्धरूपवाक्यैकदेशयोजनान्यवगन्तव्यानि ॥३॥ तिष्ठेति । उपस्थि
तिसमयसीमामतिक्रामतिप्रियतमेतत्कालद्विगुणितोत्कण्ठातरलिता
न्तःकरणाकदाचित्प्रागिवगर्भगृहद्वारितिष्ठति । ततस्तत्रानवलोकमा
नागृहाङ्गणेभवति । तदनन्तरंवेश्मनोबहिर्व्रजति । सोयंविजातीय
क्रियार्थनानाधातुगोचरःसर्वकालेषु [समुच्चयेन्यतरस्याम्] इतिलो

उचति दूतींसन्दिशसन्दिशेतिबहुशः सन्दिश्यसास्ते तथातल्पेकल्पमयीवनिर्घृण ! यथानान्तन्तिशाग च्छति । अत्रप्रथमपादेक्रियासमुच्चयोद्वितीयेक्रिया भ्यासस्तृतीयेदूतींसन्दिशसन्दिशेतियावत्क्रियास मभिहारः । शेषेतुतथानिशान्तन्नगच्छतीतियत्तदो रुपादानंवाक्यार्थयुक्तेर्हेतुःप्रतीयते । सेयमुक्तलक्ष णावाक्यार्थयुक्तिर्भवति ॥४॥ अश्रद्धेयपर्वतादिवर्ण नहेतुःप्रकरणविषया यथा । मुदेमुरारेरमरैःसुमेरो रानीयय्स्योपचितस्यशृङ्गैः । भवन्तिनोद्दामगिराङ्क वीनामुच्छ्रायसौन्दर्यगुणामृषोक्षाः ॥५॥ प्रबन्धव्या पिवस्तूपपत्तिहेतुस्तुप्रबन्धविषययुक्तिर्भवतिसाय था । धूमज्योतिःसलिलमरुतांसन्निपातःक्वमेघः स न्देशार्थाःक्वपटुकरणैःप्राणिभिःप्रापणीयाः । इत्यौ त्सुक्यादपरिगणयन्गुह्यकस्तंययाचेकामार्तोहिप्रकृ तिकृपणाश्चेतनाचेतनेषु ॥६॥ ८॥ उक्तिप्रकारोभणि

टोहिरनुशिष्यते । अतएवदर्शनावच्छेदभूतद्वारावस्थानादिसामान्य वचनः [समुच्चयेसामान्यवचनस्य] इत्यनुशासनान्नियमितप्रयुक्तिरी ज्ञतिरनुप्रयुज्यते। नायकस्यसर्वयाहृदयवैशसंसर्वथैवाश्रद्धानादूरदूर तरदूरतमरथ्याभागावलोकनार्थिनीशालाङ्गहमारोहति । ततस्तस्मा दुच्चैस्तमङ्गमट्टालकमनन्तरन्तस्मादुच्चतरांवलभीमुपरितनकुटीमिति। अतएवाञ्चनक्रियैयात्रावृत्तेति [क्रियासमभिहारेलोट्लोटोहिस्वौ वाचतच्यलोः] इत्यनुशिष्यते । अतएवच [यथाविध्यनुप्रयोगःपूर्व स्मिन्] निमितस्यैवधातोरनुप्रयोगोपि । एवमप्यनागच्छतिनायकेदू तीव्यापारःशरणंयत्कुरुटनायांस्वयंवातत्रगमनमित्युपदिश्यतेतेनतत दभिप्रायसंवर्द्धकसन्देशप्रकर्षःसोयमाभीक्ष्ण्यद्विरुक्त्याव्यज्यते । अत

तिःसम्भवेऽसंभवेचसा। विशेषसंवृत्त्याश्वर्यकल्पना
सुखकल्पते॥१॥अत्रसंभवभणितिर्यथा। सद्योद्रावित

एवलोटःसमभिव्याहारोविषयोनतुघञादिवदभिधेयइतिपूर्वाचार्याः।
इतिशब्दादधिकञ्चतुर्थवाक्यानुप्रविष्टमितियावच्छब्देनावच्छिनत्ति
सन्दिशसन्दिशेतियावदितिदिक्॥४॥५॥६॥उक्तीति।उक्तिरभिधानमुच्चा
रणक्रियालक्षणाक्रियासासर्ववाक्यसाधारणीकथमलङ्कारइत्याशङ्क्य प्र
कारपदम्। प्रकारोभङ्गीरूपता। लौकिकशास्त्रीयवचनातिगामीविशे
षःसएवकैश्चिदभ्यभिमननुसन्दधानैरलङ्कारसामान्येउक्तः। उक्तिरूप
त्वाविशेषेकथमयमेवसङ्गच्छतामित्यतोविभागप्रदर्शनाअजेनविषय
विशेषादेवतद्रूपतामुपपादयति। सम्भवइत्यादि। तत्रबहिरसम्भा
व्यमानस्यापिप्रतिभानिर्मितचित्रतुरगवत्प्रतीतिःसम्भवस्तामर्पयन्ती
सम्भावनात्मिकाभणितिःसैवहिकिन्त्वस्तिकाचिदपरापिपदानुपूर्वीय
स्यात्रकिञ्चिदपिकिञ्चिदिवावभातीतिन्यायेनतदर्थनिर्माणप्रवीणा
"यथास्मैरोचतेविश्वन्तथैवपरिवर्त्तत,,इतिव्यवहारकारणम्भवतीति
तथाविधएवविषयेशास्त्रप्रसिद्धप्रकारवैपरीत्येनबाधवर्णनमसम्भाव
ना। तदुच्यते। इहतेजःप्रन्तिकइणोजःप्रमिणमोजाणसःप्रलपरिणा
मम्। याःप्रासुठिःप्रन्दीसइःप्रामोःप्रघणंवतुच्छंव॰। अतएवेयन्निषेधरू
पा। तज्जातीयव्यावृत्तोधर्मोविशेषस्तंक्वचिद्विदधानाकवेरभिप्रायवि
शेषमर्पयन्तीनिषेधप्रसङ्गेविशेषभणितिर्विधिरूपाभवतीतितामवलम्ब
मानाचमत्कारकारिणीविशेषेपर्यवस्यन्तीवर्णनापल्लवप्रसङ्गेसङ्कोचम
यगाहमानाविधौनिषेधरूपापर्यवस्यति। अतर्क्कितोपनतंविस्मयजन
कमाश्चर्यन्तस्यनिषेधेविधातव्येयत्किञ्चिद्विधानन्तदाश्चर्यरूपतामन्तरे
णकाव्यकक्षामारोढुंनक्षमतइतिनूनमनयाविस्मयार्पणमेवसर्वस्वभूतम
वलम्बनीयमितिनिषेधविधिप्रसङ्गेनिषेधरूपाभणितिर्बहिरसम्भावि
नःक्वचिदसतोविशेषस्योत्प्रेक्षाकल्पना।तामाश्रयन्तीविधाननिषेधमा
त्रेणचरितार्थाकिंचिद्विशेषंविदधातिइतिविधिनिषेधप्रसङ्गेसामान्यतः
प्रतिषेधलिविशेषतश्चविधत्तइतिनिषेधविधिरूपाकल्पनाभणितिः॥१॥

केतकोदरदलस्रोतःश्रियंबिभ्रतीयेयम्मौक्तिकदामगु
म्फनविधेर्योग्यच्छविःप्रागभूत्। उत्सेक्याकलशीभि
रञ्जनिपुटैर्मेयामृणालाङ्कुरैःपातव्याचशशिन्यमुग्ध
विभवेसावर्ततेचन्द्रिका। अत्रसद्योद्रावितकेतकोद
रदलस्रोतःसादृश्यादिसंभवादियंसम्भवभणितिर्द्वि
रूपा ॥१॥ असम्भवभणितिर्यथा। क्वपेयञ्ज्योत्स्ना
म्भोवदनबिसवल्लीसरणिभिर्मृणालीतन्तुभ्यःसिचय
रचनाकुत्रभवति। क्वचापारीमेयोबतबकुलदाम्नांप
रिमलःकथंस्वप्नःसाक्षात्कुवलयदृशङ्कल्पयतुताम्। अ
त्रज्योत्स्नादीनांमृणालादिभिःपेयत्वादेरसंभवादिय
मसंभवभणितिर्निषेधरूपा ॥२॥ विशेषभणितिर्यथा।
रेवतीदशनोच्छिष्टपरिपूतपुटेदृशौ। वहन्हलीमदक्षी
वःपानगोष्ठ्यांपुनातुवः। अत्ररेवतीदशनोच्छिष्टयो
रपिहलिदृशोर्यत्पूतत्वम्मदक्षीवस्यापिहलिनोयत्पा
वनत्वमसौविशेषइतीयंविशेषभणितिर्निषेधेविधि

सद्यइति। केतकोदरदलानां द्रावणं ततः स्रोतोरूपता ततस्तेनो
पमितायावहलतरबहिर्भागस्यकलशीभिरुत्सेचनमनन्तरङ्किंचिदल्पी
भूतमध्यभागस्यकरतलाञ्जलिपुटैर्मानन्ततः शेषीभवतः सारभागस्य
मृणालाङ्कुरैःपानमितिबहिरसम्भाविनएवश्रियम्बिभ्रतीतिनिदर्शनया
योग्यपदेनोत्सेक्येत्यादिभिश्चमत्कारिणीसम्भावनाजायते ॥१॥ क्वपेय
मिति। स्वप्नस्यसाक्षात्कल्पनेसामर्थ्यमसम्भावितन्तदेवमेवोच्यमानन्त
थाशोभामुन्मीलयतीतिक्वपेयमित्यादिप्रतिवस्तुनानिर्द्देशव्यङ्ग्यारक्ति
सुषमाविस्तारङ्कुर्वाणाभवत्यसम्भवभणितिः। पारीभाण्डभेदः ॥२॥ रेव
तीति। दशनोच्छिष्टंचुम्बितम्। उच्छिष्टक्षीवयोर्नक्वचित्पूतत्वंपावन
त्वंवादृष्टचरमितिहलिनेत्रपुटहलिनोर्विधीयमानन्देवताचरितस्यलो

रूपा ॥ ३ ॥ संवृतिभणितिर्यथा । आभरणस्याभ
रणंप्रसाधनविधेःप्रसाधनविशेषः । उपमानस्या
पिसखेप्रत्युपमानंवपुस्तस्याः । अत्रप्रसिद्धवर्णनाप्र
पञ्चविधेराभरणस्याभरणंवपुरित्यादिवाक्यैःसंवर
णादियंसंवृतिभणितिर्विधौनिषेधरूपा ॥ ४ ॥ आश्च
र्यभणितिर्यथा । ज्योतिर्भ्यस्तदिदन्तमःसमुदितञ्जा
लोयमद्रष्टुः शिखीपीयूषादिदमुच्छ्वसंविषमयच्छा
यामूर्जन्मातपः । कोनामास्यविधिःप्रशान्तिषुभवेद्
बाढन्द्रढीयान्नयङ्ग्रन्थिर्यत्प्रियतोपिविप्रियमिदंस
ख्यःकृतंसान्त्वनैः।अत्रज्योतिःप्रभृतिभ्यस्तमःप्रभृती
नामुत्पत्तेराश्चर्यरूपत्वादियमाश्चर्यभणितिर्निषेधवि
धौविधिनिषेधरूपा ॥५॥ कल्पनाभणितिर्यथा । द्रु
श्यन्द्रुशांसहस्रैर्मनसामयुतैर्विभावनीयञ्च । सुकृत

कोत्तरताङ्गमयतीतिनिषेधप्रसङ्गेविधिरूपेयमणितिः ॥ ३॥ आभरण
स्येति । अत्रचन्द्रमुखीदुग्धधवलनयनाबिम्बोष्ठीकरिकुम्भस्तनीत्या
दिकविसमयप्रसिद्धवर्णनाप्रपञ्चप्रसङ्गेयथोक्तरूपेणातस्यसङ्कोचोनिषेध
स्तत्प्रतिष्ठाभणितिरलङ्करणमेवानयाक्रियतइतिकान्तिविशेषंव्यञ्जय
न्तीविधौप्रसक्तेनिषेधरूपाभवति॥४॥ज्योतिर्भ्यइति । प्रियोहिनाप्रिय
माचरतीत्युत्सर्गसिद्धाप्रियानाचरणन्दैवगत्याशठेसम्भाव्यमानमाश्चर्य
मुन्मुद्रयत्सामान्यपरम्परयाप्रेमाविष्टमन्तःकरणमावेदयति। यदिज्यो
तिरादेस्तमःप्रभृतीनामुद्गमःस्यादपिप्रियादप्रियमितिसर्वथैवनिषेधे
विधातव्येप्रत्यक्षपरिकल्पितस्यान्यथाकर्तुंमशक्यत्वात्प्रमेयविरोधम
सहमानाविधत्तेचनिषेधतिचेतिनिषेधविधिप्रसङ्गेविधिनिषेधरूपाभ
णितिर्भवति॥५॥दृश्यमिति । यद्यपि द्वाभ्यामेकेनाल्पीयसाच नेत्राभ्या
मनसासुकृतेनचवयसोयौवनस्यदृश्यत्वविभावनीयत्वभोग्यत्वानिप्र
तीतिमुखमवतीर्णानितथापिजीवितसर्वस्वभूतायामितरकामिनीसा

शतकोटिभोग्यङ्किमपिवचःसुभ्रुवःस्वदते । अत्रव
योरामणीयकातिशयस्यदृक्सहस्रादिभिरेवावलोक
नीयत्वादियोग्यताकल्पनादियङ्कल्पनाभणितिर्वि
धिनिषेधेनिषेधविधिरूपा ॥६॥ ९॥ वाक्येशब्दार्थ
योःसम्यग्रचनागुम्फनास्मृता । शब्दार्थक्रमपर्याय
पदवाक्यकृताचसा॥१॥तासुशब्दकृतायथा । रामा
भिषेकेमदविह्वलायाःकराच्च्युतोहेमघटस्तरुण्याः।
सोपानमासाद्यचकारशब्दण्ठण्ठण्ठण्ठण्ठण्ठण्ठण्ठ
ण्ठण्ठः । सेयण्ठण्ठमित्यादेर्निरर्थकस्यश्लोकपाद
स्यार्थानुगुण्येनवाक्येरचितत्वाच्छब्दरचना ॥१॥ अ
र्थकृतायथा।दिक्कालात्मसमैवयस्यविभुतायस्तत्रवि

धारण्यामितरसाधारण्यमसहमानोदृगादिसामान्येसहस्रत्वादिकङ्क
ल्पयन्साधारणधर्मनिषेधसरणिमारुह्यविशेषंविधत्ते । सेयम्भणितिर्वि
धिनिषेधप्रसङ्गेनिषेधघटकद्वाराविधिरूपाभवतीत्यास्तांविस्तरः॥६॥
वाक्यइति।एकार्थप्रतिपादनावच्छिन्नःशब्दसमुदायोवाक्यन्तस्मिन्वि
षयभूतेआनुपूर्व्येणग्रथनंरचनासाकथमतिप्रसक्ताप्यलङ्कारइत्यतआ
ह।सम्यगिति। प्रकृतपरिपोषाधानलक्षणमौचित्यमापन्नेत्यर्थः। वाक्य
त्वमर्थशब्दाभ्यांविशेषणविशेष्याभ्यांव्यवतिष्ठते । तेनद्वयोरेवगुम्फना
समाप्यतइत्याशयेनशब्दार्थयोरित्युक्तम् । तत्रशब्दोद्विविधोवाच्यउ
पाधिश्च । प्रतिपादकशब्दोद्विरूपःपदवाक्यभेदात् । पदन्द्विधापर्या
यभूतरूपमतथारूपञ्च । तदेतद्विवक्षावैचित्र्यमङ्गीकृत्यविभजते ।
शब्दइति । अप्रतिपादकःशब्दःशब्दपदेनोक्तः । अर्थोवाच्यः।क्रमग्रह
णमुपाध्युपलक्षणम् ॥१॥ रामेति । राज्याभिषेकोत्सवजातहर्षायाःकरा
त्प्रच्युतस्यसोपानपरम्परासुस्खलतःकाञ्चनकलशस्यभूभागप्राप्तियाव
त्क्रमेणोच्चरन्तीशब्दमालानुकृतेतिप्रकृतार्थानुगुण्यम् । एवंहिकरच्यु
तमपिनसम्भावयतीतिकोपिमदप्रकर्षोव्यज्यते ॥१॥ दिक्कालेति । दि

द्योततेयत्रामुष्यसुधीभवन्तिकिरणाराशेःसयासाम
भूत्। यस्तत्पित्तमुषस्सयस्यहविषे यस्तस्य जीवात
वेवोढायद्गुणमेषमन्मथरिपोस्ताःपान्तुवोमूर्त्तयः।
सेयंव्योमादीनामष्टानामपिमहेशमूर्तिलक्षणानाम
र्थानामुत्तरोत्तरसङ्कलनयारचितत्वादर्थरचना ॥२॥
क्रमकृतायथा । नीलाब्जानान्नयनयुगलद्राघिमा
दत्तपत्रःकुम्भावैभौकुचपरिकरःपूर्वपक्षीचकार । भू
विभ्रान्तिर्मदनधनुषोविभ्रमानन्त्वादीद्वक्त्रज्योत्स्ना
शशधररुचन्दूषयामासयस्याः । अत्रपत्रदानपूर्वप
क्षीपल्यासानुवादद्रूपणोद्भावनानाम्बुधजनप्रसिद्ध

कालात्मतुल्यंसर्वमूर्त्तसंयोगाश्रयतालक्षणंविशुत्वनाकाशस्यैवतस्मिन्न
र्थान्निर्देश्यच्छब्दोयमुद्देश्यगामीनिविशतेतमुपजीव्यतच्छब्देनप्रतिनि
र्देशोयुक्तः । आकाशेविशेषणचन्द्रतारादितेजोभिभवसामर्थ्यलक्षणेन
द्योततेभगवानादित्यइतियच्छब्देनतमुद्दिश्योत्तरवाक्येऽदसाप्रतिनि
र्दिष्टवान्॥ कर्णगत्याप्रतिफलिताःसूर्यकिरणाःसलिलमयेष्टाशिन्येवसु
धाद्यपदेशंलभन्तेतत्रैवयच्छब्दोनिविष्टस्तदुपनीतमर्थमुत्तरस्तच्छब्दो
विषयीकरोतीत्यादिअपामेवराशेश्चन्द्रोजातस्तासाम्मित्तंवह्निस्तस्यसा
यम्भातराहुतयेयजमानःसवायुनाजीवति । सचपृथिवीगुणङ्गन्धंवह
तीतिपूर्वपूर्वसङ्कलनेनोत्तरंवाक्यार्थरचनाविहितेति । यद्यपिचार्थगु
स्फेशब्दगुम्फोभ्रुवभावीतथापिप्रयमानुसन्धेयमर्थगुम्फनमेवात्रप्रधा
नमितितेनैवव्यपदेशोयुक्तइत्याशयवान्व्याचष्टे । अत्रेति । यदीयंश
ङ्कलानप्रतिसन्धीयतेकथम्परमेश्वरमूर्त्तयोष्टौलभ्यन्तइतिभावः ॥२॥ नी
लाब्जेति । पुत्रदानेस्पर्द्धोद्भाव्यतेते । साचसादृश्यपर्यवसायिनीतिप्रती
यमानोपमा । इभकुम्भपूर्वपक्षीकरणेनकुचाभोगस्यसिद्धात्मभावोवग
म्यते । तथाचव्यतिरेकोध्वनितः । अनुवादेनाप्युपमाप्रतीयतेदूषणे
नव्यतिरेकइतिप्रकृतपर्यवसानेसमासोक्त्यायत्रदानादीनांविद्वद्वादि
प्रसिद्धानांशब्दानभिधेयएव क्रमउपाधिभूतोग्रथित इत्युदाहरणव्या

क्रमेणरचितत्वादियंक्रमरचना ॥ ३ ॥ पर्यायकृता यथा । कणइल्लिञ्चिअजाणईकुन्तपल्लसाइकीरसंलवई । पूसअभासम्मुचसुणहुरेहन्धवाआडी । सेयंशुकनामपर्यायाणामर्थानुगुण्येनरचितत्वात्पर्यायरचना ॥ ४ ॥ पदकृतायथा । लोलल्लाङ्गूलवल्लीवलयितबहुलानोकहस्कन्धलोलैर्गोलाङ्गूलैर्नदद्भिःप्रतिरसितजरत्कन्दरामन्दिरेषु । खण्डेषूद्दण्डपिण्डीतगरतरलनाःप्रापिरेयेनवेलामालम्ब्योत्तालतल्लरुफुटितपुटकिनीबन्धवोगन्धवाहाः । अत्रलाङ्गूलवलयितबकुलैर्नदद्भिर्गोलाङ्गूलैःप्रतिरसितकन्दरामटिन्दिरेषुखण्डेषुपिण्डीतगरतरलनाःपुटकिनीबन्धवोगन्धवाहावेलामालम्व्ययेनप्रापिरेइत्यतोधिकानामपुष्टार्थानामपिपदानामनुप्रासायच्छन्दःपूरणाय

स्थानग्रन्थार्थः॥३॥कणइल्लिञ्चिअ । केनचिद्विटेनशुकभाषामनुकुर्वतापियायाम्परिहासआरब्धःसातस्यदुर्विदग्धत्वमाकलयन्नीतदुश्चितमुत्तरमदात् । शुकप्रलपितानिकिलशुकीजानातिनान्या नचाहंशुकी । ततोविफलस्तवायम्प्रयासइत्यर्थः । अत्रकुन्तकीरपूसशब्दाःशुकपर्यायाः। कणइल्लीवाआडीशब्दौशुकीपर्यायौ । तत्रापिकीरशब्दस्तत्समः । अन्येदेशीरूपाः । तदेतेषाम्पर्यायाणांययोक्तरूपानुगुणानामेकत्रवाक्येगुम्फनमेवकविसंरम्भगोचरइति॥४॥लोलल्लाङ्गूलवल्लीति । लाङ्गूलवलयितेत्यादियथोक्तवाक्यविरचनमात्रेणैवप्रयोजनपरिग्रहेसिद्धेयदधिकानांलोलइल्लीप्रभृतिपदानामावापस्तेनविनानोचितानुप्राससिद्धिर्नचतयाविनावृत्तौचितीसमाप्यते । नवातामन्तरेणलाङ्गूलादीनासभिन्नतास्तेतेविशेषाःप्रतीयन्तइतिपल्लवप्रतिष्ठैवहिसरस्वतीसहृदयानावर्जयतीति । वाक्यप्रतीतिमात्रार्थामुपात्तेषुपदेषुयः । उपस्कारःपदैरन्यैःपल्लवन्तम्प्रचक्षते ॥ अपल्लवन्तुयद्वाक्यङ्कविन्यस्तन्नरोचते ।

चार्थानुगुण्येनरचितत्वादियम्पदरचना ॥ ५ ॥ वा
क्यकृतायथा । पतिश्वशुरताज्येष्टेपतिदेवरतानुजे ।
मध्यमेषुचपाञ्चाल्यास्त्रितयंत्रितयंत्रिषु । इहमह
तोर्थस्याल्पीयसाग्रन्थेनाभिधानमिति व्युत्क्रमेणा
पिग्रन्थलाघवायवाक्यार्थोरचितइतीयंवाक्यरचना
॥ ६ ॥ १० ॥ शय्येत्याहुःपदार्थानांघटनायाम्परस्प
रम् । साप्रक्रान्तेनकस्मिंश्चिदप्रक्रान्तेनकुत्रचित् ॥१॥
अतिक्रान्तेनकुत्रापिपदार्थवर्णयोःक्वचित् । वाक्या
र्थैवाक्ययोःक्वापिप्रकीर्णानाञ्चदृश्यते ॥ २ ॥तासुप्र
क्रान्तघटनायथा । सतथेतिप्रतिज्ञायविसृज्यकथ
मप्युमाम् । ऋषीञ्ज्योतिर्मयान्सप्तसस्मारस्मरशा
सनः । सेयम्प्राप्तर्षीणामागमनस्यप्रक्रान्तस्यैवघ
टना ॥ १ ॥ अप्रक्रान्तघटनायथा । अत्राप्युदा
हरन्तीममितिहासम्पुरातनम् । निषादस्यचसंबा

प्रयुज्यतेतथाभूतमुदीच्यैःकविगर्हितम् । तदिदमाह । अत्रेत्यादि ।
॥५॥ वाक्यरचनातुमहावाक्यएवभवतीति । तथाहि । पतिश्वशुरते
त्यादिकमल्पाक्षरमेववाक्यम्महतोर्थराशेःसमर्पकमितिभावयतांसहृद
यानाङ्कवित्वशक्तिरप्रत्यूहैवप्रकाशते।अतएवशक्तितिरस्कारादाद्यन्ता
वभिधायमध्यमाभिधानेकमत्र शोपितिरस्क्रियतइत्याह।अत्रेति ॥६॥
शय्येति । किञ्चिदेकंवस्तुबुद्धौसमाधायतदधिकारप्रबन्धरचनायासधि
कस्यान्तरान्तराप्रकृतेयोजनाशय्या । पदार्थानांप्रस्तुताप्रस्तुतवस्तूना
म् । तच्चयोजनीयंशब्दार्थभेदेन द्विविधम् । तत्रवस्तुवाक्ययोरेवयो
जनामहाकविप्रबन्धेषुदृश्यते । अर्थस्तुप्राकरणिकार्थोपयोगीतदन्यो
गीचेतिद्विविधः।द्वितीयोप्यतिक्रान्तोतथाभूतश्चेतिपूर्ववद्विभागवाक्यं
व्याख्येयम् ॥१॥पदार्थस्पदसिद्ध्यर्थमेवंवाक्यार्थमिति॥२॥सेयंसप्तर्षीणामिति । गौरीपरिणयप्राप्तकृतयाप्रकरणसङ्गतसप्तर्षिवृत्तान्तः ॥१॥ इयम्प्र

दमृषेःसंवरणस्यच । सेयमप्रक्रान्तस्यनिषादसंवर
णसंवादस्यघटनादप्रक्रान्तघटना ॥ २ ॥ अति
क्रान्तघटनायथा । तस्यचक्रुश्चमत्कारंव्यतीतसम
याश्रपिःस्मितार्द्रमुकुलोद्भेदाःकदम्बवनराजयः ।
इयमतिक्रान्तस्यापिकदम्बवनराजीनांमार्द्रमुकुलो
द्भेदस्यविरहिमनश्चमत्कारिणोरामस्यस्मृतिद्वारिण
घटनादतिक्रान्तघटना ॥ ३ ॥ पदघटनायथा ।
छिन्नेनपततावह्नौयन्मुखेनहठात्कृते । स्वेतिहेति
हरेणोक्तेस्वाहासीत्सैषरावणः । इयंस्वेतिहेतिवर्णा
भ्यांस्वाहेतिपदस्यघटितत्वात्पदघटना ॥ ४ ॥ वा
क्यघटनायथा । हंसप्रयच्छमेकान्तङ्गतिस्तस्यास्त्व
याहृता । विभावितैकदेशेनस्तेयंयदभियुज्यते । इ
यम्पूर्वशास्त्रनिबद्धस्योत्तरार्द्धस्यतदर्थाननुयायिना
पिप्रस्तुतार्थाविरुद्धेनपूर्वार्द्धेनैकवाक्यतयैवघटित
त्वाद्वाक्यघटना ॥५॥ प्रकीर्णघटनायथा । एक्किंहिं
अच्छिहिंसावणुअणहिंभद्दवउमाउमहिअलसत्थरि

क्रान्तस्येति । संवरणनिषादसंवादस्यपूर्वापरप्रकरणानुपयोगेपीति
हासरूपेणसङ्गतिः ॥२॥ इयमतिक्रान्तस्यापीति ॥ कदम्बकुसुमोद्भेद
स्यप्रत्यक्षस्यैवविरहिजनतातङ्कदायित्वंसम्भवतीतिकथमतीतस्यतद्ग
यस्येत्युक्तं"स्मृतिद्वारेणेति । सङ्कल्पवशेनप्रत्यक्षायमाणस्येत्यर्थः ॥ ए
वमनागतयोजनापिगुणादिनाबोद्धव्या॥३॥इयंस्वेति । स्वाहाकारप्रदा
नोहोमलक्षणसद्यश्छिन्नेनशिरसाप्राणशेषयोगात्पदार्द्धमात्रेनिष्पादिते
तदैवभूतकरुणासन्तानशान्तात्मनापरमेश्वरेणखेदाविष्कारवाचीहाण
ब्दःप्रयुक्तस्तेनैवनिरन्तरमुच्चरतास्वाहापदंसङ्गमिति ॥४॥ इयंपूर्वशा
स्त्रेत्यादिसुगमम् ॥५॥ अत्रश्रावणादीनामिति । प्रकीर्णंविकीर्णमनेक

गण्डस्थलेसरउ । अङ्गहिंगिह्मसुहच्छितिलवणमग्ग सिरुमुद्धिहिमुहपङ्कअसरिआवासिउसिसिरु । अ त्रश्रावणादीनामयुगपद्वाचित्वेनविप्रकीर्णानांघट नादियम्प्रकीर्णघटना । प्रकीर्णशब्दश्चायंशेषवाची तेनान्यासामपिप्रकीर्णघटनानामिहावकाशोभवति तेनयाङ्गमामहाकविप्रबन्धेषुमुख्यगौणीलक्षणातद्वा वापत्तिरुपचरितालक्षणेतिशब्दवृत्तयस्ताअपीहस्यू

प्रतीतमितियावत् । तद्द्विविधङ्कालतोदेशतश्च ॥ अत्रहिश्रावणादि मासर्नुषट्कस्ययुगपदसम्भवत एकत्रविरहिणीशरीरेयुगपद्भावोनिव द्धःसगुणवृत्तिव्यपाश्रयेणश्रावणादिपदैप्रतिपाद्यमानः प्रवासविप्रल म्भप्रकर्षमावेदयतीति । एवन्देशविकीर्णघटनाप्युदाहार्या । यथा॥ अ मृतममृतञ्चन्द्रश्चन्द्रस्तथाम्बुजमम्बुजंरतिरपिरतिःकामःकामोमधूनि मधून्यपि । इतिनभजतेवस्तुन्यायःपरस्परसङ्करन्तदियमबलाधत्तेभा वान्कथंसकलात्मकान् । यस्त्वत्रसिद्धादिभेदःकश्चिदुपवर्णितःसतथा नचमत्कारकारीतियत्नगौरवभयादुपेक्षितोस्माभिः । तत्तदनेकासा धारणरूपाण्यपिप्रकीर्णानिप्रकीर्णपदेनग्राह्याणि । तेषामनुक्तान्यत यावोपग्रहोपिप्रयुज्यतइत्याह । प्रकीर्णशब्दश्चायमिति । व्याख्या नान्तरप्रयोजनमाह । तेनेति । शब्दस्यार्थप्रतिपादनशक्तिरभिधा । सान्निध्यासुख्यागौणीलक्षणाच । तासुमुखसिवप्रथमंयस्यामर्थःप्रतीय तेसासुख्यातथाभूतार्थातद्भावापत्तिश्च । तत्रावान्तरार्थसम्बन्धविषया तथाभूतार्था ॥ यथा॥ खात्मेन्दुवह्निपवनार्कमहीपयोभिरष्टाभिरेवत नुभिर्भवतासमस्ते । व्याप्नेजगत्यपरमिच्छतियोत्रवक्तुंकोन्योगतत्रपत यासदृशोस्तितेन । सैवार्थान्तरस्वार्थसम्बन्धविषयातद्भावापत्तिः । अतथाभूतस्यतथात्वापादनंहिसा । अतएवस्वतोन्यतोवास्वार्थाव च्छिन्नस्यसाक्षादभिधानशक्तिरेवमुख्येत्याचार्याः । यथा । [कमलाअ रणसणिआहंसाउड्डाविआणअपिउला । केणविगामतडाएअब्भंउ त्ताणअंवूढम्] । गुणव्यवहितार्थागौणी । गुणनिमित्ताउपचारनिमि

त्ताच । तत्रद्वयोर्यत्रद्रव्यवचनयोःसामानाधिकरण्येनवैयधिकरण्येन वाप्रयोगेविशेषणविशेष्यभावान्यथानुपपत्याप्रतीयमानाभिधीयमान गुणद्वारकसम्बन्धोभवतिसागुणनिमित्ता । यथा । [पडिवक्खमण्णुपु ज्जेलावण्णकुण्डेअणङ्गगअकुम्भे । पुरिससअहिअअभरिएकीसखल न्तीथणेवहसि] । मुख्ययागौण्यावान्यविशेषणस्यान्यत्रप्रयोगउपचरि तासापिगुणयोगमुपजीवन्तीगुणवृत्तिरेव । एतावांस्तुविशेषोयद्गुण निमित्तायामभिधेयगुणयोगइहतुस्वाभिधेयविशेष्यगुणयोगइति । य था । परार्थेयःपीडामनुभवतिनिर्व्याजमधुरोयदीयःसर्वेषामिहखलु विकारोप्यभिमतः । नसम्प्राप्तोवृद्धिंसपदिभृशमक्षेत्रपतितःकिमिक्षो र्दोषोयन्नपुनरगुणायामरुभुवः । स्वार्थसम्बन्धव्यवहितालक्षणा । त दुक्तम् ॥ अभिधेयाविनाभूतप्रतीतिर्लक्षणेतिया । सैषाविदग्धवक्रो क्तिजीवितंवृत्तिरिष्यते । साद्विधा । शुद्धालक्षितलक्षणाच । तत्रसा क्षात्स्वार्थसम्बन्ध्यविनाभूतविषयाशुद्धा । यथा । यत्तालीदलपाकपा ण्डुवदनम्,. अभिनवकरिदन्तच्छेदपाण्डुःकपोल,,इति । ययापूर्वपूर्व लक्षितमेवलक्ष्यतेसालक्षितलक्षणेतिकेचित् । यथा । मधुद्विरेफःकु सुमैकपात्रे,, भीमोभीमपराक्रम,,इति । अत्रहिद्विरेफादिनाशब्देनल क्षितएवभ्रमरप्रभृतिर्लक्ष्यतेनतुकुररादिः । अन्येतु लक्षणाव्यवहिता लक्षणालक्षितलक्षणेत्याहुः । यथा । सुवर्णपुष्पाम्पृथिवीञ्चिन्वतेपु रुषास्त्रयः । शूरश्चकृतविद्यश्चयश्चजानातिसेवितुम्,, । तद्भावापत्त्या दिविशेषसमभिव्याहारेणमुख्यादिशब्दास्तदितरतथाभूतत्वागोचरा इतिपूर्ववद्व्याख्येयम् ॥ क्वपुनःपदेकावृत्तिरित्यतआह । अत्रेति । एक्क हिअच्छिहिं अण्णहिम्महिअलसत्थरे गण्डत्थलेअङ्गहिम् । इत्या दिषडाधारवचनाः । अत्रयद्यपिगण्डस्थलपदङ्गौणमेवतथाप्यनादि प्रयोगयोगितयामुख्यकल्पमितिषट्स्वाधारवचनेष्वित्युक्तम् । अङ्गादि पदानिचस्वार्थविशिष्टान्यपराण्येवप्रयुक्तानीतिमुख्यैववृत्तिः । एव स्मुग्धायाइतिसम्बन्धिपदेपि । सुहच्छितिलवणेमुहपङ्कअसरिइतिद्वा वाधारवचनौशेषौ । अत्रतिलवनसरःपदयोःस्नेहनिर्भरत्वसरसत्व लक्षणगुणद्वारकैवसुखासिकामुखपङ्कजयोर्वृत्तिः । मुखपङ्कजसरसीत्य

यन्ते। यत्रादितःषट्स्वाधारवचनेषुमुग्धायाइतिस म्बन्धिपदेचमुख्या। रोषयोर्द्वयोराधारवचनयोर्गौ णी। श्रावणादिषुचतुर्षुमासवचनेषुलक्षणा। षट् स्वपिचाधेयवचनेषु वर्षादिषुलक्षिताभिहितेष्वपि युगपदसम्भवत्सुश्रुतार्थापत्तिलभ्याताद्भावापत्तिः। श्रावासिलइतिक्रियापदेचोप चरिताव्यक्तमेवप्रती यते। लक्षितलक्षणापिचैतास्वेवव्याख्यानतउन्मि षति। तथाह्यावासितशब्दोयमभिमतप्रदेशनिवेशि तमहापरिच्छदेमहाराजादौनिरूढाभिधानशक्तिः। सउपचारेणश्रावणादिषु प्रयुज्यमानस्तेषामपिमह त्वमभिलक्ष्यमहापरिच्छदतामहासम्भवत्वंच लक्ष यन्प्रस्तुतायाअपिप्रवृत्तेर्महान्तमनुबन्धंलक्षयति।

त्रयद्यपिपदद्वयङ्गौणान्तथापिपङ्कजपदस्यवृत्तिरभिधातुल्येतिनकविसं रम्भगोचरस्तेनव्यवहारोयुक्तः। सावणभद्दवआसाहवमग्गसिरूइतिच त्वारोमासवचनाः। तेचस्वार्थसम्बन्धव्यवहितंवर्षाप्रभृतिसमुदायंल क्षयन्तीति। वक्ष्यमाणरीत्यावर्षादयःषडाधेयवचनास्तेचविरहवती शरीरेयुगपच्चासम्भवद्वस्थितयोजलादिसम्पदादिस्वस्वप्रवृत्तिनिमि त्ताध्यासेनप्रयुज्यमानास्तद्भावापत्तिरूपांवृत्तिमासादयन्ति। अस्या श्चविवर्त्तपरिणामाध्यासादयःषट्प्रकारागौरवभियानदर्शिताः। श्रुता र्थानुपपत्तिमूलाकल्पनाश्रुतार्थापत्तिः। राजादेरासितेआवासितश ब्दोसुख्यवृत्त्यैवविशेषणतयारूढः॥ सस्वविशेषगुणव्यवहितेर्थान्तरे प्रयुक्तोगौणीवृत्तिमनुत्प्रवन्वसन्तादेरपिविशेषणतामासादयति। ल क्षणाव्यवहितालक्षणा लक्षितलक्षणा॥ साक्षयन्नावासितेतिशब्देसम्य द्यतइत्यतआह। सउपचारेणेति। कथञ्चित्सारूप्येणश्रावणादिषुप्र योगादुपचारस्तमुपजीव्यप्रयुक्तःस्वार्थाविनाभूतत्वहेत्वादिकम्प्रकृतं पुलक्षणयासंक्रामयतीति॥ आद्यालक्षणातद्व्यवहितान्द्वितीयामाह।

तेचयुगपल्लोचनादौचानुपपद्यमानस्थितयःस्वशब्द
शक्तितस्तत्रतत्रचनिवेश्यमानाः स्वधर्मसम्पदः प्र
त्यासन्नायान्तद्धर्मसम्पदमुपलक्षयन्ति । असाव
सौविरहवत्याविरहवेदनातिशयं लक्षयन्तीकमि
तरि स्नेहातिशयं लक्षयति । तत्र श्रावणोभाद्रपद
इत्येताभ्यामवयवाभ्यां वर्षर्तुर्लक्ष्यते । सच लोचन
योरनुपपद्यमानस्थितिरपिविभक्तिश्रुत्यानिवेशितः
पयःपूषत्प्रवाहलक्षणायाःस्वधर्मसम्पदःप्रत्यासन्ना
मविच्छिन्नाश्रुसम्पदमुपलक्षयन्समागमोहकायाउ
त्कण्ठातिशयलक्षयति । माधवइत्युत्तरावयवेनव
सन्तोलक्ष्यते । सोपिमहीतलस्तरेनुपपद्यमानस्थि

प्रस्तुतायाश्रपीति । श्रावासितस्यापिहियथोक्तविशेषणस्यपरदुर्गग्र
हणादौमहाननुवत्योदृष्टःसइहप्रस्तुतायांविरहवतीसन्तापलक्षणाया
म्प्रवृत्तौलक्ष्यतेइत्येकलक्षणाव्यवधानेनेयंलक्षणा । एवंलक्षणाद्वयव्य
वधानेनापिभवतीत्याह । तैचेति । श्रावणादयःस्वधर्मसम्पदोनिर
न्तरवर्षणादेःस्वार्थाविनाभावेनलक्षितायाःप्रत्यासन्नासदृशीतेषांलो
चनादीनान्धर्मसम्पदश्रुप्रभावादिलक्षणालक्ष्यतइतिद्वितीयालक्षणा ।
तत्पुरःसरांतृतीयामाह । श्रसावसाविति । एवंलक्षणात्रयपूर्वापिल
क्षणाबोद्धव्येत्याह । क्रमितरीति । स्नेहप्रतीत्यातुविभावादिसंवलि
तयारसोव्यज्यतेनतुलक्ष्यतइत्यन्यत्रविस्तरः । कस्याःपुनःस्वधर्मसम्प
दःप्रत्यासन्नाकातद्धर्मसम्पदित्यतोविवेचयति ॥ तत्रेति । यदिश्राव
णादिपदेषुसमुदायलक्षणानस्यात्तदामासानुपक्रम्यऋतूनामभिधा
नेप्रक्रमभेदोभवेत् । नभवेच्चतत्तदृतुप्रतीतऋतुसम्पत्प्रतीतिःक्वचिदि
तियुक्तैवसमुदायलक्षणा । एताभ्यामिति । प्रत्येकमृतुपदद्वयेलक्ष
णासम्भवति । विभक्तिश्रुत्येति । सप्तमीप्रथमाविभक्तिन्यायाधारा
धेयभावःस्वशक्त्याप्रतिपाद्यतेतदनुपपत्त्यार्थान्तरलक्षणाप्रादुर्भवति ।

तिः प्राग्वदेवशब्दशक्त्यानिवेशितःकुसुमकिसलयमृ
णालकमलिनीदलादिकायाःस्वधर्मसम्पदसमासन्नां
शिशिरोपकरणसामग्रीमुपलक्षयन्कामवत्याःशरीरा
न्तस्तापंलक्षयति। शरदित्यनेनऋतुविशेषोभिधीय
ते। सगण्डयोरनुपपद्यमानस्थितिःप्रशंसावचनस्या
पिस्थलस्यानुस्वानशक्त्यासमाकृष्यमाणःकाशकुसुम
हंसागमनकुमुदसरःप्रसादचन्द्रातपादिकायाःस्वधर्म
सम्पदः समासन्नङ्गण्डयोःपाण्डुभावं लक्षयन्मृगेक्ष
णायाविरहकार्श्यमुपलक्षयति।ग्रीष्मइत्यनेनापिऋ
तुविशेषएवोच्यते। साप्यङ्गनाङ्गेनुपपद्यमानःसूर्यांशु
कार्कश्यप्रतप्तपांसुतापपरुषोष्मानिलत्वदावाग्निका
लुष्यादेःस्वधर्मसम्पदःसमानानीकभूतपूर्वानङ्गज्वर
लिङ्गसम्पदमुपलक्षयति। मार्गशीर्षशीर्षइत्यनेनतुपू
र्वावयवेनहेमन्तोलक्ष्यते। तेनचयथाहेमन्ते तिलच
नंलूयतेतथास्याःसुखासिकासाम्प्रतंलूयतइति लक्षि
तेनातिशयिनीमनःपीडोपलक्षिताभवति। कापुनः

एवञ्चैत्रवैशाखसमुदायात्मनोवसन्तस्योत्तरावयवोवैशाखस्तद्वाचकेपि
माधवपदेसमुदायलक्षणाद्वारेणलक्षणाभवति। प्रशंसावचनस्यापी
ति। गर्भीकृतसारूप्याहिश्राद्धादयउपमेयवाचिभिःसमस्यन्ते। तच्च
सारूप्यमुत्कर्षलक्षणमेवेतिप्रशंसापरत्वेस्थितेनाभिधेयमप्रतीत्यसारू
प्यंवारूपान्तरंवाप्रत्येतुन्नशक्यतइत्यभिधेयप्रतीत्यनुनिष्यादिनीघण्टा
नुस्वानसोदरास्वधर्मसम्पद्योक्ताप्रतीयते। स्वनेकिलशरदाकाश
कुसुमहंसादिकास्वसम्पद्विस्तार्यते। नमुखचन्द्रादिवत्सुखासिकाति
लवनयोःसादृश्यप्रतीतिर्नच तदभिधीयमानङ्किञ्चिदत्रास्तीतिपृच्छ
ति। कापुनरिति। माभूत्तथाप्रसिद्धिःकवेरभिप्रायारूढातुप्रतीयतइ

सुखासिकातिलवनयोःसमानधर्मतायेयंस्त्रे हनिर्भर तानाम । अभिसारिकाणाञ्चप्रायेणतिलवनाब्जिनीखण्डयोरेवबहुमानप्रसिद्धिः । यदित्यमाह । आत्रातहरमणिज्जंअम्हङ्गामस्समण्डणीहूअम् । लुअतिलवाडिसरिच्छंसिसिरेणकअम्भिसिणीसण्डम्। अतएवायमुत्तरवाक्येकमलसरश्शब्देनाब्जिनीखण्डमपिनिर्द्दिशति । तद्यथा । मुद्धिहिमुहपङ्कअसरिआवासिउसिसिरु । तत्रशिशिरइत्यनेनऋतुविशेषेणमुग्धामुखेपिपद्मसरसीत्रशब्दशक्त्यानिवेशितेन कमलवनोपप्लवादेःस्वधर्मसंपदोलोकप्रतीतायाः प्रत्यासन्नामुग्धामुखाम्भोरुहलोचनोत्पलस्मितकुसुमदशनकेसरादेश्छायापरिम्लानिर्लक्ष्यमाणा विप्रलम्भानुभावप्रकर्षमुपलक्षयति। शिशिरलक्ष्मीवर्णनप्रस्तावाच्चमुखमर्द्दशरीरस्यसर्वंवामुखमुच्यत, इतिप्रस्थानप्रधानलक्षणयासर्वर्तुभ्यः शिशिरएवप्रधानमि

त्युत्तरमाह । येयमिति । नन्नेहोनामद्वयोरेकःकश्चिदस्तिनचानभिधीयमानमपिसादृश्यंशब्दसामान्यमाश्रयतइत्यतःप्रकारान्तरमाह । अभिसारिकाणाञ्चेति । कथमेतदवगतमित्यतआह । यदित्यमिति। ननुकमलिनीशब्दस्यात्रबहुमानगोचरताप्रतिपादितानतुतिलवनस्येत्यतआह । अतएवेति । उपमानोपमेययोर्द्वयोरपिकामिनीबहुमानगोचरतांवितरन्शिशिरेणसाम्यतन्तिलवाटिकालवनमपिवर्त्ततइत्यभिप्रैतीतिभावः । मुखमर्द्दशरीरस्येत्यादिन्यायेनमुखशब्दःप्राध्यान्यं लक्षयतितोमुखपङ्कजसरसिशिशिरइतितद्भावापत्त्याहेमन्तस्यापिऋतुप्रथमतयाप्राधान्यमेवद्योतितमिति । तदुक्तम् । [पडिकम्मदूइपेसणमाणग्गहणेसुभासुरपहुय्यन्तो । हेमन्तिओसुहाअइमलिणमिअ

त्यपि लक्षितम्भवति ॥६॥ १ १॥ काकुस्वर पदच्छेद भेदाभिनयकान्तिभिः । पाठोयोर्थविशेषाय पठितिःसेह षड्विधा ॥ साकाङ्क्षा यथा। यदि मे वल्लभा दूतीतदाहमपिवल्लभा । यदितस्याःप्रियावाचस्तन्मामपिप्रियप्रिया । अत्रैकयाकाङ्क्षाविधिरन्ययानिषेधः प्रतीयते ॥१॥ स्वरेणयथा । सुभ्रूस्त्वङ्कुपितेत्यपास्तमशनन्त्यक्ताकथायोषितान्दूरादेवमयोज्झिताःसुरभयःस्वर्गन्धधूपादयः । रागंरागिणिमुञ्चमय्यनतेदृष्टेप्रसीदाधुनासत्यन्त्वद्विरहाद्भवन्तिदयितेसर्वाममान्धादिशः । अत्रदृष्टेइत्यत्रप्लुतस्वरकरणात्कुपितकान्ताप्रसादनपरमपिइदंवाक्यमुत्कुपितदृष्टिप्रसादनताम्प्रतिपद्यते ॥ २ ॥ पदच्छेदेनयथा। सर्वक्षितिभृतान्नाथदृष्टासर्वाङ्गसुन्दरी । रामारम्ये

ङ्कीविकामिणीणयओसो•] ॥६॥ काकुस्वरेति । किञ्चिदेकपरतयाप्रवृत्तमुच्चारणमर्थान्तरविवक्षयायदन्यथाक्रियतेसापठितिः । अन्यथाकरणञ्चकाकुप्रभृतिभिःषड्भिरिति । तत्र । भिन्नकण्ठध्वनिर्द्वौरैःकाकुरित्यभिधीयते । साद्विधा । विधिकाकुर्निषेधकाकुश्चतयोर्निषेधेपरोच्चारणान्यथाकरणेनविधिपर्यवसायिनीविधिकाकुः । यथा । शल्यमपि रखलदन्तःसोढुंशक्येतहालहलदिग्धम् । धीरैर्नपुनरकारणकुपितखलालीककटुवचनम् । एवंविधिपरोच्चारणान्यथाकरणेननिषेधश्चञ्जिकानिषेधकाकुस्तामुदाहरति । यदीति । यदिदूतीप्रियातदाहमपिप्रियेत्यादिऋजूक्त्याशठनायकविषयाकृत्रिमाप्रीतिःप्रतीयतेकाङ्क्षातुतवैयनाहम्म्रियेतीर्ष्यारोषः ॥१॥ स्वराःप्लुतादयउदात्तादयश्च। नाभीषांवेदश्वकाश्येभूयान्प्रयोगइतिकिञ्चिदुदाहरति । सुभ्रूस्त्वमिति । चरणतलाग्रपतितेमयिदृष्टेसतित्वम्प्रसीदेतिदीर्घमात्रोच्चारणेकुपितकान्ताप्रसादपरत्वंयथोक्तप्लुतकरणेतुदूराद्बानादौतदनुशासनात्कुपितदृ

वनान्तेस्मिन्मयाविरहिता त्वया । अत्र मयाविरहितेत्येतावतिपदच्छेदेपुरूरवसस्त्वयेत्येतावतिपर्वतस्यवाक्यभेदोभवति ॥३॥ पदभेदेन यथा । येनध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतोयोग

ष्टिसम्बोधनबुद्धिरुपजायते । अशनादयोहि द्वयोः साधारणा एवेति श्लेषोपादानमेवेति । एवंह्रस्वस्यदीर्घकरणेनदीर्घस्यह्रस्वकरणेनार्थान्तरप्रतीतिरवसेया । यथाविश्वामित्रोविश्वानरइतिऋषिराजर्षिविशेषौप्रतीयेते । यथायुवतीतिसंबोधनप्रतीतिः । एवमुदात्तादयोपियथादर्शनमुत्प्रेक्षणीयाः॥२॥शृङ्खलाभङ्गःपरिवर्त्तकश्चूर्णमितिचत्वारश्छेदाः। तत्र पूर्वापरवर्णानामन्योन्यसङ्कलनयास्थितिः शृङ्खला । यथा । कान्तारतरुतलासितमृगयुवरचितान्तरेतिपठितिस्तदाप्रियासम्भोगमङ्गिततर्षितलुब्धकप्रचुरच्छन्नमध्येतिप्रतीयते । सेयमन्योन्यंवर्णसङ्कलनयाशृङ्खलेत्युच्यते । एकस्यशब्दस्यमध्येविच्छेदेनद्वैधीकरणमात्रम्भङ्गः । तमुदाहरति । सर्वेति । मयाविरहितेत्येतावतिसमुदायेमहियोगवतीत्वयादृष्टेत्यष्टमकामावस्थाविष्टस्यपुरूरवसःपर्वतविषयम्प्रत्यवाक्यम्भवति । यदातुमयेतिविच्छिद्यपूर्ववाक्यसम्बन्धिक्रियतेतदात्वयाविरहितासतीमयादृष्टेतिपर्वतस्योत्तरवाक्यंसम्पद्यते । वर्णान्तरकल्पनापरिवर्त्तः । यथाकलिकामधुगर्हणेति । अत्रयथाश्रुतवर्णपरिग्रहेकलिकामधुनोगर्हणानिन्देतिप्रतीयते । यदातुकलिकामधुग्अर्हणेतिवर्णान्तरकल्पनयालेदस्तदापूजैवकलौकामधेनुरिति । पिण्डाक्षरविभागशून्यम् । यथा । पश्यसलिलम्पयोधेर्दूरसमुन्मुक्तशुक्तिमीनाङ्कान्तमिति । अत्रयथाश्रुतेदुःखेनरसनीयमुद्भ्रान्तशुक्तिकोषत्वत्स्याङ्कितपर्यन्तमितिप्रतीयते । यदातुदूरसमुन्मुक्तशुक्तिमीनाङ्कान्तमितिपिण्डचूर्णनेनच्छेदस्तदात्यन्तहर्षयुक्तेत्युक्तशोकेतिचसम्बोधनद्वयंकृष्णस्यप्रतीयते ॥३॥ येनेति। ध्वस्तमनोभवेनदग्धकामेनबलिजितोनारायणस्यकायःपुरात्रिपुरदाहव्यतिकरेऽस्त्रीकृतःशरतान्नीतःगङ्गाम्भागीरथीन्दधे । अन्यकोदैत्यविशेषस्तस्यक्रयोविनाशोबर्हिपत्रोम

ङ्गाऽचदधेन्धकक्षयकरोयोबर्हिपत्रप्रियः । यस्याहुः शशिमच्छिरोहरइतिस्तुत्यऽचनामामराःसोव्यादिष्ट भुजङ्गहारवलयस्त्वांसर्वदोमाधवः।अत्रयेनध्वस्तम नोभवेनेत्यादेर्येनध्वस्तम्अनोऽभवेनेत्यादेश्चपदभे दादुमाधवोमाधवइत्यर्थद्वयम्प्रतीयते।तयोश्चद्वयोर पिप्राधान्येनोपपादनादङ्गाङ्गिभावेनप्रकृताप्रकृतरू पतया।चानवस्थानात्परस्परमसम्बन्धेनायंश्लेषः । पदभेदेनतुपाठेपर्यायतोर्थद्वयप्रतीतेरियं श्लेषोपस र्जनापदभेदपठितिः॥४॥ अभिनयेनयथा । एद्दहमेत्त

पूरवाहनः कार्त्तिकेयः शशिमच्चन्द्रकलाङ्कितंशिरोविश्वमोहच्छिदुर स्यहरइतिस्तुत्यऽचनामभुजङ्गाएवहारवलयानियस्यसर्वदासर्वकाल मिति उमाधवपक्षे । माधवपक्षेतु । येनध्वस्तंविनाशितमनःशक टमभवेन संसारबन्धरहितेनबलिज्जितवान्यः कायःसपूर्वं समुद्रमथ नावसरेऽमृतगृह्यालुदैत्यव्यामोहनायस्त्रीरूपतान्नीतोऽगङ्गोवर्द्धना ख्यङ्गाम्पृथिवीमेकार्णवमग्नामुद्धृतवानन्यकायदुविशेषास्तेषांक्षयोनि वासः । बर्हिणोमयूरस्यपत्रम्पिच्छन्तत्प्रियोबर्हिपत्रकृतापीडमिति गोपालव्याख्यानेगौतमेनाभिधानात् । शशिनम्मथ्नातीतिक्विप्शशिम द्राहुस्तस्यशिरोहरइतिस्तुत्यऽचनाम । भुजङ्गहागरुडःसइष्टोयस्य । खेशब्दब्रह्मणिलयोयस्यसतथा सर्वदोयावदभिमतप्रदइति । ननुवि भिन्नरूपाणांशब्दानामुच्चारणेतन्त्रतयाश्लेषएवायुक्तपठितिरित्यतआ ह । तयोश्चेति । श्लेषोहिश्लिष्यमाणयोःपरस्परसम्बन्धेभवति । सच सम्बन्धोरूपतात्पर्यसम्बन्धलक्षणोवाअङ्गाङ्गिभावोवाउपमानोपमेयभा योवायथाग्रेवक्ष्यते । नचायमेकोत्राभिमतःकिन्त्वेकपरमेवोच्चारणेप दभेदेनार्थान्तरङ्गमयतीतिपठितिरेवेयम् । एतेनसमाध्युक्तिसमासो क्तिव्याप्तिभेदउक्तः । तत्किमुच्चारणतन्त्रतानास्त्येवेत्यत्राह । श्ले षोपसर्जनेति । यत्रहियस्यप्राधान्येनविवक्षातत्रतेनव्यपदेशोयुक्तः । अतएवविवक्षान्तरेणश्लेषव्यवहारोप्यत्रसमर्थनीयएव ॥४॥ एद्दहमेत्ते

त्यणिआएद्दहमेत्तेहिं अच्छिवत्तेहिम्। एद्दहमेत्ताव त्याएद्दहमेत्तेहिन्दिअहेहिम्। अत्रइयन्मात्रस्तना दीनान्तथाभूतहस्ताभिनयैःसहपठनात्तथाविधार्थ विशेषोगम्यते। अपदेशोप्यभिनयविशेषएव। यथा। इतःसदैत्यःप्राप्तश्रीर्नतएवार्हतिक्षयम्। इत्यात्मान मपदिश्य ब्रूते॥५॥कान्त्यायथा। यस्यारिजातन्नृ पतेरपश्यदवलम्बनम्। ययौनिर्झरसम्भोगैरपश्य दवलंबनम्। अत्रावलम्बनमबलंबनमितिपदेपद द्वयेवाद्वितीयचतुर्थस्थानयोर्यौबकारबकारौ तयोर न्तःस्थपवर्गाभ्यांपवर्गान्तःस्थाभ्यांचकान्तिमति

ति। अत्रसर्वपदानामर्थान्तरसाधारणतयानतावदभिमतपरिमाणवि शेषप्रतीतिरूपजायतेयावदुच्चारणसहकारिभूतप्रसारितकरद्वयकोषप्र सृतिभिदङ्गुलिप्रसारितांङ्गुलीगणनारूपाभिनयप्रतिसन्धानन्नभवति। तेनाभिनयपठितिरियं साक्षादिववस्तुस्वरूपबोधिकाक्रियाभिमुख्यत यनाद्भिनयइत्युच्यते। तदिदमाह। तथाभूतेत्यादि। अपदेशो पीति। आत्मनिर्देशिकाक्रियापदेशः। अस्याभिनयविशेषत्वेपिका न्तिकरतयापृथगुपादानम्। यावच्चस्वरूपसमुच्चारणविशेषणन्नासुस न्धीयतेनतावच्छ्रीप्राप्तिक्षमयोःकारणविशेषःप्रतीयतइति॥५॥ यस्यारि जातमिति। कान्तिश्छायासाअप्रतिहतरूपापदवद्वर्णेषुनसम्भवतीति श्रुतिरूपागृह्यते। तथाहि। अवलम्बनमित्यत्रद्वितीयचतुर्थस्थानस्य योर्बकारबकारयोः क्रमेणान्तःस्थपवर्गभावानुसंधानेऽवलम्बनमित्येक पदतायांत्राणहेतुमपश्यदित्यर्थःप्रतीयते। यदातुद्वितीयेऽवलम्बन मित्यत्रतयोरेवपवर्गान्तःस्थभावानुसन्धानम्भवतितदावलंबनमितिच्छे देनपदद्वयसम्पत्तौबलरहितंसद्वनमरण्यंययावित्यर्थान्तरप्रतीतिरूप जायते। तदिदमुक्तम्। पदेपदद्वयेचेति। अपश्यत्। शयनभोजन शून्यंशयनंशीरदनमत्। निर्जरसम्भोगैःनिर्जरजलमात्रीपयोगैरसएव बलरहितम्। अत्रचयमकेनसंसृष्टिरस्यबोद्धव्या। आवृत्तिमादायय

पाठेर्थभेदोजायते ॥ ६ ॥ अपरेपुनःपठितिमन्यथा कथयन्ति । पदपादार्धभाषाणामन्यथाकरणेनयः । पाठः पूर्वोक्तसूक्तस्य पठितिंतां प्रचक्षते ॥१॥ तत्र प दान्यथाकरणन्द्वेधा । प्रकृतितोविभक्तितश्च । तत्र प्रकृतितोयथा । असकलहसितत्वात्क्षालितानीव कान्त्या मुकुलितनयनत्वाज्ज्ञातकर्णोत्पलानि । पि बतुमधुसुगन्धीन्याननानिप्रियाणान्त्वयिविनिहि तभारःकुन्तलानामधीशः । अत्रत्वयीत्यस्यस्थानेम यीतियदापठ्यते तदैतत्प्रार्थनावाक्यमप्यनुमतिवा क्यम्भवति ॥७॥ विभक्तितोयथा । सहभृत्यगणंस बान्धवं सहमित्रंससुतं सहानुजम् । स्वबलेन निह न्तिसंयुगेनचिरात्पाण्डुसुतःसुयोधनम् । अत्र यदा पाण्डुसुतःयोधनमित्यस्यस्थाने"पाण्डुसुतंसुयोधन मिति,, तदैतदमङ्गलार्थमपि सुयोधनेमङ्गलार्थम्भव ति ॥ ८ ॥ पादान्यथाकरणेन यथा।एकान्ते विज नेरत्रावन्तर्वेश्मनिसाहसे। न्यासापह्नवनेचैवदिव्या सम्भवतिक्रिया। अत्र तृतीयपादस्थाने"तन्त्रङ्गीयदि

मक्रमन्यथाभविष्यति ॥६॥ अपरेपुनरिति । अन्यथेत्यतःपरमपिशब्दो ध्याहार्यः।पादाद्यन्यथाकरणेनापिहिप्रकृतसुच्चारणमेवविशिष्यते । य दाह । पूर्वोक्तसूक्तस्येति । अतएव श्लोकान्यथाकरणेनपठितिर्नसम्भ वति । तेनप्रागुक्तभेदैःसहद्वादशप्रकारापठितिरितितात्पर्यम् । यद्य पिचपादाद्यन्यथाकरणमपिपदभेदप्रकार एवतथापिनतत्रपूर्वोक्त्या गृहीतुतत्परित्यागेनपदान्तरकल्पनमित्येतावान्विशेषः॥१॥तत्रपदंवि भक्त्यन्तंविशेषणविशेष्यभेदेनद्विधाक्रियतेइत्याह । पदान्यथाकरणंद्वे धेति॥७॥८॥एकान्तइति । साहसेप्रच्छन्नाभिसारलक्षणे । प्रकाशात्प्रच्छ

लभ्येत,,इतिपाठोभवतितदैतत्परीक्षौपयिकमपिका
मौपयिकम्भवति ॥ ९ ॥ अर्द्धान्यथाकरणेनयथा ।
तत्तावदेवशशिनः स्फुरितम्महीयोयावन्नतिग्मरुचि
मण्डलमभ्युदेति । अभ्युद्यते सकलधामनिधौ तु त
स्मिन्निन्दोःसिताभ्रशकलस्यचकोविशेषः । अत्रय
दामध्यपादयोःस्थाने " यावन्नताःकिमपिगौरिति
राहसन्ति । ताभिःपुनर्विहसिताननपङ्कजाभिरिति,,
पठ्यते तदैतद्वीरार्थोक्तिरूपमपिश्रृङ्गारोक्तिरूपं स
म्पद्यते ॥ १० ॥ पादत्रयस्यचान्यथाकरणेनयथा ।
त्यागेनयुक्तादिवमुत्पतन्ति त्यागेनहीना नरकंव्रज
न्ति । नत्यागिनान्दुष्करमस्तिकिञ्चित्त्यागोहिसर्व
व्यसनानिहन्ति । अत्रतुरीयपादमेवोपादायपादत्र
यस्यचान्यथाकरणेनवक्ष्यमाणःपाठोभवति । तदैत
त्त्यागप्रशंसार्थमपित्यागनिन्दार्थञ्ज्ञायते । यथा ।
"त्यागोहिसर्वव्यसनानिहन्तीत्यलीकमेतद्भुविस
म्प्रतीदम् । जातानिसर्वव्यसनानितस्यास्त्यागेनमेमु
ग्धविलोचनायाः,, ॥११॥ भाषान्यथाकरणेनयथा ।
किन्तादेणनरेन्द्रसेहरसिहालीढग्गपादेणमेकिंवामे
ससुरेण वासवसहासीहासणद्धासिणा । ते देसा गि
रिणो अ तेवणमही सज्जेअमेत्तल्लहाकोसल्लातणअ
रुसजत्थचलनेवन्देअणन्दामिअ । अत्रयदिभाषान्त

न्नौगरीयानितिन्यायात् । दिव्यास्वभागसोदराक्रियायल्लक्षणा ॥८॥
गौरितरेति । घरूपेत्यादिनापूर्वपदह्रस्वः॥१०॥एतेषाञ्चपदाद्यन्यथाक
रणानाम्परस्परसङ्करोपिभवतीत्यावेदयति । पादत्रयस्यचेति ॥११॥
भाषाभेदेनकथंस्त्रीपुंसवचनतागम्यतइत्यतआह । तदेतच्चौरसेनी

रेणपठ्यतेतदैतच्छौरसेनीभाषयासीतावाक्यंसंस्कृत भाषायां सुमन्त्रेण दशरथाय निवेदितम् । तद्यथा । "किन्तातेननरेन्द्रशेखरशिखालीढाग्रपादेनमे किं वामेश्वशुरेणवासवसभासिंहासनाध्यासिना। तेदेशा गिरयश्चतेवनमही साचैवमेवल्लभाकौसल्यातनयस्य यत्रचरणौवन्दामिनन्दामिच,,।सेयमेवम्प्रकारापठि तिः॥१२॥१२॥ विभिन्नार्थैकरूपाया यावृत्तिर्वर्णसंह तेः॥ अव्यपेतव्यपेतात्मायमकंतन्निगद्यते ॥१॥ तद व्यपेतयमकं व्यपेतयमकं तथा॥ स्थानास्थानविभा गाभ्यामपादभेदाच्चभिद्यते ॥ २ ॥ यत्रपादादिमध्या न्ताःस्थानन्तेषूपकल्प्यते ॥ यदव्यपेतमन्यद्वातत्स्था नयमकं विदुः ॥ ३ ॥ चतुस्त्रिद्व्येकपादेषु यमका

ति । विभागन्यूनतामाशङ्क्ययोक्तप्रकारेणसमाधानमभिसन्धायाह । सेयमेवम्प्रकारापठितिरिति ॥१२॥ अथावृत्त्युपजीविनोलङ्कारालक्षयि तव्यास्तेषांसमग्रकाव्यपर्यन्तावृत्तिसमाश्रयणाद्यमकम्प्रधानमित्याश येनाह । विभिन्नेति । विभिन्नार्थैत्यर्थाभेदव्यतिरेकपरम् । तेनद्वयोरे कस्यवानिरर्थकत्वेपियमकमुपगृहीतम्भवति । एवमपिसरोरसइत्या दावतिप्रसङ्गइत्यतउक्तमेकरूपेति । रूपमानुपूर्वीविभिन्नार्थाचासावे करूपाचेतिविग्रहः । विविधधवेत्यादावेकवर्णावृत्तावव्याप्तिसमुदा यएवयमककक्रममुल्लिखतीत्यभिसन्धायसंहतेरित्युक्तम् ।विभिन्नार्थैकरू पायावर्णसंहतेर्याआवृत्तिः सायमकमितिव्यवहितेनान्वयः ॥१॥ आवृ त्तिर्द्विधाअनावृत्ताव्यवहिताव्यवहिताचेति ॥ २ ॥ सामान्यतोविभज ते । अव्यपेतेति । व्यवायोव्यवधानम् । तदेतदुभयमपिस्थानादि भेदेनत्रिधाभवतीतिपूर्वोक्तानुवादपूर्वकमवान्तरविभागमाह । तद्वि ति । पादआदिमध्यान्ताअर्थादेतेषुविशेषतोनुल्लिखदस्थानयमम् उक्तम्भवति । एतदपिद्विधा॥३॥चतुरादिपादविकल्पेनविषयतोभिद्यत

नांविकल्पनाः । आदिमध्यान्तमध्यान्तमध्याद्यन्ता
द्यसर्वतः ॥ ४ ॥ अत्यन्तबहवस्तेषाम्भेदाःसम्भेदयो
नयः । सुकरादुष्कराश्चैवदर्श्यन्तेतत्रकेचन ॥ ५ ॥ त
त्रचतुष्पादयमकेषुअव्यपेतमादिमयकंयथा । राजी
वराजीवशलोलभृङ्गम्मुष्णन्तमुष्णन्ततिभिस्तरूणाम्।
कान्तलकान्ताललनाः सुराणांरक्षोभिरक्षोभितमुद्व
हन्तम् ॥ १ ॥ तदेवमध्ययमकंयथा ॥ दधतमाकरि
भिःकरिभिःक्षतैःसमवतारसमैरसमैस्तटैः । विविध
कामहितामहिताम्भसःस्फुरसरोजवनाजवनानदीः
॥ २ ॥ तदेवमन्तयमकंयथा ॥ व्यथितसिन्धुमनीरश
नैःशनैरमरलोकवधूजघनैर्घनैः । फणवतामभितो

इत्याह । चतुस्त्रीति । आदिश्चमध्यश्चान्तश्चेतिआदिमध्यान्तास्त्रयः
शुद्धा । मध्यान्तौमध्यादीआद्यन्तौआदिमध्यान्ताश्चेतिमिलित्वाचत्वा
रःसङ्कीर्णाः । सर्वतइति । सार्वविभक्तिकस्तसिः ॥ ४ ॥ एवम्पाद
विकल्पानामाद्यादिविकल्पानाञ्चपरस्परयोजनेऽन्येपिबहवः प्रकारा
ग्रन्थगौरवकारिणोभवन्तीत्याह । अत्यन्तेति । नचकठोरनीरसत्वा
दवश्यवक्तव्यइत्याह । दुष्कराइति । शिष्यव्युत्पत्तयेतुकतिपयेदर्श
नीयाइत्याह । तत्रकेचनेति ॥ ५ ॥ राजीवराजीपद्मपङ्क्तिस्तद्वशा
लोलाःसस्पृहाभृङ्गायत्रतम् । यतस्तरुपङ्क्तिभिरुष्णंघर्मम्मुष्णन्तम
पहरन्तम् । कान्तोमनोज्ञोऽलकान्तश्चूर्णकुन्तलच्छटायासान्ताः । य
स्माद्रक्षोभीराक्षसैरक्षोभितमधर्षितम् । अत्रप्रथमेपादेपूर्वंसार्थकमपर
मनर्थकन्द्वितीयादिषुद्वयमप्यनर्थकम् । एवमन्यत्रापियथायथमवग
न्तव्यम् ॥ १ ॥ आकरीभिःप्रशस्ताकरयुक्तैःकरिभिःपरिणतिक्रीडासक्तैः।वि
विधेभ्यःकामेभ्योहिताः । महितम्पूजितञ्जवनावेगवती ॥ २ ॥ नीरशनै
र्ननिर्गतादूरीभूतारशनाःक्षुद्रघण्टिकायेभ्यः काञ्चीगुणयुक्तैः।तेनस्थपु
टकर्कशरत्नादिरचनयासिन्धुव्यथापोषःशनैर्मन्दङ्घनैर्मांसलैरभितोवित

वितन्ततंदयितरम्यलतावकुलैःकुलैः ॥ ३ ॥ आदि मध्ययमकंयथा ॥ घनाघनाभस्यमहीमहीयसःसुरासुराणांदयितस्यतस्यसा । धराधराकारगृहागृहार्थिनोबभूवभूमेर्नगरीगरीयसी ॥ ४ ॥ आद्यन्तयमकंयथा ॥ द्रुतंद्रुतंवह्निसमागतङ्गतंमहीमहीनद्युतिरोचितञ्चितम् । समंसमन्तादपगोपुरम्पुरम्परैःपरैरप्यनिराकृतंकृतम् ॥५॥ मध्यान्तयमकंयथा ॥ उदयिते दयितेजघनंघनंस्तनवतीनवतीर्यतनुस्तनुः । सुमनसामनसासदृशौदृशौद्युरुमेकुरुमेभिमुखम्मुखम् ॥ ६ ॥ आदिमध्यान्तयमकंयथा ॥ सीमांसीमानभूमिः

तंसर्वतोविस्तीर्णम् । फणभृताङ्कुलैस्तंव्याप्तम् । लवङ्गबकुलमालतीसुरभिशीतलतयाफणभृत्प्रियत्वम् ॥३॥ घनाघनोमेघस्तदाभःश्यामोमहीपृथ्वीतस्याम्महीयान्पूज्यः । धराधरःपर्वतस्तदाकारगृहाः ॥४॥ वह्निसमागतंसद्द्रुतंविलीनमतएवद्रुतंशीघ्रम्महीङ्गतम्पृथिव्यांविस्तीर्णतयापतितमहीनयाद्युत्यारोचिसंशोभितम्चितन्निबिडेनसन्निवेशेनस्थापितंसमन्तात्सर्वतःसमंसलक्ष्मीकमस्थपुटंवा।परैःशत्रुभिःपरैःश्रेष्ठैरनिराकृतंयदासीत्तदेववह्निनाहेममयम्पुरमपगोपुरमपगतद्वारम्महींगतंचकृतमितिसम्बन्धः॥५॥उदयउद्भवोविस्तारवत्त्वरूपस्तद्युक्तमुदयि ।घनम्मांसलम् । नवेनतीर्थेनरजसातनूकृता । स्त्रीरजःशास्त्रयोस्तीर्थम् । सुमनसाङ्कुसुमामामनःशकटन्तेन । सदृशौसुमनसाम्मनसासितिपाठे,सुमनसःसद्दयास्तन्मनसांसदृशौसंवादिन्यौ । द्यौश्चकुश्चद्युकूद्यावापृथिव्यौतयोरुमालवणाकरोलावण्यविश्रान्तिस्थानत्वात् ॥६॥सीमामर्यादातस्यामासनशीलः । मामम्परिमाणातिशयोमानःपूजायातङ्गमिः । फणिवलम्भुजङ्गसमुदायस्तस्ययद्वलनन्तेनोद्भाविनीयाराजीरेखातयाविराजनशीलः । हारीताःपक्षिविशेषास्तद्युक्तैः । परिसरस्तरणिस्तीरमार्गस्तत्रास्तमालैःक्षिप्तमालासन्निवेशैःखण्डरूपतामापन्नैरि

फणिबलवलनोद्भाविराजीविराजीहारीहारीतवद्भिः परिसरसरणावस्तमालैस्तमालैः । देवादेवाम्ररक्षःकृतभवभवतोग्रेनदीनोनदीनो मुक्तामुक्ताच्छरत्नःसितरुचिरुचिरोल्लासमुद्रःसमुद्रः ॥ ७ ॥ त्रिपादयमकेष्वपेतमादियमकंयथा ॥ विशदाविशदामत्रसारसेसारसेजले । कुरुतेकुरुतेनेयंहंसीमामन्तकामिषम् । नास्यचतुरःप्रयोगइतिशेषभेदानोदाह्रियते ॥ ८ ॥ द्विपादयमकेष्वपेतमादियमकंयथा ॥ करोतिसहकारस्यकलिकोत्कलिकोत्तरम् । मन्मनोमन्मनोप्येषमत्तकोकिलनिःस्वनः ॥ ९ ॥ तदेत्रमध्ययमकंयथा ॥ तुलयतिस्मविलोचनतारकाःकुरबकस्तबकव्यतिषङ्गिणि । गुणवदाश्रयलब्धगुणोदयेमलिनिमालिनिमाधवयोषिताम् ॥ १० ॥ अन्तयमकंयथा ॥ खण्डिताशंसयातेषामपराङ्मुखतयातया । प्राविवेशकृपाकेतूकृतो

तियावत् । ईदृशैस्तमालैर्हारीमनोहरहृतिसम्बन्धः । देवादेवाःदेवासुराःतैरमृतलाभेनान्तरवस्थानेनचाप्तारक्षायस्मात्सतथाकृतभवःसम्पादितोद्भवोनदीनामिनःस्वामीसमुद्रोभवतोग्रे नदीनः काकादीनएव । मुक्ताभिरमुक्तान्यच्छानिरत्नानियत्रसतथा । सितरुचिश्चन्द्रस्तेनरुचिरा मनोहराउल्लासमुद्भावृद्धिर्याठायस्य । तदेतेषामुदाहरणानाञ्चतुर्ष्वपिपादेषुयथोक्तंयमकमस्तीतिचतुष्पादयमकप्रपञ्चोयम् ॥९॥ एवंत्रिपादयमकप्रपञ्चोपिभवतीत्याह । त्रिपादयमकेष्विति । विशदाधवलाविशन्तश्चामत्ताःसारसायत्रतस्मिन् । सारसंसरःसम्बन्धि । मन्मथोन्माथदायितया कुत्सितंरुतङ्करुतम् । मध्यान्तादीनित्रिपादयमकानिकिमितिनोदाहृतानीत्यतआह । नास्येति ॥८॥ उत्कण्ठोत्कलिकातदुत्तरन्तटङ्कूलम् । मन्मनोऽव्यक्तमधुरोमन्मनोमदीयम्मनः ॥९॥ अलिनियोमलिनिमाकज्जलाभत्वंसमत्तमाधवयोषितांया

च्चैर्वानरन्नरम् । एवमादिमध्यान्यपिद्रष्टव्यानि । एकपादयमकेषुअव्यपेतमाद्यन्तयोरनुल्लेखीतिनोदाह्रियते ॥ ११ ॥ मध्ययमकन्तुचतुर्थपादएवोल्लिखति ॥ यथा । विलुलितालकसंहतिरामृशन्मृगदृशां श्रमवारिललाटजम् । तनुतरङ्गततीःसरसान्दलत्कुवलयंवलयन्मरुदाववौ ॥ १२ ॥ एवमावृत्याधिक्येप्यव्यपेतमुदाहार्यम्॥ यथा।वियद्वियद्वृष्टिपरम्परम्परंघनाघनालीरसितासितासिता।सरःसरस्यःस्वरसारसारसासभासभारात्रिरतारतारता ॥ १३ ॥ आवृत्येकरूपतायामपि ॥ तत्रादियमकंयथा । यामया

दवस्त्रीणांविलोचनतारकास्तुलयतिस्मेतिसम्बन्धः ॥ १० ॥ केतूकृतोध्वजतःन्नीतः । उच्चैर्वानरोहनूमान् । नरोर्जुनः ॥११॥ आद्यन्तयोरनुल्लेखीति । महाकविप्रयोगेषुविशेषशोभाकरतयाप्रसिद्धेरभावोनुल्लेखोमत्वसम्भवएव । एवम्मध्ययमकन्त्वित्यादौबोद्धव्यम् । आमर्शनम्प्रोञ्छनम् । दलत्कुवलयमितिक्रियाविशेषणम् । तरङ्गाणामितस्ततोवलनेनप्रौढतरकुवलयकलिकास्फुटनजातिः॥१२॥आवृत्तिःसकृदावर्त्तनेनैवनिर्वहति । तत्किमसकृदावृत्तौयमकन्नभवतीत्यतआह । एवमिति । आवृत्तिसामान्यमधिकमनधिकं वा द्वयमप्यावृत्तिपदेनाऽभिमतमित्यर्थः । वियदाकाशम् । वियतीअपगच्छन्ती वृष्टिपरम्परा यस्मात्तत्तथापरमुत्कृष्टरमणीयम् । घनाघनाली मेघपङ्क्तिः । रसिते स्तनिते आसिताऽवलम्बिता । सिताशुभ्रा । सरांसिचसरस्यश्चसरःसरस्यःस्वरसारास्तत्कालोन्मिषितकूजितकान्तिप्रधानाःसारसाःपक्षिणोयत्रतास्तथाभूताःसभागृहरूपाःजलसमुदायोवा । सभाःसदीप्तिःताराणान्तारतानिर्मलताप्रकर्षःकिञ्चिद्घनरोधसद्भावादीषत्तारता यस्यां सातथा ॥१३॥ आवृतिती । यज्जातीयमाद्यपादेपदमावृत्तन्तज्जातीयमेवद्वितीयादिपादेष्वपियथास्थानमावर्त्ततइतिप्रकारान्तरमप्यावृत्तिपदेनैवसङ्गृहीतमित्यर्थः । यामत्रयाधीनायामया । प्रहरत्रयविश्रान्तिया

मत्रयाधीनायामयामरणन्निशा। यामयामधियाऽस्व
र्त्यायामयामथितैवसा ॥ १४ ॥ तथैवमध्ययमकंय
था ॥ स्थिरायतेयतेद्रियोनहीयतेयतेर्भवानमायतेय
तेप्यभूत्सुखायतेयतेक्षयम्॥ १५॥ तदेवान्तयमकंयथा॥
भवादृशानाथनजानतेनतेरसंविरुद्धेखलुसन्नतेनते।
यएवदीनाःशिरसानतेनतेचरन्नलन्दैन्यरसेनतेनते।
तदेतत्सर्वमप्यवहितावृत्तेरव्यपेतयमकम्भवति॥१६॥
अथचतुर्षुपादेषुव्यपेतमादियमकंयथा॥काञ्चिप्रतो
लीमनुकामिनीङ्काञ्चित्स्रवतीवनमातरिश्वा । का

वद्दीर्घताप्रकारया। निशारात्र्यामरणंयामेतिवियोगखन्नस्यप्रार्थना।
किमित्येवममङ्गलमाशास्यतइत्यतआह । यामिति । धियाबुद्ध्याया
मयाञ्जीवितसर्वस्वाभिमानगोचरतामनैषम् । साअनयाकल्पकोटिश
तायमानयामयारजन्याअसूनाम्प्राणानामार्त्तिःपीडातयाद्वारभूतया
प्रायेणमथितैवभविष्यतीतिसुकुमारतरकान्ताजीवितानध्यवसायोक्ति
रियम्। अत्रयामेत्येवपदम्पादचतुष्टयेप्यावृत्तमेवमुत्तरत्र ॥१४॥ आय
तिरुत्तरकालविशुद्धिः । जितेन्द्रियोविजितेन्द्रियग्रामएवंभूतोभवान्य
तेर्नहीयतेयतितुल्यएवभवतीत्यर्थः । अपिशब्दोभिन्नक्रमः । अमाय
तामायाशून्यत्वंसापितवइयत्तेपरिच्छेत्तुमशक्यायक्षयंविनाशमयतेऽ
गच्छतेसुखायाऽभूत्॥१५॥नतेःकुपितकामिनीप्रसादरूपायारसोविप्रल
म्भपृष्ठभावीमधुरतरःसम्भोगःकिमितितादृशारसन्नजानतेयस्मात्सन्न
ताअवसादयोगित्वमिनताप्रभुताएतेद्वेविरुद्धेनैकत्रसम्भवतोनहिप्रभ
वोनमन्ति । एतदेवव्यतिरेकेण द्रढयति । यएवेति । येदीनास्तएव
नतेनशिरसालक्षिताः । तेनहेतुनादैन्यरसेनात्यन्तञ्चरन्तिव्यवहरन्ती
ति । अव्यपेतपदार्थंव्याचष्टे । तदेतत्सर्वमिति॥१६॥क्रमप्राप्तंव्यपेतमु
दाहर्त्तव्यमित्याह । अथेति । काञ्चिर्नगरीतस्याःप्रतोलीराजरथ्या
तामनुलक्षीकृत्य । केन पानीयेनाञ्चनशीलायास्रवन्तीनदीतद्वनमा

ञ्चिप्रभृत्याभरणोज्झितानाङ्काञ्चिल्लुनीते सुरतश्र
मार्तिम्॥१७॥तदेवमध्ययमकंयथा॥ मदनदारुणउ
त्थितउच्छिखोमधुमदारुणहूणमुखच्छविः। तरुणि
दारुणएषःदिशःसमम्ममहृदारुणदाम्रवणानलः॥१८॥
अन्तयमकंयथा॥ तवप्रियासच्चरिताप्रमत्तयाविभू
षणन्धार्यमिहांशुमत्तया। रतोत्सवामोदविशेषमत्त
यानमेफलङ्किञ्चनकान्तिमत्तया॥ १९॥ आदिम
ध्ययमकंयथा। घनगिरीन्द्रविलङ्घनशालिनावन
गतावनजद्युतिलोचना। जनमताददृशेजनकात्म

तरिश्वावायुः।काञ्चिप्रभृतीनिमेखलाप्रमुखानि।काञ्चित्सर्वाङ्गीणालस
भावसमर्पिकामतएवमेखलाप्रभृतिभूषणत्यागः। अत्रप्रतिपादंकाञ्ची
काञ्चीत्यादिनैरन्तर्येणावर्त्ततेनव्यपेतम्। सान्तरत्वेनपुनरादिमध्यय
मकमेवस्यादितिपादभेदेनैवास्यसम्भवः॥ १७॥ मदनएवदारुकाष्ठन्त
तउत्थितःशिखामञ्जरीच्छटाज्वालाच। स्वभावताम्रमेवमधुमदेनय
द्विगुणमरुणंहूणमुखन्तच्छविर्दारुणोभयङ्करोममहृदासमन्दिशोऽरुण
द्रुद्धवान्। आम्रवणमेवतापकारितयानलोवह्निः। अत्रयद्यपिप्रति
पादमपिव्यवायेनमध्ययमकंसम्भवति तथापि मतथोल्लेखीतिपूर्वाप
रसदृशमेवोदाहृतम्॥ १८॥ सच्चरिताप्रमत्तेति। सोत्प्रासंसम्बोधन
द्वयम्। यातवप्रियारतोत्सवामोदविशेषेणरतिकेलिहर्षप्रकर्षेणमत्ता
तयेदमंशुमन्मणिकिरणकरम्बितम्भूषणन्धार्यम्। अर्हेकृत्यः। त्वया
किमितिनधार्यमित्यतआह। नमेभूषणसम्पाद्ययाकान्त्याकिञ्चनफल
म्। कामिनाम्मण्डनश्रीर्व्रजतिहिसफलत्वंवल्लभालोकनेनेतिन्यायात्
॥१९॥ अत्रापिसान्तरनिरन्तरप्रसङ्गेपादभेदएवसङ्करःसङ्कीर्णव्यपेतानि
तुप्रतिपादमेवसम्भवन्तीत्युदाहरति। आदिमध्येति। घनागिरिन्द्रा
माल्यवन्तमारभ्यसुवेलंयावद्गिरिपरम्परावनजम्पद्मञ्जनानाम्मतासम्म
ता। तरुमृगःशाखामृगोहनूमान्। अत्रघनेत्यादिशब्दभागःपादचतु

जातरुमृगेणतरुस्थलशायिनी ॥२०॥ आद्यन्तयमकं यथा । विहगाःकदम्बसुरभाविहगाःकलयन्त्यनुल क्षणमनेकलयम् । भ्रमयन्नुपैतिमुहुरभ्रमयम्पवनश्च धूतनवनीपवनः ॥२१॥ मध्यान्तयमकंयथा । मि तमवददुदारंतां हनूमान्मुदारं रघुवृषभसकाशंदेवि यामिप्रकाशम् । तवविदितविषादोदुष्टकृत्स्यामि षादःम्रियमनिशमवन्तम्पर्वतम्माल्यवन्तम् ॥२२॥ आदिमध्यान्तयमकंयथा । समंससैन्येनसमन्ततःस मम्पुरंदरश्रीःपुरमुच्चगोपुरम् । मदालसांतांप्रमदां सुसम्मदांययौनिधायाक्षययौवनाययौ ॥ २३ ॥ त्रिपादयमकेष्व्यपेतमादियमकंयथा । करेणतेर णेष्वन्तकरेणद्विषतांहताः । करेणवःक्षरद्रक्ताभा न्तिसध्याघनाइव । अस्यापिनातिप्रचुरःप्रयोगइ तित्रिशेषभेदान्नोदाह्रियते ॥ २४ ॥ द्विपादयमकेष

ष्टयेपिगिरीन्द्रेत्याद्यनावृत्तव्यवहितएवादिमध्ययोरावर्त्ततइति ॥ २०॥ गाःकूजितानिकदम्बसौरभानीतवर्षर्तुपयोदाः कलयन्ति कलरूपताल यन्ति । कूजितक्रियान्तरालकालोद्भुतमध्यविलम्बितात्मानेकोलयः । अभ्रं मेघः । नीपःकदम्बः । कदम्बवनधूननेनसर्वतःसौरभसञ्चारी पपत्तिः । अत्रविहगाइत्यादिकप्रतिपादमाद्यन्तयोरनावृत्तवर्णषट् कव्यवहितमेवावर्त्तते ॥२१॥ मितमत्पात्तरसरमत्यर्थसुदारमत्पात्तरम्य ज्जकम्मुदाहर्षेण रघुवृषभोरामस्तस्यसकाशोवासभूमिस्तयापुरस्कृतः। आमिषाहाराक्षसाः । अत्रदारमित्यादिप्रतिपादम्मध्यान्तयोरेवानाव्रत्तवर्णपञ्चकव्यपेतमावर्त्तते ॥२२॥ समंसहसमंसश्रीकंसध्वंसदोहर्षः । ययुरश्वमेधीयोद्यः । अत्रप्रतिपादंसममित्यादिकमादिमध्यान्तेषुयथो क्तानावृत्तवर्णव्यवहितमावर्त्तन्ते ॥२३॥ द्विषतांशत्रूणामन्तकरेणविना शकारिणाकरेणहस्तेन । करेणवोहस्तिनः । एवद्वितीयादिपादगोचर

व्यपेतमादियमकंयथा । मुदारमणमन्वीतमुदारमणिभूषणा । मदभ्रमदृशः कर्तुमदभ्रजघना क्षमा । मध्ययमकम्पुनरनुल्लेखीतिपरिहियते ॥२५॥ अन्तयमकंयथा । इहमुहुर्मुदितैःकलभैरवः प्रतिदिशङ्कियतेकलभैरवः । स्फुरतिचानुवनञ्चमरीचयःकनकरत्नभुवाञ्चमरीचयः ॥ २६ ॥ एकपादयमकमिहशुद्धनसम्भवति तस्य स्थानेद्विपादयमकमेवोदाहियते । तदादियमकंयथा । मधुरेणदृशाम्मानम्मधुरेणसुगन्धिना । सहकारोद्गमेनैवशब्दशेषङ्करिष्यति

स्यध्यादियमकञ्चकिमितिनोदाहियतइत्यताह । अस्यापीति ॥२४॥ रमणंवल्लभम्मुदारंचैणान्वीतंसङ्गतङ्कर्तुंक्षमाइत्यन्वयः । उदारमुत्कृष्टम् । मदेनभ्रमन्तीश्चमान्ताअदभ्रं विपुलम् । अत्रयद्यपिचतुर्षुपादेषु यमकमस्तितथापि द्वयोर्द्वयोरेवावृत्तिःपर्यवस्यतीत्युदाहरणद्वयमिदंद्रष्टव्यमेवम्प्रथमतृतीययोः प्रथमचतुर्थयोर्द्वितीयतृतीययोर्द्वितीयचतुर्थयोश्चव्यपेतमादियमकमवसेयम् । अनुल्लेखोव्याख्यातएव ॥२५॥ कलभाःकरिशावकारवः शब्दःकलोमधुराव्यक्तोभैरवोनयङ्करः । अनुवनमितिवीप्सायांसव्ययीभावः । चमरीचमरगवी । चयःसमूहः । मरीचयःकिरणाः । अत्रापिपूर्ववदेवद्विपादयमकंव्याख्येयमिति ॥२६॥ एकपादयमकमिति । नैरन्तर्येणावृत्तावव्यपेतत्वम् । सान्तरत्वेत्वादिमव्यादिभावप्रसङ्गइतिशुद्धनभवतितत्किमनुदाहरणीयमेवैतदित्यतआह ॥ तस्येति । आवृत्तिरेकत्रैवसम्भवतीतिएकपादगोचरस्य सातुप्रतियोगितयाद्वितीयमपेक्षतइतिपादान्तरस्वीकारइतिकथंचिदपिकृतिगणनासमाधानमेतत् । बन्धुश्चैत्रः । अनेनपूर्वोक्तव्यवेनवसन्तीलक्ष्यते । एणदृशांहरिणलोचनानाम्मधुरेणमधुराख्येन सहकारोद्गमेनैवेत्येवकारेणासन्नतीवतावद्विख्यातप्रभावातिशयाःप्रियकलनादयःसहकारप्रथमोद्गमाग्रेणैवतुमानिलीमानयहणात्तैरिवशब्दशेषिते

॥ २७ ॥ इहापिमध्ययमकमनुल्लेखीतिपरिह्रियते ॥
अन्तयमकंयथा । यस्याहुरतिगम्भीरजलदप्रतिमङ्ग
लम् । सवःकरोतुनिस्सङ्गमुदयम्प्रतिमङ्गलम् ॥२८॥
एवमावृत्याधिक्येपियथा । अवसितंहसितम्प्रसित
म्मुदाविलसितंहसितंस्मरभासितम् । नसमदाःप्रम
दाहतसम्मदाःपुरहितंविहितन्नसमीहितम् ॥ २९ ॥
आवृत्येकरूपतायामपि । तत्रादिमध्ययमकंयथा ।
सारयन्तमुरसारमयन्तीसारभूतमुरुसारधरातम् ।
सारसानुकृतसारसकाञ्चिसारसायनमसारमवैति ॥
३० ॥ मध्यान्तयमकंयथा । लीलास्मितेनशुचिना
मृदुनोदितेनव्यालोकितेनलघुनागुरुणागतेन । व्या
जृम्भितेनजघनेनचदर्शितेनसाहन्ततेन गलितम्मम
जीवितेन ॥३१॥ आद्यन्तयमकमादिमध्यान्तयमक

त्युद्दीपनताप्रकर्षोध्वन्यते ॥ २७ ॥ गम्भीरोमांसलोगलःकण्ठोमङ्गलङ्ग
ल्याणम् । निस्सङ्गमप्रत्यूहमुदयःसंपत्तम्प्रति ॥२८॥ अवसितंसमाप्तंमु
दाप्रसितमनुबद्धंहसितंसितम्भ्रुटंस्मरेणभासितंशोभितंसम्मदोहर्षः ।
अत्रप्रतिपादंसितंसितमित्यादिद्वाभ्यामेवयमकन्निर्व्यूढम् । तृतीयन्तु
सितमित्यादिकमाधिक्यमेवप्रयोजयतितच्च सर्वमनावृत्तिव्यवहितमि
तिव्यपेतयमकमेवभवति ॥२९॥ सारयन्तमात्मसमीपमानयन्तम् । उर
साघनतरत्नाढ्येनसारभूतञ्जीवितसर्वस्वतामापन्नमुरुर्महान्सारउ
त्कर्षः । अनुकृतसारसासारसकूजितसंवादिनी । सारसासशब्दाकाञ्चि
र्मेखलायस्याःसातथा । सारसानुकृतेतिजातिकालसुखादिभ्यःपरस्वत
थेतिनिष्ठायाःपरनिपातः । रसायनंसर्वोपद्रवहरमौषधम् ॥३०॥ शुचि
नाकान्तेनमृदुनाकोमलेनोदितभाषितंलघुनातरलेनगुरुणास्तनजघन
भारालसेनव्याजृम्भितेनप्रकटीभूतविस्तारप्रकर्षेण ॥ अत्रतेनतेनेतिम
ध्यान्तयोरावृत्तम् ॥३१॥ इहेत्यावृत्येकरूपतायामेकस्यादावितरस्यान्ते

ञ्चेहास्थानयमकत्वप्रसङ्गान्नसङ्गच्छते । आदिमध्या
न्तयमकानितुप्रथममेवोदाहृतानि । आवृत्येकरूप
तायामावृत्याधिक्येचमध्ययमकं यथा । सभासुरा
जन्नसुराहतैर्मुखैर्महीसुराणांवसुराजितैःस्तुताः । न
भासुरायान्तिसुरान्नतेगुणाः प्रजासुरागात्मसुराशि
ताङ्गताः । तदेतत्सर्वमपिव्यवहितवृत्तेर्व्यपेतयमक
म्भवति ॥ ३२॥ नादौनमध्येनान्तेयत्सन्धौवायत्प्र
काशते ॥ अव्यपेतव्यपेतंतदस्थानयमकंविदुः ॥ १॥
पादेश्लोकेचतत्प्रायःपदसन्धौचबध्यते ॥ स्वभेदेचा

वर्त्तमानमेकरूपसन्धिपातित्वादस्थानयमकमेवभवति । एवमादिम
ध्यान्तयमकमपिनात्रसङ्गच्छतेतर्हिसन्धिविनाकृतमुदाहियतामित्यत
आह।आदिमध्यान्तेति । आवृत्याधिक्यइति। एकैकस्मिन्पादेतृतीया
द्यावृत्त्यापूर्वमाधिक्यम्पादान्तरावृत्तिसरूपतयासारूप्यञ्चोक्तम् । इह
तुसरूपावृत्त्यैवाधिक्यन्निरूप्यतइतिसङ्करप्रकारोपलक्षणमिदम् । स
भासुजनसमवायेषुअसुराहतैर्मदिरापानपराभूतैर्महीसुराणाम्ब्राह्मणा
नांवसुनातेजसाराजितैःशोभितैःभासुरादीप्ताः सुरान्देवान्ननयन्तिनि
षेधद्वयेनयान्त्येवेत्यर्थः । रागोनुरागस्तत्प्रधानआत्मायासान्तासुप्रजा
सुराशितास्पुजताङ्गताः । व्यपेतमुपसंहरति । तदेतदिति ॥ ३२॥ क
मप्राप्तमस्थानयमकंलक्षयति । नादाविति । आदावेवेत्यादिनियमे
नस्थानयमकमुक्तन्तदभावेत्वस्थानयमकम्भवति । तत्किमाद्यादिस्था
नमिदन्नाश्रयतएवनेत्याह । संधौवेति । सन्धौपादसन्दंशेएकस्यादि
रपरस्यान्तइति । नेदंस्थानयमकन्तद्धिप्रतिपादंस्थाननियमेननिरूप्य
तइत्युक्तप्रायम् । अव्यपेतव्यपेतमिति । द्वाभ्यामप्यन्वीयते ॥१॥ तत्प्र
थमम्पादश्लोकतयाद्विविधमित्याह ॥ पादेश्लोकेचेति ॥ पादसन्धौचय
द्बध्यतेतत्स्वभेदेचान्यभेदेचस्थूलंसूक्ष्मञ्चभवतीत्यर्थः । एतद्यथास्थानं
विवरिष्यते । स्थूलं सूक्ष्मञ्चेति । पूर्वेणापिसम्बध्यते । [illegible]वृत्तिस्थू

मव्यपेतंयथा। वीनांवृन्दङ्कैतत्कूटे समरुतिसुतरु
न्यभेदेचस्थूलंसूक्ष्मञ्चसूरिभिः ॥ २ ॥ अत्रपादेस्थूल
णिसमरुतिसुतरुणि । चित्तंवातेतत्क्रोडेस्मिन्सुतम
णिगुणरुचिसुरमणिगुणरुचि । अत्रस्थूलेनैवावृत्ति
द्वयेन श्लोकपादयोर्व्याप्तत्वादादिमध्यान्तानसम्भ
वन्तीत्यस्थानयमकमिदंस्थूलाव्यपेतमुच्यते ॥ १ ॥
पादएव सूक्ष्ममव्यपेतं यथा। स्वस्थः शैलेपरयास्ते
सौरुरुरुरतिरतितनुतनुमतिमति । लोकोयद्वद्वै
त्यानीकङ्गुरुगुरुमयिमयितरितरिसतिसति । अत्र
पुनःसूक्ष्मेणावृत्यष्टकेन श्लोकपादौव्याप्नोवीति अ
स्थानयमकामिदंसूक्ष्माव्यपेतमुच्यते ॥ २ ॥ श्लोके

समयङ्कुवर्णावृत्तिसूक्ष्मम् ॥२॥ वीनाम्यक्षिणांवृन्दङ्कूटेशृङ्गे समरुति
सारुलसंहिते । सुतरुणिशोभनवृक्षेकूटविशेषणद्वयमिदंसमरुतिसमान
कूजिते सुतरुणीतिप्रियासम्बोधनम् । वाशब्दश्चार्थे । सुरमणीनाम्दे
वमणीनाङ्गुणेनदाम्नारोचतेशोभतइतिक्विप् । तस्मिन्क्रोडेसुरमणी
तिसम्बोधनम् । गुणेषुरुचिर्यस्यतद्गुणरुचिचित्तम् । अत्रसमरुतिसुत
रुणिसुरमणिगुणरुचीतिद्वितीयचतुर्थपादयोर्वर्णाष्टकावृत्तिद्वयेनेति
पादव्यापकमव्यपेतमुच्यते ॥ ३ ॥ रुरुर्बहुशृङ्गोमृगउरुरतिरुपचितर
तिः । अतितनुरतिकृशातनुर्यस्याइतिसम्बोधनम्हस्वः । मतिर्मतिर्ने
तिरुचितज्ञानन्तद्वतीत्यपिसम्बोधनम् । पश्येतिवाक्यार्थकर्मकम् ।
गुरुविपुलम् । गुरुःशुक्रोभयोर्दैत्यविशेषस्तद्युक्तंरतिरविजयंमानं
मतिर्यति । सतीतिसम्बोधनम् । सतीशोभना । यथान्यदैत्या
नीरतिविजयेलोकोयंसुखमाप्तेतथासौरुरुरितिवाक्यार्थोभिन्नतः ॥ तदि
दंस्थूलद्वयावृत्त्यासूक्ष्मञ्चान्योन्यव्यवहितमव्यवहितञ्चव्यपेतमुच्य
तइति । तदेतदेकस्मिन्नपिपादेऽनुक्तद्वयादिपादविकल्पेनचबोद्धव्य
मिति ॥ तृतीयोदाहरणे । अर्चैतज्जादयितावल्लभा । एवंविधाअपिहस्तिनोनदयिता

स्थूलमव्यपेतंयथा । नगजानगजादयितादयितावि गतंविगतंललितंललितम् । प्रमदाप्रमदामहताम हतामरणम्मरणंसमयात्समयात् । अत्रावृत्यष्टके नश्लोकोपिव्याप्रइत्यस्थानयमकमिदंश्लोकेस्थूलाव्य पेतमुच्यते ॥ ३ ॥ श्लोकएवस्थूलव्यपेतंयथा ॥ वि विधधवचनानागगर्द्धर्द्धनानाविततगगनानामम ज्जज्जनाना । रुरुशललनानाव्रजबन्धुन्धुनाना ममहिहिततनानाननस्वस्वनाना । बलभद्रम्प्रतिकृ ष्णवाक्यं समुद्रतीरभूवर्णनपरम् । विविधानि ध वानान्तरुभेदानांवनानियस्यांसानागेषु सर्पेषुगर्द्धै र्नाभिलाषेणबुभुक्षयाऋद्धैः समृद्धैर्नानाविधैर्विभिः पक्षिभिर्विततंव्याप्रङ्गगनं यस्यांसा । अनामेन अ नमनेनमज्जन्तोजनायस्यांसा । बहूदकेत्यर्थः । यद्वा । अस्यविष्णोर्नामनिमज्जन्मृतस्तत्पराइतिया वत् । तादृशा जना यस्यांसा । अविद्यमाना नरो

मरक्षिताः । वीनांहंसप्रभृतीनाम्पक्षिणाङ्गतंञ्चङ्कसणंविगतमपग तंललितंविलसितंललितञ्चट्टस् । प्रमदाकान्ताऽप्रमदाहर्षशून्या । आमश्चिहत्यथारूपोरोगस्तेनहृतामहताम्प्रकर्षशालिनामरणंसङ्ग्रामव र्जितम्मरणंविनाशःसमयाद्दैवान्समयात्सङ्गतमासीत् ॥३॥ विविधानि धवचनानियस्यांसातथा । धवोविट्खदिरः । नागान्सर्पान्हस्तिनो घागृध्यन्त्यभिलषन्तीतिनागगर्द्धाः । अङ्गाऽपचितानानावयोविचित्रा पक्षिणस्तैर्विततंव्याप्रङ्गनंयस्यांसातथा । कल्लोलपरम्पराभिरनाक ननशून्यम् । मज्जन्तःस्नान्तोजनायस्यांसा । अनाकीरूपा । सत्यो शशानाञ्चलनमुत्फालोयस्यांसातथाभूता सौभाग्ययोरश्वशुश्रूश्वशु नाक्षिपत्नी । हरिप्रबोधेबलभद्रस्यकृष्णम्प्रत्युक्तिः । यस्मान्मलहित

ऽर्वाचीनामनुष्यायस्यांसा । समासान्तविधेरनित्य
त्वान्नद्यृतश्चेतिनकप् । यद्वा । अविद्यमानओधि
ष्णुर्यस्यांसा । यद्वा । अनामनिविष्णुनामनिमज्ज
द्भ्यस्तत्परेभ्योजातन्नानंयस्यांसानं ज्ञानन्तत्वज्ञान
मितियावत् । ननमऽनन्नअनन्नानंरुरूणांशशानाञ्च
लनङ्क्रीडनंयत्रसा । नौआवयोरबन्धुंवैरिणंधुनाना
नाशयन्तीहिनिश्चितम्ममहितन्तनोतिसा । अवि
द्यमानमाननम्मुखंयस्यसः । मुखंविनैवजायमानइ
त्यर्थः । ईदृशोयःस्वस्वनःशब्दस्तत्रअनाःप्राणायस्यां
सा । उदकशब्दवतीत्यर्थः । अत्रसूक्ष्मतराभिरष्टाविं
शत्यावृत्तिभिः श्लोकोव्याप्तइत्यस्थानयमकमिदंश्लो
केसूक्ष्माव्यपेतमुच्यते ॥४॥ पादसन्धावन्यभेदोच्छेदे
नस्थूलंयथा । उपोढरागाप्यबलामदेनसामदेनसा
मन्युरसेनयोजिता । नयोजितात्मानमनङ्गतापिता

तनाहितन्तनोति । अनाननोमुखशून्योयःस्वआत्मा । तेनस्वनामा
शब्दायमाना । शीलेचानश् । अनित्यमागमशासनमितिमुगभावः ।
यदिवाअनाननोमुखंविनाकृतःस्वकीयःस्वनोयस्याःसा । अनितीत्य
नाप्राणायुक्ता । अन्तर्णीतेवार्थञ्चैतत् । वर्णद्वयपर्यन्तमावृत्तिःसूक्ष्म
ता । सैवैकवर्णगोचरासूक्ष्मतरा ॥४॥ पादसन्धाविति । स्वभेदेचान्यभे
देचेत्यत्रव्यपेताव्यपेतयोःस्वत्वमन्यत्वञ्चव्याख्येयम्प्रकरणात् । तत्वे
प्रसङ्गेचयथासम्भवंसप्तमीयोजनीया । मदेनप्राप्तरागापिततएवमन्म
थोन्माथेनतापिताउत्तापङ्गतापियदात्मानमबलानयोजितवतीतन्नूत
म्मदेनसामदीयदुरितेनभूयोपिमानरसम्प्रापितास्यात् । अतएवेयतेव
क्तुमशक्यायसन्तापायनासेतिकाक्वातापप्रकर्षभणनम् । योजितेति ।
योजयतेर्गत्यर्थत्वमाश्रित्यकर्त्तरिक्तः । गत्यर्थाकर्मकेत्यादौचकारस्या

ङ्गतापितापायममासनेयते । अत्रान्तादिसन्दंशा
दव्यपेतम्प्रवर्तते । व्यपेतन्तुपादसन्धिषुनिवर्ततइ
त्यस्थानयमकमिदंस्थूलावृत्तेःसन्धिस्थूलाव्यपेतमुच्य
ते॥५॥अन्यभेदानुच्छेदेनसूक्ष्मंयथा । मतान्धुनानार
मतामकामतामतापलब्धाग्रिमतानुलोमता। मताव
यत्युत्तमताविलोमतामताम्यतस्तेसमतानवामता।
अत्र व्यपेतानुच्छेदेनैवपादसन्धिषुव्यपेतमुत्पाद्यते
इत्यस्थानयमकमिदंसूक्ष्मावृत्तेःसंधिसूक्ष्माव्यपेतमु
च्यते॥६॥स्वभेदेपूर्वभेदानुच्छेदेनस्थूलंयथा । सतमाः
सतमालोयःपारापारायतःसदावोदावः । लोकालो
कानुकृतिःसह्यःसह्ययमनभ्रकूटैःकूटैः । अत्रविषम
पादयोः समपादावन्तेऽवतिष्ठमानावादियमकाद्य
न्तयमकयोरादिमध्यान्तयमकतामापादयन्तः पा

मुक्तसमुच्चयार्थत्वाद्वा । अत्रप्रथमद्वितीययोस्तृतीयचतुर्थयोश्चान्तर
तोविच्छिद्यपाठेक्रियमाणेसन्धिषुव्यपेतप्रसङ्गःस्यात् । निरन्तरपठि
तौतुसनिवर्त्तते । यथैवचवृत्तौचितीवशात्सौभाग्यमुन्मिषति । तेन
व्यपेतबाधाद्व्यवेतपुरस्कारस्तद्विदाह । अत्रेत्यादि । सन्दंशःसंधा
नम् ॥५॥ मतांसम्मतासारमतांयोगिनामकामतांवीतरागतान्धुनाना
ऽधःकुर्वाणाअतायोनायासस्तेनलब्धोऽग्रिमतानुलोमतेश्रेष्ठतानुकूल्ये
यासा । अतएवोत्तमतायाविलोमतामतिरेकमयतीनगच्छन्तीईदृ
शीतवांताम्यतः संसारखेदेनाबाध्यमानस्यमतौसमतानतुवामतावैष
म्यमिति ॥ अत्रप्रतिपादमादिमध्यान्तेषुव्यवेतयमकमुपलभ्यते । स
न्धिषुचसन्दंशपाठाद्स्थानयमकमव्यवेतञ्च । नचपूर्वोपलब्धाव्य
ते । नवासन्धौविरतिरितिप्रसङ्गःसङ्गच्छते । तेनव्यवेतानुच्छेदकमेत
दव्यवेतम् । अत्रापिवृत्तौचितीसर्वत्रायते ॥६॥ तमोत्रगहनतातायासत
मासान्धकारम्पारानासनदीतस्याः पारेआयतोविस्तीर्णोदावीवनन्त

रापारेतिसह्यसह्यइत्यावृत्तीस्थूले एवादिमध्यव्यप
देशञ्चलभतइत्यस्थानयमकमिदम् ॥७॥ स्वभेदेपूर्व
भेदानुच्छेदिस्थूलाव्यपेतमुच्यते । तदेवस्वान्यभेदो
च्छेदिसूक्ष्मंयथा । सनाकवनितन्नितम्बरुचिरञ्चि
रंसुनिनदैर्नदैर्वृतममुम् । मताफणवतोर्वतोरसपरा
परास्तवसुधासुधाधिवसति । अत्रपादान्तादिषु
व्यपेतम्मध्येष्वव्यपेतन्तदुभयमपिपादान्तादिसंहि
तायामव्यपेतमभिन्नजातीयञ्जायते । नचप्राचीना
म्मध्ययमकताञ्जहातीत्यस्थानयमकमिदंसूक्ष्मावृत्ते
रन्यभेदोभेदेनस्वभेदानुच्छेदिसूक्ष्माव्यपेतमुच्यते ।
उभयमपिचैतदेवंविधेष्वेवच्छन्दस्सुद्रष्टव्यम् ॥८॥पा

द्बहुलत्वाददावोवनवह्निप्रभावरहितो लोकालोकश्चक्रवालाख्यःपर्वत
स्तदनुकृतिस्तत्सदृशोयःसोयंसह्यनामागिरिरभ्रकूटशून्यैः कूटैःशृङ्गैर्ल
क्षितः । हिशब्दोवाक्यालङ्कारे । अत्रप्रथमतृतीययोरादौद्वितीय
चतुर्थयोराद्यन्तयोर्व्यवेतयमकमेववर्त्तते । तदनुच्छेदेनैवसन्दंशपाठा
दियमकयोराद्यन्तयमकयोश्चाव्यवेतादिमध्यान्तयमकता प्रकाशते ।
यतोद्वितीयचतुर्थपादयोरादिमध्यान्तयमकमेव मध्यमयमकभूमिका
मवगाहते । अत्रापिवृत्तौचितीगवेषणीया । तदेतद्विवरणेव्यक्तमे
वेति ॥ ७ ॥ नाकवनिताःस्वर्गस्त्रियस्ताभिःसहितंयतोनितम्बेस्व
च्छन्दविहरणोचितेरुचिरंमनोज्ञं सुनिनदैःशोभनशब्दैर्महाफणवान्
वासुकिरवतोरक्षतोरसपरारसनीयेषुश्रेष्ठा । परास्तवसुधात्यक्तभूभा
गा सुधापीयूषम् । अत्रप्रतिपादन्नितन्नितमित्यादिकमव्यवेतम् ।
सन्धिषुचविरतिपाठेचिरञ्चिरमित्यादिव्यवेतंप्रतीयते । तत्रसन्दंशे
क्रियमाणेव्यवेतन्निवर्त्तते । अव्यवेतन्तुमध्ययमकमवतिष्ठतएव । त
त्सर्वमिदमव्यवेतमेवजायते । अत्रापिवृत्तौचितीपूर्ववदेवशरणमि
त्युपसंहारेदर्शयति । उभयमपिचैतदिति । स्थूलसूक्ष्मभावेनसन्धिय

देस्थूलव्यपेतंयथा। अखिद्यतासन्नमुदग्रतापंरविन्द धानेप्यरविन्दधाने॥ भृङ्गावलिर्यस्यतटेनिपीतरसान मत्तामरसानमत्ता। अत्रमाभूदव्यपेतप्रसङ्गइत्येकमे वाक्षरंविहायस्थूलावृत्तिद्वयेनश्लोकपादयोर्व्याप्त्या दादिमध्यान्तंनसम्भवन्तीत्यस्थानयमकमिदंस्थूल व्यपेतमुच्यते ॥९॥ पादएवसूक्ष्मंयथा । करेणुःप्रस्थि तानेकोरेणुर्घटाःसहस्रशः । करेणुःशीकरोजङ्गेरेणु स्तेनशमंययौ। अत्रविषमपादयोःकरेणुःकरेणुरित्या दावावृत्तम् । समपादयोस्तुरेणुरेणुरितितत्तुस्वापे क्षयानमध्यमन्यापेक्षयानादिरित्यस्थानयमकमिदंसू क्ष्मव्यपेतमुच्यते॥१०॥श्लोकेस्थूलव्यपेतंयथा।जयन्ति तेसदादेहन्नमस्यन्तिजयन्तिते । भवान्यतोनमस्य

मकमुभयम् ॥८॥ यस्यागिरेस्तटेरविमादित्यमुदग्रतापन्दधानेपिभृङ्गाव लिर्न्न मरमालानाखिद्यत । यतोऽरविन्दधानेपत्यानान्निधानभूतेनि पीतरसाआस्वादितमकरन्दा अतस्त्वमत्ता नमत्तिताभरसानियस्याः सकाशात्सातथाः । भरनमितपद्मकुहरप्रवेशान्मधुरससेवयाचञ्चम रमालयाखेदोनाधिगतः । अत्रद्वितीयचतुर्थपादयोरविन्दधानेरवि न्दधानेइति रसानमत्तारसानमत्तेतिद्वाभ्यामेववृत्तिभ्यां व्याप्तत्वादा द्यादिविभागासम्भवेऽस्थानयमकमेवेदं व्यपेतन्तुकथम्भवतीत्यतआ ह । माभूदिति ॥९॥ करेणुर्हस्तीप्रस्थितश्चलितस्तेनषण्टारेणुशब्दाय न्त । सहस्रशइतिक्रियाविशेषणम् । करेस्थूलहस्तेऽणुःसीत्कारविकी र्णतयापरमाणुसाङ्गतस्तेनशीकरेण । ननुविषमपादयोरादक्षरविनाऽ करणेनमध्येसमपादयोःपुनरादावेवरेणुरित्यावृत्तिरस्तितत्कथमस्थान यमकमिदमित्यतआह । तत्त्विति । अन्तोवृत्तैरसम्भावितत्वादादौम ध्येवासावाच्या। नचेयमपिसम्भवति । रेणुरेणुरितिशब्दभागसपेक्ष्यमवृ त्तायामावृत्तौतद्विरहात्॥१०॥हेजयन्तियेतवदेहंदुर्गातारादिरूपेणप्रप

न्तिसदादेहम्भवान्यतः । अत्रस्थूलव्यपेतावृत्तिचतु
ष्टयेनश्लोकोपिव्याप्त इत्यादिमध्यान्ताभावादस्थान
यमकमिदंस्थूलव्यपेतमुच्यते ॥११॥ श्लोकएवसूक्ष्मव्य
पेतंयथा।यामानीतानीतायामालोकाधीराधीरालो
का । सेनाऽसन्नाऽसन्नासेनासारंहत्त्वाहत्वासारम् ।
अत्रयद्यपियामायामेत्यादौव्यपेतमाद्यन्तयमकन्नी
तानीतेत्यादौचमध्ययमकमव्यपतं विद्यते तथापि

ञ्चमानाम्मूर्तिंसदानमस्यन्तितेजयन्तिसर्वोत्कर्षेणवर्त्तन्ते । यतस्तएव
भवान्संसारसरणिमस्यन्तिक्षिपन्ति । भवात्परमेश्वरादन्यताभेदस्तेनो
नमतःश्रेयसआदानङ्ग्रहणंयत्रतादृशीईहाचेष्टायत्रेतिद्वयमसनक्रियावि
शेषणम्। अत्रजयन्तितइतिप्रथमद्वितीययोराद्यन्तौसदादेहमितिप्रथ
मचतुर्थयोरन्तादीनमस्यन्तीति द्वितीयतृतीययोर्भवान्यतइतिचतृती
यचतुर्थयोराद्यन्तौचस्थूलावृत्त्याव्याप्ताविति आनावृत्तभागाभावाच्छ्लो
केस्थूलव्यवेतमस्थानयमकमिदम्॥११॥मानिभिरितासङ्गता । यद्वायामे
नप्रहरमात्रेणानीताप्रापिताशत्रून्जित्वेत्यर्थः। आनीतःप्रापितआया
मोवृद्धिर्यस्याःसातथा । पालनेनलोकानामाधिमीरयतिक्षिपतीतिलो
काधीराधीरैरप्राप्तसमरसम्भ्रमैरालोक्यतइतिधीरालोकाःसहइनासे
नान्यावर्ततइतिसेनाअसन्नाअवसादरहिताएवम्भूतायासेनासाआस
न्नानिकटवर्त्तिनीसतीआरमरिसमूहंहत्वास्वांस्वांसारङ्कार्यसिद्धिम्ब्र
वीति । ननुयामामायामालोकालोकेत्यादिकमाद्यन्तयोर्नीतानीतेत्या
दिकन्तुपदचतुष्टयस्यापिमध्यइति।व्यवेतमाद्यन्तव्यवेतयमकन्तुमध्य
यमकमितिस्थानयमकमेवेदंसङ्करोपिनपृथग्यमकताम्प्रयोजयतीत्य
तआह । अत्रयद्यपीति । यामेत्यादिकमादावनुसन्धायवर्णचतुष्कव्य
वधिनापादान्तेनुसन्धीयमानम्मण्डूकप्लुतिम्प्रयोजयतीतिनतथासोल्ले
खम् । यामानीतेत्यादिस्थूलचतुष्कप्रत्यागतेननीतायामेत्यादिनाद्य
न्तमुद्भटेनयमकच्छायातिरोधीयतइतिचनसोल्लेखम् । मध्यादिकं
व्यवेतंसोल्लेखमित्यपिनवाच्यम्। यामानीतेत्यादिबन्धच्छायापकर्षति

मण्डूकप्लुत्यागतप्रत्यागतेर्यतेश्चनैतदुल्लिखति । अपितुश्लोकोपिद्वाभ्यांद्वाभ्यामक्षराभ्यांसूक्ष्मवृत्त्याव्याप्तइवलक्ष्यते । तेनास्थानयमकमिदमादिमध्यान्तानामभावात्सूक्ष्मावृत्तेःसूक्ष्मव्यपेतमुच्यते ॥१२॥ पादसंधौस्थूलव्यपेतंयथा । हठपीतमहारष्ट्रीदशनच्छदपाटला । पाटलाकलिकानेकैरेकैकालिलिहेलिभिः । अत्रापिप्राग्वदेवयतिविच्छेदात्पूर्वोत्तरार्द्धयोरसंहितायाम्पाटलापाटलेत्यावृत्तेर्नाव्यपेतयमकत्वम् । नचैतत्पादयोरादावन्तेवाशक्यतेवक्तुम् । अपित्वेकस्यादावन्यस्यवान्त्यस्थानेयमकमिदं स्थूलावृत्तेःस्थूलव्यपेतमुच्यते । नचैतद्वाच्यमुपोढरागेत्यादौकाञ्चीयमकेप्ययन्न्यायइति । तस्यैवतथाभूतलक्षणत्वात्॥१३॥ काञ्चीयमकएवाव्यपेतास्थानयमभेकदेसूक्ष्मव्यपेतंयथा । धराधराकारधराधराभुजाभुजामहींपातुमहीनविक्रमाः । क्रमात्सहन्तेसहसाहतारयोरयोद्धुरायानधुरावलम्बनः । अत्रान्त्यपादेधुराधुरेतिसूक्ष्मव्यपेतंवर्तते॥१४॥ स्वभेदान्यभेदयोःस्थूलंसूक्ष्मउचयथा । सालंवहन्तीसुरतापनीयं

करणेनानुल्लेखत्वात् । श्लोकस्तुद्वाभ्यान्द्वाभ्यामावृत्तिभ्यांव्याप्तइतिसमुदायश्लोकेनैव।तदिदमुक्तम्मण्डूकप्लुत्यागतप्रत्यागतेर्यतेश्चेति। अन्ये यतिकृतोव्यवायोबोद्धव्यः।अत्राग्निवृत्तौत्रित्यमनुसरणीयम्॥१२॥ हठपीतेनेनताम्बूलरागेणेत्यर्थः।अपितुश्लोकोपीत्यत्रापिपदंभागासहत्वद्योतनार्थं। व्यवायाभावकथनंदाभाजेकत्वनिर्देश्यत्वेतन्नित्यमतआह । अत्राद्यान्द्वादिति । नचूपोढरागेत्यादौ पूर्वोदाहृतेयंतिविच्छेदादृतिव्यवधानात्तेऽप्यतिव्याप्तिरित्याशङ्क्याह।नचेति॥१३॥धराधरः[illegible]

सालंतडिद्वासुरतापनीयम् । रक्षोभरक्षोभरसत्रि
कूटालङ्काकलङ्काऽकलिकाद्रिकूटा । अत्रसालंसाल
मितिस्वभेदेसुरतापनीयंसुरतापनीयमिति स्थूलः।र
क्षोभरक्षोभलङ्काकलङ्केतिअन्यभेदे कूटाकूटेति सु
क्ष्मव्यपेतेभेदोवर्तते तदिदमस्थानयमकं स्थूलसूक्ष्म
मुच्यते ॥५१॥ यत्सूक्ष्मम्भागम्बह्वावृत्तितदपिस्थू
लसूक्ष्ममेव । यथा । मधुरयामधुबोधितमाधवीम
धुसमृद्धिसमेधितमेधया । मधुकराङ्गनयामुहुरुन्म
दध्वनिभृतानिभृताक्षरमुज्जिगे ॥१६॥ स्थानास्थान
विभागोयमव्यपेतव्यपेतयोः । क्रमेणोक्तस्तयोरेव
पादभेदोथकथ्यते ॥१॥ तत्रव्यपेतभेदेषुप्रथमपाद
योरावृत्तिर्यथा । नमन्दयावर्जितमानसात्मयानम
न्दयावर्जितमानसात्मया । उरस्युपास्तीर्णपयोधर
द्वयम्मयासमालिङ्ग्यतजीवितेश्वरः॥१॥ तत्रैवद्वित्ती
यतृतीययोर्यथा । दृश्यस्त्वयायम्पुरतःपयस्वाना
नाकलालीरुचिरेणनेत्रा। नानाकलालीरुचिरेणनेत्रा

लःप्राकारःसुराणान्तापनंसन्तापजननंन्तस्मैहितमलमत्यर्थंसालङ्का।
तपनीयंसुवर्णन्तापनीयञ्चतद्भास्वरञ्चेतिकर्मधारयः । रक्षसाम्भरःस
मूहस्तस्यक्षोभःप्रकर्षजःकोलाहलः । त्रिकूटःसुवेलोकलङ्कादोषरहि
ताअकलिकानिकलिरहितानिअद्रिकूटानिसुवेलशिखराणियस्यांसाल
था ॥१५॥ यत्सूक्ष्मभागमिति । भागशोविविच्यमानंसूक्ष्ममेववृत्तिमूल
स्तयातुस्थूलमिवप्रथतइतिसूक्ष्मेक्षिकयाभिधानम् ॥१६॥ क्रमप्राप्तमिदं
नीम्पादयमकमुदाह्रियतइत्याह ॥ स्थानास्थानेति ॥१॥ मन्दयातत्र
लोचिते प्रतिपत्तिविधुरयाआवर्जितोमानईर्ष्यारोषलक्षणोयया
तया । सात्माआत्मवतीअनयोःकर्मधारयः । नमन्पादान्तेलुठन्

देवीयदस्मादजनिस्वयंश्रीः॥२॥ एवंतृतीयचतुर्थयोरपियथा । स्मरानलोमानविवर्द्धितोयःसनिर्वृतिन्तेकिमपाकरोति । समन्ततस्तामरसेक्षणेनसमन्ततस्तामरसेक्षणेन॥३॥ व्यपेतभेदेषुप्रथमतृतीययोर्यथा। सभासुराणामबलाविभूषितागुणैस्तवारोहिमृणालनिर्मलैः ॥ सभासुराणामबलाविभूषितांविहारयन्निर्विशसम्पदःपुराम्॥४॥ तत्रैवप्रथमचतुर्थयोर्यथा।कलङ्कमुक्तन्तनुमध्यनायिकास्तनद्वयीञ्च त्वदृतेनहन्त्यतः । नयातिभूतङ्गणनेभवन्मुखेकलङ्कमुक्तन्तनुमध्यनायिका ॥५॥ एवन्द्वितीयचतुर्थयोरपियथा । याविभर्तिकलवल्लकी गुणस्वानमानमतिकालिमाल

दयावर्जितौमानसात्मानौयस्याइतिबहुव्रीहेर्डाप्॥२॥ आनाकंस्वर्गावधिललनमुल्लासस्तच्छीलोरुचिरेणमनोहरेणनेत्रानायकेननानाकलानाञ्चातुःषष्टिकीनामालीपरम्परा । एणनेत्राहरिणलोचना । द्वयमपिश्रीविशेषणम् ॥३॥ समंसमकालंतृणोनततोविस्तीर्णस्तामनुभवैकसाक्षिचिन्तानुवृत्तिलक्षणान्निर्वृत्तिस्मरत्सेइतिसोपालस्यसम्बोधनम् । समन्ततःसर्वतस्तामरसेक्षणेकमलनेत्रेनकिंसपाकरोतीतिपूर्वेणसम्बन्धः । अबला । बलारूयेनदानवेनरहितावित्रुनाशक्रेणाध्यासिता सुराणान्देवांसभासृणालनिर्मलैस्तवगुणैरारोहियतोऽतःस्तवस्पृयंबलाविभूषितास्त्रियोलङ्कृताविहारयन् भासुराणांसतां सम्पदोनिर्वर्शेत्पराशंसा॥४॥ कलस्मधुराव्यक्तस्याभितम्। तनोर्मध्यस्थभरेणानाभिकास्तनद्वयीचत्वांविहायकस्तायकस्तन्त वशीकरोति । अतोजितेन्द्रियेपुरुषसमगणनीयेत्वयिसतिकलङ्कमुक्तिर्हीपन्तनुमध्यशरीरस्यभूतमनाभिकाङ्गुलीमयातिपरस्यत्वस्पृश्यस्याभावाद् । निर्हीलोकेत्रिलोकेऽप्यकल्पानिर्दृश्यते॥५॥बल्लकीगुणस्यान्योवीणायाश्चस्वल्पलक्षणावयाबिभर्तिकालिक्नःश्यामतायाआलया । कज्जलमभूमीकालिमवर्णव

या।नात्रकान्तमुपगीतयातयास्वानमानमतिकालि
मालया ॥६॥ अर्द्धाभ्यासःसमुद्गस्यात्तस्यभेदास्त्रयोम
ताः।व्यपेतश्चावपेतश्च उभयात्माचसूरिभिः॥१॥तेषु
व्यपेतोयथा । अनेकपादभ्रमदभ्रसालमान्येहशा
भीरुपतत्रिकूटम् । अनेकपादभ्रमदभ्रसालमान्येदृ
शाभीरुपतत्रिकूटम्॥१॥अवपेतोयथा । घनंविदा
र्यार्जुनबाणपूगङ्घनंविदार्यार्जुनबाणपूगम् । स
सारबाणोयुगलोचनस्यससारबाणोयुगलोचनस्य ।
२ ॥ व्यपेताव्यपेतोयथा । कलापिनांचारुतयोपया
न्तिवृन्दानिलाषोढघनागमानाम् । वृन्दानिलाषो

कर्षेणयास्थितातयागातुमुपक्रान्तयाभ्रमरमालयाहेतुभूतयाकानासात्र
पर्वतेकान्तत्वननमतिनप्रणमतीतिनसुखेननाम्यतेइति अस्वानमायामा
गासीत्साप्युद्दीपनप्रकर्षेनिःशेषितमानानमतीत्यर्थः॥६॥१॥अनेकेषुपा
देषुप्रोन्नतपर्वतेषुन्नमन्त्यन्नाणिमेघाएवसालोवरणाःप्राकारोमान्याःपू
जार्हाईदृशायथादृश्यंतथैवमनोहारिणोऽभीरवोभयरहिताः पतत्रि
कूटाः पक्षिसङ्घाअनेकपाहस्तिनस्तेषामदन्नउत्कटोमदस्तम्भरन्तिधा
रयन्तीतिमूलविभुजादित्वात्कप्रत्ययेअनेकपादन्नमदन्नाःसालावृक्षा
यत्र । मान्येभीर्वितिसम्बोधनद्वयम् । मानःशृङ्गारभावस्तदर्हादृशा
त्रिकूटम्पर्वतमालोकयेति।विदारीकन्देभेदः॥१॥ अर्जुनःककुभोबाणोगु
ल्मविशेषोपूगोगुवाकोवृक्षद्वन्द्वत्वात्पाक्षिकएकवद्भावः । अर्जुनःपार्थ
स्तस्यबाणपूगंशरसमूहस्तंविदार्यभित्त्वा । अयुगलोचनस्त्रिनेत्रःकिरा
तरूपधरस्तस्यससारगतः सारबाणउत्कृष्टशब्दस्तेनसहितोऽयुगद्वि
तीयोऽलोचनस्यदुर्द्धानस्य ॥२॥ केपानीयेलपनशीलाहंसास्तेषांवृन्दा
निवारुतयामनोज्ञभावेनोपयान्तिसङ्गच्छन्तेलापेनपरस्परंसंलापमात्रे
णोढःप्राप्तोघनोनिरन्तरआगमआगमनंयेषां वृन्दानिलोवात्यालेना
षोढोनिराकृतोघनागमोमेघदुर्दिनङ्कलापिनोमयूरा आरुतयःसमन्त

ढघनागमानाङ्कलापिनाचारुतयोऽपयान्ति । पाद त्रयाभ्यासस्तुनातिसुन्दरइतितद्वैदानोदाह्रियन्ते ॥ ३॥ एकाकारचतुष्पादमहायमकमुच्यते । श्लोका भ्यासश्चतत्राद्यम्पुनरभ्यासमर्हति ॥ १॥ तत्राव्यपेतभे देमहायमकंयथा । सभासमानासहसापरागात्सभा समानासहसापरागात् । सभासमानासहसापरागा त्सभासमानासहसापरागात् ॥ १॥ व्यपेतभेदेद्वितीयं महायमकंयथा । प्रत्रणमदभ्रमदचलद्विपराजितमूढ विमलमहिततरङ्गम् । विरसंसदातिमिश्रितमच्युत

तःकेकयितानिश्रपयान्तितिरोभवन्ति । एकश्लोकेपादत्रयाभ्यासस्यास भवाच् श्लोकान्तरेचतयासौन्दर्यभावात्पादत्रयाभ्यासोनचिन्तनीयइ त्यतआहपादत्रयेति ॥ ३ ॥ इदानीङ्क्रमप्राप्तम्महायमकंलक्षयन्नाह । एकाकारेति । द्विविधमेकाकारंभवति । एकमावृत्तिश्चलुकेणापरमा वृत्त्यलुकेनतदिदमुक्तमाद्यम्पुनरभ्यासमिति।प्रतिपादमवान्तरावृत्ति भेदेनैवाद्यलुकनिर्वाहात्॥१॥भासःकान्तिर्मानश्चित्तसमुन्नतिःपूजावाआ सःशत्रुविधूननंहसःस्मरता । एतैःसहवर्त्ततेइतिसभासमानासहसा । यतोऽपरागश्चित्तकालुष्यमति । भासमानैःशोभमानैःसहवर्त्तते । स भासमाना । सहसामार्गशीर्षेणहेतुनाप्राक्तविलब्देप्रादुर्भूतान्घरा गाज्रजःकणानततिम्प्राप्तोतिपरागात् । भाकान्तिस्तयासमानासरूपा स्तैःसहवर्त्ततइतिसभासमाना।षोन्तकर्मणि।क्यन्तिपरानितितेसास्तै सहवर्त्ततइति सहसाएवम्भूताश्रसमाना अनुपमासभाजनसमवायो ऽपरागादपरस्मात्यवैतात्सहसाशीघ्रम्परागात्परागतेति॥१॥ प्रवणम्प्र कृष्टतरखनंप्रनिरन्तःशरेत्यादिनाणत्वम् । अदभ्रंगम्भीरमदेनद पैणचलन्तोयेवयःपक्षिणस्तैःपराजितामूढयोबालाः पक्षिणीयत्रतत लमत्यर्थंस्पर्शोक्तरूपानमूढान्बीन्पक्षिणोमलतेधारयतीतिवा । अ हितंतरङ्गम्भुजङ्गव्यालावर्तस्थानं विरसमतलस्पर्शंनयाभूतागहितंत दासर्वकालन्निमिर्भमेहावस्थैः श्रितसाश्रितमच्युतस्यभगवतो नारा

धामप्रतीतशिखिचरितवनम् । प्रवणमदभ्रमदचल
द्विपराजितमूढविमलमहिततरङ्गम् ॥ विरसंसदाति
मिश्रितमच्युतध्यामप्रतीतशिखिचरितवनम् ॥ २ ॥
अव्यपेतभेदे आद्यस्य पुनरभ्यासो यथा । समानया
समानयासमानयासमानया । समानयासमाऽनया
समानायाऽसमानया ॥ ३ ॥ एकरूपेण वाक्येन द्वयो
र्भणनमर्थयोः । तन्त्रेण यत्सशब्दज्ञैः श्लेष इत्यभिश
ब्दितः ॥ १ ॥ प्रकृतिप्रत्ययोत्थौ द्वौ विभक्तिवचना
श्रयौ । पदभाषोद्भवौ चेति शब्दश्लेषा भवन्ति षट् ॥ २ ॥

यणस्मधामविश्रान्तिस्थानं प्रतीतः प्रख्यातः शखीवडवानलस्तेन चरित
वनम्भक्षितजलोत्पीडमिति प्रथमश्लोकार्थः । प्रवणमदाः मदायत्तद
र्पाः सततनिस्यन्दमानमदजलाश्चभ्रमन्तो ये मैनाकप्रभृतयोऽचलाद्वि
पाः करिमकराश्च तैः शोभितम् । ऊढा विमलास्वभावनिर्मलाः महि
ताः पूजिताः तरङ्गा येन तम । विरसंक्षारम् । सतीभिः शोभनाभि
रतिभिः पक्षिविशेषैः मिश्रितङ्करम्बितन्नच्युतन्धामतेजो यस्य तम्प्रती
ताः प्रत्यागताः शिखिनो मयूरास्तैश्चरितवनम्भ्रान्ततीरकाननं समुद्रस्य
श्येति वाक्यान्तरवर्त्तिक्रियया सम्बन्ध इति द्वितीयश्लोकार्थः ॥ २ ॥ समान
येति । हे समानसखे याऽसमानया अविनयवतीनान्धुरिगणनीयया
अनयोः समान्नयासमानयायासः प्रयत्नो मानईर्ष्यारोषस्तौ समानौ यस्या
स्तया तथा सयानया चित्तानुस्मृतिसारूप्यम्भजमानया पूजासहितया अ
समानया अनुपमया सत्वं मामां समानय सङ्गमयेति मन्मथोन्माथाविष्ट
स्य कस्यचिद्वयस्य प्रार्थना ॥ ३ ॥ बन्धावृत्तिसामान्याद्यमकानन्तरं
श्लेषं लक्षयति । एकरूपेणेति । अर्थभेदेन शब्दाभिद्यन्त इति [illegible]
कथमेकेन वाक्येन द्वयोरुक्तिरित्यत आह । तन्त्रेणेति । श्लेषो हि [illegible]
दलक्षणः स चात्र भिन्नानामपि शब्दानामुच्चारणसाम्येन प्रवर्त्तते । [illegible]
नैकसम्बन्धानामैकरूप्येण वर्त्तनं तन्त्रमित्युच्यते ॥ १ ॥ द्वयोरिति [illegible]
नविवक्षिता । त्रिप्रभृतीनामपि श्लेषसम्भवात् । विभागवाक्ये [illegible]

तेषुप्रकृतिश्लेषोयथा। आत्मनश्चपरेषाञ्चप्रतापस्तवकीर्तिनुत् । भयकृद्भूपतेबाहुर्द्विषाञ्चसुहृदाञ्चते । अत्रकीर्तिनुदित्यत्रनौतिनुदत्योर्भयकृदित्यत्रकरोतिकृन्तत्योःप्रकृत्योःक्षिपितुल्यंरूपमितिप्रकृतिश्लेषोयम् ॥१॥लिङ्गश्लेषोपिप्रकृतिश्लेषएवतद्यथा। कुवलयदलद्युतासौदृग्राचवपुषाचकन्नदर्शयते। अधरीकृतप्रवालश्रियाङ्घ्रिणास्येनचनतभूः।अत्रदृग्वपुषोरास्यचरणयोश्चकुवलयद्युतेत्यधरीकृतप्रवालश्रियेतिच लिङ्गभेदेपितुल्यरूपेविशेषणेइति लिङ्गश्लेषोयम्॥२॥प्रत्ययश्लेषःसोद्भेदोनिरुद्भेदश्च। तयोराद्यो

नांसाक्षादुपादानात्प्रत्ययपदन्तदन्यपरं विशेषशोभाकरत्वच्छविशेषोपादानप्रयोजनम्॥२॥आत्मनःकीर्त्तिन्नौतिस्तौतीपरेषांशत्रूणाञ्चनुदतिक्षिपति द्विषाञ्चभयङ्करोतिजनयतिसुहृदाञ्चभिनत्तीतिधातुरूपप्रकृतिभेदादेवार्थभेदःक्षिप्रत्ययस्यसाधारण्यात्॥१॥ननुवर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानामितिकैश्चित्परिसङ्ख्यातन्तत्कथाष्टधाश्लेषोभविष्यतीत्यतआह ।। लिङ्गश्लेषोपीति । तदिदमुदाहरणीयमित्याह । सयथेति । दर्शयतहत्यात्मनेपदेनतटस्थमपिकर्तृरूढाहूर्शनायप्रेरयतितीव्यज्यते । अधरीकृताजिताऽधरत्वमापादितंच । ननुचकुवलयदलद्युतेतिअधरीकृतप्रवालश्रियेतिचप्रकृतिभागोनभिद्यते। तत्कथमयमप्रकृतिश्लेषइति । नैतत् । आविष्टलिङ्गद्वयविशेष्यलिङ्गद्वयसन्निधानादनाविष्टलिङ्गंविशेषणमवश्यमुभयलिङ्गग्राहिवाच्यम् । पञ्चकप्रातिपदिकार्थपक्षेविभक्तिर्द्वीतिकैव तथाच लिङ्गभेदइतिविभिन्नेविशेषणप्रकृतीसिद्धः संश्लिष्टेइति । अत्रेत्यादि॥२॥तद्वाक्यस्थशब्दान्तरप्रकाशितःसोद्भेदोतथाभूतोनिरुद्भेदः । सत्कधीर्येनिप्रत्यूहैर्न्न रत्नौहारिणी । अवश्यकार्यैर्यानिप्रत्ययेसहृदयान्मनोऽपहरतिहारिणीआनन्दघनरसचर्वणारूपोविस्मयो ऽद्भुतश्च।अभिन्नदेयविरोध

यथा । तस्याविनापिहारेणनिसर्गादेवहारिणौ । ज
नयामासतुःकस्यविस्मयन्नपयोधरौ । अत्रहारिणा
वितिइनिणिनिप्रत्यययोरेकरूपत्वाद्विनाऽपिहारेणे
तिचमत्वर्थीयोद्भेदात्सोद्भेदप्रत्ययश्लेषोयम् ॥ ३ ॥
द्वितीयोयथा।त्वदुद्धृतामयस्थानरूढव्रणकिणाकृतिः
विभातिहरिणीभूताशशिनोलाञ्छनच्छविः । अत्र
हरिणीभूतेतिच्वेर्ङीपश्चतुल्यरूपतातान्तदुद्भेदोना
स्तीत्यनुद्भेदःप्रत्ययश्लेषोयम् ॥४॥ विभक्तिश्लेषोद्वि
धा । भिन्नजातीययोरभिन्नजातीययोश्च । तयो
राद्योयथा । विषंनिजगलेयेनबभ्रेचभुजगप्रभुः ।
देहेयेनाङ्गजोदध्रेजायाचसजयत्यजः । अत्रयेनावि
षन्निजगले भुजगराजश्चनिजगलेबभ्रेऽङ्गजोदेहेजा
याचदेहेदध्रेइतितिङ्सुब्विभक्त्योः लिडात्मनेपदप्र
थमपुरुषैकवचनसप्तम्येकवचनान्तयोरेकरूपत्वाद्वि

द्योतकेनहारहीनयोरपिहारसम्बन्धोविस्मयरसार्पकइति मत्वर्थीयो
न्मुद्रणात्सोद्भेदः । प्रत्ययश्लेषस्तुकथम्भवतीत्यतआह । णिनिप्रत्य
ययोरिति॥३॥व्रणरूढिस्थानंश्यामम्भवतीतिलाञ्छनच्छायाभूताकीदृशी
हरिणीहरिता [वर्णादनुदात्तात्तोपधात्तोन] इतिङीपिनादेशेच
रूपम् । सेयम्प्रतीयमानगुणानोत्प्रेक्षा । अहरिणरूपापिव्यवहा
रारूढहरिणतामापन्नेति च्विप्रत्ययेचहरिणीभूतेरूपम् । अत्रङीपश्च्वे
र्वानकिञ्चिद्भेदकन्निबद्धमितिनिरुद्भेदःप्रत्ययश्लेषोयम्।हरितहरिण
रूपेप्रकृतीअपिसम्भिन्नेएव । संकरस्यादूषणत्वात् । एवम्पूर्वोदा
हरणेपि ॥४॥ निजगलइतिगिरतेःकर्मणिलिटिरूपम् । येनविषङ्काल
कूटाख्यन्निगीर्णन्निजेचगलेकण्ठेभुजगराजोधृतोदेहइतिदहतेस्तत्रैवरू
पम् । अङ्गजःकामोयेनदग्धःनिजेचदेहेशरीरेजायापार्वतीधृतासंज
यतीति ।विवरणग्रन्थःसुबोधएव॥५॥धातुर्जगन्निर्मातुरपिपूर्वइत्यनेन

भिन्नार्थकत्वाद्भिन्नजातीयसुप्तिङ्विभक्तिश्लेषोयम् ॥ ५॥ द्वितीयोयथा। त्वमेवधातुःपूर्वोसित्वमेवप्रत्ययः परः । अनाख्यातन्नतेकिञ्चिन्नाथकेनोपमीयसे । अत्रधातुरितिप्रथमान्तस्यषष्ठ्यन्तस्यचैकरूपत्वाद्भिन्नार्थकत्वाच्चाभिन्नजातीयसुब्विभक्तिश्लेषोयम्॥६॥ वचनश्लेषोद्विधा । सोद्भेदोनिरुद्भेदश्च । तयोः सोद्भेदोयथा॥ प्राज्यप्रभावःप्रभवोधर्मस्यास्तरजस्तमाः॥मुक्तात्मानःशिवंनेमिरन्येपिददतांजिनाः॥ अत्रनेमिरि त्यन्येपीति एकवचनबहुवचनाभ्यांददतामित्यत्रतिङन्तेप्राज्यप्रभावःप्रभवइत्यादिषुचसुबन्तेष्वेकवचनबहुवचनयोरुद्भेदइत्ययंसोद्भेदोनामवचनश्लेषः ॥ ७ ॥ निरुद्भेदोयथा । तत्वरमणीयस्यमध्यस्यचभुजस्यच । अभवन्नितरान्तस्यावलयःकान्तिवृद्धये । अत्राभवन्नितिवलयइतिपद

नादित्वमुक्तम् । परःप्रत्ययःकारणत्रयरूपन्नकिञ्चिदनाख्यातम् । श्रुतिस्मृतीतिहासपुराणेषुप्रसिद्धावदानत्वात् ।द्वितीयस्याभावान्नकेनचिदुपमानम् ।अर्थान्तरेतुधातुःक्रियावचनशब्दरूपःपूर्वएवप्रकृतित्वात्ततःपरःप्रत्ययःतिङादिरतःसर्वमाख्यातमेवपदन्निष्पद्यतेतेनचकथमुपमानहितिङन्तेनोपमानमस्तिभिन्नार्थत्वाच्चेतिशब्दभेददृढीकरणार्थमुक्तम् । एवन्तिङामपिसम्भेदउदाहरणीयोयथा । माद्यन्तुनामकवयस्तथापिविदितश्रमाः॥वेदविद्यापतिर्वाचामहंवाचो रिवान्तरम् । अत्रवेदेतिप्रथमोत्तमयोःपुरुषयोरेकवचनेश्लिष्येते॥६॥अत्रनेमिरिति । एकवचनबहुवचनाभ्यांविशेषणेषुसम्बन्धयोग्यताक्षेपात्तिङ्वचनेषुसुब्वचनेषुचयथायथमर्थद्वयोन्मीलनाच्छब्दरूपद्वयोद्भेदः । एकवचनेनवलयःकङ्कणम्बहुवचनेनचमध्यरेखाइतिसुबन्तपदे । एतदौचित्येति

योस्तिङन्तसुबन्तयोरेकवचनबहुवचने अनुद्भिन्ने ए
वष्यिंतेइत्ययश्लन्निरुद्भेदोनामवचनश्लेषः ॥ ८ ॥
पदश्लेषोयथा । अरिमेदःपलाशश्चबाहुःकल्पद्रुमश्च
ते । बलेवोद्यानमालेयंसालकाननशोभिनी । अत्र
प्रकृतिप्रत्ययविभक्तिवचनानाम्पृथगभिधानादभि
धानमालोक्तानिप्रातिपदिकान्येवपदशब्देनोच्यन्ते।
तेनपूर्वार्द्धेशत्रुमेदोमांसादस्तेबाहुरित्यर्थेनारिमेदप
लाशाख्यवृक्षनाम्नीश्लिष्येते । उत्तरार्द्धेचसालाना
ङ्काननेनशोभतेइत्येवंशीलेयमुद्यानमालेवद्यर्थेनसा
लकेनाननेनशोभत इत्येवंशीलाबालेत्युपमानार्थः
श्लिष्यते। सएषपदश्लेषोनमशब्दश्लेषः ॥ ९ ॥ वर्णश्ले
षोपिपदश्लेषएव । सयथा । त्वमेवदेवपातालमा
शानात्वन्निबन्धनम् । त्वञ्चामरमरुद्भूमिरेकोलो

ङन्तपदेचाभवन्निति वचनद्वयलाभः । नचानयोःकिञ्चिदुद्भेदकत्विबद्ध
मितिनिरुद्भेदोऽयन्तदेतदाह । अत्रेत्यादि॥७॥८॥अरीणाम्मेदःशरीरधा
तुभेदःपलम्मांसमश्नातियःसतथाचकारउत्तरवाक्यापेक्षया । अरिमे
दोविट्खदिरःपलाशःकिंशुकः सालास्तरुविशेषास्तेषाङ्काननमलकाश्चू
र्णकुन्तलाःसत्सहितमाननञ्च । पूर्वोत्तरार्द्धयोर्नैकवाक्यत्वमुदाहरण
त्वात् । ननुविभक्त्यन्तान्नान्यत्पदन्तत्रपूर्वभागेनप्रकृतिश्लेषउत्तरभा
गेनचप्रत्ययश्लेषउद्दिष्टएवतत्कोन्यःपदश्लेषइत्यतआह । अत्रेति ।
प्रकृतिप्रत्ययभावविवक्षाविरहेनाममालोक्तानि प्रातिपदिकान्येवाव
शिष्यन्तइत्यर्थः ॥९॥ "अलङ्कारःशङ्काकरनरकपालम्परिजनोविशीर्णा
ङ्गोभृङ्गोवसुचवृषएकोयहुवयाः । अवस्थेयंस्थाणोरपिभवतिसर्वामर
गुरोर्विधौवक्रेमूर्ध्निस्थितवतिवयंकेपुनरमी । इतिवर्णश्लेषःकाश्मीर
कैःपृथगुदाहृतअतआह । वर्णश्लेषोपीति । अवयवाभेदेसमुदाय
भेदासम्भवादवयवभेदेचसमुदायभेदध्रौव्यात्पदश्लेषव्यवस्थितौ तत्रैवा

कत्रयात्मकः । अत्रत्वमेवपातालमित्यकारःपाश्चात्येत्वञ्चश्रमर मरुद्भूमिरिति चकारःपौरस्त्येक्षरेश्लिष्टःपातालाञ्चामरेइतिचपदंरचयति । सोयंपदश्लेषएववर्णश्लेषइत्युच्यते॥१०॥भाषाश्लेषोयथा। कुरुलालसभूलेहेमहिमोहहरेतुहारिविच्छिन्ने । हरिणारिसारदेहेवरेवरंहरउमेभावम्। अत्रध्यानानीताञ्चरुद्राणीङ्गातांञ्चपुरतःस्थिताम् । रणेच्छुःकश्चिदानर्चदिव्यप्राकृतयागिरा। तत्ररुद्राणीपक्षे। हेउमेहरेभवेवरंश्रेष्ठम्भावङ्कुरु किम्भूते। लालसभूलेहेलालसभूःकामस्तंलेढियस्तस्मिन्तथामहिम्नाप्रभावेणोहंवितर्कमपहरतियस्तस्मिन्महिमोहहरेमहेश्वरसन्निधौहिसर्वज्ञाभिभवङ्गतिश्रूयते । अतएवतोहन्तिअर्द्दयन्तिअरयस्तैर्विच्छिन्नेविरहिते। अपरमप्यरीणां

स्यन्तर्भावोयुक्तइतिभावः । अलमत्यर्थम्यातारक्षिता आशानान्मिथ्यनन्मनोरथसफलीकरणबीजमाशानान्दिशां संश्लेषस्थानञ्चामरमरुद्भूमिः स्वर्लोकोऽमराणामिन्द्रादीनाम्भूमिरमरावत्यादिर्मरुताञ्चवियद्वादीनाम्भूतिर्वैमानिकपथश्चामरमरुद्भूमिश्चामरभवनमरुतामाश्रयश्च । कथमत्रवर्णश्लेषइत्यत्आह । अत्रेत्यादि । पतिचण्डिन्यालालज्इतिपतेरालप्रत्ययेपातालमितिरूपंसिद्धावाकारएवमध्यवर्त्तिवर्णलत्रैवपुनरेकदेशप्रतिसन्धानेपातालमित्याकारश्च प्रतीयते । अत्रचैकः पूर्वपरयोरितिवचनादाकारएव श्रूयतेतेनोत्तरः पौरस्त्येनसंभिन्नः। एवञ्चकारस्योत्तरसम्भेदोव्याख्येयः॥१०॥दिव्यासंस्कृत्रिमाप्राकृतामहाराष्ट्री भावश्चेतसोलयोलालसइच्छा तस्माद्भवतीतिलालसभूःसङ्कल्पयोर्नेत्वात्कामस्तंलेढीतिकर्मण्यण् । ऊहस्तर्कःसंशयपृष्टभावीविपरीतप्रत्ययविशेषः । कथन्तंहरतीत्यतआह । महेश्वरसन्निधावितिं । सन्निधिःसाक्षात्काररूपःसर्वज्ञानानिसंस्कारप्रवर्त्तकानि ।

विच्छेदकारणमाह। हरिणारिसारदेहे। हरिणारिःसिं
हस्तस्यसारोबलंसदेहेयस्यतस्मिन्वरेपरिणेतरीति।
उमायाएवव इमानिसम्बोधनविशेषणानि। कान्ता
पक्षेतु। हेकान्तेतवयोयंहरिनार्याःश्रियाःसारउत्कृ
ष्टोदेहस्तत्रयद्वरंश्रेष्ठं विलोचनाननस्तनजघनादित
न्मेभावमभिलाषंहरतुकामान्पूरयत्वित्यर्थः। किम्भू
तेदेहेकुटिलालसभ्रूलेखेमहिमोहहरे गृहेहारिणिवि
च्छिन्नेचतनुमध्यत्वादिभिरिति॥११॥यथावा। रुचि
रञ्चितारिहेतिञ्जननमितसामकायमकलङ्कम्। सत्त
ममितञ्चमानयकमलासनमभिविराजन्तम्। भूतसं
स्कृतभाषाभ्यांद्विर्नमस्कृत्यमाधवम्। जगामसमरङ्को
पिकस्यश्रेयसितृप्तयः। तत्रभूतभाषायांयथा। रुचिरम्म
नोहरञ्जितारिहेतिम्भग्नसपत्नायुधं जनैर्नमितंश्या

तुहिर्अर्द्दनेतोहतीतिइगुपधत्वात्कप्रत्यये तुहा अरयोद्विधाआन्त
राबाह्याश्च। आन्तरामदमानादयःषट्। बाह्याःक्षेत्रापहारकादयः।
तत्रपूर्वावच्छेदेचहरिणारिसारदेहत्वंहेतुरुक्तोहरिणारिसारइवसारो
यस्येत्युत्तरपदलोपेहरिणारिसारोदेहोयस्येतिविग्रहवाक्यमवसेयम्।
यथाश्रुत्यर्थं कथनमात्रमुमायाएवेत्यत्रलालसभूलेह इत्यच्प्रत्ययेव्या
ख्येयम्। तुशब्दस्तवार्थे। [तुतुवतुम्हतुब्भतुझाङस] इतिसूत्रणात्।
हरिनारीलक्ष्मीस्तस्याःसकाशात्सारःप्रकर्षशालीदेहः। पञ्चमीति यो
गविभागात्समासः। कुरुलाश्चूर्णकुन्तलाः। महीशब्देनभूगोलवर्त्ति
नःप्राणिनोभिमतासोयाम्मोहगृहइतिव्याख्येयम् विच्छिन्नोविभक्ताव
यवः॥११॥एवम्पैशाचादिभिरपिसंस्कृतस्यप्राकृतादेश्चपरस्परसम्भेदना
च्श्लेषोगवेषणीयइत्याशयवानाह। यथावेति। अकलङ्कन्दोषरहित
म्मानयेतिधात्वर्थस्यभाव्यत्वेनान्वयात्पूजाङ्कुर्वित्यर्थः। ब्रह्माणमभि
लक्षीकृत्येति। रुचयआत्मीयाअराविद्यन्तेयस्यतदरिचक्रंहेतयःकि

मकायमकलङ्कतरूपममितमनन्तञ्चसमुच्चये । कम
लासनम्ब्रह्माणमभिलक्षी कृत्यविराजन्तंशोभमान
म्मानयपूजयेति। संस्कृतभाषायांयथा। रुचिभीरञ्जि
ताहेतयश्चक्रेदीप्रयोयेनतंजननैर्दशभिरवतारैर्मितम्
परिच्छिन्नंसामानिकायतिगायतियःससामकायस्तं
नविद्यते कलायस्यसोकलस्तङ्कंसन्तम्ब्रह्माणंसन्तमं
विष्णुमितङ्कतमभिविराजन्तङ्कुत्मन्तमभिमन्तन्त
म्प्रसिद्धङ्कमलासनंश्रियासंसक्तम्मानयमाम्प्रापयेति॥
१२॥आवृत्तिर्यातुवर्णानान्नातिदूरान्तरस्थिता।अल
ङ्कारःसविद्वद्भिरनुप्रासःप्रदर्श्यते ॥ १ ॥ श्रुतिभिर्वृत्ति
भिर्वर्णैःपदैर्नामद्विरुक्तिभिः । लाटानामुक्तिभिश्चायं
षट्प्रकारःप्रकाशते ॥ २ ॥ प्रायेणश्रुत्यनुप्रासस्तेश्वनु

रणाजननज्ञन्म सामानिकायतिकीर्त्तयतीति अपवादविषयेकांचदु
रवगैःप्रयर्त्ततदृतिकर्मण्यण् । कलाश्रययवाःप्रसिद्धौ । श्रीनाम्पक्षिणां
राजागरुडस्तमभिहृतङ्कतङ्कमलालन्मीस्तस्या आसनमधिष्ठानम्मामा
त्मयेति ॥ अनुङ्कटावृत्तेश्चात्रादुङ्कटावृत्तिमनुप्रासंम्पूर्वंलक्षयति । आ
वृत्तिरिति । वर्णानामिति । यचनमतन्त्रम् । सारःसारस्वतीमूर्त्तिरि
त्यादावेकवर्णावृत्तेरप्यनुप्रासत्वात् । तेनयमकश्रुतिरिक्तावर्णावृत्ति
रनुप्रासइतिलक्षणमुक्तम्भवति । नचश्लेषेतिप्रसङ्गः । सञ्ज्ञान्यांविशे
षात् । पूर्वंजातिप्रतिबिम्बनेनवन्ध्यच्छायार्थंकतयानुप्रासोलङ्कारपद
वीम्प्राप्तस्ते । नचनिर्निमित्तमेवप्रतिबिम्बनमतआह । नातिदूरेति ।
श्रुत्यैकद्विदुश्चरणस्य ज्ञानस्यवाविशेषोयःशीघ्रमेवसंस्कारमुद्बोधय
तीतिद्वितीयवर्णावृत्तिरभिप्रेता । अतएवप्राचीनवर्णजात्यनुगतःसङ्ग
दयावर्जंकतयाप्रकृष्टश्चवर्णानामनुप्रासइतिकाश्मीरिकानिरुक्तिः ॥१॥
एवंस्थितेसामान्यलक्षणविभागमाह । श्रुतिभिरिति । आवृत्तिर्द्विधा ।
वर्णमात्रावलम्बिनी समुदायगोचराच । आद्यापिद्वयी । सामान्य

प्रासनायकः । सनाथैवहिवैदर्भीभातितेनविचित्रिता ॥ ३ ॥ निवेशयतिवाग्देवीप्रतिभानवतःकवेः । पुण्यैरमुमनुप्रासंससमाधिनिचेतसि ॥ ४ ॥ सत्रिधा । ग्राम्योनागरउपनागरश्च । तेषुग्राम्यश्चतुर्धा । मसृणोवर्णमसृणोवर्णोत्कटोवर्णानुत्कटश्च । तेषाम्मसृणोयथा । एषराजादयालक्ष्मीप्राप्तवान्ब्राह्मणप्रियः । तदाप्रभृतिधर्मस्यलोकेस्मिन्नुत्सवोभवत् । अत्रस्थानतःसमानश्रुतीनाम्मूर्द्धन्यतालव्यदन्त्यौष्ठ्यकण्ठ्यव

तोरूपतश्च । सामान्यमपिद्विधा । स्थानतोव्यापारतश्च । तत्रस्थानङ्कण्ठादिलक्षणंसैवश्रुतिः । श्रूयतेहितयाभिव्यक्तोवर्णोव्यापारोभिव्यञ्जनरूपःसएवरसविषयेवर्त्तनंवृत्तिरुच्यते । श्रुतिभिरित्यादौ [इत्थम्भूतलक्षणे] तृतीया प्रायेणेति॥२॥श्रुत्यनुप्रासोहिश्लेषघटकः श्लेषश्चगुणान्तरसमकक्षतयाऽवतिष्ठमानोवैदर्भीम्प्रयोजयति । अनुप्रासान्तरन्तुप्रौढंवामाधुर्यंवाप्रकर्षयतीति नतथानुकूल्यङ्कविशक्तिवशात्तुक्वचित्तदपिप्रयोजयतीतिप्रायपदेनसूचितम् । स्थितिप्रयोजकोलोकेनाथइत्युच्यतेतेषुनायकइत्येववक्तव्येपुनरनुप्रासपदमनुप्रासान्तरसाधारण्येनैवशब्दालङ्कारत्वंदर्शयितुमभिसमाधेयम् । विचित्रिताआलेख्यमिवलेखयाचमत्कारकारित्वमानीता॥३॥कथम्पुनरस्यानुप्रासस्यपृथक्प्रयत्नानुसन्धेयस्यापिरसप्रकाशसामग्र्यामन्तर्भावइत्यतआह । निवेशयतीति । अक्लिष्टपदवाक्यार्थस्फुरणम्प्रतिभानन्तदेवकथमित्यतआह । ससमाधिनीति । पुण्यैरिति । तेनरसवत्त्वव्यवस्थितस्यकवेरहम्पूर्विकाकृष्टोनुप्रासोनपृथक्प्रयत्ननिर्वर्त्यइतितात्पर्यम् । ग्राम्यादिभेदोग्रेविवरिष्यते ॥ ४ ॥ एकपदप्रतिभासमात्रानुमेयोमसृणः । रूपसाजात्येपिमसृणतान्यम्भूतोवर्णमसृणः । उद्भटरूपसाजात्यानुविद्धोवर्णोत्कटः । अनुद्भटसाजात्यानुरोधेनकिञ्चिदभिभूतमसृणभावोवर्णानुत्कटः । एषराजेत्यादावुदाहरणेषकाररेफौमूर्द्धन्यौ । जकारय

र्णानाम्प्रथमतृतीयपादयोर्निरन्तराद्वितीयचतुर्थयो
श्चसान्तरापाठ इवस्वग्दाम्नीवर्णप्रदानान्मसृणैवा
वृत्तिः । सोयंश्रुत्यनुप्रासोमसृणइत्युच्यते ॥१॥ वर्ण
मसृणोयथा । स्थिताःक्षणम्पक्ष्मसुताडिताधराःप
योधरोत्सेधनिपातचूर्णिताः । वलीषुतस्याःस्खलि
ताःप्रपेदिरेचिरेणनाभिम्प्रथमोदविन्दवः । अत्रद
न्त्यौमूर्द्धन्यावोष्ठ्यौ डलोरैक्येनदन्त्यपञ्चकम्मूर्द्धन्य
इत्यादिनाक्रमेणयद्यपिपूर्ववत्स्थानतःसमानश्रुति
तयामसृणैवावृत्तिस्तथापिचित्रपटइवमाल्यग्रथनइ
वायोयंक्षणम्पक्ष्मसुताडिताधराःपयोधरोवलीस्ख
लिताःप्रपेदिरेचिरेणनाभिम्प्रथमोदविन्दवइतिना
नावर्णात्मकःसूत्रान्तरस्येवपुष्पान्तरस्येववास्थानभे
देनमसृणमेवनिवेशस्तेनैषश्रुत्यनुप्रासो वर्णमसृणइ
त्युच्यते ॥ २॥ वर्णोत्कटोयथा । विमुच्यसाहारमहा

कारौतालश्चौदकारलकारौदन्त्याविति प्रथमपादे तकारदकारौद
न्त्यौपकारभकारावोष्ठ्यौतकारधकारौदन्त्याविति तृतीयपादेचनिर
न्तरद्वितीयपादेरेफणकारौमूर्द्धन्यौ चतुर्थपादेलकारसकारौदन्त्यादि
विनाक्रमेणसान्तरमावर्त्तनन्नवरूपसाजात्यङ् क्वचिदुल्लिखतीतिमस
णस्यायम्॥१॥अचित्रतन्तुमयःपटः।एकजातीयकुसुमग्रथनात्प्राक्स्थि
ताइत्यादि । अत्रयकारतकारौदन्त्यौ। षकारणकारौमूर्द्धन्यौ । पका
रमकारावोष्ठ्यौ । ताश्चितेत्यत्रञ्कारेलकारकल्पनया । सनलतथाः
पञ्चदन्त्याश्च रेफोमूर्द्धन्य इतिप्रथमपादे । द्वितीयपादेचथकारस
कारौनकारतकारौदन्त्यावित्यादिनाक्रमेणसान्तरानिरन्तराचश्रुतित
स्थयवर्णावृत्तिःपूर्ववदुपलभ्यते । किन्तुतकारादीनांरूपतोपिस्थाने
स्थानेपूर्वमसृणतान्यग्भूतैवावृत्तिस्तेनायंवर्णमसृणःश्रुतिसाजात्यञ्च
नक्वचिद्घटते । अत्रैवनिदर्शनद्वयम् । विमुच्येति । हारोचितसन्नि

र्यनिश्चयाविलोलदृष्टिः प्रविलुप्तचन्दना । बबन्धबा
लारुणबभ्रुवल्कलम्पयोधरोत्सेधविशीर्णसंहति। अ
त्रसर्वम्पूर्ववत्किन्तु तृतीयपादेबबन्धबालारुणबभ्रु
वल्कलमितिवर्णाधिक्ययोगः । सोयंवर्णोत्कटोना
मश्रुत्यनुप्रासः ॥ ३ ॥ वर्णानुत्कटोयथा । ततःप्र
भृत्युन्मदनापितुर्गृहेललाटिकाचन्दनधूसरालका ।
नजातुबालालभतेस्मनिर्वृतिन्तुषारसङ्घातशिला
तलेष्वपि । अत्रदन्त्यवर्णप्रायतयातिमसृणत्वेशि
लातलेष्वितिदन्त्यवर्णाभ्यामेववर्णस्तोमोदत्तःसोयं
वर्णानुत्कटोनामश्रुत्यनुप्रासः । तेमीचत्वारोप्यति
प्रसिद्धतयाग्राम्याउच्यन्ते ॥ ४ ॥ ग्राम्यवैपरीत्ये
ननातिप्रसिद्धोनागरः । यथोच्यते । एकत्वबुद्धि

वेशयोरपिस्तनयोरनुचितवल्कलबन्धसंभावनेहेतुरहार्यनिश्चयेति ।
अतएवमामाङ्कोपिवारयेदितिकातरताप्रादुर्भावादितस्ततोविलोलदृ
ष्टिः। अत्रभकारमकारावोष्ठ्यौ। चकारयकारौतालव्यावित्यादिनाक्र
मेणमसृणाहकारादीनां रूपसाजात्येपिमसृणताप्राधान्याद्वर्णमसृणा
चावृत्तिरित्याह । अत्रसर्वमिति । वर्णोत्कटत्वंव्याचष्टे । वर्णाधि
क्ययोगइति । उद्भटंहिरूपसाजात्यंवर्णोत्कटत्वम् । तच्चसरूपवर्णा
वृत्त्याधिक्येनेतीत्यर्थः ॥३॥ ततःप्रभृतीति । तापोद्रेकाद्दत्तन्दत्तमेवच
न्दनमाश्यामभावेनरेणुभिरलकच्छटासुविशीर्यतइति द्वितीयकामावे
शीध्वनितः । अत्रतकारनकारौदकारनकारावित्यादिनाक्रमेणश्लोक
समाप्तिंयावद्बहवोदन्त्यास्तेनैकश्रुतिव्याप्तस्य सन्दर्भस्यमसृणतायाम
तिशयः । शिलातलेति रूपसाजात्येनलकारावुद्भूतश्रुतिकौनचाधि
कावृत्तिरत्रास्तीत्यनुत्कटता । नचश्रुतेरुद्भवेपिमसृणतानप्रकृष्यत
इतिवर्णानुत्कटोयम् । ग्राम्यत्वंव्याचष्टे । तेमीचत्वारोपीति । श्रु
तिसाजात्यस्यशब्दानुशासनेपिप्रसिद्धेरतिप्रसिद्धत्वम्॥५॥ ग्राम्यवैपरी

र्भेदेपितत्वेप्येकत्वनिह्नवः । यस्यवर्णस्यतंप्राहुरनु
प्रासस्यजीवितम् । तत्रभेदेप्येकत्वबुध्यासमानस्था
नयोर्यथा । हरेर्लङ्घितघर्मांशुव्योम्निदीर्घेणरंहसा ।
बलिबन्धनघोरोङ्घ्रिरंहःसङ्घन्निहन्तुवः । अत्रह
कारस्यतुल्यस्यातुल्यस्यानेनधकारेणसहभेदेप्येकत्व
बुद्धेस्तुल्यश्रुतित्वमितिभेदेप्येकत्वबुध्यानागरानुप्रा
सोयम् ॥ ५ ॥ तथैवासमानस्थानयोर्यथा । उच्छ
लन्मत्स्यपुच्छाग्रदण्डपाताहताम्भसि । जगदुद्या
नमम्भोधावुन्ममज्जममज्जच । अत्रोच्छलन्मत्स्य
पुच्छाग्रेत्यत्रच्छकारयोरिवत्स्यकारस्यापितुल्यश्रुति
त्वमित्तिअसमानस्थानत्वेनभेदेप्येकत्वबुध्यानाग
रानुप्रासोयम् ॥६॥ तत्वेप्येकनिह्नवेनडकारवकारय

स्येनेति । ग्राम्यविरुद्धस्वभावोहिलोकेनागरइत्युच्यते । अतिप्रसि
द्धेरभावोविरोधस्तेनालङ्कारसमयोपजीविपञ्चषप्रसिद्धिरनतिप्रसिद्धि
रित्युक्तम्भवति । एतदेवपूर्वाचार्यमतेनविशदयति । यथोच्यतइति ।
एकश्रुतिकतयाभानंहिश्रुतिसाजात्यमभिमतम् । श्रुतिश्चवास्तवीप्र
तिपादनमात्रारूढावेति नकश्चिद्विशेषस्ततोभेदेप्येकत्व बुध्यानुप्रास
सिद्धिः ॥ तत्त्वेएकत्वे । आपाततःसाजात्यानवभासेपिसहृदयप्रणि
धानेनावभासनंश्रुत्यनुप्रासप्रयोजकमेव । अनुप्रासस्य । अनुप्रास
वतःसन्दर्भस्येत्यर्थः । विजातीययोरेकजात्यप्रतिबिम्बनन्द्विधाभव
ति । स्थानसाम्येतदसाम्येचतयोराद्यमुदाहरति । तत्रेति । दीर्घेण
रंहसेति । घोरोङ्घ्रिरिति । रंहःसङ्घमितिघकारहकाराणांस्थान
साम्येपिवैजात्यमस्त्येव । तथापठितौतुल्यवच्छ्रुतिःप्रतिभातीतिसह
दयहृदयसाक्षिकोयमर्थः॥५॥ अत्रत्स्यच्छकारयोरिति । चच्छौतालव्यौ
तसौदन्त्याविति स्थानभेदःप्रकाशएव । तथापिपिण्डीभूतास्वान्त
स्तम्बीभूतमध्यपतितौ तसौसमानश्रुतिकाविति पठितौ सौभाग्यमर्थ

कारणांयथा । क्रोडमाडिम्भमादायचण्डपीड्यव
क्षसा । कर्णब्रूहित्रयस्यायायुचायदयमुच्यते । अ
त्रडकारादीनामीषत्स्पृष्टतादिभिरेकत्वेपि भेदाव
भासइतितत्वेप्येकत्वनिह्नवेननागरानुप्रासोयम्॥७॥
तथैवढकारवकारलकाराणांयथा । नवोढेत्वंकुचा
ढ्यापिनोपगूढायढौकसे । वहन्व्याहुलतेहीणोवरःपु
लकलङ्घिते । अत्रढकारादीनामीषत्स्पृष्टतादिभी
रेकत्वेपिभेदावभासइति तत्वेप्येकत्वनिह्नवेननाग
रानुप्रासोयम् ॥ ८ ॥ उभयगुणयोगान्नाप्रसिद्धउप
नागरः।यथोच्यते॥ डलयोरैक्यमित्यादिवाक्यैर्यस्या
नुमीयते। समानश्रुतितान्योन्यंसोनुप्रासःप्रशस्यते॥
सडलयोरैक्येनयथा । शयनेयस्यशेषाहिःसनीडेवड

यतस्तेनायमसमानस्थानयोरेकत्वबुद्ध्यानागरानुप्रासइति ॥६॥ तत्वे
पीति। द्रुतादौवृत्तिमात्रम्भिद्यतेनतुरूपमितिमहाभाष्यकारोक्तदिशा
येषामेकस्थानत्वेपीषत्स्पृष्टतरत्वादिकृताभेदप्रथातेडकारादयः कति
पयेस्यविषयास्तानुद्दिश्यक्रमेणोदाहरति । क्रोडइत्यादि । अङ्कगत
स्यबालकस्ययत्तसापीडनंसङ्क्रान्तकनालिङ्गनसामनन्ति । अनेनकि
लप्रच्छन्नप्रियगोचरोगाढालिङ्गनमनोरथःप्रकटितोभवति । कर्णयो
रूपांशुयदभिधीयतेतेनतुल्यमिदमिति विदग्धसहचरीपरिहासोक्ति
रियम् । अत्रचक्रोडडिम्भेत्यादौडकारवकारयकाराणामीषत्स्पृष्टतर
त्वादिभेदःश्रुतिसाजात्यच्चसुप्रसिद्धमेवेति ॥ ७ ॥ ढकारवकारलका
राणामिति । वकारोदाहरणन्दत्तमपिवर्णान्तरसरलतयापुनर्हीयते।
उपगूढाश्लिङ्गनम् । अपिशब्दोभिन्नक्रमः । उपगूढायापिनढौकसे
दूरेपततः कचग्रहादिकेलिषुप्रवृत्तिर्लङ्घनेनसर्वाङ्गीणः पुलकोद्भेदोव
ह्निर्व्यावर्त्तनमन्तरनुवर्त्तनञ्चमुग्धाङ्गनाजातिः । अत्रापिढकारादीना
मीषत्स्पृष्टतादिभेदःसुबोधएव ॥८॥ उभयगुणयोगादिति । प्रसिद्ध

वानलः । सहासाहसिनामग्रन्तमीडेजडशाचिन
म् । सोयमुपनागरःश्रुत्यनुप्रासः॥९॥ णयोरैक्येन
यथा । बाणैःक्षुण्णेषुसैन्येषुत्वयादेवरणाङ्गणे।हत
शेषाःशयन्तीमेशून्यारण्यानिविद्विषः॥अत्रक्षुण्णेषु
सैन्येषुशून्यारण्यानीतिनकारणकायोःस्वल्पश्रुतित्व
मेकत्वंवाभासतइतिउपनागरोयंश्रुत्यनुप्रासः ॥१०॥
रलयोरैक्येनयथा।विभिन्नवर्णागरुडाग्रजेनसूर्यस्यर
थ्याःपरितःस्फुरन्त्या।रत्नैःपुनर्यत्ररुचारुचंस्वामानि
न्यिरेवंशकरीरनीलैः॥ अत्रकरीरनीलैरितिरेफलकार
योरैक्येनतुल्यश्रुत्याचतुर्ष्वपिपादेष्वनुप्रासनिर्वहणमि
त्युपनागरोयंश्रुत्यनुप्रासः॥११॥ दन्त्यतालव्यानामै
क्येनयथा। विद्यास्यन्दोवाग्विदांयःप्रसन्नःपुण्यांवा

सिद्धीद्वौगुणौ । प्रत्यक्षानुमानरूपोपायभेदादविरोधस्तदेतदन्यम
तेनविवृणोति । डलयोरैक्यमिति । सनीडःसमीपज्जलमज्जनशेषाहि
वडवानलानामनर्थनिदानतयाप्रख्यातानामपिसेवयामहासाहसिका
नामग्र्यता । अत्रडकारलकारयोर्भिन्नश्रुतिताप्रत्यक्षतएव । श्रुति
साम्यस्पुनरनुमानात् प्रतीयते । एवमुत्तरोदाहरणेष्वपिबोद्धव्यम् ॥९॥
क्षुण्णेषुसैन्येष्विति । ग्रन्थिमहिम्नानकारणकारयोःसाम्यप्रतिभासः ।
रणाङ्गणइति । मध्यवर्तिनांसंयोगेनसाम्योन्मुद्गणम् । अङ्गणशब्दो
धिकरणल्युडन्तः । पृषोदरादित्वाद्रणत्वव्युत्पादनमनार्षम् । एवंशून्या
रण्यानीत्यत्रव्याख्येयम् । आद्यन्तव्याख्यानमुपलक्षणमवसेयम् ॥१०॥
निरन्तरेफग्रथनालीढस्येवलकारस्यश्रुतिसाजात्यमुल्लिखतीतितदि
दमाह । अत्रकरीरनीलैरिति । एतदनुप्रासस्यिचातुर्ष्वपिपादेषुरे
फानुप्रासनिर्वहणमपि कविशक्तिव्युत्पत्तिव्यञ्जकमुपपत्तिमवतीति
त्याह । चतुर्ष्वपीति ॥११॥ विद्यास्यन्दःसारस्वतप्रवाहःसैवबारदेवता
शब्दब्रह्मरूपातच्चिन्तयापरब्रह्माधिगमनिःश्रेणीभूतया । शोकस्यइ

चन्देवतान्तानमामः । यामब्रह्माणःश्रिन्तयन्तेवि
शोकाःसानोदेयाःसूनृतासूनृतानि । अत्रदन्त्यता
लव्यानामैक्येनतुल्यश्रुतिनत्युपनागरोयंश्रुत्यानुप्रा
सः । सर्वेपिचानुप्रासाःप्रायेणविसदृशवर्णान्तरिता
एवस्वदन्ते इत्यौष्ठ्यकण्ठ्यादीनामिहानुप्रवेशोभव
ति ॥१२॥ यथाज्योत्स्नाचन्द्रमसंयथालावण्यमङ्गना
म् । अनुप्रासस्तथाकाव्यमलङ्कर्त्तुमयंक्षमः ॥ १ ॥
अनुप्रासःकविगिरामपदवर्णमयोपियः । सोप्यने
नस्तवकितःश्रियङ्कामपिपुष्यति ॥ २ ॥ मुहुरावर्त्य
मानेषुयःस्ववर्ग्येषुवर्त्तते । काव्यव्यापीससन्दर्भोवृ
त्तिरित्यभिधीयते ॥ ३॥ कार्णाटीकौन्तलीकौङ्कीको

ष्टहानिजखेदस्यविच्छेदः । अत्रस्यन्दःप्रसन्नइतिदन्त्यौसकारौब्रह्मा
णश्चेतयन्तोविशोकाइत्यादेशानादेशौशकारौतालव्यौ । पुमरन्तेसासू
नृतानीतित्रयोदन्त्याः सर्वेषांसम्भूयपाठे तुल्यश्रुतितैवप्रतिभासतइ
ति । ननुसजातीयानामिरन्तरमावापेक्षर्त्तव्येकिमितिविजातीयव्यव
हितैरावृत्तिरुदाहृियतइतिअतआह । सर्वेचेति ॥१२॥ श्लेषनिर्वाहकत
याश्रुत्यनुप्रासोलङ्कारइत्युक्तन्तच्चसन्दर्भव्यापकतयैवनिर्वहतीत्याह।
अथेति । ज्योत्स्नालावण्ययोःसर्वाङ्गीणाश्लेषसुभगयोरेवालङ्कारतापूर्ति
रिः ॥१॥ नन्वेवमनुप्रासान्तरविषयेपिश्रुत्यनुप्रासःप्रसक्तस्तत्रचकिम
नेनकरिष्यतइत्यतआह । अनुप्रासःकविगिरामिति । उक्तंहि "लघट
लाश्लरेणकाव्यभावः । नचकाव्यमपहायवर्णानुप्रासादीनामात्मला
भ,,इति ॥२॥ स्ववर्ग्येष्विति । स्वशब्दआत्मीयवचनः स्ववर्गेभवाःस्ववर्ग्याः
कचटतपान्तस्थोष्मोपलक्षिताःसप्तवर्गाःस्ववर्ग्येषुवर्त्ततइत्यर्थेक
थनम् । साणिक्यस्तवकितहारलतावदन्योन्यालम्बनेनपरभागलाभइ
त्यभिप्रायतयाचकाव्यव्यापकेनैवसन्दर्भेण निरूप्यमाणावर्ण्यावृत्तिर्वृ
त्त्यनुप्रासइतिपर्यवसितोर्थः । वर्णानुप्रासाङ्गेदोवक्ष्यते ॥३॥ कार्णाटी

ङ्कणीबाणवासिका । द्राविडीमाथुरीमात्सीमागधी ताम्रलिप्तिका ॥ ४ ॥ औण्ड्रीपौण्ड्रीतिविद्वद्भिः सा द्वादशविधेष्यते । अथलक्षणमेतासांसोदाहरणमुच्यते ॥ ५ ॥ तासुवर्णान्प्रासवतीकार्णाटीयथा । कान्तेकुटिलमालोक्यकर्णेकण्डूयनेनकिम् । कामङ्कथयकल्याणिकिङ्करःकरवाणिकिम्॥१॥चवर्गान्प्रासवतीकौन्तलीयथा । ज्वलज्जटिलदीप्तार्चिरज्जनोच्चयचारवः । चम्पकेषुचकोराक्षिचञ्चरीकाश्चकासति॥२॥ टवर्गान्प्रासवतीकौङ्कीयथा। कुम्भकूटाहकुहाककुटिलोत्कटपाणिरुट् । हरिःकरटिपेटेननद्रष्टुमपिचेष्टते॥३॥तवर्गान्प्रासवतीकौङ्कणीयथा । मधुर्मधूनिगान्धर्वमन्दिरम्मदिरेक्षणा । इन्दुरैन्दीवरन्दामकामानन्दयन्तिनः॥४॥पवर्गान्प्रासवतीबाणवासिकायथा।प्रियाप्रगल्भाताम्बूलपरिस्रुत्फुल्लमुत्पलम् । पृषत्काःपञ्चबाणस्यपञ्चमःपञ्चमध्वनिः॥५॥अन्तःस्थान्प्रासवतीद्राविडीयथा । प्रियाललवलीतालतमालैलावनावली । भातिपत्रलहिन्तालकृतपुण्ड्रा

दिप्रभवकविहेवाकगोचराःकार्णाटीप्रभृतयोनतुवृत्तीनान्देशैःकश्चिदुपकारः । बणवासनामादक्षिणापथेरत्नाभगवतीचिह्नितोदेशः । ञ्च मधातोरिति । विधमितिइतिपरायणम्॥४॥५॥अवहित्थप्रस्तावेकर्णोक्कण्डूयितमोहायितास्यःशृङ्गारभावजोविकारः ॥१॥२॥ कुम्भकूटङ्कुम्भायत्तदेयग्रहोहालंकः । रुषहिंसायांयथोक्तेनपाणिनारुषतीतिक्विप् । पेटःसमूहः॥३॥मधुर्वसन्तोगान्धर्वङ्गीतम् । अत्रधकारदकारानुप्रासैरासाम्निर्वहणम् ॥४॥ परिस्रुन्मदिरा।पृषत्काबाणाः पञ्चमःस्वरविशेषत्तद्भूयिष्ठोध्वनिःपञ्चमध्वनिः ॥५॥पत्रलाःस्निग्धपत्राःस्निग्धादिराकृ

वधूरिवा॥६॥ऊष्मान् प्रासवतीमाथुरीयथा। पुष्णती पुष्पधनुषम्मुष्णतीम्लोषविप्लुषः। मिषन्तीनिर्निमेषेणचक्षुषामानुषीनसा॥७॥द्वित्रिवर्गान् प्रासवतीमात्सीयथा। कोकिलालापवाचालोमामेतिमलयानिलः। उच्छलच्छीकराच्छाच्छनिर्झराम्भःकणोक्षितः॥८॥द्वाभ्यांविदर्भितैकवर्ग्यामागधीयथा। अघौघघ्नोनृसिंहस्यघनाघनघनध्वनिः। हन्याद्घुरुघुराघोरःसुदीर्घाघोरघर्घरः॥९॥स्वान्त्यसंयोगिवर्ग्यातामालिप्रियकायथा। सिञ्जानमञ्जुमञ्जीराश्चारुकाञ्चनकाञ्चयः। कङ्कणाङ्कभुजाभान्तिजितानङ्गतवाङ्गनाः॥१०॥सरूपसंयोगिग्रथितौण्ड्रीयथा। सल्लतापल्लवोल्लासीचित्तविप्लहरोनृणाम्। मज्जतीज्जलसज्जासुनदीषुमलयानि

तिगणत्वाल्लच्। पुण्ड्रन्तिलकः। अत्रलकारवकारान् प्रासान्यांसन्दर्भनिर्वाहः॥६॥ श्लोषोविरहदाहस्तस्यविप्लुषस्तीक्ष्णभागास्तेमीसप्रशुद्धाएववृत्त्यनुप्रासाः॥७॥ सङ्कीर्णाःपुनरन्येपञ्चभवन्ति। तत्रसङ्करोद्विधा। विजातीयसंवलनम्मिथःसम्भेदेनसंयोगरूपताच। कोकिलालापेत्यादौकवर्गान्तस्यचवर्गानुप्रासाःस्फुटाएव। संयोगस्तुविद्यमानोपिनविवक्षितः॥८॥ विदर्भितःस्वान्तरायेणवैदर्भीप्रपञ्चशोभामानीतः। घुरुघुरेत्यव्यक्तानुकरणम्। अत्रासमानिकवर्गानुप्रासस्तवर्गान्तस्यानुप्रासान्यांविदर्भितः। एवमन्यत्रापिवैदर्भीगवेषणीया॥९॥ संयोगोद्विविधःस्वजातीयेनान्येनच। आद्यस्त्रिविधःस्ववर्ग्यान्तसरूपतदन्यसंयोगभेदात्। एतेयथाक्रमंवृत्तित्रयस्योदाहरन्तीत्याह। स्वान्तेत्यादि। सिञ्जानासधुरंशब्दायमानामञ्जीरानूपुराः। अत्रापूर्वार्द्धेस्वान्त्यसंयोगिनीचवर्गौ। उत्तरार्द्धेनुक्तवर्गाविति॥१०॥ सन्तःकमनीयालतानांपल्लवास्तदुल्लासनमात्रप्रवीणतयातीव्रलाव्यतिरेकः। अतएवनृणांविदग्धमिथुनानाञ्चित्तमेवसर्वस्वभूतंहरतीति। इज्जलानिचुलास्तैः

ह:॥११॥असरूपसंयोगग्रथितापौण्ड्रीयथा।अस्तमस्त
कपर्यस्तसमस्तार्कांशुसंस्तरा।पीनस्तनस्थितातामृक
प्रवस्त्रेववारुणी॥१२॥अकठोराक्षराद्यानन्नातिनिर्वह
णैषिणः।अशैथिल्यउचसत्कर्तुंवृत्त्यनुप्रासमीशते॥१॥
क्वचिदस्तिक्वचिन्नास्तिक्वचिदस्तिनचास्तिच।वर्णा
नुप्रासएषातुसर्वतोस्तीतिभिद्यते ॥ २ ॥ अन्येपुनर
थावृत्तिंव्याचक्षते । रूपशर्यादीनामसम्बन्धःसम्बन्धो
वापियोमिथः । स्फुटादिबन्धसंसिध्यैसेहवृत्तिर्नि
गद्यते ॥१॥ काव्यव्यापीचसन्दर्भोवृत्तिरित्यभिधीय
ते। सौकुमार्यमथप्रौढिर्मध्यमत्वउचतद्गुणाः ॥२॥

सज्जाःसन्नद्धा निचुलनिकुञ्चसन्नद्धनदीमज्जनेनशीतलत्वमुन्मीलित
म् ॥११॥ अस्तोत्ताचलःकम्रङ्कमनीयम् ॥१२॥ वृत्त्यनुप्रासरसिकस्यक
थेःप्रसजत्यानन्दोषमपाकर्तुंशिक्षामाह । अकठोरेति । तदुक्तम् । प
रुषाभिधायिवचनादनुकरणाच्चापरत्रनोपरूषम् । रचयेदागतिःस्या
त्तत्रापिह्रादयोर्हेषाः । अतिनिर्वाहेअयुक्तमेववैरस्यन्तदुक्तंसर्वंएवानु
प्रासाःप्रायेणेत्यादि । कोमलमात्रवर्ग्यनिर्वहणेतुशैथिल्यसम्भावनमि
ति॥१॥ नन्वनुप्रासाद्वृत्तीनाङ्कोविशेषइत्यतआह । क्वचिदिति । क्व
चिदवृत्तिभागेचरणाद्यात्मकेभवत्येवक्वचित्पुनरंशभेदेनभवतिनभवति
च । तावतैवतस्यालङ्कारत्ववंवृत्तिशरीरव्यापकतयानिरूप्यमाणास्तुव
र्ण्योन्योन्यएवायंवर्णानुप्रासाद्वृत्त्यनुप्रासइत्यर्थः ॥२॥ अन्येपुनरिति ।
वर्णानांवर्त्तनंवर्त्तमाधिष्ठानञ्चवर्त्तिपदेनाभिप्रेतमाद्यंसङ्घटनविघटना
न्द्विधा । समस्तव्यस्तभेदेनसङ्घटनाविघटनेद्विधा । क्रादयोमाव
सानाःस्पर्शाः । आदिग्रहणादन्तस्थोष्मणोःसङ्घटनबहुलःसन्दर्भः । स्फु
टःविघटनबहुलःकोमलउभयबहुलउन्मिश्रः॥१॥ द्वितीयंवृत्तिशब्दा
र्थमाह । काव्यव्यापीचेति । अत्रापिदोषप्रसङ्गापाकरणार्थमाह । सौ
कुमार्यमिति । अतएवगुणाः । शैथिल्यपरुषत्वेतुदोषावित्यर्थः॥२॥३॥

गभीरौजस्विनीप्रौढामधुरानिष्ठुराश्लथा । कठोरा
कामलामिश्रापरुषाललितामिता ॥ ३ ॥ इतिद्वा
दशधाभिन्नाकविभिःपरिपठ्यते । कारणम्पुनरु
त्पत्तेस्तएवासांविजानते ॥ ४ ॥ तासुगम्भीराय
था । अप्फुन्दन्तेणणहम्महिञ्चतडिउद्धमाविअदि
सेण । दन्दुहिगम्भीररवन्दुन्दुभिअंअम्बुवाहेण ।
सैषाप्रायस्तवर्गपवर्गयोस्तृतीयचतुर्थानाम्पकारफ
कारयोश्चस्वसंयोगविन्दुयोगाभ्यांजायते ॥ १ ॥
ओजस्विनीयथा । पत्ताअसीभराहअधाउशिलाअ
लणिसणरइअजलअम् । सञ्जंओञ्जुरपहसिददरि
मुहिअवउलमइरामोदम् । सेयम्मूर्द्धन्यानाम्प्रथम
चतुर्थपञ्चमद्वित्रैस्तदावृत्याचप्रायोजायन्ते॥२॥प्रौ
ढायथा। कृत्वापुंवत्पातमुच्चैर्भृगुभ्योमूर्द्धिग्राव्णाञ्जर्ज

योगासंयोगयोः प्रतियोगिव्यवस्थाविरहात्कथन्द्वादशप्रकारताव्यव
स्थितिरित्याशयवानाह । कारणम्पुनरिति॥४॥दूषणप्रतिपत्तिसौकर्या
त्तत्प्रसिद्ध्यैवपृथगुदाह्रियतइत्याह । तास्विति । अस्फुन्दन्तेणव्याप्त
वता । उद्धमाइअंव्याप्तम् । दुन्दुभिरन्तर्गतकांस्यभाजनोनिःस्वानवि
शेषोदुण्डहिअंशब्दापितम् । दकारधकारौतवर्गस्यबकारभकारौपव
र्गस्यतृतीयचतुर्थौ॥१॥ सततशीकरसिच्यमानगैरिकशिलातललुण्ठने
नजलदानांरञ्जनम् । विशीर्यपतनेनात्यन्तधवलानिर्झराएवहासो
यस्यतादृशेनदरीमुखेनान्तःप्ररूढबकुलकुसुमामोदनिःसरणरञ्जितज
लधरप्रतिबिम्बभूतताम्रनयनोन्मुद्रणात् । हासबकुलामोदाभ्याञ्च
क्षीबतारोपरूपासमासोक्तिर्ध्वन्यतइत्याराध्याः । ओज्जुरोर्झरोणि
स्महिअन्निःसृतम् ॥२॥ भृगवस्तटाभृगुपातस्यसुरस्त्रीसङ्गमःफलम् ।
अत्रकुर्वन्स्वर्लोकनिर्वर्त्यतेषुमूर्द्धन्यानामन्तःस्थसंयोगाऊच्चैःशब्दइत्या
दौस्वभावगुरूणामपिपूर्वरूपसंयोगसन्निधौछायाविशेषोभवतीत्याहुः

रानिर्झरौघाः । कुर्वन्तिद्यामुत्पतन्तःस्मरार्त्तस्वर्लोक
स्त्रीगात्रनिर्वाणमत्र । सैषाप्रायेणमूर्द्धन्यानामन्तः
नांसंयोगात्पूर्वगुरुत्वेनजायते ॥ ३ ॥ मधुरायथा ।
किञ्जल्कसङ्गिसिञ्जानभृङ्गलाञ्छितचम्पकः । अयम्म
धुरुपैतित्वाञ्चण्डिपङ्कजदन्तुरः । सैषाप्रायोनुस्वा
रपुरोवर्त्तिस्पर्शतयाजायते ॥४॥ निष्ठुरायथा । स्वा
ङ्गश्लिष्टाद्रिजन्मानन्नेत्रार्चिःप्लुष्टमन्मथम् । स्तौमित्र्य
क्षंद्युषज्ज्येष्ठंदैत्यश्रेण्यर्चिताङ्घ्रिकम् । सैषाप्रायः सं
योगभूयस्त्वेनोत्पद्यते ॥ ५ ॥ श्लथायथा । दयित
जनविरह विगलितनयनोदकपीतहरिणमदतिलक
म् । वदनमपगतमृगमदशशिकरणिंवहंतिलोलदृशः ।
सेयम्प्रायोव्यञ्जनानामसंयोगेनजन्यते ॥६॥ कठोरा
यथा । निसर्गनिर्गतानर्घघर्घरध्वनिहास्तिकम् । चक्रे
चक्रंयुधिक्रामन्नलर्कःकर्कशार्करुक् । सैषाप्रायःकण्ठ्य
रेफादिसंयोगादुत्पद्यते ॥ ७ ॥ कोमलायथा । दारु
णरणेरणन्तङ्करिदारणकारणंकृपाणन्ते । रमणकृते
रणरणकीपश्यतितरुणीजनोदिव्यः । सेयंरेफणका
राद्यसंयुक्तकोमलवर्णविरचनयानिष्पद्यते ॥ ८ ॥

केचित् ॥३॥ अनुस्वारपुरोवर्त्तीति । अनुस्वारस्वरूपतदादेशावनुस्वारप
देनगृह्यते । तेनशमितहासेत्यादावनुस्वाराभावेपिनलक्षणमुदाहरण
म् ॥४॥ स्वाङ्गेति । दिविसीदन्तीतिद्युषदोदेवाःसुषामादित्वात्षत्वम् ।
अत्रैकान्तरिताःसंयोगाःसन्दर्भव्यापकाःप्रतीयन्ते । सोयमस्याः संयु
ज्यमानाविशेषेपिवृत्त्यन्तराद्विशेषोनिष्ठुराद्वैपरीत्येनश्लेषोदाहरणंसुग
मम् ॥५॥ करणिःसादृश्यम् ॥६॥ सैषाप्रायःकण्ठ्येतिकण्ठ्यरेफयोःक्वचिदन्य
स्याप्यादिपदोपात्तस्यसंयोगोवसेयः ॥७॥८॥ बाहुल्यादिभिरिति । बाहुल्या

मिश्रायथा । पिनष्टीवतरङ्गाग्रैरुदधिःफेनचन्दनम् ।
तदादायकरैरिन्दुर्लिम्पतीवदिगङ्गनाः । सैषाप्राय
कठोराणामोष्ठ्यकण्ठ्यमूर्द्धन्यानाम्बाहुल्यादिभिरुप
लभ्यते ॥ ९ ॥ परुषायथा । जह्रे निह्रादिह्रादोसौ
कह्लाराह्लादितह्रदः । प्रसह्यमह्यागर्ह्यत्वमर्हणार्हः
शरन्मरुत् । सैषाप्रायेणोष्मणामन्तःस्थादिसंयोगैर
वस्थाप्यते ॥ १० ॥ ललितायथा । द्राविडीनान्ध्रु
वंलीलारेचितभ्रूलतेमुखे । आसज्यराज्यभारंस्वंसुखं
स्वपितिमन्मथः । सैषाप्रायेणदन्त्यौष्ठ्यतालव्याना
म्मध्येन्तःस्थादिसंयोगैःस्थाप्यते ॥ ११ ॥ अमिताय
था । बकुलकलिकाललामनिकलकण्ठीकलकलाकु
लेकाले । कलयाकलावतोपिहिकलयतिकलितास्व
नुताम्मदनः । सेयममितयोरेवककारलकारबन्धयो
रनुप्रासेनप्रसूयते ॥ १२ ॥ इतिद्वादशधावृत्तिःकैश्चिद्या
कथितेहसा । नगुणेभ्योनवृत्तिभ्यःपृथक्त्वेनावभास
ते ॥ १ ॥ श्रुत्यनुप्रासवर्णानुप्रासयोरपिदुष्कराः । क्वचि
द्भेदाःपृथक्कर्त्तुमस्यास्तेनेहनेष्यते ॥ २ ॥ यथाम्रातक
पुष्पादिस्रगादेर्वर्णउच्यते । वर्णावृत्तिस्तथावाचांव

ल्पत्वमिश्रणैःप्रादेशिकैरित्यर्थः ॥ ९ ॥ १० ॥ द्राविडीनामिति । किञ्चिदुन्नम
नंरेचितम् । तेनाधिज्यकोदण्डक्रियाकारिभ्रूलतासनाथेदुःखराज्यभा
रारोपः । सुगममुदाहरणम् ॥ ११ ॥ १२ ॥ तदेतत्सर्वेषाम्मतन्दूषयति । नगुणे
भ्यइति । समतासौकुमार्यादिगुणेषुभारतीप्रभृतिषुचवृत्तिषुयथायथम
न्तर्भावोवगन्तव्यः ॥ १ ॥ श्रुत्यनुप्रासवर्णानुप्रासयोरितिविषयसप्तमी ।
वर्णावृत्तेर्वृत्त्यनुप्रासाधारणत्वात् ॥ २ ॥ ततोवर्णानुप्रासंविशेषयन्नाह ।
यथाम्रातकेति । स्रगादेर्वर्णस्थानीयावर्णावृत्तिर्वर्णानुप्रासः । तत्रो

र्णानुप्रासउच्यते॥३॥ स तुस्तबकवान्स्थानीगर्भोविवृ
तसंवृतः।गृहीतमुक्तःक्रमयान्विपर्यस्तोथसम्पुटः॥४॥
मिथुनं वेणिकाचित्रोविचित्रश्चेतिवर्ण्यते।वर्णावृत्ति
प्रयोगेभ्यस्तेभ्यस्तेभ्योमनीषिभिः॥५॥ तेषुस्थानेस्था
नेनुप्रासविन्यासतःस्तबकवान्यथा। यस्यावासोकु
तहिमगिरेर्गुञ्जतांकुञ्जराणामाविश्चक्रेवनगजमदाघ्रा
णघोरायितानिःदर्पात्फुल्लस्फुरणविकटाकाण्डकण्डू
ल गण्डस्वेच्छाकाषव्रणित सरलानोकहस्कन्धगन्धः
अत्रगुञ्जताङ्कुञ्जराणामित्यादेर्वर्णस्तबकस्यस्थानेस्था
नेविन्यासादयंवर्णानुप्रासस्तबकवानित्युच्यते ॥१॥
नियतविवक्षितस्थानविशेषःस्थानीयथा । बालेमा
लेयमुच्चैर्नभवतिगगनव्यापिनीनीरदानाङ्कित्वंपक्ष्मा
नूतरालैर्मलिनयसिसुधावक्त्रमम्बुप्रवाहैः। एषाप्रोद्वृ
त्तमत्तद्विपकटकषणक्षुण्णविन्ध्योपलाभादावाग्नेर्ध्यो
मलग्नामलिनयतिदिशाम्मण्डलंधूमलेखा । अत्रप्र
थमत्रिभागस्थानेषुबालेमालेय मित्यादिनियमेनवृ

पमानभूतवर्णविवरणंसमानजातीयकुसुमादिविरचितमालापटप्रभृ
तिषुयदन्तरान्तराविजातीयात्रातकुसुमादिसन्निवेशनन्तद्वर्णइत्युच्य
ते । तद्वत्यावाचावर्णावृत्तिः । सावर्णानुप्रासइतिसूत्रार्थः । सद्वि
धा। संयुक्तासंयुक्तवर्णनिरूप्यत्वात्।यथायथमेतदुभयप्रपञ्चनम् ॥३॥
स्तबकवदाद्योद्वादशप्रकारास्तेषुक्वचित्क्वचित्संयोगावृत्तिःस्तबकवा
न्। अनुप्रासविन्यासादितिसंयोगानुप्रासविन्यासतः ॥४॥ गुञ्जताङ्कु
ञ्जराणामकाण्डकण्डूल गण्डस्कन्धगन्धइत्यत्रावृत्तिश्चतुर्णेस्तबकलि
र्यांहः । स्थानीति॥१॥ श्लोकपादेपिप्रथमादिभागकल्पनयास्थानविन्य
सविवक्षा । तथाहि । बालेमालेयमिति प्रथमोभागोनीनीरदेतिमति

त्तिः । सोयंवर्णानुप्रासःस्थानीउच्यते ॥ २ ॥ आवृत्तेर्वर्णान्तरायेणगर्भोयथा । कालङ्कपालमालाङ्कमेकम न्धकसूदनम् । वन्देवरदमीशानंशासनम्पुष्पधन्वनः। अत्रकालङ्कपालमालेत्यङ्कमेक मितिवन्देवरदमीशन शासनमित्यादिषुपकाररेफककारगर्भाधानादयंवर्णा नुप्रासोगर्भइत्युच्यते ॥ ३ ॥ स्थानेस्थानेविकास सङ्कोचाभ्यांविवृतसंवृतोयथा । नमालतीदामविम र्दयोग्यत्नप्रेमनय्यंसहतेपराधान् । म्लानापिनम्ला यतिकेसरस्त्रग्देवीनखक्षतप्रणयाकथञ्चित् । अत्रप्रथ मपादेनमालतीदामेत्यादिभिर्विकासोद्वितीयपादेम मेल्याकारावृत्यासङ्कोचस्तृतीयपादेम्लानापिनम्ला यतीत्येताभ्याञ्चविकासश्चतुर्थेनतिसङ्कोचः सोयंव र्णानुप्रासोविवृतसंवृतइत्युच्यते ॥४॥ चक्रवालबद्धा नोपादानाभ्याङ्गृहीतमुक्तोयथा । लोलह्रवङ्कलवली

भासारूढस्तृतीयादिप्रथमपादे । एवम्यत्रान्तरालमलिनसुधामयूख भृतीनान्द्वितीयादिपादेषुप्रथमादिभागकल्पनाऽवसेया॥२॥ कालङ्काल स्वरूपंएकमद्वितीयम् । कालङ्कपालेत्यत्रलकारावृत्तिःककारेखल्यव धानेप्रकृतेकपालेत्यत्रपकारोवर्णान्तरगर्भायमाणउपलक्ष्यते । एव म्मालाङ्कमित्यादौलकारादिगर्भीकरणमवसेयम् । विवृतसंवृतौनिग देनैवव्याख्यातएव ॥३॥ नमालतीदामेत्यादौप्रथमपादेमकारावृत्तिर्द येनविवरणन्द्वितीयपादेषुकृतप्रयोगेणतस्यैवसंवृतिस्तृतीयपादेनकार सकारयोरावृत्याविवृतिश्चतुर्थेतुनेतिसंवरणम् । तदिहभूयोविकाशकि ञ्चित्सङ्कोचकिञ्चिद्विकाशसर्वथासङ्कोचपरिपाट्यासन्दर्भोनिर्वहणंशो भाकरमित्याचष्टे । अत्रेति॥४॥लोलदिति।कपिञ्जलोगौरतितिरिः । अपरान्तोदेशविशेषःपूर्वबलनेमोत्तरग्रहणञ्चक्रवालम् । व्यञ्जनमात्र

वलयानिकुञ्जकूजत्कपिञ्जलकुलामुकुलावनद्धाः । अ
ध्यूषिरेकनकचम्पकराजिकान्तायेनापरान्तविजयेज
लधेरुपान्तः।अत्रचक्रवालक्रमःसुव्यक्तएव।सोयंवर्णा
नुप्रासोगृहीतमुक्तइत्युच्यते ॥५॥क्रमेणद्वित्राणांत्रिच
तुराणां वर्णानामसंयोगस्वरवर्णानामावृत्तिः क्रमवा
न्यथा। नितम्बगुर्वीगुरुणाप्रयुक्तावधूर्विधातृप्रतिमे
वतेन । चकारसामत्तचकोरनेत्रा लज्जावतीलाजवि
मोकमग्नौ । अत्रगुर्वीगुरुणाप्रयुक्तेतिवधूर्विधातृइ
तिचकारश्चकोरेतिलज्जावतीलाजेतिविमोकमितिद्व
योस्त्रयाणाञ्च स्वरसंयोगवर्णानाङ्क्रमेणावृत्तिःसो
यंवर्णानुप्रासःक्रमवानित्युच्यते॥६॥ क्रमवतांविपर्य
योपन्यासाद्विपर्ययोयथा। प्रणवःप्रवणेयत्रप्रथमःप्र
मथेषुयः । रणद्यान्वारणमुखःसवःपातुविनायकः ।
अत्रव्युत्क्रमोव्यक्तएवसोयंवर्णानुप्रासोविपर्ययइत्यु
च्यते ॥७॥ स्वाद्यवर्णवर्त्तिनास्वरेणसहपादमध्यान्त
योरनुप्रासःसम्पुटंयथा । स्थिरापायःकायःप्रणयि

वलानामभिप्रेतस्तेनवलीवलेत्यत्रापिचक्रवालसिद्धिः ॥५॥ एवमुत्तरत्र । क्रमेणेति । द्वावारभ्यैवक्रमसम्भव ऊर्ध्वञ्चतुर्ण्णांविरसायते । तेनप ञ्चषाणामित्यादिनोक्तमसंयोगस्वराणामित्यविवक्षित संयोगस्वराणा म्। गुरुणेत्यनुल्लङ्घनीयाज्ञता । तथाचलत्प्रयुक्त्यादुर्वहनितम्बभारा लसायाश्चपिकथञ्चित्पदविन्यासेनकान्तिविशेषोध्वन्यते । स्वभावता स्त्रयोरपिनेत्रयोस्तत्कालेधूमाश्लेषाद्द्विगुणोरागइति उपमानेसतपद पोपः पूर्वार्द्धद्वयोर्द्वयोरुत्तरार्द्धत्रयाणामनुल्लङ्घितक्रमाणामेवव्यञ्जना नामावृत्तिरितिस्फुटंविवरणम् ॥ ६ ॥ क्रमवतामुपक्रातङ्किञ्चिक्रमा णामावृत्तौतत्क्रमविपर्यासोव्युत्क्रमः॥७॥ स्वाद्येति।आवर्त्तनीयोवर्णः

षुसुखंस्थैर्यविमुखम्महारोगाभोगःकुवलयदृशःसर्पस
दृशः । गृहावेशःक्लैशःप्रकृतिचपलाश्रीरपिखलायमः
स्वैरीवैरीतदपिनहितङ्कर्मविहितम् । तदेतल्लक्षणेनै
वव्याख्यातम्।सोयंवर्णानुप्रासस्सम्पुटइत्युच्यते॥८॥
अन्तपादमुपसंहारोपक्रयोर्विवक्षितः। सस्वरानुप्रा
सोमिथुनंयथा। त्यजमनसिसदाहेहेस्मरस्थानमस्मि
न्ननुकिरसिशरीरेरेकिमन्दोमयूखान्।अपिपरिहरवा
योयोगमङ्गैर्मदीयैःप्रणयिनिसमवेतेतेभवन्तःसखा
यः । तदेतन्निगदेनैवव्याख्यातम् । सोयंवर्णानुप्रा
सोमिथुनमित्युच्यते ॥९॥ आवाक्यपरिसमाप्तेर्वर्णा
नुप्रासनिर्वाहोवैणिकायथा ।विद्राणेरुद्रवृन्देसवित
रितरलेवज्रिणिध्वस्तवज्रे जाताशङ्केशशाङ्केविरमति
मरुतित्यक्तवैरेकुबेरे।वैकुण्ठेकुण्ठितास्त्रेमहिषमतिरु
षम्पौरुषोपघ्ननिघ्नन्निर्विघ्नान्निघ्नतीव्रःशमयतुदुरितं
भूरिभावाभवानी। तदेतन्नातिदुर्बोधंसोयंवर्णानुप्रा
सोवैणिकेत्युच्यते॥१०॥उक्तलक्षणेभ्योन्यश्चित्रोयथा।

स्वपदेनाभिमतस्तस्यपूर्वायोवर्णस्तद्वृत्तिर्नाम्नावरेणसहतस्यावृत्तिः । पादमध्यान्तयोरेवेति । मध्यसंश्लिष्टपरितनभागघटितसमुद्गकतुल्यतयासम्पुटोनुप्रासः ॥८॥ अन्तपादमिति । वृत्तौचितीवशाच्चद्विखण्डलब्धशोभाविशेषेषुपादेषुमिथुनसिद्धिरवसेया । तदिदमुक्तमुपक्रमोपसंहारयोरिति । मिथुनन्द्वन्द्वम् ॥९॥विद्राणइति। उपघ्नआश्रयोनिघ्नः परवशः । अनुप्रासजातेरासमाप्तिर्निर्वाहोभिमतः । व्यक्तयःपुनरन्याश्चान्याएवाभिमतास्तेनवृत्त्यनुप्रासाद्भेदोतएवयेषांतुल्यता । तत्र हिकिलक्लेशग्रथनानिर्व्यूढैवभक्तिःपुनरन्यान्येति ॥ १० ॥ उक्तलक्षणेभ्यइति । पूर्वोक्तवर्णानुप्रासेभ्यइति । तथाहिप्रकृतोदाहरणेस्थाने

नीतेनिर्व्याजदीर्घामघवतिमघवद्वज्रनिद्रानिदानेनि
द्राद्रागेत्रदेवद्विषिमुषितरुषःसंस्मरन्त्यास्वभावम्।दे
व्यादृग्भ्यस्तिसृभ्यस्त्रयइवगलिताराशयोरक्तताया
क्षन्तुत्वांत्रिशूलक्षतिकुहरभुवोलोहिताम्भःसमुद्राः।
एवमन्येपिद्रष्टव्याः ॥११॥ एकवर्णावृत्तेर्वृत्त्यनुप्रासस्य
वर्णान्तरवैचित्र्येणविचित्रोयथा। चञ्चत्काञ्चनका
ञ्चयोलयचलच्चोलञ्चलैर्वञ्चिताश्चारीसञ्चरणैकाच
रुचरणाःसिञ्चन्तिचित्तम्मम। लीलाचञ्चुरचञ्चरी
करुचिभिश्चूलालाकैश्चर्चिताः किञ्चिच्चन्दनचन्द्रच
म्पकरुचाञ्चौर्योमृगीलोचनाः ॥१२॥ अन्येपुनरन्य
थाचित्रविचित्रयोर्लक्षणंव्याचक्षते । तत्रयमकच्छा
यानुकारीचित्रः । सएववर्णानुप्रासवान्विचित्रइति ।
तत्रचित्रोयथा । सर्वाशारुधिदग्धवीरुधिसदासारङ्ग

स्थानेस्तबकाविवक्षायान्नस्तबकवान् विभागपरिहारेणनस्थानीवर्णो
त्तरायानुपपत्तौनगर्भःसङ्कोचविकाशाभावेननिवृतसंवृतश्चक्रवाल
क्रमाभावेननृहीतमुक्तः। एवङ्क्रमविपर्यस्तसिथुनवह्निर्भावोवगन्त
व्यः । असमाप्तिर्निर्वहणाभावेवेणीभेदःस्फुटएव॥११॥ एकवर्णावृत्तेरि
ति । वर्ग्यावृत्तौहिकदाचिदेकवर्णावृत्तिरपिसन्दर्भेष्वापिनीसम्भाव्य
ते । तस्याम्प्रतीयमानायामेवान्तरान्तरानानाजातीयेवर्णावृत्तिश्चित्र
शोभादायिनीविचित्रानुप्रासइत्युच्यते । तथाहि । प्रकृतोदाहरणेस
न्दर्भसमाप्तिं यावदावर्त्तमानेएवचकारेकाञ्चनकाकाञ्चेतिलयवलदि
त्यादिषु ककारलकाराद्यनुप्रासोऽटभावेनैवयवर्णावृत्तेर्न्यग्भावइवप्रका
शते । चारीसञ्चरणप्रकारीभौमीआकाशीच । चञ्चुरीमनोहरःचञ्च
रीकोन्नमरः॥१२॥अन्येपुनरिति । विभिन्नार्थैकरूपत्वंस्थानविभागाल
म्बनंव्यवेताव्यवेतभावश्चयमकच्छायावर्णानुप्रासवानिति । अतिशा
यनेमतुप्॥सर्वाशाहधीत्यादौविप्रभृतीनांविभिन्नार्थैकरूपाणांव्यवेता

बद्धुङ्कुधिक्षामक्षमारुहिमन्दमुन्मधुलिहिस्वच्छन्दक
न्दद्रुहि।शुष्यत्स्रोतसितप्रभूरिरजसिज्वालायमाना
म्भसि ज्येष्ठेमासिखरार्कतेजसिकथम्पान्थव्रजञ्जीय
सि॥१॥विचित्रोयथा।उद्यद्बर्हिषिदर्दुराऽरवपुषिप्रक्षी
णपान्थायुषिच्योतद्विप्लुषिचन्द्ररुङ्मुषिसखेहंसद्विषि
प्रावृषि। मामुञ्चोच्चकुचान्तसन्ततगलद्बाष्पाकुलं
बालिङ्क्षाङ्कालेकालकरालनीलजलदव्यालुप्तभास्वद्दिव
षि॥२॥वर्णावृत्तिरनुप्रासइतियःकृतलक्षणः॥सोयन्द्वा
दशधाभेदैःप्रविभज्यप्रदर्शितः॥१॥समग्रमसमग्रंवाय
स्मिन्नावर्ततेपदम्॥ पदाश्रयेणसप्रायःपदानुप्रासउ
च्यते॥२॥विसर्गबिन्दुसंयोगस्वरस्थानाविवक्षया।
आनिर्वाहाच्चसप्रायोयमकेभ्योविभिद्यते॥३॥मसृणो
दन्तुरःश्लक्ष्णःसम्पुटंसम्पुटावली। खिन्नस्तच्चकया
न्यानीमिथुनम्मिथुनावली॥४॥ग्रहीतमुक्तनाम।न्य
स्ततोन्यःपुनरुक्तिमान्। इतिद्वादशभेदोयम्मनी
षिभिरिहेष्यते॥५॥तेषुमसृणोयथा। सरणेवार

नामेवपादमध्यान्तयोरवस्थितिः॥ एवमन्यत्रेतमप्युन्नेयम्। नात्रव
र्णानुप्रासउत्कटइतिविचित्राद्भेदः॥१॥अतएवोत्तरत्रस्फुटवर्णानुप्रासमु
दाहरति॥२॥ तेमीशुद्धवर्णावृत्तिप्रकाराःषट्त्रिंशल्लक्षिताःसाम्प्रतंद्वाद
शतापल्लवर्णावृत्तयोलक्ष्यन्तइत्याह। वर्णावृत्तिरनुप्रासइति। द्वादश
धेति।वीप्साद्वयेत्यर्थः॥१॥ समग्रमिति। पदालम्बनोऽनुप्रासःपदानुप्रा
सस्तेनपदावयवमालालम्बनोपिपदालम्बनएव। तदिदमाह। पदा
श्रयेणेति॥२॥ननुयदिपदावृत्तिरभिन्नार्थातदापुनरुक्तिरेवभिन्नार्थाचे
द्यमकान्नभिद्यतइत्यतआह। विसर्गेति। बिन्दुरनुस्वारःस्थानङ्कण्ठा
दिकम्। वृत्तेःपादादियमकताभावोनिर्वाहःप्रायोनिर्वाहइतियोज

णास्यस्यदर्शनेशनिसन्निभे । चकारवलयाकारम्भु
जम्भुजगभीषणम् । सोयमसंयुक्तवर्णवृत्तेः पदानु
प्रासोमसृणइत्युच्यते॥१॥ दन्तुरोयथा । सनैषधस्या
र्थपतेः सुतायामुत्पादयामासनिषिद्धशत्रुः । अनून
सारन्निषधान्नरेन्द्रात्पुत्रं यमाहुर्निषधाख्यमेव ।
अत्रनिषिद्धशत्रुपदेसंयोगाधिक्येनदन्तुरता । सोयं
पदानुप्रासोदन्तुरइत्युच्यते ॥३॥ श्लक्ष्णोयथा । अ
प्येहिकान्तेवैदेहिदेहिप्रतिवचोमम । अरविन्दाक्षि
दाक्षिण्यमलङ्कारोहियोषिताम् । अत्रस्वरेणसहा
वृत्तेःश्लक्ष्णतासोयम्पदानुप्रासःश्लक्ष्णइत्युच्यते॥२॥
सम्पुटंयथा । सदर्पइवकन्दर्पस्तरलामादृशाम्मतिः ।
असारइवसंसारः कुरुष्वमदनुग्रहम् । अत्रेवशब्द
स्यापवादत्वेनाव्यवधायकत्वादनुप्रासोयंसम्पुटइ
त्युच्यते॥४॥सम्पुटावलीयथा । करोतिकिङ्किरातो
पिसमाकृष्यशिलीमुखान् । शिलीमुखान्समाकृष्य
किङ्किरातःकरोतियत् ॥ अत्रकरोतिकरोतीत्येकं
सम्पुटङ्किङ्किरातःकिङ्किरातइति द्वितीयंसमाकृष्य

मा॥३॥४॥५॥वारणास्योविनायकः । अत्ररणेरणेतिशनेशनीतिकारङ्कार
मितिभुजम्भुजेतिपदंतदेकदेशावृत्तिःस्फुटमुपलभ्यते । मसृणातुकथ
मित्यतआह । सोयमिति॥१॥ सनैषधेत्यादौनिषधरूपोवर्णसमुदायः
पदैकदेशतामापन्नःसाधारणएव । तदत्रदन्तुरताकीदृशीत्यतआह ।
अत्रनिषिद्धेति॥२॥३॥सम्पुटवदेकरूपस्यैवखण्डस्यनिरन्तरमावर्त्तनंसम्
पुटम् । तत्कथमिवकंसंशब्दैरन्तरायेसम्पद्यतइत्यतआह । अत्रेवशब्द
स्येति॥४॥करोतिकिङ्किरातोयमित्यादौमध्येशिलीमुखाञ्छिलीमुखानि
तिप्रथमंसम्पुटम् । तस्यबहिरावरणभूतंसमाकृष्यसमाकृष्येतिद्वितीय

समाकृष्येतितृतीयंशिलीमुखाञ्छिलीमुखानिति च
तुर्थंसोयम्पदानुप्रासःसम्पुटावलीत्युच्यते ॥ ५ ॥ खि
न्नोयथा । कुलजातिसमाकुलीकृतानांसुखदसुखा
शयमूढचेतनानाम् । अभवविभवलाभलोलुभानां
नाम्भवभवबन्धविभेदनायभूयः । अत्ररीतेरनिर्वा
हात्खिन्नतासोयंपदानुप्रासःखिन्नइत्युच्यते ॥ ६ ॥
स्तबकवान्यथा । भासयत्यपिभासादौकविवर्गेजग
त्रयीम् । केनयान्तिनिबन्धारःकालिदासस्यदासता
म् । सोयंवर्णानुप्रासवत्पदानुप्रासोपिस्थानेस्था
नेविनिवेशात्स्तबकवानित्युच्यते ॥ ७ ॥ स्थानीयथा ।
परञ्जोह्लाउह्लागरलसरिसोचन्दणरसोखदक्खरोहा
रोमलअपवणादेहतवणा । मुणालीवाणालीजलदिव
जलद्दातणुलदावरिठ्ठाजन्दिठ्ठा कमलनअणासा
सुवअणा । सोयम्पदानुप्रासःस्थाननियमात्स्था
नीत्युच्यते ॥ ८ ॥ मिथुनंयथा । पुरःपारापारातट

न्तस्यापिकिङ्किरातः किङ्किरातेतितृतीयन्तस्यापिकरोतिकरोतीतिच
तुर्थम् । तदेतद्विपरीतव्याख्ययाव्यञ्जयन्नाह । अत्रकरोतीत्यादि ॥ ५ ॥
कुलेति । अत्रप्रथमपादेकुलेतिअविवक्षितस्वरादिवर्णयुग्ममक्षरचतु
ष्टयव्यवधानेनकुलीत्यावृत्तंद्वितीयतृतीयपादयोस्तुसुखदसुखेतिअभ
वविभवेतिचैकवर्णव्यवधानेनावृत्तिश्चतुर्थपादेतुभवभवेतिरीतिभङ्गो
नचदोषः । प्रतीत्यव्यवधानात् ॥ ६ ॥ वैचित्रीविशेषेणालङ्कारभावोभासय
तीत्यादावाद्यन्तयोर्दूरान्तरितैवावृत्तिः । स्थाननियमस्तुनविवक्षितः । त
दिदमुक्तंस्थानेस्थानइति ॥ ७ ॥ जोण्हाउण्हारिसोरसोइत्यादिकःप्रतिपा
दम्मध्यान्तस्थाननियमेनावृत्तिः । क्षतोर्पितःक्षारःजलार्द्राजलार्द्रेवस्त्रे
॥ ८ ॥ पाराभिधानानदी । अपारापाररहिता । सिन्धुर्नदीसिन्धुनामा ।

भुविविहारःपुरवरन्ततःसिन्धुःसिन्धुःफणिपतिवन
पावनमतः । तदग्रेतूदग्रोगिरिरितिगिरिस्तस्यपुर
तोविशालाशालाभिर्ललितललनाभिर्विजयते । त
देतत्प्रतिपादंद्वयोर्द्वयोः पादानुप्रासयोर्विन्यासान्
मिथुनम् ॥९॥ मिथुनावलीयथा । शिरसिशरभः
क्रोडेक्रोडःकरीकरटेरटन्नुरसिचरुर्मर्मण्येणःशिखी
मुखरोमुखे । कविरपिहृदिद्रादीदूराद्रुरिर्द्वेपजिद्रु
तोधनुषिलघुतालक्ष्येपूर्वाजयोस्ययशस्विनः । से
यंद्वयोः पादयोर्निरन्तरमावृत्तिर्मिथुनावलीत्युच्य
ते॥१०॥गृहीतमुक्तोयथा । पुन्नागनागकेसरकेसरप
रिवासवासनासुरभिः । सुरभिर्मधुरमधुप्रियषट्चर
णाचरणवान्प्राप्तः । सोयञ्चक्रवालवदनुप्रासोगृ

विशालाउज्जयिनी । शालाभरितीत्यभूतलक्षणेतृतीया । अत्रपारा
पारेतिसिन्धुसिन्धुरिति । दग्रेदग्रइतिशालाशालेतिक्रमेणप्रथमा
दिपादेषुद्वयोरेवानुप्रासयोर्विन्यासः । यद्यपितृतीयपादेगिरिगिरी
तिद्वितीयमपिमिथुनंसम्भवतितथापिवर्णद्वयव्यवधानादनुल्लेखीत्युपे
क्षितयान्॥९॥शिरसीति । शरभोष्टापदःक्रोडोवराहोरुरुर्बहुश्रुतिर्मृगो
हरिःसिंहः । स्वरभागाविवक्षायांव्यञ्जनयुगलावृत्तिर्मिथुनम् । तदे
वावृत्तिभूम्नामिथुनावली । शरशरेतिक्रोडक्रोडेतिकरकरेतिदयदये
त्यादिनाक्रमेणासुप्रत्यभिज्ञानेव॥१०॥गृहीतमुक्तोयथेति । पुन्नागःपुन्ना
गइतिप्रसिद्धःकेसरोबकुलोभावना वासनासुरभिर्यस्तोनानामधुपान
लालसानामितस्ततःषट्चरणानाञ्चरणम्भूमणम् । अत्रचक्रवालक्रमो
व्यक्तएव । आवृत्त्याधिक्याभावाद्गृहीतमात्रस्यैवमोचनम्॥११॥पुनरु
क्तिमानिति । वाच्याभेदात्पुनरुक्तिःसायस्मिन्नावृत्तिलक्षणेनानुप्रासे
सपुनरुक्तिमान् । तात्पर्यभेदाच्चनदोषः । धूमज्वलनरसनानामाकाश
देशस्थापितयाधनुःकर्षद्वारेणरामभद्रगतोत्साहशक्तिध्वननात्प्रकृत

हीतमुक्तइत्युच्यते ११॥पुनरुक्तिमान्यथा । धूमाइधू मकलुसेजलइजलन्तावुहन्तजीआवन्धे। पडिरूपप डिऊस्यादिसेरसइरसन्तिसिहरेधणुमिणहअलम्। अत्रधूमादीनाम्पुनर्वचनात्पदानुप्रासोयम्पुनरुक्ति मानुच्यते ॥ १२ ॥ वर्णावृत्तिरनुप्रासःपादेषुचप देषुच ॥ पूर्वानुभयसंस्कारबोधिनीयद्यदूरता ॥१॥ लाटानुप्रासवर्गस्ययावद्वाचलद्भ्यतेगतिः । पदानु प्रासवर्गोपितावद्वैवप्रपञ्चयते ॥ २॥ स्वभावतश्च गौण्याचवीप्साभीक्ष्ण्यादिभिश्चसा । नाम्नाद्विरुक्ति भिर्वाक्येतदनुप्रासउच्यते॥३॥सास्वभावतोयथा । कुर्वन्तोमीकलकलम्मारुतेनचलाचलाः । प्रातर्गुलुगु

वीररसपोषः । अत्रधूमधूमेत्यादिनावाच्यभेदः ॥१२॥ ननुवर्णावृत्तिरनु प्राससामान्यलक्षणयुक्तानवासौपदाद्यावृत्तावस्तीत्यतआह । वर्णा वृत्तिरिति । समुदायावृत्तिरपिवर्णावृत्तिरेव । नहिवर्णातिरिक्तःस मुदायोनाम । इयांस्तुविशेषोयत्पूर्वजातीयस्तानुसन्धानमलङ्कारता म्प्रयोजयति।तत्रचकार्यानुमेयःसमयसन्निकर्षविशेषएवप्रयोजकइति । तदिदन्दिङ्मात्रमुक्तम् ॥१॥ अन्येपिपदानुप्रासप्रकाराःस्वयमुत्प्रेक्षित व्याइत्याहालाटेति । गतिःप्रकारः॥२॥क्रमप्राप्तलामद्विरुक्त्यनुप्रासंवि भजते । स्वभावतइति । यद्यपिपदानुप्रासादीनामद्विरुक्तिरतिश्चा पिकातथाप्यर्थापत्तेपोपनिपातिनीसहविवक्षिता । अर्थाद्विविधः । आभिधानिकउपाधिश्च । आद्योगौणमुख्यभेदेनद्विप्रकारोद्वितीयोपि वीप्साभीक्ष्ण्यादिरनेकविधोद्विरुक्तिरपिनामशरीरसम्पादिकानाम्नः सतथेतिद्वयीबोद्धव्या। अतएवद्विरुक्तस्यैवाभिधाशक्तियोगात्स्वभाव सइत्युक्तम् ॥३॥ कुर्वन्तइति । चलाचलाश्चञ्चलाः । चलतेरच्प्रत्ययेऽ भ्यासस्याकिरूपम् । गुलुइत्यव्यक्तानुकरणस्यङाचिद्विर्वचनेचगुलुगुले तिनाससिद्धिः । अत्रकलकलादिपदानामर्थवशायातद्विरुक्तिशरीरा

लायन्ते गजाइवघनाघनाः । अत्रकलकलमित्या
दिषुस्वाभाविकीपुनरुक्तिरुपदिश्यते ॥१॥ गौण्या
यथा । अमृतममृतञ्चन्द्रश्चन्द्रस्तथाम्बुजमम्बुजं
रतिरपिरतिःकामःकामोमधूनिमधून्यपि । इतिन
भजतेवस्तुप्रायः परस्परसङ्करन्तदियमबलाकान्ति
न्धत्तेकुतःसकलात्मिकाम् । अत्रामृतममृतमित्या
दिष्वभेदेपिभेदोपचारेणविशेषणविशेष्यभावः सा
मान्यविशेषभावाद्भवन्पुनरुक्तिवद्भासते॥२॥ वीप्सा

णांस्वभावतएवयथोक्तरूपव्यवस्थितिः॥१॥अमृतमिति । अत्रद्वितीया
नाममृतादिपदानान्द्विरुक्तिदोषेणतात्पर्यापर्यवसानादमृतादिगुणपर
त्वेकल्पनीयेपिनिकृष्टगुणपराणांसामानाधिकरण्यानुपपत्तेस्तत्तदसा
धारणगुणोपबृंहितामृतादिनिष्ठानामाद्यपदोपात्तसामान्यापेक्षोवि
शेष्यभावश्चविशेषणत्वञ्चनिर्वहति । नचपर्यानिवेशेर्थान्तरसङ्क्रमि
तवाच्यतासम्भवतीतिपूर्वाचार्याः । सेयङ्गौणार्थपरवशानामद्विरु
क्तिः ॥२॥ वीप्सेति । नानार्थानांयुगपदेकैकेनपदेनकेनचिद्वक्तुर्व्या
प्तिविवक्षावीप्सा । साप्रयोक्तृधर्मोद्विरुक्त्याव्यज्यते । अतएवया
काचिदर्थसामर्थ्याकृष्टाद्विरुक्तिःसासप्तवर्णादिवन्नामद्विरुक्तिसमाख्य
याप्रतिपाद्यते । शैलेशैलइति।अत्रकिञ्चिदेकमसाधारणगुणाश्रयविव
क्षन् तदितरस्यतज्जातीयस्यगुणसंस्पर्शमसहमानोऽप्रस्तुतमेवशैला
दिकप्रस्तुतवान् । रोहणादिव्यतिरिक्तासुव्यक्तिषुमाणिक्याद्यभाव
गुणव्याप्तिर्युगपदेवविवक्षिता । शब्दादुपसर्जनतयाप्रतीयमानःसिद्ध
स्वभावःपदार्थोगुणइत्युच्यते । एवंक्रिययापिव्याप्तिरवसेया । सेयन्द्र
व्यवीप्सेति । शैलादीनान्द्रव्याणामेकेनगुणादिनाव्याप्तुमिच्छेत्यर्थः ॥
३॥ प्रकारेगुणवचनस्येति । प्रकारःसादृश्यन्तत्पूर्णगुणेनन्यूनगुणस्यसा
धारणगुणान्वयेभवति । एवञ्चास्तिसमानशब्दाभिधेयत्वञ्चव्याप्तिः ।
इयांस्तुविशेषोयदेकत्रसिद्धस्यान्यत्रप्रतिबिम्बनंसादृश्यंशुद्धवीप्साया

यथा ॥ शैलेशैलेनमाणिक्यम्मौक्तिकन्नगजेगजे । दे
शेदेशेनविद्वांसश्चन्दनन्नवनेवने । सेयन्द्रव्यवीप्सा
नामद्विरुक्तिः। एवंगुणजातिक्रियावीप्सायामपिद्रष्ट
व्यम् । प्रकारेगुणवचनस्येत्यादिरपिवीप्साप्रकार
एव । यथा। मानिनीजनविलोचनपातानुष्मबाष्प
कलुषान्प्रतिगृह्णन् । मन्दमन्दमुदितःप्रययौस्वंभी
तभीतइवशीतमयूखः ॥४॥ आभीक्ष्ण्येनयथा । श्ले
षंश्लेषम्मृगदृशादत्तमाननपङ्कजम् । मयामुकुलि
ताक्षेणपायम्पायमरंम्यत । सोयमाभीक्ष्ण्येणमुल्स
चानुप्रयुज्यतइतिपुनरुक्तिः ॥ ५ ॥ क्रियापदाभी
क्ष्ण्याद्विरुक्तौतुपुनरुक्तेरपिपुनरुक्तिर्यथा । जयति

न्तुगपदेकस्यनानापदार्थसम्बन्धइति । सोयंवीप्साप्रकारशब्दार्थः।
अतएवप्रकारेगुणवचनस्येतिपृथक्सूत्रितम् । इहतुवीप्सापदेनैवाय
मर्थउपग्राह्यइत्यभिप्रायः । मन्दम्मन्दमिवोदितइतिक्रियाविशेषणमु
पमितमेवम्भीतभीतइतिकर्तृविशेषणमपिसादृश्यलक्षणगुणोत्प्रेक्षाया
मिवशब्दः॥४॥आभीक्ष्ण्येनेति । नित्यवीप्सयोरित्यनेननित्यत्वमाभी
क्ष्ण्यमुक्तम् । याङ्किलक्रियाङ्कर्त्ताप्राधान्येनानुपरत्याचकर्त्तुमिच्छति
तद्रूपमाभीक्ष्ण्यमतएवतिङव्ययकृताञ्चद्विरुक्तिरियमसाधारणी ।
उभयत्रैवक्रियाप्राधान्यप्रतीतेः । सिद्धेहिवस्तुनिपौनःपुन्यप्रतीतिः
क्रियोपाधितएवनस्वरूपेण । ननुणमुलैवाभीक्ष्ण्याभिधानात्किन्द्वि
रुक्तिःकरिष्यतइत्यतआह। सेयमिति। नचाभीक्ष्ण्यंणमुलोवाच्यम्।
त्कार्थेतस्याभिधानात्। द्विरुक्तिसहितस्यैवतस्यानुपरतिव्यञ्जकत्वा
त् । स्वरूपार्थाभ्यामन्तरतमशब्दद्वयरूपआदेशोवाद्विरुच्चारणंवाद्वि
रुक्तिशब्दार्थः ॥ ५ ॥ नचावश्यन्द्वावेवशब्दौप्रयोक्तव्यौकिन्तुयावद्भिर
भिमतोर्थः प्रतीयतेतावन्तअभीक्ष्ण्यशब्दाप्रयोक्तव्यास्तेनाव्ययकृत्सुद
श्यन्तेकिन्तुतिङ्पदेष्वेवेत्याह । क्रियापदेति । यद्यप्येकैकवाक्यार्थ

जयतिदेवःश्यामकण्ठःपिनाकीजयतिजयतिदेवी लोकमाताभवानी । जयतिजयतिधन्यःसोपिभक्त स्तयोर्यःकिमपरमिहधन्यंवर्ण्यतेतत्रदेव॥६॥आदि ग्रहणेननिमूलसम्भ्रमादयःपरिगृह्यन्ते । तेषुनिमू लादिर्यथा । निमूलकाषङ्कषतिस्वान्तमन्तःस्मरज्व रे । लाजस्फोटंस्फुटन्त्याशुहृदयेहारयष्टयः ॥ ७॥ सम्भ्रमेणयथा । अस्थीन्यस्थीन्यजिनमजिनम्भस्म भस्मेन्दुरिन्दुर्गङ्गागङ्गोरगउरगइत्याकुलाःसम्भ्रमेण भूषावेषोपकरणगणप्रापणव्याप्ततानान्नृत्यारम्भप्र णयिनिशिवेपान्तुवाचोगणानाम् ॥८॥ हर्षावेशविस्मयादयोपिसम्भ्रमस्योपाधयोभवन्ति । तेषुहर्षस म्भ्रमेणयथा । रुरुधुःकौतुकोत्तालास्ततस्तांममरावतीम् । क्वार्ज्जुनःक्वार्ज्जुनइतिब्रुवन्त्योनाकयो

संगत्याक्रियापदस्यइयमेवोच्चारणंतथापिकाव्यापेक्षयाबाहुल्यमवसेय म्॥६॥आदिग्रहणेनेति । तत्तदितरप्रकरणप्रापितानान्द्विरुक्तिप्रकारा णामादिपदेनोपग्रहोविधेयः । तद्यथा । अवागवाग्वलवदुपलग्र न्थयःक्षेत्रशैलादूरेदूरेमणिमयदृषन्मेखलोरत्नसानुः । आरादारान्निधि रयमपांयद्दवीयोदवीयान्दुरधाक्षोधिस्तदयमसदृक्लिल्पएवादिशि ल्पी । अत्रानुपूर्व्यैवभवतइतिद्विरुक्तिः । एवंस्वार्थेवधार्यमाणेइत्या दयोपिद्विरुक्तिप्रकाराःस्वयमवसेयाइत्याशयवानुपलक्षणतयाकिञ्चि दुदाहरति । निमूलकाषमिति । कषादिधुयथाविध्यनुप्रयोगइतित त्रैवप्रयुक्तेद्विरुक्तिसिद्धिः॥७॥सम्भ्रमेणेति । भयसंवेगादरात्मकःस म्भ्रमःसंवेगस्त्वरा । सैवप्रकृतोदाहरणेद्विरुक्तिम्प्रयोजयति ॥८॥ ननुहर्षादिनामहाकविप्रबन्धेषुद्विरुक्तिरुपलभ्यते । साकथमुपयाह्येत्य तआह । हर्षेति । हर्षादयोपिसम्भ्रमप्रयोजकास्तैरसाधारणतामा पन्नैरवच्छिद्यमानः सम्भ्रमोन्योन्योभवतिनचसम्भ्रमताज्जहातीतिस

षितः ॥९॥ आवेगसम्भ्रमेणयथा । कञ्चुकङ्कञ्चुकं मुञ्चहारंहारम्परित्यज । हाहादहतिदावाग्निर्वस्त्रवस्त्रमपाकुरु । अत्रमुञ्चपरित्यजदहतिअपाकुरुइतिक्रियापदेष्वावेगसम्भ्रमान्नद्विरुक्तिः । तथाह्यरण्यानीप्रवेशेविजिगीषु द्विषांयोषिद्वावाग्निसम्भ्रमावेगात्कयाप्येवमुच्यते । तत्रप्रथमङ्कञ्चुकएवावेगसम्भ्रमःसह्यागलेदावाग्नावुत्तारयितुमशक्यस्ततस्तद्यासङ्गहेतौहारेऽनन्तरम्परापतितदावाग्निदीप्तेवाससीति ॥१०॥ विस्मयसम्भ्रमेणयथा । अहोरूपमहोरूपमहोमुखमहोमुखम्।अहोमध्यमहोमध्यमस्याःसारङ्गचक्षुषः । एतेषुसमस्तेष्वपिसम्भ्रमेषुयावद्बोधमितिद्विरुक्तिः ॥११॥ एवंत्रिरुक्तिरपिद्रष्टव्या यथा । जयजयजयश्रीमन्प्रभातविभावरीवदवदवदस्रव्यंविद्वन्निदंह्यवधीयते । शृणुशृणुशृणुत्वद्वत्सूर्योनुरज्यतिमण्डलञ्चहिनहिनहिक्षमामार्तण्डः क्षणेनविरज्यते ॥१२॥ क्रियासमभिहारश्चक्रियाभ्यासश्चयःपुरा॥ युक्तावुदाहृतःसोपिनामानुप्रासइष्यते॥१॥ जायतेनचदोषाय काव्येलङ्कारसङ्करः ॥ विभूषय

म्त्रमद्विरुक्तिप्रकारएवायमित्यर्थः॥९॥निगूढगम्भीरउद्वेगआवेगः। नुकञ्चुकंकञ्चुकमितिवन्मुञ्चेन्त्यादिकमावेगसम्भ्रमप्रभवमेवतत्कथन्नद्विरुच्यतइत्यतआह । अत्रेति । कञ्चुकस्यहारेणहारस्योत्तरीयवाससाव्यासङ्गसम्भावनासम्भ्रमहेतुः ॥ १० ॥ ११ ॥ सम्भ्रमेयावद्बोधमितियावच्छब्दार्थमाविष्कुर्वाणःपूर्वोक्तमभिप्रेत्याह । एवंत्रिरुक्तिरपीति । उपलक्षणञ्चैदम् । चतुरादिद्विरुक्तिरदग्रहवारितैव ॥ १२ ॥ समभिहारोऽभ्यासम् ॥ १ ॥ ननुवाक्यार्थप्रयुक्तस्यैवकाव्यस्य

तिहारोपिस्तनौग्रीवाम्मृगीदृशाम् ॥ २ ॥ अर्थाभेदे पदावृत्तिः प्रवृत्याभिन्नयेहयाससूरिभिरनुप्रासोलाटीयइतिगीयते ॥ ३ ॥ सचाव्यवहितोव्यस्तःसमस्तउभयःपुनः ॥ उभयञ्चक्रवालञ्चगर्भश्चैवाभिधीयते ॥ ४ ॥ यस्तुव्यवहितोनामनेयतातस्यशक्यते ॥ कर्तुमेकादिगुणनापदवृत्यादिभङ्गिभिः ॥५॥ तेष्वव्यवहितभेदेषुव्यस्तोयथा । उअहिस्सजसञ्जसेणिजधीरंधीरेणगरुइआईविगरुअम् । रामोठिईअविठिइम्भणइरवेणअरवंससमुप्फुन्दन्तो । अत्रा

नाथीकरणात्किमनुप्रासेनेत्यतआह । जायतेनचेति । उदाहरणेनालङ्कार्यसङ्करवदलङ्कारसङ्करोपिलोकप्रसिद्धएवशोभाहेतुरित्यभिमतमिति॥२॥क्रमप्राप्तंलाटानुप्रासंलक्षयति । अर्थाभेदेइति । लाटजनवल्लभोनुप्रासोलाटानुप्रासः । अर्थाभेदेकथन्नपुनरुक्तिदोषइत्यतउक्तम् प्रवृत्त्याभिन्नयेति। तात्पर्यभेदेनेत्यर्थः । अतएवयमकाद्भेदः॥३॥सचेत्यनुक्तव्यवहितसमुच्चयेचकारः । लाटानुप्रासःसामान्यतोद्विधा । अव्यवहितोव्यवहितश्च । अनावृत्तशब्दानन्तरितोऽव्यवहितस्तदन्तरितश्चव्यवहितः । तयोरव्यवहितःषोढाभवति । व्यस्तःसमस्तोद्वावुभयाविति तावच्चत्वारस्तत्रोभयद्वयन्द्विप्रकारकमितिसामान्यविशेषभावाभ्यांषड्भेदाव्याख्येयाः । उभयःपुनरिति । पुनःशब्दोव्यावृत्तौपूर्वस्मादन्यएवायमेकशब्दाभिलप्यइत्यर्थःआद्योभयद्वयमग्रेवक्ष्यते॥४॥द्वितीयन्तुचक्रवालङ्गर्भश्चेत्युक्तव्यवहितस्यतर्हिकियन्तोभेदातआहयत्यम्स्त्विति । तेनबहुभावावान्तरविशेषतयानायंसमशीर्षिकयागणितइत्यर्थः॥५॥तेष्विति । द्विरुक्तशब्दरूपेषुपूर्वपरयोर्नैकमपिसमासान्तर्गतमितिव्यस्तः । एतेनसमस्तादयोव्याख्याताःधैर्यगुरुतास्थितिगाम्भीर्यानुनिष्पादीवागनुभावोरसं पूर्णकुम्भोच्छलनन्यायेनसाक्षादिवतत्तत्प्रकर्षमर्पयन्शोभाविकाशहेतुः । समुप्फुन्दन्तो । समभिक्राभन् ।

ध्ययानांद्योतकादित्वादिवादिभिर्व्यवधानन्ना श्री
यते । नहीवादेःप्रकृतेपिपृथक्पदत्वमस्ति । यद्येव
मिदमिहोदाहरणंयुज्यते । त्वन्मुखन्त्वन्मुखमिव
त्वद्दृशौत्वद्दृशाविव । त्वन्मूर्तिरिवमूर्तिस्तेत्वमिव
त्वङ्क्रशोदरि इति । अस्त्येवैतत्किन्तुयथा । अ
मृतममृतञ्चन्द्रश्चन्द्रइत्यादिकमभेदेपिभेदोपचा
रान्नामद्विरुक्तिस्तथेयमित्युत्प्रेक्ष्यते॥१॥ समस्तोय
था । अपहस्तितान्यकिसलयकिसलयशोभंविलो
कयाशोकम् । सखिविजितापरसुमनःसुमनःसुभ
गत्वमधुतिलकम् । अत्रकिसलयकिसलयइतिसु
मनःसुमनइतिचसमस्तानामेत्राव्यवधानादयंलाटी
योनुप्रासोऽव्यवहितसमस्तः पूर्वःपुनरव्यवहितव्य
स्तइत्युच्यते॥२॥ उभयस्तुद्विधाप्रथमोऽसमस्तोऽपरो

ननुजसेणधीरेणगुरुद्दआद्दविद्दयरवेणाश्रद्दति यदपञ्चकेविभक्त्यात
दुत्तरयोश्चकारद्वयेनचव्यवधानात्कथमव्यवहितभेदउदाहृियतइत्या
ह । अत्रेति । अव्ययानामित्युपलक्षणम् । द्योतकत्वादितिविभक्ति
साधारणोहेतुः । पञ्चकप्रातियदिकार्थत्वपक्षेविभक्तिर्द्योतिकैवशाक
ल्योपीति । अव्ययवाचकत्ववादीसोप्यसत्वार्थानामिवादीनांस्वात
न्त्र्येणवाचकत्वक्रमन्यते । यतोनपृथक्पदत्वमनुशिष्टवान् । तथाच
द्योतकानाम्परशक्तिसहकारित्वेनतदनुप्रवेशात्स्वाङ्गमव्यवधायकमि
तिन्यात् । ननुकिमत्रक्लिष्टकल्पनया । अस्त्येवव्यवहितोदाहरणमव्यव
दपीतिशङ्कते । यद्येवमिति । अत्रपूर्वार्द्धवर्त्तिद्वयमुदाहरणमुत्तरा
र्द्धवर्त्तिनोद्वयस्यपूर्वतुल्यत्वात् । परिहरति । अस्तीति । अनन्वय
मात्रमत्रोदाहरणम् । तत्रचायश्चभेदकल्पनयाविशेषणविशेष्यभावी
वाच्यस्थाचगौणीनामद्विरुक्तिःस्यादितिसङ्करशङ्कयानोदाहृतमिति
सिद्धान्तात्पर्यसंक्षेपः । पूर्वःपुनरिति । समस्तानन्तरंव्यस्तविपर

व्यस्तोव्यस्तोपरः समस्तइतिच । तयोःप्रथमोय
था । जितलाटाङ्कनावक्त्रं वक्त्रन्तस्यामृगीदृशः ।
कस्यनक्षोभजनकञ्जनकम्पुष्पधन्वनः । तदिदंल
क्षणेनचव्याख्यातम् ॥३॥ द्वितीयोयथा । नलिनी
नलिनीनाथ करसन्ततिसङ्गमात् । विकचाविकचा
स्यानाक्रान्तानांहरतिश्रियम् । अस्यापिलक्षणेनै
वोक्तोर्थः॥४॥ स्वापेक्षयाव्यस्तोन्यापेक्षयाचसमस्तः
द्वितीयोव्यस्तरसमस्तइति सद्वितीयोभयशब्दव्या
ख्यः । सोपिद्विधा । प्रतिपादमन्ताद्योगर्भइत्यनु
प्रासविन्यासात् । तयोःप्रथमश्चक्रवालंयथा ।
जयतिक्षुण्णतिमिरस्तिमिरान्धैकवल्लभः । वल्लभो
कृतपूर्वाशः पूर्वाशातिलकोरविः । अत्रतिमिरवल्ल
भपूर्वाशेतिशब्दास्तिमिरादिशब्दापेक्षयाव्यस्ताः।
यथास्वपूर्वोत्तरपदापेक्षयाचसमस्ताः पदान्ताद्यो
विंनिवेशिताइतियथोक्तलक्षणानुगमाल्लाटीयानुप्रा
सोयमव्यवहितोव्यस्तसमस्तश्चक्रवालेत्युच्यते ॥५॥
एतेनपादमध्येनुप्रासविन्यासाद्गर्भोपिव्याख्यातो
यथा । समाधयामाधवदत्तदृष्टिरसकौतुकाकौतु
कमन्दिरेस्तात् । सविभ्रमाविभ्रमदायिनीवः सप
ङ्कजापङ्कजलोचनाश्रीः ॥६॥ व्यवहितभेदेष्वव्यस्तो
यथा । प्रकाशोयशसादेवःप्रकाशोमहसारविः ।
दुस्सहोविद्विषांस्वामीदुःसहस्तमसाञ्चसः । तदेत
न्नातिदुर्बोधमितिनव्याक्रियते॥७॥ सोयमेकगुणो
व्यस्तश्चलाटीयानुप्रासोव्यवहितइत्युच्यते । व्यस्त

वानेकगुणोयथा । किञ्चिद्वच्मिनवच्मिनवच्मियदि
वा किंवच्मिवच्मीदृशन्दृश्यन्ते नभवादृशेषुपतिषु
स्वेषामदोषेदमाः । तेकिंसन्तिनसन्तिसन्तियदि
वाकेसन्तिसन्तीदृशाः सर्वस्तेषुगुणैर्गृहीतहृदयो
लोकःकुतोवर्तते । अत्रवच्मीतिसन्तीत्येतयोरने
कगुणावृत्तिः ॥८॥ समस्तएकगुणोयथा । चन्द्रान
नचन्द्रदिनम्मृगलोचनमृगशिरश्चनक्षत्रम् । तिथि
रतिथिप्रियदशमीपरतस्त्वेकादशीप्रहरात् । न
न्विहतिथिरित्यसमस्तन्नकेवलमसमस्तम्भिन्नार्थत
यालाटीयानुप्रासेपिनसङ्गच्छते । सङ्गतेचकेनचित्प
दानुप्रासेन । नचलाटीयानुप्रासोवानामानुप्रासो
वापदानुप्रासाद्भिद्यतइति ॥ ९ ॥ समस्तोनेकगुणो
यथा । ब्रह्माण्डच्छत्रदण्डः शतधृतिभुवनाम्भोरु

णम्प्रतिपत्तिसौकर्यार्थम्॥४॥द्वितीयमुभयंविवेचयति। स्वापेक्षयेति॥५॥
तिमिरान्धाश्चक्रवाकाः । यथाश्रुतिद्विरुक्तःपूर्वःपूर्वेणोत्तरश्चोत्तरेणस
मस्तइतिपूर्वस्माद्विशेषः । सकौतुकाकृतकङ्कणबन्धादिपरिणयमङ्ग
ला॥६॥अनङ्कगुणइति । आवृत्तिद्वैगुण्यादिनानेकगुणत्वन्नचगुणनाया
मियत्तावधारणकारणमस्तीत्यभिसन्धायतस्येयत्तानशक्यतेकर्तुमिति
पूर्वमुक्तम्॥७॥स्वेषामात्मीयानाम्मध्येयःकश्चिददोषस्तत्रदमादण्डप्रका
रानदृश्यन्तइति॥८॥यद्यप्येकपरिहाराकारोदाहरणद्वयमुचितमेवतथा
पिकञ्चिद्विशेषंविवक्षन्नाक्षिप्यसमाधत्तेनन्विति । माभूदत्रासमासो
न्यथापिनेदमुदाहरणमिहसङ्गतमित्याह । नकेवलमिति । तत्किम
नुप्रासएवायन्नभवतीतिपृच्छति । केनतर्हीति । उत्तरम्पदानुप्रासेने
ति । पदानुप्रासेनार्थभेदाभेदौविवक्षितौ । किन्तुपदाश्रयेणावृत्तिमा
त्रम्पदानुप्रासावृत्तिश्चलाटानुप्रासेप्यस्तीतिसङ्गत्यात्रेदमुदाहृतमित्य
र्थः॥९॥शतवृतिर्ब्रह्मा । तस्यभवनभूतमम्भोरुट्पद्मङ्कपोगुणवृक्षःदश

होनालदण्डः क्षोणीनौकूपदण्डःक्षरदमरसरित्पाह काकेतुदण्डः । ज्योतिश्चक्राक्षदण्डस्त्रिभुवनभव नस्तम्भदण्डोऽङ्घ्रिदण्डःश्रियस्त्रैविक्रमस्तेवितरतुवि बुधद्वेषिणांकालदण्डः । अत्रानेकशोदण्डइत्य स्यावृत्तिः । आभ्यांव्यस्तसमस्तभेदोपिव्याख्या तः ॥ १० ॥ यथा । दशरश्मिशतोपमद्युतिंयशसा दिक्षुदशस्वपिश्रुतम् । दशपूर्वरथंयमाख्ययादश कण्ठारिगुरुंविदुर्बुधाः । अत्रानेकधादशशब्दआ वर्तते ॥ ११ ॥ अव्यवहितं पिद्वैगुण्यादेर्नविरो धः । यथा । वस्त्रायन्तेनदीनांसितकुसुमधराःशक सङ्काशकाशाःकाशाभाभान्तितासान्तवपुलिनचरा श्चानदीहंसहंसाः । हंसाभाम्भोदमुक्तक्षरदमृतरु चिर्मेदिनीचन्द्रचन्द्रश्चन्द्रोङ्कशारदस्तेजयकृदुपनतो धिद्विषाङ्कालकालः॥१२॥ व्यवहिता व्यवहितभेदेपिदृश्यते । यथा । धनैर्दुष्कुलीनाःकुलीनाःक्रियन्तेधनैरे वपापान्तरानिस्तरान्त । धनेभ्योहिकश्चित्सुहृन्ना

खित्येकादशशब्दोव्यस्तोन्येत्रयःसमस्ताः ॥११॥ ननुव्यवहितएवकिङ्गु णनादिभेदोनेत्याह । अव्यवहितेपीति । वस्त्रायन्तइत्यादौकाशपद पारहारेणोदाहरणम् । तत्रहिप्रथमःकाशशब्दोभिलाषेएव ॥१२॥यत्र व्यवहिताव्यवहितयोरेकवाक्यानुप्रवेशोस्ति तत्रापिगुणनाभेदउदाह रणीयः । दृश्यतइत्यनेनयद्व्यवहितेभूयसीगुणनामहाकविप्रबन्धेषुप्र सीयतेनतदव्यवहितेपीतिपूर्वंव्यवहितमात्रेगुणनादिकमुपन्यस्तमि तितात्पर्यम् । धनैरिति । अत्रधनपदं व्यवधानेनबहीकृणनामयल म्यमानमेवचतुर्थपादेत्वव्यवहितात्वनुप्रासेपिप्रविष्टमितिभवतिव्यव हिताव्यवहितभेदता । सोयम्मदान्यासोदर्शितः ॥१३॥ एवंश्लोकाद्वौ

स्तिलोकेधनान्यर्जयध्वंधनान्यर्जयध्वम्॥१३॥योऽप
चार्द्धाभ्यासःसोपिव्यवहिताव्यवहितभेदएवयथा।
यैस्त्वंसाक्षात्कृतोनाथतेषाङ्कामेषुकोग्रहः। यैस्त्व
साक्षात्कृतोनाथतेषाङ्कामेषुकोग्रहः। अत्रपादापे
क्षयाव्यवहितत्वमर्द्धापेक्षयापुनरव्यवहितत्वम्भव
ति॥१४॥द्विभागाभ्यासस्तुव्यवहितएवस्वदते।यथा।
श्रद्धायत्रौयदिस्याताम्मेधयाकिम्प्रयोजनम्। तावु
भौयदिनस्याताम्मेधयाकिम्प्रयोजनम्॥१५॥पदाभ्या
सःपुनरव्यवहितोव्यवहितश्चदृश्यते। तयोरव्यवहि
तोयथा। सन्तःशृणुध्वंहृदयेनिदद्ध्वमुत्क्षिप्यबाहुम्प
रिरारटीमि। नसुभ्रुवान्तुल्यमिहास्तिरम्यंनसुभुवा
न्तुल्यमिहास्तिरम्यम्॥१६॥व्यवहितोयथा। मुखेनल
क्ष्मीर्जयतिफुल्लपङ्कजचारुणा। दक्षिणेनकरेणापिफुल्ल
पङ्कजचारुणा॥१७॥इवाद्यावृत्तयोपिचात्रैवद्रष्टव्याः।
यथा। लीनेवप्रतिबिम्बितेवलिखितेवोत्कीर्णरूपेव
चप्रत्युप्तेवचवज्रलेपघटितेवान्तर्निखातेवच।सानश्चे
तासिकीलितेवविशिखैश्चेतोभुवःपञ्चभिश्चिन्तासन्त
तितन्तुजालनिबिडस्यूतेवलज्जाप्रिया॥१८॥यमका

न्यांसोव्यवहिताश्चयवहितभेदएवभवतीत्याह। योपीति॥१४॥अद्धायदा
विति। अत्रयदिस्यातामितिपादभागेनसहपादावृत्तिस्त्रिभागावृत्तिर्भ
वति॥१५॥१६॥मुखेनेति। फुल्लपङ्कजमियचारुफुल्लेनपङ्कजेनचारुरितिय
द्यपिवृत्त्यर्थोभिद्यतेतथापिपदानामभिन्नार्थंचादुदाहरणता॥१७॥अ
र्थाभेदइतिनार्थशब्दोभिधेयवचनःकिन्तुशब्दप्रतिपाद्यमात्रवचनइत्या
शयवानाह। इवादीति॥१८॥ननव्यन्येपिपदावृत्तिप्रकाराःकिमितिनो
दाहृताइत्यतआह। यमकानांहीति। भेदभक्तयोवान्तरप्रकारविच्छि

नांहि यावन्त्यो वर्ण्यन्ते भेदभक्तयः ॥ अनुप्रासस्य लाटानाम्भिदास्तावन्त्य एव हि ॥ १ ॥ उपमादिवियुक्तापि राजते काव्यपद्धतिः ॥ यद्यनुप्रासलेशोपि हन्त तत्र निवेश्यते ॥ २ ॥ कुण्डलादिवियुक्तापि कान्ता किमपि शोभते । कुङ्कुमेनाङ्गरागश्चेत्सर्वाङ्गीणः प्रयुज्यते ॥ ३ ॥ श्रुतिवर्णानुप्रासावेकविधौ कुन्तलेषु गौडेषु । पदयोर्निरनुप्रासो द्वेधा त्रेधा च लाटेषु ॥ ४ ॥ ॥ १५ ॥ वर्णस्थानस्वराकारगतिबन्धान्प्रतीहयः । नियमस्तद्बुधैः षोढा चित्रमित्यभिधीयते ॥ १ ॥ वर्णशब्देन चात्र स्वराणाम्पृथङ्निर्देशाद्व्यञ्जनान्येव प्रगृह्यन्ते । तत्र वर्णचित्रेषु चतुर्व्यञ्जनं यथा । जजौजो

तयः स्थानास्थानपादभेदलक्षणाः श्लोकावृत्तिः परमत्र नास्तीति यमकादपकर्षः ॥ १ ॥ प्रकरणान्तेनुप्रासव्युत्पादनप्रयोजनमाह । उपमादीति । अनुप्रासलेशोपीति । वर्णाद्यनुप्रासः ॥ २ ॥ श्रुतिवृत्त्यनुप्रासौ तु सन्दर्भव्यापकावेव प्रशस्ताविन्युदाहरणव्याजेनाह । कुण्डलादीति ॥ ३ ॥ एतदेव खण्डसरस्वतीषु कविषु न तथा काव्यसिद्धिरिति दर्शयन्द्रढयति ॥ श्रुतिवर्णानुप्रासाविति ॥ ४ ॥ क्रमप्राप्तश्चित्रलक्षणमवतारयति । वर्णेति । चित्रमालेख्यन्तदिवजीवितस्थानीयध्वनिरहितञ्चित्रमिति काश्मीरकाः । तदसत् । ध्वनेः प्राधान्यानङ्गीकारात्प्रतीयमानमात्राभावस्य क्वचिदप्यसम्भवात् । यद्वा आकृतिविशेषयुक्तञ्चित्रमिति तदपि न । अव्यापकत्वात् । अतो वर्णादिनियमेन प्रवृत्तमाश्चर्यकारितया चित्रमित्येवयुक्तम् । वर्णा व्यञ्जनानि । स्थानङ्कण्ठादिः स्वरा अकारादयः । आकारः पद्माद्याकृत्युन्मुद्रणम् । गतिः पठितिभङ्गविशेषः । बन्धो विविष्ठितिप्रभृतिः ॥ १ ॥ पञ्चप्रभृतिनियमेन तथाशक्तिव्युत्पत्त्योरुत्कर्ष इति चतुरादिगृह्णाति । तत्रेति । अवश्यं योद्धा जाजी । जजेर्युद्धार्थादावश्यकेणिनिः । जजायुद्धशौण्डाः । तेषामोजसा जातायाऽऽजिः संग्रामस्त

जाजिजिज्जाजीतन्ततोतिततातितुत्। भाभाभाभा
भिभूभाभूरारारिररिरीररः ॥१॥ त्रिव्यञ्जनं यथा। दे
वानान्नन्दनोदेवोनोदनोवेदनिन्दिनाम्। दिवन्दु
दावनादेनदानेदानवनन्दिनः ॥ २ ॥ द्विव्यञ्जनं य
था। भूरिभिर्भारिभिर्भीराभूभारैरभिरेभिरे। भेरी
रेभिभिरभ्राभैरभीरुभिरिभैरिभाः ॥ ३ ॥ एकव्यञ्ज
नं यथा। ननोननुन्नोनुन्नेनोनानानानाननाननु।

ञ्जयतीतिक्विप्। तंवेणुदारिणन्ततोनन्तरंअतिततान्। चतुरङ्गबले
नप्राप्तविस्तारान्। आतिनःसततगमनशीलान्। तुदतीतिक्विप्।
भानान्दीप्ततारानुरूपाणांशुक्रबृहस्पत्यादीनामाभेवाभाकान्तिर्यस्ये
त्युपमानपूर्वपदबहुव्रीहौउत्तरपदलोपेचभाभःअभियोभयशून्यानिभा
नभिभवतीतिक्विप्। अभीभाभिभूस्तादृशीयाभातेजस्तस्याभूराश्रयआ
रजगामअरिःशत्रुःबलभद्रइत्यर्थः।अरीणांरीःसञ्चरणंरीङ्गताविति धा
त्वनुसारात्। तस्याईरोधूननंरातिददातिअरिररः॥१॥देवःसृष्टिस्थिति
संहारक्रीडारतःदानवनन्दीहिरण्यकशिपुस्तस्यदानेखण्डनेयोनादोव
क्षःकपाटपाटनकटकटाशब्दस्तेनदिवंस्वर्गन्दुदावकिमेतदित्याकस्मि
कसम्भ्रमेणोपतापयामास। जगत्कण्टकनिराकरणाद्देवानान्नन्दनआ
नन्दकृत्। वेदनिन्दिनाञ्चनोदनःप्रतिक्षेपकः। सामान्याभिप्रायेणै
कवचनम् ॥ २ ॥ भूरिभिर्बहुभिर्भारिभिःप्रकृतिसारभारवाहिभिरति
प्रमाणकायतयाभुवोभारभूतैरन्तःकांस्यभाजनोनिःस्वानोभेरीतद्वद्रेभि
भिः। रेभृशब्देइतिधात्वनुसारात्। अभ्राभैःप्रथमोन्नतमेघकान्तिभि
रिभैर्हस्तिभिर्भियंरान्तिप्रयच्छन्तीतिभीराइभाःप्रतिद्विपा अभिरेभिरे
अभियुक्ताः ॥ ३ ॥ ननो। नानानना विविधाकारवदनागणा
ऊनेनहीनेननुन्नोजितो नानन पुरुषःस्तथानुन्नइञः प्रभुर्यस्य
सोप्यात्मनिजीवतिपुरुषोऽपुरुषएव। यतोननुन्नेनोऽजितप्रभुर्नु
न्नोप्यनुन्नएव। तथानुन्ननुन्नःजितइवक्लीबतयापराभूतइतिप्रकारे

नुन्नोनुन्नोननुन्ने नोनाने नानुन्ननुन्ननुन् ॥ ४ ॥ क्रमस्थसर्वव्यञ्जनयथा । कःखगौघाङ्चिच्छौजाझा ञ्ञोटौठीडढणः । तथोदधीन्पफर्बाभीर्मयोरि ल्वाशिषांसहः ॥ ५ ॥ छन्दोक्षरव्यञ्जनयथा । स रत्सुरासतिभयायजाग्रनोजलत्यलंस्तौनृजनस्यजा यताम् । स्मितंस्मरारेर्गिरिजास्यनीरजेसमेतन त्रितयस्यभूतये ॥ ६ ॥ षड्जादिस्वरव्यञ्जनयथा । साममारिधमनीनिधानिनीसामधामधनधामसा

गुणवचनस्येतिद्विरुक्तिः । तमपियोनुदतिसनानेनाननिष्पापः अन्त्यायार्पकान्त्यवर्णगुरुत्वोन्मेषमात्रप्रयोजकत्वकारोनवृत्तिशरीरस्यगुरुर्गतइतिद्विव्यञ्जनतानाशङ्कनीया॥३॥ क्रमस्येति । वर्णसमाम्नायेनैकमेणकादयोमावसानाःपठितास्तेनैकमेणव्यञ्जननिवेशः । कःखगौघश्चतत्प्रसिद्धावदानपक्षिसमूहंसञ्चतीतिक्विनिसंयोगान्तलोपेकृतेचखगौघाङ्किरूपम् । चितंसंविद्लातिक्विनीतिचिच्छब्दोजस्तत्प्रियश्चासावचिच्चौजाः । ऋमुञ्जदनेभ्यस्त्रिप् । अनुनासिकस्यक्विझलोःक्ङितीत्युपधादीर्घोमोनोधातोरितिनकारइतिझान्परयल भतकोञ्ञःपण्डितस्तोष्णुनाशुरितिनकारस्यञ्कारः । अटाःसङ्घामाङ्गणपर्यटनशीलाःसभटास्तानोठतेबाधतइतिक्विप् । ठठगताविति धातोरूपम् । तेषामीडीश्वरः । अडढणो ऽचपलःडढणइत्यनुपलवाचिप्रातिपदिकम् । तथाअभीर्भयरहितः । एवंविधःक्रोनामायमुदधीन्पफर्ब । पूरयामासतिप्रश्नः । उत्तरमरीन्लुनन्तियाआशिषनासांसहःक्षमोमयोदैत्यराजइति॥५॥ छन्दोक्षरेति । स्वरव्यञ्जनगणालाम्छन्दोविचितिवेदिभिः । दशैववर्णानिर्णीतास्छन्दोरूपप्रसिद्धये । तन्मात्रव्यञ्जननिबद्धश्छन्दोक्षरव्यञ्जनम् । सुबोधमुदाहरणम् ॥६॥ षड्जादीति । सरिगामपधानिश्चवर्णाःसप्तस्वरादयः । षड्जादिकृतसङ्केतादृष्टागास्यर्थवेदिभिः । तन्मात्रव्यञ्जनमषड्जादिस्व

धिनी । मानिनीसगरिमापपापपासाऽऽपगासमस
मागमासमा ॥ ७ ॥ मुरजाक्षरव्यञ्जनं यथा । स्व
रगरकालितकण्ठमन्थितगदम्मकरकेनुमरणकरम् ।
तडिदितिरुरुमुण्डहरंहरमन्तरहंदधेघोरम्॥८॥चतुः
स्थानचित्रेषुनिष्कण्ठंप्रथा । भूरिभूतिम्पृथुप्रीति
मुरुमूर्त्रिपुरुस्थितिम् । विरिञ्चिसूचिरुचिधीःशुचि
भिर्नुतिभिर्धिनु॥९॥निस्तालव्यंयथा । स्फुरत्कुण्ड
लरत्नौघमघच्छुनुकर्बुरः । मेघनादोथमङ्क्ष्मेप्राप्त
दृकालवद्बभौ ॥१०॥ निर्दन्त्यंयथा । पद्मापहारी
रणकर्मशौण्डश्चण्डीशभिश्चोममचक्रपाणिः । मू

ञ्जनम् । सहस्रमविष्णुनावर्त्ततेष्टतिसालक्ष्मीः।अरीन्धमतितापयती तिधमतेर्ल्युटिबहुलवचनमन्यत्रापीतिधमादेशः । एवंविधाममभूया दितिशेषः । निधानिनीपद्मादिनिधानवती । साम्नःसाम्नस्थया मगृहम् । धनिनान्धामसाधनी तेजःप्रसाधिका । मानिनीपूजा वतीसगरिमागौरववतीअपपापान्निष्कलुषान्पातीत्यपपापपा । से तिप्रसिद्धविभवाआपगानदीतत्तुल्यःक्षणविसर्पिभङ्गुरःसमागमोयस्याः सातथा । असमाअनुपमा॥७॥मुरजेति । पाठाक्षराणिमुरजेलहकारौ तथदधाच्छमौरेफः । नणकखगघङाश्चेत्यषोडशभरतादिकथितानि। तन्मात्रविरचितम्मुरजाक्षरव्यञ्जनम् । सुबोधमुदाहरणम् ॥८॥वर्णव स्थानेष्वपिचतुरादिनियमेनचित्रम् । यद्यपिदन्तौष्ठ्यानानिवर्णानां मुरःकण्ठःशिरस्तथा । जिह्वामूलञ्चदन्ताश्चनासिकोष्ठौचतालुचेति । तथापिजिह्वामूलीयस्यस्वरस्यादुरस्यमासिक्ययोःकाठ्यप्रवेशाभावादु रोनासिकाजिह्वामूलपर्य्युदासेनस्थानपञ्चकेचतुरादिनिरूपणम् । ईशू चिरुचिधीःशुचिभिःशुद्धाभिर्नुतिभिःस्तुतिभिर्यैरुक्तविशेषणंविरिञ्चि ब्रह्माणन्धिनुप्रीणयेति । अकुहविसर्जनीयाःकण्ठ्याः॥९॥कुखरस्फरत्की रएवकण्ठतोधनुस्तेनकर्बुरोमेघनादनामराक्षसः । इक्ष्वयशाक्षाल

याच्छ्रियापश्रमयेक्ष्यमाणोमोक्षायमुख्यामरपूगपू
ज्यः॥११॥निरोष्ठ्यंयथा।नयनानन्दजननेनक्षत्रगण
शालिनि। अघनेगगनेदृष्टिरङ्गनेदीयतांसकृत्॥१२॥
निर्मूर्द्धन्यंयथा। शलभाइवधावन्तःसायकास्तस्य
भूभुजः। निपेतुःसायकच्छिन्नास्तेनसंयुगसीमनि
॥१३॥त्रिस्थानचित्रेषुनिरोष्ठ्यदन्त्यंयथा।जीयाज्ज
गज्ज्येष्ठगरिष्ठचारश्चक्रार्चिषाकृष्णकडारकायः। ह
रिर्हिरण्याक्षशरीरहारीखगेशगःश्रीश्रयणीयशय्यः
॥१४॥निरोष्ठ्यमूर्द्धन्यंयथा।अलिनीलालकलतङ्कन्नह
न्तिघनस्तनि। आननन्नलिनच्छायंनयनंशशिका
न्तिते॥१५॥द्विस्थानचित्रेषुदन्त्यकण्ठ्यैर्यथा।अनङ्ग
लङ्घनालग्ननानातङ्कासदङ्गना। सदानघसदानन्द
नताङ्गीसङ्गसङ्गन॥१६॥एकस्थानचित्रेषुकण्ठ्यैर्यथा।

ख्याः॥१०॥चण्डीशमिश्रःपरमेश्वरेणैकशरीरतामापन्नोमुख्यामराब्रह्माद
यः। तुलसादन्त्याः॥११॥अघनइति। शरत्कालशोभयादृश्यतमे। उ
पूपध्मानीयाओष्ठ्याः॥१२॥तेनकपिलेनराज्ञातस्यकोसलाधिपस्यप्रसेन
जितः।ऋटुरषामूर्द्धन्याः॥१३॥निरोष्ठ्यन्दन्त्यमिति। अनेनैवद्विकान्तर
परिहारेणलोष्ठप्रस्तावोगवेषणीयः॥१४॥तथोत्तरत्रापि॥१५॥सदानघअ
नवद्य। सदैवप्रियालाभेनानन्दयुक्त। नताङ्ग्याःकस्याश्चिदन्यस्याः
सङ्गेसङ्गतेतवशोभनाङ्गनाकामाक्रमणप्राप्तनानारूपतयावर्त्तते। अत
स्तामनुकम्पस्वेतिसोपालम्भप्रार्थनावाक्यार्थः॥१६॥ गाङ्गकङ्गङ्गासम्ब
न्धिजलंतस्याकःकुटिलागतिः। अकअगकुटिलायाङ्गताविति। तस्या
ङ्ककस्यतन्मध्यस्यगाहकोविलोलकःकुत्सितमघम्पापमघकंसएवकाक
स्तंहतवानघकाकहा। अन्येतु विसर्गान्तम्पठन्ति। तदाजहाते
र्विचिरूपम्। एवंविधस्त्वङ्गांस्वर्गंअगाःयायाइति। आशंसायाम्भूत
प्रत्ययः। कीदृशःसन्हानंहाःनहाअहास्ताञ्जिहीतेप्राप्नोतीति आह

अगाग।ङ्गागकाक।ङ्ग।हकाघककाकहा। घ्रहाहाङ्ग
खग।ङ्गागगकङ्ग ङ्गखगाङ्कग॥१७॥स्वरचित्रेपुङ्स्वैक
स्वरंयथा। उरुगुङ्द्युगुरुंवृत्सुचुक्रुशुःस्तुष्टुवुःपुरु।
लुलुभुःपुपुषुर्मुत्सुमुमुहुर्नुमहुर्मुहुः॥१८॥ दीर्घैकस्वरंय
था। वैधरैनरैशैरैद्रैजैरलैर्जैनैःसैद्धैः। मैत्रैर्नैकैर्दै
र्यैर्वैरैर्दैस्वैस्वैरैःदैवैस्तैस्तैः॥१९॥ह्रस्वद्विस्वरंयथा।क्षि
तिःस्थितिमितिक्ष प्रविधिर्विन्निधिसिद्धलिट्। म
मन्यक्षनमहक्षहरस्मरहरस्मर॥२०॥दीर्घद्विस्वरंयथा।
श्रीद्रीह्रीक्रातीचीनीतीगीप्रीतो। एधेतद्धेतेय

हलादृशमङ्गंयस्यसखगोगरुडःसूर्योवासोङ्कश्चिद्भूतोयस्यतादृशोगो
ऽर्योन्मेरुस्तद्वर्त्तिनःकङ्काख्याअगखगावृक्षनिवासिनःपक्षिणस्तेपि
आकाकङ्कागमनस्यहयालवोयस्यसतथाआस्तान्तावदन्येपतत्रिणोपि
अभिनन्दितगमनहत्यर्थः॥१७॥ स्वरचित्रेप्येकादिकमेणोपन्यासोग्रन्थ
वैचित्र्यार्थः। उरुगुंविस्तीर्णवाचम्। द्युगुरुंस्ववांसिनामाचार्यम्। पु
रुषपुरुषार्थनिमित्तात्कर्मयोगइतिसप्रभौ। गीर्वाणभटाश्चुक्रुशुरार्ता
शरणंययाचिरे। अतएवपुरुबहुधातुष्टुवुः। युद्धप्रयोजनमाह। पु
रुसुहुर्मुपुलुलुभःपुपुषुःपशावभूवुःसुवितर्के। मुहुर्मुहुर्वारंवारकृत्रिमु
मृदुर्मोहमासादितवन्तः। यतःक्रोशनादीनामत्यवस्थेतिभावः॥१९॥त्रि
धिर्विरिञ्चिः। ईलत्मीस्तस्याइनःप्रभुर्विष्णुरीशोमहादेव इन्द्रोका
सवईजःकामोलक्ष्मीपुत्रत्वात्। इलापृथ्वी। जिनोबुद्धःसिद्धोदेवर्षि
शेषामित्रःसूर्यैरैदोधनदःकुबेरोदेवाउक्तव्यतिरिक्तामरुदादयः। ए
षांसम्बन्धिभिर्यैर्यैर्धृतिभिःस्वैर्वित्तैश्चनैकैरनेकविधैस्तैस्तैःप्रसिद्धकरैर
ह्रस्वैरैसुसुआसमन्ताससृद्धोभवानीत्याशंसावैवाक्यालङ्कारे॥१९॥क्षि
तिःपृथ्वीतस्याधितिःपालनक्षितिर्मानंक्षमिःसंहारस्तद्विधिरिति।
निधिसिद्धीलेढीतिक्विप्। नमनभ्रगतेजादक्षोयस्मात्। स्मरहरका
मदहन। त्र्यक्षत्रिनयनहरमहादेवममस्मर। अधीमर्थयोगेकर्मणि

नमेदेवेशे॥२१॥त्रिस्वरेषुह्रस्वत्रिस्वरंयथा। क्षितिविजितिस्थितिविहितिव्रतरतयःपरगतयः। उरुरुरुधुर्गुरुद्युधुवुःस्वमरिकुलंयुधिकुरवः॥२२॥चतुःस्वरेषुदीर्घस्वरंयथा। आम्नायानामाहान्त्यावाग्गीतीरीतीःप्रीतीभीतीः। भोगोरोगोमोहोमोदोध्येयेचेच्क्षेत्क्षेमेदेशे॥२३॥प्रतिव्यञ्जनविन्यस्तस्वरंयथा। तापेनोग्रोस्तुदेहेनोहेयेविल्लोभिनिन्दिना। जायाग्रेहिगुणिप्रेष्ठहितक्षेपोमृतोक्षिणि॥२४॥तदेवापास्तसमस्तस्वरंयथा। तपनग्रस्तदहनहयवल्लभनन्दन। जयग्रहगणप्रष्ठहतक्षपमतक्षण॥२५॥१६॥

ष्टी। श्रीदीप्तीलक्ष्मीतेजसी। ह्रीकीर्त्तीलज्जायशसी। धीनीतीबुद्धिनयौ। गीःप्रीतीवाक्प्रमोदौ। इमेयेदेवेशेपिनस्तस्तेद्वेतवएधेतेवर्द्धेते॥२१॥ क्षितेर्विजितिर्विजयःस्थितेर्वर्णाश्रममर्यादालक्षणायाविहितिर्विधानन्तदेवव्रतन्तत्ररतिर्येषाम्पराश्रेष्ठागतिर्ज्ञानंयेषान्तेतथाएवंविधाःकुरवःस्वद्विषांकुलमुरुविस्तीर्णंरुरुधुस्तदेवगुरुमहद्दुधुवुःकम्पयामासुः॥२२॥आम्नायानांवेदानामन्त्यावागुपनिषत्साहिताहितप्रतिपादनपराकिमाह। यागीतयस्ताईतयउपसर्गायाः प्रीतयस्ताभीतयोभयानि योभोगःसरोगोयोमोदोहर्षःसमोहोनपरमेवमाहकिन्तुयावद्येयेध्यातव्येक्षेमेक्लेशरहितेदेशेविषयेमोक्षलक्षणेइच्छेर्दिच्छाङ्कुर्यादिति। वाशब्दःसमुच्चये। अन्येचकारमेवपठन्ति॥२३॥ हेयेहातव्येवस्तुनियाविल्लाभोविद्लृलाभइतिधात्वनुसारात्। तत्रयेलोभिनोलोभवन्तस्तन्निन्दनशीलेनतापेनतेजसार्थादुग्रश्चण्डरश्मिःसमम देहेऽस्तु तेजस्वीभवानीतियावत्। किमित्येवमाशास्यतइत्यतआह। अमृतस्यन्दिनि कान्तागुणिनाम्प्रियतमोऽक्षेपोऽविलम्बएवहितोऽर्थतःसमरस्य॥ इतिदत्वाशिषंशोपिस्वस्मैकार्मुककर्मणे। जगामसमरंकर्त्तुमरिलक्ष्मीस्वयंवरम्॥२४॥ ग्रस्तदहनअभिभूतपावकह

आकारचित्रेष्वष्टदलंयथा ॥ याश्रितापावनतयायात नच्छिदनीचया। याचनीयाधियामायायामायासंस्तु ताश्रिया॥ अत्र। कर्णिकायान्न्यसेदेकन्द्वेद्वेदिक्षुविदिक्षुच। प्रवेशनिर्गमौदिक्षुकुर्यादष्टदलाम्बुजे ॥ १ ॥

प्रथमाष्टदलकमलबन्धः ।



द्वितीयमष्टदलंयथा। चरस्फारवरक्षारवरकारगरज्वर। चलस्फालबलक्षालवलकालगलज्वल ॥ अष्टधा

यवल्लभोरेवन्तः सतनयोयस्य हतक्षपअपहृतरात्रेमतक्षणसम्मतोत्सव ॥ २५ ॥ ॥ १६ ॥ याश्रितेत्यादिकमुदाहरणंप्रागेवव्याख्यातमतःपरं हारिहरीव्याख्यासाप्यत्रैवलिख्यते । तद्यथा । यादेवीपवित्रत्वेनाश्रिताअनीचयातुङ्गयावुद्ध्या मायामस्याविद्याविस्तारस्यायासङ्ग्लानिं विच्छेदंयाचनीयायतोयातनन्नरकानुभवनीयन्दुःखंछिनत्तिश्रियास्तुता।अस्यन्यासमाह।कर्णिकायामिति। आद्योयावर्णःकर्णिकायांश्रितेति पावेतिक्रमेणद्विकन्द्विकमष्टपत्रेषु। याश्रिताश्रियेत्यादौदिग्दलेषुप्रवेश निर्गमौ॥१॥चरस्फारेत्यादि।सञ्चरणशीलःस्फारोयोवरस्तंक्षरतिददाती ति।वराञ्छ्रेष्ठान्किरतिक्षिपतिकृणोतिहिनस्तिवेतिकर्मण्यण्। गरःका लकूटस्तस्यज्वरोज्वरणात्। ताण्डवारम्भेचलाःस्फालायस्यबलक्षधवल

कर्णिकावर्णःपत्रेष्वष्टौतथापरे । तेषांसन्धिषुचाप्य
ष्टावष्टपत्रसरोरुहे ॥ २ ॥ ॥

द्वितीयाष्टपत्रबन्धः ।



तृतीयमष्टपत्रंयथा । नशशीशनवेभावेनमत्कांमनत
व्रत । नमामिमाननमननुत्वानुनयन्नयम् । अ
त्र । प्राक्कर्णिकाम्पुनःपर्णम्पर्णाग्रम्पर्णकर्णिके ।
प्रतिपर्णंव्रजेद्धीमानिहत्वष्टदलाम्बुजे ॥ एवञ्चतु
ष्पत्रषोडशपत्रेष्वपिद्रष्टव्ये ॥ ३ ॥

देहीलवंलप्राप्रशक्तेकालगलनीलकण्ठज्वल दीप्यमानोभव ॥ न्यासमा
ह।अष्टधेति । अत्रप्रथमार्द्धेएकस्वरेफोष्टधाकर्णिकायाम्। अपरार्द्धस्या
न्यं पौलकारवर्जन्दलेषुतेषांसन्धिष्वन्ये पौलकाराः॥२॥ नशशीशेत्यादि।
शशीशेचन्द्रेनवेभावेभक्तौस्थितइतिशेषः । त्वासहनमामिकाक्कानमा
म्येव । नमन्भग्नःकामोयस्मात्तत्सुपनतंत्रतंयस्यसंयमिधीरेयत्वा न्मा
ननमनशत्रूणामुन्नतिनाशनंनन्वितिपूजासम्बोधने। त्वाइतित्वामनुन
यन्विनयङ्कुर्वाणोयम् । न्यासमाह। प्राक्कर्णिकामिति।पूर्वंकर्णिकाया
माद्योनकारोग्राह्यस्ततः शेतिपर्णमध्येशीतिपर्णाग्रेपरावृत्त्यपर्णकर्णि
कयोःशकारनकारौपुनःकर्णिकातोदलाग्रगमागमेपि । अयमेवक्रमश्च

तृतीयाष्टपत्रबन्धः ॥



तयोश्चतुष्पत्रंयथा । सासवात्वासुमनसासानतापी
वरोरसा । सारधामैतिसहसासाहसर्द्धसुवाससा ।
कर्णिकातोनयेदूर्ध्वम्पत्राकाराक्षरावलीम् । प्रवेश
येत्कर्णिकायाम्पद्ममेतच्चतुर्दलम् ॥ ४ ॥

चतुष्पत्रकमलबन्धः ॥



तुर्दलपद्मे॥३॥सासवेत्यादि । सासवाआस्वादितसदिरा।पीवरेणास्तना
ढ्येनोरसानता । सारधामाउत्कृष्टकान्तिःसहसासहास्या अकस्मा
द्वाष्टङ्कारोद्दीपनस्वभावेनमार्गशीर्षणहेतुनाशोभनेनवाससाचलिता
हेसाहसर्द्धसर्वनिशीथाभिसरणसाहसरसिकत्वामेतिउपगच्छतीति ।

षोडशपत्रंयथा ॥ नमस्तेमहिमप्रेमनमस्याऽमति मद्दम। शामसोमनमत्कामधामभीमसमक्षम ॥ गोमूत्रिकाक्रमेणस्युर्वर्णाः सर्वेसमाःसमाः। मध्येमवर्णावन्यासात्पद्मोयंषोडशच्छदः ॥ ५ ॥

षोडशपत्रकमलबन्धः



अष्टपत्रमेवकविनामाङ्कंयथा । रातावद्याधिराज्याविसररसविद्याजवाक्क्ष्मापकारारकापक्ष्मामशेषानयननयनस्वाखयास्तव्यमारा । रामाव्यस्त

न्यासमाह । कर्णिकेति।सुबोधमेतदिति॥४॥षोडशपत्रमाह।नमस्तइत्यादि। महिमनिप्रेमायस्यतन्नमस्यऽमतिमतोदाम्यतीतिऽमतिमद्दम। द्दामःकलामात्रेणचूडासङ्गतःसोमोयस्य । नमनभग्नःकामोयस्मात् । धाम्नातेजसाभीमभयानकसमासकलव्युत्थानहेतुसाधारणीद्दमायस्य अस्यैतानिसम्बोधनविशेषणानितेतुभ्यंनमस्कुरुतेकश्चिदिति । न्यासमाह । गोमूत्रिकेति । वर्णसकारव्यतिरिक्ताःसमाःसकारसहिताःसमाःसमाइतिवीप्साप्रतिवर्णंसकारसाहित्यबोधनार्था ॥५॥ अष्टपत्र

स्थिरत्वातुहिननन हितुःश्रीकरक्षारधाराराधारक्षा स्तुमह्यंशिवममममवशिव्यालविद्यावतारा ॥ निवि ष्टाष्टदलन्यासमिदम्पादार्द्धभक्तिभिः । अस्पृष्टकर्णि कङ्कोणैःकविनामाङ्कमम्बुजम् । तत्राङ्कोराजशेखरक मल । एतेनचक्रमपिव्याख्यातम् ॥ ६ ॥

अष्टदलकमलबन्धः ॥



मेवकविनामाङ्कमाह । रातावद्येति । गीर्वाणसुभटः कश्चिद्युयुत्सु र्दैत्यसेनया । तत्कालकृतसान्निध्याम्मायादेवीमपूजयत् । तथाहि । व्याजोमायासैववाग्रूपाव्याजशब्दोपपदंवागभिधानंयस्याःसामह्यंरक्षा स्त्वितिसम्बन्धः । रातन्दत्तमवद्यन्दोषबहुलमाधिराज्यमवद्याआधयो यत्र तादृशंवा राज्यं यया विशिष्टंसरणं विसरस्तंराति प्रयच्छतियो

चक्रंयथा । सत्वमानविशिष्टमाजिरमसादालम्ब्य भव्यः पुरोलब्धाघक्षयशुद्धिरुद्धुरतरश्रीवत्सभूमिर्मुदा। मुक्त्वाकाममपास्तभीःपरमृगव्याधःसनादंहरे रेकौघैःसमकालमभ्रमुदयीरोपैस्तदातस्तरे ॥ पुरःपुरोलिखेत्पादानत्रत्रीन्षडरीकृतान्। तुर्यन्तुभ्रमयन्ते मौनामाङ्कश्चक्रसंविधिः । अत्राङ्कः । माघकाव्यमिदंशिशुपालवधः ॥ ७ ॥

रसोर्याद्वीरस्तंवेत्तिविन्दन्तिषा या त्मायाम्पृथिव्यामपकारःपुत्रकलत्रादिरूपोयस्याःसकाशादितिगमकत्वाद्बहुव्रीहिः । राकापुर्णिमाद्वादशवर्षदेशीयकन्यारूपावा । पद्मभःशरीरसंलग्नःशेषःसर्पोयस्यानयनन्नीतिस्तान्नयतीतियन्नयनन्दृष्टिर्ज्ञानमितियावत् । तदेवस्वमात्मायस्याःखेभ्योन्नियातीतिखयास्तब्धोभारोमारणङ्कामोवायस्याःसारासारमणीयास्त्रीरूपावाव्यस्तंविनाशितंस्थिरत्वंयया तुहिनन्नयतिप्रापयतीतिनयतेर्डप्रत्ययेतुहिननश्चन्द्रस्तस्यनहितुर्जटाजूटेबन्धयितुःपरमेश्वरस्यश्रीःशक्तिरूपानह्यतिबध्नातीतिनहेर्विचिनहंस्तुतिमासादयतीतिसर्वप्रातिपदिकेभ्यः क्विब्वक्तव्यइतिक्विपितुजन्तस्यरूपम् । कं सुखंरातिददातीतिकरस्तस्यचारभूतादस्यवस्तेषाङ्गाद्दिधारेवधारा च्छेत्री राधेतिदेव्याःपौराणिकनाम मत्रेत्यव्ययम्भावप्रधानंशिवेन मत्वम्भान्तिपरिच्छिन्दन्तियेवशिनोयोगिनस्तेषामपिव्यालविद्याक्षुद्रविद्यामवतारयतियासातथा। न्यासमाह । निविष्टेति ॥ अष्टभिःपादैर्विष्टदलविरचना । यद्वर्णाष्टकंनाम्नोत्तिष्ठतिदाह्य । राजशेखरकमल । कविकाव्यनामलाभाद्विभक्तिकत्वमप्यदोषः । एतेनेति॥ नामाङ्कपद्मकथनेनचक्रमपिनामाङ्कमवसेयम् ॥६॥ सत्वमित्यादि । हरेर्नादंसिंहनादंरोषैर्वाणैराजिरमसात्सङ्ग्रामहर्षादुद्धुरतरश्रीवत्सभूमिरुन्नतहृदयःसत्वमालम्ब्यमानेनविशिष्टमितितद्विशेषणम् । प्राप्तपाप विनाशोमुदाहर्षेणअपगतभीः शत्रुर्हरिणव्याधोऽजमाकाशम्विदधेत दातस्मिन्कालेसिंहनादम्मुक्त्वाइतिसम्बन्धः। न्यासमाह॥ पुरइति।पु

षडरचक्रबन्धः ॥



एवञ्चतुरङ्कमपियथा ॥ शुद्धम्बद्धसुरास्थिसारविष मत्वंरुग्जयातिस्थिरभ्रष्टोद्धर्मरजःपदङ्गविगवाक्षीणे नचञ्चद्भुवा । तथ्यञ्चिन्तितगुप्तिरस्तविधिदिग्भे दन्नचक्रंशुचाचारोप्रांशुरदभ्रमुग्रतनुमेरम्योभवानी रुचा । अत्राङ्कः । शुभ्रतरवाचाबद्धचितिचक्रराज गुरुणेदंसादरमवादि ॥ ८ ॥

रःपुरोलिखित्वाऽन्यानग्रेलिखेद्यथाषडराःसम्पद्यन्ते ॥ ७ ॥ यथा वाशुद्धमित्यादिचक्रस्मेसमगविवाचिशुद्धमकलुषत्वर्मादुत्क्रान्तमुद्धर्म मीदृशंयद्रजोराजसभावस्तस्यपदंस्थानन्तद्भ्रष्टंविनष्टंयस्मादस्ताविधि दिग्दैवपारतन्त्र्यंयत्रतथाविधं शुचाशोकेनचनवक्रीकृतमनपहतंम

द्वितीयषडरचक्रबन्धः ॥



गतिचित्रेषुगतप्रत्यागतंयथा । वारणागगभीरासा
साराभीगगणारवा । कारितारिवधासेनानासेधाव

दम्नमुपचितंयद्भद्रंकल्याणन्तत्तनुविस्तारयेतिप्रार्थना । बद्धैरलङ्कारीकृ
तैः सुराणाम्ब्रह्मादीनांसारंशिरस्तदस्थिभिर्बद्धमुण्डमालाभिर्भयान
क । रुजांरोगाणाञ्जयेनातिस्थिर । अक्षीणेनोपचितेनचञ्चद्भ्रुवा
साह्लादेनगवावृषेणलक्षित । तथ्यमितिक्रियाविशेषणम् । चिन्ति
तागुप्तिर्भूतानांरक्षायेन । चारोरमणीयः । उग्रोमहादेवस्त्वमप्रांशुः
सर्वस्मादुच्चैःपदेस्थितोभवानीरुचावामार्द्धस्थितपार्वतीकान्त्यारम्यस्त
न्वितिसम्बन्धः । अत्रपूर्ववदेवन्यासः । अङ्कास्तुचत्वारइतिविशे
षः ॥८॥ इदानीङ्गतिचित्रप्रस्तावः । वारणेत्यादि । वारणाएवअगाःप

रितारिका ॥ अत्रायुक्पादयोर्गतिर्युक्पादयोःप्रत्या
गतिः ॥९॥ तदक्षरगतंयथा । निशितासिरतोभीको
न्येजतेमरणारुचा । चारुणारमतेजन्येकोभीतोरसि
ताशिनि ॥ अत्रगतप्रत्यागताभ्यांसएवश्लोकः ॥१०॥
श्लोकान्तरं यथा । वाहनाजनिमानासेसाराजाव
नमाततः । मत्तसारगराजेभेभारीहावज्जनेध्वनि॥
अत्रप्रातिलोम्येनापरःश्लोकोभवतियथा । निध्वन
ज्जवहारीभाभेजेरागरसात्तमः । ततमानवजारासा

र्वैतास्तैर्गभीरादुरवगाहासाराश्रेष्ठाभियंयेनयान्तितादृशानाङ्कषाणामा
रवोयत्र । सारोवाभीगगणारवोयत्र । कारितःकृतोरीणांवधोयया ।
स्वार्थेणिच् । आसेधःपरैःप्रतिषेधस्तेनहीना । वरिताःसुभटैर्युद्धार्थं
माहूताश्चरयोयस्यांसातथा । वरईप्सायामितिधातोःक्तप्रत्ययेवरिते
तिरूपसिद्धिः । अत्रायुक्पादयोःप्रथमतृतीययोरानुलोम्येनवर्णाव
लीङ्गृहीत्वातत्प्रतिलोमरूपौयुक्पादौद्वितीयचतुर्थौगृह्येते । पठितेवै
र्णैर्द्वर्णान्तरसञ्चारोगतिस्तन्नियमनेनचित्रङ्गतिचित्रंसचात्रयथोक्तरू
पएव ॥ ९ ॥ हेऽमरणामरणरहितानिशितखड्गरतोभयशून्यश्चरुषातेज
सान्येजतेनकम्पते । योहिभीतःसकथंशब्दायमानाशनशीलरक्षःपिशा
चादिसङ्कुलेजन्येसंग्रामेदारुणाकारतुरगादिनारमतेनकथञ्चिदित्य
र्थः ॥ अत्रसन्दर्भसमाप्तिपर्यन्तंयावर्णमालागृहीतासैवसमाप्तेरारभ्यप्र
त्यागत्यायावदारम्भंसमाप्यतद्वृत्तिपूर्वन्त्वर्द्धनैवसिद्धति॥१०॥वाहनेति ।
ततोनन्तरंवाहनाक्षेनाऽनमानतिशून्याऽजनिजाता । साराजावुत्क
ष्टसङ्ग्रामेपरमानासेपरमानक्षेमकेमत्ताःसारगाःसोत्कर्षगतिशालिनो
राजेभाराजदन्तिनोयत्र । भारिणःस्वामिनार्पितसमरभराः । अतए
वयथोचितचेष्टायन्तस्तेषाञ्जनानाग्घ्वनिःसिंहनादोयत्रेति क्रियावि
शेषणमित्यनुलोमश्लोकार्थः । निःस्वनन्तस्तनन्तोजवेनवेगेनहारिणइ
भायत्र । ततोविस्तीर्णोमानवजारासःसैनिककृताराबःकोलाहलोय

सेनामानिजनाहवा ॥ ११ ॥ भाषान्तरगतंयथा । इहरेबहलालासेबालाराहुमलीमसा । सालकारस लीलासातुङ्गाऽलालिकलारत ॥ अत्रप्रातिलोम्येनाप रःप्राकृतश्लोकोभवति। यथा । तरलाकलिलागातुंसा लालीसरकालसा । सामालीमहुरालावासेलालाहव रेहइ ॥ १२ ॥ तदर्थानुगतंयथा । विदितेदिविकेनी केतंयान्तन्निजिताजिनि । विगदंगविरोद्धारोयोद्धा योनतिमेतिन।अत्रप्रातिलोम्येनसएवपदार्थः ॥१३॥

त्र । मानिजनानांसाहङ्काराणांवीराणामाहवोद्वन्द्वयुद्धंयत्र । ईदृशी सेनारागरसात्परलक्ष्मीहरणरसेनतमोभेजेक्रोधमवापेतिप्रतिलोमश्लो कार्थः ॥ ११ ॥ इहरेइत्यादि । लासेनृत्येबहलाअसङ्कुचिताराहुम लीमसा श्यामा सालका भ्रूकर्णादिपरभागार्पकचूर्णकुन्तलवतीर साच्छृङ्गाराल्लीलायस्याःसातथा तुङ्गाउच्चव्यवहारा एवंविधा साबाला हेचतुःषष्टिकलारतअलालिलालितात्वयेतिसंस्कृतश्लोकार्थः । कला गीतवाद्यनृत्यानांसङ्करीसहिताकरणपटीयसीगातुन्तरलास्वरितासा लालीनामावृक्षपङ्क्तिस्तदीयेनसरकेणमधुनाअलसा । श्यामामधुरा लापा सेलाउन्तमानारी "सेलास्यादुत्तमानारीतिदेशीकोशे" सहइरया मदिरयावर्त्ततेसेलावारलयोरेकत्वस्मरणादितिकेचित् । तच्चिन्त्यम् । अलाभूषयित्री । हव धवेतिसम्बोधनम् । रेहइराजतेप्राकृतश्लोकार्थः । एवम्भाषान्तराणामपिगतप्रत्यागतीबोद्धव्ये ॥१२॥ विदितइत्यादि । विदिते स्वर्वासिनामपि प्रसिद्धेनिजिताः परेषामाजयोयुद्धानि येन तादृश्यनीकेसमरे प्राप्तङ्गविपराह्वानरूपायां वाचिविगदं हृदयज्वरर हितंकेनामभटायोद्धारोनकेपिसन्तीत्यर्थः । तङ्कं योयोद्धासन्कथम पिनतिन्नम्रतान्नैतिनयाति।अत्रतदर्थकएवप्रतिलोमश्लोकः । सयथा । नतिमेतिनयोद्धायोरोद्धारोविगदंगवि । निजिताजिनितंयातङ्केनीके विदितेदिवि ॥१३॥ बालेत्यादि । बालाषोडशवर्षदेशीयाशोभनकृष्ण

तुरङ्गपदंयथा। बालासुकालवालाकाकान्तिलालक लालिता।सस्वासुतवतीसारादर्पिकाव्रतगर्द्धित ॥ क्र मात्पादचतुष्केस्यपङ्क्तिशःपरिलेखिते । तुरङ्गपद यातेनश्लोकोन्यउपजायते । यथा। बालाललितती व्रस्वासुकलारागतर्पिका । सुदन्तिकावर्द्धितावासा कालातललासका ॥ १४ ॥

तुरङ्गपदबन्धः ।

बा १	ला३०	सु ९	का२०	ल३	वा२४	ला११	का२६
का१६	न्ति१९	ला२	ल२९	क१०	ला२७	लि४	ता२३
स३१	स्वा८	सु१७	त१४	व२१	ती ६	सा२५	रा१२
द१८	र्पि१५	का३२	व्र ७	त२८	ग १३	र्द्धि२२	त ५

आहुरर्द्धभ्रमन्नामश्लोकार्द्धभ्रमणंयदि।तदिष्टंसर्वतोभ द्रंसर्वतोभ्रमणंयदि ॥ तयोरर्द्धभ्रमंयथा।ससत्वरतिदे नित्यंसदरामर्षनाशिनि । त्वराधिककसन्नादेरमक

केशीकान्तिप्रदचूर्णकुन्तलशोभितासस्वाआत्मसम्पद्युक्तासुतवतीपुत्र युक्ताउत्कृष्टाभिमानात्मकशृङ्गारवतीअभिलषितस्वविवाहादिव्रताका ङ्क्षाअतस्तम्भजस्वेति हृदयेइतिशेषः। न्यासमाह । क्रमादिति। ललि तोम्लोज्ञस्तीव्रःप्रवीणःस्वआत्मायस्याःरागेणप्रेम्णातर्पयतियाशोभन दन्तयुक्ता वर्द्धितावासा सम्पूर्णीकृतसकलस्थाना कालोमृषाव्याहा रस्तेनसहवर्ततेया तलेलासकानर्त्तकायस्याःसातथाभूता अधःकृतस कलनर्त्तकलोकेत्यर्थः । एवम्भूतासाबालात्वयोपभुक्तेतिवाक्यार्थः ॥१४॥ ससत्वेति । सदराःसभयास्त्वराधिकानाङ्कसन्नितस्ततःसञ्चरन्ना दोयत्रातएववीरान्प्रतिरमकत्वमकर्षति ॥१५॥ कनीदीप्तौ । देवानाक

त्वमकर्षति ॥ १५ ॥ सर्वतोभद्रंयथा । देवाकानिनि
कावादेवाहिकास्वस्वकाहिवा । काकारेभभरेकाका
निस्वभव्यव्यभस्वनि ॥ १६ ॥ बन्धचक्रेषुद्विचतुष्कच
क्रबन्धोयथा । जयदेवनरेन्द्रादेलम्बोदरविनायक ।
जगदेधनचन्द्राभालङ्घिदन्तविभायते ॥ इहशिख
रसन्धिमालांविभृयादर्द्धंसमाश्रितैर्वर्णैः । द्विचतुष्क
चक्रबन्धेनेमिविधौचापरम्भ्रमयेत् ॥ १७ ॥

द्विचतुष्कचक्रबन्धः ॥



नितुंशीलंयस्यईषद्वादोयत्रकस्यमस्तकस्यसन्नासङ्गताआदाग्रहणंयत्रेति
वा वाहिका पर्यायवहनम् । पर्यायार्हणोत्पत्तिष्विति ण्वुच् । सैवस्वं
वित्तभूतायेषामेवंविधायेस्वकाआत्मपक्षीयास्तानाजिहीतेइतिविच् ।
कम्मदजलमाकिरतिइतिकाकारस्तादृशइभभरोहास्तिकंयत्रहेऽकाकाः
सात्विकाइतिसम्बोधनम् । काकाःसङ्ग्रामलोलुभावाक्वचित्कर्त्तर्यपि
घञ् । निःस्वानिरात्मानोभव्याआधेयगुणास्तानपिव्ययन्तिस्वबले
नोपबृंहयन्तियेतेनिस्वभव्यव्यास्तेषाम्भस्वनिभर्त्सनशीले "भसभर्त्स
न" इत्यतःक्वनिप् ॥ १६ ॥ जयदइत्यादि । नताइन्द्रादयोयस्मैसत
थाजगतामेधनवर्द्धनचन्द्राभालङ्घिनीचन्द्रकान्तिविजयिनीदन्तप्रभाणा

द्विशृङ्गाटकबन्धोयथा । करासञ्जवशेशङ्खगौरवस्यक लारसम् । सन्धायबलयांशङ्कामगौरीम्मेवनात्मक। शृङ्गाद्ग्रन्थिम्पुनःशृङ्गङ्ग्रन्थिंशृङ्गंव्रजेदिति । द्विशृङ्गा टकबन्धेस्मिन्नेमिःशेषाक्षरैर्भवेत् । अत्राङ्कः । राजशे खरस्य ॥ १८ ॥

द्विशृङ्गाटकचक्रबन्धः ॥



मायतिर्यस्यसतथा । न्यासमाह । इहेति । शिखरमालांसन्धिमाला च्यपूर्वार्द्धवर्णैःक्रमेणाभिन्नयात्पूरयेत् । नेमिविधौचाऽपरमुत्तरार्द्धभ्रमे येत् । द्विशृङ्गाटकेमिथोवैपरीत्येनयत्र शिखरंद्विशृङ्गाटकम् ॥ १७ ॥ क रैः किरणैरासज्जयतीतिकरासञ्जः खेव्योम्निगौरवंयस्यससथावनात्म कंजलंवरूपचन्द्रकलासुरसमनुरागंसन्धायकृत्वा अन्तःस्वच्छतयादृ श्यनभोनागनेमिसदृलयाकारोल्लेखिनीन्सेममाऽगौरींश्यामांशङ्काम पनय । स्यइतिक्रियापदम् । पूर्णोभवेतियावत् । वशेशमायत्तशङ्क रश्लिष्टक्रियाविशेषणम् । न्यासमाह । शृङ्गादिति । शेषाक्षरैरिति । आ द्यात्ककाराद्दारभ्ययावत्सप्तमिशेषाण्यक्षराणितैर्नेमिरितिन्यासः । ए वमन्यिवर्णैरेव राजशेखरस्यइतिनामाङ्कवर्णावलीलभ्यते ॥ १८ ॥

विविडितबन्धोयथा । सासतीजयतादत्रसरन्तीय
मितात्रसा।सारम्परंसचजयीशमिताऽस्यन्दनेनसा॥
शिखरादन्यतमाद्वैप्रतिपर्वभ्रमतिरेखयाद्यर्द्धम् । ने
मीतदितरमर्द्धंविविडितचक्राभिधेबन्धे ॥ १९ ॥

विविडितचक्रबन्धः ॥



शरयन्त्रबन्धोयथा । नमस्तेजगताङ्गात्रसदानवकुल

विविडितबन्धस्तुपञ्चशङ्गचक्रम् । तद्देवतान्नायेदर्शितम् । कर्पूरकुन्द
गौरीन्तनुमतनुकार्मुकज्यूकाम् । वरदानसुन्दरकरांविविडितचक्रस्थि
तांवन्दे । खेति । प्रसिद्धानुभावा सतीगौरी सरन्तीनिरर्गलप्रसरानत्रस्य
तीत्यत्रसा अस्यन्दनेनस्थिरेणएनसाकृत्समषेणशमिताविक्लवीभूतारहि
तेतियावत्।शमयैक्लव्ये।अत्रजगतिपरंसारंयन्भगवन्तमितासङ्गता । सच
जयीमहेश्वरोजयतादिति।न्यासमाह।शिखरादिति।अन्यतमाद्वाइतिपा
ठः॥अन्यतमस्यादितिपाठेतुसर्वनामत्वच्छिन्त्यम् । केचित्तुकिंयत्तदेका
न्येभ्यइतिपठित्वाष्टतमद्वारिकांसर्वनामतामाहुः।गणेचान्यतरशब्दन्नप
ठन्ति।अन्युप्रतिमात्रच्छेदमनिर्धारितैकाभिधायकस्त्वन्यतमशब्दः॥१९॥
नमस्तइत्यादि । जगतान्नामरूपप्रपन्चस्यगात्रभूतदानवकुलन्नयेणस

क्षय । समस्तेऽजसतान्नात्रमुदामवनलक्षय ॥ चतुर्ष्वपिचपादेषुपङ्क्तिशोलिखितेष्विह।आदेरादेस्तुरङ्गस्यपादैःपादःसमाप्यते ॥ २० ॥

शरयन्त्रबन्धः ॥

न	म	स्ते	ज	ग	तां	गा	त्र
स	दा	न	व	कु	ल	क्ष	य
स	म	स्ते	ज	स	तां	ना	त्र
मु	दा	म	व	न	ल	क्ष	य

व्योमबन्धोयथा । कमलावलिहारिविकासविशेषवहञ्जनकाङ्कननगामिकरन्दिवि सारमनारमणञ्जरतान्न । तमसाम्बलहानिविलासवशेनवरञ्जनकान्तननमामिचिरंसवितारमनादिमहञ्जगतान्न । अष्टादशशिखरचरीङ्गोमूत्रिकयाचतुष्पदीम्पश्येत् । यत्राद्यन्तैर्दृष्टांसज्ञेयोव्योमबन्धइति ॥ २१ ॥

हित मुदांहर्षाणांरक्षक अजविष्णो अत्रजगति सताम्मध्ये नकोपि ते तव समस्ततोलक्षय दृक्पातेनानुगृहाण मामितिशेषः । न्यासमाह । चतुर्ष्वपीति । शेषंसुबोधम् ॥ २० ॥ कमलावलिषुपद्मखण्डेषुप्रशस्तेषुहारीमनोज्ञोयोविकाशस्तस्यवोढारंजनैर्लोकैस्तुत्यन्तदीयङ्कंशिरस्तत्राङ्कचिह्नभूतननगामिकरङ्किन्तुविसृत्वरकिरणमेवदिविवैमानिकपथेसारभूतञ्जरताम्परिणतानामनारमणंनकिन्तुप्रीतिकरमेवतमसाम्बलहानौयोविलासवशःसन्ततोव्यापारस्तेनवरमुत्कृष्टञ्जनकान्तलोकहृदयङ्गमजगतामनादिन्नकिन्त्वादिमेवएवंविधम्भगवन्तंसवितारमहन्ननमामिकिन्तुनमाम्येव । न्यासमाह । अष्टादशेति ॥ आद्यन्तैर्दृष्टामिति । पादाद्यन्तवर्णयोरैक्यादितिबोध्यम् ॥ २१ ॥

॥ व्यीमबन्धः ॥



मुरजबन्धोयथा । सासेनागमनारम्भेरसेनासीदनारता । तारनादजनामत्तधीरनागमनामया । अत्रपादचतुष्केपिक्रमशः परिलेखितश्लोकपादक्रमेणस्याद्रेखासुमुरजत्रयी ॥ २२ ॥

अनारताअविच्छिन्नप्रहरणव्यापाराआसीत् । मत्तधीरनागमितिक्रियाविशेषणम् । रसेनवीरेण । महाप्राणशब्दजना । अत्रन्यासमाह । अत्रयादेति । अत्रपुटचतुष्ककल्पनयामुरजत्रयोन्मेषः ॥ २२ ॥

॥ मुरजबन्धः ॥



एकाक्षरमुरजबन्धोयथा । सुराननत्वाननहान नष्टयेपुनस्तुवेनर्घधनप्लवाननम् । मनस्यनूनप्रध नप्रधूननंसकाननस्थाननदीननर्दनम् । श्लोकस्यैत स्यपादेषुलिखितेषुचतुर्ष्वपि । त्रिमृदङ्गकरीहस्याच्च तुरेकाक्षरावली ॥ २३ ॥

सुराणान्देवानामाननम्मुखन्तद्भूतवन्हे । हाननष्टयेहानिनाशायत्वा ननस्तुवे । किन्तुस्तौम्येव। पुनरितिदेवतान्तरव्यावृत्तौस्तुत्यावृत्तौवा। अनर्घधनौघप्राणनेयस्मात् । अनप्राणनइतिधात्वनुसारात् । प्रण तानाम्मनसि यदूनमनादिभवपरम्परानुपातिव्यसनन्तस्यधूननम्प्रति क्षेपकंसकाननेषुवनगहनेषुस्थानेषुनदीनस्यपयोराशेरिव नर्दनङ्कोला हलोयस्येति । न्यासमाह । श्लोकस्यैतस्येति । प्रथमपादस्यादक्षरा दारभ्यचतुर्थपादस्थमक्षरंयावदेकजातीयाक्षरचतुष्कावलीङ्गृहीत्वा प रावृत्य तज्जातीयानामेव चतुष्टयी गृह्यते । तेनैकमुरजोन्मुद्रणमपर त्राप्यनेनैव प्रकारेणात्रोऽदाहरणे एकाक्षरमुरजत्रयी भवतीति न्या सार्थः ॥ २३ ॥

॥ एकाक्षरमुरजबन्धः ॥


स्वा
न
न
हा
न
न
ष्ट
ये
रा
न
न
न

न्तारधामासमासिका। सालतामालयामापतारामा
तिरसागता ॥ २४ ॥

॥ मुरजप्रस्तारः ॥



उदाहरणमात्रञ्चैतत्तेनगतिचित्रादिगोमूत्रिकादयो न्येपिचित्रप्रकाराभवन्ति। गतिरुच्चावचायत्रमार्गमूत्रस्यगोरिव। गोमूत्रिकेतितत्प्राहुर्दुष्करञ्चित्रवेदिनः।तेषुपादेगोमूत्रिकायथा।काङ्क्षन्पुलोमतनयास्तनपीडितानिवक्षस्थलोच्छ्रितरयाञ्चनपीडितानि। पायादपायभयतोनमुचिप्रहारीमायामपास्यभवतो म्बुमुचाम्प्रसारी। सेयमयुग्मतःपादगोमूत्रिका॥२५॥

नतुयावदुदाहृतमेवकिङ्गृह्यादिचित्रन्तथासतिकिङ्गोमूत्रिकादीनाम्प्रभागविभागव्याघातःस्यादित्यतआह । उदाहरणमात्रञ्चैतदिति। गतिःपठितिसञ्चारोवर्णानामुच्चावचंवोर्ध्वाधःपर्यायेणप्रवृत्ता। मायासंसारवन्मपास्यदुःखभयात्पायादितिसम्बन्धः । न्यासोयथा । अयुग्मतःप्रथमात्तृतीयाच्चोपक्रम्य द्वितीयचतुर्थपादसन्दंशेनगोमूत्रिकया प्रथमद्वितीययोस्तृतीयचतुर्थयोश्चपरस्परमुन्मेषणमितीयमयुग्मा दगोमूत्रिका ॥ २५ ॥

॥ पादगोमूत्रिकाबन्धः ॥



युग्मतोयथा । देवःशशाङ्कशकलाभरणःपिनाकी देयःशमैकविकलेभरणःसनागः । चित्तेमहासुरजने नशुभंविधत्ताञ्चित्तम्महासुरजनानतभङ्गधन्वा २६॥ अर्द्धश्लोकगोमूत्रिकायथा । चूडाप्रोतेन्दुभागद्युति दलिततमस्कन्दलीचक्रवालीदेवोदेयादुदारशममर जनतानन्दनोनन्यधामा । क्रीडाधूतेशभामाद्युसद नतनिमच्छेदनीचभ्रूयानोदेहेदेवीदुरीरन्दममरतन तातन्दिनोमान्यधामा ॥ २७ ॥ श्लोकगोमूत्रिका याम्प्रथमश्लोकोयथा । पायाद्वश्चन्द्रधारीसकलसुर शिरोलीढपादारविन्दोदेव्यारुद्धाङ्गभागःपुरदनुजद्र वस्त्यानसंविन्निधानम् । कन्दर्पक्षोददक्षःसरससुर वधूमण्डलीगीतगर्वोदैत्याधीशान्धकेनानतचरणन खःशङ्करोभव्यभाव्यः ॥१॥ द्वितीयोयथा । देयान्नश्च

महासुरजनेनब्रह्मादिनाचित्तेदेयोधारणीयःशमेनैकेनविकलीकृतइभर णोगजासुरयुद्धंयेनशुभङ्कल्मषरहितञ्चित्तंविधत्तामविशेषेणसंसारिणा मेव । अत्रपूर्ववत्समपदमुपक्रम्यविषमपादसन्दंशेनसमाप्तिरितिविशे षस्तेनेयंयुक्यादगोमूत्रिका॥२६॥ इन्दोर्भागःखण्डंशङ्कल्याणंअमरजनता देवसभूहोनास्त्यन्यद्धामस्थानंयस्यसोनन्यधामा । स्वात्मारामइत्यर्थः॥ २७॥नपरन्देवोदेवीच। भ्रुवाभ्रूक्षेपेणदुरीरन्दुरपनयन्नोस्माकन्देहेदम न्देयादितिसम्बन्धः । धूतेशभामाप्रणयेनापहृतपरमेश्वरप्रणयरोषा ।

गडधामोसलिलहरकरोरूढकन्दारविन्दोदेहेरुम्भद्
रागःसुरमनुजदमम्त्यागसम्पन्निधाम्। भन्दन्दिक्षो
मदश्रीःसदसदरवधूखण्डनागीरगम्योदैत्यैधो बन्ध
हानावततरयनयःशम्परोदिव्यसेव्यः॥२८॥ विपरीत
गोमूत्रिकायाम्प्रथमश्लोकोयथा।विनायकन्दानसुग
न्धिवक्त्रस्मितानन्मन्दचरङ्कथासु । नमामिविघ्ना
वलिहारिसारसतीसुतंशङ्करवल्लभञ्च। विपरीतश्लो
कोयथा।चलल्लतालब्धशमंसुभासंसंसारिहारम्बहुवि
प्रमान्यम् । सुधाकरञ्चन्द्रमसन्नतोस्मिसवर्णगर्भं
न्नवकम्बुनाढ्यम्॥ २९॥ भिन्नच्छन्दोगोमूत्रिका

भामक्रोधेहतिधात्वनुसारात्। द्युसदनादेवाः। अरतमविश्रान्तम्। नन्दिनानताऽसागौरीअपूर्वश्यामतेजोयस्याः। पुराख्यदानवस्यदो दावाग्निःस्त्यानायाःघनायाःसंविदोनिदानम्। दैत्याधीशेनान्यके नानतचरणोभव्यानामुत्तमानाम्माध्योध्येयः। रूढकन्दान्यरविन्दानि यस्मात्प्रणतानांरुगनुरागोयस्यसुराणाम्मनुजानाच्छदमम्लूस्तान्दम तीतिवा। त्यागसम्पदोनिधानमाश्रयोदिशांशोभदायिकाश्रीर्यस्यस देऽपवनेसदरासभयायावधूस्तदीयानाङ्खण्डनगिरांनिर्भर्त्सनवचसाम्र विषयः। अदैत्यैधीनदैत्यवर्द्धनःसंसारबन्धविच्छित्तयेविस्तीर्णरयोन योयस्यशंसुखम्पिपर्तिपूरयतीतिशम्परोदिव्यःसेव्यश्चेतिएवंविधश्चगह धामारविनौस्माकन्देहेभन्दङ्कल्याणन्देयादित्यर्थः॥२८॥ मन्दचरम्मदा लसगमनङ्कथासुभक्तदेवानांवार्त्तासुमहाशयतयास्मेराननम्। विप्रपर म्पराहारिणाञ्चसारमुत्कृष्टम्। चलल्लीनांलतानामारब्धसान्त्वमंयेन बहुविप्रमान्यन्द्विजराजशेखरत्वात्। समानवर्णंमध्यगम्। नवेनकंबु नाढ्यमुपचितम्। आद्यश्लोकस्याधस्ताद्विपरीतोद्वितीयश्लोकोलेख्यः। ततःक्रमगोमूत्रिकयापरस्परोश्लेखः॥२९॥ अभाग्यस्यरदंविलेखकल्पाशक मितियावत्। समितौसङ्गामेरावणस्यकैलासोद्धरणाभग्नशक्तिकता।

यामप्रथमश्लोकोयथा । नमतचन्द्रकलामयमण्डन
न्नागसुताभुजसङ्गतकन्धरम् । हरमभाग्यरदंस्तवसा
दरंसमितिरावणशासनविक्रमम् । द्वितीयश्लोकोय
था । कामदंचण्डकम्रंमदामर्दिनन्नागदन्ताज्य
जप्यङ्गदाकर्बुरम् । धीरशोभाभरव्यस्तकंसासुरं
नौमिनारायणस्यासमंविभ्रमम् ॥ ३० ॥ संस्कृत
प्राकृतगोमूत्रिकायां संस्कृतश्लोकोयथा । स्कन्दो
रुन्दर्द्धिमिष्टांवितरतुसरलोदारितारातिवर्गे सस्य
न्दोमन्दसज्जोभवभयकलनेसङ्गरेकेलिकारी। सन्दो
होल्लाघलासीजनइहबलिहाचण्डताभूरखर्बा देवौ
जोराजदेहेमहिमनिनिरतोविक्रमाडम्बरेण । प्राकृ
तश्लोकोयथा । चन्दोकन्दर्प्पमित्तंविहरणसहलो
हारितारापबन्धोसच्छन्दोवन्दणिज्जोकुवलयदल
नेसङ्करेमेलिकारी । कन्दोहोल्लासलालीजअइसि

शासनविक्रमगतिराज्ञापौरुषेयेनतवाञ्छितप्रदञ्चण्डमुग्रङ्कन्नङ्कमनी
यञ्चपरेषान्दर्पमर्द्दनशीलन्नागस्यकालियाख्यस्यदंष्ट्राभिःकुवलयापी
डाख्यस्यहस्तिनोवाविषाणान्यांयाआजिःसंग्रामःतत्राजय्यञ्जेतुमश
क्यम् । गदयानानारत्नखचितयाकर्बुरञ्चित्रमितियावत् । स्कन्दःका
र्त्तिकेयः । रुन्दांविपुलान्दारितेशत्रुसमूहेसस्पन्दःस्फुरद्रूपोमन्दःस्व
स्थचितःभवभयस्यसंसारत्रासस्यकलनेक्षेपणेइहजनेमर्त्यलोकेसन्दोहे
नयउल्लाघःसामर्थ्यम् । नीरोगत्वात्तेनलसनंशीलःबलिनांहन्ता । च
ण्डतायास्तैक्ष्ण्यस्यभूराश्रयोखर्वःसर्वेषामुपरिवर्त्तमानःदेवौजसांराज्ञां
खण्डयित्रीर्द्दहाचेष्टायत्रतादृशेमहिम्निनिरतोविहरणेसञ्चरणेसफलः।
उद्भूतःशुभाशुभसूचकत्वात् । मेलिकारीसङ्गमकरीचूडामणित्वात् ।
ऐक्यकारीवातन्मूर्त्तित्वात् । कन्दोदङ्कुमुदमिहाभिमतन्तद्विकाशेनच

वसिहामण्डलीभूअखण्डो देन्तोजोह्लाजलोहेवि
हिअणिअरईविब्भमाणम्बलेण ॥ ३१ ॥ सम
संस्कृतेनगोमूत्रिकायथा । बालाविलासावलिहारि
हासालेलामलाभावसहासहावा । देहंहरन्तीसरसा
सुरामागेहञ्चरन्तीसहसाभिरामा ॥ ३२ ॥ अर्द्ध
गोमूत्रिकाप्रस्तारोयथा । नमोदिवसपूरायसुताम
रसभासिने । नतमव्यारिदारायसुसारलयभाविने ॥
अत्रगोमूत्रिकाश्लोकोयमुत्तिष्ठति । नतदिव्यासदा
रायसुसामलसभासिने । नमोभवरिपूरायसुतारस्य
भाविने ॥३३ ॥

॥ अर्द्धगोमूत्रिका बन्ध ॥



	मो	दि	व	स	पू	रा	य	ता	म	र	स	भा	सि	ने
न							स							
	त	भ	व्या	रि	दा		य		र	ल	य	भा	वि	

लनशीलोज्योत्स्नाजलौघान्ददत् । विभ्रमाणम्बलेनविहितानि
आत्मनिरतिर्येनसतथा । विलासावलिषुहारीविकाशोयस्याःलीला
लाअमलानिर्मलाभावाननेकविधान्यासहतेसाभावसहा । हावःक्रीडा
विशेषोदिवसान्पूरयतीतिदिवसपूरातस्मैसुष्ठुतामरसेषुभासनशीला
याः । नताभव्यायस्मैअरीन्दारयतीत्यरिदारः । ततःकर्मधारयः । न
तानांभव्यानामरिदारेतिवा । नताभव्याअरिदारायस्मिन्निति वा । सु
ष्ठुसारोलयस्तत्रलयनन्तम्भावयतियस्तस्मै । नतादिव्यादेवायस्मै
असदविद्यमानमरिचक्रंयस्य । ततःकर्मधारयःशोभनानांसाम्नांलय
नेनभासनशीलायभानिनक्षत्राण्यावरितुंशीलंयस्येतिभवरिआकाशम्पू
रयतिव्याप्नोतिएवम्भूताय । सुष्ठुतारउच्छितोयोरयोवेगोगमनन्तेन
भाविने । ३३ ॥

गोमूत्रिकाधेनुर्यथा ॥ ममस्फुरतुचिद्गतःसततचि न्त्यरक्षामतिः समस्तरविचित्रितस्तुतरुचिःस्मरक्षे मकृत् । समर्द्धिरतचिन्तितःकृतविचित्ररत्यामयो नमस्करणचिह्नितस्मितरुचिर्हरःसामरः । चतुर्णाम पिपादानाङ्क्रमेणव्युत्क्रमेणच । इयङ्गोमूत्रिकाधे नुर्वैपरीत्यवशेनच ॥ ३४ ॥

॥ प्रथम भेदः ॥

म	स	स	न
म	ल	म	म
स्फु	स्त	र्द्धि	स्क
र	र	र	र
तु	वि	त	ण
चि	चि	चि	चि
द्ग	त्रि	न्ति	ह्नि
तः	त	तः	त
स	स्तु	कृ	स्मि
त	त	त	त
त	रु	वि	रु
चि	चिः	चि	चि
न्त्य	स्म	त्र	र्ह
र	र	र	रः
क्षा	क्षे	त्पा	सा
म	स	म	म
तिः	कृत्	यो	रः

॥ द्वितीय भेदः ॥

१ ममस्फु	२ समस्त	३ समर्धि	४ नमस्क
२ समस्त	३ समर्धि	४ नमस्क	१ ममस्फु
३ समर्धि	४ नमस्क	१ ममस्फु	२ समस्त
१ ममस्फु	३ समर्धि	२ समस्त	४ नमस्क
१ ममस्फु	४ नमस्क	२ समस्त	३ समर्द्धि
२ समस्त	४ नमस्क	१ ममस्फु	३ समर्द्धि
४ नमस्क	३ समर्द्धि	२ समस्त	१ ममस्फु
३ समर्द्धि	२ समस्त	१ ममस्फु	४ नमस्क
२ समस्त	१ ममस्फु	४ नमस्क	३ समर्द्धि
४ नमस्क	२ समस्त	३ समर्द्धि	१ ममस्फु
४ नमस्क	१ ममस्फु	३ समर्द्धि	२ समस्त
३ समर्द्धि	१ ममस्फु	४ नमस्क	२ समस्त

॥ तृतीयभेदः ॥

ममस्फु	नमस्क	समस्त	समर्धि
नमस्क	समस्त	समर्धि	ममस्फु
समस्त	समर्धि	ममस्फु	नमस्क
समर्धि	ममस्फु	नमस्क	समस्त

॥ चतुर्थभेदः ॥

ममस्फु	समस्त	समर्द्धि	नमस्क
समस्त	समर्द्धि	नमस्क	ममस्फु
समर्द्धि	नमस्क	ममस्फु	समस्त
नमस्क	ममस्फु	समस्त	समर्द्धि

॥ पञ्चमभेदः ॥

नमस्कृ	समर्धि	समस्त	नमस्क
समर्धि	समस्त	नमस्क	नमस्कृ
समस्त	नमस्क	नमस्कृ	समर्धि
नमस्क	नमस्कृ	समर्धि	समस्त

॥ षष्ठः ॥

नमस्कृ	नमस्क	समस्त	समर्धि
नमस्क	समस्त	समर्धि	नमस्कृ
समस्त	समर्धि	नमस्कृ	नमस्क
समर्धि	नमस्कृ	नमस्क	समस्त

॥ सप्तमभेदः ॥

समस्त	समर्धि	नमस्कृ	नमस्क
समर्धि	नमस्कृ	नमस्क	समस्त
नमस्कृ	नमस्क	समस्त	समर्धि
नमस्क	समस्त	समर्धि	नमस्कृ

॥ अष्टमभेदः ॥

नमस्क	नमस्कृ	समस्त	समर्धि
नमस्कृ	समस्त	समर्धि	नमस्क
समस्त	समर्धि	नमस्क	नमस्कृ
समर्धि	नमस्क	समस्कृ	समस्त
समर्धि	नमस्क	नमस्कृ	समस्त
नमस्क	नमस्कृ	समस्त	समर्धि
नमस्कृ	समस्त	समर्धि	नमस्क
समस्त	समर्धि	नमस्क	नमस्कृ
समर्धि	नमस्कृ	समस्त	नमस्क
नमस्कृ	समस्त	नमस्क	समर्धि
समस्त	नमस्क	समर्धि	नमस्कृ
नमस्क	समर्धि	नमस्कृ	समस्त

॥ एकादशः ॥

ममस्फु	समस्त	समर्धि	नमस्क	५
समस्त	समर्धि	नमस्क	ममस्फु	६
समर्धि	नमस्क	ममस्फु	समरत	७
नमरक	ममरफु	समरत	समर्धि	८

१	२	३	४	२	१	३	४	१	२	४	३
२	३	४	१	३	२	४	१	२	३	१	४
३	४	१	२	४	३	१	२	३	४	२	१
१	३	२	४	३	१	२	४	१	३	४	२
१	४	२	३	४	१	२	४	१	४	३	२
२	४	१	३	४	२	१	३	२	४	३	१
४	३	२	१	३	४	२	१	४	३	१	२
३	२	१	४	२	३	१	४	३	२	४	१
२	१	४	३	१	२	४	३	२	१	३	४
४	२	३	१	२	४	३	१	४	२	१	३
४	१	३	२	१	४	३	२	४	१	२	३
३	१	४	२	१	३	४	२	३	१	२	४

१	१	१	२	२	२	३	३	३	४	४	४
२	३	४	३	४	१	४	१	२	१	२	३

म	तिः	स	कृत्	स	यो	न	रः
			म				
स्फु	क्षा	स्त	क्षे	र्द्धि	त्या	स्क	सा
			र				
तु	न्त्य	वि	स्म	त	त्र	ण	र्ह
			चि				
द्ग	त	त्रि	रु	न्ति	वि	ह्नि	रु
			तः				
स		स्तु		कृ		स्मि	

म कृत् स रः न यो स तिः	स
म	स्फ
स्फु क्षे द्धिं सा स्क त्या स्त क्षा	कृ
र	स्म
तु स्म त र्हं ण त्र वि न्त्य	तः
चि	द्र रु न्ति क द्वि वि
द्र रु कि न्त द्वि वि त्रि त	चि
तः	तु स्म त र्हं ण त्र वि
स्म	र
कृ	स्फु क्षे र्धिं सा स्क त्या स्त क्षा
स्फ	र
स	म कृत् स रः न यो स ति

ममस्फुरत्विति । ममचिद्गतोमदीयासंविद्मारूढःसामरः
स्फुरतु । सततञ्चिन्तनीयरूपायांमतिःसततञ्चिन्तनीये
स्य ।समस्तैर्द्वादशभिरपिरविभिरादित्यैर्विचित्रिताआलेख्यीकृता
प्रशस्तारुचिःकान्तिर्यस्य । स्मरस्यक्षेमङ्कुशलङ्कृन्ततिच्छिनत्तीति
क्षेमकृत् । समशब्दःसर्वपर्यायोगणेपठ्यते । सर्वासुश्रेणिमादिन्द्रि
तैश्चिन्तितःप्रसभन्ध्यातःपतिवियोगाद्विचित्रायारतेरासयाः
मस्कारेणचिन्हिताप्रणामपूर्वभाविनीप्रसादजन्मास्मितप्रभायस्य।
तथा । अस्यान्यासमाह । चतुर्णामिति । क्रमेणपादानान्तैरन्तर्येणप्र
द्वितीयाभ्यान्द्वितीयतृतीयान्तृतीयचतुर्थाभ्यामितित्रयःक्रमभेदाः
व्युत्क्रमेणपादान्तरायेणप्रथमतृतीयाभ्याम्प्रथमचतुर्थाभ्या
तुर्थाभ्यामितिव्युत्क्रमभेदास्त्रयोवैपरीत्यवशेनचतुर्थाद्दितःप्र
द्योजनेनात्रापिक्रमव्युत्क्रमाभ्यांषट्प्रकाराः । तैर्मीलद्वादशभेदाःशुद्ध
एषांव्यतिकरजन्मानःपुनरन्येचतुर्विंशतिर्भवन्ति ।तद्यथाप्रथमतृ
भ्याञ्चप्रथमद्वितीयाभ्याम्प्रथमचतुर्थाभ्याञ्चद्वितीयतृत
थमचतुर्थाभ्याञ्चतृतीयचतुर्थाभ्याञ्चप्रथमतृतीयाभ्याञ्चे
तदेवमेकएवगोमूत्रिकाश्लोकोयथोक्तरीत्याषट्त्रिंशद्गोमूत्रि
सूतइतीयङ्गोमूत्रिकाधेनुः॥ ३४ ॥

॥ शतधेनुर्यथा ॥

वन्द्यादेवीपर्वतपुत्रीनित्यम्मधुमधुरकमलवद
नापुरन्ध्र्यधिदेवता । देवैःस्तुत्याकिन्नरगेयाभ
क्त्यावरचरितमहिषमथनीजगत्त्रयनायिका । सि
द्धैर्ध्यायाकेसरियानाकाम्यारण चतुररसिकहृदयात्रि
लोचनवल्लभा । धीरैःपूज्यादर्पणपाणिर्नूनङ्गुणनि
लयलटभललितासतीषुधुरन्धरा । यतिविच्छेदिनी
ह्येषाश्लोकधेनुरनुत्तमा । छन्दोभेदाच्छतमियम्प्र
सूतेश्लोकतर्णकान् ॥ ३५ ॥

लब्धम् ॥

७	६	५	४	३	२	१
१	२	३	४	५	६	७
७	२१	३५	३५	२१	७	१

वन्द्या	देवैः	सिद्धैः	धीरैः
देवी	स्तुत्या	ध्यया	पूज्या
पर्वतपुत्री	किन्नरगेया	केसरियाना	दर्पणपाणिः
नित्यं	भक्त्या	काम्या	नूनं
मधुमधुर	वरचरित	रणचतुर	गुणनिलय
कमलवदना	महिषमथनी	रसिकहृदया	लटभललिता
पुरंध्यधिदेवता	जगत्त्रयनायिका	त्रिलोचनवल्लभा	सतीषुधुरंधरा

८ वंदे
९ वंप
१० वंनि
११ वंम
१२ वंक
१३ वंपु
१४ देप
१५ देनि
१६ देम
१७ देक
१८ देपु
१९ पनि
२० पम
२१ पक
२२ पपु
२३ निम
२४ निक
२५ निपु
२६ पक
२७ मपु
२८ कपु
२९ वंदेप
३० वंपनि
३१ वंनिम
३२ वंमक
३३ वंकपु
३४ देपनि
३५ देनिम
३६ देमक
३७ देकपु
३८ देपुवं
३९ पनिम
४० पमक
४१ पकपु
४२ पपुवं
४३ पवंदे
४४ निमक
४५ निकपु
४६ निपुवं
४७ निवंदे
४८ निंदेप
४९ मकपु
५० मपुवं
५१ मवंदे
५२ मदेप
५३ मपनि
५४ कपुवं
५५ कवंदे
५६ कदेप
५७ कपनि
५८ कनिम
५९ पुवंदे
६० पुदेप
६१ पुपनि
६२ पुनिम
६३ पुमक
६४ वंदेपनि
६५ वंपनिम
६६ वंनिमक
६७ वंमकपु
६८ वंकपुवं
६९ देपनिम
७० देनिमक
७१ देमकपु
७२ दकपुवं
७३ देपुवंदे
७४ पनिमक
७५ पमकपु
७६ पकपुवं
७७ पपुवंदे
७८ पवंदेप
७९ निमकपु
८० निकपुवं
८१ निपुवंदे
८२ निवंदेप
८३ निदेपनि
८४ मकपुवं
८५ मपुवदे
८६ मवंदेप
८७ मपनिम
८८ मपुदेनि
८९ कपुवंदे
९० कवंदेप
९१ कदेपनि
९२ कपनिम
९३ कनिमक
९४ पुवंदेप
९५ पुदेपनि
९६ पुपनिम
९७ पुनिमक
९८ पुमकपु
९९ वंदेपनिम
१०० वपनिमक
१ वंनिमकपु
२ देपनिमक
३ देनिमकपु
४ देम
५ प
६ पमकपु
७
८ निम
९
१०
११
१२ मपु
१३ मवदेपनि
१४ कपु
१५
१६ कदे
१७ पुवंदेपनि
१८ पुदेपनिम
१९
२० वंदेपनि
२१ पुवंदे
२२ कपुवंदेपनि
२३ मकपुवंदेप
२४ निमकपुवंदे
२५ पनिमकपुवं
२६ दे
२७

वन्द्येति वरेणदेवताप्रसादेनचरितोनिरर्गलप्रसरोगुणानामाश्रयोल टभस्मनोल्लञ्चललितंविलासोयस्याःसातथायतिविच्छेदीति । अत्रक्र रणम् । • प्रतिलोमंविनिक्षिप्यमनुलोममधःक्षिपेत् स्थितेनागन्तुकं हन्यादीप्सितेनविभाजयेत् । स्थितम्प्रतिलोममागन्तुकङ्क्रमविन्य स्तमीप्सितंहिप्रतिलोमस्यक्रमेण फलङ्गुणकारस्तथैवानुलोमम्भागहा रः । अनेनक्रमेणैकैकयतियोजनेसप्तश्लोकाः । यतिद्विकयोजनेचैक विंशतिः । यतित्रिकयोजनेचपञ्चत्रिंशत् । यतिचतुष्कयोजनेपितावन्तएव । यतिपञ्चकयोजनेपुनरेकविंशतिः । षञ्चतियोजनेसप्तसप्तय तियोजनेत्वेकःसर्वमेलनेनचसप्तविंशत्यधिकंशतम् । अत्रचक्रियाहीनत्वेनकारकविहीनत्वेनचपदावयववत्तयापादावयवमात्रत्वेनचनिरर्थकान् षड्विंशतिमपास्यधेनुश्लोकएकएववृत्तभेदेनशतंश्लोकतर्णकान्प्रसूते । तथाहि । प्रथमद्वितीयचतुर्थीभिर्यतिभिरत्युक्ताजातिः । तृतीयपञ्चमीन्यांसुप्रतिष्ठा । षष्ठ्यागायत्री । सप्तम्याचोष्णिगिति । एकगणनायांवृत्तभेदः । एवन्द्विकादिगणनेपिगवेषणीयम् ॥ ३५ ॥

॥ सहस्रधेनुर्यथा ॥

नखमुखपाणिकरुठचिकुरैर्गतिभिःसहसास्मितेन ललितेसुदृशा । मणिशशिपद्मकम्बुचमराःकरिणः सुतनोःसुधाचहसिताहरिणाः । फणिगणसिद्धसाध्यदयितानसमाःसकलास्त्वयाचखभुवच्छलिताः । तवबलदर्परूपविजितानितरांविबुधाश्चिरायचतुराश्चरितैः पदविच्छेदिनीह्येषाश्लोकधेनुरनुत्तमा । छन्दोभेदाद्दशशतीम्प्रसूतेश्लोकतर्णकान् ॥ ३६ ॥

नखेति । हेललितेगौरितवशोभनयाद्दशासुतनोःशोभनस्यशरीरस्य । साध्यादेवविशेषाःस्वभुवोग्रहतारादयाःराप्यतस्तिराप्यम् । आसुवपिरपित्रपिचमश्चेतिरापतिभाषितमित्यर्थः । दर्यैतिपाठेनषा

॥ अयुतधेनुर्यथा ॥

क्रियेजयसिजृम्भसेसृजसिजायसेत्रायसेस्तुषेमृष
सिमृष्यसेहृषसिपीयसेप्रीयसे । स्तुषेमृडसिहोडसे
कुटसिगल्भसेक्लीवसेन्हुषेहरसिरज्यसे रजसिराजसे
भ्राजसे। एषातुपदविच्छेदिन्येवधेनुःक्रियापदैः ।
सम्बोधनाग्रगैर्दृष्टास्सामिःश्लोकायुतप्रसूः ॥ ३७ ॥

॥ लक्षधेनुर्यथा ॥

दुर्गेभद्रेसुभद्रेदितिसुरभिदितेसैंहिकेगौरिपद्मेनि
त्येहृद्येवरेण्येकलिकमलिकलेकालिकेचण्डिचण्डे ।
धन्येपुण्येशरण्येशचिशबरिशिवेभैरवेराज्ञिसन्ध्येला
येमायेमनोज्ञेऽवनिजननिजयेमङ्गलेधेहिशन्तः ।
सम्बोधनैरियन्धेनुःक्लृप्तासैकक्रियापदैः । लक्षत्रयं
सहस्राणिषष्टिश्लोकान्प्रसूयते । एषान्त्यपदभेदे
नसम्भ्रमादिद्विरुक्तिभिः । यावद्दोधम्पुनःसूते
प्रयुतश्लोकतर्पकान् ॥ ३८ ॥

योजनीयम् । पदविच्छेदिनीति । पादान्यत्रप्रतिपादंसुबाख्य
शाभिधानेच्छन्दसिषड्विभज्यन्ते । यद्यपिद्वितीयतृतीयपादयोर
कारान्यात्रकारेणचतुर्थपादेतवेतिपदाधिक्यन्तथाप्याद्यपादार्थानुरो
धेनसमुचीयमाननिषिध्यमानार्थानुरञ्जकत्वेनसम्बोध्यमानार्थानुगु
णितयाचकारनकारयोस्तवेतिचतत्पादावयवरूपाएवेतितदसत्कल्पमे
व । तथाचषड्न्यःपदत्रयउपादीयमानेसप्तदशाक्षरायाज्जातीयशास
ङ्ख्यानुरोधेनाद्यैर्द्वैप्रस्तारररचनाक्रमेणादशविकल्पाः तृतीयचतुर्थयो
पादयोस्तावत्स्तावन्तएवेति । दशभिराहतैर्दशभिः शतम् । शतेन
चाहतैर्दशभिःसहस्रन्तर्णकाःश्लोकाःसमुपद्यन्तइतीयंसङ्ख्यधेनुःक्रि
इति । हेक्रियेकर्म्मन्निषस्प्रर्द्धायाम् । पीङ्पाने सृडसुवने तुडादौ ।

होडृअनादरे । कुहसंहारे । रज्यसेआसजसि । रजसिमत्स्यसि । राजसेशोभसे । भ्राजसेजाज्वल्यसे । एषेति । इहपृथ्वीनामनिच्छन्दसि । षड्न्यःसम्बोधनानुगेपदचतुष्टयेउपादीयमानेएकादशात्तरायाज्जातौप्रस्तारात्पत्वेनयदिवाच्छन्दोभेदस्यशब्देनाप्रतिपादितत्वात्तद्भेदोप्युदाहरणीयइतितस्यामेवरथोद्धताभिधानेच्छन्दसिदशसुविकल्पेषुप्रतिपादम्भवत्सुदशभिःशतंशतेनसहस्रंसहस्रेणचदशसहस्राणितर्णकाःश्लोकाःसमुत्पद्यन्तेइतीयमयुतधेनुः । दुर्गइतिसम्बोधनैरिति । अत्रहिस्रग्धराभिधानेछन्दसिपादत्रयपदानुरोधेनान्त्यपाद्द्वयेनैकैकमेवपदन्तुर्यपादेपरिकल्प्यमितिसर्वत्रनवसुपदेष्वस्थितेषुपदचतुष्टयेपदपञ्चकेचोपादीयमाने प्रथमेआपातलिकायाम्पञ्चविंशतौद्वितीयेएकयाप्राच्यवृत्यासहवैतालीयकेयदिवापञ्चभिः प्राच्यवृत्तिभिः सममौपच्छन्दसिकेचतुर्विंशतौतृतीयवैतालीयस्यचतुर्विंशतौचतुर्थेचपादेप्राच्यवृत्तिद्वयेसममापातलिकायांषोडशभिरेकयाप्राच्यवृत्यावैतालीयेप्राच्यवृत्यासहवैतालीयैःषड्भिस्तथैवौपच्छन्दसिकेद्व्यामितिचतुर्विंशतौविकल्पेषुप्रभवत्सुपञ्चविंशत्याहतेषुचतुर्विंशतौशतानिषट् । षड्भिश्शतैराहतेषुपञ्चविंशतौसहस्राणि । पञ्चदश । तैराहतेषुचतुर्विंशतौलक्षाणित्रीणिसहस्राणिचषष्टिःतर्णकाःश्लोकाःसमुत्पद्यन्तइतीयंलक्षधेनुः । एषेति तथाह्यत्रपादत्रयेनवसुचतुर्थपादेचदशसु । त्रयेपदचतुष्केपदपञ्चकेचोपादीयमानेप्रथमऔपच्छन्दसिकस्यपदस्यद्विरुक्त्याविंशतौयदिवाआपातलिकायान्दश । वैतालीयेपञ्चदशसुऔपच्छन्दसिकेउदीच्यवृत्तिद्वयेनयद्वैतालीयेचतसृभिरुदीच्यवृत्तिभिःसममेकोनविंशतिरितिचपञ्चविंशतौतृतीयस्मिन्नौपच्छन्दसिकेपञ्चभिःप्राच्यवृत्तिभिःसममेकादश । वैतालीयेतथैवचतुर्दशऔपच्छन्दसिकेतिसृभिःप्राच्यवृत्तिभिःसहषडितिविंशतौतृतीयस्मिन्नौपच्छन्दसिकेतिसृभिरुदीच्यवृत्तिभिःसमम्पञ्चविंशतौचतुर्थेत्वापातलिकायामेकएव । द्विरुक्त्यादिनाषोडशभिःप्राच्यवृत्तिभिःसममशीतौविकल्पेषुप्रभवत्सुविंशत्याहतपञ्चविंशतौपञ्चविंशत्याद्वाविंशतौपंचशताधिकानिद्वादशसहस्राणितैरप्याहतेषुअशीतौदशलक्षाणितर्णकश्लोकाःसमुत्पद्यन्तइतीयम्प्रयुतधेनुः ।

॥ कोटिधेनुर्यथा ॥

स्थूलन्दत्सेसूक्ष्मन्धत्सेभुविभवसिनभसिरम
दिविमोदसे। छिंत्सेबाढम्भिंत्सेगाढंरुषिमिष
नुषिमनुषेजयेयुधिविजृम्भसे। सम्बोधनै
न्तैःसप्तम्यन्तैःक्रियापदैः। श्लोककोटीरिय
सार्द्धाधेनुःप्रसूयते। यदातुसम्भ्रमादिभ्यो भ
स्याद्विरुक्तयः। स्थूलादीनान्तदाचैषादशक
प्रसूयते॥३१॥कामधेनुर्यथा। यागीःशीःश्रीद्ध
ह्रीर्भीर्जूर्मूस्तूस्सूस्स्रूर्द्धूःपूर्भूश्रुक्स्रग्युग्भुग्
तृट्द्विट्युत्क्रुत्चिद्विन्मुग्दिग्धूः। ऋक्दृक्व
मृत्कृद्भामामुत्क्षुत्कामाद्वाद्यौर्गौः सामायामावे
धानामातेत्वम्मेनौः।

स्थूलमिति। प्रेषइतिइषगतावित्यस्यचितिचैतन्येगृधुगार्ध्ये
सेवचसेरमेजयेचलरुचेइतिदेव्याःसम्बोधनपदानि। सम्बोधनै
अत्रभुजङ्गविजृम्भितेछन्दसिएकादशभ्यःपदेभ्यः पञ्चसुषट्सु
उपादीयमानेषुजगतीजातौ प्रसिद्धाक्षरोज्वलाज
नीछन्दस्सुसप्ततौ। द्वितीयेपूर्वेषु। चन्द्रवर्त्मद्रुतवि
लाप्रभवत्सुचशतेतृतीयेस्मिन्प्रथमपादच्छन्दस्येवपञ्च
देद्वितीयपादच्छन्दस्येवशतेषुविकल्पेषुप्रभवत्सुसप्तत्याहते
तिसहस्राणिशतैराहतायांसप्ततिलक्षाणिसप्ततिसहस्रै
ल्लक्षाणित्रीणिसहस्राणिचपञ्चाशतैराहतेशतेकोट्यस्तिस्र
काःश्लोकाःसम्पद्यन्तइतीयङ्कोटिधेनुः। यदात्विति।
येपदचतुष्केपदपञ्चकेचोपादीयमाने पूर्वस्यामेवजातौप्र
तुर्थेषुपादेषुप्रत्येकञ्जलधरमाला प्रभाछन्दसोरेकस्यद्व
तृतीयस्मिंश्चपूर्वयोर्मणिमालोज्वलानवमालिनी
थैवशतेविकल्पेषुप्रभवत्सुशतेनाहतेशतेदशसहस्राणितै

पदग्रहाद्यथाकामङ्कामधेनुरियन्तुनः । परार्द्धा
नाम्परार्द्धानि प्रसूतेश्लोकतर्णकान् । एकाक्षरा
दिच्छन्दोभि र्गतिबन्धादिभेदतः । उक्तानुक्ता
निचित्राणि सर्वाण्येषाप्रसूयते । सकृदुच्चारणेचा
स्यागच्छत्येकाविनाडिका । तत्षष्ठ्यानाडिका
ताभिः षष्ठ्याहोरात्रमृच्छति ॥ प्रणवादिनमोन्ता
नि पदान्यस्याजपन्तिये । सर्वाभाषासुवाक्तेषाम
विच्छिन्नाप्रवर्तते । सिद्धैर्मंत्रपदैःसेयं शास्त्राण्या
लोच्यनिर्मिता । जपताञ्जुहूतान्देवी सर्वान्कामा
न्प्रयच्छति ॥ स्थितेनागन्तुकंहन्यादीप्सितेनविभा
जयेत् । तद्भेदास्तेभवन्त्येवमन्येष्वपिहियोजयेत् ॥
यानंयातीतियाकाचिच्चया । गिरणंगृणतीतिवाक्
चगीः । शरणंशीःशृणातीतिशीः । श्रयतीतिशो
भालक्ष्मीश्चश्रीः । ध्यानन्ध्यायतीतिबुद्धिर्धीः ।
स्त्र्येवस्तृणातिमन्त्राक्षरंस्त्री । ह्रीच्छतीतिमाया
लज्जाचह्रीः । बिभेतीतिभयकामोभयंचभीः ।

लक्षाणितैरप्याहतेशतेकोट्यस्तर्णकाःश्लोकाःसम्पद्यन्तइतीयमेवदश
कोटिधेनुः । यागीरिति । पदग्रहादिति । तथाहि।पञ्चदशभ्यःपदे
भ्यःक्रमव्युत्क्रमाभ्यान्नवादिपदयोगेङ्गीक्रियमाणेबृहतीजातेरारभ्यप्र
तिजातिपादेयेविकल्पास्तैरुत्तरोत्तरमाहन्यमानैर्यदिवासमस्तेपिश्लोके
षष्टिपदेभ्यश्चतुर्विंशत्यष्टाविंशत्यादिपदयोजनायाङ्गायत्रीजातेरारभ्य
प्रतिजातियेविकल्पास्तैःपरार्द्धेभ्यः परार्द्धानितर्णकश्लोकाःसमुत्पद्यन्त
इतीयम्परार्द्धपरार्द्धधेनुः । एकाक्षरेतिअर्थत्रयप्रतिपादकत्वेनप्रतिपा
दम्पदत्रयेपरिकल्प्यमानेऽनेकविधच्छन्दोभिरुक्तानि चतुर्व्यञ्जनादी
न्यनुक्तानिखड्गप्रभृतीनिसर्वचित्राण्येषैवयथाकामम्प्रसूयतइत्यर्थः ।

ज्वरोगतिर्जराचजूः । मूर्च्छामोहसमुच्छ्रा
नञ्चमूः । त्वराहिंसात्वरतेचतूः । सूयतेस
ष्ठुउश्चसूः । अग्रेभागेभारन्धूर्वहतीतिधूः
पालनम्पूरणञ्चपूः । भूमिर्भवनंलोकश्चभूः
पात्रंस्त्रवतीतिस्त्रवणंस्रुक् । पुष्पमालापद्धू
ज्यतइतिस्रक् । योगःसमाधिःसमश्चयुक् ।
नन्पालनङ्कौटिल्यञ्चभुक् । रोगोदीप्तिर्भ
शोकःशुचित्वन्दीप्तिश्चशुक् । अभिलाषःपिप
सात्वतृट् । द्वेषःशत्रुबलमभिलाषश्चद्विट् ।
श्रणमभिश्रणञ्चयुत् । क्रोधःक्रुध्यतीति
श्चक्रुत् । चेतनाचिनोतिचयनञ्चचित् । ज्ञान
विभवलाभश्चवित् । मोक्षोमोहोमुञ्चतीति
आशाअतिसर्गश्चापदेशोदिक् । क्रीडाविज
व्यवहारश्चक्रूः । श्रुतिर्वाक्यंविवेचनञ्चहिंस
क् । दृष्टिर्ज्ञानम्पश्यतीतिदृक् । गतिर्गम
नश्चवा । लक्ष्मीर्मानंशब्दावयश्चमा । मृ
रणम्मृद्नातीतिमृत् ॥ कृन्ततिकरोतिकरणञ्च
दीप्तिर्भानम्भातीतिभा । शब्दःशब्दावयव
षेधश्चमा । हर्षोमोदआमोदश्चमृत् । बु
द्धोदश्चक्षुत् । प्रश्नःसुखङ्गाननञ्चका । आ
मापीडार्थोलक्ष्मीशब्दावयवश्चअमा ।
उपायश्चद्वाः । स्वर्गआकाशोदेवनञ्चद्यौः ।
मिर्धेनुश्चगौः । सहएनअकारेणविष्णुनाव
सालक्ष्मीःसा । सानन्तदोरूपञ्चसा ।

नशब्दावयवश्चसर्वनामचसा । इष्टाअयतइतिश
ब्दावयवश्चयाचन्द्रकलामहदर्थश्चमा । लक्ष्मीस
म्बोधनउचतुर्थ्यन्तं षष्ठ्यन्तउचमे । धारणम्पोष
णंशब्दावयवश्चवे । धात्रीपोषयित्रीशब्दावयवश्च
धा । शब्दावयवोस्मदर्थोलक्ष्मीसम्बोधनउचमे ।
प्रतिषेधःपुरुषवाचीशब्दावयवश्चना । मिमीतेमा
तेतिशब्दावयवश्चमा । तदर्थोयुष्मदर्थश्चलक्ष्मीस
म्बोधनउचते । युष्मदर्थोमावप्रत्ययः शब्दावयव
श्चत्वम् । शब्दावयवास्मदर्थोचमे । जलयानम् । न
विद्यतेद्वौर्द्विचनंयस्यांसाअद्वितीयेत्यर्थः । शब्दाव
यवश्चनीः । दुष्करत्वात्कठोरत्वाद्दुर्बोधत्वाद्वि
नावधेः । दिङ्मात्रन्दर्शितञ्चित्रंशेषमूह्यम्महा
त्मभिः ॥ ४० ॥ १७ ॥ उक्तिप्रत्युक्तिमद्वाक्यं वा
क्यंविदुर्बुधाः । द्वयोर्वक्त्रोस्तदिच्छन्ति बहू
नामपिसङ्गमे ॥ १ ॥ ऋजूक्तिरथवक्रोक्तिर्वैयात्यो
क्तिस्तथैवच । गूढप्रश्नोत्तरोक्तीचचित्रोक्तिश्चेति
तद्विदा ॥ २ ॥ तातुऋजूक्तिर्द्विधा । ग्राम्याउपना
गरिकाच । तत्रग्राम्यायथा । जन्तीमणुरुन्धुरुञ्चु
कुहुतुंडउष्णउकोविहिंसण होमिमहोमिभारुञ्चुलमे
ल्लासतोविकिणकुत्राण उंवाणउंउज्जुअवंखुकहहि
षाणउउज्जुमाडुगहिल्लउअस्सविकोमलहणउवारिजू
जन्तुस्सठाइकरइवलिवंउउवेकक्कुरुमच्छुलुअहिमुहं
हिन्तरुणिहिंअच्छासइदुष्करु । सेयमुभयलोपि
जुनैयमार्गेणोक्तिप्रत्युक्त्योःप्रवृत्तिरितिसेयमृजूक्ति

र्नामवाकोवाक्यम् ॥ १ ॥ सैवोपनागरिका[illegible]
बालेनाथविमुञ्चमानिनिरुषंरोषान्मयाकिङ्कृ[illegible]
खेदोस्मासुनमेपराध्यतिभवान्सर्वेपराधा[illegible]
त्किंरोदिषिगद्गदेनवचसाकस्याग्रतोरुद्यते[illegible]
न्ममकातवात्मिदयितानास्मीत्यतोरुद्यते ॥ [illegible]
कतःकाक्वाकुटिलेति विषमेयमृजूक्तिर्नामवाकोवा
क्यम् ॥ २ ॥ वक्रोक्तिर्द्विधा । निर्व्यूढाअनिर्व्यूढा
च तयोर्निर्व्यूढायथा । किङ्गौरिमाम्प्रतिरुषा[illegible]
गौरहङ्किङ्कुप्यामिकाम्प्रतिमयीत्यनुमानतोहम्[illegible]
जानामिसत्यमनुमानतएवसत्वमित्थङ्गिरोगिरि[illegible]
वःकुटिलाजयन्ति । सेयमावाक्यपरिसमाप्तेर्नि[illegible]
हान्निर्व्यूढेतिवक्रोक्तिर्वाकोवाक्यम् ॥ ३ ॥ [illegible]
र्व्यूढायथा । केयम्मूर्ध्न्यन्धकारेतिमिरमिहकुतः[illegible]
भ्रुकान्तेन्दुयुक्ते कान्ताप्यत्रैवकामिन्ननुभवति[illegible]
पृष्टमेतावदेव । नाहन्द्वन्द्वङ्करोमिव्यपनयशिरसः
स्तूर्णमेनामिदानीमेवम्प्रोक्तोभवान्याप्रतिवचनजा
डःपातुवोमन्मथारिः । सेयमनिर्वाहादनिर्व्यूढेति
वक्रोक्तिर्नामवाकोवाक्यम् । तेइमेउभेअपिश्लेषव
क्रोक्तीनामवाकोवाक्यम् ॥ ४ ॥ वैव्यत्यादि
र्द्विधा । स्वाभाविकीनैमित्तिकीचेति । तयोस्वा
भाविकीयथा । नादेयङ्किमिदञ्जलङ्घटमेतन्ना
देयमेवोच्यतेसत्यन्नामपिवामिकत्यपतृषःपतिर्ग
म्नाऽभवन् । किंवर्णाअपिसन्तिनाम्निराहुर्जा
न्तैरलन्त्वङ्कुतो यस्मादेवभवान्भगिन्यासि[illegible]

नैवमाम्बाधसे । अत्रस्वैरिण्याःसहजाद्वैयात्यात्तू स्वाभाविकीयंवैय्यात्योक्तिर्नामवाकोवाक्यम् ५ ॥ नैमित्तिकीयथा । कुशलंराधेसुखितोसिकंसकंसःकु नुक्कसाराधा । इतिपारीप्रतिवचनैर्विलक्षहासोह र्जयति । अत्रगोत्रस्खलितेविपक्षनाम्नैववैय्या त्येनोत्तरन्दत्तमितिनैमित्तिकीयंवैय्यात्योक्तिर्वाको वाक्यम् । गूढोक्तिर्द्विधा । मुख्यागौणीच । तयो र्मुख्यायथा । केशवयमुनातीरेव्याहृतवानुषसिहं सिकाङ्कोद्य । कान्ताविरहमयातुरहृदयःप्रायःप्रिये हंसः । अत्रप्रियेहंसइत्यत्रावर्णलोपेप्रियेअहंसइ त्यर्थस्यमुख्ययैववृत्त्यागूढत्वादियम्मुख्यागूढोक्तिर्नो मवाकोवाक्यम् ॥७॥ गौणीयथा । निरर्थकञ्जन्मग तन्नलिन्याययानदृष्टन्तुहिनांशुबिम्बम् । उत्पत्तिरि न्दोरपिनिष्फलैवकृताविनिद्रानलिनीनयेन । ता विमौपूर्वोत्तरार्द्धयोरन्योन्योक्त्या गूढकामलेखावि तीयङ्गौणीगूढोक्तिर्नामवाकोवाक्यम् ॥८॥ प्रश्नोत्त रोक्तिर्द्विधा । अभिधीयमानहृद्याप्रतीयमानहृद्या च। तयोराद्यायथा । क्वप्रस्थितासिकरभोरुघनेनि शीथेप्राणेश्वरोवसतियत्रमनःप्रियोमे। एकाकिनीव दकथन्नबिभेषिबालेनन्वस्तिपुङ्गितशरोमदनःसहा यः सेयंहृतप्रष्टव्यस्यैवस्यष्टमभिधायैवाभिधाना दभिधीयमानहृद्यानामप्रश्नोक्तिर्वाकोवाक्यम् ९ ॥ द्वितीयायथा । कियन्मात्रञ्जलंविप्रजानुदघ्नन्तरा धिप । तथाषीयमवस्थातेनहिसर्वेमवादृशाः । से

यंशब्दविद्यावैशारद्यस्यहृद्यस्यप्रतीयमानत्व
यमानहृद्यप्रश्नोत्तरोक्तिर्वाकोवाक्यम् ॥ १
त्रोक्तिर्द्विधा । चित्राविचित्राच । तयोरा
लभ्यन्तेयदिवाञ्छितानियमुनाभागीरथी
वप्रेष्यजनस्तदेषभवतोभर्तव्यतांवाञ्छति ।
न्मरणेनकिन्नुमरणङ्कायान्मनो विच्युतिर्दीर्घञ्जी
मनस्तवाङ्घ्रिकमलेकायोत्रनस्तिष्ठति ।
स्वकल्पितोक्तिप्रत्युक्तिभ्याञ्जीवतोपि जन्मान्तर
वाप्तिसाधनेनाश्चर्यहेतुरिति चित्रानामचित्रे
र्वाकोवाक्यम् ॥११॥ द्वितीयायथा । कोयम्भा
निभूषणङ्कितवतेशोणः कथङ्कुङ्कुमात्कूर्पासा
रितःप्रियेविनिमयःपश्यापरङ्क्वास्तिमे। पश्यामी
त्यभिधायसान्द्रपुलकोमृद्नन्मृडान्यास्तनौ
प्रतिनिर्जितेन्दुरवताद्यूतेहसन्वोहरः । अत्रोक्ति
त्युक्त्योरनन्तरंस्तनमर्द्दनवैचित्र्यादिना परिणा
र्विचित्रसंज्ञमिदंवाकोवाक्यम् ॥ १२ ॥ १८ ॥
हेलिकासकृत्प्रश्नःसापिषोढाच्युताक्षरा । दक्षा
रोभयम्मुष्टिर्बिन्दुमत्यर्थवत्यपि ॥ १ ॥ क्रीड
ष्टीविनोदेषुतज्ञैराकीर्णमन्त्रणे । परव्यामोहनेपा
पिसोपयोगाःप्रहेलिकाः ॥ २ ॥ तासुच्युताक्षरा
यथा । पयोधरभराक्रान्ता सन्नमन्तीप
पदमेकन्नकायाति यदिहारेणवर्जिता ॥
ङ्गिकाकाहारेणवर्जितानयातीति वक्तव्येह
तेत्युक्तम् । अतःकाइत्यक्षरस्यच्युतत्वाच्युता

दत्ताक्षरायथा । कान्तायानुगतःकोयम्पीनस्कन्धो मदोद्धतः । मृगाणाम्पृष्ठतोयातिशम्बरोरूढयौवनः ॥ अत्रशबरइति शम्बरइत्यनुस्वाराक्षरस्यदत्तत्वाद्दत्ताक्षरेयम् ॥ २ ॥ च्युतदत्ताक्षरायथा । विदग्धः सरसोरागीनितम्बोपरिसंस्थितः । तन्वङ्ग्यालिङ्गितःकण्ठेकलङ्कूजतिकोविटः ॥ अत्रविटइत्यस्मिन्विकारेच्युतेघकारेदत्तेघटःकूजतीतिद्वितीयोर्थोभवतीतिसेयञ्च्युतदत्ताक्षरा ॥ ३ ॥ अक्षरमुष्टिकायथा । अतिःअतिःअन्मअलम्प्रीद्यरद्यजद्यफद्य । मेलामेलामेलम्मेलम्फसफसफसफस । सेयमक्षरणाम्मुष्टिरित्यक्षरमुष्टिका । अत्रपादशश्चतुःपङ्क्तिलिखिताचतुर्भिर्मुरजबन्धैः श्लोकउत्तिष्ठति ॥ तद्यथा । अद्यमेसफलाप्रीतिरद्यमेसफलारतिः । अद्यमेसफलञ्जन्मअद्यमेसफलम्फलम् ॥ ४ ॥ बिन्दुमतीयथा । तवाववादःप्रत्यब्धिपताकाप्रतिसङ्गरम् । फलम्प्रत्यद्भुतोपायंयशांसिननुनक्वचित् । इत्यनेनश्लोकेनोक्तार्थस्ययथास्थितस्वरानुस्वारविसर्जनीयसंयोगस्यश्लोकोत्तरस्यबिन्दुभिरेवसूचनाक्रमइतिबिन्दुमती । तद्यथा । निर्भेदः । उ०।०।।०उ०।०।।०।।०।।०।०उ०।०।०उ०।०।०।:।।०।०।०।।०।०।०इ०इ:०।०।०।०।०।०ई०।०।:॥ उदधावुदधावाज्ञासंयुगेसंयुगेजयः । साहसेसाहसेसिद्धिःसर्वत्रतवकीर्तयः ॥ ५ ॥ अर्थप्रहेलिकायथा । उत्तप्तकाञ्चनाभासंसन्दष्टदशनच्छदम् सरसञ्च्युम्ब्यतेहृष्टैर्वृद्धैरपिकिमुज्वलम् । सेयमपि

सूचितस्यैवपक्वाम्रफलमित्यस्यह्यर्थपदप्रयोगेनावग
तेरर्थप्रहेलिका ॥ ६ ॥ क्रियाकारकसम्बन्धपदाभिप्रा
यवस्तुभिः । गोपितैःषड्विधम्प्राहुर्गूढङ्गूढार्थवेदि
नः । तेषुक्रियागुप्तंयथा । स्तनजघनभराभिरामम
न्दङ्गमनमिदम्मदिरारुणेक्षणायाः । कथमिवसहसा
विलोकयन्तोमदनशरज्वरजर्जरायुवानः । अत्रजघ
नभराभिरामम्मन्दम्मदिरेक्षणायागमनमवलोकयन्तो
हेयुवानः कथमिवयूयम्मदनशरज्वरजर्जरानस्तेति
क्रियापदस्यस्तनशब्देनजघनसान्निध्याद्गोपितेनक्रि
यागूढमिदम् ॥ १ ॥ कारकगुप्तंयथा । पिबतस्तेशरा
वेणवारिकहारशीतलम् । केनेमौदुर्विदग्धेनहृदये
विनिवेशितौ । अत्रशरावितिकर्मकारकस्यगूढत्वा
त्कारकगूढमिदम् ॥ २ ॥ सम्बन्धगूढंयथा । नमया
गोरसाभिज्ञश्चेतःकस्मात्प्रकुप्यसि । अस्थानरुदितै
रेभिरलमालोहितेक्षणे ॥ अत्रनमेत्यागोरसाभिज्ञश्चे
तइतिसम्बन्धिपदस्यमयेतिहतीयाभ्रान्त्यागोपित
त्वादिदं सम्बन्धगूढम् । पादगूढंयथा । द्युवियद्वासि
नीतारसंरावविहतश्रुतिः । हैमीषुमालाशुशुभेविद्यु
तामिवसंहतिः । अत्रपूर्वार्द्धस्थितैर्द्वितीयप्रथमसप्तम
पञ्चमैकादशनवमत्रयोदशषोडशाक्षरैश्चतुर्थपादोगू
ढउत्थाप्यः । यथाविद्युतामिवसंहतिरितीदम्पाद
गूढम् ॥ ४ ॥ अभिप्रायगूढंयथा ॥ जइदेअरेणम
णिआखग्गङ्घेत्तूणराउलंवच्च । ताकींसेवअबहुए
हसिऊणपलोइअंसअणम् । अत्रनिरीक्षितमनेना

त्रपुरुषायितलक्ष्मपादलाक्षादिकन्तेननियुङ्क्तेमान्नृ
कर्मणीत्यभिप्रायेणवध्वाःशयनावलोकनमित्यभिप्रा
यगूढम् ॥ ५ ॥ वस्तुगूढंयथा । पानीयम्पातुमिच्छो
मित्वत्तःकमललोचने । यदिदास्यसिनेच्छामिनदा
स्यसिपिबाम्यहम् ॥ अत्रदास्यसीतिदासीलक्षणस्य
वस्तुनोगूढत्वादिदंवस्तुगूढम् ॥ ६ ॥ २० ॥ यस्तुपर्य
नुयोगस्यनिर्भेदःक्रियतेपदैः । विदग्धगोष्ठ्यांवाक्यै
र्वातंहिप्रश्नोत्तरंविदुः ॥ १ ॥ अन्तःप्रश्नबहिःप्रश्नब
हिरन्तःसमाहूयैः । जातिपृष्टोत्तराभिख्यैःप्रश्नैस्तद
पिषड्विधम् ॥ २ ॥ तेष्वन्तःप्रश्नंयथा । काहमस्मिगु
हावक्तिप्रश्नेमुष्मिन्किमुत्तरम् । कथमुक्तन्नजानासि
कदर्थयसियत्सखे ॥ अत्रकदर्थयसीतिपदङ्कथमुक्तं
रेफयकारयुक्तन्दर्यसीतिस्यादतोवाक्यान्तरंप्रश्नोत्त
रस्योक्तत्वादन्तःप्रश्नमिदम् ॥ १ ॥ बहिःप्रश्नंयथा ।
भद्रमाणवकाख्याहिकीदृशःखलुतेपिता । वेलान्दो
लितकल्लोलः कीदृशश्चमहोदधिः ॥ अत्रमज्जन्मक
रइत्यस्योत्तरस्यप्रश्नाद्बहिरुक्तत्वाद्बहिःप्रश्नमिद
म् ॥ २ ॥ बहिरन्तःप्रश्नंयथा । सुभद्राङ्कउपायंस्त
प्रश्नेमुष्मिन्यउत्तरः । सकीदृक्कापिमाचष्टेव्योम्निप
र्णस्थितिःकुतः । अत्रवायुतइत्युत्तरेणप्रश्नाद्बहिरु
क्तेनवायुतोनरोवानरोभवतीतिसुभद्रोपयन्ताप्युच्य
ते । तेनैतद्बहिरन्तःप्रश्नंभवति॥३॥जातिप्रश्नंयथा।
कीदृशामूमिभागेन राजास्तातोनुमीयते । प्राङ्मुङ्कु
रुतेत्युक्ताःकिमाहुस्तदनिच्छवः । हैमेवारकरञ्जि

ना । नाजिरंकरवामहै । इत्युत्तराभ्याङ्गतोत्तराख्या
नम्प्रश्नोत्तरजातिरभिधीयते।जातिप्रश्नमिदम् ॥४॥
पृष्टप्रश्नंयथा।कोसोजोजणवाघोकोद्दगडाणन्दुबेस
हस्सोई । काकालीकामधुराकिंशुकपृथुकाननच्छाय
म्।अत्रयएवप्रश्नःकः सयोजनपादःकःसयोदण्डाना
न्द्वेसहस्त्रेद्वेइत्यादयः । तएवक्रोशयोजनपादःकोद
गडानान्द्वेसहस्त्रेइत्यादीन्युत्तराणिभवन्ति।एवङ्काका
लीकामधुराकिंशुकपृथुकाननच्छायमित्युत्तराङ्गमभि
हितशेषस्यप्रष्टव्यमितिपृष्टप्रश्नम् ॥ ५॥ उत्तरप्रश्नंय
था । किंयसन्तसमयेवनमक्षःपृष्टवान्सपृथुलोमवि
लेखः । उत्तरउचकिमवापतुरेतौकाननादतिमिराद
पिकाली । अत्रप्रश्नस्यहेकाननादहेतिमिरादपिका
लीत्येतदेवोत्तरम्भवतीत्युत्तरप्रश्नमिदम् ६ २१ यद्वि
धौचनिषेधेचव्युत्पत्तेरेवकारणम् । तदध्येयंविदुस्तेन
लोकयात्राप्रवर्तते ॥ १ ॥ काव्यंशास्त्रेतिहासौचकाव्य
शास्त्रन्तथैवच । काव्येतिहासःशास्त्रेतिहासस्तदपिप
ण्डितम् ॥ २ ॥ तेषुकाव्यंयथा । यदिस्मरामितान्तन्वी
ञ्जीवितशाकुतोमम । अथविस्मृत्यजीवामिजीवित
व्यसनेनकिम् । तदिदमुक्तिप्राधान्यात्काव्यमित्युच्य
ते ॥ ३॥ शास्त्रंयथा । स्निग्धोन्नलाग्रतनुताम्रनखौकु
मार्याःपादौसमोपचितचारुनिगूढगुल्फौ । श्लिष्टाङ्
गुलीकमलकान्तितलौचयस्यास्तामुद्वहेद्यदिभुवोधि
पतित्वमिच्छेत् । अत्रस्निग्धत्वादेःशब्दस्यप्राधान्य
मितिशासनाच्छास्त्रमिदम् ॥ २ ॥ इतिहासोयथा ।

हिरण्यकशिपुर्दैत्योयांयांस्मित्वाप्युदैक्षत। भयाद्भ्रान्तैःसुरैश्चक्रेतस्यैतस्यैदिशेनमः। सोयमतीतार्थप्राधान्यादितिहासः। काव्यशास्त्रंयथा। नान्दीपदानिरतनाटकविघ्नशान्ता वाङ्माक्षराणिपरमाण्यथवास्मरस्य। दष्टेधरेप्रणयिनाविधुताग्रपाणिसीत्कारशुष्करुदितानिजयन्तिनार्याः। अत्रकाव्येनशास्त्रमभिहितमितीदङ्काव्यशास्त्रम् ॥४॥ काव्येतिहासोयथा। स सञ्चरिष्णुर्भुवनान्तरेषुयांयद्दृच्छयाश्रियदाश्रयः श्रियाम्। श्रीकारितस्यैमुकुटोपलस्खलत्करैस्त्रिसन्ध्यंत्रिदशैर्दिशेनमः। अत्रप्रागुक्तस्यैवेतिहासार्थस्यकाव्येनाभिधानात्काव्येतिहासमिदम् ॥५॥ शास्त्रेतिहासोयथा। धर्मेचार्थेचकामेचमोक्षेचभरतर्षभायदिहास्तितदन्यत्रयन्नेहास्तिनतत्क्वचित्॥ अत्रधर्मार्थकाममोक्षाणामितिहासनिवेशितत्वादयंशास्त्रेतिहासः ॥६॥ श्रव्यन्तत्काव्यमाहुर्यन्नेक्ष्यतेनाभिधीयते। श्रोत्रयोरेवसुखदम्भवेत्तदपिषड्विधम् ॥१॥आशीर्नान्दीनमस्कारोवस्तुनिर्देशइत्यपि। शाक्षिप्तकाभ्रुवाचेतिशेषोध्येयम्भविष्यति ॥२॥ तत्राशीर्यथा। भूयाद्वःश्रेयसेदेवःपार्वतीदयितोहरः।पातुवःपरमज्योतिरवाङ्मनसगोचरः। अत्राशंसायांलिङ्लोट्चतदिदंवाक्यद्वयमाशीः॥३॥नान्दीयथा। भद्दम्भोदुसरस्सईअकइणोणन्दन्तुवासाइणोअस्सणम्पिपरम्पअट्ठदुवरावाणीच्छइल्लपिआ। वच्छोमीतहमाअहीफुरदुणोसाकिंअपउचालिआरीदीओविलिहन्तुकल्लकुस

लाजोल्लंघओराविअ । सेयंरङ्गमङ्गलान्तः
नन्दी २॥ नमस्कृतिर्यथा । जयतिब्रह्मभूः श
न्देमहिमहेश्वरम् । इदङ्गुरुभ्यःपूर्वेभ्योनमोवाकम्
शास्महे । सेयंस्तुतिर्नमस्क्रियाचनमस्कृतिरेवमवति
॥३॥वस्तुनिर्देशोयथा । अस्त्युद्दामजटाभारभ्रान्तग
ङ्गाम्बुशेखरः । आदिदेवोहरोनामसृष्टिसंहारकारण
म् । सोयङ्कथाशरीरव्यापिनोवस्तुनोनायकस्य
शोवस्तुनिर्देशः ॥ ४ ॥ आक्षिप्तिकायथा । पञ्चपीडि
अमहिसासुरदेहिहिभुअणभअन्धआरसलिलेह
सुरसुहदेत्तवलिअधवलच्छिहिङ्गअइमहासुरअणु
हलच्छिहिम् । सेयमधिक्षिप्तरागविशेषप्रयोगमात्र
लवचनमाक्षिप्तिका ॥५॥ ध्रुवायथा । मअवहणिग्गत्त
णिगाअमइन्दसुणङ्गुहंणिरऊण । लद्धावसरोगहिल
णमोत्तिआइङ्गओघाहो । सेयम्पात्रप्रवेशरसानुसन्धा
नादिप्रयोजनाध्रुवा ॥६॥ २३॥ यदाङ्गिकैकनिर्वर्त्यसु
भ्रूभ्रितंवाचिकादिभिः । नर्त्तकैरभिधीयतप्रेक्ष्यमाक्षे
डिकादितत् ॥ १ ॥ तल्लास्यन्ताण्डवउच्चैवच्छलिकं
म्पयासह । हल्लीसकउच्चरासउच्चषट्प्रकारम्प्रचक्षते॥
तेषुलास्यंयथा । उज्झिउवालिपिअपन्थहिंजन्तउपे
क्खमिहत्थहोइजइलोअणवन्तउ । तदिदंशृङ्गाररसप्र
धानत्वाल्लास्यम् ॥१॥ ताण्डवंयथा । सुअवध
रणिसुणिअदारुणुरोसविसठपहरुहिरारुणु । जा
उणाहणरुरिउसन्तावणु । अणलसरिच्छजेहोड
रणु । इदंवीररसप्रधानत्वात्ताण्डवम् ॥२॥ छलि

था।णिसुणिउपच्छात्तुरअरउभुणिडहिंसिहसत्ति।णि
अकन्तडाढजुअलेहिम्पुणुपुणुणअणयलन्ति। इदन्तु
शृङ्गारवीररसप्रधानत्वाच्छ्लिकम् ॥३॥ सम्पायथो।
थीहेमिहरिमुहिअउहोहिमङ्गलेलेहिसहम्। कन्दइविठासुरुमारिउकण्ठुवलिउणपइम् तदिदञ्छलिकमेव
किन्नरविषयसरूपा ॥४॥ हल्लीसकंयथा। चन्दणधूसरअंआहुल्लिअलोअणअंहासपरम्मुहअंणीसासकिलासिअअन्दुम्मणदुम्मणअंसङ्गमिअमण्डणअम्। माणिणिआणणआङ्किन्तुभूभकरठिअम्। मण्डलेन
तुयास्त्रीणान्नृत्यंहल्लीसकन्तुतत्। तत्रनेताभवेदेको
गोपस्त्रीणांहरिर्यथा हल्लीसकमिदम्॥५॥ रासोयथा।
अइदुम्मणदुम्मणआअज्जकिणेपुच्छामितुमम्। ण
जिविज्जइजेणविणासोपलिहिज्जइकीसजणो। त
दिदंहल्लीसकमेयतालयन्धविशेषयुक्तंरासएवेत्युच्यते
॥६॥ अङ्गवाक्सत्वजाहार्यःसामान्यश्चित्रइत्यमी। ष
ट्चित्राभिनयास्तद्वदभिनेयंवचोविदुः ॥१॥ तेष्वाङ्गिकाभिनयवद्यथा। दोर्दण्डाःक्वधृताङ्गदाःक्वचशिरान
द्धौभुजौद्वाविमौवक्त्राणिक्वनुकान्तिमन्तिबलिमत्क्षे
दक्षमेकमुखम्। वाचस्ताःक्वजितार्णवध्वनिघनाः
क्वायंवचःसंयमो हेलाकम्पितभूधरःक्वचरणन्यासः
क्वमन्दागतिः। अत्राङ्गिकाभिनयानाम्प्रतिपादित
त्वादिदमाङ्गिकाभिनयम्॥१॥ वाचिकाभिनयवद्य
था। दुर्वाराम्मदनशरव्यथांवहन्त्यातन्वङ्ग्यायद
भिहितम्पुरः सखीनाम्। तद्भूयःशिशुशुकशारिका

भिरुक्तन्धन्यानांश्रवणपथातिथित्वमेति । आ
चिकाभिनयानाम्प्रतिपादनादिदंवाचिकोभिनयस
सात्विकाभिनयद्यथा । वारंवारन्तिरयतिदृशो
मम्बाष्पपूरस्तत्सङ्कल्पोपहितजडिमस्तम्भमभ्यो
गात्रम्। सद्यःस्विद्यन्नयमविरलोत्कम्पलोलाङ्गुला
कःपाणिर्लेखाविधुषुनितरावर्तलेकिङ्करोमि । अत्रव
ष्यजाड्यस्तम्भस्वेदकम्पानाम्प्रतिपादितत्वादिदंसा
त्विकाभिनयम् ॥३॥ आहार्याभिनयद्यथा । चूडाच
म्बितकङ्कपत्रमभितस्तूणी द्वयम्पृष्ठतोमस्तकप
वित्रलाञ्छनमुरोधत्तेत्वचंरौरवीम् । मौर्व्यामेखल
नियंत्रितमधोवासश्चमाजिष्ठकम्पाणौकार्मुकमङ्कसू
त्रवलयेदण्डोपरःपैप्पलः । अत्राहार्याभिनयानाम्प्र
तिपादितत्वादिदमाहार्याभिनयम्॥४॥सामान्याभि
नयवद्यथा । राहोश्चन्द्रकलामिवाननचरीन्दैवात्स
मासाद्यमेदस्योरस्यकृपाणपातविषयादाच्छिन्दतः
प्रेयसीम् ॥ आतङ्काद्विकलंद्रुतङ्करुणयाविक्लोभितं
स्मयात्क्रोधेनज्वलितम्मुदाविकसितञ्चेतःकथं
ताम् । अत्रचतुर्णामभिनयानाम्प्रयोगादिदंस
न्याभिनयम् ॥५॥ चित्राभिनयवद्यथा । व्यतिक
वभीमस्तामसोवैद्युतश्चक्षणमुपहतचक्षुर्वृत्तिरुद्
शान्तः । कथमिहनवयस्यस्तात्किमेतात्किम
वतिहिमहिम्नास्वेनयोगेश्वरीयम् । अत्रहस्ताभ्य
दाध्यायोःकथितत्वाच्चित्राभिनयमिदम्॥५॥
स्त्रोविंशतिश्चैताःशब्दालङ्कारजातयः।शब्द
त्रेणहृदयंहर्तुमीशते ॥ ६ ॥ इतिद्वितीयःपरि

सटीके सरस्वतीकण्ठाभरणे तृतीयः परिच्छेदः ।

श्रीगणेशायनमः ॥

अलमर्थमलङ्कर्त्तुं येव्युत्पत्यादिवर्त्मना । ज्ञेया जात्यादयःप्राज्ञैस्तेर्थालङ्कारसंज्ञया ॥ १ ॥ जाति र्विभावनाहेतुरहेतुःसूक्ष्ममुत्तरम् । विरोधःसम्भ वोन्योन्यंपरिवृत्तिर्निदर्शनम् ॥ २ ॥ भेदःसमाहि

क्षोभस्फुरितचूडेन्दुखण्डप्रकरविभ्रमाः ॥ ताण्डवाडम्बरेशम्भोर दृहासाःपुनन्तुवः ॥ १ ॥ विविच्यमानगम्भीरमूलग्रन्थाकुलान्प्रति ॥ इतोप्यतःपरंव्याख्यासंक्षेपेणनिगद्यते ॥ २ ॥ क्रमप्राप्तार्थालङ्का रलक्षणायपरिच्छेदारम्भः । तत्रविभागोपयुक्तंसामान्यलक्षणमाह । अलमर्थमिति । विशिष्टाउत्पत्तिर्व्युत्पत्तिर्जातेरवच्छेदकःप्रकारः । आदिशब्दाद्विविधशक्तिप्रतिबन्धादयोविभावनाद्यवच्छेदास्त्रयोविंश तिः । अर्थालङ्कारसंज्ञयेति । अर्थशोभानिवृत्तिहेतुर्विच्छित्तिरर्थाल ङ्कारइतिस्फुटलक्षणम् ॥ १ ॥ विभागन्दर्शयति । जातिरिति ॥ २ ॥ प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यभावाख्यानिजैमिनेःप्रमाणानिष ट् । तेनैवक्रमेणलक्षणान्याख्यातुम्प्रत्यक्षपूर्वाणीत्युक्तम् । साहित्य स्यसर्वपारिषद्यत्वान्नानादर्शनरीत्युपजीवनमुचितमेव ॥ ३ ॥ नास्त्ये वासावर्थालङ्कारोयःस्वरूपन्नाश्रयतइतिप्राथम्यञ्जातेरेवेत्याह । ते ष्विति । कालकृतोविशेषोवस्था । तामधिकृत्यजायन्तेवस्तुस्वरूपव्य भिचारिण्युत्पद्यन्ते । नन्वेवं"यएतेयज्वानःप्रथितमहसोयेप्यवनिपा मृगाक्ष्योयाश्चैताःकृतमपरसंसारकथया । अहोयेचाप्यन्येफलकुसुमन म्राविटपिनोजगत्येयंरूपातिलसतिमृदेषाभगवति,,इत्यादावपिजाति त्वंस्यादित्यतआह । स्वेभ्यःस्वेभ्यइति । स्वभावभूतानीत्यर्थः । क विप्रतिभामात्रप्रकाशनीयरूपोदृङ्कनञ्जातिरितिलक्षणम् । लौकिक विकल्पविषयोपिप्रतिभयाभासतएव । यदाह । रसानुगुणशब्दार्थ चिन्तास्तिमितचेतसः । क्षणंविशेषस्पर्शोत्थोप्रज्ञैवप्रतिभाकवेः । सहि

तम्भ्रान्तिर्वितर्कोमीलितंस्मृतिः ॥ भावप्रत्यक्षपू
र्वाणिप्रमाणानिचजैमिनेः ॥ ३ ॥ तेषु । नानाव
स्थासुजायन्तेयानिरूपाणिवस्तुनः । स्वेभ्यःस्वे
भ्योनिसर्गेभ्यस्तानिजातिम्प्रचक्षते ॥ ४ ॥ अर्थ
व्यक्तेरियम्भेदमियतांप्रतिपद्यते । जायमानमियं
वक्तिरूपंसासार्वकालिकम् ॥ ५ ॥ स्वरूपमाश्रयो
हेतुरितितद्भेदहेतवः । तेसंस्थानादयस्तेषुसाविशे
षेणशोभते ॥ ६ ॥ तत्रस्वरूपंसंस्थानमवस्थान
न्तथैवच । वेषोव्यापारइत्याद्यैःप्रभेदैर्बहुधास्थि
तम् ॥ ७ ॥ मुग्धाङ्गनार्भकस्तिर्यङ्नीचपात्राणिघा
श्रयः । देशःकालश्चशक्तिश्चसाधनानिचहेतवः ८ ॥

चक्षुर्भगवतस्तृतीयमितिगीयते । येनसाक्षात्करोत्येषभावास्त्रैलोक्यव
र्त्तिनश्चति ॥ ४ ॥ उक्तमेवविशेषमभिसन्धायाह । अर्थव्यक्तेरिति ।
वस्तुस्वरूपोल्लेखनरूपार्थव्यक्तिरर्थगुणेषूक्ता । तत्रसार्वकालिकंरूपमु
पजनापायान्तरालव्यापकमित्यर्थः । अत्रतुजायमानमागन्तुनिमित्तं
समवधानप्रभवंव्यभिचरितमित्यर्थः । विच्छित्तिप्रकारयोरसङ्कराद्पृथ
क्शोभार्पणाच्चयुक्तोव्यतिरेकस्तेनस्वभावोक्तिरेवार्थव्यक्तिरितियत्केन
चिदुक्तम्तदपास्तम् ॥ अतएवजात्यन्तरप्रकाराणामपिपृथगलङ्कारता
स्यादितिनयुक्तमवान्तरवर्त्मसैवव्याघातात् । नहिसामान्यविशेषयो
र्विभागोभवति ॥ ५ ॥ स्वरूपमिति । आश्रयविशेषहेतुविशेषव्यतिरि
क्तोवच्छेदकप्रकारःस्वरूपम् । एतदेवविभजते । तेसंस्थानादयइति ।
ननुकिमनेनप्रपञ्चेनपूर्वाभिहितरूपमात्रस्यैवजातित्वादित्यतआह ।
तेषुसेति । विशेषेणशोभाहेतुरेवह्यलङ्कारोस्तिचात्रतथ
वः ॥ ६ ॥ तत्रस्वरूपन्द्विधा । शरीरावयवसन्निवेशलक्षणमतादृशञ्च
आद्यमपिबुद्धिकारितमतथाभूतञ्च । तदेतदाह । तत्रस्वरूपमिति ।
आदिपदेनवृक्षादिस्वरूपपरिग्रहा ॥ ७ ॥ शक्तिःपदार्थानां

॥ तेषुसंस्थानंयथा ॥ सदक्षिणापाङ्गनिविष्टमुष्टि न्नतांसमाकुञ्चितसव्यपादम् । ददर्शचक्रीकृतचा रुचापम्प्रहर्तुमभ्युद्यतमात्मयोनिम् ॥ अत्रधनु र्धरेणैवमङ्गानिसम्यक्बुद्धिपूर्वकंस्थापनीयानीतिसं स्थानमिदञ्जातिभेदः ॥ अवस्थानभेदेनयथा । पादावष्टम्भनम्रीकृतमहिषतनोरुल्लसद्बाहुमूलं शूल म्प्रोल्लासयन्त्याःसरलितवपुषोमध्यभागस्यदेव्याः विश्लिष्टस्पष्टदृष्टोन्नतविरलवलिव्यक्तगौरान्तराला स्तिस्रोवःपान्तुलेखाक्रमवशविकसत्कञ्चुकप्रान्त मुक्ताः । अत्रस्त्रियाःशूलप्रोल्लासनादौव्यापारेबुद्धि कारितमपिशरीरावस्थानमीदृशञ्जायतइतीदम वस्थानन्नामजातिभेदः ॥ २ ॥ वेषोयथा । छण पिठ्ठधूसरत्थणिमहुमअअम्बच्छिकुवलआहरणे । कण्णकअचूअमञ्जरिपुत्तितुएमण्डिओगामो * अ त्रवसन्तोत्सवेग्रामतरुणीनामयंवेषोजनमनःप्रमो

म् । साधनानिकर्त्रादीनिषट् ॥ ८ अत्रधनुर्द्धरेणेति । तदुक्तम् अ पाङ्गेदक्षिणामुष्टिंवामंविन्यस्यलस्तके । पादमाकुञ्चयेद्वामंलक्ष्येनिश्च ललोचनइति । अत्रसर्वस्यैवधनुर्द्धरस्यैवंविधशरीरावयवसन्निवेशोभ वतिनकामस्यैवेतिनाश्रयविशेषोविवक्षितः । एवमुत्तरत्रापि ॥ १ ॥ पादावष्टम्भेति । उल्लसद्बाहुमूलमितिप्रोल्लसनक्रियाविशेषणम् । सं वलितवपुषाइतिमध्यभागविशेषणम् । अतएववलीनांविश्लेषोमिथो विभागः । उपरिशरीराकर्षणात्कञ्चुकप्रान्तापसरणम् । मुसलोल्लास नादौदृष्टमिदमबुद्धिजमेवनारीणांरूपमितिभगवतीविषयेप्रतिबिम्ब नमतिस्फुटमेव । तदाहआदाविति ॥ २॥ अत्रवसन्तोत्सवइति । य द्यप्यत्रकालःपात्रंचास्तितथापि संवाल्लणमउलिझविवरउराहइअम्बि

---

* चणपिष्टधूसरस्तनि मधुमदनाम्राक्षिकुवलयामरेण ॥
कर्णकृतचूतमञ्जरि पुत्रित्वया पण्डितो ग्रामः ॥ १ ॥

दायजायतइतिवेषोनामायञ्जातिभेदः ॥ ३ ॥ व्यापारोयथा । अग्रेगतेनवसतिम्परिगृह्यरम्यामा पात्यसैनिकनिराकरणाकुलेन । यान्तोन्यतःप्लुतकृ तस्वरमाशुदूरादुद्बाहुनाजुहुविरेमुहुरात्मवर्ग्याः । अ त्रतादृशिव्यापारव्यापृतानामीदृशमेवस्वरूपञ्जाय तइतिव्यापारनामायञ्जातिभेदः ॥ ४ ॥ आश्रये षुमुग्धयुवतिर्यथा । सहिआहिंभणमाणाथणएल ग्गङ्कुसुम्भउप्फन्ति । मुद्धबहुआहसिज्जइपप्फो डन्तीणहवआइम् ॥ * अत्रमुग्धवध्वाश्रितक्रियास्व रूपभणनादियम्मुग्धाङ्गनाश्रिताजातिः ॥ ५ ॥ अ र्भकाश्रितायथा । आक्रोशन्नाहूयन्नन्यानाधाव न्मण्डलंरुदन् । गाःकालयतिदण्डेनडिम्भःसस्या वतारिणीः । अत्रार्भकाश्रितव्यापारस्वरूपोक्तेरि यमर्भकाश्रिताजातिः ॥ ६ ॥ तिर्यगाश्रयायथा ।

रइअऊणतालङ्कम् । सिटिलाअन्तंसवणाअरम्भिसारेइएक्कावि । इ त्यादौनसङ्करःकादाचित्कस्त्वसौगुणएव । वेषस्यकथंरञ्जकतेत्यवशि ष्यते । तत्राह । जनमनःप्रमोदायेति । रुच्यर्थित्वव्युत्पत्तीनाम्प्रति पक्षगतानामक्षुण्णत्वादितिभावः ॥ ३ ॥ अग्रेगतेनेति । अत्रोद्बाहुने तियद्यप्यवस्थानमस्तितथापितत्परिहारेणोदाहरणमसङ्कीर्णम् । स हिआहिम्भणमाणाथणएलग्गङ्कुसुम्भपुप्फन्ति । मुद्धबहुआहसिज्जइप प्फोडन्तीणहवआइम् ॥ इत्यत्रैकस्याःकदाचिद्वितर्कायेदमपिवाक्य म्बहूनान्तुनेतिबहुवचनस्वरसः । कुसुम्भकेसराण्युच्चेतुंवारंवारमसौक्षे त्रम्प्रविशतीतिसम्भावना । मुग्धाअपरिशीलिताभिमानिकसुखावधूः प्रथमपरिणीता । प्रस्फोट्यमानमपित्वयानापसरतीत्यहोतवसौकुमा र्यमितिचाटुगर्भंहसितमतएवप्रियतयातस्यानुबन्धोवर्त्तमाननिर्द्देशेन

सखीभिर्भण्यमानास्तनयोर्लग्नं कुसुभपुष्पन्ते ॥
मुग्धवधूर्हस्यते प्रोञ्छन्ती नखव्रणान् ॥ १ ॥

लीढव्यस्तविपाण्डुराग्रनखयोराकर्णदीर्णम्मुखंविन्य स्यायग्रिमयोगेचरणयोस्सद्योविभिन्नद्विपः । एत स्मिन्मदगन्धवासितवटःसावज्ञतिर्यग्वलत्सृक्कान्ता हलिधूतलोलमधुपःकुञ्जेषुशेतेहरिः ॥ अत्रसिंहस्व रूपभणनादियन्तिर्यगाश्रयाजातिः ॥ ७॥ नीचाश्र यायथा । भद्रन्तेसदृशंयदध्वगशतैःकीर्तिस्तवोद्घु ष्यतेस्थानेरूपमनुत्तमंसुकृतिनादानेनकर्णार्जितः । इत्यालोच्यचिरन्दृशाकरुणयाशीतातुरेणस्तुतः पा न्थेनैकपलालमुष्टिरुचिनागर्वायतेहालिकः ॥ अत्र हीनपात्रहालिकस्वरूपोक्तिरियन्नीचाश्रयाजातिः ॥ ८ ॥ अथहेतवः । तेषुदेशोयथा । इमास्ताविन्ध्या द्रेःशुकहरितबर्हीवनघनाभुवःक्रीडालोलद्विरदद नारुग्णतरवः । लताकुञ्जेयासामुपनदिरतक्लान्त शबरीकपोलस्वेदाम्भःपरिचयनुदोवान्तिमरुतः । अत्रविन्ध्याद्रेरीदृशेषुप्रदेशेषुइत्यम्भूतावायवोवा न्तीतिहेतुत्वेनोक्त्वा देशस्यदेशहेतुर्जातिरियम् १

व्यज्यते । एतदग्निमोदाहरणाख्यानेक्रियाव्यापारग्रहणमुपलक्षण मतोनव्यापारसङ्करः । अन्येत्वाहुः । आश्रयाबच्छेदेनबहिर्भावोत्रभे दहेतुरिति ॥ ४ ॥ ५ ॥ ६ ॥ लीढेति । व्यस्तंविगतरुधिरम् । साव ज्ञन्तिर्यक्चलन्तीयेसृक्किणीताभ्यामाहताइतिसम्बन्धः । यथैकत्रकुञ्जे स्वपतःस्वरूपन्तथान्यत्रापीतिबहुवचनरहस्यम् । अतएवनदेशहेतुश ङ्का । अत्रसिंहेति । मदवासनयाविशेषितत्वादितिभावः ॥ ७ ॥ भ द्रन्तइति । करुणाकार्पण्यव्यञ्जकविशेषशालिनी । गर्वायतेअगर्ववा नेवगर्ववान्भवति । भृशादौलक्षत्वादेर्मत्वर्थलक्षणात्वात् ॥ ८ ॥ इमा स्ताइति । देशविशेषमुद्दिश्यमरुतांविधानमुद्देश्यस्यचविधौहेतुभावः।

कालहेतुर्यथा। कम्पन्तेकपयोभृशञ्जलकृशङ्गोजा। कङ्गलायतिश्वाचुल्लीकुहरोदरंक्षणमापिङ्गिलो बीज्झति। शीतार्तिर्व्यसनातुरःपुनरयन्दीनोजनः कूर्मवत्स्वान्यङ्गानिशरीरएवहिनिजेनिह्नोतुमाकाङ्क्षति। अत्रहेमन्तहेतुकतिर्यगाद्याश्रयाप्यापारस्वरूपोक्तेरियङ्कालहेतुर्नामजातिः॥ १० ॥ शक्तिर्यथा। बभ्रन्नङ्गेषुरोमाञ्चङ्कुर्वन्मनसिनिर्वृतिम्। नेत्रेनिमीलयन्तेषप्रियास्पर्शःप्रवर्तते। अत्ररोमाञ्चबन्धादिषुप्रियास्पर्शप्रवृत्तेर्न्निमित्तस्योक्त्वादियंशक्तिहेतुर्नामजातिः॥ ११॥ साधनहेतुर्यथा। उपनिहितहलीषासार्गलद्वारमारात्परिचकितपुरन्ध्रीसारिताभ्यर्णभागडम्। पवनरयतिरश्चीवारिधाराःप्रतीच्छन्विशतिवलितशृङ्गःपामरागारमुङ्गा॥अत्रजायमानक्रियाहेतुभूतयोःकर्तृकर्मणोःसाधनयोःस्वरूपवर्णनादयंसाधनहेतुर्नामजातिभेदः॥ १२॥

वंशीवमानान्दुष्प्रवेशतयामरुतात्मन्दीभावोद्धिरदैस्तरुभङ्गादवकाशलाभेप्रगल्भत्वमतःक्लमस्वेदापनयनसामर्थ्यन्ददेतस्सर्वमाह। अत्रविन्ध्याद्रेरिति॥९॥ गोजाविकमिति। विभाषावृक्षमृगेत्यादिनापाक्षिकएकवद्भावः। अत्रहेमन्तेति। यद्यपितिर्यगाश्रयेयञ्जातिः। तथापिहेतोरधिकस्यप्रवेशात्पृथग्भावः। सङ्करस्तुनदुष्यति॥१०॥ रोमाञ्चबन्धादिष्विति। बभ्रन्नित्यादौशतृप्रत्ययेनकर्तृभिधियतेसचसामानाधिकरण्यात्स्पर्शस्य। स्पर्शत्वाविशेषेतुशक्तिरेवप्रयोजिकावाच्यैत्यर्थः॥ ११ ॥ उपनिहितेति। अगारद्वारस्यहलीशावरुद्धतयादुष्प्रवेशत्वमतएवबहिश्चिरंविलम्बात्। प्रत्येषणवेशनयोर्वर्त्तमानता। उपलक्षणञ्चेदमेनकरणादयोप्युदाहार्याः॥ १२ ॥ १ ॥ पक्षेस्वभावपर्यवसा

प्रसिद्धहेतुव्यावृत्त्यायत्किञ्चित्कारणान्तरम् । य
त्स्वाभाविकंवापिविभाव्यं साविभावना ॥ १ ॥
शुद्धाचित्राविचित्राचत्रिविधासानिगद्यते । शुद्धाय
त्रैकमुद्दिश्यहेतुरेकोनिवर्तते ॥ २ ॥ अनेकोयत्रसा
चित्राविचित्रायत्रताम्प्रति । तयान्ययावागीर्भङ्ग्या
विशेषःकश्चिदुच्यते ॥ ३ ॥ तत्रकारणान्तरविभाव
नायांशुद्धायथा । अपीतक्लीबकादम्बमसम्मृष्टाम
लाम्बरम् । अप्रसादितसूक्ष्माम्बुजगदासोन्मनो
हरम् । अत्रैकैकङ्कादम्बादिकमुद्दिश्यक्लीबतादेःपी
तत्वादिरेकैकःप्रसिद्धहेतुर्व्यावर्त्यते । हेत्वन्तरञ्च
शरत्प्रभावोविभाव्यते । सेयंशुद्धानामकारणविभा
वनायांविभावना ॥ १ ॥ स्वाभाविकत्वविभावना

नस्तीतिजातेःकिञ्चिदपकृष्टांविभावनांविभावयितुमाह । प्रसिद्धेति प्रसिद्धस्पर्शहेतोर्विभाव्यतया प्रसिद्धग्रहणान्नियमेनतद्भावापत्तिमूलत्व व्यास्यास्तेननविरोधः । तथाहिणमहअवट्टिअतुङ्गमित्यादौवर्ट्टनज न्यमन्यदेवतुङ्गत्वमन्यच्च पारमेश्वरमाजानिकमितितयोरभेदाध्यवसा यः । एतदेवाभिसन्धायकाश्मीरकैरतिशयोक्तिरस्यामूलमुक्ता । यदि दितिनिपातोयत्रार्थे । यद्यपिकारणाभावेपिकार्योत्पत्तिरित्येवलक्षण न्तथापिमहासंज्ञाकरणप्रयोजनङ्किमित्याशङ्क्यायान्वयंविभाव्यमाह । तदयमत्रसंक्षेपोयथोक्तावद्विभावना । साद्वयी । कारणान्तरपर्यव सितास्वभावपर्यवसिताचेति ॥ १ ॥ २ प्रत्येकञ्चशुद्धादिभेदात्षोढास म्यद्यतइत्येतावतैवविभावनाशरीरनिष्पत्तेः । यथावर्णावर्णनकरम्बि तच्चित्रन्तथाविभावनापिविभावनयातादृशीचित्रेत्याह । अनेकइति । यथाचस्वरूपसम्पादकातिरिक्तविशेषप्रवेशाद्विचित्राः स्रग्दामाद्यस्त थेयमपीतिदर्शयति । विचित्रायत्रेति । तांविभावनाम् । तयाविभाव नया । अन्ययेतिअलङ्कारान्तररूपया ॥ ३ ॥ पीतस्थानम् । सूक्ष्म

यांशुद्धायथा । अनञ्जितासितादृष्टिर्भ्रूरनावञ्जिनता । अरञ्जितारुणश्चायमधरस्तवसुन्दरि ॥ इत्रैकैकन्दृष्ट्यादिकमुद्दिश्यासितत्वादेरनञ्जितत्वादिरेकैकोहेतुर्व्यावर्त्यते । स्वाभाविकत्वञ्चासितत्वादिदृष्ट्यादेर्विभाव्यते । सेयंशुद्धानामस्वाभाविकविभावनायांविभावना ॥ २ ॥ कारणान्तरविभावनायाञ्चित्रायथा । असम्भृतम्मण्डनमङ्गयष्टेरनासवाख्यङ्करणम्मदस्य । कामस्यपुष्पव्यतिरिक्तमस्त्रं बाल्यात्परंसाथवयःप्रपेदे । अत्रैकमेववयोलक्षणमपदार्थमुद्दिश्याप्यनेकोमण्डनादेःप्रसिद्धोहेतुःसम्भृतत्वादिर्व्यावर्त्यते । कारणान्तरञ्चस्तनोद्भेदधातूपचयलावण्यलक्ष्मीलाभादिर्विभाव्यते । सेयञ्चित्रानामकारणान्तरविभावना ॥ ३ ॥ सैवस्वाभाविकत्वविभावनायांयथा । णमहअविठिअतुङ्गंअविसारिअवित्थअंअणोणअङ्गहिरम् । अप्पलहुअपरिसह्लंअणाअपरमत्थपाअडम्महुमहणम् ॥ * अत्रै

न्निर्मलम् । शरत्प्रभावइति । प्रस्तावौचितीन्यायमभिव्यक्तः ॥ १२ ॥ असम्भृतमिति । ननुमण्डनस्यसम्भरणपूर्वकतयाप्रसिद्धेरस्तुविभावना । अनासवाख्यङ्करणम्मदस्यकामस्यपुष्पव्यतिरिक्तमस्त्रमित्यत्रतु कथम् । तथाहि । करणमितिकरणेभालेवाल्युट् । आद्येमदस्यकरणमासवोवयस्तुततोभिन्नमितिकदाचिद्व्यतिरेकःस्यान्नतुविभावना । द्वितीयेपिवयोमदस्यक्रियाआसवनान्नीनभवतीतिनसङ्गतम् । एवम्पुष्पव्यतिरिक्तमस्त्रमित्यत्रापिविकल्प्ययथायथन्दूषणंवाच्यं । तत्कथमेतत् । उच्यते । करणाङ्क्रियाआसवमारव्यातीत्यासवाख्यम् । ख्याख्यवत्प्रत्ययविधिः । नतथाभूतमनासवाख्यम् । हेतुतयानङ्कचिदास

---

* नमत अतङ्गितुङ्गमविसारित विस्तृत मन्यूनगभीरम् ॥ अल्पलघुमपरिच्छिन्नमज्ञातपरमार्थ पाददं मधुमथनम् ॥ १ ॥

कमेवमधुमथनमुत्रियद्दानेकस्तुङ्गत्वादेःप्रवृद्धत्वादिः प्रसिद्धोहेतुर्व्यावर्त्यते। स्वाभाविकत्वञ्चतम्प्रत्येषां विभाव्यते । सेयञ्चित्रानामस्वाभाविकत्वविभाव नायांविभावना ॥ ४ ॥ तथैवगीर्भङ्ग्याविचित्रा यथा । वक्त्रन्निसर्गसुरभिवपुरव्याजसुन्दरम् । अ कारणरिपुस्तस्यानिर्निमित्तंसुहृच्चमे । अत्रोत्तर योर्विरहसमागमादिकारणान्तरविभाव्यनयोः स्वा भाविकीभ्याम्प्राग्विभावनाभ्यां यथासङ्ख्यंविशेषउ क्तः । सेयंविभावनयैवविभावनायांविशेषोक्तेस्त यैवगीर्भङ्ग्याविचित्रानामविभावनाभवति५। सैवा न्ययागीर्भङ्ग्यायथा । वनेचराणांवनितासखाना न्दरीगृहीतसङ्गनिषक्तभासः । भवन्तियत्रौषधयोर जन्यामतैलपूराःसुरतप्रदीपाः । अत्रातैलपूराःसुर तप्रदीपाइति स्वाभाविकत्वविभावनायांशेषपदा र्थैरविभावनारूपैर्विशेषउक्तः। सेयमन्ययागीर्भङ्ग्या विचित्रानामविभावनाभवति ॥ ६ ॥ क्रियायाःका णंहेतुःकारकोज्ञापकश्चसः । अभावश्चित्रहेतुश्चच तुर्विधइहेष्यते ॥ १ ॥ यःप्रवृत्तिनिवृत्तिश्चप्रयु

बोधश्चसम् । तथाहेतुप्रतिषेधएवभङ्ग्यादर्शितोभवति । अस्त्रमपि क्रियारूपन्तत्पुष्पव्यतिरिक्तम्पुष्पच्युतंविनापुष्पेव्यइतिपूर्ववन्नेयम् । स्तनोद्भेदेत्यादौनार्थसन्देहः ॥ ३ ॥ ४ ॥ वक्त्रन्निसर्गसुरभीति । तस्यायथोक्तेवक्त्रवपुषीमसाकारणरिपुर्निर्निमित्तमसुहृच्चेत्यन्वयोवि वक्षितप्रतीतिलाभाच्चनार्थान्तरैकवाचकत्वलक्षणोदोषः । यथासङ्ख्यमिति । तयोरर्थैकैकम्प्रतिसम्पादनलक्षणविशेषार्पणाच्चमत्वात् ५ शेषपदार्थैरित्रितनितासखत्वादिभिःसुरताद्युपपादकैः ॥ ६ २ ॥ हे

क्तऽचान्तराविशन् । उदासीनोपिवाकुर्यात्कारक
न्ततूप्रचक्षते ॥ २ ॥ तेषुप्रवर्तकःक्रियाविष्टोयथाय
ञ्चमान्दोलितप्रौढचन्दनद्रुमपल्लवः । उत्पादय
तिसर्वस्यप्रीतिम्मलयमारुतः । सोयंयथोक्तोमलय
मारुतःप्रीत्युत्पादनक्रियासमावेशात्प्रवर्तकोनामका
रकहेतुभेदः ॥ १ ॥ सएवक्रियानाविष्टोयथा ।
तस्याज्ञःप्रभावेनतदुद्यानानिजज्ञिरे । आर्द्रांशुक
प्रवालानामास्पदंसुरशाखिनाम् । अत्रप्रभावःक्रि
यायामनिविशमानएवहेतौतृतीयाम्प्रवर्तयति नक
र्तरीतिक्रियायामनाविष्टकारकहेतुभेदः ॥ २ ॥ नि
वर्तकःक्रियाविष्टोयथा । चन्दनारण्यमाधूयस्पृष्ट्वा
मलयनिर्झरान् । पथिकानाम्प्रमाथायपवनोय
मुपस्थितः । अत्रैवंविधस्यपवनस्यपथिकप्रमाथ
साधनक्रियायाङ्कर्तृत्वेनावेशान्निवर्तकोनामायमा
विष्टक्रियःयकारकहेतुभेदः ॥३॥ सएवक्रियानावि

तुप्रतिषेधोविभावनायासुक्तोऽथहेतुरेवकइत्यपेक्षायांहेतुलक्षणमाह
क्रियायाःकारणंहेतुरिति । उपपत्तौक्रियायामेवसर्वस्यनिमित्तभावो
निरूप्यतइत्यभिसन्धायक्रियायाइत्युक्तमितिकश्चित्तदसत् । द्रव्यगुण
क्रियाविषयेहेतुः क्रियामात्रविषयश्चकारकमितिप्रकीर्णकवृत्तौविभा
गकरणात्क्रियाग्रहणञ्चेहनिष्फलंस्यात् । तस्माद्यत्रक्रियाम्प्रत्यवधि
भावोनिरूप्यतेतत्रद्वयीगतिर्निमित्तत्वमात्रविवक्षाकारकत्वविवक्षावा
आद्येप्याश्रितावधिभावस्यवस्त्वन्तरपरहेतु भावविवक्षाअवस्तुस्वरू
पविवक्षावाद्वितीयेपिकारकत्वक्रियानुबन्धिव्यापारत्वम् । प्रधानक्रियातु
कूलक्रियान्तरसमावेशइतियावत् । तद्विविधंशब्दाभिहितमतथ
ञ्चआद्यङ्कारकविभक्तेर्विषयोद्वितीयंहेतुविभक्तेः द्वयमपिच

ष्टोयथा । प्रजागरात्खलीभूतस्तस्याःस्वप्नसमाग
मः । वाष्पस्तुनददात्येनान्द्रष्टुञ्चित्रगतामपि ।
अत्रसमागमनिवृत्तावनिविशमानः प्रजागरस्तृती
यार्थेपञ्चमीम्प्रयोजयति । बाष्पःपुनर्दानक्रियावे
शाद्दर्शनक्रियायामनाविशन्कर्मसम्बन्धान्नामप्रधा
नभावेनचोपगृह्णाति ॥४॥ प्रयोजकःक्रियाविष्टोय
था । तस्मिन्जीवतिदुर्द्धर्षे हतमप्यहतम्बलम् । ह
नूमत्युज्झितप्राणेजीवन्तोपिमृतावयम् । अत्रबल

षयमेव । षण्णामपिकारकाणांक्रियाघटितमूर्तित्वात् । अवस्तुभूतं
तुनिमित्तमभावात्मकतयानविक्रियते ॥ विकाराभावाच्चनक्रियाविशि
ष्टतयाभावे । नचकारकमितितृतीयएवप्रकारः प्रसिद्धकार्यकारण
भावविपर्यासेनोपनिबध्यमानोहेतुराश्चर्यकारितया चित्रआरोपितम
पिचहेतुत्वंहेतुत्वमेवेतिभवतिचतुर्थःप्रकारोबहिरसन्भाव्यमानस्या
पिकविप्रतिभासंरम्भोत्थाप्यतयाचमत्कारविशेषार्पणाद्धेतुर्णीवालङ्का
रतालङ्कारता । यदाह । कोहिप्रतीतिमात्रकाव्येवस्तुस्थितिम्भावयेदि
ति । तदेतत्सर्वमभिसन्धायविभागमाह । कारकइत्यादि ॥ १ ॥ अ
सतःसत्ताप्रवृत्तिः,सतोऽपगमोनिवृत्तिः,पूर्वर्त्तमानस्यप्रवर्त्तनाप्रयुक्ति
र, न्तराविशन्नुपात्तत्रिय,उदासीनोऽतथाभूतः । तेनकारकस्यषट्
प्रकाराः ॥ २ ॥ १ ॥ तस्याराज्ञःप्रभावेनेत्यत्रसद्विकर्तृत्वमविवक्षि
तमतोहेतुमात्रविवक्षायाम्पाञ्चमीतृतीयाभवतीत्याह । हेतौतृ
तीयाभिति । करणभावस्त्वसम्भावितएव । प्रभावमात्रस्यतत्क्रिया
व्यभिचारात् ॥२॥ प्रमायसाधनक्रियायाङ्कर्तृत्वेनेतिनिष्ठाप्रत्ययेनोपा
त्तेनेतिभावः ॥ ३ ॥ खिलीभावोनिवृत्तिः । तृतीयार्थइति । हेता
ववधित्वापूर्वतेरपादानभावेनसम्भावितः । दानक्रियेति । स्यादत्र
दर्शनक्रियासम्भवेशोयदिदानक्रियांवशःस्यात् । सएवतुनास्तिनञा
निषेधादित्यर्थः ॥ ४ ॥ तस्मिन्जीवतीति । जीवनमरणयोर्बलस्यै
वस्वातन्त्र्यंहनूमान्प्रयोजयतिप्रयोजकताचास्यतेएवजीवत्युज्झितप्रा

प्रत्युज्जीवनमरणक्रिययोः सप्तमीवाच्यनैमित्तिकाधिकरणकारकभावेन हनूमानाविशन्प्रयोजकोभवतीतिक्रियाविष्टोयम्प्रयोजकोनामकारकहेतुभेदः ॥ ५ ॥ सएवक्रियानाविष्टोयथा । मानयोग्याङ्गरोमीतिप्रियस्यानस्थितांसखीम् । बालाभ्रूभङ्गजिह्मालक्षीपश्यतिस्फुरिताधरा ॥ अत्रमानाभ्यासक्रियायाभ्रूभङ्गजिह्मालक्षिप्रेक्षणादिरूपायाआत्मन्येवात्मनःसमावेशोनभवतीतिक्रियानाविष्टोयमितिशब्दाभिधेयप्रयोजकोनामकारकहेतुभेदः ॥ ६ ॥ द्वितीयाचतुर्थीयाचचतथीसप्तमीचयम् । क्रियानाविष्टमा

णइतिपदान्यासुपात्त । कतमत्कारकमिदम्भवतीत्याह ।सप्तमीवाच्येति । ननुचाङ्गुल्यग्रेभद्रकलघटान्दर्शयन्तीवघूर्तादृत्यादौकाल्यनिकादावपिसप्तमीभावात्काषङ्कारकतेत्यताह । नैमित्तिकेति । अन्यस्यासम्भवादितिभावः ॥ ५ ॥ मानयोग्यामिति । भ्रूभङ्गजिह्मालक्षिस्फुरिताधरादिप्रेक्षणारूपायामानाभ्यासक्रियायाममीबालायाः स्वातन्त्र्यम् । तादृशींन्तुतामितिशब्दनिर्देश्योभिप्रायविशेषःप्रयुङ्क्तेतस्यतुनक्रियान्तरमुपात्तमुपात्तायास्तुमानक्रियायाः स्वात्मन्तिसमावेशोनुपपन्नः । अभिप्रायोपिहिव्यापारप्रचयरूपक्रियान्तर्भूतएव । यदाह महाभाष्यकारःयाकिञ्चित्तदभिसन्धिपूर्वकम्प्रेषणमध्येषणंवातत्सर्वम्यर्थइति । स्मरणादिकञ्चास्यव्यापारःसम्भवतीत्यतोनाकारकत्वंवाच्यम् । तदेतदभिसन्धायाह । आत्मन्येवात्मनइति ॥ ६ ॥ इहपञ्चैवलक्षणेविभक्तयोविहितास्तथा अनुलक्षणेलक्षणेत्यभूततेत्यादिनासंज्ञांविधायकर्मप्रवचनीययुक्तइतिद्वितीया। येनाङ्गविकारइत्यभूततद्भावइत्येताभ्यान्तृतीया । उत्पातेनज्ञापितेइतिचतुर्थीयस्यचभावेनभावलक्षणमितिसप्तमी । षष्ठीचानादरइतिषष्ठीतदेतदाह । द्वितीयाचेति । षष्ठीमग्रेवक्ष्यतिषष्ठीचानादरइतिसूत्रेचकारस्यसमुच्चेयतयान

चष्टेलक्षणंज्ञापकश्चयः ॥ ३ ॥ सद्वितीयावाच्योय था । ताम्प्रत्यभिव्यक्तमनोरथानाम्महीपतीनाम्प्र णयाग्रदूत्यः । प्रवालशोभाइवपादपानांशृङ्गारचे ष्टाविविधाबभूवुः ॥ अत्रक्रियानाविष्टतयैवेन्दुम त्याम्महीपतीनांशृङ्गारचेष्टामवन्त्योलक्ष्यन्ते । सो यंलक्षणहेतुःप्रतिनायोगेद्वितीयामुत्पादयति ॥ ७ ॥ तृतीयावाच्यमित्यम्भूतलक्षणंयथा । कण्ठेकालःक रस्थेनकपालेनेन्दुशेखरः । जटाभिःस्निग्धताम्राभि राबिरासीद्वृषध्वजः ॥ अत्रकण्ठेकालइत्यादीनि क्रियायामनिविशमानान्येवत्वृषध्वजंज्ञापयन्ति । यथाजटाभिस्तापसइति ॥ ८ ॥ तृतीयावाच्यएवा ङ्गविकारलक्षणंयथा । सबालआसीद्वपुषाचतुर्भुजो

प्रधानासेतिनात्रतुल्यकक्षतयागणिता ॥ ३ ॥ क्रियानाविष्टंस्वव्यापा रशून्यंतटस्थमेवयद्व्याप्रियते । तेनकारकाद्भेदः । अत्रहिक्रियानाविष्टयैवइन्दुमत्येतीन्दुमतीमालम्बनविभावीकृत्यमानाः शृङ्गारचेष्टा स्तयैवावच्छिद्यन्ते । तदवस्थाएवबलद्भ्यन्तेततोभवतिहेतुत्वंलक्षण त्वमवधित्वञ्चेति । ननुकथमत्रद्वितीया । यात्रताहेतुत्वात्तृतीयया भवितव्यमित्यतआह । द्वितीयामिति । नाप्राप्तायात्तृतीयायामियं विधीयमानाबलवतीताम्बाधतइत्यर्थः ॥ ७ ॥ अत्रकण्ठेकालइत्यादी नीति । यद्यपिकपालेनजटाभिरित्येवोदाहरणन्तथापिप्रसङ्गादित रद्व्याख्यानम् । ज्ञापकत्वमुभयत्रापितुल्यविभक्तिवाच्यतायान्तुविशे षः । तेनान्योप्येवञ्जातीयोलक्षणप्रकारःस्वयमूहनीयइत्युक्तम्भवति यदुच्यति । उपलक्षणञ्चैतदित्यादिना । उक्तमेवपरिदृढोदाहरणेनद्र ढयति । यथाजटाभिरिति । यथाहीत्यस्मृतस्यतेनैवप्रकारेणप्रकारव तोलक्षणञ्जटाभवन्तितथेहापिकपालादिकमितिभावः। तृतीयावाच्य एवेति। सूत्रेऽङ्गपदेनाङ्गीलक्ष्यते । तस्यचसम्बन्धिनियमादङ्गवाचि

मुखेनपूर्णेन्दुनिभस्त्रिलोचनः । युवाकराक्रान्तमही भृदुच्चकैरसंशयंसम्प्रतितेजसारविः । अत्रवपुषा चतुर्भुजोमुखेनत्रिलोचनस्तेजसारविरित्यङ्गविकारै रङ्गिनाविकृतिर्लक्ष्यतेयथाक्षणाकाणइति ॥ ९ ॥ च तुर्थीवाच्यमुत्पातलक्षणंयथा। गोनासायनियोजि तागदरजाःसर्पायत्रदुौषधिः कण्ठस्थायविषायवी र्यमहतेपाणौमणीन्बिभ्रती । भर्तुर्भूतगणायगोत्रज रतीनिर्दिष्टमन्त्राक्षरारक्षत्वद्विसुतावीवाहसमये प्रीताचभीताचवः ॥ अत्रगौर्याविवाहमङ्गलानौचि त्येनोत्पातरूपैरगदरजोनियोगादिभिर्भगवद्भक्तागो नासादयोज्ञाप्यन्ते। यथा । वातायकपिलाविद्युदि ति। ततश्चोत्पातेनज्ञाप्यमानइतिसम्बन्धस्योभय निष्ठत्वान्नादर्थ्यइत्रलक्ष्यवाचिनश्चतुर्थीनलक्षणवा चिनः । तृतीयाविषयापहारात् । एकयैवविभ

नस्तृतीयाभवति । अङ्गत्वद्विविधमाजानिकमौपचारिकञ्चद्वयम पीहस्थितंविकारादिकञ्चेत्थम्भूतलक्षणमेवेदम् ॥ अतएवसूत्रक मीनादृतइत्याशयवान्व्याचष्टे । अत्रवपुषेति । विकृतिरवस्थान्तर प्राप्तिः । गोनासायेति । ननूत्पातेनाविष्टेनयज्ञाप्यतेतत्रचतुर्थीति लक्षणमेवास्यावाच्यमतिभातिनैतत् । नैतत्लक्ष्यलक्षणाभावोसाव भिधीयतेनतुलक्ष्येतत्रयतोविधीयतेतस्यलक्षणीयतामर्थादितरस्य लक्षणताम्बोधयतीति । अगदरजःप्रभृतयस्तुकथमसङ्गलरूपाइत्य वशिष्यतेतत्राह । अत्रगौर्याइत्यादि । ननुतथापिलक्षणवाचिनएव चतुर्थीतिकथमवसितमित्यतआह । ततश्चेति । यथातादर्थ्यस्योभ यनिष्ठत्वेपिकङ्कणायकनकमित्यत्रकार्यवाचिनएवचतुर्थीनतुकारणवा चिनस्तथेहापिसम्बन्धस्योभयाश्रयत्वेपिलक्ष्यवाचिनएवचतुर्थीनतल क्षणवाचिनइत्यर्थः । तर्हितृतीयाकथन्नभवतीत्यतआह । एकयैव

क्त्योभयगतस्यापिसम्बन्धस्यराज्ञःपुरुषइतिवदुक्त
त्वात् तृतीयापिनभवति ॥१०॥ सप्तमीवाच्यम्भा
वलक्षणंयथा । इतिशासतिसेनान्याङ्गच्छतस्तान
नेकधा । निषिध्यहसताकिञ्चिन्नस्थेतत्रान्धकारि
णा । अत्रसेनान्यःपलायमानगणानुशासनक्रिया
यामन्धकारःस्वप्रकाशनक्रियालक्ष्यते । यथागोषु
दुह्यमानासुगतइति । उपलक्षणञ्चैतत् । तेनान्य
दपिभावलक्षणंशत्राद्यभिधेयमुपलक्ष्यते । यथात्रैव
हसतातस्थइति ॥११॥ यथावा । यज्वभिःसम्मृतंह
व्यंवितेष्वध्वरेषुसः । जातवेदोमुखान्मायीमिषता
माच्छिनत्तिनः । इत्यानादरोपाधिकेभावलक्षणेष
ष्ठ्रपिभवतीति ॥१२॥ अभावःप्रागभावादिभेदेने
हचतुर्विधः । घटाभावादिभेदात्तु तस्यसङ्ख्यानविद्य
ते ४। तेषुप्रागभावोयथा । अनभ्यासेनविद्यानाम
संसर्गेणधीमताम्। अनिग्रहेणचाक्षाणांव्यसनञ्जा

चेति । सम्बन्धस्यसस्वन्धिनावेवविशेषस्तेनलक्षणमपिचतुर्थ्यैवप्रति
पादयत्यहउक्तार्थत्वात्कथन्तृतीयाभवतीतिशुद्धप्रातिपदिकार्थाभि
धानेप्रथमेतिभावः ॥१०॥ यस्यचभावेनभावलक्षणमित्यस्यसूत्रस्या
र्थस्तुयस्यवस्तुनोभावेनक्रिययावस्त्वन्तरस्यभावः क्रियालक्ष्यतेतद्व च
नात्सप्तमीत्यतआह । अत्रसेनान्यइति । हसतातस्यइतिलक्षणेशत्रु
विधिः । लक्षणहेत्वोःक्रियायाइतिसूत्रणात् ॥११॥१२॥ अभावसा
सान्यमभावप्रमाणनिरूपणप्रस्तावे"असत्तायाःपदार्थानामिति,, अने
नवक्ष्यति । तेनात्रसामान्यलक्षणन्नकृतवान् । सद्विविधस्तादात्म्यप्र
तियोगिकःसंसर्गप्रतियोगिकश्च । द्वितीयस्त्रिधा । प्राक्प्रध्वंसात्य
न्ताभावभेदात् । तदाह । प्रागभावादिरिति । ननुनप्रागभावादिरे
कोत्तिप्रतियोगिभेदेनभेदादित्यतआह । घटादीति । अनेनरूपेणस

यतेनृणाम् । अत्रविद्यानभ्यासादेःप्रागभावस्यध्व
सनादिकारणत्वम् ॥ १४ ॥ प्रध्वंसाभावोयथा ।
गतःकामकथोन्मादोगलितोयौवनज्वरः । गतोमो
हश्चुताकृष्णाकृतम्पुण्याश्रमेमनः ॥ अत्रकामकथो
न्मादगमनादेःप्रध्वंसाभावस्यपुण्याश्रमानुसन्धान
कारणत्वम् ॥ इतरेतराभावोयथा । वनान्यमूनिन
गृहाण्येतानद्योनयोषितः । मृगाइमेनदायादास्त
न्मेनन्दतिमानम् । अत्रवनानिअमूनिनगृहाणी
त्यादेरितराभावस्यमनःप्रमोदकारणत्वम् ॥ १५ ॥
अत्यन्ताभावोयथा । अत्यन्तमसदार्याणामनालो
चितचेष्टितम् । अतस्तेषुविवर्द्धन्तेनिर्विघ्नाविभू
तयः ॥ अत्रानालोचितचेष्टितस्यात्यन्ताभावोवि
भूतीनान्निर्विघ्नवृद्धिहेतुः ॥ १६ ॥ एतेनाभावाभा
वोपिव्याख्यातः । अत्रप्रागभावाभावोयथा । उ
द्यानसहकाराणामनुद्भिन्नानमञ्जरी । देयःपथिक

ङ्ख्यानास्त्येवसामान्यन्तुप्रागभावत्वादिकमाश्रित्यचातुर्विध्यंसोयन्तु
शब्दस्यार्थः ॥ ४ ॥ अनन्यासेनेति । यावद्विधान्नान्यस्यन्तिलावत्त
धीमद्भिः संसृज्यन्तेयावच्चाक्षाणिननिगृह्यन्तिलावद्व्यसनमितिविवक्षि
तम् । तेननात्यन्ताभावसङ्करः । आराध्यास्त्वाहुः । शिक्षापरस्यास्य
श्लोकस्याप्यन्यप्रयोजनकतयानात्यन्ताभावसङ्करइति ॥ १३ ॥ १४ ॥
वनान्यमूनीति । इदमिदन्नभवतीतिप्रतीतिसाक्षिकएवान्योन्याभा
वः । वैधर्म्यन्तुभेदाख्यमलङ्कारान्तरङ्किञ्चिद्वर्मसम्बन्धार्थंवस्वरूपस्या
पिभेदव्यवहारपात्रता ॥ १५ ॥ १६ ॥ वस्तुनउत्पादइति । भावएवा
भावाभावव्यवहारभूमिः । अभावव्यवहारविषयमाश्रित्यचविभागःक
तोक्तिचप्रागभावादेः प्रध्वंसादिरूपतेतिनन्यूनताविभागवाक्यस्याश

नारीणांसतिलःसलिलाञ्जलिः । अत्रवस्तुनउत्पादः प्रागभावाभावउच्यते । तेनेहसहकारमञ्जरीणामुद्भेदस्य पथिकनारीणाम्मरणेकारणत्वम् ॥ १७ ॥ प्रध्वंसाभावाभावोयथा । पीनश्रोणिगभीरनाभिनिभृतम्मध्येभृशोन्नस्तनम्पायाद्वःपरिरब्धमब्धिदुहितुःकान्तेनकान्तंवपुः । स्वावासानुपघातनिर्वृतमनास्तत्कालमीलद्दृशेयस्मैसोच्युतनाभिपद्मत्रसतिर्वेधाःशिबन्ध्यायति । अत्रयथोक्तेनत्रपुषायोयमालिङ्गनेपिविधिनिवासनाभिपङ्कजानुपघातः सहवस्तुनोऽवस्थानमेवप्रध्वंसाभावाभावउच्यते । सचेहाच्युतनाभिपङ्कजनिवासिनोविधेर्मनोनिर्वाणकारणम्भवति ॥ १८ ॥ विदूरकार्यःसहजःकार्यानन्तरजस्तथा ॥ युक्तोनयुक्तइत्येवमसङ्ख्याश्चित्रहेतवः ॥५॥

ङ्कनीया । तेनेति । भूतभव्यसमुच्चारणेभूतभव्यायेतिन्यायात्मञ्जरीणामुद्भेदस्यकारकतालाभोऽन्यथावाक्यभेदेनकिञ्चित्स्यात् । प्रागभावात्प्रागभावाभावभङ्ग्याचसमस्तमञ्जरीसमुद्भेदेनवसन्तप्रौढिध्वननात्प्रकृतविप्रलम्भःपोषः ॥१७॥ पीनश्रोणीति । निभृतन्दुर्लक्ष्यम् । अब्धिदुहितापिसर्वाङ्गीणमाश्लेषमभिलषतिभगवानपीतिकान्तेनकान्तमित्येताभ्यामभिव्यज्यते । उपलक्षणञ्चेदम् । तादात्म्यात्यन्ताभावाभावावप्युदाहरणीयौ । यथा । अवनिरुदकन्तेजोवायुर्नभःशशिभास्करौपुरुषइतियत्केचिद्भिन्नावदन्तितनूस्तव तदनघवधोवैचित्र्याभिर्निरावरणस्यतेविदधतियःपूरोन्मीलन्मृषामिहिरोपमाम् । अत्रभिन्न इत्यन्योन्याभावमुपन्यस्यनिरावरणस्यमृषेत्येताभ्यान्निषेधः । यथाच । नविद्यतेयद्यपिसर्वविषयासनागुणानुबन्धिप्रतिभानमद्भुतम् । श्रुतेनयत्नेनचवागुपासिताध्रुवङ्करोत्येवकमप्यनुग्रहम् । अत्रनविद्यतइत्यत्यन्ताभावमुपन्यस्यकमपीतिप्रतिभासत्ताभिधानेनप्रतिषेधः १८ विदूरकार्यइति ।

तेमीप्रयोगमार्गेषुगौणवृत्तिव्यपाश्रयाः । कार्याःका
व्येषुवैचित्र्यन्तथातेकर्तुमीशते ॥ ६ ॥ तेषुविदूर
कार्योयथा । अनश्नुवानेनयुगोपमानमलब्धमौवी
किणलाञ्छलेन । अस्पृष्टखड्गत्सरुणापिचासीद्व
क्षावतीतस्यभुजेनभूमिः । सीयम्बाल्यएवनवयौव
नकार्यकरणाद्विदूरकार्योनामचित्रहेतुः ॥ १९ ॥
सहजोयथा । सममेवसमाक्रान्तन्द्वयन्द्विरदगामि
ना । तेनसिंहासनम्पित्र्यमखिलञ्चारिमण्डलम् ।
अत्रराज्याभिषेकरिपुमण्डलाक्रमणयोर्हेतुमद्भावेनस
त्यपिपौर्वापर्येक्षिप्रकारित्वात्तुल्यमेवकार्यकरणभा
वोविवक्षितः । तेनसहजोनामायाञ्चत्रहेतुः ॥ २०
॥ कार्यानन्तरजोयथा । पश्चात्पर्यस्यकिरणानुदीर्ण
श्चन्द्रमण्डलम् । प्रागेवहरिणाक्षीणामुदीर्णोरांग
सागरः । अत्रचन्द्रोदयलक्षणाद्धेतोःपूर्वकालमेव
रागसागरउदीर्णइतिकार्यस्यउदयलाभः । सइह
गुणवृत्याश्रयणेहेतावतिशयम्पुष्पतीत्ययङ्कार्यान
न्तरजोनामचित्रहेतुः ॥ २१ ॥ युक्तोयथा । गुणा

कालान्तरभाव्यवस्थासम्पाद्यम्प्रागवस्थावतएवकार्यमुपजायमानंयत्रो
च्यतेसविदूरकार्यस्तच्चकार्यंशक्तिविशेषाधीनमितिबाल्येपिप्रभावातिश
यदर्शनाद्भुतेनैवरक्षाकृतेतिगौणवृत्तिव्यपाश्रयता । सहजःकार्येसहो
त्पत्तिकतयानिबद्धः ॥ कारणशक्तिप्रकर्षात्समकालमिवकार्यम्प्रतिभास
तेतेनहेतुशक्तिप्रकर्षाभिव्यक्तिरत्रमूलम् ॥ यदग्रेददतियथावाकर्तुमी
शतइतिएवमनन्तरजेपि । किङ्कारणम्पूर्वमुतकार्यमस्तिसएवव्यङ्ग्यः ।
युक्तेपिकारणगुणानुविधायिकार्यमसदेवारोप्यतेनप्रमुक्तोतितदेवविप
रीतमितिगौण वृत्त्याश्रयता॥५॥ ६ ॥ १९ ॥ २० ॥ २२ ॥ २३ ॥ ननुव्यक्तिभेदे

नुरागमिश्रेणयशसातेप्रसर्पता । दिग्वधूनाम्मुखे जातमकस्मादर्द्धकुङ्कुमम् ॥ अत्रदिग्वधूमुखेषुते गुणानुरागः कुङ्कुमंयशस्तुचन्दनमित्ययंयुक्तोनामगौणवृत्तिव्यपाश्रयश्चित्रहेतुः ॥ २२ ॥ नयुक्तोयथा । नमीलयतिपद्मानिननमोप्यवगाहते । त्वन्मुखेन्दुर्ममासूनांहरणायैवयस्यति । अत्रमुखेन्दोःपद्मनिमीलादिनयुज्यतइतिनयुक्तोनामचित्रभेदः । २३ ॥ एवंशब्दस्यप्रकारवाचित्वाद्यधिकरणादयःप्रयुज्यन्तेयथा । साबालावयमप्रगल्भमनसःसाक्षीवयङ्कातराः सापीनोन्नतिमत्पयोधरयुगन्धत्तेसखेदावयम् । साक्रान्ताजघनस्थलेनगुरुणागन्तुन्नशक्तावयन्दोषैरन्यजनाश्रितैरपटवो जाताःस्मइत्यद्भुतम् । अत्राभिव्यक्तमेवव्यधिकरणत्वङ्कार्यकारणयोःप्रतीयतइत्ययंव्यधिकरणोनामचित्रहेतुः ॥२४॥

पिहेतोरसङ्ख्यतार्थेद्विवचिताक्षिमेवंशब्देनाधिकेनेत्यतआह । एवंशब्दस्येति । प्रकारस्यउपाधेरेवभेदोविवक्षितोनतुव्यक्तिमात्रस्येतिभावः । साबालेति । बाल्यादीनांसामानाधिकरण्यएवप्रागल्भ्यादिकम्प्रतिहेतुभावःप्रतीतःसहृदयगौणवृत्तिव्यपाश्रयतयोपनिबध्यमानःक्रान्तिमावहति । तथाहिअन्यत्प्रागल्भ्यम्बालायाःसरलालोकितवाङ्मिश्राणाद्यसाधर्म्यलक्षणमन्यच्चनायकप्रकाण्डेकणभेषानियन्त्रणास्यादित्यनध्यवसायलक्षणन्तयोश्चतद्भावपत्तिरत्रव्यक्तैव । एवङ्कातरत्वादौबोद्धव्यम् ॥ २४ ॥ आदिग्रहणेनस्वहेतुकतयाकार्यहेतुकतयाचोपनिबध्यमानःसङ्कलितोभवति । हेतोरनन्तरन्तद्विपरीतमहेतुंलक्षयन्नाह । वस्तुनइति । हेतुतयाप्रतीतोपिकार्यंनकरोतीत्यभिधीयमानोऽहेतुःसद्विविधःस्वरूपेणकार्यव्यभिचारीव्यापारविरोधेनवातथाभूतोपिचकार्यंनकरोतितत्रद्वयनिबन्धनंयद्गतङ्कार्यमुपजनयितव्यन्तस्यवस्तुनःस्व

३ ॥ वस्तुनोवास्वभावेनशक्तेर्बाहानिहेतुना ॥ कृतात्मीयकार्यःस्यादहेतुर्व्याहततस्तुयः ॥ १ ॥ त त्राकृतकार्यौवस्तुस्वभावेनयथा । नविरचितालक टतटलास्यकरीभ्रुकुटिर्नपरुषहुङ्कृतेन मधुरि मन्तरितम् । नतत्रनिशुम्भसम्भ्रमवशादपिदारुण यामगवतिचेष्टयाकलुषितंवदनाम्बुरुहम् । अत्रनि शुम्भसम्भ्रमस्यहेतोरनुत्पादित भ्रुकुट्यादिदारुणचे ष्टाद्वारेणभगवतीमुखाम्बुरुहकालुष्यस्यकरणेयद सामर्थ्यन्तत्रतन्मुखाख्यस्यवस्तुनःस्वभावोनिमित्त मितिस्वभावादनुत्पादितकार्योयमहेतुः ॥ १ ॥ स एवशक्तेर्हानिहेतुनायथा । अनुरागवतीसन्ध्या दिवसःस्तत्पुरःसरः । अहोदैवगतिश्चित्रातथापिन समागमः । अत्रानुरागवत्त्वतत्पुरःसरत्वयोःसमाग महेत्वोःसामर्थ्यविघातेदैवगतिः कारणमितिशक्ते र्हानिहेतुनायमकृतस्वकार्यानामहेतुः ॥ २ ॥ व

भावःहेतुत्वाभिमतस्यशक्तिहानिर्वासापिद्विधाआत्यन्तिकोऽभावः ॥ प्रतिबन्धमात्रंवा । तत्रवस्तुस्वभावेनशक्तेरत्यन्तासत्त्वेनचद्विरूपस्व रूपाव्यभिचारीकृतात्मीयकार्यइत्यनेनोक्तम् । वस्तुस्वभावेनशक्तिप्र तिबन्धेनचद्विप्रकारोपिचव्यापाराद्यभिचारीव्याहतइत्यनेन । यद्य पिशक्तेरत्यन्तासत्त्वेहेतुभावएवनभवति । तथापिगुणवृत्त्याहेतुभावा ध्यासोवोद्वव्यः । साचगुणवृतिःश्लेषोपहितान्यादृशीभवति ॥ अ त्रनिशुम्भेति ॥ १ ॥ ननुचात्रचेष्टायाहेतुत्वन्तृतीययाप्रतीयतइति साहेतुत्वेनवक्तुमुचितेत्यतआह । भ्रुकुट्यादिदारुणचेष्ट अन्यथानिशुम्भसम्भ्रमवशादितिपञ्चमीसङ्गतास्यादितिभावः अनुरागोलौहित्यम्प्रीतिश्च । पुरःसरोऽग्रेगमनशीलःस

स्तुनःस्वभावेनव्याहतोयथा । नीवीबन्धोच्छ्वसन
शिथिलंयत्रयङ्काङ्गनानांक्षौमंरागादनिभृतकरेष्वा
क्षिपत्सुप्रियेषु । अर्चिस्तुङ्गानभिमुखगतान्प्राप्यर
त्नप्रदीपान्ह्रीमूढानाम्भवतिविफलप्रेरणाचूर्णमुष्टिः
अत्ररत्नप्रदीपनिर्वापणेचूर्णमुष्टेरपरित्यक्तस्वरूप
स्यापिविघातेरत्नप्रदीपाख्यवस्तुस्वभावःकारणमि
त्ययंवस्तुस्वभावेनव्याहतोनामाहेतुभूतः । सएवश
क्तेर्हानिहेतुनायथा । शम्भोरुद्धृतनृत्यकर्मणिकरेक
ङ्कालमाद्यंहरेःसङ्घट्टस्फुटितेन्दुमण्डलगलत्पीयूष
सञ्जीवितम् । तत्कालप्रणतेमुरद्विषिनवेदृष्ट्वाविला
संश्रियःकुर्वन्कोपकषायितेनमनसामिथ्योत्प्लुतीः
पातुवः ॥ अत्रकोपकषायितमनसस्तस्योत्प्लुतिकर
णसमर्थस्यापीश्वरकरग्रहणान्मिथ्यापदाभिधीयमा
नःप्रतीतोव्याघातः । ततोयंशक्तेर्हानिहेतुनाव्या
हतोनामाहेतुभेदः ॥ ४ ॥ यस्तुकारणमालेतिहेतु
सन्तानउच्यते ॥ पृथक्पृथगसामर्थ्यात्सोप्यहेतोर्न
विद्यते ॥२॥ एकोभिधीयमानेषुहेतुत्वेषुभवेत्त्रयोः ।
प्रतीयमानेष्वपरःकारणत्वेषुजायते ॥ ३ ॥ तयोरा

द्य ॥ २ ॥ ३ ॥ अमृतसेकजीवितकङ्कालशक्तिप्रतिबन्धेकोहेतुरतआ
ह । ईश्वरकरग्रहणादिति । ननुकोपकषायितमनस्त्वमुत्पादितकार्यं
सेन्धकथमन्यथाकुर्वदित्युच्यतेऽतआह । मिथ्यापदेति ॥ ४ ॥ इहकै
श्चित्कारणमालापृथगलङ्कारइत्युक्तम्पूर्वस्योत्तरोत्तरस्मतिहेतुभावो
क्तिस्तल्लक्षणम् । सद्विविधोऽभिधीयमानःप्रतीयमानोवा । उभयथापि
नाहेतोर्व्यतिरिच्यतइत्याह । यस्मिन्निति । यद्यपिपृथगस्यपृथगंहेतु
भावोनिवृत्तएवतथाप्युत्तरस्यप्रथमसमुखनिरीक्षणप्रवृत्तस्योत्तरस्मतित

द्योयथा । जितेन्द्रियत्वंविनयस्यकारणङ्गु
र्जरविनयादवाप्यते । गुणाधिकेपुंसिजन
जनानुरागप्रभवाश्चसम्पदः ॥ अत्रजितेन्द्रि
दीनामुत्तरोत्तरम्प्रतिहेतुभूतानामपिसम्पदु
पूर्वपूर्वसव्यपेक्षायांसमुदितानामेवकारणत्वं
नादिपदैरभिधीयतइति सोयमभिधीयमानहेतु
ङ्कारणमालेत्यहेतुभेदः ५॥द्वितीयोयथा । पीण
गोज्जंजरकभुआअन्तणिठुरपरिग्गहिअम् ।
रसविसमवलिअकण्ठन्दुक्खेण जीविअंवोली
अत्रजीवितदुःखातिक्रमणेकण्ठस्यवलनंत्रलन
निष्ठुरग्रहणन्निष्ठुरग्रहणस्याषिषीनत्वन्दुर्विगा
त्वंहेतुरितिप्रतीयमानकारणत्वङ्कारणमालेत्यहेतु
भेदः ॥ ६ ॥ ४ ॥ इङ्गिताकारलक्ष्योर्थः सूक्ष्मः
गुणात्तुसः ॥ सूक्ष्मात्प्रत्यक्षतः सूक्ष्मोप्रत्यक्ष
द्यते ॥ १ ॥ वाच्यःप्रतीयमानश्चसूक्ष्मोत्रद्विवि

भावोभिधीयते । महिस्वतन्त्रस्यैवहेतुभावेकारणमालाभासते ॥
तदिदमेकदेशद्वारेणलक्षयन्नाह । अत्रजितेन्द्रियत्वादीनीति
जीवितेदुःखातिक्रमणइति । यद्यत्रहेतुमालानस्यात्तदापरस्य
मालासमुपन्यासेवाक्यार्थपोषोनस्यादिति ॥ ५ ॥ ६ ॥ ४ ॥ लक्षण
कहेतुविशेषस्यसाधर्म्यादनन्तरंसूक्ष्मंलक्षयति । इङ्गितेति ।
तमाकारइङ्गितमाकारौचेत्यर्थः । शरीरावयवव्याप
पादेरन्यथत्वमाकारः सूक्ष्मार्थदर्शनंसूक्ष्मम्इत्यर्थगुणोषू
क्तमाशङ्क्याह । सूक्ष्मगुणात्तुसइति । हृदयसंवादभा
यसंवेद्यस्य । अतएवातिसूक्ष्मार्थस्यप्रत्यक्षायमाणत्व
गुणः । यथाहिकवेःप्रतिभासूक्ष्मविशेषोल्लेखिनीतथात

* पीनत्वदुर्ग्राह्यंयस्यभुजान्तर्निष्ठुरपरिगृहीतम् ।
शिष्टस्यविषमवलितकण्ठदःखेनजी व

मतः । इङ्गिताकारलक्ष्यत्वं लक्ष्मसामान्यमेतयोः ॥ तत्रेङ्गितलक्ष्यमभिधीयमानसूक्ष्मंयथा । ताम्प्रत्यभिव्यक्तमनोरथानामिति । अत्रस्वयंवरमिलितानां राज्ञांराजपुत्रीम्प्रतिप्राप्तिलक्षणस्यमनोरथस्याभिधीयमानस्यशृङ्गारचेष्टात्मकेनेङ्गितेनव्यङ्ग्यत्वादयमिङ्गितलक्ष्योभिधीयमानःसूक्ष्मभेदः ॥ १ ॥ तदेवाकारलक्ष्यंयथा । सायूनितस्मिन्नभिलाषबन्धंशशाकशालीनतयानवक्तुम् । रोमाञ्चलक्ष्येणसगात्रयष्टिम्भित्वानिराक्रामदरालकेश्याः ॥ अत्राभिलाषबन्धोरोमाञ्चलक्ष्येणगात्रयष्टिम्भित्वानिराक्रामदित्यनेनाभिधीयमानआकारलक्ष्यः सूक्ष्मभेदोऽभिहितः ॥ २ ॥ तदेवोभयलक्ष्यंयथा । त्वदर्पितदृश

पीतिस्फुटाभतयाप्रत्यक्षप्रमेयज्ञानमुत्पद्यते । तथाह्यन्योन्यसंवलितेत्यादौदम्पत्योर्मिथोनुस्मृतिलक्षणस्यप्रेम्णः कतिपयसंवेद्यस्यापिशब्दबलात्प्रत्यक्षायमाणत्वमनुभवसिद्धमेवतदेतदाह । सूक्ष्मात्प्रत्यक्ष इति । सूक्ष्मालङ्कारेतुकविप्रतिभायालिङ्गविषयत्वाच्छब्दोपितद्विषयएव । लिङ्गाच्चप्रतीतिरुत्पद्यमानासामान्यपुरस्कारेणप्रवृत्तानप्रत्यक्षवत्तद्विशेषोल्लेखक्षमेतिसूक्ष्मगुणवैधर्म्यंतदिदमुक्तम् । सूक्ष्मोप्रत्यक्षइति । अत्रकैश्चित्प्रतीयमानस्यसूक्ष्मस्यभावइतिसंज्ञांविधायालङ्कारान्तरमुक्तन्तदसत् । सूक्ष्मसामान्यलक्षणेनक्रोडीकरणादित्याह । इङ्गिताकारलक्ष्यत्वमिति । एतेनलक्ष्यत्वपुनरुक्त्याशङ्कापरिहृता । अत्रस्वयंवरेति । नचशृङ्गारचेष्टाप्रत्यर्पितस्यमनोरथशब्देनाभिधानमर्थपुनरुक्तमितिवाच्यम् । नहियथानुरागानुभावेनचित्तवृत्तयःस्फुटाउपस्थाप्यन्तेतथास्वशब्देनेतिविस्तरेणप्रपञ्चमेववक्ष्यामः । स्वशब्दस्तुकिमर्थमित्यवशिष्यतेतत्रब्रूमः । स्वयंवरसमाजप्रवेशादिनायेषांसामान्यतउत्कण्ठाप्रतीतिपथमवतीर्णासीत्तेषामिन्दुमतीसन्निधौतदनु

स्तस्यागीतगोष्ठ्यामवर्द्धत। उद्दामरागपिशुनाछ
कापिमुखाम्बुजे ॥ अत्रत्वदर्पितदृशइतिइङ्गित
याकापिमुखाम्बुजइत्याकारस्ताभ्यामुद्दामरा
शुनेत्यनेनाभिधीयमानस्याननरागस्य सूक्ष्म
यालक्ष्यमाणत्वादयमभिधीयमानोभयलक्ष्यःसूक्ष्म
भेदः ॥ ३ ॥ प्रतीयमानमिङ्गितलक्ष्यंयथा । वा
त्तापडिवअणंणदेइरूसेइएक्कमेक्कम्मि । अज्जा
ज्जेणविणापइप्पमाणेणईकच्छे * । अत्रप्रति
नादानपरिजनप्रकोपाभ्याम्प्रदीप्यमानेनदीकच्छे
इतिहेतुनाप्रत्याय्यमानःसङ्केतकुटुङ्गदाहोद्भवबधू
स्तापोवाक्यार्थत्वेनलक्षितइतिअयमिङ्गितलक्ष्यः
तीयमानःसूक्ष्मभेदः ॥ ४ ॥ प्रतीयमानमेवाकारल
क्ष्यंयथा । सामाइसामलीएअद्धच्छिपलोअमुहस
हा । जम्बूदलकअकण्णवअंसभमिरेहलिअउत्ते * ।

भावबलेनासङ्ख्यसूक्ष्मविशेषवतीसैवाभिव्यक्तेति दृढानुबन्ध
स्यप्रेम्णःप्रकर्षकाष्ठाम्पुष्णाति ॥ एवमन्यत्रापि ॥ १ ॥ २ ॥ ३ ॥ अत्र
प्रतिवचनादानमिति । नहिप्रतिवचनप्रदानाभावमात्रमत्रचमत्कार
रितस्मादन्यदापिसम्भवादतःप्रतिवचनप्रदानाभिप्रायाविपरीतचित्त
वृत्तिविशेषोन्नायिकासमीपदेशापसरणादिलक्षणा क्रियाकाचित्प्रतिव
चनाप्रदानपदेनाभिमता । नचप्रकोपोय्यनुभवरूपतामनासादयन्स्वा
दनीयतामासादयतीतिनूनन्तेनापिभ्रूभङ्गादिरूपाक्रियैवाभिसं
त्याशयवतोक्तमिङ्गिताभ्यामिति । यद्येवन्तर्दृकाव्यशोभा
त्किमन्येनलक्षितेनेति । नहियथोक्तप्रतिवचनाद्यदानप्रकोपाभ्या

१ * प्रौढमहिलानांयद्यत्सुशिक्षितानांरतेसुखयति ।
यद्यदशिक्षितंतववधूनांतत्तद्रतिंदते ॥ १ ॥

* श्यामायतिश्यामलायाअर्द्धाक्षिप्रलोकनमुखशोभा ।
जम्बूदलकृतकर्णावतंसभ्रमरेहालिपत्रे ॥ ॥

३

अत्राद्धाङ्किप्रलोकनमुखश्यामताभ्यामाकाराभ्या
ञ्जम्बूदलकल्पितावतंसइत्यनेनप्रत्याय्यमानःसङ्के
तगमनभ्रंससम्भवःश्यामायामनस्तापोलक्ष्यतेइत्य
यमाकारलक्ष्यःप्रतीयमानःसूक्ष्मभेदः ॥ ५ ॥ तदे
वोभयलक्ष्यंयथा । प्रयच्छताङ्गैःकुसुमानिमानिनी
विपक्षगोत्रन्दयितेनलम्भिता । नकिञ्चिदूचेचर
णेनकेवलंलिलेखवाष्पाकुललोचनाभुवम् । अत्रच
रणेनभूमिलेखनमिङ्गितन्दृशोर्वाष्पाकुलत्वमाकार
स्ताभ्याङ्गोत्रस्खलनोद्भवोमानिन्यामनस्तापःप्रती
यमानमिङ्गिताकारलक्ष्यःसूक्ष्मभेदः ॥ ६ ॥ ५ ॥ प
दार्थानान्तुयःसारस्तदुत्तरमिहोच्यते । सधर्मधर्मरू
पाभ्यांव्यतिरेकाच्चमिद्यते ॥ १ ॥ तेषुधर्मस्वरूपंय
था । दानंवित्तान्दुतंवाचःकीर्तिधर्मौतथायुषः । प
रोपकरणङ्कायादसारात्सारमुद्धरेत् ॥ अत्रदानसत्य
कीर्त्यादीनांवित्तादिवस्तुधर्माणां सारभूतानामुद्धा

ङ्कश्चिद्विवक्षितार्थलाभइतिभावः ॥ ४ ॥ ५ ॥ ६ ॥ विभज्यमानस्यसरू
पतयाक्रूक्ष्मानन्तरमुत्तरलक्षणमाह । पदार्थानान्त्विति । सारःसर्व
स्वायमानमुत्कर्षशालिवस्तु । पदार्थानामितिनिर्द्धारणेषष्ठी । उत्तर
मित्यन्वर्थनाम । उत्कृष्टत्वमुदोऽर्थस्तत्रैवप्रकर्षस्तरपः । धर्मधर्मिरू
पाभ्यामिति । व्यस्तसमस्ताभ्याम् ॥ धर्मउपसर्जनम्परप्रवणतयाप्र
तीयमानंवस्तु । अतथाभूतन्तुधर्मिरूपन्तदयमर्थः । प्रसिद्धवस्तुस
ध्येकस्यचिदुत्कर्षवत्तयानिर्द्धारणमुत्तरम् । तत्त्रिधा । धर्मरूपस्यधर्मि
रूपस्तुभयस्य च । आद्ययोराद्ययोःप्रत्येकम्प्रकारद्वयम् । निर्द्धार्यमाण
स्यगुणस्योपादानन्निर्द्धार्यानतरव्यतिरेकिधर्मवत्तयावा । तदिदमाह ।
व्यतिरेकाच्चेति । अन्त्यस्यापिसामान्यविशेषरूपतयारूपत्वमितिष
ट्प्रकारमुत्तरमिति ॥ १ ॥ वित्तादिवस्तुधर्माणामिति । पञ्चम्याव्यि

रादयन्धर्मरूपःसारः ॥ १ ॥ धर्मिरूपोयथा धुविकचसितोत्पलावतंसंशशिकरपल्लवितञ्च पृष्ठम् । मदनजनितविभ्रमाचकान्तासुखमि वतांविभूतयोन्याः ॥ अत्रमधुप्रभृतीनांविभूति सारभूतानामुद्धरणादयन्धर्मिरूपःसारः ॥ २ अथव्यतिरेकेणधर्मरूपोयथा । पोढमहिलाण जज्जंसुसिक्किअन्तरएसुहावेइ । जज्जं असि अंणवबहूणतन्तंरइन्देइ । अत्रप्रौढानांसुशि सुखयतीतिकर्मान्तरलक्षणेभ्योधर्मेभ्यःसुशिक्षित शिक्षितरतकर्मलक्षणाःस्त्रीधर्माव्यतिरेकेणप्रतिप द्यन्तइतिधर्मव्यतिरेकरूपोयंसारः ॥ ३ ॥ तिरेकेणधर्मिरूपोयथा । राज्येसारंवसुधावसुधा म्पत्तनम्पुरेसौधम् । सौधेतल्पन्तल्पेवराङ्गनानङ्ग सर्वस्वम् । अत्रवसुधादयोधर्मिणउत्तरोत्तरक्रमेण पूर्वतःपूर्वतोव्यतिरिच्यन्तइत्ययन्धर्मिव्यतिरेकःसा रः ॥ ४ ॥ एतेनधर्मधर्मिस्वरूपोपिव्याख्यातः । स

भागःप्रत्यायितःसचसंश्लेषपूर्वकएवेतिदानादीनासुपसर्जनसाप्रतीति ॥ १ ॥ विभूतिन्यइति । विभूतयःप्रथमानिर्दिष्टास्तेनपूर्ववक धान्यार्थिभावेन प्रतीतिभासोस्तीतिविशिष्टमध्यादिरूपंवस्तुनाङ्गग वेनगम्यतइति ॥ २ ॥ अप्रौढस्त्रीणामिति । षष्ठ्याधर्मेधर्मि हिसः । तर्हिनिर्द्धारणङ्कस्मादित्यतआह । कर्मान्तरेति । मसामान्यतउपादानात्प्रौढस्त्रीसम्बन्धिनोल्लिखितस्यसुशि शेषमुपादायमुग्धस्त्रीसम्बन्धिनोऽसुशिक्षितत्वंव्यतिरेकी त्तः ॥ ३ ॥ अत्रवसुधादयइति । निर्द्धारिताद्वसुधामात्रा सुधाव्यतिरिच्यते । वसुधावत्यत्तनात्सौधवत्पत्तनवत्

द्विधा । सामान्यतोविशेषतश्च । तत्रसामान्यतोय
था । गीतशीतांशुताम्बूलकर्पूरवनितादिभिः । अ
सारोप्येषसंसारःसारवानिवलक्ष्यते । अत्रगीतादी
नाऽजगतःसारभूतानामविशेषेणैव सर्वेषामुपादा
नाद्धेतुतृतीयान्तयाचसंसारसारवत्त्वेङ्गभावादयंसा
मान्यतोधर्मधर्मिरूपःसारः॥५॥ विशेषतोयथा । अ
वैमिपूतमात्मानन्द्वयेनैवद्विजोत्तमाः । मूर्द्ध्निगङ्गा
प्रपातेनधौतपादाम्भसाचवः । अत्रगङ्गाप्रपातस
म्पर्षिपादोदकयोर्विशेषेणसारभूतयोरुपादानाद्धिम
वतःपूतत्वेचाङ्गभूतत्वादयंविशेषतोधर्मधर्मिरू
पःसारः ॥ ६ ॥ विरोधस्तुपदार्थानाम्परस्परमस
ङ्गतिः । असङ्गतिःप्रत्यनीकमधिकंविषमश्वसः ॥
तेषुविरोधःशुद्धोग्रथितश्च । तयोराद्योयथा । क्व
युवतिमार्द्रवङ्कचमहाहवदारुणताक्वचवलयीकरः
क्वकरिदन्तजमुष्टिरसिः । क्वचनवयौवनङ्ककुसुमायु

वत्सौधात्तल्याद्वराङ्गनावदितितदिदमुक्तमुत्तरोत्तरक्रमेणेति ॥ ४ ॥ अत्रगीतादीनामिति । नहिगीतादौकश्चिद्विशेषउक्तः अतएवादिश ब्दोपिसजीवस्तथापिदध्यादीनामङ्गभावःप्रतीयतइत्यतआह । तृ तीयाऽन्तयाचेति । तृतीययाहिकारकत्वमुक्तङ्कारकञ्चक्रियोपसर्ज नरूपमित्यर्थः । अत्रगङ्गाप्रपातेति । प्रपातपादोदकयोर्गङ्गायाः सम्पर्षिभिश्चविशेषितत्वादङ्गतामुपपादयति । हिमवतःपूतत्वेचेति व्यतिरेकोत्तरेविरुद्धधर्माक्रान्तिरस्तीतिसङ्गत्याविरोधलक्षणमाह । विरोधस्त्विति । परस्परसङ्गतिरसम्बन्धःसहानवस्थानमितियावत् तेनसहानवस्थाननियतयोःसहानवस्थानोक्तिर्विरोधइतितात्पर्यसंज्ञे पःसचप्ररूढोदोषः । अप्ररोहन्तुद्विधा । श्लेषोपधानेनान्यथाचाऽन्यथा भावस्त्रिधा । सहानवस्थितयोःप्रयोदर्शनमात्रेणनैयत्यारोपः । यथा

धनिस्पृहतातवललनाविचेष्टितविरुद्धमहोललित
म्। अत्रयुवतिमार्द्दवादीनाम्महाहवदारुणतादीना
ञ्चशुद्धानामेवपरस्परमसंगतत्वादयंशुद्धविरोधः॥
द्वितीयोयथा। दिग्वासायदितत्किमस्यधनुष
स्त्रस्यकिम्भस्मनाभस्माथास्यकिमङ्गनायदिचसाका
मम्परिद्वेष्टिकिम्। इत्यन्योन्यविरुद्धचेष्टितमिदम्प
श्यन्निजस्वामिनोभृङ्गीसान्द्रशिरावनद्धपरुषन्धत्ते
स्थिशेषंवपुः। अत्रदिग्वासस्त्वादीनामुत्तरोत्तरग्र
थनादन्योन्यासङ्गतादयङ्ग्रथितनामाविरोधभेदः॥
२॥ असङ्गतिर्यथा। साउप्पण्डीगोठउहिणोक्खी
कविविसगण्ठिभिडिपच्चल्लिउसोमरइज्जस्सणलग्ग
इकण्ठि *॥ अत्रायंविषग्रन्थिर्यस्यकण्ठेनलगति
सम्रियतइत्येतयोःपरस्परमसङ्गतेरयमसङ्गतिर्नाम
विरोधः॥ ३॥ प्रत्यनीकंयथा। उत्कण्ठासन्ता
पोरणरक्षकोजागरस्तनोस्तनुता। फलमिदमहोम

"क्वयुवतिमार्द्दवमित्यादौ,,विरुद्धधर्मोक्तिविषयस्याचिन्त्यप्रभावातिश
यत्वेनप्रसिद्धिर्वा। यथा"दिग्वासायदीत्यादौ,,विरोधस्यारोपमात्रेण
सरूपतयाप्रतिपत्तिमात्रंवा। यथासाउप्पण्डीत्यादौ। सर्वश्चाय
विरोधोभिधीयमानःप्रतीयमानश्च। अथादिशब्देनयोभिधीयतेसोभि
धीयमानःप्रतीयमानस्तुतद्विनाकृतोयथाभट्टबाणस्य। यत्रमातङ्गगा
मिन्यःशीलवत्यश्चगौर्योविभवरताश्चश्यामाः पद्मरागिण्यश्चधवलद्विज
शुचिवदनामदिरामोदिश्वसनाःप्रमदाइति। इहान्यैरलङ्कारकारैरस
ङ्गतिप्रत्यनीकाधिकविषमाख्यमलङ्कारचतुष्टयंविरोधात्पृथग्लक्षि
तन्तल्लक्षणानि। सम्बन्धेयस्ययत्कार्यमसम्बन्धेपितस्यतत्। नबा
ध्यतेचेत्तामाहुरलङ्कृतिमसङ्गतिम्। प्रत्यनीकमभिप्रेतङ्कार्यमप्रा
प्ययत्पुनः। विरुद्धकार्यसम्प्राप्तिर्भवेत्तेनैवहेतुना। परिमाणादियो

* साउत्पन्नागोष्ठभुविनवीनैव कापिविषग्रन्थिः॥
भिद्यते प्रत्युतसम्रियतेयस्य न लगतिकण्ठे॥ ॥

याप्रंसुखायमृगलोचनान्दृष्ट्वा ॥ अत्रमृगलोचना दर्शनस्यकिलनिर्वृत्तिःफलम्मयातुतान्दृष्ट्वाऽन्तस्ता पादिकम्मयाप्रमितिप्रत्यनीकफलत्वादयम्प्रत्यनी काख्योविरोधः ॥ ४ ॥ अधिकोयथा । एकोदाश रथिःकामंयातुधानाःसहस्रशः । तेतुयावन्तएवाजौ तावद्भाददृशेसतैः ॥ अत्रैकस्यदाशरथेरनेकसङ्ख्यै र्यातुधानैर्यत्समरकर्मतत्रतैरस्यतावद्बादृश्यमानत्वे नैकसङ्ख्याविरुद्धमाधिक्यङ्गम्यतइत्ययमधिकाख्योवि रोधः ॥ ५ ॥ विषमंयथा । दिशामलीकालकभङ्ग ताङ्गतस्त्रयीवधूकर्णतमालपल्लवः । चकारयस्याध्व रधूमसञ्चयोमलीमसःशुक्लतरम्भवद्यशः । अत्रम लीमसाध्वरधूमसञ्चयेनयद्यशयःशुक्लीकरणन्तद्य द्यादृशादेवजायतेतत्तादृगेवभवतीतिप्रसिद्धेर्वैषम्या

गेनव्यवस्थानमुपेयुषः । अव्यवस्थाभिधानंयदधिकन्तत्प्रचक्षते । का रणेनविरूपंयत्कार्यमुक्तवदुच्यते । आश्चर्यकारितत्प्राहुर्विषमंशब्दवु द्धयइति ।तदेतेषांलक्षणाभेदाद्विरोधएवान्तर्भावोनह्यन्यवान्तरभङ्गि भेदमात्रेणसामान्यान्तर्भावोनभवतीत्याशयवानाह । असङ्गतिः प्र त्यनीकमिति ॥ १ ॥ शुद्धानामेवेति । एकेनैवप्रतियोगिनासहानव स्थानोक्तौविरोधनिर्वाहात् ॥ १ ॥ उत्तरोत्तरग्रथनादिति । यद्यप्ये केनविरोधिनासहोक्तौविरोध्यन्तरेणापितथाभावमासादयन्नेवग्रथि तस्तथाप्युत्तरग्रथनयाशोभाविशेषार्पकोभवतीत्यभिप्रायः ॥ २ ॥ गो ष्ठश्लहोति । गोष्टे । गोक्खीअपूर्वा । काचिविसगंशिठ । कोपिविष ग्रन्थिः । रोमाञ्चादयस्त्रियामितिस्त्रीलिङ्गता । पचेल्लिउ । प्रत्यु त । विषग्रन्थेः कण्ठसम्बन्धेनमारकत्वम्प्रतीतम् । वर्ण्यमानायारू पस्यत्वतथाभूतस्यैवेतिव्यक्तोविरोधः ॥ ३ ॥ अत्रमृगलोचनादर्शनस्यै वेति यद्यप्येकस्यविरुद्धकार्यकारित्वन्नविरुद्धन्तथापियथैवप्रवृत्याकि

त्परस्परमसङ्गतेरयंविषमाख्योविरोधः ॥ ६
॥ ७ ॥ प्रभूतकरणालोकात्स्यादेवमितिसम्भव
सविधौवानिषेधेवाद्वयेवानद्वयेपिवा ॥ ७ ॥
विधिविषयोयथा । त्वय्यादातुजलमवनतेश्च
णोवर्णचौरेतस्याःसिन्धोःपृथुमपिततद्दूरभावा
वाहम् । प्रेक्षिष्यन्तेगगनगतयोनूनमावर्ज्यदृष्टीः
कम्मुक्तागुणमिवभुवःस्थूलमध्येन्द्रनीलम् । अ
त्वयिजलमादातुमवनतेसतितस्याःसरितःप्रया
मध्यनिविष्टेन्द्रनीलमणिर्मुक्तागुणइवगगनगति
क्षणीयोभविष्यतीतिविधेःसम्भाव्यमानत्वादय
धिविषयःसम्भवः ॥ १ ॥ निषेधविषयोयथा
परस्यभूयान्निवरेभियोगंप्रसह्यसंरक्षणमात्मर
मीष्मेप्यसम्भाव्यमिदङ्गुरौवानसम्भवत्येववने

ञ्चित्कार्यङ्कर्त्तुमुद्यतोनतयैवतदिरुद्धङ्करोतितदेतत्सुखायेतिवस्तु
द्योत्यते ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ सामग्र्येकदेशसङ्गाव
वेस्थितेविरोधच्छायामूलत्वमितितदनन्तरंसम्भवः प्राप्तावः
ह । प्रभूतेति । भूयांसिकारणानिदृष्ट्वाकार्यमुत्पत्स्यत
दाचित्स्यादितिज्ञानसम्भवः । नचायंसंशयएव । नहिस्याद
दोलायते मापिवितर्कः । व्याप्यारोपस्याभावात् । कुतर्क
ति । नक्वचिज्ज्ञानान्तरस्येवोच्यमानत्वात् । अनिश्चय
त्रान्तर्भावेतिप्रसङ्गात् । नापिभ्रान्तिर्न्यग्भूतबाधपुरःस
भ्रान्तौतुसिद्धायाम्बाधोत्पत्तिरितिवक्ष्यते । स
सम्भवोविषयनियतोविधिनिषेधोभयानुभयरूपश्चतुर्विध
प्रवृत्तप्रवर्त्तनन्द्विरूपम् । प्रयोजकगतम्प्रयोज्यगतञ्च । आ
ख्येशब्दालङ्कारेविधिद्वारेणेत्यमेनोक्तम् । द्वितीयन्तु
निहोच्यते । सम्प्रसक्तस्याभावोनिषेधः । एतेनोभयानु

षु ॥ अत्रेदम्भीष्मद्रोणयोरसम्भाव्यमानन्धनुर्वेद कौशलमस्मिन्वनेचरेनसम्भवतीतिनिषेधविषयःसम्भवः । विधिनिषेधविषयोयथा ॥ २ ॥ उत्पश्यामिद्रुतमपिसखेयत्प्रियार्थंयियासोःकालक्षेपङ्ककुभसुरभौपर्वतेपर्वतेते । शुक्लापाङ्गैःसजलनयनैःस्वागतीकृत्यकेकाःप्रत्युद्यातःकथमपिभवान्गन्तुमाशुव्यवश्येत् ॥ अत्रद्रुतमपियियासोःकालक्षेपन्तवोत्पश्यामीतिविधिरूपःकथमपिनभवान्गन्तुमाशुव्यवस्येदितिनिषेधरूपस्तदेवंविधिनिषेधयोरसम्भाव्यमानत्वादयमुभयविषयःसम्भवः ॥ ३ ॥ अनुभयविषयोयथा । तस्यापातुंसुरगजइवव्योम्निपूर्वार्द्धलम्बीत्वञ्चेदच्छस्फटिकविशदन्तर्कयेस्तिर्यगम्भः । संसर्पन्त्याःसपदिभवतःस्रोतसिच्छाययासास्यादस्थानोपगतयमुनासङ्मेनाभिरामा ॥ अत्रयदित्वमेवङ्कुर्यास्तदेवंसास्यादितिविधिनिषेधयो

ख्यातौ ॥ १ ॥ अत्रत्वयिजलमिति । अप्रेक्षणीयस्यप्रेक्षणीयताभवनंविधिः ॥ १ ॥ अस्मिन्वनेचरइति । परविवराभियोगेस्वविवररक्षारूपबहुतरकारणालोकान्नायंवनेचरइतिनिषेधएवसम्भाव्यते ॥२॥ कालक्षेपन्तवोत्पश्यामीतिउत्पश्यामिसम्भावयामिअकालक्षेपवतः कालक्षेपभवनंविधिः । कथमिवेतिकाकूपस्थितोगमनाभावोनिषेधः । नचवाच्यन्द्वावत्रसम्भवौतथाचनैकोप्युभयविषयइति । यतोयैवकालक्षेपसामग्रीसैवशुक्लापाङ्गैरित्यादिकारणसह कृतानिषेधमपिविषयीकरोतिअतःसम्भवभेदेनकिञ्चित्प्रमाणमिति ॥ ३ ॥ अत्रयदित्वमेवङ्कुर्याइति । नतावदत्राभावःप्रतीयतेइतिननिषेधसम्भवः । विधिसम्भवोपिनास्ति । योहिव्यवस्थितकारणदर्शनेनव्यवस्थितस्यैवभवनस्यसम्भ

योरनवगतेरयमनुभयविषयःसम्भवः ॥४॥ एतेन
धिषेधयोर्विकल्पविषयोपिव्याख्यातःयथा ।
भवतिमुखानांवाक्पटूनांसहस्रन्निरुपममवध
ञ्जीवितञ्चातिदीर्घम् । कमलमुखितथापिक्ष
स्तस्यकर्तुंसकलगुणविचारःशक्यतेवानवेति ।
तन्निगदेनैवव्याख्यातम् ॥ ५ ॥ द्रोणस्यसम्भवः
खार्यांशतेपञ्चाशतोयथा । तथान्येसम्भवम्प्र
सोनुमानान्नभिद्यते ॥ २ ॥ भिद्यतेतुयद्यनिश्चयः
स्यात् । यथा । रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्य
म्प्रत्यादेशादपिचमधुनोविस्मृतभ्रूविलासम् ।
व्यासन्नेनयनमुपरिस्पन्दिशङ्केमृगाक्ष्यामीनक्षोभ

वःसविधिसम्भवशब्देनाभिधीयतेनचेहतथा । तदिदमुक्तमनवग
ति ॥ ४ ॥ तदेतन्निगदेनेति । परस्परव्यभिचारिणोरेकत्रसम्भाव्य
नत्वादितिव्यक्तौविकल्यइत्यर्थः ॥ ५ ॥ पूर्वेषांसम्भवलक्षणमुप
षयति । द्रोणस्येति । समुदायज्ञानादेकदेशज्ञानंसम्भवइतिप्राच्य
नामभिप्रायः । तथाचसमुदायस्यसमुदायिव्याप्तत्वादियङ्खारी
तीखारीत्वादितिसुलभमनुमानएवास्यान्तर्भावइत्यर्थः ॥ १ ॥
न्तर्हितवापिसम्भवोभिद्यतेसामग्रीकार्यव्याप्तेतितत्राप्य
विष्यतीत्यतआह । भिद्यतइति । नहिसामग्रीदृष्टायतःकार्यमनु
यतेकिन्तुप्रभूतकारणदर्शनेनकार्यस्यज्ञानमन्यदेवोत्पद्यतइतिवक्त
न्तथाचास्माकन्दर्शनेयुक्तःपृथग्भावः ॥ २ ॥ यस्तूदाहरणविशेषन्न
तिसन्धत्तेतम्बोधयितुमुदाहरणान्तरमाह । रुद्धापाङ्गेत्य
विश्लेषदुःखेनकर्षितायथाऽचेतनानामप्यलकानाङ्कुरु
ते । तस्मादियम्माजलधरन्द्राक्षीदितिनिसर्गचपलस्यापाङ्गस्य
मवरुन्धन्ति । स्नेहपदेननयनाञ्जनयोरनुपधिरनुबन्धोव्यज्यते
नमिथोमैत्रीयोग्यत्वम् । तेनतन्नयनादन्यत्रनाञ्जनङ्कान्ति

३

कुलकुवलयश्रीतुलामेष्यतीति । अत्रयथाखार्यान् द्रोणःशतेपञ्चाशदितिनियमोनैवंविप्रलम्भेऽलका नामकल्पनमनङ्गनमक्ष्णोर्मधुनोवाप्रत्यादेशःसुहृदु दन्तलाभारम्भेवानयनस्पन्दनानिसम्भाव्यतेचप्रभू तकारणलोकादित्येषोपिविधिरूपएवसम्भवइति ६ ८ ॥ अन्योन्यमुपकारोयस्तदन्योन्यंत्रिधाचतत् । वाच्यम्प्रतीयमानञ्चतृतीयमुभयात्मकम् ॥ १ ॥ अन्योन्यचूलिकान्योन्यभ्रान्तिरन्योन्यमेकता । अन्योन्यालङ्कृतेरन्तस्त्रयमेतदिहेष्यते ॥ २ ॥ तेष्वभिधीयमानमन्यान्यमिहयथा । कण्ठस्यतस्यस्तनयन्धुरस्यमुक्ताकलापस्यचनिस्तलस्य । अन्योन्यशोभाजननाद्बभूवसाधारणोभूषणभूष्यभावः ॥ अत्रान्योन्यशोभाजननेत्यादिनोपकार्योपकारकभावस्य द्वयोरप्यभिहितत्वादभिधीयमानमिदमन्योन्यम् । प्रतीयमानंयथा । उद्धुच्छोपिअङ्गजलजुहजहविरलङ्गुलीचिरम्पहिओ । पाआवलिआवितहतहधारुन्तणुअम्पितणुएई * ॥ अत्रपथिकप्रपापालिकयो

कोपिलावण्यप्रकर्षस्तयाभूतस्याप्यङ्गनस्यत्यागेयदेकतानतयानात्मानमपिप्रतिसन्धातुंसमर्थेतिव्यनक्ति । एवम्पदान्तरेष्वपिस्वरसोनुसन्धेयः विपुलम्बरूपकारणालोकादलकाकल्पनादिकम्प्रियतमदूतप्रत्यासत्तिलक्षणकारणालोकाच्चोपरिनयनस्पन्दनंसम्भाव्यत इतिसम्भवद्वयमत्रेतिव्याख्यानेनस्फुटयति । अत्रयथाखार्योमिति ॥ ८ ॥ परस्परोपकारकयोरेकस्यविशेषन्दृष्ट्वाऽपरस्यविशेषोज्ञायतइतिसम्भवसाम्यात्तदनन्तरमन्योन्यलक्षणमाह । अन्योन्यमिति । विशेषार्पणमुपकारोनचेयम्परिवृत्तिःस्थितस्यानपनयनात्प्रदानप्रतिदानाभावाच्च । विशेष

* ऊर्ध्वाङ्गःपिबतिजलंयथाहिविरलाङ्गुलिश्चिरंपथिकः ।
अपापालिकापितथाधारांतनुमपितनूकुरुते ॥ १ ॥

र्मिथोऽनुरागेयदेकस्यविरलाङ्गुलिनाकरेणपानी
पानमन्यस्याःसुतरांवारिधारातनूकरणन्तेनप
रमुपकार्योपकारकभावात्प्रतीयमानमिदमन्यो
म् ॥ २ ॥ प्रतीयमानाभिधीयमानंयथा । गो
विसमोआरछलेणअय्याउरम्भिसेमुक्को । अणु
म्पाणिद्दोसन्तेणविसागाढमुअऊढा * । अत्रगोदा
वरीविषमावतारव्याजेनतयातस्योरसिआत्मा
प्रस्तेनापिअनुकम्पानिर्द्दोषंसागाढमुपगूढेत्यभिधी
यमानःपरस्परमनुरागादुपकार्योपकारकभावःप्रती
यतेइत्युभयात्मकमिदमन्योन्यम् ॥ ३ ॥ अन्यो
चूडिकायथा । शशिनाचनिशानिशयाचशशीशशि
नानिशयाचयथागगनम् । भवताचसभासभयाच

स्तुनानारूपस्तद्वाक्यार्थीभूतरसानुगामितयातत्रतत्रोन्नीयते । विभाग
न्दर्शयति । त्रिधेति । अभिधीयमानंविशेषतःशब्देनोपात्तंसामान्य
तःशब्देनविषयीकृतंविशेषतस्तुप्रतीयमानमेवेत्युभयात्मकम् । द्वाभ्या
मन्यतोऽप्रतीयमानम् । अन्योन्यचूलिकादिलक्षणानिग्रन्थकारएवस्फु
टीकरिष्यति ॥ १ ॥ २ ॥ कण्ठस्येति । बन्धुरोनम्रः । निस्तलोवर्त्तु
लः ॥ १ ॥ अत्रपथिकेति । मिथोनुरागइत्यनेनपरस्परानुरागसंवर्द्ध
नमेवात्रविशेषार्पणमितिमतम् । तथाहिकरस्यविरलाङ्गु
महमेताञ्चिरायपश्यामीतिप्रपापालिकाभिप्रायएववर्द्धितोभवति
एवमपिवारिधारातनूकरणेबोद्धव्यम् । नचायमेवंविधोर्थःकेनापिशब्दे
नाभिहितइतिभवतिप्रतीयमानता ॥२॥ वक्तृप्रतिपाद्य
लोचनेनैवध्वननमुन्मिषति । अत्रगोदावरीति । पूर्ववत्प्र
पिपरस्परमुपकारस्थलेनानुकम्पानिर्द्दोषशब्दाभ्यामभिधयास्पृश्यतइ
त्युभयरूपम् । नचशब्दोपात्तेकिन्ध्वननेनेतिवाच्यम् । भि
त्वात् ॥ ३ ॥ अत्रनिशाशशिनोरिति । चूडिकाशिखा ।

* गोदाविषमोत्तारच्छलेनआत्माउरसितयामुक्तः ।
अनुकम्पानिर्दोषंतेनापिसागाढमुपगूढा ॥ १ ॥

भवान्सभयाभवताचतथाभुवनम् । अत्रनिशाशशि
नोःसभाभवतोश्चपररूपरमुपकार्योपकारकभावेवर्त
मानयोर्यदिदङ्गगनञ्जगतीञ्चप्रसिद्ध्योरुपकारक
त्वञ्चूडिकेवोपर्युपरिलभ्यतेसेयमन्योन्यचूडिका ॥
४ ॥ अन्योन्यभ्रान्तिर्यथा । जम्बूनाङ्कुसुमोत्करे
नवमधुन्यारब्धपानोत्सवाःकीराःपक्वफलाशयाम
धुकरीश्चुम्बन्तिमुञ्चन्तिच । एतेषामपिनीलकिंशु
कदलैरेभिःसमानत्विषाम्पुष्पभ्रान्तिभिरापतन्तिस
हसाचञ्चूषुभृङ्गाङ्गनाः । अत्रजम्बूकुसुमस्थितमधु
करीषुशुकशकुन्तानांयापक्वजम्बूफलभ्रान्तिर्याचम
धुकरीणांशुकचञ्चुषुकिंशुककुसुमभ्रान्तिःसेयमन्यो
न्यभ्रान्तिरन्योन्यस्मादपृथगेव ॥ ५ ॥ अन्योन्यात्म
कतायथा । प्रफुल्लतापिच्छनिभैरभीषुभिःशुभैश्चसप्त
च्छदपांसुपाण्डुभिः । पररूपरेणचक्रुरितामलच्छवी
तदेकवर्णाविवतौबभूवतुः । अत्रश्यामपाण्डुत्वयोः
पररूपरव्यतिकरेणैकवर्णकरणादन्योन्यमेकतानाम
भ्रान्तिभेदोन्योन्यात्पृथगेव ॥ ६ ॥ ९ ॥ व्यत्ययो

तदवयवेन्योभिन्नैवोपलक्ष्यतेतथात्रापिनिशाशशिनोःसभाभवतोःपर
स्परमुपकारकत्वमभिसन्धायद्व्योर्द्वयोर्गगनजगतीप्रत्युपकारकत्वमन्य
देवाभिधीयते । नचैतावतैवविशेषेणपृथग्भावः । अन्योन्यालङ्कारक
वलीकृतस्यैवतस्यसम्भवात् । ॥ ४ । अत्रजम्बूकुसुमेति । नहितैमि
रिककेशप्रत्ययवद्भ्रान्तेरलङ्कारताऽपितूद्भूतसादृश्यमूलायाएवतथा
चचमत्कारिवस्त्वन्तरोपमापर्यवसायित्वमितिभ्रान्तिसंसर्गएवविशेषा
धेणउपकारः । अन्योन्यवचनेनपरस्परगामितास्यतेनैवदर्शितेत्य
न्योन्यलक्षणाश्लेषात्कथम्पृथग्भवतीत्येतेनान्योन्यैकताद्याख्याता ५

वस्तुनोयस्तुयोवाविनिमयोमिथः । परिवृत्तिरिहो
क्तासाकाव्यालङ्कारलक्षणे ॥ १ ॥ सात्रिधाव्यत्यय
वतीतथाविनिमयात्मिका । तृतीयाचोभयवतीनि
र्दिष्टाकाव्यसूरिभिः ॥ २ ॥ त्रिधापिचासौमुख्यामु
ख्यभेदात्त्रिधाभूयःषोढासम्पद्यते । तासुव्यत्ययव
तीमुख्यायथा । कुमुदवनमपम्रिश्रीमदम्भोजख
ण्डन्त्यजतिमदमुलूकःप्रीतिमांश्चक्रवाकः । उदय
महिमरश्मिर्यातिशीतांशुरस्तंहतविधिललितानां
ह्रीविचित्रोविपाकः । अत्रयत्कुमुदवनादीनामप
म्रीकत्वादिकंयच्चाम्भोजखण्डादीनांश्रीमत्वादिक
म्मुख्यमेवप्रातरुपलभ्यतें सेयंव्यत्ययवतीमुख्याना
मपरिवृत्तिः ॥ १ ॥ व्यत्ययवत्यमुख्यायथा । जो
तीअअहरराउरत्तिंउद्दासिओपिअअमेण । सोच्चि
अदीसइगोसेसवत्तिणअणेसुसङ्कन्तो * । अत्रप्रियते
नरात्रावुद्भासितस्याधररागस्ययेयंसपत्नीलोचनेषु

॥ ६ ॥ ८ ॥ परस्परनिरूप्यतासाम्यात्क्रमप्राप्तास्परिवृत्तिन्निरूपयति । व्यत्ययइति । वस्तुस्थितिविपर्यासवचनम्परिवृत्तिरितिस्फुटमेवलक्षणम् ॥ १ सात्रिधा । एकस्थानस्थितस्यवस्तुनःस्थानान्तरप्राप्तिवचनेन,दानप्रतिदानवचनेन,उभयवचनेनवा । तदाह । सात्रिधेति ॥ २ सर्वत्रमुख्यवृत्त्यागौणावृत्तिव्यपाश्रयेणावातथाभावोक्तिरितिषट्प्रकारत्वन्दर्शयति । त्रिधापिचासाविति । कुमुदवनमिति । कुमुदवनानुकूलकाद्धिमरश्मेःश्रीमत्वम्प्रीतिरुदयश्चापसृतानिप्राप्तानिपुनरम्भोजखण्डचक्रवाकीहिमांशूनामितिव्यक्तोव्यत्ययः । मुख्यत्वङ्कन्यसवव्यक्तम् ॥१॥अत्रप्रियतमेनेति । ताम्बूलादिहेतुकोन्यस्याधररागोन्यश्चसत्वरहेतुकःकषायतालक्षणोनयनगामीतितयोरभेदाध्यवसायोयंसपदाभ्यामतीतइतिगौणीवृत्तिः । प्रकाशतेचशब्दवृत्त्याधरस्यानस्थि

* यस्तस्याश्चधररागोरात्रौउद्भासितःप्रियतमेन ।
सएवदृश्यतेप्रातःसपत्नीनयनेषुसंक्रान्तः ॥ १ ॥

सङ्क्रान्तिः ॥ २ ॥ विनिमयवतीमुख्यायथा । प्र
श्च्योतन्मदसुरभीणिनिम्मगायाःक्रीडन्तोगजपत
यःपयांसिकृत्वा । किञ्जल्कव्यवहितताम्म्रदानलेखै
रुत्तेरुःसरसिजगन्धिभिःकपोलैः । अत्रकरिकपोल
मदामोदस्याम्भोजरजःपरिमलस्यचसरित्सलिलद्वि
पकपोलपाल्योर्मुख्यत्वेनैवपरस्परोपकारकरणादि
यंविनिमयवतीमुख्यानामपरिवृत्तिः ॥ ३ ॥ वि
निमयवत्यमुख्यायथा । तस्यचप्रवयसोजटायुषः
स्वर्गिणःकिमिहशोच्यतेधुना । येनजर्जरकलेवरव्य
यात्क्रीतामन्दुकिरणोज्ज्वलंयशः । अत्रजर्जरकले
वरन्दत्वाशशिकिरणशुभ्रंयशःक्रीतमित्यमुख्ययैववृ
त्याविनिमयोक्तेरमुख्येयंविनिमयवतीपरिवृत्तिः ॥
४ ॥ उभयवतीमुख्यायथा । लोचनाधरकृताहृत
रागावासिताननविशेषितगन्धा । वारुणीपरगुणा
त्मगुणानांव्यत्ययोविनिमयञ्चवितेने । अत्रवारु
ण्यायदधराद्रागोपहृत्यचक्षुषोर्निक्षिप्तस्तेनेयंव्यत्य
यवतीयच्चमुखामोदवासितयास्वामोदेनमुखामोदो
विशेषितस्तेनविनिमयवतीतदियमुभयथापिमुख्य

स्थानप्राप्तिरितितावतैवालङ्कारनिर्वाहः २ अत्रकरिकपोलेति।गजेन्द्रा
णाम्मदयासमचन्द्रकयोःस्वाश्रितयोर्नदीषुसङ्क्रामणन्नदीस्थितयोश्च
किञ्जल्काम्भोजपरिमलयोर्ग्रहणन्तेनदानप्रतिदानवत्तयाविनिमयो
भवति ॥ ३ ॥ अत्रजर्जरेति । मूल्यार्पणक्रयणयोरत्रबाधाद्व्यक्तएवोप
चारः शब्दवृत्तिस्तुपूर्ववदेवकुण्ठैवेतिभवतिविनिमयः ॥ ४ ॥ लोचना
धरेति । लोचनाधरयोर्यथासङ्ख्यङ्कृतअहृतोरागोययातेनलोचने
कृतोधरादपनीतइतिव्यत्ययः । वासितेआनेनेविशेषितोगन्धोयस्याः

वृत्यैवोक्तेतिमुख्येयमुभयवतीपरिवृत्तिः ॥
भयवत्यमुख्यायथा । किञ्चित्रंयदिदेवेनभूभृतःकर
दीकृताः । देवोपिदापितःकिन्तैर्नपुनःपृष्ठतःक
अत्रभूभृतामकरदानांयत्करप्रदानञ्जिगीषोश्च
ष्ठेहस्तनिक्षेपःसएवद्रव्यगुणादीनांस्थानादिपरिवृ
त्तौव्यत्ययोयच्चदेवेनभूभृतःकरदीकृताःदेवोपितैः
पृष्ठतःकरन्दापितइतिसोयन्दानप्रतिपादनलक्षणो
पिविनिमयइत्येतदुभयमपीहश्लिष्टपदाभिधेयत्वा
दमुख्यवृत्यैवोच्यमानमुपलभ्यतइत्युभयवतीयममु
ख्यापरिवृत्तिः ॥ ६ ॥ १० ॥ दृष्टान्तःप्रोक्तसिद्धौ
यःसिद्धेर्थेतन्निदर्शनम् । पूर्वोत्तरसमत्वेतदृजुवक्र
ञ्चकथ्यते ॥ १ ॥ तेषुपूर्वमृजुयथा । उदयन्नेवस
वितापद्मेष्वर्पयतिश्रियम् । विभावयतिभूतीनां

सतथा । तेनतयामुखंवासितम्मुखेनचसेतिभवतिविनिमयः ।
णात्मगुणानामिति । परगुणानामितिपरगुणानांव्यत्ययआत्मगुणानां
विनिमयइतिसम्बन्धः । कर्तृत्वमुत्प्रेक्षितन्तदेतद्दर्शयति । अत्रेति
॥ ५ ॥ ६ ॥ १० ॥ एकत्रप्रतीतस्यान्यत्रप्रत्ययःपरिवृत्तौतथादृष्टा
पीतितदनन्तरन्दृष्टान्तंलक्षयति । दृष्टान्तइति । प्रोक्तस्य
स्यसिद्धिर्निश्चयः । नन्वनुमानाङ्गमपिदृष्टान्ताभिधानम्पृथगलङ्कार
स्यादित्यतआह । सिद्धेर्थइति । सिद्धएवार्थेकञ्चिद्वि
न्दृष्टान्तोक्तिर्निदर्शनम् । साध्येत्वर्थेनुमानमितिविभागः । पूर्वन्द
र्ष्टान्तिकोक्तिंसमाप्यपश्चादृष्टान्तोक्तिरितिद्वितीयः । एकयैवोक्त्यादृष्ट
न्तदार्ष्टान्तिकयोरुक्तिरितितृतीयस्तदाह । पूर्वोत्तरसम
त्रशब्दतएवतुल्येतिवृत्ततादृष्टान्तदार्ष्टान्तिकयोरनुगम्य
नम् । यत्रतुपर्यवसितायामुक्तौसहृदयपर्यालोचनयातद्वक्र
दाह । ऋजुवक्रञ्चेति । तेननिदर्शनस्यषड्भेदाः ॥ १ ॥

फलंसुहृदनुग्रहः । अत्रऋजूक्त्यैवपूर्वन्दृष्टान्तःप
श्चाद्दार्ष्टान्तिकम्प्रदर्शितमितीदमृजुपूर्वञ्चनिदर्श
नंसूर्यदृष्टान्तेनविभूतीनांसुहृदनुग्रहःफलमितिज्ञाप
यति ॥१॥ तदेवयक्रंयथा । पाणउडीअविजलिथ
णहुअवहोजलइजण्णवाडम्मीणहुतेपरिहरिअव्वाविस
मदसासण्ठिआपुरिसा * । अत्रापिपूर्वन्दृष्टान्तःप
श्चाद्दार्ष्टान्तिकंकिन्तुयथापूर्वत्रोदीयमानसवितासु
हृत्पद्मेषुश्रियमर्पयतीतितुल्येतिवृत्ततोऋजूक्त्याश
ब्देनैवाभिधीयते । नैवमत्रकिन्तर्हिज्वलनेतिवृत्तेन
तुल्यन्तत्तुसत्पुरुषाणामितिवृत्तमशाब्दंयुक्तिचातु
र्यात्प्रतीयतेतदिदम्पूर्वञ्चवक्रञ्चनिदर्शनम् ॥ २ ॥
उत्तरमृजुयथा । हिअअतिरच्छीपडसम्मुहपच्छाग
हिअकडक्खस्स । पहिअएकेजेगोरडीणञ्चउहट्टउ

नेति । ऋद्धिभिःसुहृदनुगृह्यतइतिसिद्धोर्थःकिन्तुतदेतदेवतासाम्फ
लमितिविशेषमभिधातुंसूर्यदृष्टान्तोपन्यासः । अत्रसमृद्धताफलंसुहृत्त्व
मनुग्रहत्वञ्चेतिशब्दतएवसूर्यादिषुदृष्टान्तदार्ष्टान्तिकाभिमतेषुप्रतीय
तइतिऋजुत्वमित्यर्थः॥ १॥ पाणउडीति ॥ पाणपदंम्लेच्छदेशीयंपाने
कुटीशौण्डिककुटीवा । अत्रापीति । दृष्टान्तेपिपानकुटीज्वलनादिकं
विशेषणमुपात्तन्नचतद्दार्ष्टान्तिकेसम्भवतिशब्देनवाप्रत्याय्यन्तकिन्तुबि
म्बप्रतिबिम्बन्यायेनात्रभवति । तथाहियथापानकुट्यांहुतवहस्यज्व
लनंयज्ञवाटेचतथाऽव्यवस्थितचित्ततयाग्रामीणाऽविदग्धयुवतिप्रस
क्तोभूत्वान्यत्रनागरिकासुविदग्धासुरज्यतेसोपिनत्याज्यइत्युक्तिचातु
र्यात्तुल्येतिवृत्ततागम्यतेऽतोवक्रत्वमित्याह । किन्तुयथेति ॥ २ ॥
हिअएति । विच्छित्तिपथिकस्याभिलाषितयायोषित्साएकैव । हृ
दयेस्मरणारूढासतीलग्नाअतएवतिरच्छीतिर्यक्शल्यायमानापथिक
सम्मुखाभिमुखस्यतस्यचलितत्वात् पश्चाच्चगृहीतकटाक्षापश्चाद्भूतेन

* पर्णकुटीमपि ज्वालयित्वाहुतवहो ज्वलतियज्ञवाटेपि ॥
नहितेपरिहर्तव्या विषमदशासंस्थिताः पुरुषाः ॥ १ ॥

वच्छ * । अत्रऋजूक्त्याशब्दतएवाभिधीयमानसा
धर्म्यन्दार्ष्टान्तिकमभिधीयोत्तरकालन्दृष्टान्तोभिहि
तस्तदिदमुत्तरमृजुनिदर्शनम् ॥ ३ ॥ तदेवचक्रंय
था । उपरिघनन्घनपटलन्दूरेदयिताकिमेतदापति
तम् । हिमवतिदिव्यौषधयःकोपाविष्टःफणीशिर
सि । अत्रापिदार्ष्टान्तिकमभिधीयोत्तरकालमेवदृ
ष्टान्तःकिन्तुयथापूर्वस्मिन्हृदयेतिर्यगित्यादिभिःश
ब्दएवऋजूक्त्यासाधर्म्याभिधानंनैवमत्रतथाऽपितु
किमेतदापतितमितिउक्तिचातुर्येणविपर्ययेणचलि
ङ्गसङ्ख्यायथासङ्ख्यानान्तदेतदुत्तरंवक्रञ्चनिदर्शन
म् ॥ ४ ॥ सममृजुयथा । यातिचन्द्रांशुभिःस्पृष्टा
ध्वान्तराजीपराभवम् । सद्योराजविरुद्धानान्दर्श

गृहीतश्चमत्कृतःकटाक्षोयस्याएकेजेएकैवजिरेवधारणे । णंननुचतु
ष्पथेषुमार्गेषुकश्चित्सम्मुखताङ्कश्चित्तिरश्चीनताङ्कश्चित्पश्चाद्भावन्धते ।
गौरीतुपथिकस्यैकैवतथेति । अत्रऋजूक्त्याशब्दतएवेति । तिर्यक्का
दीनामुभयगामिनांशब्देनोपादानात्प्रतीतिमात्रेणचालङ्कारनिर्वाहः
अपितुतदेतदापतितमित्युक्तिचातुर्येणेति । ननुचउपरीत्यनेनव्यवधा
नमुपात्तन्दृष्टान्तेपिशब्दएवप्रतिफलतितत्कथंवक्रत्वमित्यतआह ।
विपर्ययेणेति । घनपटलन्नपुंसकम्फणीपुमान्दयिताचैकवचनवती
ओषधयोबहुवचनालिङ्गिताःघनपटलम्पूर्वन्दार्ष्टान्तिकमुपक्रम्यदृष्टा
न्तोक्तौनपूर्वम्फणीनिर्द्दिष्टस्ततोलिङ्गसङ्ख्यानांविपर्ययोभवतितदय
मर्थेनशब्दतएवोपरिपर्यवस्थानन्दूरत्वञ्चदृष्टान्तयोः प्रतीयतेशिरसि
हिमवतीत्येताभ्यामन्यथाकारंबोधितत्वा । फलतस्तुसएवार्थइतिव
क्रतैवेति ॥ ४ ॥ यातीति । राजाचन्द्रोनृपतिश्च । तदनयोःश्लिष्टो
क्तिविषयतयानर्पूवापरभावोविभाव्यते । चन्द्रांशुपराभूतध्वान्तराजी
नृपतिविरुद्धदुरन्तयोरपिदर्शयन्तीतिशत्रासद्यइतितद्धिते

* हृदयेतिरिश्चीनाप्राप्तासंमुखं पश्चाद्गृहीतकटाक्षस्य ।
पथिकस्यएकैव गौरतरा ननु चतुष्पथेव्रजती ॥ १ ॥

३

यन्तीदुरन्तताम् । अत्रराजविरुद्धानामितिश्लिष्टप
देनदर्शयन्तीतिवर्तमानकाललक्षणात्सद्यइतितद्धि
तेनचसमकालमेवदृष्टान्तदार्ष्टान्तिकयोःशब्दतऋ
जूक्त्यैवोक्तत्वादिदमृजुसमञ्चनिदर्शनम् ॥५॥ तदेव
वक्रंयथा । णहुणवरकाअण्डदण्डएपुत्तिमाणुसेविए
मेअ । गुणवज्जिएणजाअइवंसुप्पण्णेविटङ्कारो * ।
अत्रनकेवलङ्कोदण्डदण्डकेमानुषेप्येवमेवइतीतरेत
रयोगवद्वक्रतयायुगपदभिधानङ्गुणवर्जितवंशोत्
पन्नेपिटङ्कारोनजायतइतिश्लिष्टपदत्वेपिव्यतिरेक
मुखेनगुणवृत्याचाभिधानाद्धनुषीवमानुषेपिगुणव
त्येवमहान्शब्दोभवतीतिवक्रोक्त्यासाधर्म्यावगतिः
तदिदमशाब्दत्वादिभिःपूर्वाद्भिद्यमानंसमंवक्रञ्चनि

किन्तुध्वान्तराजीपराभवंयातीतिदृष्टान्तोक्तौसत्यामध्येराजविरुद्धा
नामितिदार्ष्टान्तिकमुक्त्वापुनरपिदृष्टान्तविशेषणन्दर्शयन्तीत्युक्तम् ।
अतएवोक्तिकवलीकृतत्वादृष्टान्तदार्ष्टान्तिकयोःसमत्वमित्याशयवा
न्व्याचष्टे । अत्रराजविरुद्धानामिति ॥ ५ ॥ णहुणवचेति । गुणोधै
र्यादिस्तन्त्रीचवंशकुलंवेणुश्च । टङ्कारोऽव्यक्तानुकरणङ्ख्यातिश्च । इ
तरेतरयोगवदिति । यथाहि "त्वन्मुखम्पुण्डरीकन्चफुल्ले,, इत्यत्रफुल्ल
न्चेतीतरेतरयोगेनैकशेषेएकयोक्त्याफुल्लेतिद्वाभ्यांसम्बध्यते तथाविना
प्येकशेषङ्गुणवज्जिएवंसुप्पणेटङ्कारइतियुगपदन्वीयन्ते । ननुयथारा
जविरुद्धानामित्यत्रशेषेणऋजुत्वन्तथात्रापिभविष्यतीत्यतआह । श्लि
ष्टपदत्वेपीति । धनुषीवमानुषेपिमहान्शब्दोभवतीतिविवक्षितम् ।
नचव्यतिरेकमुखेनोपनयेऽयमर्थःशब्दादवगम्यते,प्रतीयतेचार्थइतियु
क्तंवक्रत्वम् । ननुव्यतिरेकेणैवकथञ्चतुतुल्यवृत्तितासम्मतेत्यतआ
ह । गुणवृत्त्याचेति । सत्यमेतत्तथापिद्वयोर्वर्णनाययोर्गुणादिकयोर
भेदाध्यवसायोवक्तव्यः । तथागौणवृत्तिव्यपाश्रयेणैववक्रत्वम् । तदि

* नखलुकेवले कोदण्डदण्डे पुत्रिमानुषेपि एवमेव ।
गुणवर्जितेनजायते वंशोत्पन्नेपिट ारः न १ ॥

दर्शनम् ॥ ६ ॥ ११ ॥ शब्दोपात्तेप्रतीतेवासादृश्ये
वस्तुनोर्द्वयोः ॥ भेदाभिधानम्भेदश्चव्यतिरेकश्चक
थ्यते ॥ १ ॥ स्वजातिव्यक्त्युपाधिभ्यामेकोभयभिदा
चसः । सादृश्याद्वैसादृश्याच्चभिन्नःषोढाभिजाय
ते ॥ २ ॥ तत्रशब्दोपात्तसादृश्येस्वजातिव्यक्तिव्य
तिरेकोयथा । अरत्नालोकसंहार्यमवार्यंसूर्यरश्मि
भिः । दृष्टिरोधकरंयूनांयौवनप्रभवन्तमः । अ
त्रयौवनप्रभवस्यतमसस्तमोजात्यासहदृष्टिरोधकर
मितिसादृश्यमुक्त्वाअरत्नालोकसंहार्यमवार्यंसूर्यर
श्मिभिरितिव्यतिरेकोविहितःसोयंस्वजातिव्यतिरे

दसुक्तंव्यतिरेकमुखेनगुणवृत्त्याचेति ॥ ६ ॥ ११ ॥ व्यतिरेकंविनादृ
ष्टान्तदार्ष्टान्तिकभावाभावाद्व्यतिरेकान्यान्तश्लक्ष्णमाह । शब्दोपात्त
इति । भेदाभिधानंवैधर्म्यकथनम् । एवञ्चेन्मेरुसर्षपयोरपितथाभि
धानमलङ्कारःस्यादतउक्तंसादृश्येवस्तुनोरिति । उपमानोपमेययोरि
त्यर्थः । सादृश्यन्द्विधा । शब्दोपात्तञ्चअशब्दोपात्तमपिध्वननानु
सानादिभिरवगम्यतेइतिनविरोधस्तदिदमुक्तं प्रतीतेचेति । तदयम
र्थः । सद्भूतचमत्कारिसादृश्ययोर्वैरस्योक्तिर्व्यतिरेकः स्वरूपाख्यस्तु
पृथग्भेदोनास्त्येवेत्युक्तम् ॥ ३ ॥ विभागन्दर्शयति । स्वजातीयेति ।
येनरूपेणवैयतिरेक्यमुपादीयतेतद्रूपवन्तंव्यतिरेकप्रतियोगिनम्परिक
ल्प्यततोव्यतिरेकोपीतिस्वजातिव्यतिरेकः प्रथमः प्रकारः । द्वितीयस्तु
सैवव्यक्तिविधर्मेतिएतत्प्रकारद्वयंयथासङ्ख्यमभिधीयमानसादृश्ययो
रिति मूलभेदद्वयन्तथैषापरमेकानेकलक्षणप्रकारद्वयन्त्रैवान्यत्सादृ
श्यवैसादृश्यरूपन्द्वयमितिक्रमेणषोढाभेदोविवक्षितः । यथाचस्वजा
तिव्यक्तिव्यतिरेकयोःप्रतीयमानाभिधीयमानसादृश्यगामितानसम्भव
तिताग्रेवक्ष्यते ॥ २ अत्रयौवनप्रभवस्येति । यौवनकृतमज्ञानलक्ष
णमन्यदेवतमोन्यच्चान्धकाररूपन्तयोस्तद्भावापत्तिरियमेवकल्पनास्मा

कः ॥ १ ॥ प्रतीयमानसादृश्येस्वव्यक्तिव्यतिरेको यथा। अण्णोण्णेहिंसुचरिअसअहिंअणुदिणवड्ढिअमाणु*। अप्पणविणहुमहुपिअहअप्पाणेणसमाणु। अत्रप्रतीयमानोपमानसादृश्योपचरितभेदादात्मव्यक्तेरन्यैरन्यैश्चसुचरितशतैःस्वव्यक्तितएवभेदोभिहितःसोयंस्वव्यक्तिव्यतिरेकः ॥ २ ॥ शब्दोपात्तसादृश्यएकव्यतिरेकोयथा।प्रेयानेववृषस्तवापिसततम्भूतिस्तवापिस्थिरादुर्गायामवतापिभूधरभुवःसम्यग्गृहीतःकरः। निर्व्याजम्परमेश्वरस्त्वमियतानोयासिवक्तुञ्जनैर्हेलोल्लासितवाहिनीशमथनेयन्नोविषादीभवान्। अत्रप्रियवृषत्वादिभिरभिहितसादृश्ययोरुपमानोपमेययोरुपमेयस्यैवयथोक्तसादृश्यविषयेविषादित्वयुक्तमित्येकव्यतिरेकोयम् ॥ ३ ॥ सएवप्रतीयमानसादृश्योयथा। सकलङ्केनजडेनचसाम्यन्दोषाकरेणतेकीदृक्। अभुजङ्गःसमनयनः

भिरुक्ता। अनेनतुप्रकारेणरसःपुष्यतीत्यलङ्कारमध्येगणनम् ॥ १ ॥ ण्णोण्णेहिंअन्योन्यैर्मानोहङ्कारःपूजावा। यौतुकल्पितभेदाधिकरणत्वेनोपात्तौविरोधिधर्मवत्तयाशब्दात्प्रतीयेतेतयोर्निर्यत्नत्वादिकमितिभवतिसादृश्यम्प्रतीयमानम् ॥ २ प्रेयानेवेति। वृषोगौर्धर्मश्च। भूतिःसम्यद्भस्मचदुर्गागौरीविषमाचभूधरभूर्गिरिजापर्वतभूमिश्च करोहस्तोराजदण्डश्च। वाहिनीशःसमुद्रःसेनापतिश्च। विषादीविषभक्षकोऽवसादवांश्च। यद्यप्यत्रानुरूपंसादृश्यन्नास्तितथापिशब्दसादृश्येनाप्युपमाप्रवर्त्ततएव। यथासकलङ्कम्पुरमेतज्जातंसम्प्रतिसितांशुबिम्बमिवेति। अतएवोभयालङ्कारत्वमुपमायाः ॥ ३ ॥ सकलङ्केनेति। कलङ्कोपवादोलाञ्छनञ्च। जडोमूर्खःशीतलश्च। अभुजङ्गो

* अन्यैरन्यैःसुचरितशनैरनुदिनं वर्धतेमानः ॥
अस्यापि न खलुमहानपि अथात्मना समानः ॥ १ ॥

कथमुपमेयोहरेणासि । अत्रप्रतीयमानसादृश्य
स्यपूर्वार्द्धेचन्द्रोपमानस्यसकलङ्कतादिरुत्तरार्द्धेनवर्ण
नीयोपमेयस्याभुजङ्गत्वादिरेकस्यैवभेदकःस्वधर्मोभि
हितःसोयमप्येकव्यतिरेकएव ॥ ४ ॥ शब्दोपात्त
सादृश्येउभयव्यतिरेकोयथा । अभिन्नवेलौगम्भीरा
वम्बुराशिर्भवानपि । असावञ्जनसङ्काशस्त्वञ्चचा
मीकरद्युतिः । अत्रद्वयोरप्यभिधीयमानसादृश्यमुप
न्यस्योभयोरपिपृथक्पृथग्भेदकःस्वधर्मोभिहितःसो
यमभिधीयमानसादृश्ययोरुभयव्यतिरेकः ॥ ५ ॥
सएवप्रतीयमानसादृश्ययोर्यथा । त्वन्मुखम्पुण्ड
रीकञ्चद्वयोरप्यनयोर्भिदा । कमलञ्जलसंरोहित्वन्
मुखन्त्वदुपाश्रयम् ॥ तदेतन्निगदेनैवव्याख्यातम्
सोयम्प्रतीयमानसादृश्ययोरुभयोर्व्यतिरेकः ॥ ६ ॥
अभिधीयमानसादृश्ययोःसदृशव्यतिरेकोयथा ।
त्वन्मुखम्पुण्डरीकञ्चफुल्लेसुरभिगन्धिनी । भ्रमद्भ्र
मरमम्भोजंलोलदृष्टिमुखन्तुते । अत्रमुखाम्भोजयोः
फुल्लेसुरभिगन्धिनीइतिपदाभ्यामभिधीयमानसा
दृश्ययोःसदृशमेवभ्रमद्भ्रमरत्वंलोलदृष्टित्वञ्चभेद
कमुपन्यस्तमितिसोयंसब्दोपात्तसादृश्ययोःसदृशव्य
तिरेकः ॥ ७ ॥ सएवप्रतीयमानसादृश्ययोर्यथा ।
चन्द्रोयमम्बरोत्तंसोहंसोयन्तोयभूषणम् । नभोन

नवेश्यापतिरविद्यमानसर्पश्च । समनयनोयुगनयनःसर्वान्समन्नयती
तिच । आह्लादकत्वादिकञ्चन्द्रेणानिरुद्धैश्वर्यादिकम्परमेश्वरेणसादृ
श्यम्प्रतीयते ॥ ४ ॥ अभिन्नेति । वेलामर्यादातीरञ्च । गम्भीरोऽत

क्षत्रमालीदमिदमुत्कुमुदम्पयः । अत्रपूर्वार्द्धेचन्द्र हंसयोःप्रतीयमानसादृश्ययोरम्बरोत्तंसत्वतोयभूष णत्वेउत्तरार्द्धेनतुनभःपयसोर्नक्षत्रमालित्वोत्कुमुद त्वेसदृशेएवभेदकेसोयम्प्रतीयमानसादृश्ययोःसदृश व्यतिरेकः ॥ ८ ॥ अभिहितसादृश्ययोरसदृशव्य तिरेकोयथा । शशामवृष्टिर्मेघानामुत्सङ्गेतस्यभूभृ तः । विररामनरामस्यधारासन्ततिरश्रुणः । अत्र भूभृदित्यनेनसाक्षादुपात्तसादृश्ययोरामम्मात्यवतो र्योयमुत्सङ्गेसमस्तोश्रुधारापातोयश्चमेघवृष्टेरभाव स्तदिदमुभयोरसदृशोवभेदकंसोयमभिधीयमानसा दृश्ययोरसदृशव्यतिरेकः ॥ ९ ॥ सएवप्रतीयमान सादृश्ययोर्यथा । अभ्रूविलाससमरूपृष्टमदरागम्मृगे क्षणम् । इदन्तुनयनद्वन्द्वन्तवतद्गुणभूषितम् । अ त्रक्रान्तामृगेक्षणयोःप्रतीयमानसादृश्ययोर्भ्रूविला समदरागौतदभावौचविसदृशौभेदकाविसीयम्प्र तीयमानसादृश्ययोरसदृशव्यतिरेकः ॥ १० ॥ स दृशासदृशव्यतिरेकाभ्यामेवतदुभयव्यतिरेकोपिव्या ख्यातः । यथा । निर्मलेन्दुनभोरेजेविकचाब्जम्व भोसरः । परम्पर्यश्रुवदनौमम्लतुर्भ्रातरावुभौ । अ त्रनभःसरसोःप्रतीयमानसादृश्ययोर्निर्मलेन्दुत्वंवि कचाब्जत्वञ्चप्राग्वदेवसदृशेभेदकेताभ्याञ्चमुख

लक्ष्यशैश्चलितचित्तवृत्तिश्च ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ शशामवृष्टिरिति भूभृतोराज्ञश्च ॥ ९ ॥ १० ॥ ताभ्यांचमुखञ्चन्द्रेणेति । मुखस्यचन्द्रक मलभावोनादिकविकल्पनासिद्ध इतितेनापिरूपेणप्रतीयमानसादृश्य

चन्द्रमुखकमलाभ्याम्मनोहराहूलादकत्वाभ्याञ्चप्र
तीयमानसादृश्ययोरेवरामलक्ष्मणयोर्यथम्मुखपर्य
न्तातनौचम्लानिनिर्म्मलेन्दुताविराजमानयोर्विक
चाब्जत्वशोभमानत्वयोश्चसाविसदृशीतिसोयंसदृ
शासदृशभेदकत्वकृतभेदएवतदुभयव्यतिरेकः ११
एतेनैकव्यतिरेकादिसम्भेदोपिव्याख्यातोयथा। मि
थ्यादेवभुजेनतेलपविभवःकल्पद्रुमःरूपद्धंतेनह्येनम्
भुवनत्रयाभयमहासत्रीकृपाणोऽचति । तुल्यस्तत्र
भवान्प्रयागविटपीयस्यैतदेकार्णवे कायान्तर्विनि
वेश्यविश्वमखिलंशाखासुशेतेहरिः । अत्रवर्णनीय
बाहुकल्पद्रुमयोरभिमतफलदायित्वादिभिःप्रतीत
सादृश्ययोर्भुवनत्रयाभयप्रदायीत्वर्णनीयबाहौकृपा
णोभेदकइतिएकव्यतिरेकः । तथावर्णनीयबाहोः
प्रयागवटस्यचप्राग्वदेवप्रतीयमानसादृश्ययोरेक
स्यभुवनत्रयाभयमहासत्रीकृपाणःशाखासुशेते । अ
न्यस्यतुमहाप्रलयेस्वकायान्तर्निवेशिताखिलविश्वो
वैकुण्ठः । ताविमौतयोःसदृशावेववेदकौहरिकृपा
णयोर्बाश्यामतादिभिःप्रतीयमानसादृश्ययोरिमा
वेवधर्मौभेदकौसोयमेवम्प्रकारोव्यतिरेकसङ्करउन्ने

त्वमुक्तम् ॥ ११ ॥ ननुमिथोव्यतिरेकिभेदगणनमनुपपन्नंसदृशासदृश
व्यतिरेकवदेकादिव्यतिरेकस्यापिसम्भवादित्यतआह । एतेनेति ।
प्राग्वदेवेति । अभिमतफलदायित्वादिभिः । एवम्प्रकारइति । न
ह्येकवाक्यस्थतामात्रेणतथाचमत्करोतियथाऽङ्गाङ्गिभावादिभिःपर
स्परग्रथनयेति । सैवप्रकारपदेनाभिहिता । यद्युदाहरणान्दृश्यतेस
म्भवतिवेति । नहिस्वजातिव्यतिरेकेद्वयोरभेदाध्यवसायःसादृश्यस

यः । स्वजातिव्यतिरेकेप्रतीयमानसादृश्यंस्वव्यक्तिव्यतिरेकेचाभिधीयमानसादृश्यंयद्युदाहरणन्द्वयतेसम्भवतिवातदातदप्युदाहार्यम् ॥ १२ ॥ ॥ १३ ॥ कार्यारम्भेसहायाप्तिर्दैवादैवकृतेहया । आकस्मिकीबुद्धिपूर्वाभयीवातत्समाहितम् ॥ १ ॥ तत्राकस्मिकीदैवकृतायथा । मानमस्यानिराकर्तुमुपादयोर्मेपतिष्यतः । उपकारायदिष्ट्यैदमुदीर्णं घनगर्जितम् । अत्रमाननिराकरणोपक्रमेकालोत्पन्नस्याकस्मिकघनगर्जितस्यमानविध्वंसेसहकारित्वादाकस्मिकीयन्दैवकृतासहायसम्पत्तिः ॥ १ ॥ आकस्मिक्येवादैवकृतायथा । अनुशासतमित्यनाकुलन्नयवर्त्माकुलमर्जुनाग्रजम् । स्वयमर्थइवामिवाञ्छितस्तमभीयायपराशरात्मजः । अत्रभीमानुशासनकालोपक्रमएवव्यासागमनस्यतदुपकारित्वादाकस्मिकीयमदैवकृतासहायाप्तिः ॥ २ ॥ बुद्धिपूर्वादैवकृतायथा । कल्पान्तेशमितत्रिविक्रममहाक

न्तरेणचसत्कारमर्पयतीतिकल्पितमेववाच्यम् । नचकल्पनाशब्दसन्तरेणेतिप्रतीयमानसादृश्यसम्भवःसादृश्यस्यभेदाधिष्ठानत्वात् । स्वव्यक्तिव्यतिरेकेप्यसम्भवत्तथाभूतमेवतुशब्देनोपादीयतइतिस्यादतउक्तंयदिदृश्यतइति ॥ १२ ॥ १३ ॥ सहकारित्वंव्यतिरेकनिरूप्यमतोव्यतिरेकानन्तरंसमाहितलक्षणमाह । कार्यारम्भइति । सहायःप्रकृतकार्यकारणस्यसहकारीतेनालङ्कारताआकस्मिकी अचिन्तितपूर्वाबुद्धिपूर्वाह्विपरीता । आकस्मिक्यादीनामप्रत्येकन्दैवादैवकृतसम्बन्धेभट्प्रकारंसमाहितमित्यर्थोक्तम् ॥ १ ॥ १ ॥ व्यासागमनस्येति । व्यासेनसभ्यात्यमानस्यतेनादैवकृतेति ॥ २ ॥ दैवात्तथाभूतैरेवेति । नर

कस्मिकीबुद्धिपूर्वादैवकृतायथा । साकौमुदीनयन
योर्भवतःसुजन्मातस्याभवानपिमनोरथबंधबन्धुः
तत्सङ्गमम्प्रतिसखेनहिसंशयोस्तियस्मिन्विधिश्चम
दनश्चकृताभियोगौ । अत्रमाधवस्ययोयम्मालती
म्प्रतिसमागमाभिलाषस्तत्रेयम्मालत्याआकस्मिकी
बुद्धिपूर्वाचतथाप्रवृत्तिःसोभव्यपिदैवकृताचसहाया
प्तिःसमाहितभेदः ॥ ५ ॥ आकस्मिकीबुद्धिपूर्वाचा
दैवकृतायथा । दृष्टिर्वन्दनमालिकास्तनयुगंलाव
ण्यपूर्णौघटौशुभ्राणाम्प्रकरःस्मितःसुमनसांवक्त्रप्र
भादर्पणः । रोमान्चोद्गमएवसर्षपकणःपाणीपुनःप
ल्लवौस्वाङ्गैरेवगृहम्प्रियस्यविशतस्तन्व्याकृतम्मङ्गल
म् । अत्रागच्छतःप्रेयस्येयंवन्दनमालिकादिमङ्गल
क्रियामनःपरितोषहेतुस्तस्यास्तन्वङ्ग्याइङ्गिताकारै
रेवयन्निर्वर्तनंसोयमाकस्मिकःस्वबुद्धिपूर्वकश्चतत्स
हकारिकारणत्वाददैवकृतश्चसमाहितभेदः॥६॥१३॥
भ्रान्तिर्विपर्ययज्ञानन्द्विधासापिप्रयुज्यते ॥ अत

अत्रयोयंमाधवस्येति । विधिश्चमदनश्चकृताभियोगइत्यनेनमालत्याः
पूर्वानुभावाः कथ्यन्तेतेचद्विधाभवन्तीत्याकस्मिकीदैवपूर्वसहायसम्प
त्तिः ॥ ५ ॥ अत्रागच्छतःप्रियस्येति । मङ्गलक्रियामात्रञ्चचम
त्कारास्यदमतउक्तम्मनःपरितोषहेतुरिति । स्मितम्बुद्धिपूर्वम् । रो
माञ्चोनबुद्धिपूर्वः । एवन्दृष्ट्यादौयथायथंवेदितव्यमिति ॥ ६ ॥ १३ ॥
बुद्धिपूर्वायांसहायाप्तौक्वचिद्भ्रान्तिरप्यस्तिततस्तदनन्तरन्तांलक्षयति ।
भ्रान्तिरिति । अतस्मिंस्तदितिनिश्चयोभ्रान्तिः । विपर्ययोनचैवंसंश
यादयइत्युक्तपूर्वम् । साद्विधा । यस्ययत्रासद्भावस्तस्यतत्रसद्भावारो
पःयस्यवायत्रसद्भावस्तस्यतत्रासद्भावारोपःसोयम्भावाभावकृतोनियमो

ङ्गालदण्डस्फुरच्छेषस्यूतनृसिंहवक्त्रनखरप्रोतादिकी
लामिषः । विश्वैकार्णवताविशेषमुदितौतीमस्यकू
र्मावुभौकर्षन्धीधरताङ्गतोस्यतुजगन्मोहम्महाभैरवः
अत्रप्रलयसमयेमहेश्वरेणसमापयितुमुपक्रान्तानां
त्रिविक्रमादीनांयोयन्तद्भुवाबडिशादिनामस्यकू
र्मयोराकर्षणप्रकारःसभगवताभैरवेणबुद्धिपूर्वकमुप
कल्प्यमानोदैवात्तथाभूतैरेवतैःसम्पद्यतइतिबुद्धिपू
र्वैयन्दैवकृतासहायाप्रिः ॥३॥ बुद्धिपूर्वैवादैवकृता
यथा । मूलेपञ्चततश्चतुष्टयमितिस्वकूसन्निवेशैःशि
रःपुष्पैरन्यतमावलोकनमितैरुच्छ्रोणितैरर्चिते । ह
स्तस्पर्शवशेनमूर्ध्निदशमम्मूर्द्धानमारोपयन्शम्भो
रद्भुतसाहसैकरसिकःकैर्नश्रुतोरावणः । अत्रयोय
न्दशवदनेनस्वयञ्छिन्नैःशिरोभिर्भगवतःशम्भोरर्च
नाप्रकारउपक्रान्तस्तत्रमूलेपञ्चततश्चतुष्टयमिति
शिरोविरचनाप्रपंचोबुद्धिपूर्वकोऽदैवकृतःक्रियमाणो
स्यकर्मणः समाप्तौसहकारिकारणतामासादयतीति
अयमदैवकृतोबुद्धिपूर्वकःसमाहितभेदः ॥ ४ ॥ आ

सिंहनखादीनांवडिशाद्युचितमूर्तिशालिमान्दैवमेवनिमित्तंवडिशादि
चिन्तयाविषयीकृताइतिबुद्धिपूर्वता ॥ ३ ॥ मूलेपञ्चेति । अधोधः
स्थूलपुष्पससन्निवेशउपर्युपरितनुरितिदूर्वापूजाप्रकारःप्रसिद्धः । अ
न्यतमालोकननिमित्तैरारोपितैः । अत्रलोकप्रसिद्धपूजाप्रकारःकार्यभू
तउपर्युपरितनुसन्निवेशनिष्पादनंसहकारि । हृदच्चरावणप्रयत्ननिष्पा
द्यत्वाददैवकृतम्बुद्धिपूर्वम्भवतीतिअन्यतमेनमूर्ध्नोऽन्यतमस्यारो
पणान्नवमच्छेदपर्यन्तमासीत् । पूजास्वरूपेणैवभगवांस्तुष्यतिजग
थाविदितेनेत्यभिप्रायवतोनिस्तरङ्गाभक्तिस्तेनसाहसस्याद्भुतत्वम् ४

त्वेतत्वरूपाचतत्वेचातत्वरूपिणी ॥ १ ॥ अतत्वेत
त्वरूपायात्रिविधासापिपठ्यते । अबाधिताबाधि
ताचतथाकारणबाधिता ॥ २ ॥ तत्रातत्वेतत्वरू
पाबाधितायथा । मोहविरमेसरोसन्थोरत्थणमण्ड
लेसुरबहूणम् । जेणकरिकुम्भसम्भावणाइदिठीप
रिठविआ । अत्रसुरवधूस्तनमण्डलेकरिकुम्भत्वेन
गृहीतेतत्वरूपेयन्मिथ्यैवतत्वारोपणन्नचानन्तरम्
बाधकोपन्यासङ्कृतस्तेनेयमबाधिताअतत्वेतत्वरू
पाभ्रान्तिः ॥ १ ॥ अतत्वेतत्वरूपाबाधितायथा ।
हसिअंसहत्थतालंसुक्खवडंउवगएहिम्पहिएहिम्
पत्तप्फलसारिच्छेउड्डीणेपूसवन्दम्मि* । अत्रपत्रफ

भ्रान्तेर्बाधनियमेपिक्वचिद्वारोपन्यासोभवतिक्वचिन्नभवति । उपन्या
सोद्विरूपः । अभिधयावृत्त्यन्तरेणच । यत्रबाधोपन्यासेबाधितानुप
न्यासेवाऽबाधितातस्मिन्नेववाक्येऽविज्ञातबाधेत्यर्थः । उपन्यासेतर
प्रकारेणज्ञातबाधकाबाधिता । बाधकारणोक्तेर्बाधपर्यवसानाभिप्रा
यत्वात्तदेतद्दर्शयति । अबाधिताबाधिताचेति ॥ १ ॥ २ ॥ मोहविरम
इति । परिठविआसपल्लवंव्यवस्थापिता । तत्रैवपरिपूर्वस्यतिष्ठतेःप्र
सिद्धत्वात् । सरोषमितिसमवायिविशेषणन्नचतदन्तरेणक्रियासद्भावः।
तेनमोहेपिनप्रक्रान्तरसानुभावस्वरूपतामहासीदितिव्यज्यते । इत्थ
ञ्चदृढानुबन्धोसौरसोयद्बलवत्तरविरोधिसम्पर्केपिनकार्कश्यमगादिति
स्थूलमण्डलसुरवधूपदैःप्रकाश्यतेसम्भावनयानतुपूर्वोत्यन्नज्ञानेन ।
करिकुम्भानान्दृढतरवासनत्वात् । अबाधितेत्यत्रयथार्थाभिमतस्तथा
दर्शयति । बाधकोपन्यासमिति ॥ १ ॥ हसिअमिति । पूसःशुकोव
न्दंवृन्दम् । शुकचञ्चुपुच्छानाम्पक्वन्यग्रोधफलनवपलाशसादृश्यम् ।

* मोहविरमेसरोषं स्थूलस्तनमण्डले सुरवधूनाम् ।
येनकरिकुम्भसंभावनयादृष्टिः परिस्थापिता ॥ १ ॥

* हसितं सहस्ततालं शुकवटुसपगतैः पथिकैः ॥

लितोयन्न्यग्रोधइत्यतत्वरूपेतत्वबुद्धावुत्पन्नायांय उत्तरकालमपत्रतानिष्फलताप्रत्ययस्तेनेयमतत्वेत त्वरूपाख्याबाधिताभ्रान्तिः ॥ २ ॥ अतत्वेतत्व रूपाकारणबाधितायथा । कनककलशस्वच्छेधारोप योधरमण्डलेनवजलधरश्यामामात्मद्युतिम्प्रतिवि म्बिताम् । असितसिचयप्रान्तभ्रान्त्यामुहुर्मुहुरुक्षि पञ्जयतिजनितव्रीडाहासःप्रियाहसितोहरिः । अत्र श्यामायामात्मद्युतावसितसिचयप्रान्तबुद्धिरतत्वे तत्वरूपाप्रियाहसितेनचकारणेनयद्बाधितासैषा अतत्वेतत्वरूपाकारणबाधिताभ्रान्तिः ॥ ३ ॥ अतत्वरूपातत्वेयासापित्रैविध्यसिद्धये । हानोपा दानयोर्हेतुरुपेक्षायाश्चजायते ॥ ३ ॥ तत्रतत्वेऽत त्वरूपाहानहेतुर्यथा । सोमुद्धमओमअतह्लिआहि न्तहदूमितुहआसाहिम् । जहसम्भावमईणविणई णपरम्मुहोजाओ * ॥ अत्रपारमार्थिकीष्वपिनदी षुमृगतृष्णाप्रतारितः सन्यन्नमृगःपयःपातुम्प्रतिप द्यते प्रत्युतत्यजतितेनेयन्तत्वेप्यतत्वरूपाहानहेतु र्भ्रान्तिः ॥ ४ ॥ तत्वेअतत्वरूपोपादानहेतुर्यथा ।

यद्यपिनात्रबाधोभिहितस्तथापिउड्डीणइत्यनेनार्थाभावविषयाप्रती तिःक्रियते । कथमन्यथाहसितहस्ततालरूपकार्यस्योपन्यासःस्यात् ॥ २ ॥ अत्रश्यामायामिति । नात्रपूर्वोदाहरणवचशब्देनकयाचिदपिवृ त्त्यार्थाभावोविषयीकृतःकिन्तुप्रकारान्तरेणोन्नीयते । तथाहिनायकेनां शुकापहरणलीलायितेपियदिदंराधायाः सिचयावरोधाङ्गचलनभ्रू क्षेपादि मुग्धाङ्गनोचितविभ्रमविरोधिहसितन्तत्कारणम्बाधस्येति ॥ ३ ॥ हानन्द्विविधम्प्रवृत्त्यभावोविपरीतश्चप्रयत्नोद्विधाप्यत्राभिमतमि

* समग्धमगोमगतम्मिकाभिस्तथादूनस्त्वदाशाभिः ॥

समर्थयेयत्प्रथमंप्रियाम्प्रतिक्षणेनतन्मेपरिवर्ततेन्य
था । अतोविनिद्रेसहसाविलोचनेकरोमिनरूपर्शवि
भावितप्रियः । अत्राङ्गीकृतलतारूपोर्वशीपरिष्वङ्ग
सुखनिमीलिताक्षस्यपुरूरवसःशापान्ताविर्भूतसत्य
रूपायामपितस्यांयेयम्पूर्वानुभूतैवंविधानेकविधवि
प्रलम्भसम्भावनयानयनयोरनुन्मीलनबुद्धिःसेयन्त
त्वेप्यतत्वरूपोपादानहेतुर्भ्रान्तिः ॥ ५ ॥ तत्वेप्यत
त्वरूपोपेक्षाहेतुर्यथा । चिक्रंसयाकृत्रिमपत्रिपङ्क्तेः
कपेःतपालीषुनिकेतनानाम् । मार्जारमप्यायतनि
श्चलाङ्गयस्याञ्जनःकृत्रिममेवमेने । अत्रतत्वरूपेपि
मार्जारेकृत्रिमोयमितिबुद्धौजातायान्तस्यांप्रयोज
नत्वेनयदुपेक्षणंसेयन्तत्वेप्यतत्वरूपोपेक्षाहेतुर्भ्रा
न्तिः ॥ ६ ॥ भ्रान्तिमान्भ्रान्तिमालाचभ्रान्तेरतिशय
श्रयः । भ्रान्त्यनध्यवसायश्चभ्रान्तिरेवेतिमेमतम् ॥
तत्रभ्रान्तिमान्यथा । कपालेमार्जारीपयइतिकरात्ते

तिव्याख्यानेनस्फुटयति । नप्रतिपद्यतेप्रत्युतत्यजतीति ॥ ४ ॥ सम
र्थयेदिति । विभाविताप्रियइतियुक्तःपाठः । प्रियादिषुपुंवद्भावप्र
तिषेधात् । नात्राशावारोपःस्फुटोवगम्यतइतिप्रकरणसादायव्याच
ष्टे । अत्राङ्गीकृतेति । नच्वाच्यन्होलायमानतयासंशयरूपमिदंज्ञा
नमिति । यतोनास्त्येवात्रप्रियलक्षातत्रापितदारोपेणमनस्तापाति
वाहनमुचितमितिजानलःपुरूरवसोनुबन्धप्रकर्षःपुष्यतिनान्यथेतिसह
दयहृदयसाक्षिकमिदन्तेदन्त्यनाक्स्फुटयति । पूर्वानुभूतैवंविधे
ति ॥ ५ ॥ प्रयोजकत्वेनयदुपेक्षणमिति । यावृत्तिर्निवृत्तिंवानप्रवृत्ते
राऽपेक्षाबुद्धिरेवेत्यर्थः ॥ ६ ॥ भ्रान्तिमानिति । भूम्निमतुप् । भूमा
यांहिविधोबहूनाम्भ्रान्तीनामेकविषयतोभिन्नविषयाणांवासमानकर्तृ

दिशश्चिनस्तरुच्छिद्रप्रोतान्बिसमितिकरीसङ्कलय
सि । रतान्तेतल्पस्थान्हरतिदयिताप्यंशुकमितिप्र
भासन्नश्चन्द्रोजगदिदमहोविभ्रमयति । अत्रेन्दुमरी
चिषुपयःप्रभृतिभ्रान्तिमूलमाम्नायभ्रान्तिमान्नामभ्रा
न्तेरेवभेदः ॥ ७ ॥ भ्रान्तिमालायथा । नीलेन्दी
वरशङ्कयानयनयोर्बन्धूकबुध्याधरेपाणौपद्मधिया
मधूककुसुमभ्रान्त्यातथागण्डयोः । लीयन्तेकबरी
षुबान्धवजनव्यामोहजातस्पृहादुर्वारामधुपोःकि
यन्तिततरुणिस्थानानिरक्षिष्यसि ॥ अत्रयुवत्यवय
वेषुनयनादिषुमधुव्रतानांयेयन्नीलोत्पलादिबुद्धिः
सेयंमालाक्रमेणोपजायमानाभ्रान्तिमालाभ्रान्तेरे
वभेदः ॥८॥ भ्रान्त्यतिशयोद्वेधा । वितर्कहेतुर्विप
र्ययहेतुश्च । तयोःपूर्वमुपमाभ्रान्तिमाचक्षतेद्वितीय
न्तुभ्रान्त्यतिशयमेव । तत्रोपमाभ्रान्तिर्यथा । हृतो
ष्ठरागैर्नयनोदबिन्दुभिर्निमग्ननाभेर्निपतद्विरङ्गि
तम् । च्युतंरुषाभिन्नगतेरसंशयंशुकोदरञ्यामम
दंस्तनांशुकम् । अत्रशाङ्कलेपिसमुत्पन्नस्तनांशुक
भ्रमस्यपुरूरवसोयंसादृश्यातिशयितोवितर्कःसं
यमुपमाभ्रान्तिः ॥ ९ ॥ भ्रान्त्यतिशयोयथा । दि

ता । आद्योभ्रान्तिमतोविषयोद्वितीयोभ्रान्तिमालायाः । नहिभ्रान्ति
मतिमालाक्रमनियमोस्ति । युगपदपिभिन्नकर्तृकाणाञ्जायमानत्वा
त् । भ्रान्तेरतिशयःशब्दोपनीतप्रकर्षाभ्रान्तिरितिस्वकार्यभूतंवितर्क
मादायप्रतीयमानाविपर्ययहेतुर्भ्रान्तानुबन्धी ॥ ४ ॥ ७ ॥ ८ ॥ त
योःपूर्वमिति । तत्त्वेनप्रतियतोमध्येमनाक्तद्व्यतिरेकमुल्लिखतेतूनम्भे
दामेदतुल्यतयामनसिसादृश्यम्प्रवर्त्ततइतिभावः । असंशयमितिपदे

नूयाद्धूर्जटिजूटकोटिसरितिज्योत्स्नालवोद्भासिनी
शाशाङ्कीकलिकाजलभ्रमिवशाद्द्रागूदृष्टनष्टामुदम् ।
याञ्चञ्चच्छफरीभ्रमेणमुकुलीकुर्वन्फणालीम्मुहुर्मुह्य
ल्लक्ष्यमहिर्जिघृक्षतितमामाकुञ्चनप्राञ्चनैः । अत्र
गङ्गाम्भःप्रतिफलितांरजनिकरकलामालोकयतोवा
सुकेर्येयंशफरीभ्रमेणमुकुलीकुर्वन्फणालींशफरीयमि
त्यध्यासिनाविपर्ययबुद्धिःसोयम्भ्रान्त्यतिशयोनाम
भ्रान्तेरेवभेदः ॥ १० ॥ भ्रान्त्यनध्यवसायोपिद्वि
धा । सालम्बनोनिरालम्बनश्च । तयोःसालम्बनो
यथा * । विरहिणिहिअअकअन्तहिंणिस्साअइत
क्खणिच्छाइज्जइअलिणिवहेहिंडिचत्तेनचूअवणि
अहतासुविमअरन्देहिंसोसंदाणिअइजहणकलम्ब
णअम्बणजम्बूजाणिअइ * । नकदम्बोनाम्रोनज
म्बूरितिज्ञायतेइतित्रयाणामेवावलम्बनभूतत्वात्
सालम्बनोनामायम्भ्रान्त्यनध्यवसायोभ्रान्तिभेदः
॥ ११ ॥ निरालम्बनोयथा । उभौरम्भास्तम्भा

नप्रकर्षोवितर्कश्चप्रत्यायितः ॥ ९ ॥ जिघृक्षतितमामिति । तिङश्चेति
तमपिकिमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षइत्याम् ॥ १० ॥ भ्रान्तेरनध्य
वसायोऽनिर्द्धार्यमाणविषयता । विरहिणिजणणइति । विरहिणीज
नस्यअधीगर्थेत्यादिनाकर्मणिषष्ठी । दअन्तेनदयमानेनरक्षता । णाव
इ । प्रतिभाति । तेत्थखणितत्रक्षणेछाइज्जइअलिणिवहेहिंछाद्यतेऽ
लिनिवहैःकरणभूतैः । चेत्तेणचैत्रेणकर्त्राचूअवणिचूतवनी । तहतथा ।
तासुवितस्याअपि । सन्दाणिअइवध्यते । अनिर्द्धारितविषयतयाकथ

* टीकाकारसम्मतपाठस्तु विरहिणीजणणइति दअन्तेणइति तेत्थ
खणिइति चेत्तेणइतितहइतिएवं तत्तत्पदपरिवर्त्तनेनबोध्यः ॥

* विरहिणीहृदयकृतान्तैर्निर्णीयतेतत्क्षणेछाद्यतेऽलिनिवहैश्चित्तेनचूत

ङुपरिविपरीतौकमलयोस्तदूर्ध्ववैरत्नाश्मस्थलमथदु रूहङ्किमपियत् । ततःकुम्भीपश्चादूबिसकिसलये कन्दलमयेतदन्विन्दाविन्दीवरमधुकराःकिम्पुनरि दम् । अत्रोर्वादिषुयुवत्यवयवेषुउत्पन्नंरम्भास्त म्भभ्रान्तेर्योयमेतत्समुदायेकिमिदमित्यालम्बनंवि नाकृतोनध्यवसायःसएषनिरालम्बनोनामभ्रान्त्यन ध्यवसायोभ्रान्तेरेवभेदः ॥ १२ ॥ १३ ॥ ऊ होवितर्कःसन्देहनिर्णयान्तरधिष्ठितः । द्विधासौ निर्णयान्तश्चानिर्णयान्तश्चकीर्त्यते ॥ १ ॥ तत्वा नुपात्यतत्वानुपातीयश्चोभयात्मकः । सनिर्णयान्त इतरोमिथ्योमिथ्योभयात्मकः ॥ २ ॥ तेषुनिर्णया

नालम्बननिरालम्बनयोर्भेदइत्यत्राह । त्रयाणामेवालम्बनभूतत्वा दिति । उक्तिभंग्याविषयोपादानादित्यर्थः ॥ ११ ॥ आलम्बनंविने ति । विषयानिर्द्धारणंव्यक्तीकृतम् ॥ १२ ॥ १३ ॥ मिथ्याप्रतीतिसामा न्यादन्तरंविसकैलक्षणमाह । ऊहइति । ऊहइतियस्यप्रसिद्धिःसइ त्यर्थः । पर्यायशब्देनापिलक्षणङ्क्रियतएव । यथाघटपदार्थतयाश्रा वृतौसन्दिह्यानस्यकलशपदार्थतयानिश्चयवतोयःकलशःसघटइति । क कथमसौसंशयविपर्ययाज्यान्भिद्यतइत्यत्राह । सन्देहेति । सन्देहो नानाकोटिकस्तथाभूतामेवजिज्ञासाम्प्रसूतेतर्कस्तुतदनन्तरभावीनिय तकोटिकस्तथाभूतामिति । कालस्वरूपकार्यभेदात्संशयतोभेदइति । एवंविपर्ययस्यापि । सहितर्कान्तरभाविनिश्चयात्मकःप्रवृत्त्यादिहेतुभूत श्च । तदयन्तर्कोभासस्यविपर्ययापर्यवसायिनोविषयविभागःकृतःसतु तर्कस्यविषयविभागःस्फुटएवसन्देहनिर्णययोर्मध्यन्तर्धिष्ठितःसतइ त्यविभागमाह । द्विधासाविति । निर्णयान्तरोपन्यस्तःफलभूता निश्चयोऽतथाभूतोनिर्णयान्तोनिश्चयः ॥ १ ॥ प्रमितिविपर्ययरूपतया द्विविधइत्युभयवान्निर्णयार्थंविभजते । तत्वानुपातीति ॥ २ ॥ सैना

न्तस्तत्वानुपातीयथा । मैनाकःकिमयंरुणद्धिगग
नेमन्मार्गमव्याहतशक्तिस्तस्यकुतःसवज्रपतनाद्भी
तोमहेन्द्रादपि । तार्क्ष्यःसोपिसमन्निजेनविभुना
जानातिमांरावणं आःज्ञातंसजटायुरेषजरसाक्लि
ष्टोवधंवाञ्छति । अत्रनिरूपितलक्षणेवितर्कैजटा
युरेषइतितत्वानुपातीनिर्णयान्तोवितर्कः ॥ १ ॥
सएवातत्वानुपातीयथा । अस्याःसर्गविधौप्रजाप
तिरभून्नन्द्रानुकान्तिप्रदः शृङ्गारैकनिधिःस्वयन्नुम
दनोमासीनुपुष्पाकरः । वेदाभ्यासजडःकथन्नुविष
यव्यावृत्तकौतूहलो निर्मातुम्प्रभवेन्मनोरमिमंरूप
म्पुराणोमुनिःअत्रकिमिदंरूपंनिर्मातुंयथोक्तःपुराणो
मुनिःप्रभवेदतश्चन्द्रादिष्वन्यतमेनप्रजापतिनाभवित
व्यमित्यतत्वानुपातित्वादतत्वानुपात्ययन्निर्णया
न्तोवितर्कः ॥ २ ॥ सएवोभयात्मकोयथा । चि
त्तेनिवेश्यपरिकल्पितसत्वयोगाद्रूपोज्झयेनरचिता
मनसाकृतानु । स्त्रीरत्नसृष्टिरपराप्रतिभातिसामेधा
तुर्विभुत्वमनुचित्त्यवपुश्चतस्याः । सोयन्तत्वानु
पातित्वादतत्वानुपातित्वाच्चोभयात्मानिर्णयान्तो
वितर्कः ॥३॥ अनिर्णयान्तोमिथ्यारूपोयथा । अद्रेः
शृङ्गंहरतिपवनःकिंस्विदित्युन्मुखीभिर्दृष्टोत्साय्य
कितचकितम्मुग्धसिद्धाङ्गनाभिः । स्थानादस्मात्सर

कःकिमयमिति । किमयमितिकाक्षापूर्वन्दोलायमानचित्तस्यनियतको टिस्पर्शीज्ञानविशेषउपनीयतेसएवतर्कः । एवमन्यत्रापि ॥ १ ॥ २ ॥ उभयात्मेति । स्त्रीरत्नसृष्टिरित्यनेनतत्त्वानुपातीअपरेत्यनेनातत्त्वानु पातीप्रकाशितः ॥ ३ ॥ मिथ्यामिथ्यारूपौबाधितबाधितविषयौ । अ

सतिचुलाद्युत्पतोदङ्मुखःखन्दिङ्नागानाम्पथिप
रिहरन्स्थूलहस्तावलेपान्। अत्रकिमिदमद्रेःशृङ्गम्प
वनोद्धरलीलिमेघम्प्रतिकल्पनायामिथ्यात्वाद्धस्तुन
श्चनिर्णयाद्निर्णयान्तोमिथ्यारूपोवितर्कः ॥ ४ ॥
सएवामिथ्यारूपोयथा । अयमसौभगवानुलपाण्ड
वःस्थिलम्बबाहुर्मुनिनाशशिमौलिना । समधिरूढंम
नेवमुज्जिघ्नुनास्विदितिवेगवशान्मुमुहेगणैः । अत्र
भगवत्पार्थयोरमिथ्यारूपत्वेनवेगवत्वादेकस्यानि
र्णयान्तोमिथ्यारूपोवितर्कः ॥ ५ ॥ अनिर्णयान्तउ
भयथात्वयथा । मायास्विदेषामतिविभ्रमोवाध्वस्त
नुमेवीर्यमुताहमन्यः । गाण्डीवमुक्ताहियथापुरा
मेपराक्रमन्तेनशराकिराते । अत्रमायादीनांविक
ल्पानामिथ्यारूपत्वान्ममशराकिरातेनव्याप्रिय
न्तइत्यस्यामिथ्यारूपत्वादनिर्णयान्तत्वाच्चायमनि
र्णयान्तउभयरूपोवितर्कः ॥ ६ ॥ १५ ॥ वस्त्वन्त
रतिरस्कारोवस्तुनामीलितंस्मृतम् । पिहितापिहि

यापिलीलितर्कोभवत्येव। यथायद्यस्यनीलंरूपंनीलोत्पलमिति ॥४॥
अत्रभगवत्पार्थयोरिति । भगवत्पार्थयोरवस्थानयोःसमाधिरोहारोह
योश्चनिश्चिद्भ्राधकमस्तिचज्ञानस्यविशेषःप्रत्यक्षतइति ॥ ५ ॥ अत्रमा
यादीनामिति । मपरमेश्वरस्यमायाछद्मनाशक्तौमतिन्नमोभवंसोवी
र्यस्य । नचार्जुनादेरर्जुनस्यान्यत्वमितिविजयबाधात् ॥६॥ १५॥ नीलि
तेन्द्वाभिरस्तीतिन्द्वात्यन्तरम्नीलितलक्षणमाह । वस्त्वन्तरेति । व
स्तूनामितिनिष्ठषष्ठी । वस्त्वन्तरेणतिरस्कारेइतिकर्मणि । वस्त्वन्तर
स्तिरस्कारइतिवार्त्तरि । फलतःसएवार्थः । तथाचोत्कृष्टगुणेनापकृ
ष्टगुणस्यतिरस्कारएवान्यग्भावनमितिलक्षणार्थः । पृथग्भूषतिरस्कारेणै
कस्यपतार्थतिर्नीलितमुच्यतेतथाधकारंवस्त्र् । नीलितंयुक्तमुच्यतइति ।

तेचैवतद्गुणातद्गुणौचतत् ॥ १ ॥ अत्रमीलितम
भिधीयमानगुणेनप्रतीयमानगुणेनचवस्तुनासम्भव
ति । तयोराद्योयथा । एत्तोविणसच्चविओगोसेप
सरत्तपल्लवारुणच्छाओ । मज्जणतम्बेसुमओतह
अमतम्बेसुलोअणेसुअमरिसो * । अत्रमज्जनता
म्रयोर्लोचनयोर्मदरागोमदाताम्रयोःकोपानुरागःसा
क्षादभिधीयमानेनैवगुणेनतिरस्क्रियमाणोनिदर्शि
तइत्यभिधीयमानेनवस्तुनैतन्मीलितम् ॥ १ ॥ प्र
तीयमानेनयथा । पिअदंसणेणसुहरसमुउलिआ
इज्जइसेणहोन्तिणअणाइम् । ताकेणकण्णरइअल
क्खिज्जइकुवलअन्तिस्सा * । अत्रप्रियदर्शनसुखे
नमुकुलितयोरेवलोचनयोस्तस्याःकर्णकुवलयंलक्ष्य
तेनत्वमुकुलितयोरितिवस्तुनावस्त्वन्तरतिरस्का
रःप्रतीयमानगुणतयोपपादितइतिप्रतीयमानगुणे
नवस्तुनामीलितमिदम् ॥ २ ॥ पिहितंयथा । पा

अभिप्रायपूर्वस्तिरस्कारोद्विविधः सिद्धाभिप्रायफलोऽसिद्धाभिप्रायफ
लश्च । यथाक्रमम्पिहितापिहिते । नचैतावताविशेषेणपृथग्भावः,सामा
न्यलक्षणव्याप्तत्वादवान्तरभङ्गीनामानन्त्याच्च । सरूपगुणेनतिरस्का
रस्तद्गुणोविरूपगुणेनातद्गुणः । एतावपिमिलितविशेषाविति स्फुट
म् ॥१॥ विभागमाह । अत्रमीलितमिति । एन्तोवीति । सच्चविऊदृष्टः,
सेतस्याः,मज्जनंस्नानम् । अत्रताम्रपल्लवारुणरागपदा[illegible]नीयते
गुणः ॥ १ ॥ ननुपिअदंसणेत्यादिकथम्मीलितम्ह्यत्रतिरस्कारःकेना
पिशब्देनप्रत्याय्यतइत्यतआह । नत्वमुकुलितयोरिति । यदिमुकुलिते

* आगच्छन्नपिनदृष्टःप्रातःप्रसरत्पल्लवारुणच्छायः ।
मज्जनताम्रयोर्मदस्तथामदताम्रयोर्लोचनयोरमर्षः ॥ १ ॥

* प्रियदर्शनेनसुखरसमुकुलितेयद्यस्यानभवेतांनयने ॥

अदिअणेहसब्भावविब्भमन्तीअजहत्थमन्दिट्ठो ।
संवरणवावडाएअण्णोविजणोतहच्चेअ * । अत्रप्र
कटितस्नेहविभ्रमन्तयोत्वामवलोक्यनैतदन्योजनो
जानातिचतिस्वर्वत्रस्निग्धदृष्टिपातेनापिहितमप्येतन्
मीलितमेदएव ॥३॥ अपिहितंयथा । दिट्ठाइजंण
दिट्ठोआलविआएविजन्नआलविओ । उवआरो
जण्णकओताञ्चअकलिअञ्छइल्लेहिम् * । अत्रदृष्ट
यायन्नदृष्टःसम्भाषितयायन्नसम्भाषितोनचाभ्या
मतोपचारोविहितस्तेनतदनुरागःपरन्नापिहितःप्र
त्युतच्छादनेनच्छेकानाम्प्रकटितइत्यपिहिताख्योय
मीलितभेदः ॥ ४ ॥ तद्गुणोयथा । गोरङ्गउत
रुणीअणजोण्हाइअहिसरइसिअम्मेवच्छपडिच्छेओव
ब्बहवहूरइ । तच्छाअहिहिम्पुणचल्लिअउसामलग
न्तिहअम्मअणुमन्तिअहिम् * । अत्रगौराङ्गस्तरुणी
जनःखिलनेपथ्योज्योत्स्नायांश्यामस्तुनीलनेपथ्यस्त
स्याःच्छायासुगच्छतीतितद्गुणाश्रयमीलनात्तद्गु

नस्यालाङ्कथङ्कुवलयंलत्यतइतितर्कस्यतिरस्कारपर्यवसानादितिभावः
मूर्तिरूपादिकःप्रतीयमानोगुणः ॥ २ ॥ ३ ॥ ननुदृष्टयापिदृष्टइत्य
पिकथमलङ्कारः । नह्यत्रशक्तिरस्तीत्यतआह । प्रत्युतेति । केकावि
दग्धाःतैरास्वाद्यमानत्वदावर्जकत्वङ्काव्यस्येत्यर्थः ॥ ४ ॥ गोरङ्गउइ
ति । गौराङ्गः । जोण्हहिज्जोत्स्नायांणेवच्छन्नेपथ्यंवस्त्रांङ्गरागादिपरि

---

* प्रकटितस्नेहसद्भावविभ्रमतया यथात्वं दृष्टः ।
संवरणव्यापृतया अन्योपिजनस्तथा दृष्टः ॥ १ ॥

* दृष्ट्वापियन्नदृष्टआलपितयापि यन्नालपितः ।
उपचारो यन्नकृतस्तेनच कलितं छेकैः ॥ १ ॥

* गौराङ्गस्तरुणीजनो ज्योत्स्नायामभिसरतिसितनेपथ्यपरिच्छन्नोवङ्ग

णाख्यस्मीलितमिदम् ॥ ५ ॥ अतद्गुणोयथा । क
र्कन्धूफलमुञ्चिनोतिशबरीमुक्ताफलाकाङ्क्षिणी क्रु
द्धोलूककदम्बकस्यपुरतःकाकोपिहंसायते । कीर्त्या
तेधवलीकृतेत्रिभुवनेक्ष्मापाललक्ष्मीपुरःकृष्णंवीक्ष्य
बलोयमित्युपहितव्रीडंशनैर्जल्पति । अत्रकर्कन्धू
फलानामपगतनिजगुणत्वादतद्गुणादतद्गुणाख्य
स्मीलितमिदम् ॥ ६ ॥ १६ ॥ सदृशादृष्टचिन्ता
देरनुभूतार्थवेदनम् । स्मरणम्प्रत्यभिज्ञानस्वप्ना
वपिनतद्बहिः ॥ १ ॥ तत्रसदृशार्थंयथा । अदृ
श्यन्तपुरस्तेनखेलखञ्जनपङ्क्तयः । अस्मर्यन्तवि
निश्वस्यप्रियानयनविभ्रमाः ॥ अत्रखञ्जनपङ्क्तिद
र्शनात्तत्सदृशप्रियानयनविभ्रमस्मरणात्तत्सदृशदर्श
नजंस्मरणमिदम् ॥ १ ॥ अदृष्टाद्यथा । मुनिसुता
प्रणयस्मृतिरोधिनाममविमुक्तमिदन्तमसामनः ।
मनसिजेनसखेप्रहरिष्यताधनुषिचूतशरश्चनिवेशि
तः । अत्रमुनिसुताप्रणयप्रतिरोधिनातमसामेमनो
वियुक्तमित्यदृष्टकृतंस्मरणमिदम् ॥ २ ॥ चिन्त
ययथा । पुरायत्रस्रोतःपुलिनमधुनातत्रसरितां
विपर्यासंयातोघनविरलभावःक्षितिरुहाम् । बहो

ग्रहः । पङ्क्तिविप्रतीत्यगृहीत्वा । वल्लहवडुरइवल्लभबद्धरलिस्तच्छा
हहिल्लासाङ्गौरागीणांछायाम्वलिउचलितम् ॥ ५ ॥ अत्रकर्कन्धूफ
लानामिति । विरूपगुणानामित्यर्थः ॥ ६ ॥ १६ ॥ मीलितेज्ञानमस्तीति
साजात्यादनन्तरंस्मृतिंलक्षयति । सदृशेति । सदृशाद्दृश्यमानसादृश्या
त्प्रयत्नजास्मृतिश्चिन्तादिर्यस्यार्थस्यैकथयिष्यति । अनुभूतार्थवेदनं
समानविषयानुभवनियतज्ञानविशेषरूपंस्मरणम् । प्रत्यभिज्ञानमपिपू

दृष्टङ्गालादपरमिवजातंवनमिदन्निवेशःशैलानान्त
रिदमितिबुद्धिन्द्रढयति । अत्रप्रत्यक्षेष्वपिस्रोतस्त
रुविपिनादिषुस्मरणस्यचिन्ताजन्यत्वादिदञ्चिन्तो
दूभूतंस्मरणम् ॥ ३ ॥ आदिग्रहणात्परप्रयत्नाद्यथा ।
दर्शनपथमायातासाङ्गादिवतन्मयेनहृदयेन । स्मृ
तिकारिणात्वयामेपुनरपिचित्रीकृताकान्ता । अत्र
परकृतात्प्रयत्नविशेषाच्चिन्तायाःप्रवृत्तत्वादिदमपि
स्मरणमेव ॥ ४ ॥ स्वप्नाद्यथा । जानेस्वप्नविधौम
माद्यचुलकोत्सेक्यम्पुरस्तादभूत्प्रत्यूषेपरिवेषमण्ड
लमिवज्योत्स्नाप्रसन्नम्महः । तस्यान्तर्नखनिस्तुषी
कृतशरच्चन्द्रप्रभैरङ्गकैर्दृष्टाकाप्यबलाबलात्कृतवती
सामन्मथम्मन्मथम् ॥ अत्रस्वप्नस्यचिन्तादिजन्य
त्वात्स्वप्नस्मृतिरपिस्मरणमेव ॥ ५ ॥ प्रत्यभिज्ञानं
यथा । गृहीतोयःपूर्वम्परिणयविधौकङ्कणधरःसुधा
मूर्तेःपाद्यैरमृतशिशिरैर्यःपरिचितः । सएवायन्त
स्यास्तदितरकरौपम्यसुभगोमयालब्धःपाणिर्ललित
लवलीकन्दलनिभः । अत्रगृहीतोयःपूर्वंसएवायन्त

वोनुभूतविषयमेवाएवंस्वप्नोपि ॥ १ ॥ अत्रखञ्जनेत्यत्रशब्देनखञ्जनप
क्षिकथेदवलोकितानन्तरमेवप्रियास्मरणमासीदितिकार्यकारणभावो
वगम्यतें । सचकारणतासादृश्यमनन्तर्भाव्यखञ्जनज्ञानस्यास्तीतिष
प्रतीतंसादृश्यमितिभावः ॥ १ ४ अत्रमुनिसुतेति । तमोलक्षणस्यप्र
तिबन्धकस्यापगमेस्मरणरूपङ्कार्यमावश्यकमित्यर्थः । यदिस्वप्नस्मृ
तिरपिस्मरणमेवतदाकतमदत्रसादृश्यादिषुकारणमतउक्तम् । चिन्ता
दीति ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ प्रत्यभिज्ञास्वरूपन्दर्शयति । यःपूर्वंस
एवायमिति । ननुसूत्रेस्वप्नात्पूर्वंस्मृत्यभिज्ञानमुद्दिष्टम्पश्चादुदाहृत्य
तच्छतिक्रम्यमेतत् । अत्रोदाहरणक्रमेपिलिपिप्रमादोयमित्याराध्यपा

स्याः पाणिरितिप्रत्यभिज्ञानमपिस्मरणमेव । ६ ॥ अभिप्रायानुकूल्येनप्रवृत्तिर्भावउच्यते । सोद्भेदो थनिरुद्भेदश्चैकतश्चाभितश्चसः ॥ १ ॥ तत्रैकतःसोद्भेदोयथा । गेह्णपलोएहइमंविअसिअवअणापिअस्सअप्पेइ । घरणीसुअस्सपढमुम्भिण्णदन्तजुअलङ्किअम्बोरम् * ॥ अत्रसुतस्यदन्तोद्गमादहमुपभोगयोग्यास्मीतिगृहिण्याएवमभिप्रायःप्रकर्षविकाशिनयनतयोद्भिद्यतेनपुनःपत्युरित्येकतःसोद्भेदोयम्भावः ॥ १ ॥ अभितःसोद्भेदोयथा । सालोएच्चिअसूरे घरिणीघरसामिअस्सघेत्तूण । णेच्छन्तस्सविपाए धुअइहसन्तीहसत्तस्स * । अत्रसालोकएवसूर्येगृहपतेर्गृहागमनङ्गृहिण्याश्चयत्पादधावन्तदावाभ्यामद्यवेश्मनोननिर्गन्तव्यमितिभावःसचद्वयोरपिहासेनाभितउद्भिद्यतइत्यभिहितःसोद्भेदोयम्भावः २ ।

दाः ॥ ६ ॥ ७ ॥ अभिमतमुक्तादिवस्तुचिन्तननियमादनन्तरम्भावलक्षणन्तदाह । अभिप्रायइति । अभिमतवस्तुचिन्ताभिप्रायस्तदानुकूलतयाप्रवृत्तिःक्रियालक्षणाभावः । अतएवसूक्ष्माद्भेदःप्रवृत्तिप्रतिपादकेनस्वार्थप्रकाशद्वाराप्रकाश्यमानोभिप्रायः । क्वचित्पदान्तरवृत्तिसहकृतेनप्रकाश्यतेक्वचित्केवलेन । ताविमौसोद्भेदनिरुद्भेदौ । मिथोनुबन्धविषयश्चायञ्चमत्करोति । तत्रप्रवृत्तिरुच्यमानानेनमतस्योच्यते । तयोर्वातदिदमाह । एकतश्चाभितश्चेत्यभिप्रायोद्भावनादशायांरूढःस्वादपदवीमासाद्यचमत्कारमावहति । अतएवतत्कार्ययोःप्रवृत्तेरनुभावरूपतयातथावानकुण्ठइतिहृदयम् ॥ १ ॥ १ ॥ २ ॥ ३ ॥

* गृहाण पर्यालोकयेममिति विकसित नयनाप्रियायार्पयति । गृहिणी सुतस्यप्रथमोद्भिन्नदन्तयुगलाङ्कितंबदरम् ॥ १ ॥

* सालोक एव सूर्ये गृहिणीगृहस्वामिनोगृहीत्वा ।

एकतोनिरुद्धे दोयथा । सालिवणगोविआएउड्डी
वन्तीअपूसविन्दाइम् । सङ्गसुन्दरीएविपहिआ
अच्छीइपेछन्ति * । अत्रातिसौन्दर्येणदेवीभ्रान्त्या
शालिवनगोपिकामालोकयताम्पथिकानान्तदक्षि
निरीक्षणेअयमभिप्रायःशालिवनतिरस्कारेणदेवमा
नुषयोर्विशेषभूतःपद्मग्रामेवभूमिरुपशोभूम्यरुपशोवा
नलक्ष्यतइतितदक्षिणीएवपश्यामोयदीयन्तिमिष
तितदामानुषीयंयदिननिमिषतितदादेवीयमितिस
र्वाङ्गसुन्दर्याअपिपथिकानामेवजायमानोनेहकेन
चित्कर्मणोद्विद्यतइत्येकतोनिरुद्धे दश्चायम्भावः ४॥
अभितोनिरुद्धे दोयथा । गोलाअडठिअम्पेछिऊण
गहवेइसुअंहलिअसोहा ॥ आढत्तोउत्तरिउंदुक्खु
त्ताराइपअवीए ॥ अत्रागच्छन्तींहालिकस्नुषांदृष्ट्वा
गृहपतिसूनोर्गोदावरीतटेयदवस्थानंयश्चतमवलो
क्यतस्यादुरुत्तरमार्गेणावतरणारंभस्तत्रायंतयोरभि
प्रायोहस्तावलम्बदानेनावयोरङ्गसङ्गंसम्पाद्यतामि
तिसूचयामितीद्वयोरपिजायमानोनेहकेनचित्कर्मणो
द्विद्यतइत्यभितोनिरुद्धे दश्चायम्भावः ॥ हृद्यंसूक्ष्म
ञ्चभिद्येतनहिभायात्कथञ्चन । हृदोदाहरणन्त
त्प्रतैरिदंप्रतिपाद्यते ॥ २ ॥ हिअएरोसुम्भिअम्पा
अप्पहरंसिरेणपत्थन्तो णहउदओमाणंसिणीएअ

नेहकेनचिदिति । तथाचशब्दान्तरस्यव्यापारोनास्तीत्यर्थः ॥ ४ ॥
हृद्यमिति । अभिमतस्यवस्तुनोहृदयावच्छेदेनवृत्तिमतिसन्धायप्रवृ
त्तिः । तत्रयद्यपिविशेषलेशोस्तितथापिभावसामान्यलक्षणाक्रान्तस्त

* शालिवनगोपिकायाउच्चाटयन्त्याः शुकवन्दानि ।

थोरंसुअंरुम्म * । अत्रहृदयेउद्घूर्णपादप्रहारंय
दयंशिरसाप्रार्थितवान्यच्छतयासौनताङ्गितस्तत्रह
दयेवल्लभाबसतीतिभावःसचप्रार्थनारोदनाभ्यामुद्बु
द्यमानःसोद्भेदोभावोहृद्यइत्युच्यते ॥ ५ ॥ निरुद्भेद
स्तुयोभावःससूक्ष्मस्तैर्निगद्यते । इङ्गिताकारलक्ष्या
त्ससूक्ष्मात्स्याद्भूमिकान्तरम् ॥३॥ यथा। कदासौ
सङ्गमोभावीत्याकीर्णवक्तुमक्षमम् । अवेत्यकान्त
मवलालीलापद्मन्यमीमिलत् ॥ ६ ॥ अत्रवक्तुम
क्षमतायामिङ्गिताकारयोरप्रतीयमानत्वावावगतेर्भू
मिकान्तरमिदम्भवति । पद्मसम्मीलनाच्चात्रसूचि
तोनिशिसङ्गमः । आश्वासयितुमिच्छन्त्याप्रियम
ङ्गजपीडितम् । अत्रानुकरणेऽपिभूमिकान्तरितेए
वभवतइतिसोयन्निरुद्भेदोभावएवसूक्ष्मइत्युच्यते ।
६ ॥ १८ ॥ प्रत्यक्षमक्षजंज्ञानम्मानसञ्चामिधीयते ।

त्रैवान्तर्भविष्यति ॥ २ ॥ ५ ॥ ॥ ननुचसूक्ष्मःकथम्पूर्वोक्तात्सूक्ष्माद्भि
द्यतइत्यतआह । इङ्गिताकारलक्ष्यादिति । कदानौसङ्गमोभावी
त्यभिप्रायस्यव्यञ्जकत्वेङ्गितत्वविकारोवाक्यान्तस्यकश्चिदुपात्तःअवेत्ये
त्यादिप्रकाशिताभिप्रायानुगुणाकाचिदस्तिक्रियावाक्यसन्यथातमुद्दि
श्यलीलापद्मनिमीलनंसङ्गलक्षतेतस्मादन्यत्वेवेदंसूक्ष्मस्यावलक्षणाक्रा
न्तम् ॥ ३ ॥ उत्तरार्द्धस्योदाहरणंव्युत्पादयति । अत्रपद्मसम्मीलना
त्वेति । एवञ्चेत्प्राप्तमिङ्गितलक्ष्यत्वमतआह । तत्रचेति । आजा
निकम्पद्मसीलनमनुकार्यङ्कृत्वाहस्ताङ्गुलीजनितमनुकरणंरात्रौसमाग
मोभविष्यतीतिकान्तागतोभिप्रायः । ननुनिमीलनमनुकार्याद्यभिव
रितमेतमर्थमवबोधयतीत्यर्थः ॥ ६ ॥ १८ ॥ ज्ञानंसङ्गत्यनन्तरम्भा
मारूपालङ्कारप्रस्तावेतत्रान्येषाम्प्रमाणानाम्प्रत्यक्षमूलकत्वात्प्रथम
म्प्रत्यक्षलक्षणमाह । प्रत्यक्षमिति । साक्षात्कारःप्रत्यक्षमितिप्रसिद्ध

* गोदास्तटस्थितंप्रेक्षयित्वागृहपति सुतंहलिकस्नुषा ।

स्वानुभूतिभवञ्चैवमुपचारेणकथ्यते ॥ १ ॥ तत्रा
क्षजन्द्वेधा । युगपदेकशश्च । तयोर्युगपद्यथा ।
क्रान्तूतकानूतवदनप्रतिबिम्बेमग्नबालसहकारसुगन्
धौ । स्वादुनिप्रणदितालिनिशीतेनिर्वारमधुनी
नद्रियवर्गः । अत्रमदिराम्रयाणाम्मुखप्रतिबिम्ब
सौगन्ध्यस्वादुताम्रव्यत्वशैत्यानान्दृक्घाणरसनम्र
यणत्वगिन्द्रियप्रत्यक्षताप्रतीयते ॥ १ ॥ एकशोय
था । मंदमंदविगलत्रपमीषच्चक्षुरुल्लसितपक्ष्मदध
त्या । वीक्ष्यतेस्मशनकैर्नववध्वाकामिनोमुखमधो
मुखयैव ॥२॥ तदेतच्चाक्षुषम् ॥२॥ एवंश्रावणादी
न्यप्युदाहरणीयानि । मानसमपिद्विधा । सुखादि
विषयमनुभूतार्थविषयञ्च । तयोःसुखादिविषयं
यथा । अस्तोकविस्मयमविस्मृतपूर्ववृत्तमुद्भूतनू
तनभयञ्चरजर्जरन्नः । एकक्रणत्रुटितसङ्घटित

तस्यविभागमाह । अक्षजमिति । अक्षम्बहिरिन्द्रियन्तस्माज्जात
म् । मानसन्त्वाह्येन्द्रियानपेक्षेणमनसाजनितम् । स्वानुभूतिःच
ज्ञानचिच्छक्तिस्तस्याउत्पन्नम् । शरीराभिघाताद्यभिभूतेप्रत्याहार
तिरस्कृतेवामनसिसत्यदाचिदतिस्फुटाभंज्ञानमुत्पद्यतेनतस्यमनोनि
यत्वतायाश्चयोगिभिरनुभूतिचिच्छक्तिमेवाश्रयते । तस्त्रिन्द्रियजन्यए
वालोकेसाक्षात्कारिताप्रसिद्धेःकथमनुभूतिभवन्तथेत्यतआह । उप
चारेणेति । यदीन्द्रियजन्येसाक्षात्कारितानियमस्तदोपचारेणापरिग
णनं अथभावनादिबलेनविनापीन्द्रियम्भवतीतिपक्षस्तदानुख्यतएवे
तिभावः ॥ १ ॥ युगपदिति । एकस्मिन्वाक्येघ्राणरसनचक्षुस्त्वक्श्रो
त्राणाम्पञ्चानामपियुगपत्प्रवृत्त्याभिधानाद्यौगपद्यन्नरसानुगुणतया
पौनरुक्त्याद्भनस्कारितामावहतीति । द्विधाप्यलङ्कारकाराश्चेपरिसङ्ख्या
नमुचितम्ज्ञानसन्निवेशेति । संयुक्तसमवायनियमितमेकमपरन्तुसंस्का

प्रमोदमानन्दशोकशबलत्वमुपैतिचेतः । एतन्नि
गदेनैवव्याख्यातम् ॥३॥ अनुभूतार्थविषयंयथा ।
पिहितेवासागारेतमसिसूचीमुखाग्रसम्भेद्ये । मयि
चनिमीलितनयनेतथापिकान्तामुखंव्यक्तम् । इदम
पिनातिदुर्बोधमितिनव्याख्यातम् ॥४॥ स्वानुभूति
भवन्द्विधा । मिथ्यात्मकममिथ्यात्मकञ्च । तयो
र्मिथ्यात्मकंयथा । अथदीर्घतरन्तमःप्रवेक्ष्यन्सह
सारुग्णरयःससम्भ्रमेण निपतंतमिवोष्णरश्मिमुर्व्यां
वलयीभूततरुन्धराञ्चमेने । तदिदमिन्द्रियेषुमन
सिचानवतिष्ठमानमात्मन्येवावतिष्ठते ॥ ५ ॥ अ
मिथ्यात्मकंयथा । मनःप्रत्यक्चित्तेसविधमवधाया
त्तमरुतःप्रहृष्यद्रोमाणःप्रमदसलिलोत्सङ्गितदृशः ।
यदालोक्याह्लादंह्रदइवनिमज्यामृतमयेदधत्यन्त
स्तत्वङ्किमपियमिनस्तत्किलभवान् । अस्यात्मवि
षयताव्यक्तैवयोगिभिरुद्गीयते ॥ ६ ॥ १९ ॥ लि
ङ्गाद्यलिङ्गिनोज्ञानमनुमानन्तदुच्यते । पूर्ववच्छेषव

रनियमितम् । संस्कारलक्षणयाहिप्रत्यासत्त्यायथास्मरणातिरिक्तम्प्र
त्यभिज्ञानन्तथेदमपीतिनकिञ्चिदनुपपन्नम् ॥ १ ॥ २ ॥ ३ ॥
निगदेनैवेति । यदिविस्मयादीनऽयन्नसाक्षात्कृतवान्कथमुद्वेलस्तमां
चक्षीतेत्यर्थः । इदमपीति । व्यक्तमित्यनेनसाक्षात्कारोदर्शितः । न
हिस्मरणेनव्यक्तताभवतिआत्मन्येवावतिष्ठतेस्वानुभूतिमाश्रयतइत्य
र्थः ॥ ४ ॥ ५ ॥ योगिभिरिति । निदिध्यासनबललब्धात्मनोज्ञानस्य
योगिमात्रम्प्रसिद्धविषयत्वात्नह्यस्यदादयस्तथातम्परिचिन्वन्तियथा
योगिनइत्यर्थः ॥ ६ ॥ ७ ॥ ८ ॥ अनुमानलक्षणमाह । लिङ्गादीति ।
यस्ययेनसहाविनाभावलक्षणाव्याप्तिःसन्दिग्धसाध्यधर्मधर्मिरूपपक्ष

श्चैवदृष्टंसामान्यतश्चयत् ॥ १ ॥ फलसामर्थ्यभेदेन द्विधैतद्भिद्यतेपृथक् । उदाहरणमेवैषांरूपव्यक्त्यैभविष्यति ॥ २ ॥ तेषु । यत्रकारणन्दृष्ट्वाकार्यमनुमीयतेतत्पूर्ववद्यथा । अविरलविलोलजलदःकुटजार्जुननीपसुरभिवनवातः । अयमायातःकालोहन्तहताःपथिकगेहिन्यः । अत्रवर्षर्तोःकारणभूतात्कार्यभूतविरहिणीनाम्मरणमनुमीयतेतेनैतत्पूर्वकारणमिहास्तीतिपूर्ववदुच्यते ॥ १ ॥ यत्रकार्यन्दृष्ट्वाकारणमनुमीयतेतच्छेषवद्यथा । सावज्ञमागमिष्यन्नूनम्पतितोसिपादयोःस्तस्याः । कथमन्यथाललाटेयावकरसतिलकपङ्क्तिरियम् । अत्रयावकरसति

वृत्तितारूपापक्षधर्मताचगृह्यतेतस्मात्तस्यप्रतीतिरनुमानंयथाधूमाद्वह्नेःसहियथाविधेसिद्धस्तथाविधसन्निधानंसूचयति । तत्रयस्मात्प्रतीतिरुत्पद्यतेतल्लिङ्गञ्चिह्नंव्याप्तिविशिष्टपक्षेधर्मतासज्ज्ञापकमित्यर्थः । इतरल्लिङ्गंज्ञापकमस्यास्तीतिकृत्वा । पूर्ववच्छेषवत्सामान्यतोदृष्टभेदात्त्रिविधमनुमानमग्रेग्रन्थकृतैवव्याख्यातमितिनवितन्यते ॥ १ ॥ फलसामग्र्येति । यद्यपिज्ञानमनुमानमित्युक्तन्तथापितस्यसाधारणमेवक्वचिदनुपन्यासप्रधानंवाच्यम् । क्वचित्करणीभूतलिङ्गपरामर्शोपन्यासप्रधानमितिभवतियथोक्तोविशेषःअनुमानशब्दोहिभावल्युडन्तःकरणेल्युडन्तोवाआद्येफलंद्वितीयेसामग्र्यङ्करणमित्यर्थः उपन्यासप्रधानतादुरूहेत्यतआह । उदाहरणमेवेति ॥ २ ॥ कार्यभूतविरहिणामिति । पथिकगेहिनीनान्दशम्यवस्थाज्ञायमानावाक्यार्थः अतःफलोपन्यासदत्तभरमेवेदङ्काव्यमित्यभिप्रायः । आयातश्चेज्जलदागमस्तदापूर्वप्रवृत्तइवपथिकनारीविनाशोलक्ष्यतइतिनिष्ठाप्रत्ययेनद्योत्यते ॥१॥ कथमन्यथेति । नेयमर्थापत्तिःकिन्तुतथाभूतानायकस्यललाटेऽलक्तकबिन्दुविशेषपङ्क्तिःप्रमदापदविपातप्रतिबद्धेति । नचालकबिन्दुप

लकपङ्क्तेः कार्यभूतायाः कारणभूतम्पादपतनमनु
मीयते। तेनैतच्छेषः कार्यमिहास्तीतिशेषवदुच्यते।
२ ॥ यत्रनकार्यन्नकारणङ्केवलमविनाभावमात्रम्
प्रतीयतेतत्सामान्यतोदृष्टंयथा। गज्जन्तेखेमेहापु
ल्लाणीवापणठियामोराणठोचन्दुज्जोओवासीरन्तो
हलापत्तो •। अत्रवर्षर्त्तुरविनाभूतैर्मेघगर्जितादि
भिःसामान्येनैवानुमीयतइतिसामान्यतोदृष्टमिदम्
तान्येतानिभावसाधनेऽनुमानशब्देफलपक्षेउदाह
रणानिभवन्ति ॥ ३ ॥ यदापुनःकरणसाधनोऽनु
मानशब्दस्तदानुमीयतेअनेनेत्यनुमानशब्देनयथो
क्तंलिङ्गमुच्यते यदाह अनुमेयेनसम्बद्धम्प्रसिद्धञ्चत
दन्विते । तदभावेचयन्नास्तितल्लिङ्गमनुमापक
म् । तत्पूर्ववतियथा । अइसहिवङ्कुल्लाविरि
च्छुहिहिसिगोत्तस्समत्थएछारम् । अच्चन्तदत्तदि

ङ्क्तिज्ञानन्तथास्वदतेयथाविपक्षचरणावनमनानुमेयस्यज्ञानम्फलभू
तन्तत्किलविपक्षगोचरामीर्ष्याव्यञ्जयद्विप्रलम्भप्रकर्षंपुष्णाति ॥ २ ॥
गज्जन्तइति । अत्रसमसमयेमेघगर्जितादिभिःकालोपाधिभिरनुमा
नन्तेनकार्यकारणभावः । अत्रहिनपृथक्मेघगर्जितादिज्ञानन्तथाच
मत्कारमावहतियथावर्षारात्रिज्ञानप्रतिबद्धम् । सहिज्ञातःकेतकक
र्णपूरादिविदग्धनेपथ्यपरिग्रहोत्सुक्यम्प्रवासिनायकागमनौत्सुक्यंवा
जनयतीतिफलएवभरः ॥ ३ ॥ अनुमेयेनेति । अनुमेयेनपक्षेणतस्यैव
साध्यवत्तयानुमेयत्वात् । यदाह । सएवचोभयात्मायङ्गम्योगमकइ
ष्यते । प्रसिद्धेनैकदेशेनगम्यःसिद्धेनबोधकइति । तदन्वितेसाध्यान्वि
तेप्रसिद्धम्प्रकर्षेणसिद्धम् । व्याप्यतयाधिगतम् । तदभावे । साध्या
भावेयतोनुमापकन्ततोलिङ्गम् । पूर्ववतीति । पूर्वङ्कारणमनुमापकं

• गर्जन्ते खे मेघा फुल्लानीपाः प्रवर्तितामयूराः ।

ट्ठेणसामिवलिएणहसिएण ॰ । अत्रैवम्प्रकारयाव
क्रोक्त्याएवंविधेनहसितेनोपलक्षितात्वमग्रतोगोत्र
न्दूषयसीतिकारणतोयत्रकार्यानुमानन्तदिदंसामग्री
पक्षेपूर्ववदित्युच्यते ॥ ४ ॥ शेषवतियथा । दी
सइणचूअमउलंअत्ताणअवाइमलअगन्धवहो । ए
त्तंवसन्तमासंसहिजंउक्कण्ठिअञ्चेअम् ॰ । अत्रो
त्कण्ठालक्षणेनकार्येणवसन्तःकारणभूतोनुमीयतइ
तिसामग्रीपक्षेइदंविशेषवदित्युच्यते ॥ ५ ॥ सा
मान्यतोदृष्टंयथा । आविर्भवन्तीप्रथमम्प्रियायाः
सोच्छ्वासमन्तःकरणङ्करोति । सन्तापदग्धस्यशिख
ण्डियूनोवृष्टेःपुरस्तादचिरप्रभेव । सेयंविद्युदिवदृ
ष्टिङ्कामन्दक्यपिप्रथमतउपलभ्यमानाअविनाभावे
नमालत्यागमनङ्गमयतीतिसामग्रीपक्षेसामान्यतो
दृष्टमेतत् ॥ ६ ॥ २० ॥ यदाप्तवचनन्तद्धिज्ञेयमा
गमसंज्ञया।उत्तमम्मध्यमञ्चाथजघन्यञ्चेतितत्त्रि

यस्यास्तितत्पूर्ववल्लिङ्गन्तस्मिन्ननुमापयितव्येलिङ्गज्ञानविषयतयापूर्व
ङ्कारणमाश्रयतीतिपूर्ववत् । सोयमर्थःसप्तम्याद्योतितः । कारणतइ
ति । यथाहिवक्रआलापोमुग्धाङ्गनाप्रकृत्यौचित्यागतंहसितन्ध्वनन
शक्त्याविषयतयाकान्तिमर्पयतिनतथाशब्दाभिलपितञ्चारित्र्यखण्डन
मितिसाहित्यमुद्राविदामतिप्रकाशमेव ॥ ४ ॥ एत्तमिति । चूतमञ्ज
रीमलयपवनयोरग्रेसमुत्कण्ठितमत्रचमत्कारास्पदम् । तथाहि । य
थाप्रियस्यसन्निधास्यतःसम्भावनालोकोत्तराभिमानप्रतिष्ठिताभवति
नतथासन्निधानमितिसहृदयसाक्षिकोयमर्थः । एवंसामान्यतोदृष्टोदा
हरणेबोद्धव्यम् ॥ ५ ॥ ६ ॥ २० ॥ यदाप्तवचनमिति । आप्तोयथार्थशब्दव

॰ अयि सखि वक्रालापैश्छादयिष्यसि गोत्रस्य मस्तके भस्म ।
अत्यन्तदत्तदृष्टे नसामिवलितेन हसितेन ॥ १ ॥

॰ दृश्यते नचूतमुकुलमद्य नचवातिमलयगन्धवहः ।

धा ॥ १ ॥ तत्रोत्तमन्द्विधा । विधिरूपन्निषेधरूप
ञ्च । तयोर्विधिरूपंयथा । दमन्दानन्दयाशिक्षे:
स्तनयित्नुर्वदत्यसौ । ददद्दइतिवागदेवीदयध्वन्दत्त
दायते । अत्रचएषादैवीवागनुवदति । यत्स्तनयित्नु
र्ददद्दइतिदयध्वन्दत्तदयतेतितदेतत्त्रयंशिक्षेतदम
न्दानन्दयामितिश्रुतेस्तदेतद्विविधरूपमाप्तवचनम्
॥ १ ॥ निषेधरूपंयथा । निवार्यतामालिकिमप्य
यंबटुःपुनर्विवक्षुःस्फुरितोत्तराधरः । नकेवलंयोम
हतोपभाषतेशृणोतितस्मादपियःसपापभाक् । अ
त्रोत्तरार्द्धोक्तनिषेधानुवादवर्द्धितव्युत्पत्तेर्वयस्याया
योयमपशब्दमानबटुनिवारणोपदेशस्तस्यमहान्तो
नापभाषितव्याइतिवाक्यार्थतात्पर्यादयन्निषेधरूप
आगमः । तदेतदुभयमप्यवश्यानुष्ठेयत्वादुत्तमम् १
मध्यमन्द्विधा । निर्दिष्टवक्तृकमनिर्दिष्टवक्तृकञ्चत
योराद्यंयथा कल्याणीव्रतगाथेयंलौकिकीप्रतिभाति

क्ता । उत्तमंश्रुतिमूलम् । अतएवतस्यावश्यानुष्ठेयत्वाभिधानम् । मध्य
ममनादिलोकव्यवहारमूलन्तदेवनावश्यानुष्ठेयमित्यनेनप्रकाशयिष्य
ते । उभयविधावह्निःफलसंवादिजघन्यम् ॥१॥ ददद्दइति । जलदध्वनि
तनानानादस्यानुकरणन्त्रितयव्याजेनजलधरोवदति । दयध्वम् ।
दत्त । दाम्यतेति । दैवीवागतोदमादानदयाःकर्त्तव्याइतिविधिःपर्यवस्य
ति । बुद्धीन्द्रियनियमोदमःदानदयेप्रसिद्धेमूलभूतांश्रुतिन्दर्शयति । अ
त्रतदेतदेवैषैति ॥ १ ॥ ननुनकेवलंयोमहतोपभाषतेहत्यादिवर्त्तमाना
पदेशात्कथंविधित्वमतआह । अत्रोत्तरार्द्धेति । अपभाषणस्यनिन्दार्थ
वादेननिषेधविधिःकल्यतेतेनमहान्तोनापभाषितव्याइतिवचनव्यक्ति
रूपीयतइति ॥ २ ॥ अत्रजीवन्नरइति । एषाचिरन्तनीलोकगाथात

मे । एतिजीवन्तमानन्दोनरंवर्षशतादपि । अत्र जीवन्नरःपश्यतिभद्रमिति । अयमेवार्थोनिर्द्दिष्टव क्तृकस्तदेतत्सर्ववाक्यानांविधिनिषेधयोःपर्यवसा नात्प्राणेषणायांयतितव्यमितिविधिरूपमाप्तवचन म् ॥ ३ ॥ द्वितीयंयथा । अक्षेवसतिपिशाचःपि चुमन्देदिनपतिर्वटेयक्षः । विश्राम्यतिपद्मेश्रीस्ति ष्ठतिगौरीमधूकतरौ । तदिदमनिर्दिष्टवक्तृकमना दिलोकप्रसिद्धिपरम्परायातमैतिह्यम् । अत्रापिसर्व वाक्यानांविधिनिषेधयोःपर्यवसानात्तस्मादक्षन्नसे वेतपिचुमन्दन्नकृन्तेतवटन्नच्छिन्द्यात्पद्मन्नमूर्द्ध्नि बिभृयात्मधूकन्नपदास्पृशेदित्यध्याहारोभवति । सोयन्निषेधरूपआगमउभयमप्येतन्नावश्यानुष्ठेय मितिमध्यमम् ॥४॥ जघन्यन्द्वेधा । काम्यन्निषिद्ध ञ्च । तयोःकाम्यंयथा । मुण्डइआचुण्णकसाअसाहि अम्याणणावणविइणम् । तेल्लम्पलिअत्थणीणंवि कुणेइपिणुणएथणए* । तदेतत्पूर्ववद्विधिरूपङ्काम्य माप्तवचनम् ॥ ५ ॥ निषिद्धंयथा । वयम्बाल्येवा

न्मूलत्त्वम्एतिजीवन्तमित्यादेरागमस्य । अत्रापिप्राग्वदेवस्तुत्य र्थवादेनजीवनाययतितव्यमितिविधिःकल्प्यते । तदिदमुक्तंसर्व वाक्यानामिति ॥ ३ ॥ तदिदमनिर्दिष्टप्रवक्तृकमिति । एतेनैतिह्य मागमएवान्तर्भूतमितिदर्शितम् । अज्ञातवक्तृकस्यागमस्यैवतथाप्र सिद्धेरिति । अत्रापीतिपिशाचवासादिभिरनुवादैःपूर्ववद्विधयःकल्प्य न्ते ॥ ४ ॥ मुण्डइवइति । मुण्डितिकाअलम्बुसा । कषायःक्वाथोज लन्नावनन्नस्यम् । काम्यमिति । पीनोन्नतस्तनकामनावतीभिरेवक्रि यमाणत्वात् ॥५॥ त्वयारब्धमित्यादौगणिकयासतीचारित्र्यवत्त्यानभ

* मुण्डितिकाचूर्णकाषायसाधितंपातनावनतयोर्वितीर्णम् ।

लास्तरुणिमनियूनःपरिणतावपीच्छामोवृद्धान्यरि
णयविधानस्थितिरियम् । त्वयारब्धञ्जन्मक्षपयि
तुमकाण्डेनविधिनाननोगोत्रे पुत्रिक्वचिदपिसती
लाञ्छनमभूत् । तदेतन्निषेधरूपन्निषिद्धमेवाप्तव
चनम् । उभयमपिचैतन्मूलकारिभिःसंसृज्येतइ
त्यादिदोषान्नानुष्ठेयमितिजघन्यम् ॥ ६ ॥ २१ ॥
सदृशात्सदृशंज्ञानमुपमानंद्विधेहतत् ॥ स्यादेकम
नुभूतेर्थेऽननुभूतेद्वितीयकम् ॥ १ ॥ तयोरनुभूता
र्थविषयंयथा । सर्वप्राणप्रवणमघवन्मुक्तमाहत्य
वक्षस्तत्सङ्घट्टाद्विघटितबृहत्खण्डमुच्चण्डरोचिः ।
एवंवेगात्कुलिशमकरोद्व्योमविद्युत्सहस्रैर्भर्तुर्वज्रज्व
लनकपिशास्तेचरोषट्टहासाः । अत्ररामकराकृष्य
माणभग्नधूर्जटिधनुर्विमुक्तज्योतिश्छटासहस्रसङ्
कुलमकाशम्पश्यतोरावणदूतस्येयंस्वयन्दृष्टेषुप्रभु
वक्षःस्थलविदीर्णवज्रशकलविस्फूर्जथुषुतद्रोषाट्टहा
सेषुवियद्व्यापिषुतत्सादृश्यबुद्धिस्तदिदमनुभूतविष

वितव्यमितिस्फुटोनिषेधविधिजघन्यत्वंव्याचष्टे । उभयमपिचैतन्मू
लकारिकाभिरिति ॥ ६ ॥ २१ ॥ सदृशादिति । इहमीमांसकावर्णय
न्ति । उपमानमपिसादृश्यमसन्निकृष्टेर्थेबुद्धिमुत्पादयति । अस्यार्थः ।
सादृश्यंसादृश्यज्ञानज्ञायमानसादृश्यमितिवत् । तदेवोपमानङ्कुतइ
त्यतआह । असन्निकृष्टेसदृशान्तररूपेर्थेयतोबुद्धिमुत्पादयतितेनभव
तिसदृशात्सदृशप्रतिपत्तिरुपमानम् । नसदृशादननुभूतज्ञानमुत्पद्य
तेतिप्रसङ्गात् । तेनेदमनुभूतविषयमेवनैयायिकानान्तुअननुभूतविषय
मेवोपमानन्तथाहि । नागरकेणयदाआरण्यकः पृष्टआचष्टेयथागौ
स्तथागवयइति । तदाखलुनागरकस्यातिदेशवाक्यार्थमनुस्मरतोगा

यन्नामोपमानम्मीमांसकावर्णयन्ति ॥ १ ॥ अनुभूतविषयंयथा । तांरोहिणींविजानीहिज्योतिषामत्रमण्डले । समूहस्तारकाणांयःशकटाकारमाश्रितः । अत्रयथाविधःशकटाकारस्तथाविधोरोहिणीतारसमूहाकारइत्येवमवधारितात्रोपदेशस्यलङ्काकारतारकचक्रदर्शनादिदन्तद्रोहिणीशकटमितियेयंसंज्ञासंज्ञिसम्बन्धप्रतिपत्तिस्तदिदमननुभूतविषयमुपमानन्नैय्यायिकारस्समुन्नयन्ति ॥१॥ तथाभूतार्थविज्ञानजनकत्वेनहेतुना । नास्मादभिनयालेख्यमुद्राबिम्बादयःपृथक् ॥२॥ तेष्वभिनयोयथा । वइविवरणिग्गाअदलोएरण्डोसाहइइतरुणाणम् । एत्थघरेहलिअबहूएद्दहमेत्तणीवसइ । अत्रपयोधरातिपरिणाहसूचकोज्ञानप्रसारिताङ्गुलिहस्ताभिनयसन्निवेशैरण्डदलसन्निवेशनात्स्वयमुद्दिष्टेपिहालिकवधूस्तनपरिणाहेपूर्वानुभूतैवंविधस्तनपरि

ज्ञसादृश्यप्रतियोगिनज्ज्ञानतोयद्भवयेयद्भवयेगोसादृश्यज्ञानन्तदुपमानमप्रमाणन्तेनायङ्गवयशब्दवाच्यइतिसंज्ञिसम्बन्यज्ञानम्यश्चादुपजन्यतेसोपमितिरिति । तत्रसदृशाद्बुद्धौविपरिवर्त्तमानाद्यत्सदृशज्ञानंसदृशेगवयेसंज्ञासंज्ञिसम्बन्धज्ञानमित्यर्थः । उदाहरणादिकन्निगद्व्याख्यातम् ॥ १ ॥ १ ॥ २ ॥ वइविवरेति । ग्रामतरुणीरनन्यद्भाल्लःकरशैर्हालिकवधूस्तनाभोगोमुसलोल्लासनादौवारंवारमनुभूतस्यतुल्याकारधृतिविवरप्रभूनैरण्डदलदर्शनादेवबुद्धिमारोहतीतिसाबुद्धिर्मीमांसकोपलितिसध्यमध्यास्ते । कथमेरण्डदलसन्निवेशस्यालिनेयता । अनुकारोह्यभिनयः नचासौतत्रसम्भवति । अतआह । हस्ताभिनयसन्निवेशैरिति । उत्तानप्रसारिताङ्गुलिहस्तसन्निवेशेनवस्त्वन्तरपरिणाहप्रति

णाहसम्बन्ध प्रतिपत्तिस्तदिदमनुभूतार्थविषयमुप
मानमेवाभिनयइत्युत्प्रेक्ष्यते ॥ ३ ॥ आलेख्यंयथा।
तवालेख्येकौतूहलतरलतन्वीविरचितेविधायैकाच
क्रंरचयतिसुपर्णासुतमधः। अथस्विद्यत्पाणिस्त्वरि
तमपमृज्यैतदपराकरेपौष्पञ्चापम्मकरमुपरिष्टाच्च
लिखति। अत्रयदानुभूतनायकसन्दर्शनायास्तद्रू
पालेख्यप्रदर्शनादेवम्भूतःसइतिविज्ञानमुत्पद्यतेगो
पनार्थञ्चतथाभूतयोरेवदेवकुलादिदृष्टविष्णुकाम
योःप्रतीतिर्भवतितदेतदनुभूतार्थविषयम्भवति।
यदापुनरननुभूतनायकादिसन्दर्शनायाइत्थमाप्तो
वदेशएवम्भूतसुपर्णकेतुश्चक्रपाणिर्भवति। एवम्भू
तोमकरध्वजःपुष्पचापःकामोभवति। यादृशावि
मौतादृशश्चतेमनोरथभूमिःकेवलमस्यगरुत्मदादयो
नविद्यन्ते। तदातदुत्तरकालमालेख्यगततदाकार

बिम्बनंलोकप्रसिद्धन्तदिहाप्येरण्डदलविस्तारदर्शनात्तदन्तरितमेवजा
यतइत्यर्थः ॥ ३ ॥ तवालेख्यइति। तदप्राप्तिकर्शिताचित्रप्रति
मादिनापरिनोदनेनकथञ्चिदात्मानन्धारयतीतितन्वीपदेनध्वन्यते।
नचजीवितमात्रार्थिनांसाकिन्तुत्वदाकृतिदर्शनकुतूहलेनोद्विग्नासती
निगूढमप्यभिप्रायमालेख्यनिर्माणेनव्यनक्तीतिकौतूहलतरलपदाभ्यां
व्यज्यते। एकेति। याराधादिप्रणयपात्रंवशीकृतत्रिभुवनमाजानसु
कुमारन्देवकीनन्दनमागमेषुबहुधाऽश्रौषीत्। अथेति। यानिर्यन्त्र
णप्रार्थनीयताविरोधिनन्देवताभावमनुसन्धत्ते। तयात्रैलोक्यातिशा
यिसौभाग्यप्रकर्षस्यपुष्पेषोश्चिह्नभूतौचापमकरौलिखिताविति। अथ
स्विद्यत्पाणिस्त्वरितमित्येतैर्व्यज्येते। अत्रोदाहरणेद्विविधमप्युपमा
नन्दर्शयति। तत्रमीमांसकपक्षेतावत्तन्व्यालेख्यमुन्मुदितन्दृष्ट्वाकाचि
दनुभूतपूर्वन्नायकञ्जानाति। सादृश्याविशेषाच्चकृष्टकामावपिप्रत्ये

दर्शनात्सेयम्ममप्रेयानितिमद्विधयाकयापिलिखितोभविष्यतीतितद्गोपयाम्येनंविष्णुचिह्नाभ्योमितिगरुत्मच्चक्रेधःप्रदेशहस्तयोः केतुहस्तयोर्निवेशयति अथापराप्रतिविधित्सुर्गोपयन्तीप्रकाशयन्तीचप्रत्यासन्नोपमानम्मन्मथाकारमाचिख्यासुःकरेपीष्पञ्चापम्मकरमुपरिष्टाच्चलिखति । अत्राकृतौपदार्थेयाहमास्तयोर्लोकानांसोयमितिविष्णुरितिकामङ्गतिचसंज्ञासंज्ञिसम्बन्धप्रतिपत्तयस्तदिदमनुभूतार्थविषयमुपमानमालेख्यमाख्यायते ॥ ४ ॥ मुद्रा यथा । सचकितमिवविस्मयाकुलाभिःशुचिसिकतास्वतिमानुषाणिताभिः । क्षितिषुददृशिरेपदानिजिष्णोरुपहितकेतुरथाङ्गलाञ्छनानि । अत्रचक्रध्वजाङ्कितजिष्णुपादमुद्रादर्शनात्सेयममानुषीपादमुद्राभवतीतिसङ्गासंज्ञिसम्बन्धप्रतिपत्तिस्तदिदमनुभूतार्थविषयमुपमानमेवमुद्रेत्युच्यते ॥ यदपिचादृष्टेपिजिष्णुपदेमृगीदृशामीदृशःसइत्यनुमानज्ञानन्तदप्युपमानार्थनिबन्धनमेवयदाह। अपिचा

ति । तदासदृशात्प्रतियत्तिरुपमानम्भवति । नैयायिकपक्षेतुयदासासान्यतोनायकागमेउत्पन्नपूर्वानुरागाया विशेषतश्चप्रत्यङ्गलावण्यमजानत्याइत्यम्भूताकारोकृष्णकामीयादृशीतादृशस्तवप्रेयानित्याप्तोपदेशश्रवणानन्तरङ्गृहीतचित्राकारायास्तत्तच्छब्दाभिधेयतायाप्रतिपत्तिरुपमानमिति । कथञ्चित्रेकामादिपदप्रयोगइत्यतआह । आकृताविति । रेखोपरेखादिसन्निवेशेचित्रतुरगन्यायेनेतिभावः ॥ ४ ॥ सचकितेति ॥ सनुचरणमुद्रयाजिष्णुचरणानुमानमत्रप्रतिभाति । तत्कथमुपमानेनाम्भोवहइत्यतआह । यदपिचेति । अत्राविशेषस्यचरणविशेषप्रतिब

रूप्यनुमानेपिसादृश्यंलिङ्गंलिङ्गिनः । पदेनयत्रकु
ड्यादेनकुड्यादीनुमीयते ॥ ५ ॥ प्रतिबिम्बंयथा ।
दर्पणेचपरिभोगदर्शिनीपृष्ठतःप्रणयिनोनिषेदुषः ।
वीक्ष्यबिम्बमनुबिम्बमात्मनःकानिकान्यपिचकार
लज्जया । अत्रयदातावदेवसम्बन्धग्रहःकीदृशंस्व
म्मुखंयादृशमादर्शेप्रतिबिम्बन्तदालोकनाददृष्टेपि
स्वमुखेयेयमीदृशम्मेमुखमितिप्रतिपत्तिस्तदिदम
ननुभूतार्थविषयम् । यदापुनरित्यमाप्तोपदेशाद्या
दृशंवस्तुतादृशमादर्शादौप्रतिबिम्बन्तदापिप्रियप्र
तिबिम्बालोकनादिदन्तन्ममप्रियप्रतिबिम्बमितो
यंसंज्ञासंज्ञिसम्बन्धप्रतिपत्तिस्तदप्यननुभूतार्थवि
षयम् । यदातुचित्रादिष्वनुभूतस्वमुखदर्शनायाःप्र
तिबिम्बदर्शनादनेनसदृशम्मेमुखमितिप्रतिपत्तिर्दृ
ष्टप्रियतमाकारायाश्चप्रतिबिम्बाकारदर्शनादेतदा
कारोममप्रेयानितिप्रतिपत्तिःप्रतिबिम्बसन्निधौप्र
तिबिम्बोदयोदृष्टस्तदिहसन्निहितेनतेनतेनभवित
व्यमितियाव्रीडाविकारभूतस्तदानुभूतविषयमेतदु
पमानंप्रतिबिम्बमित्याचक्षते ॥ ६ ॥२२ ॥ प्रत्य
क्षादिप्रतीतोर्थोयस्तथानोपपद्यते । अर्थान्तरञ्च

ग्धेसत्यपिसदृशात्सदृशज्ञानमुत्कटन्तादृशेनचव्यपदेशोभवतीत्यर्थः ।
एतदेवदार्वाचार्यसम्मत्याद्रढयति । अपिचेति ॥ ५ ॥ प्रतिबिम्बास
न्निधाविति । प्रसङ्गाद्यदर्थमनुमानंव्याख्यातन्तद्दर्शयति । व्रीडावि
कारइति । अतएवप्रधानमात्रस्योपसंहारः ॥ ६ ॥ २२ ॥ अर्थापत्तिं
लक्षयति । प्रत्यक्षादिति । प्रमाणप्रतीतस्यार्थस्यान्यथाकरणानुपप
त्तिज्ञानेनप्रसूतंज्ञानमर्थापत्तिः । अनुपपद्यमानार्थप्रत्यायकञ्चप्रमा

गमयत्यर्थापत्तिंवदन्तिताम् ॥ १ ॥ सर्वप्रमाण पूर्वत्वादेकशोनेकशश्चसा । प्रत्यक्षपूर्विकेत्यादिभे दैःषोढानिगद्यते ॥ २ ॥ तासुप्रत्यक्षपूर्विकाएकशो यथा । निर्णेतुंशक्यमस्तीतिमध्यन्तवर्तिताम्बनि । अन्यथानुपपत्त्यैवपयोधरभरस्थिते: । अत्रस्तनभ रनितम्बयोर्मध्यन्नोपलभ्यतेस्तनभारावस्थानउच्च श्यतेतत्रयेयम्पयोधरभरस्थितिःसासान्यथानुपपद्य मानाधारकम्मध्यमनुपलभ्यमानम्बोधयति । सेय म्प्रत्यक्षपूर्विकार्थापत्तिरेकशएवेहविवक्षिता । इय मपिह्यें वम्बहुशोभवतियत्तदर्थापत्तिलब्धम्मध्यन्त दपिधारणशक्तिमन्तरेणतत्कर्मासमर्थमिति । त स्यापिशक्तिःकल्प्यतेसेयमर्थापत्तिपूर्विकार्थापत्तिः। यश्चायमर्थापत्तिविकल्पस्यमध्यस्योपलम्भाभाव: सोपिप्रकारान्तरेणासम्भवन्कान्तिकार्श्ययोरुत्कर्ष म्ब्रूते । साचेयमभावपूर्विकानुपपत्तिर्भवति । न चैनद्दिहशाब्दमपितुवाक्यार्थमामर्थ्याद्गम्यते ॥ १ ॥

णम्प्रत्यक्षादिभेदात्षट्प्रकारमतस्तत्पूर्वोऽर्थापत्तिरपिषोढासम्पद्यते। यदर्थान्तरङ्गमयतितामर्थापत्तिंवदन्तीति । अर्थान्तरगतिरेवार्थापत्तिरितिव्यक्तम् ॥ १ ॥ एकशइति । एकप्रमाणपूर्वा । अनेकशोऽनेकप्रमाणपूर्वाःकथन्तर्हिषोढाअतउक्तम् । प्रत्यक्षपूर्विकेत्यादिभेदैरिति । व्याख्यातमेतत् ॥ २ ॥ अत्रस्तनभरेति । स्तनभरस्थितिःप्रत्यक्षगृहीतासाधाधारमन्तरेणानुपपद्यमानामध्यङ्कल्पयति । साचकल्पनाऽर्थापत्तिः । अनुपलभ्यमानमिति । अन्यथाप्रत्यक्षगृहीतेर्थेकिमर्थापत्त्या । अत्रैवोदाहरणेनेकशोव्याख्यातुंशक्यतइत्याह । इयमपीति । शक्तिर्नीलांसकलयेनित्यातीन्द्रियाअभावेऽभावेनैवगृह्यतइतिमध्यानु

प्रत्यक्षादिपूर्विकानेकशोयथा । एतदालोक्यलोकास्त्रिरूपमप्रतिमन्तत्व । कल्ययामःकलातत्वंगुरुतामादिवेधसः । तत्रेदंरूपमप्रतिमन्तवेतिप्रत्यक्षपूर्वंताम्रभाद्यपूर्वताचाव्यक्तमेवप्रतीयते । तेनेयमनेकशः।अत्रोपियेयंरूपस्याप्रतिमतान्यथानुपपद्यमानाकलातत्वगुरुविनिर्मितत्वमात्मनोवस्थापयतिसोवश्यङ्कल्यादिरूपोपमानज्ञानपूर्विकाया।तत्कर्तुरर्थापत्तिकल्पिताकलातत्वगुरुतासापितथाविधशक्तिकल्पनापूर्विकेतिउपमानपूर्विकार्थापत्तिपूर्विकाचेयमर्थापत्तिः। सापितत्कर्तुर्वेधसःकलातत्वगुरुतातथाभूतशक्त्याधारतावासाप्यनुमानतआगमतोवाज्ञस्यकल्प्यतइत्यनुमानपूर्विकाचयमर्थापत्तिः । नचैतच्चतुष्टयमिहापिशाब्दमपितुवाक्यार्थसामर्थ्याद्गम्यते ॥ २ ॥ एकशोनुमानपूर्विकायथा । कपोलपुलकेनास्याःसूचितोमदनज्वरः । मनोनिरन्तरारक्तंसख्याकथयतिप्रिये । अत्रयोयङ्कपोलपुलकेनानुमीयमानोभवज्वरः समनसःप्रियेनिरन्तरासक्तिमन्तरेणानुपपन्नइत्यनुमानपूर्विकेयमर्थापत्तिःअनेकशउपमानादिपूर्विकायथा । त्वदास्येनदृसमौदृष्ट्वातदिदङ्कल्पयामहे । अन्योन्यगामिलावण्यमनयोरे

पलम्भोऽभावप्रमाणपूर्वकः । कान्तीति । अद्भुतप्रभावतिरस्कृतंहिनयनमासकमपिनसध्यग्ग्रहणसमर्थमितिभावः ॥ १ ॥ अप्रतिमेति। प्रतिमाशून्यंरूपंविशिष्टमेवतत्रविशेषणांशेऽभावस्यव्यापारः । विशेष्यांशेप्रत्यक्षस्य । पूर्ववदिहापिव्याख्यामाह । अत्रापीति । प्रतिमाभावज्ञानम्प्रतिमाज्ञानपूर्वकम्प्रतिमाचसादृश्यन्तच्चसहशब्दद्वयद

त्रकेवलम् ॥ अत्रत्वदास्येन्दूसमौदृष्ट्वेत्युपमान पूर्वकताअर्थापत्तेः प्रत्यक्षपूर्वताचसब्दतएवप्रतीय ते । याचामिथःसादृश्यानुपपत्तिलभ्यालाघवान्यो न्यगामितासापितथाविधंविधातारमन्तरेण नसङ्ग छतइत्यादीहापिपूर्ववद्वाक्यार्थसामर्थ्यतोवगन्तव्य म् ॥ ४ ॥ एकशोअभावपूर्वायथा । एतदास्यं विनादास्यन्निवेदयतिसुभ्रुवः । प्रियापराधदग्धा नाम्मनोभाजनताङ्गतम् । अत्रसुभ्रुवइत्यनेनविल सवत्याःसमस्तप्रशस्तलक्षणयोगोलक्ष्यते । तथावि धायाश्चवक्त्रविलासहासस्यामावोनुपद्यपमानःशो कव्यतिरिक्तमात्मकारणंकल्पयतीत्यभावपूर्विकेय मर्थापत्तिः ॥ ५ ॥ अनेकशोर्थापत्यादिपूर्विकाय था । दृष्ट्वाविभ्रमिणीमेतांविभ्रलीलागुरुंस्मरम् । स्मरञ्चमृगशावाक्ष्यामनस्यस्याःकृतास्पदम् । अत्र विभ्रमिणीतिप्रशंसायाम्मत्वर्थीयस्तेनविभ्रमाणामु त्कर्षोलक्ष्यते । तेचान्योपदेशादसम्भवन्तोमन्मथ मुपाध्यायंबोधयन्ति । तस्याग्रतःपार्श्वतोवानुप लभ्यमानस्यतन्मस्यवस्थानंलक्ष्यते । सेयमाद्याप्र त्यक्षपूर्विकाद्वितीयाचार्थापत्तिपूर्विकार्थापत्तिर्भव ति । अयमेवचमनोभूर्मनसिकामिनीनांसम्भवती त्याप्तोपदेशादागमपूर्विकापिभवति ॥ ६ ॥ २३ ॥

र्शनवेद्यसित्यस्तिपूर्वमुपमानम् ॥ २ ॥ ३ ॥ हास्यभावस्यान्यथाप्युप पत्तेःकथमर्थापत्तिरित्यतआह । अत्रसुभ्रुवइति ॥ ४ ॥ ५ ॥ इत्यमे वान्यथोपपत्तिमाशङ्क्याग्रेव्याचष्टे । अत्रविभ्रमिणीमितिमत्वर्थीयार्थमा ह ॥ प्रशंसायामिति ॥ ६ ॥ २३ ॥ अभावंलक्षयति । असत्तेति । प्रा

असत्तायापदार्थानामभावःसोभिधीयते । प्रागभावादिभेदेनसषड्विधइहेष्यते ॥ १ ॥ तेषुप्रागभावो यथा । सग्गंअपारिजाअङ्कोत्थुहलच्छीविरहिअम् । महुमहस्सउरम्मुमरामिमहणपुरओअमुद्धअन्द उचहंरअडापब्भारम् ॥१॥ प्रध्वंसाभावोयथा । धृतिरस्तमितागतिश्रुताविगतज्ञेयमृतुर्निरुत्सवः । गतमाभरणप्रयोजनम्परिशून्यंशयनीयमद्यमे ॥२॥ इतरेतराभावोयथा । कर्णोत्पलन्नचक्षुस्तेनचक्षुःश्रवणोत्पलम् । इतिजानन्नपिजनोमन्यतेनेत्रदीर्घताम् ॥ ३ ॥ अत्यन्ताभावोयथा । जञ्जरस्सहोडसारन्तंसोदेइत्तिकिमत्थअच्छेरम् । अणहोत्तम्मिपहुदिस्सन्तइदोहग्गंसवत्तीणम् ॥ ४ ॥ अन्येपुनरन्यथाह्यत्यन्ताभावमाचक्षते । यथा । प्रसीदसद्योमृउचेमउचण्डिमानम्मनोगतम् । दृष्टमात्रेपितेतत्रो

गसत्त्वमुत्तरासत्त्वमित्यसत्तारूपेणैवप्रागभावादयोव्यवतिष्ठन्तेइतरेतराभावेप्यन्यरूपतयान्यस्याभावइत्यसत्तात्मकत्वम् । प्रागभावादयः पूर्वोन्निर्हिताश्चत्वारः । अत्यन्ताभावविशेषसामान्याभावाज्यांसहषडभावाः । तयोर्विशेषमग्रेवक्ष्यामः ॥ १ ॥ सग्गंअपारिजाअमिलिनिगदव्याख्यातः । प्रागभावः । यथाअभावपूर्विकायामर्थापत्तौकरणभेदानुमानमुक्तन्तथात्रापिबोद्धव्यम्पारिजातप्रागभावस्य प्रमेयरूपतायक्तैव । अभावोऽभावेनैवप्रतीयतइति । दर्शनेतत्करणतयाशब्दानुपातोपियोग्यप्रमाणाभावोवगम्यते । एवमुत्तरेष्वपिस्वयमूहनीयम् ॥१॥ २ ॥ ३ ॥ ४ ॥ स्थानान्तरप्रसिद्धस्यस्थानान्तरेत्रैकालिकोऽभावविशे

• स्वर्गसपारिजातं कौस्तुभलक्ष्मीविरहितंमधुमथनस्योरः ॥
स्मरामिमथनपुरतोऽमुग्धचन्द्रंचहरजटाप्राग्भारम् ॥ १ ॥

• यद्यस्यभवतिसारन्तंसद्दाति किमत्राश्चर्यम् ॥

षःखकुसुमायते ॥ ५ ॥ सामर्थ्याभावोयथा । मा
नुषीषुकथंवास्यादस्यरूपस्यसम्भवः । नप्रभातर
लज्ज्योतिरुदेतिवसुधातले । तएतेषडपिनिगदैरेव
व्याख्याताः ॥ ६ ॥ अभावाभावोप्यभावएव । त
त्रप्रागभावप्रध्वंसोयथा । उद्यानसहकाराणामनु
द्भिन्नानमञ्जरी । देयःपथिकनारीणांसतिलःसलि
लाञ्जलिः ॥ ७ ॥ प्रध्वंसप्रागभावोयथा । नमर्त्य
लोकस्त्रिदिवात्प्रहीयतेम्रियेतनाग्रेयदिवल्लभोजनः
८ ॥ प्रध्वंसप्रध्वंसोयथा । निवृत्तमेवत्रिदिवप्रयो
जनम्मृतःसचेज्जीवतएवजीवति ॥ ९ ॥ प्रध्वंसप्रा
गभावप्रध्वंसोयथा । नामिलितमस्तिकिञ्चित्का
ञ्चीदेशस्यसर्वथानाथ । प्रसरतुकरस्तवायम्प्रकृति
कृशेमध्यदेशेपि ॥ १० ॥ प्रध्वंसप्रध्वंसस्यप्रध्वंसो
यथा । एषाप्रवासङ्कथमप्यतीत्ययातापुनःसंशयम
न्यथैव । कोनामपाकाभिमुखस्यजन्तोर्द्वाराणिदैवा

पोत्यन्ताभावइतिदर्शनमाश्रित्यचतुष्टयमध्यपातीतावदत्यन्ताभावउ
दाहृतः । इदानीम्पञ्चमाभावोचितविशेषमत्यन्ताभावन्दर्शयति । अ
न्येपुनरिति । सौगतादयः । अत्यन्तासत्प्रतियोगिकोऽभावोत्यन्ता
भावः । यथाखपुष्पस्याभावइत्युदाहरणंस्फुटम् ॥ ५ ॥ सामर्थ्याभा
वोयोग्यताभावः । अनेनैवरूपेणसरसतामासादयन्नुपात्तः ॥ ६ ॥ अ
भावएवेति । अभावव्यवहारपात्रमेवतथाभूतस्यैवलक्षणमित्युक्तम्पुर
स्तात् ॥ ७ ॥ वल्लभजनमरणम्प्रध्वंसःसनञानिषिद्ध्यतेसतुनिषेधःप्रा
गसत्त्वरूपएव । मृतःसचेदितिमरणोत्तरमभावोभवत्प्रध्वंसोभवति ।
सच्चासम्भवन्नपिशब्देनसम्भाव्यमानःकान्तिकारणम्भवतीत्यलङ्कारक
क्षामारोहति ॥ ८ ॥ ९ ॥ प्रध्वंसप्रागभावाभावइति ॥ मरणेनप्रध्वं

न्यपिधातुमीष्टे ॥११॥ इतरेतराभावाभावोयथा। शासनेपिगुरुणिव्यवस्थितङ्कृत्यवस्तुनिनियुङ्क्ष्व कामतः। त्वत्प्रयोजनधनन्धनञ्जयादन्यएषइतिमा ऽचमावगाः। अत्यन्ताभावस्यसामर्थ्याभावस्यचप्र ध्वंसाभावोयथा। अनाप्तपुण्योपचयैर्दुरापाफल स्यनिर्द्धूतरजाःसवित्री। तुल्याभवद्दर्शनसम्पदेषा वृष्टेर्दिवोवीतबलाहकायाः। एतेनातिदुर्बोधाइति नव्याकृताः ॥१३॥१४॥ अर्थालङ्कृतयोप्येताश्चतु र्विंशतिसङ्ख्यया। कथिताकाव्यविज्ञानाज्चित्तप्रह्लादहेतवे ॥१॥ इतिश्रीमहाराजाधिराजश्रीमद्भो जराजविरचिते सरस्वतीकण्ठाभरणनाम्न्यलङ्कार शास्त्रेऽर्थालङ्कारस्तृतीयःपरिच्छेदः॥ शिवम्भूयात्॥

सनन्तस्याभावःसमस्तेमनजातस्याप्यभावोभिन्नेनप्रतिपादितः॥१०॥ प्रध्वंसस्यप्रध्वंसाभावइति। कथमपीत्यनेनप्रवासेदशम्यवस्थाकटा क्षितातस्यात्ययःप्रध्वंसप्रध्वंसःपुनःसङ्गममित्यनेनतस्यापिप्रध्वंसः११ सुबोधमन्यत्॥ १२॥ १३॥ १४॥ उक्तार्थालङ्काराणांसंख्यामाह। अर्थालङ्कृतयइति॥

॥१॥ श्रीरामसिंहदेवाज्ञामादायरचितोमया॥ दर्पणाख्यः सदातेनतुष्यतु श्रीसरस्वती॥१॥ रत्नेश्वरोनामकवीश्वरोसौविरा जतेकाव्यसुधाभिषेकैः॥ दुस्तर्कवक्राहतदुर्विदग्धांवसुंधरांपल्लवयन्न जस्रम्॥२॥ अद्यस्फुरतुवाग्देव्याःकण्ठाभरणकौतुकम्॥ मयिब्र ह्ममनोवृत्तौ कुर्वाणेरत्नदर्पणम्॥३॥

इति श्रीमन्महाराज श्रीरामसिंहेन महामहोपाध्याय मनीषि रत्नेश्वरेणविरचय्यप्रकाशिते दर्पणाख्येसरस्वतीकण्ठाभरण विवरणेऽर्थालङ्कार स्तृतीयः परिच्छेदः॥

॥ श्रीः ॥

श्रीमल्लक्ष्मीव्यङ्कटेशाभ्यांनमः

सरस्वतीकण्ठाभरणे

श्रीमन्महाराजाधिराज श्रीभोजदेवनरेन्द्रविरचिते

चतुर्थपञ्चमपरिच्छेदौ

ज्यौतिषोपाह्व भैरवनाथशास्त्रि प्रभृतिभिः

श्रीकाश्यां

राजराजेश्वरीमुद्रायन्त्रालये

प्राकाश्यंप्रनीतौ ।

संवत् १८४५

शुभमस्तु

॥ श्रीः ॥

विदितमस्तु तत्र भवतां साहित्यानुरागिणां योयं मैरव शास्त्रिप्रभृतिभिर्मुद्रयितुमुपक्रान्तः सव्याख्यः सरस्वतीकण्ठाभरणाभिधः साहित्यग्रन्थः सोयं श्रीमद्विश्वेशाऽनुकम्पयाश्रीगुरुचरणप्रसादात् सुहृदामानुकूल्येनच संशोधनादिपुरःसरं संपूर्णतामगमत्। परं तत्र परिच्छेदत्रयस्यैवव्याख्योपलब्धेस्तावन्तमेवामुद्रयंसव्याख्यमिति व्यञ्जापयं पूर्वभूमिकायाम्। तदनन्तरं च बहुत्रदेशेषुकृतगवेषणाऽपि नासादितापरिच्छेदद्वयव्याख्येतिखिन्नमनाअपि विलम्बमसहमानैःप्रेम्णाभिर्वारंवारं प्रेरितः कृतोत्साहश्च प्रवृत्तोहंश्रौतविद्वानदीर्णपाठकश्रीमज्जगन्नाथशर्मणामेकमेव शुद्धतमं पुस्तकमासाद्य तत्रतत्रप्राकृतोदाहरणेषु कृतच्छायंश्लिष्टस्थलेष्वपि विवरणसंपादनपुरःसरं तुर्यपरिच्छेदम् पञ्चमं तुकेवलप्राकृतोदाहरणप्रायमिति आवश्यकेपि विवरणादिकरणेविलम्बासहिष्णूनांप्रेम्णांपरीप्सयासंप्रार्थनयाऽच्छायमेवान्यदप्येकंपण्डितवराणांमोहकमशर्मणांपुस्तकंसंगृह्यसंशोध्य, तत्र तत्र पाठभेदान्संसूच्यचमुद्रयित्वाप्रकाशितवानस्मि। परमत्रमदीयदृष्टिदोषेण सीसकाक्षरयोजकदोषेणवास्खलितानि परिहाय गुणग्राहिणः सहृदयाः कृतधियः सानन्दमवलोकयन्त्वमुं सफलयन्तु च ममोद्योगमिति सप्रश्रयंप्रार्थयते

पौषवद्य १३ चं० सं०१९४५

संशोधकःप्रकाशकश्च
द्राविडवीरेश्वरशास्त्री

॥ श्रीः ॥

॥ सरस्वतीकण्ठाभरणे चतुर्थः परिच्छेदः ॥

॥ श्रीसरस्वत्यै नमः ॥

शब्देभ्यो यः पदार्थेभ्यउपमादिः प्रतीयते । विशिष्टो-
र्थः कवीनान्ता उभयालंक्रियाः प्रियाः ॥१॥ उपमारूपकं-
साम्यं संशयोक्तिरपह्नुतिः ॥ समाध्युक्तिः समासोक्ति-
रुत्प्रेक्षा ऽप्रस्तुतस्तुतिः ॥ २ ॥ स*तुल्ययोगितोलेशः स-
सहोक्तिःसमुच्चयः ॥ साक्षेपोर्थान्तरन्यासः सविशेषाप-
रिष्कृतिः ॥ ३ ॥ दीपकक्रमपर्यायातिशयश्लेषभाविकः ।
संसृष्टिरितिनिर्दिष्टास्ताश्चतुर्विंशतिर्बुधैः॥४॥तत्र। प्रसिद्धे-
रनुरोधेन यः परस्परमर्थयोः । भूयोवयवसामान्ययोगः
सेहोपमानता ॥५॥ एकाभिधीयमानेस्यात्तुल्येधर्मेपदार्थ-
योः । प्रतीयमानेप्यपरा द्विविधाऽपिच सा त्रिधा ॥६॥
पदवाक्यप्रपञ्चाख्यैर्विशेषैरुपपद्यते । पृथगष्टविधत्वेन
ताश्चतुर्विंशतिः पुनः ॥७॥ समासात्प्रत्ययाच्चैव द्विविधा-
स्यात्पदोपमा । यासमासोपमातत्रचतुर्द्धासाभिपद्यते ॥
॥८॥ इवार्थान्तर्गतेरेकासामान्यान्तर्गतेःपरा । अन्तर्भूतो
भयार्थान्यासान्यासर्वसमासभाक् ॥९॥ तास्वन्तर्भूतेवा-
र्थायथा । मुखमिन्दुसुन्दरन्ते बिसकिसलयकोमले भु-
जालतिके । जघनस्थलीचसुन्दरि तवशैलशिलाविशाले-

*सतुल्ययोगितोलेश इति । विशिष्टस्यान्वये प्रतीयकसम्प्राप्यन्वितत्वाच्चतुर्विंशतित्व-
मविरुद्धम् । एवमन्यत्रापि ।

यम् ॥ अत्रेन्दुरिवसुन्दरमिन्दुसुन्दरमितीवार्थ [उपमानानिसामान्यवचनैः] इति समासेनैवोक्तः । एवंबिसकिसलयइव कोमले शैलशिलेवविशालेति । सेयमन्तर्गते वार्थानामसमासोपमासु पदोपमाभक्तिः ॥ १ ॥ अन्तर्भूतसामान्यायथा । चन्द्रसरिसम्मुहंसे भ्रमभ्रसरिच्छो भ्रमुहरसोविस्सो । सकअग्गहरहसुज्जलचुम्बनङ्कस्ससरिसंसे * ॥ अत्र चन्द्रेणसदृशञ्चन्द्रसदृशम्मुखम् , भ्रमृतेन सदृक्षो ऽमृतसदृक्षोमुखरस, इति समासे सुन्दरमधुरादि सामान्यशब्दप्रयोगोनश्रूयते । प्रतीयते च सदृशादिद्योतकादितिसामान्यधर्मस्य सौन्दर्यमाधुर्यादेरुपमानेप्रसिद्धस्योपमेये समासेनैव प्रतिपादितत्वादियमन्तर्भूतसामान्यानामसमासोपमासुपदोपमाभक्तिः ॥ २ ॥ अन्तर्भूतोभयार्थायथा । कमलकरारम्भोरूःकुवलअणअणा मिअङ्कवअणासा । कहणुणवचम्पअङ्गीमुणालबाहूपिआतवइ * ॥ अत्र कमलमिवताम्रौरम्भेइवपीवरौकुवलयमिवश्यामेमृगाङ्क इवप्रेक्षणीयन्नवचम्पकमिवगौरम्मृणालमिवकोमलौकरावूरूनयने वदनमङ्गम्बाहूयस्याः सातथोक्तेत्यन्यपदार्थेन समासेनैव द्योतकसामान्ययोरुक्तत्वादियमन्तर्भूतेव सामान्यानामसमासोपमासुपदोपमाभक्तिः ॥ ३ ॥ सर्वसमासायथा । शरदिन्दुसुन्द-

*चन्द्रसदृशं मुखमस्या अमृतसदृक्षश्च मुखरसोप्यस्याः।सकचग्रहरभसोज्ज्वलचुम्बनं कस्य सदृशं स्यात् ।

*कमलकरारम्भोरूः कुवलयनयना मृगाङ्कवदना सा । कथं नु नवचम्पकाङ्गीमृणालबाहुः प्रिया तपति । तापयतीत्यर्थः । अन्तर्भावितण्यर्थोऽत्र तपतिः ।

रमुखी कुवलयदलदीर्घलोचनासामे । दहति मनः कथ-
मनिशंरम्भागर्भाभिरामोरूः ॥ अत्रोपमानोपमेयधर्मा-
णामिन्दुसुन्दरादिपदैरिवार्थस्य समासेनैवाभिधानं सर्वं
समासेऽस्याइति सर्वसमासोपमानामेयं समासोपमासु प-
दीपमाभक्तिः ॥४॥ याप्रत्ययोपमेख्युक्ताकाव्यविद्भिःपदो-
पमा ॥ चतुर्द्धाभिद्यते सापिप्रत्ययार्थप्रभेदतः ॥ १० ॥
प्रत्ययोह्य पमेयेस्यादुपमानेपि कञ्चन । तत्सामान्येश-
वेत्कञ्चिदिवार्थेकञ्चिदिष्यते ॥११॥ तेषांवशात्तदुपमाभवे-
त्तद्व्यपदेशभाक् । उदाहरणमेवास्या रूपव्यक्तयैनिदर्श्यते-
॥१२॥तत्रप्रत्ययस्योपमेयस्यार्थेयथाहंसोध्वाङ्क्षविरावी-
स्यादुष्ट्रक्रोशीचक्रोकिलः । खरनादीमयूरोपित्वञ्चेद्वदसि-
वाग्ग्मिनि । अत्र[कर्त्तर्युपमाने]इत्यनेनयदोपमानेउपप-
देध्वाङ्क्षइवविरौतीति सामानाधिकरण्येनकर्तर्यवप्रत्य-
यस्तदोपमेयस्यार्थेभवति । एवमुष्ट्रक्रोशीखरनादीत्येतयो-
रपि द्रष्टव्यम् । सेयमुपमेयार्थप्रत्ययानामप्रत्ययोपमासु
पदीपमाभक्तिः ॥५॥ प्रत्ययस्योपमानार्थे यथा । पूर्णेन्दु-
कल्पवदनामृणालीदेश्यदोर्लता । चक्रदेशीयजघना सा
स्वर्गेपि न दृश्यते ॥ अत्र पूर्णेन्दुरिव पूर्णेन्दुरित्यादिक-
योपचारकृत्या यद्यपि पूर्णेन्दुप्रभृतय उपमानशब्दा अ-
प्युपमेयेषु वदनादिषु वर्त्तन्ते तेभ्यश्चयद्यपिस्वार्थेएव-
स्वार्थिकाःकल्पबादयोभवन्ति । तथापिते शब्दशक्तिस्वा-
भाव्याद्गुणभूतमुपमानार्थमात्रम्ब्रुवते । यथाशुक्लादिभ्य-
स्तरबादयः । तथाहयऽयं शुक्लोऽयञ्चशुक्लोयमनयोःशुक्ल-

तरइत्युक्तेशौक्ल्यस्यैव प्रकर्षोगम्यते। नशौक्ल्यवतः। से-
यमुपमानार्थप्रत्ययानाम प्रत्ययोपमासु पदोपमाभक्तिः
॥६॥सामान्यार्थप्रत्ययेनयथा। सूर्यीयतिसुधारश्मिरना-
थातिमृतायते। मृतस्यकान्ताविरहे स्वर्गोपिनरकीयति॥
अत्र [उपमानादाचारे] इत्यादिभिःसूर्यादिभ्यः क्यजादय
आचारलक्षणक्रियाविशेष उत्पद्यमाना नोपमेययोः सामा-
न्यएवोत्पद्यन्तइति सेयं सामान्यार्थप्रत्ययानाम प्रत्ययो-
पमासुपदोपमाभक्तिः ॥ ७॥ इवार्थप्रत्ययेनयथा। एक
एवहि भूतात्मा भूते भूते व्यवस्थितः। एकधावहु-
धाचैव दृश्यते जलचन्द्रवत्॥ अत्र [तेनतुल्यं क्रिया-
चेद्वतिः] इत्यनेन चन्द्रशब्दाच्चन्द्रेण तुल्यन्दृश्यत इती-
वार्थएवप्रत्ययो नतु तुल्यक्रियार्थे ऽन्यथादृश्यत इति इ-
वार्थइव तुल्यक्रियाप्रयोगोपि न स्यात्। तदप्रयोगेपि च
गौरिवगवय इत्यादौवतिः प्रसज्येत। सेयमिवार्थ प्रत्य-
यानाम प्रत्ययोपमासुपदोपमाभक्तिः ॥८॥ वाक्योपमा
तुया तत्र द्वैविध्यंसाऽपिगच्छति। एकापदार्थयोः सा-
म्ये परावाक्यार्थयोर्मिथः ॥ १३ ॥ आद्यापूर्णाचलुप्ताच-
लुप्तपूर्णातथैवच। पूर्णलुप्तेति चाख्याता कविमुख्यैश्चतु-
र्विधा॥१४॥ तत्र। पूर्णासामान्यधर्मस्य प्रयोगेद्योतकस्य-
च। उपमानस्य च भवेदुपमेयस्यचैवहि ॥ १५ ॥ यथा।
कमलमिवचारुवदनम्मृणालमिवकोमलम्भुजायुगलम्।
अलिमालेवसुनीलातथैवमदिरेक्षणेकबरी ॥ अत्रकमल-
मृणालालिमालादीनामुपमानद्योतकतुल्यधर्मोपमेयवा-

वकानाञ्चतुर्णामपि पदानाम्पृथक्पृथक्प्रयोगे पदार्थयोः सादृश्यस्याभिधीयमानत्वादियम्पूर्णानामपदार्थोपमासु वाक्योपमाभक्तिः ॥ ९ ॥ लोपेसामान्यधर्मस्यद्योतकस्य वयोपमा । प्रतीयमानसादृश्ये द्वयोर्लुप्तेतितांविदुः ॥१६॥ यथा । नपद्मम्मुखमेवेदन्न भृङ्गौचक्षुषी इमे । नकेसरा णिकान्तायाइमास्तादन्तपङ्क्तयः ॥ अत्रकान्तामुखादा वुपमेयेपद्मादिविपर्ययज्ञानप्रत्याख्यानेन इवादीनाम भावेपि कान्त्यादिलुप्तधर्मप्रतीतेर्लुप्तानामेयम्पदार्थोप मासुवाक्योपमाभक्तिः ॥ १० ॥ लोपेसामान्यधर्मस्य लु प्तपूर्णेतिगद्यते॥यथा । राजीवमिवतेवक्त्रन्नेत्रेनीलोत्पले इव । रम्भास्तम्भाविवोरूच करिकुम्भाविवस्तनौ ॥ अत्र सामान्यधर्मेलुप्तेपि प्रतीयमानसादृश्यादेवपदार्थयोरुप मानोपमेयभावस्य परिपूर्णत्वे लुप्तपूर्णानामेयम्पदार्थो पमासुवाक्योपमाभक्तिः ॥११॥ द्योतकस्य तु लोपेयापू र्णलुप्तेति सास्मृता ॥ १७ ॥ यथा । स्वन्मुखम्पुण्डरीक ञ्चफुल्लेसुरभिगन्धिनी* । कोमलापाटलौतन्त्रिपल्लवश्चाध रश्चते ॥ अत्रतन्त्रेण सदृशयोरनभिधानात्सादृश्यस्यपुन रुपमानोपमेयभावविवक्षितेनश्लेषतोन्यत्वेसतीतरेतरयो गेनोपमानोपमेययोरेकशेषेणचतद्विशेषणयोः समुदाये नाभिधानादिवादिमन्तरेणापिउपमानादीनाञ्चतुर्णामपि पूर्णत्वेसत्युक्तार्थत्वादिवादिर्लुप्यतइति पूर्णलुप्तानामेय म्पदार्थोपमासु वाक्योपमाभक्तिः ॥ १२ ॥ यातुवाक्या-

*गन्धसेप्रदुत्यूतिसुसुरभिभ्य इति इकारादेशः ।

र्थयोः साऽपिचतुर्द्वैकेवशब्दिका । नैकेवशब्दिकेवादि-
शून्यावैधर्म्यवत्यपि॥१८॥तास्वेकेवशब्दायथा। पाण्डोय-
मंसार्पितलम्बहारः क्रूप्राङ्गरागोहरिचन्दनेन । आभाति-
बालातपरक्तसानुः सनिर्झरोद्गारइवाद्रिराजः ॥ अत्र-
हिमवत्पाण्डययोर्निर्झरहारयोर्बालातपहरिचन्दनयोश्च प-
रस्परमुपमानोपमेयविवक्षायां विशेषणविशेष्यभावप-
रिकल्पनेन वाक्यार्थयोर्द्वयोरेवकल्पितत्वादेकेनैवेवशब्दे-
नतयोःपरस्परमुपमानोपमेयभावोऽभिहित इतीयमेके-
वशब्दानामवाक्यार्थोपमासुवाक्योपमाभक्तिः ॥ १३ ॥
अनेकेवशब्दायथा । दिनेदिने सापरिवर्द्धमानालब्धो-
दयाचान्द्रमसीवरेखा॥ पुपोषलावण्यमयान्विशेषाञ्ज्यो-
त्स्नान्तराणीवकलान्तराणि॥ अत्रक्रियापदस्यवाक्यार्थ-
द्वयैकतापत्तिहेतोः सकर्मकत्वात्कर्त्तुः कर्मणश्चोपमाना-
त्पृथगिवशब्दप्रयोगइतिसेयमभिधीयमानसादृश्या ऽने-
केवशब्दानामवाक्यार्थोपमासु वाक्योपमाभक्तिः ॥ १४॥
अनिवादिशब्दायथा । दिवोजागर्त्ति रक्षायै पुलोमारि-
र्भुवोभवान् । असुरास्तेन हन्यन्ते सावलेपानृपास्त्वया ॥
अत्रपुलोमारिवर्णनीययोर्द्यावाभूम्योरसुराणामवलिप्त-
पार्थिवानाञ्च तुल्यक्रियासमावेशादिवादिमन्तरेणापि-
वाक्यार्थानाम्परस्परमुपमानोपमेयभावोऽवगम्यत इ-
तीयमनिवादिशब्दानामवाक्यार्थोपमासु वाक्योपमाभ-
क्तिः ॥ १५ ॥ वैधर्म्यवतीयथा । प्रहितः प्रधनायमाध-
वानहमाकारयितुम्महीभुजा । नपरेषुमहौजसश्छला-

दृपकुर्वन्ति मलिम्लुचा*इव॥अत्रसत्यप्युपमानेसत्यप्युपमेयेसत्यपिचेवशब्देमहौजसाम्मलिम्लुचानाञ्चयौ ऽयञ्छलापकरणन्नामवस्तुधर्मः सउपमान एव नञानियम्यत इति वैधर्म्यवतीनामेयं वाक्यार्थौपमासुवाक्यौपम्यभङ्गिः ॥१६॥ यत्रोक्तिभङ्ग्यावाक्यार्थसादृश्यमवगम्यते। वाक्यार्थयोर्विस्तरतः साप्रपञ्चोपमेष्यते ॥ १९ ॥ सातुप्रकृतरूपास्याद्रूपेणविकृतातथा ॥ तयोः प्रकृतरूपासाविज्ञेयाचचतुर्विधा ॥ २० ॥ स्यात्समस्तोपमातद्वदेकदेशोपमापरा ॥ मालोपमातृतीयास्याच्चतुर्थीरसनोपमा ॥ २१ ॥ तासुसमस्तोपमायथा । अलिवलयैरलकैरिवकुसुमस्तबकैः स्तनैरिववसन्ते । भान्तिलताललनाकृपाणिभिरिवकिशलयैरधिकम् ॥ अत्रवसन्तलक्ष्मीपरिष्कृतलतानां ललनानाञ्चप्रतीयमानसादृश्यानामुपमानोपमेयभावविवक्षायां येयमलिवलयादिभिरलकादीनाम्प्रतीयमानसादृश्यानामेव पृथक्पृथगिवशब्दप्रयोगवतीतिविस्तारेणावयविनोऽवयवानाञ्चेति सामस्त्येनवाक्यार्थयोरौपम्यभङ्गिः।सेयंसमस्तोपमानामप्रकृतरूपोपमासुप्रपञ्चोपमाभक्तिः॥१७॥ एकदेशोपमायथा॥कमलदलैरधरैरिवदशनैरिवकेसरैर्विराजन्ते। अलिवलयैरलकैरिवकमलैर्वदनैरिवनलिन्यः ॥ अत्रनलिनीनां विलासिनीनाञ्च परस्परमुपमानोपमेयभावेवक्तव्ये विलासिनीलक्षणमुपमानार्थमेवावयवान्तराणिचयानिस्तनादयुपमेया-

*मलिम्लुचाश्चौराः ।

नितानिपरित्यज्यकमलमेवैकन्तदवयवैर्दलादिभिः सहा-
धरादिभिरुपमानैः पृथक्पृथगिवप्रयोगाद्विस्तरेणोपमिते
तेनेयमेकदेशोपमानामप्रकृतरूपोपमासु प्रम्पञ्चोपमाभ-
क्तिः॥१८॥मालोपमायथा।सोहव्वलक्खणमुहंवणमालव्व-
विअलंहरिवइस्सउरम्। कित्तिव्वपवणतणअं आणव्वव-
लाइसेविलग्गइदिठ्ठी*॥अत्ररामदृष्टेर्लक्ष्मणमुखादिवि-
निवेशिन्याः शोभाद्युपमानमालया प्रतीयमानसादृश्य-
या विस्तरेणोपमितेर्मालोपमानामेयम्प्रकृतरूपोपमासु
प्रपञ्चोपमाभक्तिः ॥१९॥ रसनोपमा यथा। चन्द्रायतेशु-
क्लरुचाथहंसो हंसायते चारुगतेन कान्ता। कान्तायते
स्पर्शसुखेन वारि वारीयते स्वच्छतया विहायः॥ अत्र
चन्द्रादीनां शौक्ल्यादिभिरभिधीयमानसादृश्यैर्हंसादिभि-
र्यं रसनान्यायेन पश्चाद्वलनया विस्तरवती हेतुमती च
प्रत्ययोपमापङ्क्तिस्तयैहैकवाक्यताकरणेन शरद्रमणीय-
तोयवर्णनमिति सेयं रसनोपमानामप्रकृतरूपोपमासुप्र
पञ्चोपमाभक्तिः ॥२०॥ इतीमास्ताश्चतस्रोपिरूपेण प्रकृते-
नयाः। उपमानाञ्चतस्रोन्याविकृतेन प्रचक्षमहे॥ २२॥
विपर्यासोपमा तासु प्रथमाथोभयोपमा। अथोत्पाद्यो-
पमानामतुरीया ऽनन्वयोपमा॥२३॥ तासु विपर्यासोप-
मा यथा। यत्त्वन्नेत्रसमानकान्ति सलिले मग्नन्तदिन्दी-
वरं मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी।

शोभेव लक्ष्मणमुखं, वनमालेव विकलं हरिवरसूनोः। कीर्तिरिव पवनतनय-
यमाग्नेव बलान्यस्य विलग्ना दृष्टिः।

यैपि त्वद्गमनानुसारिगतयस्ते राजहंसा गतास्त्वत्साह-
श्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥ अत्र नेत्रादी-
नामुपमेयत्वमिन्दीवरादीनामुपमानत्वमितिप्रसिद्धौयेय-
मऽत्यनुरागान्नेत्रादिष्वाधिक्यबुद्धिर्नाऽत्यनुरागादिन्दी-
वरादिषु तदनुकारबुद्धिस्तयेह रामेण विरहिणाऽभिधीय-
मानसादृश्यानाममीषाम्परस्परमुपमानोपमेयभावः प्र-
सिद्धेर्विपर्यासेन कल्पित इति सेयं विपर्यासोपमानाम
विकृतरूपोपमासु प्रपञ्चोपमाभक्तिः१ ॥२१॥ उभयोपमा
यथा । तवाननमिवाम्भोजमम्भोजमिव ते मुखम् । नि-
लीनान्नलिनीखण्डे कथन्नुत्वां लभेमहि ॥ अत्राप्यत्य-
न्तसादृश्यादेकस्मिन्पक्षे प्रसिद्धेर्विपर्यासइति सेयम्प्रतीय-
मानसादृश्योभयोपमानामविकृतरूपोपमासुप्रपञ्चोपमा-
भक्तिः ॥२२॥ उत्पाद्योपमा यथा । उभौ यदि व्योम्नि पृ-
थक् प्रवाहावाकाशगङ्गापयसः पतेताम् । तदौ२पमीयेत
तमालनीलमामुक्त मुक्तालतमस्यवक्षः ॥ अत्रोपमानार्थ-
मुत्पाद्योपमेयेन प्रतीयमानमभिधीयमानंच सादृश्यम-
भिहितमिति सेयमुत्पाद्योपमानामविकृतरूपोपमासुप्र-
पञ्चोपमाभक्तिः ॥२३॥ अनन्वयोपमा यथा । त्वन्मुख-
न्त्वन्मुखमिवत्वद्दृशौ त्वद्दृशाविव । त्वन्मूर्तिरिव मू-
र्तिस्ते त्वमिवत्वं कृशोदरि ! ॥ अत्र त्वमेवेदृशी नाऽन्या

१यद्यपि केचित्प्रसिद्धोपमानोपमेयप्रातिलोम्यात्प्रतीपालङ्कारमाद्रियन्तेतथापि प्रतीपभेदानामुपमालङ्कारान्तर्भूतत्वेनाऽपालङ्कारान्तर्भूतत्वेनच पृथगलङ्कार-त्वं नाश्रयणीयमेवमनन्वयादिष्वपीति तात्पर्यम् ।

२तदौपमीयेतेति । उपलभ्यमानमाघपुस्तकेषु "तेनोपमीयेतेति" पाठो दृश्यते तस्यचाऽयमर्थः । तेनब्योम्ना उपमीयेत समीक्रियेत इति ।

त्वत्सदृशीत्यऽनन्वयेसति उपमानोपमेयभावविवक्षयैक-
स्यापि वस्तुनोभेदमुपकल्प्य प्रतीयमानसादृश्यमौपम्ये-
नाभिहितमिति सेयमनन्वयोपमानामविकृतरूपोपमा-
सुप्रपञ्चोपमाभक्तिः ॥२४॥१॥ इत्युपमालङ्कारनिरूपणम् ॥
यदोपमानशब्दानाङ्गौणवृत्तिव्यपाश्रयात्। उपमेयेभवेद्वृ-
त्तिस्तदातद्रूपकंविदुः॥२४॥शब्दार्थोभय१ भूयिष्ठभेदात्त्रे-
धातदुच्यते। शब्दभूयिष्ठमेतेषु प्रकृतं विकृतन्तथा ॥२५॥
अर्थभूयिष्ठमप्याहुः प्राधान्येङ्ग्यङ्गयोर्द्विधा। द्विधैवोभ-
यभूयिष्ठं शुद्धसङ्कीर्णभेदतः॥२६॥ चतुर्द्धाप्रकृतन्तेषुशब्दभू-
यिष्ठमुच्यते। समस्तं व्यस्तमुभयं सविशेषणमित्यपि॥२७॥
तेषुसमस्तं यथा। पाणिपद्मानिभूपानांसङ्कोचयितुमीशते।
त्वत्पादनखचन्द्राणामर्चिषः कुन्दनिर्मलः। अत्र[उपमितं
व्याघ्रादिभिःसामान्याप्रयोगे]इतिसमासेपद्मानीवपद्मा-
निचन्द्राइवचन्द्राइत्यभेदोपचारेणोत्पन्नसादृश्यात्पाणी-
नान्नखानाञ्चपद्मचन्द्रादिभिरऽभिधानेसामान्येवादिश-
ब्दा२ऽप्रयोगादुपमानार्थस्तिरोभूतइति सोऽयङ्गौणशब्द-
व्यपाश्रयः समासहेतुकः समस्तं रूपन्नामप्रकृतरूपके-
षुशब्दभूयिष्ठरूपकभेदः॥१॥ व्यस्तंयथा। अङ्गुल्यः प-
ल्लवान्यासन्कुसुमानिनखार्चिषः। बाहूलते वसन्तश्री-
स्त्वं न्नःप्रत्यक्षचारिणी॥अत्रापिपूर्ववत्पल्लवकुसुमलता-
वसन्तश्रीशब्दानाङ्गुणवृत्त्याश्रयेणाऽङ्गुलीनखार्चिर्बाहू-

१उभयेति।शब्दार्थेत्यर्थः। २सामान्येति। सामान्यस्योभयनिष्ठधर्मस्य रक्त-
त्वशुभ्रत्वादिकस्य इवशब्दस्य चेत्यर्थः।

वर्णनीयनायिकाभिः सह सामानाधिकरण्यात्सामान्ये-
वादिशब्दाप्रयोगाच्चतिरोभूतेप्युपमानार्थं समासोनक्त-
तद्धित्यसमस्तरूपन्नामप्रकृतरूपकेषुशब्दभूयिष्ठरूपकभे-
दः ॥ २ ॥ समस्तव्यस्तंयथा । स्मितम्मुखेन्दौज्योत्स्ना-
ते प्रभाम्बुकुचकुम्भयोः । दोर्लतापल्लवेपाणौपुष्पंसखि
नखार्चिषः ॥ अत्र मुखेन्दोः स्मितमेवज्योत्स्ना,कुचकु-
म्भयोः प्रभैवाऽम्बु,दोर्लतयोः पल्लवभूते पाणौ नखार्चि-
षएव पुष्पमिति समस्तानामसमस्तानाञ्चगौणशब्दा-
नामुपमातिरस्कारेण दर्शितत्वादिदं समस्तव्यस्तरूप-
न्नामप्रकृतरूपकेषुशब्दभूयिष्ठरूपकभेदः ॥ ३ ॥ सविशे-
षणंयथा । हरिपादः शिरोलग्नजह्नुकन्याजलांशुकः ॥
जयत्यसुरनिः शङ्कसुरानन्दोत्सवध्वजः ॥ अत्रयथोक्तवि-
शेषणविशिष्टोयोहरिपादो, यश्च हरिहतासुरेभ्योनिःश-
ङ्कानां सुराणामानन्दोत्सवेध्वजस्तयोः सविशेषणयोरेव-
प्रतीयमानसादृश्ययोः परस्परमुपमानोपमेयभावइति
सविशेषणन्नामप्रकृतरूपकेषुशब्दभूयिष्ठरूपकभेदः। तदे-
तच्चतुष्टयमपिप्रकृतसमासादिशब्दैर्निबद्धमितिप्रकृतमुच्य-
ते॥४॥चतुरोविकृतस्यापिप्रभेदान्प्रतिजानते॥परम्परार्थर-
शनामालारूपकरूपकम्२८॥तेषुपरम्परा यथा । ववसा-
अरइपओसोरोसगइन्ददिढसिङ्खलापडिबन्धो । कहक-
हंविदासरहिणो जअकेसरिपञ्जरोगओघणसमओ*।अ-

* व्यवसायरविप्रदोषोरोषगजेन्द्रदृढशृङ्खलाप्रतिबन्धः । कथङ्कथमपि दाश-
रथेर्जयकेसरी पञ्जरगतो घनसमयः ॥

त्रदाशरथिसम्बधिनोव्यवसायस्य रविणा रोषस्य गजेन्द्रेण जयस्य केसरिणा सहोपमानोपमेयभावकल्पनया यदेकं रूपणमऽथैतत्सम्बन्धितयाप्रदोषशृङ्खलाप्रतिबन्धपञ्जराणान्द्वितीयन्तत्त्रयाणामपि घनसमयेन तृतीयं तेनेयं रूपकपरम्परानामविकृतरूपकेषुशब्दभूयिष्ठरूपकभेदः ॥५॥ रशनायथा। किशलयकरैर्लतानाङ्कुरकमलैर्मृगदृशाञ्जगज्जयति। नलिनीनाङ्कमलमुखैर्मुखेन्दुभिर्योषितां मदनः ॥ अत्रकिशलयकरैः करकमलैः कमलमुखैर्मुखेन्दुरितिरशनाक्रमेणशब्दानां सन्दर्भ उपलभ्यमानस्तदर्थानांमनोभुवोजगद्विजयेलतादिसंबन्धात्करणभावमनुमापयतीतिरशनानामैतद्विकृतरूपकेषुशब्दभूयिष्ठरूपकभेदः ॥ ६ ॥ मालायथा। स्वामीदुर्नयवारणव्यतिकरेशौर्योपदेशेगुरुर्विस्रम्भे हृदयन्नियोगसमयेदासोभयेचाग्रयः। दातासप्तसमुद्रसीमरशनादामाङ्कितायाः क्षितेः सर्वाकारमहो स्वयंवरसुहृत्कोवानकर्णीमम ॥ अत्रस्वाम्यादीनां मालोपमादिक्रमेणनिरूपितत्वान्मालारूपकन्नामविकृतरूपकेषुशब्दभूयिष्ठरूपकभेदः ॥७॥ रूपकरूपकंयथा। मुखपङ्कजरङ्गे स्मिन्भ्रूलतानर्तकीतव। लीलानाट्याऽमृतं दृष्टौसखि! यूनांविषिञ्चति ॥ अत्रमुखमेवपङ्कजन्तदेवरङ्गो भ्रूरेवलतासैवनर्तकी लीलैवनाट्यं तदेवामृतमितिरूपितानामपिरूपणेनसमासेनरूपकरूपकन्नामायंविकृतरूपकेषुशब्दभूयिष्ठरूपकभेदः।तदेतच्चतुष्टयमपि परंपरादिभिर्विकृतसमासादिशब्दैर्निबद्धमिति-

विकृतमुच्यते॥८॥समस्तज्ञासमस्तं च युक्तज्ञायुक्तमेवच।
चतुर्द्धाङ्गिप्रधानंस्यादर्थभूयिष्ठरूपकम्॥३९॥ तेषुसमस्तंय
था।ताम्राङ्गुलिदलश्रेणिनखदीधितिकेसरम्।ध्रियतेमूद्ध-
र्ध्नि भूपालैर्भवच्चरणपङ्कजम्॥ अत्रसमस्तोपमायामिवपा-
दाख्यःपङ्कजाख्यश्चावयवीपरस्परमुपमानोपमेयभूतः प्र-
तीयमानाभिधीयमानसादृश्यैरङ्गुलिश्रेणिनखदीधितिमि
र्दलश्रेणिकेसरैश्च सह सामस्त्येनरूपितस्तद्भोग्यस्थानवि-
न्यासेनचार्थस्यप्राधान्यमभिहितमितिसमस्तन्नामरूपक-
मिदमङ्गिप्रधानरूपकेष्वर्थभूयिष्ठरूपकभेदः। नचैतद्वाच्य-
म्। पाणिपद्मानिभूपानामित्यादेरुदाहरणादिदन्नभि-
द्यत इति। तत्रहि। वाक्ये नखार्चिषां क्रियासमावेशेन
प्रधान्यमवगम्यते ननखचन्द्राणान्ततश्चनरूपकम्। पा-
णिपद्मेत्यस्यतुयद्यपिसङ्कोचक्रियायामस्तिसमावेशस्त-
थापिनतानिवर्णनीयत्वेनउपन्यस्तानि। अपितुजिगी-
षुभाववर्णनाङ्गतया। अतः समावेशमात्रमणनान्नतत्र
पाणिपद्मानान्नाऽपिनखचन्द्राणामर्थप्राधान्यमपितु श-
ब्दप्राधान्यमेव। इहतुचरणपङ्कजताम्राङ्गुलिदलश्रेण्या-
दिविशेषणविशिष्टस्य भूपालमौलिविनिवेशनेन प्राधा-
न्यम्प्रतीयतइति उभयमपि निरवद्यम्॥९॥असमस्तं यथा।
अकस्मादेवते चण्डि! स्फुरिताधरपल्लवम्। मुखम्मुक्तारु-
चौ धत्ते घर्माम्भःकणमञ्जरीः॥ अत्राप्येकदेशोपमाक्रमे-
णाऽधरपल्लवस्वेदाम्बुकणमञ्जरीणां सहजाहार्यावयवा-
ऽनभिधानादुपमानावयविनश्चाऽनभिधानादिदमसमस्त

ननामरूपकमङ्गिप्रधानेष्वर्थभूयिष्ठरूपकभेदः । अत्राऽपिच मुख्यवस्तुनः स्फुरिताधरपल्लवमिति विशेषणविशिष्टस्य घर्माम्भःकणमञ्जरीधारणक्रियासमावेशः प्राधान्यं स्थापयति ॥१०॥ युक्तं यथा । स्मितपुष्पोज्ज्वलं लोलनेत्रभृङ्गमिदम्मुखम् । न कस्य नन्दनं सुभ्रूः ! सुरभिश्वसितानिलम् ॥ अत्रस्मितपुष्पोज्ज्वललोलभृङ्गसुरभिश्वसितानिलन्तेमुखन्न कस्य नन्दनमिति पुष्पभृङ्गादीनां परस्परं युक्तुयपपत्तेर्युक्तन्नामायमङ्गाङ्गिप्रधानरूपकेष्वर्थभूयिष्ठोरूपकभेदः । अत्र यद्यपि नन्दनमिवनन्दनमिति गौणवृत्तिव्यपाश्रयः शब्द एव समस्तविशेषणैः परिष्क्रियते तथापि नन्दयतीति कृदभिहितक्रियासमावेशे मुखाख्यस्यैव वस्तुनः प्राधान्यमवगम्यते । तस्य त्वपह्नियत इत्यर्थप्रधानमेवैतत् ॥११॥ अयुक्तं यथा । इदमार्द्रस्मितज्योत्स्नं स्निग्धनेत्रोत्पलम्मुखम् । जगन्नेत्रेन्दुरस्माकङ्कृतं तापाय १ कल्पते ॥ अत्र ज्योत्स्नोत्पलयोरयोगाज्जगन्नेत्रेन्दोश्चमुखस्य सन्तापाकारणमिदमयुक्तन्नामाङ्गिप्रधानरूपकभेदेष्वर्थभूयिष्ठरूपकभेदः । अत्रापि पूर्ववन्मुखाख्यवस्तुनोविशेषणैः परिष्करणमिति तस्यैव प्राधान्यमवगम्यते॥१२॥ भेदानङ्गप्रधानस्य चतुरोऽवयवाश्रयान् ॥ सहजाहार्यतद्योगतद्वैषम्यैः प्रचक्षते ॥३०॥ तेषु सहजावयवं यथा । पप्फुरिअउठ्ठदलन्तक्खणविग्गलि

१ तापायेति । क्रुपिसंपद्यमानेचेति चतुर्थी ।

अरुहिरमहुविच्छडम् । उक्खडिअकण्ठनालम्पडिअम्फु-
ट्टदसणकेसरम्मुहकमलम् १॥ अत्रौष्ठादीनां दलादीनाञ्च
मुखाम्भोजावयवानां स्फुरितविगलितोत्खण्डितस्फुट-
विशेषणविशिष्टानां परस्परमुपमानोपमेयभावरूपिता-
नाम्मुखपक्षे कमलपक्षेच सहजत्वङ्गम्यतइति सहजाव-
यवो नामायमङ्गप्रधानरूपकेष्वर्थभूयिष्ठरूपकभेदः । नैत-
द्वाच्यम् । ताम्राङ्गुलिदलश्रेणीत्यादेरर्थप्रधानभेदादिदन्न
भिद्यते इति । तत्र हि भूपालमौलिधारणक्रियासमावेशे-
नावयविनः प्राधान्यं विवक्षितमिहतुपतनक्रियायामव-
यवानामतएव ते स्फुरितादिविशेषणैर्विशिष्यन्ते ॥ १३ ॥
आहार्यावयवं यथा । तोकुम्भश्रणपडिवश्रणदण्डपरिघ-
ट्टिआमरिसघोरविसो । गलिअंसुश्रणिम्मोओजाओ
भीसणश्ररोदसाणणभुअङ्गो १॥ अत्र कुम्भकर्णप्रतिवचन-
ममर्षोंशुकमितिदशाननपक्षेदण्डोघोरविषनिर्मोक इति
भुजगपक्षेऽवयवास्तेषामाहार्यत्वादिदमाहार्यावयवन्नाम-
रूपकमङ्गप्रधानरूपकेष्वर्थभूयिष्ठरूपकभेदः । अत्रापि कु-
म्भकर्णसम्बन्धपरिघट्टितगलितविशेषणविशिष्टानामव-
यवानामेवदशाननभुजगभीषणतरीकरणक्रियायाम्प्राधा-
न्यमवगम्यते ॥ १४ ॥ उभयावयवं यथा । यस्यावी-

१ प्रस्फुरितोष्ठदलं तत्क्षणविगलितरुधिरमधुवितीर्णं च । उत्खण्डितकण्ठ-
नालपतितं स्फुटितदशनकेशरं सुखकमलम् ।

२ सकुम्भकर्णप्रतिवचनदण्डपरिघट्टनामर्षघोरविषः । गलितांशुकनिर्मोको
जातो भीषणनरो दशाननभुजगः ।

जमहङ्कृतिर्गुरुतरोमूलम्ममेतिग्रहोनित्यत्वस्मृतिरङ्कुरः सुतसुहृद्भृत्यादयः पल्लवाः । स्कन्धोदारपरिग्रहः परिभवः पुष्पं फलं दुर्गतिः सा मे त्वच्चरणार्हणापरशुना तृष्णालता लूयताम्॥ अत्र बीजम्मूलमङ्कुरः पुष्पम्फलमिति लतापक्षे सहजास्तृष्णापक्षे पुनरहंकृत्यादय आहार्यावयवा इति तदिदं सहजाहार्याणामवयवानाम्परस्परमुपमानोपमेयभावरूपणेनोभयावयवन्नामरूपकमिदमङ्गप्रधानरूपकेष्वर्थभूयिष्ठरूपकभेदः । अत्रापि चाहङ्काराममताप्रौव्यस्मरणसुतादिदारपरिग्रहपराभवदुर्गतीनामवयवानामेवबीजादिरूपेण रूपितानाम्भगवदाराधन कुठारेण तृष्णालतालूयतामिति प्रार्थनक्रिययया समावेशेन प्राधान्यमवगम्यते ॥ १५ ॥ विषमावयवं यथा । मदरक्तकपोलेन मन्मथस्त्वन्मुखेन्दुना । नर्त्तति भ्रूलतेनालम्मर्द्दितुम्भुवनत्रयम् ॥ अत्रेन्दुनामुखावयवीरूपितो भ्रुवौ च तदवयवौलतावयविभ्याम्मदरक्तौतु कपोलौनकेनाऽपीति सर्वतोवैषम्याद्विषमावयवन्नाम रूपकमिदमङ्गप्रधानरूपकेष्वऽर्थभूयिष्ठरूपकभेदः । अत्रापि मदरक्तनर्त्तितयोः कपोलभ्रुवोरेवमन्मथस्य जगत्त्रितयमर्द्दनक्रियायाम्प्राधान्यं साधकतमत्वङ्गम्यते ॥ १६ ॥ प्राधारवन्निराधारङ्केवलं व्यतिरेकि च ॥ इति शब्दार्थभूयिष्ठं शुद्धमाहुश्चतुर्विधम् ॥ ३१ ॥ तेष्वाधारवदथा । सोहइविसुद्धकिरणो गअणसमुद्दम्मिरअणिवेलालग्गो । तारामोत्तापअरो फुडविहडि अमेहसिप्पि-

सम्पुडविमुक्को १ ॥ अत्र समुद्रत्वेन रूपितङ्गगनमाधार-
म्परिकल्प्य रजनिमेघतारकौघानां वेलाशुक्तिमुक्ताफल
प्रकराणाञ्च प्रतीयमानाऽभिधीयमानसादृश्यानां शब्द-
प्राधान्यतोऽर्थप्राधान्यतश्च रूपणङ्कृतमिति आधारव-
द्नामरूपकमिदं शुद्धरूपकेषु शब्दार्थभूयिष्ठरूपकभेदः॥१७॥
निराधारं यथा । वणराइकेसहत्थाकुसुमाउह सुरहि
सञ्जरन्तधअवडा । ससिअरमुहुत्तमेहा तमम्पडिहत्था-
विणेत्ति धूमुप्पीडा २॥ अत्र धूमोत्पीडानां वनराजिके
शहस्तत्वेन कुसुमायुधसुरभिसञ्चरद्ध्वजपटत्वेन शशि
करमुहूर्त्तमेघत्वेनतमःप्रतिहस्तत्वेन च रूपितानान्नि-
राधाराणामेव शब्दप्राधान्यमर्थप्राधान्यञ्चावधार्यतइति
निराधारन्नामरूपकमिदं शुद्धरूपकेषु शब्दार्थभूयिष्ठरू-
पकभेदः ॥१८॥ केवलं यथा । वेल्लितभु गलद्धर्मजलमा-
लोहितेक्षणम् । विवृणोति मदावस्थामिदं वदनपङ्कज-
म् ॥ अत्रावयविन एव केवलस्य वदनपङ्कजमिवेति रू-
पणादस्य शब्दप्राधान्यं वेल्लितभ्रुप्रभृतिविशेषणोपादा-
नाच्चार्थप्राधान्यमेवलक्ष्यते तेन केवलंनाम रूपकमिदं
शुद्धरूपकेषूभयभूयिष्ठरूपकभेदः ॥ १९ ॥ व्यतिरेकव-
द्यथा । अनाघ्रातम्पुष्पङ्किसलयम लूनङ्कररुहैरनाविद्धं र-
त्नम्मधुनवमनास्वादितरसम् । अखण्डम्पुण्यानाम्फल-

१ शोभते विशुद्धकिरणो गगनसमुद्रे रजनीवेलालग्नः।तारासुक्ताप्रकरः स्फु
टविघटितमेघशुक्तिसंपुटविमुक्तः ॥ २वनराजिकेशहस्ताः कुसुमायुधसुरभिसंचरद्-
ध्वजपटाः। शशिकरमुहूर्तमेघास्तमः प्रतिहस्ताविनयन्ति धूमोत्पीडाः॥ केशहस्ताः
प्रशस्तकेशा इतयर्थः। हस्ताः शस्तास्तु केशेभ इत्यमरः ।

मिवच तद्रूपमनघन्नजाने भोक्तारङ्कमिह समुपस्थास्य-
तिविधिः१॥ अत्र पुष्पकिसलयरत्नमधुपुण्यफलानामना-
घ्रातमित्यादिविशेषणापादित व्यतिरेकाणाम्प्रतीयमान-
सादृश्येनशकुन्तलारूपेणरूपणादर्थतःशब्दतश्चप्राधान्यम-
वधार्यतइति व्यतिरेकवन्नामरूपकमिदं शुद्धरूपकेषूभ-
यभूयिष्ठरूपकभेदः ॥ २० ॥ अथ सङ्कीर्णभेदानाञ्चतुष्टय-
मिहोच्यते। स्यात्सावयवसङ्कीर्ण न्तथाऽनवयवाह्वयम्॥३२॥
तथैवोभयसङ्कीर्णं श्लेषोपहितमित्यपि । सैषारूपकभेदा-
नां विंशतिश्चतुरुत्तरा ॥३३॥ तेषु सावयवसङ्कीर्णं यथा।
रइअरकेसरणिवहं सोहइ धवलब्भदलसहस्सपरिगअ-
म् । महुमहदं सणजोग्गम्मिपआमहुपत्ति पङ्कअंव्वणह-
अलम् १॥ अत्र पितामहोत्पत्तिपङ्कजमिवनभस्तलं शो-
भत इत्युपमानोपमेयभावेनाऽवयविनोरभेदस्या ऽविव-
क्षायामुपमैव नरूपकं रविकरधवलाभ्रदलसहस्रयोः
केसरनिकरदलसहस्रयोश्च प्रतीयमानाभिधीयमानसा-
दृश्ययोश्च सहजाहार्यावयवभूतयोरभेदोपचारेण रूपण-
मिति सावयवरूपेणोपमायाः सङ्कीर्णत्वादिदं सावयव-
सङ्कीर्णनामसङ्कीर्णरूपकेषू भयभूयिष्ठरूपकभेदः ॥ २१॥
निरवयवसङ्कीर्णं यथा । दीहो दिअहभुअङ्गोरइबि-
म्बफणामणिप्पहं विअसन्तो । अवरसमुद्दमुवगओ मु-
अन्तो कज्जुअं व्वआइणिवहम्२ ॥ अत्र दिवसावयवि-

१विधिर्दैवम्।२रविकरकेसरनिवहंशोभतेधवलाभ्रदलसहस्रपरिगतम् । मधुमथद
र्शनयोग्यं पितामहोत्पत्तिपङ्कजमिवनभस्तलम्॥ ३दीर्घोदिवसभुजङ्गोरविबिम्बफ-
णामणिप्रभयाविकसमानः। अवरसमुद्रमुपगतोमुञ्चन्कज्जु,कमिवकान्तिनिवहम्।

नीभू जङ्गाऽवयविनश्चाऽभिधीयमानप्रतीयमानदैर्घ्यदारु-
णादिधर्मयोरभेदोपचारेण रूपणमवयवानाञ्चतुर्णां र-
विबिम्बातपफणामणिनिर्मोकानां सत्त्यामप्यभेदोपचा-
रयोग्यतायान्द्वयोरिवशब्दप्रयोगेनोपमायान्द्वयोस्तुल्य -
रूपणेप्यसामानाधिकरण्यान्नावयवावयविभावो विभा-
व्यतइति निरवयवस्योपमायां सङ्कीर्णत्वान्निरवयव-
सङ्कीर्णन्नाम सङ्कीर्णरूपकेषु उभयभूयिष्ठरूपकभेदः॥२२॥
उभयसङ्कीर्णं यथा । धुअमेहमहुअराओघणसमआ-
अठ्ठिओण अविमुक्काओ । णहपाअवसाहाओणि
अअट्ठाणं व्वपडिगआ दिसा ओ १॥ अत्र पादपरूपेण-
रूपितस्य नभसोयदेतद्दिशां शाखारूपेणरूपणम्मेघाना-
ञ्च मधुकरप्रकरेण तदुभयमप्यन्यपदार्थषष्ठीसमासयो-
रभिधीयमानेन सावयवन्निरवयवञ्चेति उत्प्रेक्षया च
सङ्कीर्यमाणमुभयसङ्कीर्णरूपकव्यपदेशं लभते । सोऽयं
सङ्कीर्णरूपकेषूभयभूयिष्ठरूपकभेदः ॥ २३ ॥ श्लेषोपहितं
यथा । पीणपओहरलग्गन्दिसाणपवसन्त जलअ सम-
अ विइण्णम् । सोहग्गपढम इल्लम्पव्वाअइ सरसणहप-
अंव्वइन्दहणु २॥ अत्र सरसनखपदाकारस्येन्द्रधनुष उ-
त्पन्नसादृश्यादभेदोपचारेणरूपणेयोऽयं सरसेनभसिपद-
मस्येति व्युत्पत्त्याश्लिष्टरूपेण तद्विशेषणप्रकारः । यश्चशो-

१धुतमेघसमधुकराघनसमयारब्धौन्नत्यविमुक्ताः । नभःपादपशाखानिजस्थान-
मिव प्रतिगतादिशः ॥ २ पीनपयोधरलग्नं दिशां प्रवसज्जलदसमयवितीर्णम् ।
सौभाग्यप्रथमचिह्नं प्रतीयते सरसनख(नभः) पदमिवेन्द्रधनुः॥

भायाः प्रथममग्र्यंचिह्नं सौभाग्यस्यच प्रथमाङ्कितम्पीन-
पयोधरेमेघेस्तनेवालग्नमित्यादिविशेषणविशेष्यभावस्ते-
नेदंश्लेषेणोपधीयतइतिश्लेषोपहितन्नामसङ्कीर्णरूपकेषूभ
यभूयिष्ठरूपकभेदः॥२४॥२॥इतिरूपकालंकारनिरूपणम्॥
द्वयोर्यत्रोक्तिचातुर्यादौपम्यार्थोवगम्यते।उपमारूपकान्यत्वे
साम्यमित्यामनन्तितत्॥३४॥तदानन्त्येनभेदानामसङ्ख्य-
न्तस्यतूक्तयः । दृष्टान्तोक्तिःप्रपञ्चोक्तिःप्रतिवस्तूक्तिरेव च
॥३५॥तत्रैवादेःप्रयोगेणदृष्टान्तोक्तिम्प्रचक्षते॥इवादेरप्रयो-
गेणप्रपञ्चोक्तिम्मनीषिणः ॥३६॥ वस्तुकिञ्चिदुपन्यस्य-
न्यसनात्तत्सधर्मणः । साम्यप्रतीतिरस्तीति प्रतिवस्तूक्ति
रुच्यते॥ ३७ ॥ तत्र क्रियाजातिगुणद्रव्ययोगादि हेतु-
के । साम्ये पूर्वादिभेदेन दृष्टान्तोक्तिर्विधीयते ॥ ३८॥
सा क्रियायोगनिमित्तसाम्या दृष्टान्तोक्तिः सामान्यतः
पूर्वा यथा । स्थितः स्थितामुच्चलितः प्रयातान्निषेदुषी-
मासनबन्धधीरः । जलाभिलाषी जलमाददानाच्छाये-
वताम्भूपतिरन्वगच्छत् ॥ अत्र दृष्टान्तदार्ष्टान्तिकयोर-
नाविष्टलिङ्गत्वादवश्याभिधेयत्वाच्च स्थितइत्यादिषु न
लिङ्गभेददोषः । अभिधीयमानस्थानादिक्रियायोगज-
नितं साम्यंसमस्तमूर्त्तिमत्साधारणञ्च पूर्वमेवच्छाया
दृष्टान्तः सेयं क्रियायोगनिमित्तसाम्यासामान्यतः पूर्वा-
नामदृष्टान्तोक्तिः साम्यभेदः ॥ १ ॥ सैवक्रियागुणयोग
निमित्ताविशेषतः पूर्वायथा । सअलुज्जोइअवसुहेसम-

त्थजीअलोअवित्थरन्तपआवे। ठाइ णचिरं रविम्मि-
वविहाणपडिदाविमइलदासप्पुरिसे१॥अत्र जगदुद्द्योतन
क्रियाप्रतापगुणयोगहेतुसाम्यमसाधारणश्च सूर्यदृष्टान्त
इति विशेषतः क्रियागुणयोगनिमित्तेयम्पूर्वानामदृष्टान्तो-
क्तिः साम्यभेदः ॥२॥ गुणयोगनिमित्तसाम्यासामान्य-
त उत्तरा यथा । रूपन्तदोजस्वि तदेववीर्यं तदेवनैस-
र्गिकमुन्नतत्वम्। न कारणात्स्वाद्विभिदे कुमारः प्रवर्त्ति-
तोदीपइव प्रदीपात्॥ अत्र रूपादिगुणयोगजन्मज-
नितं साम्यं सामान्यरूपश्चपश्चात्प्रदीपदृष्टान्त इति
सामान्यतोगुणयोगनिमित्तेयमुत्तरानामदृष्टान्तोक्तिःसा
म्यभेदः ॥३॥ सैवक्रियागुणद्रव्ययोगनिमित्ताविशेष-
तो यथा । अव्वोच्छिन्नपसरिओअहिअंउद्धाइफुरिअसू-
रच्छाओ। उच्छाहोसुहडाणंविसमक्खलिओमहाणईणवसो
त्तो२॥ अत्राव्यवच्छिन्नप्रसृत इति क्रियायोगनिमित्तंस्फु
रितशौर्यच्छाय इति गुणयोगनिमित्तं स्फुरितसूर्यच्छाय
इति द्रव्ययोगनिमित्तञ्च साम्यं सामान्यविशेषरूपश्चवि-
षमस्खलितमहानदीस्रोतो दृष्टान्तइति विशेषतः क्रिया-
दियोगनिमित्तेयमुत्तरानामदृष्टान्तोक्तिः साम्यभेदः॥४॥
द्रव्यजातिनिमित्तसाम्यासामान्यतःपूर्वादृष्टान्तोक्तिर्यथा।
विसवेओव्वपसरिओजंजंअहिलेइवहलधूमुप्पीडो।साम-

१ सकलोद्द्योतितवसुधे समस्तजीवलोकविस्तरप्रतापे। स्थायिनी न चिरं रवा-
ववविधानपतितापि मलिनता सत्पुरुषे ॥ २ अव्यवच्छिन्नप्रसृतोधिकसुङ्गातिस्फु-
रितसूर्य(शौर्य)च्छायः। उत्साहः सुभटानां विषमस्खलितं महानदीनवस्रोतः॥

लइज्जइतन्तंरुहिरेवमहोअहिरसविद्दुमवेढम्॥१॥अत्रधू-
मविषयोर्विद्रुमरुधिरयोश्च द्रव्यजातियोगकृतम्प्रतीयमा
नं श्यामलायतइति धूमविषयद्रव्ययोगजनितमभिधीय-
मानं सामान्यरूपंचसाम्यं सेयन्दृष्टान्तस्य पूर्वमेवोपन्या
सादुद्रव्यजातियोगनिमित्तसाम्यासामान्यतःपूर्वानामदृ-
ष्टान्तोक्तिः साम्यभेदः ॥५॥ सैवद्रव्यायोगनिमित्तसाम्या-
विशेषतो यथा । संचारिणीदीपशिखेव रात्रौ यंयं व्यती-
यायपतिंवरारसा॥ नरेन्द्रमार्गाट्टइवप्रपेदेविवर्णभावं स
सभूमिपालः ॥ अत्र दीपशिखादिद्रव्ययोगकृतं साम्यम्।
सामान्यविशेषरूपौसंचारिणीदीपशिखेति च राजमार्गा
ट्टइतिच दृष्टान्तौपूर्वमेवोपन्यस्तौ सेयं विशेषतोद्रव्यायो-
गनिमित्तसाम्यापूर्वानामदृष्टान्तोक्तिः साम्यभेदः ॥ ६॥
द्रव्यायोगनिमित्तसाम्यैव सामान्यत उत्तरा यथा । उ-
ज्ज्वलालोकयास्निग्धात्वयात्यक्ता न राजते । मलीम-
समुखावर्तिः प्रदीपशिखया यथा ॥ अत्र द्रव्ययोगकृतं
साम्यं सामान्यरूपञ्च प्रदीपः पश्चात्प्रदीपशिखावर्तिर्दृ-
ष्टान्तः सेयं यथोक्तरूपोत्तरानामदृष्टान्तोक्तिः साम्यभेदः
॥७॥ सैव क्रियागुणायोगनिमित्तसाम्याविशेषतो यथा।
तोताणहअछाअंणिच्चललोअणंसिहंपउत्थपओअम्।आले
क्खपईवाणववणिअमपअइचडुलत्तणम्पिविओलिअम्॥४॥

१ विषवेग इव प्रसृतोयं यमभिलेढि बहलधूमोत्पीडः । श्यामलयति यत्तद्-
धिरमिव महोदधेर्विद्रुमवेष्टः॥ २संज्ञायां भृतृवृजीतिधृञि अरुर्द्विषदजन्तस्येति
सुमिसाधु । ३ अष्टाध्यो गृहभेदः ॥ ४ तत्तेषां हृतच्छायं निश्चललोचनशिखं प-
र्यंस्तप्रतापम् । आलेख्यप्रदीपानामिवनिजं प्रकृतिचटुलत्वमपि विगलितम् ॥

अत्रहतच्छायमित्यादीनामन्तर्गतगुणत्वेन क्रियाविशेषणत्वात्क्रियागुणयोगनिमित्तन्निजंप्रकृतिचटुलत्वमपिविगलितमिति गुणायोगनिमित्तंचसाम्यम्। सामान्यविशेषरूपश्चालेख्यप्रदीपदृष्टान्त इति क्रियागुणायोगनिमित्तेयंविशेषल उत्तरानामदृष्टान्तोक्तिः साम्यभेदः ॥ अथ दृष्टान्तोक्तेर्दृष्टान्तालङ्कारस्यवाकोविशेषः। उच्यते। लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं सदृष्टान्त इत्यर्थंप्रतितुन कश्चिद्विशेषः। उक्तिंप्रतितुपुनरनेको विद्यते। तद्यथा। दृष्टान्तदार्ष्टान्तिकयोर्भिन्नवाक्ये निर्देशोदृष्टान्तालङ्कारः। एकवाक्यनिर्देशोदृष्टान्तोक्तिः। साध्यधर्मसिद्धये दृष्टान्ताऽलङ्कारः। साधर्म्यसिद्धयेदृष्टान्तोक्तिः। इवाद्यप्रयोगो दृष्टान्तालङ्कारः। इवादिप्रयोगेतुदृष्टान्तोक्तिः। अत एवेयमुभयालङ्कारः सपुनरर्थालङ्कार इति ॥ ८॥ साम्योत्कर्षापकर्षोक्तेरुपमानोपमेययोः। प्रकृता विकृता चेति प्रपञ्चोक्तिः प्रदर्श्यते ॥३९॥ सोपमानोपमेययोः साम्येनप्रकृतायथा। अरण्यबीजाऽञ्जलिदानलालितास्तथा च तस्यां हरिणाविशश्वसुः। यथा तदीयैर्नयनैः कुतूहलात्पुरः सखीनाममिमीतलोचने ॥ अत्र मृगलोचनोपमानानान्तल्लोचनोपमेययोश्च साम्यमविकृतानामेव प्रतीयते सेयं सामान्येनप्रकृतानामप्रपञ्चोक्तिः साम्यभेदः ॥ ९ ॥ प्रकृतैवोपमानोत्कर्षेण यथा।

१ बीजाञ्जलिर्नीवाराञ्जलिः ।

गर्वमसंवाह्यमिमं लोचनयुगलेन वहसि किम्मुग्धे!। सन्तीदृशानि दिशिदिशि सरस्सु ननु नीलनलिनानि॥ अत्र तव द्वेलीचनोत्पले एव सरसाम्पुनर्बहूनि नीलोत्पलानीत्युपमानोत्कर्षः प्रतीयते। सेयमुपमानोत्कर्षेण प्रकृतानामप्रपञ्चोक्तिः साम्यभेदः ॥१०॥ सैवोपमानापकर्षेण यथा। अन्यतो नयमुहूर्तमाननं चन्द्र एष सरलेकलामयः। मा कदाचनकपोलयोर्मलं सङ्क्रमय्यसमतान्नयिष्यति। अत्रोपमानस्य मलिनताकृतोपकर्षः प्रकृत एव प्रतीयते सेयमुपमानापकर्षेण प्रकृतानामप्रपञ्चोक्तिः साम्यभेदः ॥११॥ सैवोपमानस्य किंचिदुत्कर्षेण यथा। आपातमात्र रसिकेसरसीरुहस्य किंबीजमर्पयितुमिच्छसि वापिकायाम्। कालःकलिर्जगदिदन्नकृतज्ञमज्ञे! स्थित्वा हरिष्यति तवैवमुखस्य शोभाम्॥ अत्रोपमानस्योपमेयादीषदुत्कर्षः प्रकृत एव प्रतीयते। सेयमीषदुत्कर्षेण प्रकृतानामप्रपञ्चोक्तिः साम्यभेदः ॥ १२ ॥ उपमानोपमेययोः साम्यापत्त्याविकृता यथा॥ घरिणीअ महाणसकम्मलग्गमसिमइलिएण हत्थेण। छित्तम्मुहं हसिज्जइ चन्दावत्थङ्क अंपइणा॥ अत्रोत्कृष्टोपमेयस्य मसीमालिन्यवैकृतेनोपमानसाम्यमापाद्यमानं प्रतीयते। सेयमुपमानोपमेययोः साम्यापत्त्याविकृतानाम प्रपञ्चोक्तिः साम्यभेदः॥१३॥ विकृतैवोपमेयस्योत्कर्षापत्त्यायथा॥ रत्नु-

१ पद्मातपत्रमित्यपि क्वचित्पाठः॥ २ गृहिण्यामहानसकर्मलग्नमसीमलिनेन हस्तेन। चिप्तं मुखे हसति चन्द्रावस्थाङ्कतं पीत्वा॥

प्पलदलसोहातीअवि चसअम्मि सुरहि वारुणीभरिए ।
मअतंबेहिंमणहरा पडिमावडि एहिंलो अणेहिं लहुइअ१॥
अत्रोपमेयस्यमधुमदताम्रत्ववैकृत उत्कर्षः प्रतीयते। सेयमुपमेयोत्कर्षेणविकृतानाम प्रपञ्चोक्तिः साम्यभेदः॥१४॥
सैवोपमेयापकर्षापत्या यथा । मृगम्मृगाङ्कः सकलं सदाङ्केबिभर्त्तितस्यास्तुमुखङ्कदाचित् । कपोलदेशे मृगनाभिपत्त्रमियान्सखे! तस्य ततोऽपकर्षः ॥ अत्रमृगाङ्कः सकलं मृगं सदाबिभर्त्ति । तन्मुखञ्च कदाचिन्मृगनाभिमात्रजमेवपत्त्रमित्युपमेयस्यवाचनिक्यपकर्षापत्तिः प्रतीयते । सेयमुपमेयापकर्षापत्याविकृतानाम प्रपञ्चोक्तिः साम्यभेदः ॥ १५ ॥ सैवोपमेयस्य साम्यापत्योपमानोत्कर्षेण च यथा । नमर्त्यलोकस्त्रिदिवात्प्रहीयते म्रियेतनाऽग्रे यदि वल्लभोजनः । निवृतमेवत्रिदिवप्रयोजनम्मृतः सचेज्जीवत एवजीवति ॥ अत्रोपमेयस्य यथोक्तधर्मयोगे सत्युपमानेन पूर्वार्द्धे साम्यमुत्तरार्द्धे तु किञ्चिदुत्कर्षो भवति । सेयं यथोक्ताविकृतानामप्रपञ्चोक्तिः साम्यभेदः ॥ १६ ॥ प्रतिवस्तूक्तिरप्यऽस्मिन्नृजुवक्राच कथ्यते । दृष्टान्तोक्तेश्च साछायाम्प्रपञ्चोक्तेश्च गाहते ॥४०॥ सादृष्टान्तोक्तिच्छायया विधावृजुः पूर्वाच यथा । तन्मन्येहिमभासस्तारानिकरेण कान्तिरुच्छेदा । यत्तस्या मुखमेतद्यदि युवति मुखानिविजयन्ते २॥ अत्र तदिन्दोस्ता-

१ रक्तोत्पलदलशोभा तस्याश्चपिचषके सुरभिवारुणीभरिते । मदताम्राभ्यांमनोहरपूतिसापतिताभ्यां लोचनाभ्यां लघ्वी कृता॥२विपराभ्यां जेरित्यात्मनेपदम् ।

रकौचेणकान्तिरुच्छेद्याइति पूर्वमृजूक्त्या दृष्टान्तरूपम्। पश्चादद्यदेतन्मुखं युवतिमुखानि विजयन्तइति ऋजूक्त्यैवदार्ष्टान्तिकरूपम्प्रतिवस्तूपन्यस्तमिति सेयन्दृष्टान्तोक्तिच्छायया विधावृज्वी पूर्वाच प्रतिवस्तूक्तिः साम्यभेदः ॥ १७ ॥ सैवोत्तरावक्राच यथा । शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य । दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥ अत्र शुद्धान्तदुर्लभमिति वक्रोक्त्या पूर्वन्दार्ष्टान्तिकरूपं वस्तूपन्यस्य पश्चाद्दूरीकृताः खलु गुणैरिति वक्रोक्त्यैव दृष्टान्तरूपम्प्रतिवस्तूपन्यस्तमिति सेयन्दृष्टान्तोक्तिच्छायया विधौ वक्रोत्तरा च प्रतिवस्तूक्तिः साम्यभेदः ॥ १८ ॥ दृष्टान्तोक्तिच्छाययानिषेधेच ऋजुः पूर्वा च यथा । न मालतीदामविमर्द्दयोग्यञ्चप्रेमनव्यं सहते ऽपराधान् । स्नानापिन स्नायति केसरस्रग्देवीन खण्डप्रणया कथञ्चित् ॥ अत्र "न मालतीदामविमर्द्दयोग्यमिति, स्नानापि न स्नायति केसरस्रगितिच ऋजूक्तिभ्यामेव पूर्वन्दृष्टान्तरूपे वस्तुनी प्रतिषिध्योत्तरकालं"न प्रेमनव्यं सहते ऽपराधानिति"देवी न खण्डप्रणया कथञ्चिदिति,च दार्ष्टान्तिकरूपे प्रतिवस्तुनी ऋजूक्त्यैव प्रतिषिद्धे सेयन्निषेधे ऋज्वी पूर्वा च दृष्टान्तोक्तिच्छायया प्रतिवस्तूक्तिः साम्यभेदः ॥ १९ ॥ सैवोत्तराचवक्रा च यथा । मानुषीषु कथं वास्यादस्य रूपस्य सम्भवः । न प्रभातरलज्योतिरुदेति वसुधातलात् ॥ अत्र कथंवास्यादितिवक्रयानिषेधोक्त्यादार्ष्टा-

न्तिकमभिधायपश्चान्नवसुधातलात्प्रभातरलंज्योतिरुद्गे-
तीति वैयधिकरण्यवक्रयैव निषेधोक्त्या दृष्टान्तो-
ऽभिहितः सेयन्निषेधेवक्रोत्तराच दृष्टान्तोक्तिच्छायया
प्रतिवस्तूक्तिः साम्यभेदः ॥ २० ॥ प्रपञ्चोक्तिच्छायया
विधावृज्वी यथा । तरङ्गयदृशोऽङ्गने ! पततुचित्रमिन्दी-
वरं स्फुटीकुरु रदच्छदं व्रजतुविद्रुमः श्वेतताम् । क्षणं व
पुरपावृणुरुपृशतु काञ्चनङ्कालिकामुदञ्चयमुखम्मनाग्भ-
वतु च द्विचन्द्रन्नभः ॥ अत्र प्रथमचतुर्थपादयोरु-
पमानोपमेयसाम्यं वैकृतम् । द्वितीयतृतीयपादयोरुप-
मानापकर्षः प्रकृत इति सेयं प्रपञ्चोक्तिच्छायया वि-
धावृज्वी नामप्रतिवस्तूक्तिः साम्यभेदः ॥ २१ ॥ सैवविं-
धौवक्रा यथा । एक्कोणामिअभुअभङ्गविमलकवोलङ्ग-
वअणङ्गं तुज्झमअच्छिन्तिरिंछण अणङ्गं । एहुससि-
विम्बउकलङ्कगार उपण्डरउक्खित्तउ उप्परेणभमाइ
अणिमञ्कणखप्परउ १ ॥ अत्रोपमेयोत्कर्षो वैकृत
उपमानापकर्षःप्राकृतःप्रकाशतएव यापुनरियमुत्तरार्द्धे
नरूपकेणोपमानापकर्षस्योक्ति भङ्गिस्तयेयम्प्रपञ्चोक्ति-
च्छायया विधौवक्रा नामप्रतिवस्तूक्तिः साम्यभेदः ॥२२॥
सैवनिषेधे ऋज्वी यथा । दातारोयदिकल्पशाखिभिरलं
यद्यर्थिनः किन्तृणैः सन्तश्चेदमृतेन किं यदि खलास्त-

१ एकोनामित भ्रुवभङ्ग विमलकपोलाङ्कवदनाङ्कतवमदच्चितिर्यग्नयना-
ः । अयं शशिबिम्बः कलङ्कपङ्कः पाण्डरः क्षिप्तउपरिष्टाङ्म्यते नीराजन
र्पणः ॥

त्कालकूटेन किम् । किङ्कर्पूरशलाकया यदि दृशोः प-
न्थानमेतिप्रिया संसारेपि सतीन्द्रजालमपरं यद्यस्तिते-
नापि किम् ॥ अत्रोपमेयोत्कर्ष ऋजूक्त्यैवचनिबद्धइति
सेयम्प्रपञ्चोक्तिच्छायययानिषेधे ऋजुनाभिप्रतिवस्तूक्तिः
साम्यभेदः॥२३॥सैवनिषिद्धे वक्रा यथा । तद्वक्त्रं यदि मुद्रि-
ता शशिकथा तच्चेत्स्मितङ्कासुधातच्चक्षुर्यदिहारितं कुव-
लयैस्ताश्चेद्विरोधिङ्मधु । धिक्कन्दर्पधनुर्भ्रुवौचयदिते किं
वा बहुब्रूमहेतत्सत्यम्पुनरुक्तवस्तुविरसः सर्ग्गक्रमोवेध-
सः॥ अत्रोपमानापकर्षोवक्रोक्त्याचनिषेधः शेषम्पूर्ववत् । तेइमेद्वे अपिमालोपमाछायया प्रपञ्चोक्तीपूर्वेपुन
रुत्पाद्योपमाछाययेतिमन्तव्यम् ॥२१॥३॥ इतिसाम्यालं
कारनिरूपणम्॥अर्थयोरतिसादृश्यादत्रदोलायते मनः॥
तमेकानेकविषयङ्कवयःसंशयंविदुः॥४१॥तत्रैकविषयेनेको
यस्मिन्नेकत्रशङ्क्यते ॥ यस्मिन्नेकमनेकत्र सोनेकविषयः
स्मृतः ॥४२॥तयोराद्योऽभिधीयमानसादृश्योयथा । आहारे
विरतिः समस्तविषयग्रामेनिवृत्तिः परानासाग्रेनयनंयदे
तदपरंयच्चैकतानम्मनः । मौनं चेदमिदं चशून्यमखिलं य-
द्विश्वमाभातिते तद्ब्रूयाः सखि योगिनी किमसिभोः किं
वा वियोगिन्यसि ॥ अत्रैकस्मिन्वस्तुनि वस्तुद्वयस्या-
भिधीयमानसामान्यप्रत्यक्षन्तद्विशेषप्रत्यक्षादुभयविशेष-
स्मरणाच्चयोविमर्शः सोयमेकविषयः संशयः ॥ १ ॥ स
एव प्रतीयमानसादृश्यो यथा । किम्पद्ममन्तर्ध्यान्तालि-
किन्तेलोलेक्षणम्मुखम् । ममदोलायते चित्तम्पश्यतस्त्वां

घनस्तनि !॥ अत्रमुखलक्षणे लोचनलक्षणे चैकस्मिन्नेव-
वस्तुनिपद्मलक्षणम्भ्रमरलक्षणंचाऽपरमपि वस्तु प्रती-
यमानसादृश्यमाशङ्क्यते । सोयमप्येकविषय एव संश-
यः ॥ २ ॥ अनेकवस्तु विषयोद्विधा । शुद्धोमिश्रश्च ।
तयोः प्रतीयमानसादृश्यः शुद्धो यथा । बालीभम्भु-
रभोलीउल्हसिअणि अंसिणी गहणसुणिअविणिक्कन्ता
णिद्दाएभेम्भली । राहुवितीअमुहुजोहइपुणुजोहइगअणु-
भुल्लल्लीओणहुआणइदोण्हविचन्दुकंवणु १ ॥ अत्र द्वयोः
प्रतीयमानसादृश्ययोर्बालिकामुखचन्द्रयोरेकश्चन्द्र एव
विशङ्क्यतइति सोयमनेकविषयः शुद्धः संशयः ॥ ३ ॥ अ-
भिधीयमानसादृश्योमिश्रो यथा । द्वावप्येतावभिनवज-
पापुष्पभासान्निवासौतिष्ठत्येतद्द्वयमपि वियन्मण्डल-
स्योपसन्धयम्। अस्तङ्कौयात्युदयतिचकःकोरविःकःशशा-
ङ्कः काचप्राचीतदिहनवयङ्का प्रतीचीति विद्मः॥ अत्र द्व-
योरभिधीयमानसादृश्ययोः सूर्याऽचन्द्रमसोः प्राचीप्रती-
च्योर्वातद्व्यतममेकमेववस्तुपर्यायतोविशङ्क्यतइति अ-
नेकविषयोयम्मिश्रः संशयः ॥ ४ उपलक्षणञ्चैतत्तेन-
विलक्षीक्तादयोपिसंशयोक्तावेवद्रष्टव्याः । तद्यथा ।
सरोजपत्त्रेपरिलीनषट्पदेविशालदृष्टेः स्विदमूविलोचने।
शिरोरुहाः स्विन्नतपक्ष्मसन्ततेर्द्विरेफवृन्दन्नुनिशब्दनि-

१ बालानिष्कपटोल्लसितनिवसनाग्रहणंश्रुत्वाविनिष्क्रान्ता निद्रयाव्याकुला॥
राहुरपि तस्यासुखं पश्यति पुनः पश्यति गगनं भ्रान्तिमान् खलुनजानातिइ
योरपि चन्द्रःकः ॥ २देवताद्वन्द्वेचेत्यानङ् पूर्वपदस्य।

श्चलम् ॥ अगूढहासरुफुटदन्तकेसरम्मुखंस्विदेतद्विकचन्नु पङ्कजम् । इतिप्रलीनान्नलिनीवने सखींविदाम्बभूवुः सुचिरेणयोषितः॥ युग्मम् । यथाच । मुहेम अक्खलिउल्ला-वेण्हाणील्लएचिउरेविणिणिअंसणसारेसमोत्ति अहारेउ-रे । कालत्तरेतरलछिहुमअणुसमुल्लसइमाहहु पुणुथण गुडुरेणमुणइकहिंवसइ १ ॥ कःपुनर्वितर्कसंशययोर्विशे-षः । उच्यते । निर्णयासन्नोवितर्कः । वितर्कासन्ननश्चसं-शयःसंशयानोहिवितर्कस्यकोटिमारुह्यततोविभ्रष्टस्तत्व-मप्यनिविशते । यथापूर्ववाक्ये विदाम्बभूवुरिति संशयमे-वविगाहते । यथा "माहहुपुणुथणगुडुरेणमुणइकहिंवस-इ"इति । शब्दाश्चकिंस्विदादयस्तुल्यरूपाएवसंशयविपर्य-ययोरिति दुरवबोधस्तद्विशेषः । नन्वेवंवितर्कादयोप्युभ-यालङ्काराःस्युः।सत्यम्।किन्तूक्तिपक्षेपरार्थानुमानवत्स्व-रूपपक्षेस्वार्थानुमानवदिति।अयमेवचोक्तिशब्दस्यार्थस्ते नस्वरूपमात्रेोक्तौसंशयवितर्कादयोप्यर्थालङ्काराउक्तिप्रा धान्येतूभयालङ्काराः॥५॥४॥इतिसंशयोक्तरलंकारनिरूपण-म्॥अपह्नुतिरपह्नुत्यकिंचिदन्यार्थदर्शनम्।औपम्यवत्य नौपम्याचेतिसाद्विविधेाच्यते॥४३॥वाच्येप्रतीयमानेचसा-दृश्येप्रथमातयेाः॥तथाभूते द्वितीयास्यादपह्नोतव्यवस्तुनि ॥४४॥अनौपम्यवतीभूयः पूर्वापूर्वा च कथ्यते॥ तासामु-

१ मुखे मदस्खलितोल्लापे स्नानोत्सुतेषु चिकुरेष्वधिनिर्निवसनसारेसमौ-क्तिकहारे उरसि । कालान्तरे तरलाक्ष्योमर्दनः ससुल्लसतिमाधवःपुनः स्तन-कुड्मले न मन्यते क्व वसति ॥

दाहतिष्ठेव रूपमाविर्भविष्यति॥४५॥ तत्राभिधीयमानौपम्यवती यथा । गिम्हेदवग्गिमसिमइलिआइन्दीसन्तिविंज्झकसिहराइम्। आसासुप उत्थवइएणहोन्तिणवपाउसम्भाइम्१॥ अत्र नवप्रावृडभ्राणां विन्ध्यशिखरैरभिधीयमानसादृश्यैरपह्नुतत्वादभिधीयमानौपम्यवत्यपह्नुतिः ॥१॥ प्रतीयमानौपम्यवती यथा । न केतकीनां विलसन्तिसूचयः प्रवासिनोहन्तहसत्ययं विधिः । तडिल्लतेयन्न चकास्ति चञ्चलापुरःस्मरज्योतिरिदं विजृम्भते ॥ अत्र केतकीसूचीनां विधिविहसितैः प्रतीयमानसादृश्यैस्तडिल्लतायाश्च स्मरज्योतिषाऽपह्नुतत्वादियंप्रतीयमानौपम्यवत्यपह्नुतिः ॥२॥ अनौपम्याभिधीयमानापह्नोतव्यवस्तुः पूर्वा यथा । राजकन्यानुरक्तंमारोमोद्भेदेनरक्षकाः । अवगच्छेयुराः ज्ञातमहोशीतानिलंवनम् ॥ अत्र राजकन्यानुरागलक्षणस्य रोमाञ्चकारणस्य रक्षकावगतिहेतोः पूर्वमेवाभिहितस्यचवनानिलशैत्यलक्षणेन कारणान्तरेणापह्नवः । नचैतयोः सादृश्यमस्ति । सेयमनौपम्याभिधीयमानाऽपह्नोतव्यवस्तुः कार्यात्पूर्वङ्कारणोपन्यासेन पूर्वेत्युच्यते ॥३॥ सैवापूर्वा यथा । आनन्दाश्रुप्रवृत्तमेकथन्दृष्ट्वैवकन्यकाम् । अक्षिमेपुष्परजसावातोद्धूतेन पूरितम्। अत्रानन्दाश्रुप्रवृत्तमिति पूर्वङ्कार्यस्य पश्चाद्दृष्ट्वैवकन्यकामिति कारणस्योपन्यासः । शेषं पू-

१ग्रीष्मे दावाग्निमसीमलिनानि दृश्यन्ते विन्ध्यशिखराणि । आशास पर्यन्तान्येतानि न भवन्ति नवप्रावृडभ्राणि ॥

र्ववत्। सेयमभिधीयमानाऽपह्नोतव्यवस्तुरनौपम्यापह्नुतिरपूर्वेत्युच्यते ॥४॥ अनौपम्यैवप्रतीयमानापह्नोतव्यवस्तुः पूर्वायथा ॥ उप्पेल्लिअवइकारिल्लआइं उच्चेसिदइ अवच्छलिये। कण्टअविलिहित पीणुण्ण अथणि उत्तम्मसुएत्ताहे १ ॥ अत्रचैतस्याः स्तनयोरुपपतिनानखक्षतङ्कृतमपितुकण्टकैरितिप्रतीयमाना ऽपह्नोतव्यं वस्तु प्रकाशते । पूर्ववदेवच पूर्वार्द्धेकारणस्योपन्यासः पश्चिमार्द्धेतु कार्योपदेशो दृश्यते। सेयमनौपम्या प्रतीयमानाऽपह्नोतव्यवस्तुः पूर्वानामापह्नुतिरपह्नुत्यकिञ्चिदन्यार्थदर्शनमिति लक्षणयोगाज्जायते ॥५॥ सैवापूर्वायथा कस्सवणहोइरोसोदट्ठनपिआइसव्वणं अहरम्। सभ्रमरपउमग्घाइणि वारिअवामेसहसुएह्मि २ ॥ अत्रापि नास्या उपपतिना अधरोव्रणितः किन्तर्हि भ्रमरेणेति प्रतीयमाना ऽपह्नोतव्यं वस्तु। पूर्वार्द्धे तु सव्रणमधरमिति कार्यमुपन्यस्य पश्चिमार्द्धे सभ्रमरकमलाघ्रायिणीति कारणमुपन्यस्तम्। सेयमन्यौपम्याप्रतीयमानापह्नोतव्यवस्तुरपूर्वा च अपह्नुतिर्यथोक्तलक्षणयोगाज्जायते॥६॥॥५॥

इत्यपह्नुत्यलंकारनिरूपणम्॥समाधिमन्यधर्माणामन्यत्रारोपणं विदुः॥ निरुद्वेदोऽथसोद्वेदः सद्विधापरिपठ्यते ॥ ४६॥तयोर्निरुद्वेदो यथा। ३दूरपरिट्ठराए अवऊहत्तम्मि-

१ उत्क्रम्यवचनकारिणि ! लतासुचैरुदस्यापच्छलितायाम्। कण्टकविलिखितपीनोन्नतस्तनिउत्ताम्यस्वेदानीम् ॥ २॥ कस्यवानभवतिरोषोदृष्ट्वाप्रियायाःसव्रणमधरम्। सभ्रमर पद्मोद्घायिणि ! वारिते वामे सहस्वेदानीम् ॥३दूरप्रति व

दिणअरे अवरदिसम्। असहन्तिव्वकिलिम्मइपिअअमपच्छक्खडूसणन्दिणलच्छी ॥ अत्र दिनकरदिनलक्ष्मीप्रतीचीनां समारोपितनायकनायिकाप्रतिनायिकाधर्माणान्दूरप्रतिवद्धुराग इत्यादिभिः श्लिष्टपदैरनुद्वेद एवमन्यधर्माध्यारोपादयञ्चिरुद्वेदः ॥१॥सोद्वेदो यथा । वल्लहेलहुबोलन्तइएत्तइपुणु बहुबलिकिज्जमितामरसणि तुज्झरोसहुथिरहु। जेणाणिरग्गलुजम्पइकिम्पणिजावजणुतावहिमेणविसिन्निझत्थिपुलुट्ठतशु १॥ अत्रापि प्रियतमव्यलीकासहिष्णुः कापिकामिनीहिमानीपुष्टाङ्कमलिनीमालोक्यतस्यामात्मधर्मान्प्रियेचसूर्यधर्मानारोपयति । तेचबलिक्रियेऽहन्तवरोषस्येत्यादिभिः पदैरुद्विद्यमाना इह प्रतीयन्त इत्ययंसोद्वेदः समाधिभेदः॥२॥ अन्यश्चान्यधर्माश्चान्यधर्मा इति२०युत्पत्याधर्मिणोप्यध्यासेसमाधिरिष्यते । सधर्माणान्यर्मिणश्च यथा । चन्द्रज्योत्स्नाविशदपुलिने सैकतेस्मिन्सरय्वांवाददृतं सुचिरमभवत्सिद्धयूनोः कयोश्चित् । एकोब्रूते प्रथमनिहतङ्केशिनङ्कंसमन्यः सत्वन्तत्त्वङ्कथयभवताकोहतस्तत्रपूर्वम् ॥ अत्रसम्बोध्यवर्णनीयेविष्णुस्वरूपस्य धर्मिणस्तद्धर्माणाञ्चाध्यासादयन्धर्मिधर्माध्यासरूपः समाधिः ॥ ३ ॥ धर्मिणएवाध्यासो यथा । प्राप्तश्रीरेषकस्मात्पुनरपि मयि तन्मन्थखेदं विदध्यान्निद्राम-

---

दरागेऽवगूहिनि दिनकरेऽपरदिग्यम् । असहन्तीवल्लाभ्यतिप्रियतमप्रत्यक्षदूषणं दिनलक्ष्मीः ॥ १ वल्लभेलघुबोलदत्यागच्छतिपुनर्बहुबलिक्रियेतामरसितवदोषस्यस्थिरस्य ॥ येननिरर्गलंजल्पतिकिमपियावज्जनस्तावद्विमेन प्रविश्यप्रुष्टासि ॥ २ ॥ अर्थप्रदर्शनमेतत् । व्युत्पत्तिस्तु अन्यश्च धर्माश्चेत्येव ॥

प्यस्य पूर्वामनलसमनसोनैवसम्भावयामि । सेतुं बध्नातिकस्मात्पुनरयमखिलद्वीपनाथानुयातस्त्वय्यायाते वितर्कानिति दधतइवाभातिकम्पः पयोधेः॥ अत्र प्राप्तश्रीरेषकस्मादित्यादिभिर्मन्थखेदादि धर्माणान्निवर्त्तितत्वात्प्राप्तश्रीरित्यादीनाञ्चश्लेषेणैवाभिधानात्त्वयीति वर्णनीयपदे विष्णुस्वरूपस्यधर्मिणएवाध्यासात्तद्धर्माणाञ्चानध्यासादऽयन्धर्माध्यासरूपःसमाधिः ॥ ४ ॥ समाधिमेवमन्यन्ते मेलितन्तदपिद्विधा ॥ धर्माणामेवचाध्यासेधर्मिणां वान्यवस्तुनि ॥ ४७ ॥ तत्रान्यधर्माणामेवान्यवस्तुन्यध्यासान्मेलितं यथा । पल्लविअंविअकरपल्लवेहिम्पप्फुल्लिअंविअणअणेहिम् । फलिअंविअपीणपओहरेहिं अज्जाएलावण्णम् १ ॥ अत्रपल्लवितमिवपुष्पितमिवफलितमिवेत्युत्प्रेक्षयालताधर्माणांलावण्यधर्मिणिधर्माध्यारोपो दृश्यते । करपल्लवादीनाञ्चानुपात्तव्यापारहेतुत्वेनसाधकतमत्वेनवाप्राधान्यंलक्ष्यते । सोयमन्यवस्तुनिपुनरन्यधर्माणामेवारोपेणमेलितन्नामसमाधिभेदोभवति । सतूद्देशेसमाध्युक्तिरित्युक्तिग्रहणाल्लभ्यते ॥ ५ ॥ धर्माणान्धर्मिणश्च यथा । देहोव्वपडइ दिअहो कण्ठछेओव्वलोहिओहोइ रई । गलइरुहिरव्वसंज्झाघोलइकेसकसणंसिरम्मिविअतिमिरम् २ ॥ अत्र देहादयोयथोक्तक्रियावन्तोजन्तुवधक्रियायान्नि-

१ एतच्छ्लोकच्छायाप्रथमपरिच्छेदेपृष्ठे ८३ द्रष्टव्यम् ॥ २ देहइवपततिदिवसकण्ठच्छेदइवलोहितोभवतिरविः । गलतिरुधिरमिवसंध्याघूर्णते केशकषणं शिरसीवतिमिरम् ॥

बहुदिवसादिभिरुपमेयादिवसावसानक्रियायाम्मेलिता-
स्तदेतद्गुणक्रियावतान्द्रव्याणाम्प्रधानक्रियाध्यारोपेध-
र्मिधर्माध्यासे मेलितन्नामसमाधेरेवभेदोभवति॥६॥ इति
समाध्युक्तयलंकारनिरूपणम् ॥ यत्रोपमानादेवैतदुपमेय-
म्प्रतीयते ॥ अतिप्रसिद्धे स्तामाहुः समासोक्तिम्मनीषिणः
॥४८॥ प्रतीयमानेवाच्येवासादृश्ये सोपजायते॥श्लाघाङ्ग-
र्हामुभेनोभेतदुपाधीन्प्रचक्षते ॥४९॥ विशेष्यमात्रभिन्ना-
पि तुल्याकारविशेषणा॥ अस्त्यसावपराप्यस्ति तुल्या तु-
ल्यविशेषणा॥५०॥ संक्षेपेणोच्यते यस्मात्समासोक्तिरिय-
त्ततः॥ सैवान्योक्तिरनन्योक्तिरुभयोक्तिश्च कथ्यते ॥५१॥
तत्र प्रतीयमानसादृश्या श्लाघावती यथा । उत्तुङ्गैकृतसं-
श्रयस्यशिखरिण्युच्चावचग्रावणिन्यग्रोधस्य किमङ्ग तस्य
वचसाश्लाघासुपर्याप्यते । बन्धुर्वा सपुराकृतः किमथ वा
सत्कर्मणां सज्जयोमार्गे रुक्षविपत्त्रशाखिनि जनोयम्प्रा-
प्यविश्राम्यति ॥ अत्रन्यग्रोधनैवोपमानेनोपमीयमा-
नेन प्रतीयमानसादृश्यस्य वर्णनीयवदान्योऽपमेयस्यो-
क्तत्वात्तच्छ्लाघयैवतच्छ्लाघा प्रतीयते इति सेयम्प्र-
तीयमानसादृश्या श्लाघावती समासोक्तिः ॥ १ ॥
सैवगर्हावतीयथा । किञ्जातोसि चतुष्पथेयदिघनच्छायो-
सिकिञ्छायायासम्पन्नःफलितोसिकिंयदिफलैः पूर्णोसि-
किंसन्नतः । हेसद्वृक्ष! सहस्वसम्प्रतिशिखाशाखाशताक-
र्षणक्षोभोन्मोटनभञ्जनानि जनतःस्वैरैरेवदुश्चेष्टितैः॥ अ-

१वदान्यस्यागिवीरयोरितिविग्रहः ॥२जनेभ्य इत्यर्थः॥

त्रोपमानभूतस्यसद्वृक्षस्यव्याजगर्हणया तदुपमेयःकोपि-
सत्पुरुषोविगर्ह्यतइति सेयम्प्रतीयमानसादृश्या गर्हा-
वतीनामसमासोक्तिः ॥ २ ॥ सैवोभयवतीयथा । निष्क-
न्दामरविन्दिनींस्थपुटितो१द्वेशांस्यलीम्पल्वलेजम्बाला-
विलमम्बुकर्त्तुमपरासूतेवराही सुतान् । दंष्ट्रायाञ्चुतुर्ण-
वोर्मिपटलैराप्लावितायामियंयस्याएवशिशोः स्थितावि-
पदिभूःसापुत्रिणी पोत्रिणी ॥ अत्रपूर्वार्द्धेगर्होत्तरार्द्धेश्ला-
घागम्यते । सेयम्प्रतीयमानसादृश्योभयवतीसमासो-
क्तिः ॥ ३ ॥ अनुभयवतीयथा । इतः स्वपिति केशवःकु-
लमितस्तदीयद्विषामितश्शरणार्थिनः शिखरिपक्षिणःशे-
रते । इतौपिवडवानलः सहसमस्तसंवर्त्तकैरहोविततमू-
र्जितम्भरसहञ्चसिन्धोर्वपुः ॥ अत्रगर्हाश्लाघावाविस्म-
योक्तावेवास्तमयते सेयम्प्रतीयमानसादृश्यानुभयवती-
नामसमासोक्तिः ॥ ४ ॥ अभिधीयमानसादृश्याश्लाघाव
तीतुल्याकारविशेषणायथा । नालस्यप्रसरोजलेष्वपिकृता-
वासस्यकोषेरुचिर्दण्डेकर्कशतामुखेच मृदुतामित्त्रेमहान्प्र-
श्रयः । आमूलक्षुणसङ्ग्रहव्यसनितादेषश्चदोषाकरेयस्यै-
षास्थितिरम्बुजस्यवसतिर्युक्तैवतत्रश्रियः ॥ अत्राम्बुरुह-
सत्पुरुषयोः परस्परमुपमानोपमेयभावस्यातिशयप्रसि-
द्धेरुपमानेनैवश्लेषवत्तुल्यविशेषणपदाभिधीयमानसादृ-
श्यमुपमानमेवावगम्यते । सेयमभिधीयमानसादृश्या-
श्लाघावतीतुल्यविशेषणानामसमासोक्तिः ॥ ५ ॥ प्रती-

१निम्नोन्नतप्रदेशामित्यर्थः । निम्नोन्नतन्तुच्छपुटमितिकोशात्॥

यमानाभिधीयमानसादृश्याश्लाघागर्हावती तुल्यातुल्यविशेषणायथा । उपाध्वन्तत्पान्थाः पुनरपिसरोमार्गतिलकंयदासाद्यस्वेच्छं विलसथविलीनक्लमभराः । इतस्तु क्षाराब्धेर्जरठकमठक्षिप्तपयसोनिवृत्तिः कल्याणीनपुनरवतारः कथमपि ॥ अत्रपूर्वार्द्धेऽभिधीयमानसादृश्ययोः श्लाघापश्चिमार्द्धेतुप्रतीयमानसादृश्ययोर्गर्हाऽवगम्यते। सेयमुभयवतीतुल्यातुल्यविशेषणाभिधीयमानसादृश्यासमासोक्तिः ॥ ६ ॥ अन्योक्तिर्द्विधास्वजातौजात्यन्तरेच । तयोःस्वजातौयथा । लक्ष्मीपयोधरोत्सङ्गकुङ्कुमारुणितोहरेः । बलिरेषसयेनास्यभिक्षापात्रीकृतः करः ॥ अत्रहरिशब्देनबलिशब्देनकश्चित्समानेतिवृत्तःपुंविशेषएवोच्यते । सेयं स्वजातिविषयान्योक्तिः संक्षेपोक्तिरूपत्वात्समासोक्तिरेव॥७॥जात्यन्तरेयथा । पिबन्मधु यथाकामम्भ्रमरः फुल्लपङ्कजे । अप्यसन्नद्धसौरभ्यम्पश्य चुम्बतिकुड्मलम्॥अत्रभ्रमरशब्देनकश्चित्कामीफुल्लपङ्कजशब्देनकापिप्रौढाङ्गनाकुड्मलशब्देनकापिमुग्धाङ्गनाभिधीयते। सेयमन्यजातिविषयान्योक्तिः समासोक्तिरेवभवति ॥८॥अनन्योक्तिशब्देनेहाध्यासविषया तद्भावापत्तिरुच्यते। यथैष ब्रह्मदत्त इति । साद्विधा।शुद्धाचित्रा च। तयोः शुद्धा यथा । सुधाबद्धग्रासैरुपवनचकोरैरनुसृतां किरञ्ज्योत्स्नामच्छान्नबलवलिपाकप्रणयिनीम् । उपप्राकारागृम्प्रहिणुनयनेतर्कयमनागनाकाशेकोऽयङ्गलित हरिणः शीतकिरणः ॥ अत्र कस्याश्चिन्मुखे चन्द्रमसमध्यास्य-

कश्चिदेवम्भूते । साचेयम्पूर्वार्द्धेऽभिधीयमानतुल्यविशेषणा । पश्चिमार्द्धे पुनरनाकाशे कोऽयङ्कलितहरिणइत्यत्राऽतुल्यविशेषणा समासोक्तिरेवानन्योक्तिः । एकस्यैवचाभ्यासादियं शुद्धेत्युच्यते ॥ ९ ॥ चित्रा यथा । कमलमनमभसिकमले च कुवलयेतानि कनकलतिकायाम् । सा च सुकुमारसुभगेत्युत्पातपरम्पराकेयम् ॥ अत्राध्यासः पूर्ववद्वैचित्र्यञ्चनिगदेनैवव्याख्यातम् । सेयमनन्योक्तिः समासोक्तिरेवानेकाध्यासवैचित्र्याच्चित्रेत्युच्यते ॥ १० ॥ उभयोक्तिर्यथा । लावण्यसिन्धुरपरैवहिकेयमत्रयत्रोत्पलानिशशिनासह सम्प्लवन्ते । उन्मज्जतिद्विरदकुम्भतटीचयत्रयत्रापरेकदलिकाण्डमृणालदण्डाः ॥ अत्रापूर्वैयं लावण्यसिन्धुरित्यन्योक्तिः यत्रोत्पलानिशशिनासहसंप्लवन्तइत्यनन्योक्तिः सेयमुभययोगादुभयोक्तिरपदिश्यते ॥ ११ ॥ उपलक्षणञ्चैतत् । तेनान्यापियोपमानोपमेयविषयेसंक्षेपोक्तिःसाऽपिसमासोक्तिरेवभवति । यथा । इन्दुर्लिप्तइवाञ्जनेनजडिताद्दृष्टिर्मृगीणामिवप्रम्लानारुणिमेव विद्रुमलताश्यामेवहेमप्रभा । पारुष्यङ्कलयाचकोकिलवधूकण्ठेष्विवप्रस्तुतंसीतायाः पुरतश्चहन्तशिखिनां बर्हाः सगर्हाइव ॥ अत्रसंक्षेपतः सीताशब्दवाच्यस्यमुखादेरवयवसमूहस्याश्रयतइन्दुरञ्जनेनेवलिप्तोजडितेवमृगीणां दृष्टिः प्रम्लानमिवारुण्यं विद्रुमस्यश्यामेवहेमकान्तिः । परुषाइवकोकिलालापाः सगर्हाइवशिखिनां बर्हाइत्युत्प्रेक्षोक्तेरनुक्ता-

न्यपि तदुपमेयानिमुखादीनिप्रतीयन्ते । सेयमपिसंक्षेपोक्तिः समासोक्तिरेव भवति । कःपुनः समासोक्तेःसमाध्यध्युक्तेर्विशेषः । उच्यते । यत्राप्राकरणिकेऽप्राकरणिकोधर्मोऽध्यास्यतेसासमाध्युक्तिर्यथा । "असहन्तिव्वकिलिं मइपिअअमपञ्चक्खदूसणन्दिणलच्छी" इति । यत्रपुनरप्राकरणिकेप्राकरणिकधर्मः सासमासोक्तिर्यथा । "पिबन्मधुयथाकामंभ्रमरःफुल्लपङ्कजे" इति । ननुधर्मिणोध्यासेसमानमितिचेन्न । सत्वन्तत्वङ्कथय भवताकोहतस्तत्रपूर्वमित्यादिषु, अनाकाशेकोयङ्कलितहरिणः शीतकिरणइत्यादिषुचप्रव्यक्तएवाध्यासविशेषोदृश्यते । एकत्रमनसाऽन्यत्रतुवचसेति । सोयंसमाध्युक्तेःसमासोक्तेश्चभेदोभवति ॥ १२ ॥ ७ ॥ इति समासोक्त्यलंकारनिरूपणम् ॥ अन्यथावस्थितं वस्तु यस्यामुत्प्रेक्ष्यतेऽन्यथा ॥ द्रव्यङ्गुणः क्रियावाऽपि तामुत्प्रेक्षां प्रचक्षते ॥ ५२ ॥ तासुद्रव्योत्प्रेक्षायथा । देहस्थादर्पणे यस्य पश्यति प्रतिमामुमा । भ्रान्यार्द्धार्द्धमिवोत्पन्नमर्द्धनारीश्वरान्तरम् ॥ अत्रप्रतिबिम्बरूपेणदर्पणेऽन्यथावस्थितस्यार्द्धनारीश्वररूपलक्षणस्य द्रव्यस्ययदपरार्द्धोत्पन्नार्द्धनारीश्वरान्तररूपेणद्रव्यान्तररूपेणोत्प्रेक्षणंसेयमुत्प्रेक्षाद्रव्योत्प्रेक्षेतिभवति ॥१ ॥ गुणोत्प्रेक्षायथा । पल्लविअं विअकरपल्लवेहिंपप्फुल्लिअंव्वणअणेहिम् । फलिअंविअपीणपओहरेहिं अज्जाएलावण्णम् ॥ अत्रकरपल्लवादिरूपेणान्यथावस्थितस्याङ्गलावण्यलक्षणस्ययदेत-

त्पल्लवितत्वादिरूपेणान्यथोत्प्रेक्षणम्। सेयमुत्प्रेक्षागुणोत्प्रेक्षेति भवति ॥ २ ॥ क्रियोत्प्रेक्षायथा। सेनागजाःस्वकरपल्लवलेखिनीभिर्गण्डस्थलान्मदमषीं मुहुरादददानाः। मन्ये नरेन्द्र! तवतोयधितीरतालीपत्त्रोदरेषुविजयस्तुतिमालिखन्ति॥ अत्रसेनागजानाङ्गण्डस्थलेभ्योलेखन्याकारैःकरैर्मषीरूपस्य मदपयसोयदादानं यश्चास्यतीरतालीपत्त्रोदरेषुमहावर्णतयानिःक्षेपःसउक्तरूपेणान्यथोत्प्रेक्षणइति सेयमुत्प्रेक्षाक्रियोत्प्रेक्षाभवति ॥ ३ ॥ उत्प्रेक्षावयवोयश्चयाचोत्प्रेक्षोपमामता। मतञ्चेतिनभिद्यन्तेतान्युत्प्रेक्षास्वरूपतः ॥५३॥ तत्रोत्प्रेक्षावयवोयथा। अङ्गुलीभिरिवकेशसंचयं सन्निगृह्यतिमिरम्मरीचिभिः। कुड्मलीकृतसरोजलोचनं चुम्बतीवरजनीमुखंशशी ॥ अत्राङ्गुलीभिःकेशेषुगृहीत्वाप्रियामुखंचुम्ब्यते साचलोचनेनिमीलयतीतिप्रायोवादः। तत्रमुखचुम्बनादिक्रियाप्रधानमङ्गिभूताप्रतीयते। केशग्रहणाक्षिनिमीलनेनचाङ्गभूते प्रधानेतत्राङ्गिभूतायाः क्रियायाउत्प्रेक्षणेनाऽवयवभूताक्रियोत्प्रेक्षिताभवति।यथाहि।कुड्मलीकृतसरोजलोचनमित्यत्रनोत्प्रेक्षापदमेवमङ्गुलीमरीचिभिस्तिमिरकेशसंचयंसन्निगृह्येत्यत्रापितंनप्राप्नोतिमरीच्यङ्गुलिसन्निगृहीततिमिरकेशसंचयमित्येवंवावक्तव्यंभवति।तत्रयोयमवयवक्रियायामप्यन्यपदार्थोक्तद्वितीयाऽवयवक्रियाविलक्षणइवप्रयोगेणपृथक्पदतयावाक्यकल्पः सइवस्यापिव्याख्यानपरत्वेनाप्यनुयोज्यमानःकविभिरुत्प्रेक्षावयवइत्युच्यते।

अन्ये पुनर्यत्र प्रधानक्रियानोत्प्रेक्ष्यतेऽवयवक्रियातूत्प्रेक्ष्यतेतमुत्प्रेक्षाऽवयवं वर्णयन्ति। यथा। लीनेव प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेव च प्रत्युप्तेव च वज्रलेपघटितेवान्तर्निखातेवच। सानश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभिश्चिन्तासन्ततितन्तुजालनिबिडस्यूतेव लग्नाप्रिया॥ तेषां मते पूर्वोदाहरणमुत्प्रेक्षाऽवयवेन भवति॥ ४ उत्प्रेक्षोपमा यथा। किंशुकव्यपदेशेनतरुमारुह्यसर्वतः। दग्धादग्धमरण्यान्याःपश्यतीवविभावसुः॥ अत्रव्यपदेशशब्देन किंशुककुसुमानामग्निसादृश्यमभिधाय दर्शनक्रियोत्प्रेक्ष्यत इति सेयमुत्प्रेक्षोपमापूर्वस्मिन्नप्युदाहरणे मरीचिभिरङ्गुलिभिरिवतिमिरकेशसंचयमिव संनिगृह्योत्युपमानार्थानुप्रवेशउत्प्रेक्षायांद्रष्टव्यः। सेयमुत्प्रेक्षावयवउत्प्रेक्षोपमाचोत्प्रेक्षैवभवति॥५॥मतंयथा। यदेतच्चन्द्रान्तर्जलदलवलीलां वितनुते तदाचष्टेलोकःशशकइति,नोमांप्रतितथा३।अहन्त्विन्दुं मन्येत्वदरिविरहाक्रान्ततरुणीकटाक्षोल्कापातव्रणकिणकलङ्काङ्कितततनुम्॥ अत्र कटाक्षोल्कापातव्रणकिणकलङ्काङ्कितततनुमिन्दुमहं मन्ये इत्यनेनस्वमतद्वारकमुत्प्रेक्षायाः समर्थनं कृतमित्ययं मताभिधानमुत्प्रेक्षाया एव प्रकारः।६॥८॥इत्युत्प्रेक्षालंकारनिरूपणम्॥अप्रस्तुतप्रशंसास्याद्स्तोतव्यस्यायास्तुतिः॥कुतोपि हेतोर्वाच्याच्चप्रत्येतव्याचसोच्यते॥५४॥साचधर्मार्थकामानां प्रायोन्यतमबाधया॥

१ किंशुकः पलाशः।२ मल्लारण्यस्य।३ मन्मतंनेति यावत्॥

स्वाभिप्रायप्रसिद्धयाच्च जायमानेह दृश्यते ॥ ५५ ॥ तासु धर्मबाधयावाच्या यथा । मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः सत्त्वानामपि लक्ष्यते विकृतिमज्ञेतो भयक्रोधयोः । उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले मिथ्यैवव्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः ॥ अत्र यथोक्तैर्हेतुभिः स्वाभिप्रायसाधनेन यदीदमीदृग्विनोदःकुतइति साक्षान्मृगयाऽभिनन्दनं सेयं वाच्यानामप्रस्तुतस्तुतिरहिंसापरमोधर्मइति धर्मम्बाधते ॥ १ ॥ धर्मबाधयैव प्रत्येतव्यायथा । कालक्खरदुस्सिक्खिअबालअरेलग्गमज्झकण्ठम्मि । दोण्हविणरअणिवासोसमअज्जइहोइताहोउ १ ॥ अत्र कालाक्षरदुःशिक्षितेत्यनेन लिपिज्ञानादिभिरधीतधर्मशास्त्राभिमतरूपकपोगण्डः कोपिकयापि अविनयवत्यासोपालम्भमेहिरेकण्ठेलगेत्यभियुज्यते । तत्र यदितेमतमेवं कृतेनरकः स्यात्सयथावयोः सहैवनासौ नरकइति किं तर्हि स्वर्ग इति स्वाभिप्रायसाधनाद् महासाहसनियोगस्तस्येहसाक्षाद्प्रस्तुतस्यास्तोतव्यस्यस्तुतिः प्रतीयतेसेयम्प्रत्येतव्यानामा ऽप्रस्तुतप्रशंसा परस्यदारान्मनसापि नेच्छेदिति धर्ममेवबाधते ॥ २ ॥ अर्थबाधयावाच्या यथा । पङ्गो!वन्ध्यस्त्वमसिनगृहंयासियोर्थी परेषान्धन्योऽन्ध ! त्वन्धनमदवतान्नेक्षसेयन्मुखानि । श्लो-

१ कालाक्षरदुःशिक्षितबालकरे लग मम कण्ठे । द्वयोरपिनरकनिव.सस्यात यदि भविष्यति तद्भवतु ॥

ध्योमूक ! त्वमसि कृपणं स्तौषिनार्थाशयायः स्तोतव्य-
स्त्वम्बधिर ! नगिरंयः खलानां शृणोषि॥अत्रस्तोतव्या-
नाम्पङ्ग्वन्ध्यमूकबधिराणां वन्द्यधन्यश्लाघ्यस्तोतव्य-
पदैः साक्षादभिनन्दनादियं वाच्यानामाप्रस्तुतप्रशंसा-
ऽभिमानितोर्थसिद्धिम्बाधते ॥ ३ ॥ अर्थबाधयैवप्रत्येत-
व्यायथा । कामं वनेषु हरिणास्तृणानिखादन्त्यऽयत्नसुल-
भानि । विदधतिधनिषुनदैन्यन्तेकिलपशवोवयं सुधियः॥
अत्र तेकिलपशवो वयंसुधियइति मृगाणामसाक्षादभि-
नन्दनन्तेनेयमस्तोतव्यानाममीषां वाक्यार्थत्वेन स्तुति
प्रतीतेः प्रत्येतव्यानामाप्रस्तुतप्रशंसा मनस्विनोर्थसि-
द्धिम्बाधते ॥ ४ ॥ कामबाधयावाच्या यथा । णमुअ-
न्तिदीहसासंणरुअन्तिणहोन्तिविरहकिसिआओ । ध-
ण्णाओताओजाणं वहुवल्लहवल्लहोणतुमम् १ ॥ अत्र
धन्यास्तायासान्त्वन्नवल्लभ इतियेयमतिरक्तायाः सा-
क्षादस्तोतव्यस्तुतिः सेयंवाच्यानामाप्रस्तुतप्रशंसातस्या
एवकामसिद्धिम्बाधते ॥ ५ ॥ कामबाधयैव प्रत्येतव्या
यथा । सुहउच्छुअञ्जणन्दुल्लहंप्पिदूराहि आणेन्ता ।
उअआरअजरजीअम्पणेत्तणकआवराहोसि २ ॥ अत्र
पूर्वोक्तास्मदभिप्रायसिद्धैवन्नामत्वयास्माकमुपकृतं ये-
नजीवितमपि हरन्नापराध्यसीति ज्वरम्प्रतियदतिर-
क्ततयावाक्यन्तेनेहास्तोतव्यस्य ज्वरस्यस्तुतिः प्रतीयते ।

१ नम्रियन्ते दीर्घश्वासं नरुदन्ति नभवन्ति विरहक्लेशिताः । धन्यास्तायासां वहुवल्लभवल्लभो नत्वम् ॥ २सुखपृच्छकं जनं दुर्लभमपिदूराद्विआनयिता ॥ उपकारकज्वर ! जीवं प्रणयन्नकृतापराधोसि ॥

सेयम्प्रत्येतव्यानामाऽप्रस्तुतप्रशंसा तस्या एव शरीरव्यापकतया सर्वानपि कामान्बाधते ॥ ६ ॥ ९ ॥ इत्यप्रस्तुतप्रशंसाऽलंकारनिरूपणम् ॥ विविक्षितगुणोत्कृष्टैर्यत्समीकृत्य कस्यचित् ॥ कीर्त्तनं स्तुतिनिन्दार्थं सा मता तुल्ययोगिता ॥ ५६ ॥ साभिधीयमानतुल्यगुणत्वेनस्तुत्यर्था यथा ॥ शेषोहिमगिरिस्त्वङ्गमहान्तोगुरवः स्थिराः । इमां लङ्घितमर्यादाञ्चलन्तीम्बिभृथक्षितिम् ॥ अत्राभिधीयमानमहत्वादि गुणोत्कृष्टाभ्यां शेषाहितुषारशैलाभ्यांसह स्तुत्यर्थन्तुल्ययोगेनक्षितिपतेरभिहितत्वादियंस्तुत्यर्थातुल्ययोगिता ॥ २ ॥ अभिधीयमानतुल्यगुणत्व एवनिन्दार्थायथा । सङ्गतानिमृगाक्षीणान्तडिद्विलसितानि च । क्षणद्वयन्नतिष्ठन्तिघनारब्धान्यपि स्वयम् ॥ अत्रघनारब्धान्यपीत्यादिभिरभिधीयमानतुल्यगुणानाम्मृगाक्षीसङ्गतानान्तडिद्विलसितानाञ्चनिन्दार्थन्तुल्ययोगेनाभिधानादियन्निन्दार्था तुल्ययोगिता ॥ २ ॥ प्रतीयमानतुल्यगुणत्वेस्तुत्यर्था यथा । यमः कुबेरोवरुणः सहस्राक्षोभवानपि । बिभ्रत्यनन्यविषयां लोकपालाइतिश्रुतिम् ॥ अत्रयमादयःपञ्चभवन्तोलोकपालाइत्यनुक्तमपि तुल्यवस्तुयोगितयैवस्तुत्यर्थमेषाम्मिथः सादृश्यम्प्रतीयते । सेयम्प्रतीयमानतुल्यगुणत्वेस्तुत्यर्थातुल्ययोगिता ॥ ३ ॥ प्रतीयमानतुल्यगुणत्वएवनिन्दार्था यथा । राजानमपि सेवन्तेविषमप्युपभुञ्जते ।

१ घनो मेघो घनं निबिडम् ॥

रमन्ते च परस्त्रीभिरहो साहसिकानराः ॥ अत्रयोयं सेवादिर्मानवानां राजविषये स्त्रीषु च वैषम्यहेतुस्तुल्यत्वेनयोगः । राजादीनां वा कर्मतादिरूपतयातत्क्रियायां समावेशः सोमीषाम्मिथः सादृश्यम्प्रत्याययन् राजसेवापरस्त्रीरत्योर्विषोपभोगतुल्यताङ्गमयतीति सोयम्प्रतीयमानतुल्यगुणत्वे निन्दार्थातुल्ययोगिता ॥४॥ अन्येसुखनिमित्ते च दुःखहेतौ च वस्तुनि । स्तुतिनिन्दार्थमेवाहुस्तुल्यत्वे तुल्ययोगिताम् ॥५७॥ सास्तुत्यर्था यथा । आहूतस्याभिषेकायविसृष्टस्य वनायच । नमयालक्षितस्तस्य स्वल्पेप्याकारविभ्रमः॥अत्र रामस्यराज्याभिषेकत्वनगमनयोः पितुरादेशेन तुल्यरूपतयास्तुतिः प्रतीयते ॥ ५ ॥ निन्दार्थायथा । यश्चनिम्बम्परशुना यश्चैनम्मधुसर्पिषा । यश्चैनङ्गन्धमाल्याभ्यां सर्वस्य कटुरेवसः ॥ अत्रयःपरशुनाछिनत्तियेमुं मधुसर्पिषा सिञ्चतियोवागन्धमाल्याभ्यामर्चति । तम्प्रतितुल्यमेवनिम्बस्य कटुत्वमिति समासोक्त्यातदुपमेयस्य निन्दाप्रतीयते ॥ ६ ॥ १० ॥ इति तुल्ययोगिताऽलंकारनिरूपणम् ॥ दोषस्ययो गुणीभावो दोषीभावो गुणस्ययः ॥ सलेशः स्यात्ततोनान्याव्याजस्तुतिरपीष्यते ॥ ५८ ॥ तत्र दोषस्य गुणीभावलेशो यथा । युवैषगुणवान्राजायोग्यस्तेपतिरूर्जितः । रणोत्सवेमनः सक्तं यस्य कामोत्सवादपि ॥ अत्रयेयमुत्तरार्द्धे राज्ञोवीर्यप्रकर्षस्य स्तुतिः साकन्यायानिरन्तरान्भोगान्निर्विविक्षोर्दोषत्वेन प्रतिभासिष्यत

इत्यभिप्रेत्ययोयं विदग्धसख्याराजप्रकोपपरिजिहीर्षया-
दोषोपि गुणरूपेणोक्तः सोयन्दोषस्य गुणीभावोनाम-
लेशतोल्पतयाशनैरनन्यविदित उच्यमानोलेश इत्युच्य-
ते ॥ २ ॥ गुणस्य दोषीभावो यथा । चपलैर्निर्दयश्चासौ-
जनः किं तेन मेसखि ! । आगः प्रमार्जनायैवचाटयोये-
नशिक्षिताः ॥ अत्र पूर्वार्द्धेनमानपरिग्रहानुगुणंसखीना-
मग्रतः प्रकाशम्प्रतिज्ञायतदनिर्वाहमाशङ्कमानातदुप-
हासम्परिजिहीर्षर्दोषाभासन्तद्गुणग्राममाह । "आगः
प्रमार्जनायैवचाटवोयेन शिक्षिताः" इति सोयद्गुणस्य
दोषीभावोनामलेशो भवति ॥ २ ॥ अन्ये पुनः समस्त-
मेवलेशलक्षणमाचक्षते । यत्र दोषस्य गुणीभावो गुणस्य
च दोषीभावइति । सोपिद्विधा । समासोक्त्याऽसमासो-
क्त्या च । तयोः समासोक्त्या यथा । गुणानामेवदौ-
रात्म्याद्धुरि धुर्यो नियुज्यते । असज्जातकिणस्कन्ध-
सुखं स्वपिति गौर्गली १॥ अयमपिप्रकोपभयाल्लेशेनैवो-
च्यतइति लेशः ॥ ३ ॥ असमासोक्त्या यथा । सन्तः
सच्चरितोदयव्यसनिनः प्रादुर्भवद्यन्त्रणाः सर्वत्रैवजना-
पवादचकिताजीवन्ति दुःखं सदा । अव्युत्पन्नमतिः
कृतेन नसता नैवाऽसताव्याकुलो युक्ताऽयुक्तविवेकशून्य-
हृदयोधन्योजनः प्राकृतः ॥ अत्रापि प्रकोपभयादि पूर्व-
वत् ॥ अथैषव्यस्तलक्षणत्वेन कस्मान्न लेशइत्यु-
च्यते । दोषगुणीभावस्याप्रस्तुतस्तुत्यागुणीभावस्य तु

१ कुत्सितगलवान् ॥

व्याजस्तुत्यापहारात् । व्याजस्तुतिरपिद्वेधा । शुद्धा-
मिश्राच । तयोः शुद्धा यथा । पुंसः पुराणादाच्छिद्य स्त्री-
त्वयापरिभुज्यते । राजन्निक्ष्वाकुवंश्यस्यकिमिदन्तवयु-
ज्यते । अत्र शुद्धपरदारापहरणलक्षणनिन्दाव्याजेनस्तु-
तेर्विहितत्वादियं शुद्धानामव्याजस्तुतिर्गुणदोषीभावल-
क्षणाल्लेशान्नपृथक् ॥ ५ ॥ मिश्रायथा । प्रियेासिप्रा-
ज्ञेासि प्रभुरसिकुलीनेास्यऽसियुवायुवत्यस्त्वामेवङ्कति न-
पतिमुर्वीशःवृणुते । अतश्चैनाङ्कीर्तिंरघुनहुषमान्धातृमहि-
षीरपरामृष्टुं वृद्धामधिगतनयेानार्हति भवान् ॥ अत्रस्तु
तिपदमिश्रयैवव्याजगर्हयास्तुतिरिति इयम्मिश्रानाम-
व्याजस्तुतिर्लेशभेदः ॥६॥११॥ इतिलेशालंकारनिरूपणम्॥
कर्त्रादीनां समावेशः सहान्यैर्यः क्रियादिषु ॥ विविक्तश्चा
विविक्तश्च सहोक्तिःसानिगद्यते ॥५९॥ वैसादृश्यवती चे-
यमुच्यमानामनीषिभिः ॥ सहेवादिप्रयोगेषु ससादृश्याच
दृश्यते॥६०॥साकर्तृविविक्तक्रियासमावेशे यथा । केकि-
लालापमधुराः सुगन्धिवनवायवः । यान्तिसार्द्धंजनानन्दै-
र्वृद्धिं सुरभिवासराः ॥ अत्र सुरभिवासराइति कर्तृपदार्थः
केवलएवजनानन्दैः सहवृद्धिप्राप्तिक्रियायां समाविष्टइति
सेयंविविक्तकर्त्रीक्रियासमावेशानामवैसादृश्यवतीसहो-
क्तिः॥१॥कर्मणो विविक्तक्रियासमावेशे यथा ।१उम्भसिपि
आइसमअन्तहविधुरेणभणसिकीसकिसि अन्ति । उअ-

१ उह्यसे प्रियया समं तथापि धुरो भरस्येन भणसि किं क्लेशितइति । उ-
परि भरेण चानतो सुच्यति बलीवर्दोप्यङ्गानि ॥

रिभरेणअअणुअमुअइबइल्लोविअङ्गाइम् ॥ अत्र स-
म्बोध्यमानयुष्मदर्थः कर्मतामापन्नऊह्यस इति क्रि-
यायाङ्केवलएव प्रियापदार्थेन सहसमाविष्टः । सेयं वि-
वित्तक्रियासमावेशानामवैसादृश्यवतीसहोक्तिः ॥ २॥
यत्रानेकोपिकर्त्रादिःप्रविविक्तैःक्रियादिभिः । विविक्त-
भावंलभतेविविक्तासापिकथ्यते ॥६१॥ साकर्तृद्वयस्यपृथ-
क्क्रियासमावेशेयथा । वर्द्धतेसहपान्थानांमूर्च्छयाचूतम-
ञ्जरी । वहन्तिचसमन्तेषामश्रुभिर्मलयानिलाः ॥ अत्र-
चूतमञ्जरीमूर्च्छयासहवर्द्धनक्रियायां मलयानिलाश्चाश्रुभिः
सहवहनक्रियायांपृथक्पृथग्विवेकेनैव कर्तारःसमाविष्टाः
सेयमपिविविक्तकर्तृक्रियासमावेशैरेववैसादृश्यवतीसहो
क्तिरेवङ्कर्मणोपिविवेकेद्रष्टव्या ॥३॥ कर्तृणामविविक्तक्रि
यासमावेशेयथा । धीरेणसमञ्जामाहिअएणसमंअणिठ्-
ठिआउवएसा । उच्छाहेणसहभुत्राआहेणसमङ्गलन्तिसे-
उल्लावा१॥ अत्रयामादीनांबहूनांधैर्यादिभिःसहगलनक्रि-
यायामेकस्यामेवाविवेकतःसमावेशोदृश्यते । सेयमवि-
वित्तककर्तृक्रियासमावेशानामवैसादृश्यवतीसहोक्तिः॥४॥
कर्मणाविविक्तक्रियासमावेशेइवशब्देनसहशब्दस्यस्था-
नेससादृश्यायथा । धीरंव्वजलसमूहन्तिमिणिवहंमिव-
सपक्खपव्वअलोअम् । णइसोत्तेव्वतरङ्गेरआणाइंवग-
रुअगुणसआइंवहन्तम्२॥अत्रधैर्यगजलसमूहस्यतिमिनि

१ धैर्येण समं यामाहृदयेन सममनिश्चिता उपदेशाः । उल्लाहेन सह भुजा बाष्पेण समं गलन्ति अस्या उल्लापाः ॥ २ धैर्यमिवजलसमूहं तिमिवहमिव स-पक्षपर्वतलोकम् । नदीस्रोतांसीव तरङ्गान् रत्नानीव गुरुकगुणशतानिवहनम् ॥

वहनसपक्षपक्षपर्वतलोकस्यनदीस्रोतोभिस्तरङ्गाणांरत्नैश्च गुरुकगुणशतानांमिथःप्रतीयमानंसादृश्यमिवेन द्योत्यते। सहार्थश्चवाक्यार्थसामर्थ्यनलभ्यत इतिसेयन्धैर्यादीनांबहूनांवहनक्रियायामेकस्यामेवविवेकतः कर्मभूतानामावेशेनाविविक्तकर्मक्रियासमावेशानाम ससादृश्यासहोक्तिः॥ ५॥आदिग्रहणाद्गुणसमावेशेपिगुणिनःससादृश्यायथा। सहदीर्घाममश्वासैरिमाःसम्प्रतिरात्रयः। पाण्डराश्वममैवाङ्गैःसहताश्चन्द्रभूषणाः॥ अत्ररात्रयोदीर्घाःपाण्डराश्वेतिदैर्घ्येणपाण्डरत्वगुणयोरविवेकेनरात्रिषुरात्रीणाञ्च तयोः श्वासैरङ्गैश्चसहसमावेशो दृश्यते। सेयमविविक्तगुणसमावेशानाम इवाद्यप्रयोगेपिससादृश्यासहोक्तिः॥ ६॥ १२॥ इति सहोक्तयऽलङ्कारनिरूपणम्॥ द्रव्यक्रियागुणादीनां क्रियाद्रव्यगुणादिषु॥ निवेशनमनेकेषामेकतः स्यात्समुच्चयः॥ ६१॥ इतरेनरयोगोयः समाहारोयउच्यते॥ अन्वाचय इहान्योयः सोपिनान्यः समुच्चयात्॥ ६२॥ द्विपदाश्रयश्च सस्यात्सस्याद्बहुपदाश्रयः॥ उभयाश्रयश्च सस्यात्सस्यादनुभयाश्रयः॥ ६३॥ त्रयः प्रतिपदं वास्युर्द्योतकैरुत्तरत्रवा॥ पदैश्चुद्वाश्च मिश्राश्चतुरीयोद्योतकंविना॥ ६४॥ तत्र द्विपदाश्रयः प्रतिपदाश्रितद्योतकत्वेन द्रव्ययोः क्रियासमुच्चयो यथा। निर्यता परिजनेन बोधितः स्फूर्जमानरुचिरुल्लसद्दृशः। द्वारसंवलनमांसलेाधिकन्दीपकश्चमदनश्चदिद्युते॥ अत्र दीपकश्चमदनश्चेतिद्वेद्रव्येप्रतिपदञ्चकारेणैकस्यांदिद्युत इति

क्रियायां समुच्चयेन निवेशित इति नदिद्युताते इति द्विवचनम्। दीपकमदनाविति चार्थैर्द्वन्द्वश्च नभवति॥१॥ द्विपदाश्रय एवोत्तरपदाश्रितद्योतकेन क्रिययोर्द्रव्यसमुच्चयो यथा। निकामंक्षामाङ्गी सरसकदलीगर्भसुभगा कलाशेषामूर्त्तिः शशिनइव नेत्रोत्सवकरी। अवस्थामापन्ना मदनदहनोद्वाहविधुरामियन्नःकल्याणी रमयति मनः कम्पयतिच ॥ अत्ररमयति, कम्पयतिचेति द्वेक्रिये उत्तरपदवर्त्तिना चकारेणैकस्मिन्मनोलक्षणे द्रव्ये कर्मणिसमुच्चयेनैककालमेव निवेशिते तेनायमन्वाचयोन भवति ॥ २ ॥ बहुपदाश्रयःप्रतिपदाश्रितद्योतकत्वेन गुणानांक्रियासमुच्चयोयथा। अप्राकृतस्तु कथमस्तु नविस्मयाय यस्मिन्नुवास करुणाच कृतज्ञताच। लक्ष्मीश्चसात्विकगुणज्वलितञ्चतेजो धर्मश्चमानविजयौ च पराक्रमश्च ॥ अत्रकरुणाचकृतज्ञताचेत्यादयोगुणाः प्रत्येकम्बहुपदाश्रयत्वेनचकारेणैकस्यामुवासेति क्रियायां समुच्चयेन निवेश्यन्ते। तेन गुणेषुबहुवचनञ्चभवति। करुणाकृतज्ञतादीनां द्वन्द्वसमासश्च नभवति। यस्मिन्नित्यपेक्षायाञ्चायमेव गुणानान्द्रव्यसमुच्चयो भवति॥३॥ बहुपदाश्रय एवोत्तरपदाश्रितद्योतकत्वेन गुणानांक्रियासमुच्चयो यथा। रूपमप्रतिविधानमनोज्ञम्प्रेमकार्यमनपेक्षविकाशि। चाटुचाकृतकसम्भ्रममासाङ्गार्मणत्वमगमद्रमणेषु ॥ अत्ररूपम्प्रेमचाटुचेतिबहवोगुणाउत्तरपदाश्रयेणचकारेणाऽगमदित्येकस्यां क्रिया-

र्थां समुच्चयेन निवेश्यन्ते । तेनागमन्निति बहुवचनं, द्वन्द्वोवानस्यात् । कार्मणत्वमित्यपेक्षायाज्ञायमेवगुणानाज्ञातिसमुच्चयो भवति ॥ ४ ॥ उभयपदाश्रयउत्तरपदाश्रितद्योतकत्वेन द्रव्यगुणानाङ्क्रियासमुच्चयो यथा । विचिन्त्यमानम्मनसाऽपि देहिनामिदं हि लोकेषु चकास्तिदुर्लभम् । निशासचन्द्रा मदिराचसोत्पलाप्रियानुरागोऽभिनवञ्चयौवनम् ॥ अत्र निशामदिरा च द्रव्ये, अनुरागोयौवनञ्चगुणौ बहुष्वपिपदेषु द्वन्द्वे सत्यपि उत्तरपदाश्रयनिवेशिनाचकारेणचकास्तीत्येकस्याङ्क्रियायानिवेश्यन्ते । तेन चकासतीतिबहुवचनं, समासश्च न स्यात् । अयमेवचदुर्लभमित्यपेक्षायान्द्रव्यगुणानाङ्गुणसमुच्चयोभवति । तेऽमीत्रयोपिशुद्धाः ॥५॥ मिश्रःपुनरुभयपदाश्रयवद्बहुपदाश्रयश्चभवति । यथा । आदित्यचन्द्रावनिलोऽनलश्चद्यौर्भूमिरापोहृदयंयमश्च । अहश्चरात्रिश्चउभेचसन्ध्येधर्मश्चजानातिनरस्यवृत्तम् ॥ अत्रादित्यचन्द्रादयोद्रव्यविशेषाउत्तरपदनिवेशिनाप्रतिपदनिवेशिनाचचकारेणजानातीतिएकस्यांक्रियायान्निवेश्यन्ते । तेनचबहुवचनाभावेसमासाभावेचैषमिश्रःसमुच्चयभेदोभवति ॥६॥ अनुभयाश्रयस्तुसमुच्चयोऽन्वाचयश्चनभवति । द्वयोरपिदीपकेनविषयापहारात् । तेनेतरेतरयोगसमाहारयोःसउदाहृियते । तत्रेतरेतरयोगोयथा । सावशेषपदमुक्तमुपेक्षास्रस्तमाल्यवसनाभरणेषु । गन्तुमुत्थितमकारणतःस्मद्योतयन्तिमदविभ्रममासाम् ॥ अत्रोक्तमुपेक्षोत्थि-

तमित्येतेक्रियाद्रव्यविशेषाइतरेतरयोगेनमदविलासद्यो-
तनक्रियायान्निवेश्यन्ते । तेनद्योतयन्तीतिबहुवचनम् ।
द्वन्द्वसमासश्चतद्विवक्षायांस्यात् । नचेहद्योतकश्चकार उ-
त्तरपदेप्रतिपदंविक्षतइतिसोयमुभयाश्रयःसमुच्चयभेदः ॥
७ ॥ समाहारोयथा । वपुर्विरूपाक्षमलक्ष्यजन्मतादिग-
म्बरत्वेननिवेदितंवसु । वरेषुयद्बालमृगाक्षि!मग्यतेतदस्ति
किं व्यस्तमपि त्रिलोचने ॥ अत्र यद्वरेषुमृग्यतेतत्किं
त्रिलोचने व्यस्तमप्यस्तीति ब्रुवन्पुर्वयोवसूनां समुदायं
समस्तमेवाऽभिसन्धत्ते । तस्यचाविर्भूतावयवभेदत्वेनेत-
रेतरयोगस्तिरोहिताऽवयवभेदत्वेन समाहारः । स इह
यदित्येकवचनान्तेन नपुंसकेन च कथ्यते । न चेहक्व
चिदपिचकारोस्तीति सोयमप्यनुभयाश्रयः समुच्चयभे-
दः ॥८॥ चयोगेपीतरेतरयोगः स उत्तरपदयोगेपि यथा।
तत्क्षणं विपरिवर्त्तितह्रियोर्नेष्यतोः शयनमिद्धरागयोः ।
साबभूववशवर्त्तिनी द्वयोः शूलिनः सुवदना मदस्यच ॥
अत्रशूलिनोमदस्यचेत्युत्तरपदाश्रयेण चकारेणद्वौद्रव्य-
विशेषौ वशवर्त्तिनीत्येतस्मिन्गुणपदेयदीतरेतरयोगेन
सन्निवेश्येतेतदाविपरिवर्त्तितह्रियोरित्यादिषु द्वन्द्वयोरि-
तिपर्यन्तेषुद्विवचनमेकशेषोवानस्यात् । सोयमपिद्विपदा-
श्रय उत्तराश्रितद्योतकश्च समुच्चयभेदः ॥ ९ ॥ एवमपरे
पीतरेतरयोगेऽपि चयोगाउदाहार्याः । समाहारस्तु च
योगविषयोविचिन्त्यमानमित्यादिनैवोक्तः । अन्वाचय-
स्तु क्रियाविषयएपोपपद्यते । तत्रचोत्तरपदाश्रय एव

चकारोभवति । यथा । गच्छन्तीनां रमणवसतिंयोषितान्तत्रनक्तं रुद्धालोकेनरपतिपथेसूचिभेद्यैस्तमोभिः । सौदामिन्याकनकनिकषस्निग्धयादर्शयोर्वीं तोयोत्सर्गस्तनितमुखरो माच भूर्विक्लवास्ताः ॥ अत्रपूर्वन्दर्शयेत्युर्वीक्रमविषयत्वेन क्रियामुपन्यस्य तोयोत्सर्गस्तनितमुखरोमाचभूरिति तत्कर्त्तर्यैव धर्मिण्यकर्मकङ्क्रियान्तरमन्वाचीयते । सोयमभिन्नकालत्वभिन्नविषयत्वाभ्यामन्वाचयः समुच्चयाद्भिन्नो भवति । नन्वेवं यदि समुच्चयेपि भिन्नविषये क्रिये तुल्यकालमेव प्रयुज्येते को दोषः स्यान्न कश्चित् । किन्तु तस्य समुच्चयमुद्रयाविषयोपहृतइति नोदाहियते ॥ १० ॥ समासेपीतरेतरयोगादनुभयाश्रितः समुच्चयभेदो यथा । वागर्थाविवसम्पृक्तौवागर्थप्रतिपत्तये । जगतः पितरौ वन्देपार्वतीपरमेश्वरौ ॥ अत्रवागर्थाविवेतिपरवल्लिङ्गता सम्पृक्तौपितरावित्यत्रयोयं[पुमान्स्त्रिया,पितामात्रा] इतिचैकशेषः । तेनैषविशेषलक्षणयोगाद्वक्रोक्तित्वे सत्यलङ्कारतां लभतइति । नधवखदिरादिष्वतिप्रसङ्गइत्ययमपिसमुच्चयभेदः ॥ ११ ॥ समाहारयोगादपियथा । स्त्रीणांहावैः कृतेयत्रनिजकार्यमनोभुवा । अक्षिभ्रुवनिभन्न्यस्तन्तन्मुखे शरकार्मुकम् ॥ अत्रापियोयमक्षिभ्रुवंशरकार्मुकमित्येतयोः[प्राणितूर्यसेनाङ्गानाम्]इति [वाङ्मनसाक्षिभ्रुव]इतिचविशेषलक्षणयोगस्तेनधवखदिरपलाशमित्येवमादिषु नाऽतिप्रसङ्गो भवति ॥ १२ ॥ १३ ॥ इतिसमुच्चयालङ्कारनिरूपणम् ॥

विधिनाथनिषेधेन प्रतिषेधोक्तिरत्रया । शुद्धामिश्रा च साक्षेपोरोधोनाक्षेपतः पृथक् ॥ ६५ ॥ तत्र विध्याक्षेपः शुद्धोयथा । गच्छगच्छसिचेत्कान्त!पन्थानःसन्तुतेशिवाः। ममापि जन्मतत्रैवभूयादत्र गतोभवान् ॥ अत्रगच्छेत्यस्य विधिवाक्यस्य ममापिजन्मतत्रैव भूयादित्याशिषाऽनुकूलतयैवमरणसूचनान्निषेधःक्रियतइतिशुद्धोऽयं विध्याक्षेपः ॥ १ ॥ मिश्रोयथा । अलंविवादेन यथा श्रुतन्त्वयातथाविधस्तावदशेषमस्तुसः । ममात्रभावैकरसम्मनः स्थितन्नकामवृत्तिर्वचनीयमीक्षते ॥अत्रालंविवादेनेति निषेधेनतथाविधः सोस्त्वितिविधिनाचतन्मतमवस्थाप्य ममात्रभावैकरसम्मनःस्थितमितिविधिनानकामवृत्तिर्वचनीयमीक्षतइतिप्रतिषेधेनचयत्पुनराक्षिपतिसोयं विधिनिषेधाभ्यांविधिमिश्रआक्षेपोभवति ॥२॥ निषेधाक्षेपःशुद्धोयथा । कुतःकुवलयङ्कर्णकरोषिकलभाषिणि! । किमपाङ्गमपर्याप्तमस्मिन्कर्मणिमन्यसे ॥ अत्रकुतःकुवलयङ्कर्णकरोषीत्यस्यनिषेधवाक्यस्यकिमपाङ्गमित्यादिनाप्रश्नपरेणापिनिषेधपर्यवसायिनावाक्येनसमर्थनंक्रियतइत्ययंशुद्धोनिषेधाक्षेपः ॥ ३ ॥ मिश्रोयथा । सच्चङ्गरुआगिरिणोकोभणइजलासआणगम्भीरा । धीरेहिंउवमाउन्तह विहुमहणत्थिउच्छाहो१ ॥ अत्रसत्यङ्गुरवोपिगिरयइतिविधिः,कआहजलाशयानगम्भीराइतिपरमताक्षेपः। ता-

१ सत्यं गुरवो गिरयः कोभणतिजलाशयानगम्भीराः ॥ धीरै रुपमात तथाविधं ममनास्ति उक्ताहः ॥ १ ॥

म्याङ्गिरीणांगुरुत्वं, सागराणाञ्चगाम्भीर्यंयदयमुत्तरार्द्धेन धीरापेक्षयानिषेधति । अन्यापेक्षयातत्तदेवविधत्ते । सए षमिश्रोनिषेधाक्षेपः ॥४॥ रोधोनाक्षेपतःपृथगित्युक्तन्त-त्रैतावान्विशेषः। क्रियासूत्तिष्ठमानस्यवारणङ्कारणेनयत्॥ उक्तयायुक्तयाचरोधोयअाक्षेपःसोयमुच्यते॥६६॥प्रतिकूलो-नुकूलश्चविधौरोधोऽभिधीयते॥निषेधेप्युक्तियुक्तिभ्यान्द्वि-प्रकारःसकथयते॥६७॥तत्रोक्तयाविधौप्रतिकूलोयथा । कि-ञ्जम्पिपएणदहमुहजम्पिअसरिसंअणिववहन्तस्सभरम् । एत्तिअजम्पिअसारणिहणंअण्णेविवज्जधारासुगआ१॥ अत्रकिमःप्रतिकूलवाचित्वाद्वचनवृत्त्यैवजल्पन्दशाननश्चि-न्नरथेनरुद्धः । कारणञ्चवज्रप्रभावकीर्तनादितिप्रातिकूल्ये-नोपन्यस्तम् । सोयमौक्तःप्रतिकूलश्चविध्याक्षेपोरोधइत्यु च्यते॥५॥ उक्तैवविधावनुकूलोयथा । हन्तुंविमग्गमा-णोहन्तुंतुरिअस्सअप्पणादहवअणम्।किंइच्छसिकाउंसेप वअवइपिअन्तिविप्पिअंरहुवइणम्२॥अत्रापिकिमःप्रति षेधवाचित्वाद्वचनवृत्त्यैवदशाननवधायोत्तिष्ठमानःसुग्रीवो जाम्बवतारुद्धःकारणम्पुनरानुकूल्येनैवोक्तम् । किमेतत्त्व-यारघुपतेःप्रियरूपंविप्रियमुपक्रान्तमिति सोयमौक्तोऽनु-कूलश्चविध्याक्षेपोरोधइत्युच्यते ॥६॥ विधावेवयुक्तयाऽनु कूलःप्रतिकूलश्चयथा । गच्छेतिवक्तुमिच्छामित्वत्प्रियम्म

१ किंजल्पितेन दशमुखजल्पितसदृशमनिवेद्यतो भरम् ॥ एतावज्जल्पितसारं निधनमन्येपिवज्रधारासुगताः । २ हन्तुं विमार्गमाणो हन्तुंत्वरितस्यात्मना-दशवदनम्॥ किमिच्छसिकर्तुमस्य प्लवगपते प्रियमितिविप्रियं रघुपतेः ।

द्विप्रयैषिणी। निर्गच्छति मुखाद्वाणी मागाइति करोमि किम्॥ अत्रयथोक्तमुक्ताकिङ्करोमीत्यानुकूल्येनैवाह। अत्रकिमः प्रश्नार्थत्वेपि युक्त्यानिषेधार्थत्वङ्गम्यते। सोयं यौक्तोनुकूलोयौक्तश्च विध्याक्षेपोरोधइत्युच्यते। अयमेवचास्यावैयात्योक्तिपक्षे यौक्तप्रतिकूलविध्याक्षेपोरोधोभवति॥ ७॥ युक्त्यानिषेधे प्रतिकूलोयथा। पउरजुआणोगामोमहुमासोजोव्वणंपईठरो। जण्णसुरासाहीणा असईमाहोउकिम्मरउ१॥ अत्रासतीमाभवत्वितियः प्रतिषेधमाह। सप्रचुरयुवाग्रामइत्यादिकारणमुक्त्वातत: किम्मियतामिति प्रातिकूल्येन रुध्यते। तत्र किमः काक्वासूयप्रश्नार्थस्य युक्त्यानिषेधार्थत्वङ्गम्यते। सोयं यौक्तः प्रतिकूलनिषेधाक्षेपोरोध इत्युच्यते॥ ८॥ युक्तैवनिषेधेनुकूलोयथा। कह माज्झिज्जउ मज्झोइमीअ कन्दोट्टदलसरिच्छेहिम्। अच्छीहिञ्जो ण दीसइ घणत्थणभरसट्ठपसरेहिम्२॥अत्रस्तनादिवदस्यामध्योपि माक्षीयतामिति निषेधवादीकेनचिदानुकूल्येन रुध्यते। कथमयम्माक्षीयतामिति योस्याः कुवलयदलसदृशाभ्यां लोचनाभ्याङ्घनस्तनरुद्धप्रसराभ्यान्न दृश्यते। इयं ह्येताभ्यामन्यमीक्षमाणा यन्नपश्यति सोहमिवमध्योपि क्षीयमाणोलक्ष्यते। तत्रकिमः प्रश्नार्थत्वे निषेधा-

१ पौरयुवाग्रामोमधुमासोयौवनं पतिर्वृद्धः। यत्र सुरास्वाधीना असती मा भवतु किं स्त्रियताम्॥ २ कथं माक्षीयतांमध्यएतस्याः कंदोट्टदलसदृशाभ्याम्। अक्षिभ्यां यो न दृश्यते घनस्तनभररुद्धप्रसराभ्याम्॥ कन्दोट्टं कुवलयम्॥

र्थत्वङ्गम्यते। सोयंयौक्तोऽनुकूलश्चनिषेधाक्षेपोरोधइत्युच्यते ॥९॥ निषेधएवोक्तयाप्रतिकूलोऽनुकूलश्चयथा। भ्रुकुटिरारचिता गतमग्रतो हृतमथाननमुक्तमसाधुवा। इयमतिप्रभुता क्रियते बलादकुपितोपि हि यत्कुपितोजनः॥ अत्राऽकुपितोपिकुपितः क्रियतइति योऽयंनिषेधाक्षेपरूपउपालम्भस्तत्रच भ्रुकुटिरारचितेत्यादिवैयात्येन प्रतिकूलंकारणमुपन्यस्य सेयमतिप्रभुतासोयम्बलात्कारइति काङ्क्षावाचनिकमेवोपालम्भमभिधत्ते। तेनायमौक्तः प्रतिकूलश्चनिषेधाक्षेपोरोधइत्युच्यते । अयमेवचास्या अवैयात्योक्तिपक्षे स्वरूपाख्यानादौक्तोऽनुकूलनिषेधाक्षेपोरोधोभवति॥१०॥यदातुकारणमुपन्यस्यापिक्रियासूत्तिष्ठमानोनरुध्यते। तदाक्षेपएव नरोधः। तद्यथा। गमिआकलम्बवाआदिठ्ठम्मेहन्थआरि अङ्गअणअलम्। सहिओगज्जिअसद्दोतहविहुसेणत्थिजीविएआसंघो १॥ अत्र कदम्बवातातिवाहनादीनाञ्जीविताध्यवसायहेतूनामुपन्यासेपिक्रियासूत्तिष्ठमानोनरुध्यते । कथमयन्नजीवतीति। किन्तर्हिकारणमेवाक्षिप्यते। तथापिनास्त्यस्यजीवितेध्यवसायइति। सेयमाक्षेपएवनरोधः ॥ ११ ॥ क्रियोद्यतस्याऽपि वारणेकारणानामन्यपरत्वेरोधोनभवति। यथा। धनञ्जयबहुलभ्यन्ते सुखंक्षेमंचवर्त्मनि। नचमेप्राणसन्देहस्तथापिप्रिय!मास्मगाः२॥अत्रयद्यपियात्रोद्य-

१ गमिताः कदम्बवातादृष्टं मेघान्धकारितं गगनतलम्। सोढोगर्जितशब्दस्तथापि खल्वस्यानास्तिजीविते आशंसा ॥ २ नमाङ्योगे इति अडभावः ॥

तः प्रियोरुध्यतेप्रभूतार्थलाभादीनाङ्कारणानांगमनपर त्वमेवननिवारणपरत्वमतोयन्नरोधःकिन्तर्हिआक्षेप ए- वभवति ॥ १२ ॥ १४ ॥ इतिआक्षेपालङ्कारनिरूपणम् । ज्ञे- यःसोऽर्थान्तरन्यासोवस्तुप्रस्तुत्यकिञ्चन ॥ तत्साधनसम- र्थस्यन्यासोयोऽन्यस्यवस्तुनः ॥ ६८ ॥ सउपन्यस्तवस्तूनां साधर्म्येणचकथ्यते ॥ वैधर्म्येणचविद्वद्भिर्वैपरीत्येनकु- त्रचित् ॥६९॥ तेषुसाधर्म्येणयथा । पयोमुचः परीतापंहर न्त्येतेशरीरिणाम् । नचात्मलाभोमहतांपरदुःखेापशा न्तये ॥ अत्रपरीतापहरणक्षमस्यजलदाख्यस्यमहावस्तु नोन्यसनं विधायतत्साधनसाधर्म्येणैवतत्साधनक्षममम- हापुरुषलक्षणंवस्त्वन्तरमुपन्यस्यति । सोयं साधर्म्येणा- र्थान्तरन्यासः ॥ १ ॥ वैधर्म्येणयथा । प्रियेण सङ्गृन्थ्य विपक्षसन्निधावुपाहितां वक्षसिपीवरस्तने । स्रजन्नका- चिद्विजहौ जलाविलां वसन्ति हि प्रेम्णिगुणा न वस्तुनि॥ अत्रापि प्रियतमेनस्वयङ्कान्ताहृदये समारोपितायाः स्रजःप्रेमकारणमुपन्यस्यजलाविलदोषवत्याअपिस्रजोय- दत्यागकारणन्तदिहवैधर्म्यद्वारेण प्रतिपादितमतोवैध- र्म्येणाऽयमर्थान्तरन्यासः ॥२॥ विपर्ययेणयथा । जोजस्स हिअग्गदयिओ दुःखन्देन्तोवि सोसुहन्देइ।दइअणहदूनि आणविवठ्ठइथणआणरोमञ्चो२॥ अत्रसाधनसमर्थव- स्तुप्रथमतएवोपन्यस्यपश्चात्साध्य मभिहितमितिविप-

१ उपसर्गस्यघञ्यमनुष्ये बहुलमिति पूर्वपदस्य दीर्घः ॥ २ ॥ योयस्य हृदय- दयितो दुःखंददन्नपिसुखंदत्ते । दयितनखदूनितयोरपिवर्द्धतेस्तनयोरीमाद्यः ॥

र्थासादयंविपर्ययेानामार्थान्तरन्यासः ॥ ३ ॥ प्रोक्तोयस्तू भयन्यासेाऽर्थान्तरन्यासएवसः ॥ सप्रत्यनीकन्यासश्चप्रतीकन्यासएवच ॥७०॥ तेषूभयन्यासेायथा । तेविरलासप्पुरिसाजेअभणन्ताघडन्तिकज्जलावे । थेाअव्विप्रतेविदुमाजेअमुणिअकुसुमणिग्गमादेन्तिफलम् १ ॥ अत्रविद्यमानमपि साध्यसाधनभावमप्रतिपाद्यदुभयेार्वस्तुनेार्न्यसनं सेायमुभयन्यासः ॥ ४ ॥ प्रत्यनीकन्यासेायथा । विरलाउवअरिइच्छिअणिरवेक्खाछलहरव्ववच्चन्ति । झिज्झन्तिताणविरहेविरलच्छिअसरिप्पवाहव्व२ ॥ अत्रयदिदमुपकृत्यानपेक्षितप्रत्युपकाराणाङ्गमनं यच्चाकृतप्रत्युपकाराणान्तद्विरहेऽवसादनं तदुभयमपि जलधरसरित्प्रवाहयेारन्योन्यातिशयितयेारुपन्यस्यमानम्प्रत्यनीकन्यासेाभवति ॥५॥ प्रतीकन्यासेायथा । का कथा बाणसन्धानेज्याशब्देनैवदूरतः । हुङ्कारेणैवधनुषः सहि विघ्रानपेाहति ॥ अत्रविघ्रेात्सारणसमर्थाया बाणमेाक्षणलक्षणायाः क्रियायाः प्रथमावयवभूतज्याशब्दन्यनुषेाहुङ्कारमिवेति तत्साधनमुपन्यस्य प्रतीकन्यासनामानमर्थान्तरन्यासमभिधत्ते ६ ॥७५॥ इतिअर्थान्तरन्यासालंकारनिरूपणम् ॥ गुणजातिक्रियादीनांयत्रवैकल्यदर्शनम् ॥ विशेषदर्शनायैवसाविशेषेाक्तिरिष्यते ॥७१ ॥ प्रत्ये-

१विरलाः सत्पुरुषायें अभणिताघटन्ते कार्यलाभे । खल्वाएव तेऽपि द्रुमाअनुमितकुसुमनिर्गमाददतेफलम् ॥ २विरलाउपकृत्यएवानिरपेक्षाजलधाराइव वर्तन्ते । क्षीयन्ते तेषांविरहे विरलाएव सरित्प्रवाहा इव ॥

तव्येऽभिधेयेचसाविशेषस्यकारणे ॥ वैकल्यादर्शनेनाऽपि क्वचिदप्युपपद्यते ॥ ७२ ॥ सागुणवैकल्येनयथा । न कठोरन्नवातीक्ष्णमायुधम्पुष्पधन्वनः । तथापिजितमे-वाभूदमुनाभुवनत्रयम् ॥ अत्रातीक्ष्णेनाकठोरेणचायुधेन पुष्पधन्वात्रीणिजगन्ति विजयतइतितस्यप्रभावातिशयः प्रतीयते । सेयम्प्रतीयमानविशेषहेतुर्गुणवैकल्यवतीवि-शेषोक्तिः ॥१॥ जातिवैकल्येनयथा । न देवकन्यका ना-ऽपिगन्धर्वकुलसंभवा । तथाप्येषा तपोभङ्गंविधातुं वेध-सोप्यऽलम् ॥ अत्रदेवकन्यकादित्वाभावेप्येषावेधसोपि तपोभङ्गंविधातुमलमितिवर्णनीयोरूपातिशयः प्रतीयते। सेयम्प्रतीयमानविशेषहेतुर्जातिवैकल्यवती विशेषोक्तिः ॥ २ ॥ क्रियावैकल्येनयथा । नबद्धाभ्रुकुटिर्नाऽपिस्फुरितो रदनच्छदः । नच रक्ताभवद्दृष्टिर्जितज्ञद्विषतां कुलम् ॥ अत्रभ्रूभङ्गादेरभावेपियोयन्द्विषताञ्जयस्तेनवर्णनीयस्यप्र-तापातिशयः प्रतीयते । सेयम्प्रतीयमानविशेषहेतुः क्रि-यावैकल्यवतीविशेषोक्तिः ॥ ३ ॥ आदिग्रहणाद्द्राव्यवै-कल्येनयथा । नरथानचमातङ्गानहयानचपत्तयः । स्त्री-णामपाङ्गदृष्टैवजीयतेजगतांत्रयम् ॥ अत्ररथादेरभावेपि जगत्त्रयविजयहेतुः स्त्रीणामपाङ्गावलोकनमभिधीयते । सेयमभिधेयविशेषहेतुर्द्रव्यवैकल्यवतीविशेषोक्तिः ॥ ४ ॥ द्रव्यस्यापिवैकल्येनयथा । एकचक्रोरथोयन्ताविकलो विषमाहयाः । आक्रामत्येवतेजस्वीतथाप्यर्कोजगत्त्रयम्॥ अत्ररथादीनान्द्रव्याणामेकचक्रत्वादिभिर्वैकल्येपि यदे-

तद्भगवतोभास्करस्य भुवनत्रयाक्रमणन्तस्येह तेजस्वि-
ताहेतुरभिधीयते । सेयमभिधेयविशेषहेतुर्वैकल्यवद्द्र-
व्यानामाऽपराविशेषोक्तिः ॥५॥ द्रव्यस्ययोगायोगाभ्या-
मवैकल्पेनापिक्वचिदेषाविशेषायाऽविशेषायच यथा । प्र-
यन्तयारथक्षोभादंसेनांसेनिपीडितः । एकःकृतीशरीरे-
स्मिन्शेषमङ्गंभुवोभरः ॥ अत्रायन्तयारथृष्टोंसः सपुण्यवां
स्तयाचाऽस्पृष्ट शेषमङ्गम्मेनिरर्थकमिति योऽयमवैकल्यद-
र्शनेऽपि विशेषस्तेनैषा हेतुमत्यपि हेतुमता विशेष्यमाणा
यथोक्ता विशेषोक्तिर्भवति । यापुनरिहोर्वश्यामितोवा-
क्याद्गुणादिविशिष्टाऽवगतिःसापर्यायोक्तिर्नविशेषोक्तिः॥
६॥ १६ ॥ इतिविशेषालङ्कारनिरूपणम् ॥ क्रियाकारक
सम्बधिसाध्यदृष्टान्तवस्तुषु ॥ क्रियापदाद्युपस्कारमाहुः
परिकरम्बुधाः ॥ ७३ ॥ तेषुक्रियापरिकरोयथा । ववसि-
णिवेइअत्थोसोमारुइलद्धपच्चआगअहरिसम् । सुग्गीवे-
णउरत्थलवणमालामलिअमहुअरंउवऊढो१ ॥ अत्रमा-
रुतिलब्धप्रत्ययागतहर्षमित्यनेन,उरःस्थलवनमालामृदि-
तमधुकरमित्यनेनचोपगूहनक्रियायाःपरिकरितत्वादयङ्
क्रियापरिकरः ॥ १ ॥ कारकपरिकरोयथा । पढिआअ-
हथ्थसिठिलिअणिरोहपण्डुरसमूसत्तकवोला । पेल्लिअ-
वामपओहरविसमुण्णडाहिणत्थणीजणअसुआ२॥ अत्रह-

१ व्यवसायनिवेदिताथः समारुतिर्लब्धप्रत्ययागतहर्षम् । सुग्रीवेणउरः स्थलव-
नमालामृदितमधुकरमुपगूढः ॥ २पतिताच हस्तग्रथिलितनिरोधपाण्डुरसमु-
च्छ सत्कपोला । प्रेरितवामपयोधरविषमोन्नतदक्षिणस्तनीजनकसुता ॥

स्तशिथिलितनिरोधपाण्डुरसमुच्छ्वसत्कपोलेत्यनेन,प्रेरितवामयोधरविषमोन्नतदक्षिणस्तनीत्यनेनच,जनकसुतेतिचकारकपदस्यपरिकरितत्वादयङ्कारकपरिकरः॥२॥सम्बन्धिपरिकरोयथा। उम्मूलिआणखुलिआउक्खिपन्ताणउज्जअंओसरिआ।णिज्जन्ताणणिराआगिरीणमग्गेणपत्थिआणइसोत्ता१॥अत्रोध्रियमाणगिरिसम्बन्धिनोप्रयोजकाअपिनदीप्रवाहविशेषणैरुपस्कृताइतिसम्बन्धिपरिकरोयम्॥३॥ साध्यपरिकरोयथा। धीरंहरइतिसाओविणअङ्गीव्वणमओअणङ्गोलज्जम्। एक्कन्तगहिअवक्खोकिंसीउजण्ठवेइवअपरिणामो२॥ अत्रगतवयसोनधैर्यन्नविनयोनलज्जेतिसाध्यम्। विषाद,यौवन,मदाऽनङ्गक्रियादृष्टान्तैरुपस्कृतमितिसाध्यपरिकरोयम्॥४॥दृष्टान्तपरिकरोयथा। मज्झट्ठिअधरणिहरच्छिज्जइअसमुद्दमण्डलंउव्वेलम्। रइरहवेअविअलिअम्पडिअंविअउक्खडक्खके।डिङ्गक्कम्३॥ अत्रप्रक्षिप्तमन्दरसमुद्रोदाहरणभूतंरविरथचक्रमुत्कटाक्षकोटीतिविशेषणेनसाम्यसिद्धयेपरिकरितमितिदृष्टान्तपरिकरोयम्॥५॥वस्तुपरिकरोयथा। देवीपुत्रमसूत नृत्यतगणाः!किन्तिष्ठतेत्युद्भुजेहर्षाद्भृङ्गरिटावुदाहृतगिराचामुण्डयालिङ्गिते। पायाद्वोजितदेवदुन्दुभिघनध्वानःप्रवृ-

१ उन्मूलितामखण्डिताउत्क्षिप्ता मत्त ऋजुकं प्रस्थिताः। निर्यान्तोननिरापा गिरीणां मार्गेणप्रस्थितानदीप्रवाहाः॥ २ धैर्यंहरति विषादोविनयंयौवनमदोऽनङ्गोलज्जाम्। एकान्तगृहीतपक्षः किंशिष्यतु यत्स्थापयति वयः परिणामः॥ ३मध्यस्थितधरणिधरं चीयते च समुद्र मण्डलमुद्वेलम्। रविरथवेगविगलितं पलितमिवोत्कटाक्षकोटिं चक्रम्॥

तस्तयोरन्योन्याङ्गनिपातजर्जरतरस्थूलास्थिजन्मारवः॥ अत्रचामुण्डाभृङ्गरिटिपरिष्वङ्गसङ्गहितपरस्परहृदयास्थिजन्मनःशब्दस्यवस्तुतयापरिगृहीतस्यदेवीपुत्रमसूतेत्यादिभिः परिकरितत्वादयंवस्तुपरिकरः ॥ ६ ॥ क्रियायथासमासेनतथाकृत्तद्धितादिभिः । विशेष्यतेतदाहुस्तं क्रियापरिकरम्परम् ॥७४॥ तत्रकृतातादर्थ्येनयथा । गेहाद्भातासरितमुदकंहारिकानाजिहीर्षेमङ्क्षयामीति भ्रयसियमुनातीरवीरुद्गृहाणि । गोसन्दायीऽविशसिविपिनान्येवगोवर्द्धनाद्रेर्नत्वंराधे!द्रुशिनिपतितादेवकीनन्दनस्य॥ अत्र [तुमुण्ण्वुलौक्रियायांक्रियार्थायाम्]इत्यादिभिरुपपदभूतापिक्रियैवविशिष्यते। तेनायमपरःक्रियापरिकरोभवति ॥७॥एवंलक्षणादिषुशत्रादिभिरपिद्रष्टव्यम् । तद्यथाऽव्ययेन । सलीलमासक्तनितान्तभूषणंसमासजन्त्याकुसुमावतंसकम् । स्तनोपपीडंरनुनुदेनितम्बिनाघनेनकाश्चिज्जघनेनकान्तया ॥ अत्रस्तनाभ्यामुपपीडयन्त्यायन्नुनुदेइत्यर्थाक्रियाविशेषणमेवैतदिति । अयमपिक्रियापरिकरोभवति ॥८॥ एवंयथाविध्यनुप्रयोगादिष्वपिद्रष्टव्यम् । तेनक्रियायाः क्वचिदान्तरविशेषणयोगाद्वाक्यत्वम्भवतीत्यपिव्याख्यातम् । यथा । शय्यन्तेहतशायिकाः पथिरुच्छायानिषण्णाध्वगैःश्रीकण्ठायतनेषुधार्मिकजनैरास्यन्तउष्ट्रासिकाः । शून्येतत्रनिकुञ्जशाखिनिसखि!ग्रीष्मस्यमध्यन्दिनेसज्जानान्दयिताभिसारणविधौरम्यः क्षणोव-

१ अण्कर्मणिचेत्यणिङीप् ॥ २ सप्तम्यांचोपपीडरुधकर्षेःइतिणमुल् ॥

र्तते ॥ अत्रउष्ट्रासिकाआस्यन्तेहतशायिकाः शय्यन्तेइ-
त्यमूभ्यां सामान्यविशेषोपचरितरूपो भावात्मण्वुलैव
प्रत्याय्यते । सआख्याताभ्यांसामान्यरूपेणण्वुलन्ता-
भ्यां विशेषरूपेण । बहुवचनञ्चेहकुत्सातिशयार्थम् । या
हिनामोष्ट्रस्य कुत्सावन्त्योबहुप्रकारवत्योवक्षःसुआसि-
कायाश्चहतानामतिशयव्यत्यस्तास्तथाभूताएवभूयस्यःशा-
यिकाःप्रतीतास्ताभिर्विशेषरूपाभिरियमासिकाशायिकाचो-
पमानोपमेयसम्बन्धजनितभेदाऽपरिग्रहाल्लकारेणापि व-
हुत्वेनैवप्रत्याय्यते । तेनोष्ट्रासिकाइवासनानिहतशा-
यिकाइवशयनानिक्रियन्ते । भवन्तीतिवाक्यार्थोभवति ।
सोयंयथोक्तक्रियापरिकरः ॥ १ ॥ क्वचित्पुनर्बाह्यमपिकृ-
द्रूपङ्कृदर्थरूपंवाक्रियाविशेषणम्भवतियथा । शतंवारा-
नुक्तःप्रियसखिवचोभिःसपरुषैःसहस्रन्निर्धूतः पदनिप-
तितःपार्ष्णिहतिभिः । कियत्कृत्वोबद्धाःपुनरिहनवेक्षिभु
कुटयस्तथापिक्लिश्यन्मांक्षणमपिनधृष्टोविरमति॥ अत्र
वारानितिवारशब्दःकृदन्तोवारसङ्ख्यायाः कृत्वसुजिति
कृत्वसुच्कृदर्थस्तावित्यौद्भावव्यावृत्तिरूपेणक्रियायाविशे-
षणम्भवतः । नन्वेवमुष्ट्रासिकादीनाञ्चक्रियाविशेषण-
त्वात्कर्मतेवनपुंसकलिङ्गतापिप्राप्नोति यथा मृदुपचति
प्रशस्तम्पठतीति? । उच्यते । त्रिधाखलुक्रियाविशेषणम्भ-
वति।बाह्यमाभ्यन्तरम्बाह्याभ्यन्तरञ्च । तत्रबाह्यङ्कर्मरूपं
वारादि । आभ्यन्तरंविशेषरूपमुष्ट्रासिकादि । बाह्या-

१ व्याङ् परिभ्योरम इति परस्मैपदम् ॥

भ्यन्तरङ्गुणरूपम्मृद्वादि । तेषुबाह्यंसोयमित्यभिधाया-
सम्बन्धादभेदोपचारेणाविचलितस्वरूपमेवप्रधानं विशिं
षत्कथमिवस्वलिङ्गञ्जहयात्। आभ्यन्तरन्तु विशेषापरि-
ग्रहादाविष्टलिङ्गसंख्यङ्कथमिवान्यलिङ्गङ् गृह्णीयात् ।
बाह्याभ्यन्तरन्तु गुणत्वात्स्वलिङ्गविरहे"गुणवचनानामा-
श्रयतेालिङ्गवचनानीति" विशेष्यलिङ्गग्राह्येवभवति । त-
द्धितकृत्त्वसुचउक्तः ॥ १० ॥ थालादिनोच्यते । यथा ।
अकृतकवलारम्भैर्भूयोभयस्थगितेक्षणाःकिमपिवलितग्री
वंस्थित्वामुहुर्मृगपङ्क्तयः । गगनमसकृत्पश्यन्त्येतास्त-
थाश्रुवनैमुखैर्निपतितियथाशृङ्गाग्रेभ्योभ्रमन्नयनोदकम् ॥
अत्राद्याः [प्रकारवचनेथाल्] अनेकवारानित्यर्थेऽसकृ-
दितितद्धितेन,पश्यन्तीति क्रियां वलितग्रीवमितिसमासे-
न,किमपीतिनाम्नाऽव्ययेन,स्थित्वेतिकृता,मुहुरितिकृदर्थेवी-
प्सयाचक्रियाविशेषणेनसहविशेषयति॥द्वितीयश्चयथाभ्रम-
न्नयनोदकन्निपततीति शतृलक्षितयापतनक्रिययातमेवा-
र्थमनुमन्दधानः पूर्वक्रियायाएवविशेषणम्भवति । सोयंकृ-
त्तद्धितसमासाव्ययानांसन्निपातरूपेपिक्रियापरिकरेयथा-
तथेत्येतयोःप्राधान्यात्तद्धितेनैवोपदिश्यते। एतेनतद्यदोर्वि-
पर्ययस्तद्विशेषणयोगश्चव्याख्यातः॥११॥तद्यथा । १जहजह
णिसासमप्पइतहतहवेवइतरङ्गपडिमापडिअम् । किङ्क-
अव्वविमूढंवेवइहिअअंव्वउअहिणोससिबिम्बम्॥अत्रय-

१ यथा यथा निश्वासमर्पयति तथा तथावेपते तरङ्गप्रतिमापतितम् । किं-
कर्तव्यविमूढं वेपते हृदयमिवोदधेःशशिबिम्बम् ॥

थातथेतिक्रियाविशेषणयोरपरमपिविशेषणंवीप्साभवति।
सोयमेवम्प्रकारःक्रियापरिकरोद्रष्टव्यः॥१२॥क्रियाविशेष-
णंकैश्चित्सम्बोधनमपीष्यते॥सम्बन्धिभिःपदैरेवलक्ष्यन्ते
लक्षणादयः॥७५॥तेषुसम्बोधनपरिकरोयथा। धर्मस्योत्स
ववैजयन्तिमुकुटस्रग्वेणिगौरीपतेस्त्वांरत्नाकरपत्निजह्नुत
नयेभागीरथि!प्रार्थये। त्वत्तोयान्तशिलानिषण्णवपुषस्त्व
द्वीचिभिःप्रेङ्खितस्त्वन्नामस्मरतस्त्वदर्पितदृशः प्राणाःप्रया
स्यन्तिमे॥ अत्रभागीरथीतिसम्बोधनपदेनधर्मस्योत्सववै
जयन्तीत्यादिभिःपरिष्क्रियते। तत्रयथाकथञ्चिदप्युच्य
मानोर्थः क्रियाविशेषणन्नातिक्रामतीत्ययमपिक्रियापरि
करः॥१३॥लक्षणपरिकरोयथा। महाप्रथिम्नाजघनस्थलेनसा
महेभकुम्भोच्चकुचेनवक्षसा। मुखेनदीर्घोज्ज्वललोलचक्षु-
षा वयस्य!कान्ताकथयङ्क?वर्त्तते॥अत्रजघनस्थलादीनिल-
क्षणानिमहाप्रथिम्नेत्यादिभिः परिष्क्रियन्तेसोयंलक्षणप-
रिकरः॥१४॥हेतुपरिकरोयथा। त्वयाजगन्तिपुण्या-
नित्वया१ऽपुण्याजनोक्तयः। नाथवन्नस्त्वयालोकास्त्वम-
नाथाविपद्यसे॥ अत्रप्रथमतृतीयपादयोस्त्वयात्वयेति
हेतूद्वितीयचतुर्थपादाभ्याम्परिष्क्रियेतेसोयं हेतुपरिक-
रः॥१५॥सहार्थपरिकरोयथा। अनेनयूनासहपार्थिवे-
नरम्भोरु!कञ्चिन्?मनसोरुचिस्ते। शिप्रातरङ्गानिलकम्पि-
तासुविहर्तुमुद्यानपरम्परासु॥ अत्रानेनेतिसहार्थोयूना
पार्थिवेनेतिचपदाभ्याम्परिष्क्रियते सोयंसहार्थपरिकरः

१साधकतमत्वविवक्षयातृतीया। त्वयीतिपाठे त्वद्विषय इत्यर्थः।

॥ १६ ॥ तादर्थ्यपरिकरोयथा। इन्दीवरश्यामतनुर्नृपो१ यंत्वंरोचनागौरशरीरयष्टिः। अन्योन्यशोभापरिवृद्धयेऽयंयोगस्तडित्तोयदयोरिवास्तु ॥ अत्रान्योन्यशोभापरिवृद्धयइतितादर्थ्यार्थः शेषपदार्थैः परिष्क्रियते सोऽयन्तादर्थ्यपरिकरः ॥ १७ ॥ उपपदपरिकरोयथा। प्रत्यक्षवस्तुविषयाय जगद्धिताय विश्वस्थितिप्रलयसम्भवकारणाय। सर्वात्मने विजितकोपमनोभवायतुभ्यन्नमस्त्रिभुवनप्रभवे शिवाय ॥ अत्रनमस्तुभ्यमित्युपपदार्थःसमस्तपदैःपरिष्क्रियतेसोयमुपपदपरिकरः ॥ १८ ॥ उपमारूपकादीनांशब्दार्थोभयभङ्गिभिः ॥ साधर्म्योत्पादनंयत्तमन्येपरिकरंविदुः ॥ ७६ ॥ तत्रसशब्दकृतउपमायांयथा। कहकहविरएइपअम्मग्गम्पुलएइछेज्जमाविसइ। चोरव्वकईअत्थंलद्धुन्दुःक्खेणणिव्वहइ२ ॥ अत्रपदमार्गच्छेदैःशब्दैर्भिन्नार्थैरभिन्नार्थविरचनादिक्रियानिवेशिभिःकविचोरयोरप्रसिद्धमौपम्यं साधितमितिशाब्दोयमौपम्यपरिकरः ॥ १९ ॥ अर्थकृतोरूपकेयथा। विअडेगअणसमुद्दे दिअसेसूरेणमन्दरेणवमहिए। णीअइमइरव्वसंज्झाअतिस्सामग्गेणअमुअकलसोव्वससी४॥ अत्रगगनेसमुद्रत्वेन निरूपितेसूर्यसन्ध्याशशिभिर्मन्दरमदिराऽमृतकलशैश्च मथनादिक्रियानिवेशिभिरर्थैः परस्परोपमानात्साधर्म्य-

१नृपोसावित्यपिपाठः। २कथंकथमपिरचयति मार्गं प्रलोकते छेद्यमाविशति। चोरइवकविरर्थं लब्धुंदुःखेन निर्वहति ॥ ३पदरीतिच्छन्दोभिः। ४वितते गगनसमुद्रे सूर्येण मन्दरेणेवमथिते। नीयते मदिरेवसंध्या तस्यामार्गे ऽमृतकलशइवशशी ॥

मुत्पादितमित्यार्थीयंरूपकपरिकरः ॥ २० ॥ उभयकृतश्च विरोधश्लेषयोर्यथा । रइमुणालाहरणो णलिणदलत्थह-अपीवरत्थणअलसो । वहइपिअसङ्गमम्मिविमअणा-अप्पसाहणञ्जुअइजणो१ ॥ अत्रप्रियसङ्गमेपिमदनाक-ल्पप्रसाधनम्भवतीति विरुद्धार्थयोः साधर्म्योत्पादनाय जलेक्रीडतोयुवतिजनस्य यथोक्तविशेषणाभ्यांशब्दनोऽर्थ-तश्चोपस्कारःकृतइत्युभयकृतोयंविरोधश्लेषपरिकरः । ए-वमलङ्कारान्तरेष्वपिद्रष्टव्यम् ॥ २१ ॥ एकावलीतिभासा-पिभिन्नापरिकरान्नहि ॥ त्रिधासापिसमुद्दिष्टाशब्दार्थी-भयभेदतः ॥७७॥ तत्रशब्दैकावलीयथा । पर्वतभेदिपवि-त्रं२जैत्रन्नरकस्य३बहुमतङ्ग४हनम् । हरि५मिवहरिद्द्मि-वहरि७मिववहतिपयः पश्यतपयोष्णी ॥ अत्रहरिमिव हरिमिवहरिमिवेतिशब्दैकावल्या विभिन्नार्थयापयःकर्म-कारकमुपस्क्रियतेसेयंशब्दैकावलीपरिकरस्यैवभेदः ॥२१॥ अर्थैकावलीयथा । किमितिकबरीयादृक्तादृग्दृशौकि-मकज्जलेनखलुलिखिताः पत्त्रावल्यःकिमद्य कपोलयोः । अयमयमयङ्किञ्चुक्काम्यत्यसंस्मरणेनतेप्रियसखि सखीह-स्तन्यस्तोविलासपरिच्छदः८॥अत्रायमयमयमितिसर्वना-मपरामृष्यमाणयाप्रागुपन्यस्तकारणभूतयाततोन्यया वा तथाविधयाऽर्थैकावल्यापरिच्छदइतिकर्तृकारकमभिन्ना-

१ रतिसृणालाभरणो नलिनीदलस्थगितपीवरस्तनकलशः । वहति प्रिय-संगमेपिमदनाकल्पप्रसाधनंयुवतिजनः॥२पर्वतभेदकं पूतं पर्वतभेदिनंपवित्रं चायतेइतिच ॥ ३नरकासुरस्यनिरयस्यच ॥ ४ अतिगम्भीरं संमतं बहून्मतङ्गान् गजान् हन्तीतिच ॥ ५इन्द्रम् । ६विष्णुम् । ७सिंहम् ॥ ८ कुसुमोत्तरीयम् ।

र्थइवपरिष्क्रियतेसेयमर्थैकावलीपरिकरस्यैवभेदः॥ २३ ॥ उभयैकावलीयथा॥ अम्बातुष्यतिनमया नस्नुषया सापि नाम्बयानमया।अहमपिनतयानतया वद राजन्! कस्य-दीषीयम् ॥ अत्राम्बास्नुषाऽस्मदर्थलक्षणैरर्थैस्तद्वाचिभिः सर्वनामभिःशब्दैरेकावलीक्रमेण मिथोऽनुस्यूतैर्मिथोऽनुस्यू तएवतुष्यतीतिक्रियाहेतुर्मयेत्यादिभिःपरिष्क्रियतेसेयमु-भयग्रथितत्वादुभयैकावलीपरिकरस्यैवभेदः २४ ॥ १७ ॥ इतिपरिकरालंकारनिरूपणम् ॥ क्रियाजातिगुणद्रव्य वाचिनैकत्रवर्त्तिना ॥ सर्ववाक्योपकारश्चेद्दीपकन्तन्निग-द्यते ॥ ७८ ॥ अर्थावृत्तिःपदावृत्तिरुभयावृत्तिरावली ॥ सम्पुटंरसनामालाचक्रवालञ्चतद्भिदाः ॥ ७९ ॥ तेषुक्रिया वाचिनाआदिदीपकंयथा । चरन्ति चतुरम्भोधिवेलो-द्यानेषु दन्तिनः । चक्रवालाद्रिकुञ्जेषु कुन्दभासोगुणाश्च ते ॥ अत्रचरन्तीतिक्रिययाद्वयोरपिवाक्ययोरादिपदस्थ-यैवोपकारःक्रियतइत्यादिदीपकमिदङ्क्रियाविषयमुच्य-ते। एवम्मध्यान्तयोरपिद्रष्टव्यम् ॥ १ ॥ जातिवाचिना आदिदीपकंयथा । पवनोदक्षिणःपर्णञ्जीर्णंहरतिवीरुद्गा-म् । सएवच नताङ्गीनाम्मानभङ्गायकल्पते ॥ अत्रपवन इत्यादिपादे जातिपदन्तेनादिदीपकमिदञ्जातिविषयमु-च्यते। एवम्मध्यान्तयोरपि द्रष्टव्यम् ॥ २ ॥ गुणवाचिना आदिदीपकंयथा । श्यामलाःप्रावृषेण्याभिर्दिशोजीमूत पङ्क्तिभिः । भुवश्चसुकुमाराभिर्नवशाद्वलराजिभिः ॥ अत्र श्यामलाइत्यादिपादे गुणपदन्तेनादिदीपकमिदङ्गुण-

विषयमुच्यते । एवम्मध्यान्तयोरपिद्रष्टव्यम् ॥ ३ ॥ द्रव्यवाचिनाआदिदीपकंयथा । विष्णुनाविक्रमस्थेनदानवानांविभूनयः । क्वापिनीताःकुतोप्यासन्नानीतादेवतर्द्धयः ॥ अत्रविष्णुनेत्यादिपादेद्रव्यपदन्तेनादिदीपकमिदन्द्रव्यविषयमुच्यते । एवम्मध्यान्तयोरपिद्रष्टव्यम् ॥४॥ अर्थावृत्तिर्यथा । हृष्यतिचूतेषुचिरन्तुष्यनिबकुलेषुमोदतेमरुति । इहहिमधौकलकूजिषुपिकेषुप्रीयतेकामी ॥ अत्रहृष्यति,तुष्यति,मोदते,प्रीयतइत्येतैःपदैःसएवार्थआवर्त्यमानःसर्ववाक्यानिदीपयति । सेयमर्थावृत्तिर्दीपकस्यभेदः ॥ ५ ॥ पदावृत्तिर्यथा । उत्कण्ठयतिमेघानाम्मालावृन्दङ्कलापिनाम् । यूनामुत्कण्ठय१त्यद्यमानसम्मकरध्वजः ॥ अत्रोद्ग्रीवङ्करोतिउत्कण्ठावन्तङ्करोतीत्यर्थयोरुत्कण्ठयतीति पदमावर्त्त्यमानं वाक्यद्वयमपिदीपयति । सेयम्पदावृतिर्दीपकस्यभेदः॥६॥उभयावृत्तिर्यथा। जयदेव भुवनभावन ! जयभगवन्निखिलवरदनिगमनिधे! ।।जयरुचिरचन्द्रशेखर!जय मदनान्तकजयादिगुरो !॥ अत्रजयेत्यर्थःशब्दश्चावर्त्यमानः सर्ववाक्यानिदीपयतियेयमुभयावृत्तिर्दीपकस्यभेदः ॥ ७ ॥ आवलीयथा । त्वमर्कस्त्वंसोमस्त्वमसिपवनस्त्वंहुतवहस्त्वमापस्त्वंव्योमत्वमुधरणिरात्मात्वमितिच । परिच्छिन्नामेवन्त्वयिपरिणताबिभ्रतिगिरंनविद्मस्तत्तत्त्वंवयमिहहियत्त्वन्नभवसि ॥ अत्रपूर्वार्द्धेत्वमितिशब्दार्थयोःप्रथमावृत्तिः प्रथमपादस्थयाअ-

१उत्कण्ठावच्छब्दाण्णिचिइष्ठवद्भावेनविन्मतोर्लुगितिलुकीदंबोध्यम् ॥

स्तीतिक्रिययादीप्यते । ततस्तृतीयपादेत्वयीतिरूपान्तरेणयुष्मदर्थआवर्त्यमानःक्रियान्तरेणसम्बध्यते । चतुर्थपादेतुपुनरपितेनैवरूपेणास्त्यर्थेनभवतिनासम्बध्यतइति सैयंवृत्तीनामावृत्तिरावलीतिदीपकस्यैवभेदोभवति ॥ ८ ॥ सम्पुटंयथा । णवपल्लवेसुलोलइघोलइविदुवेसुचलइसिहरेसु । थवइथवएसुचलणेवसन्तलच्छीअसोअस्स १ ॥ अत्रनवपल्लवेत्यादीन्यशोकस्येतिलोलतीत्यादीनिवसन्तलक्ष्मीरितिपदेद्रव्यवाचिनीसम्पुटक्रमेण मिथःसम्बध्यमानेमिथः सम्बद्धान्येवदीपयतः । तदेतत्सम्पुटन्नामदीपकस्यभेदः ॥ ९ ॥ रसनायथा । सलिलंविकाशिकमलङ्कमलानिसुगन्धिमधुसमृद्धानि । मधुलीनालिकुलाकुलमलिकुलमपिमधुररणितमिह ॥ अत्ररसनाक्रमेणमिथः सङ्ग्रथितानिसलिलविकाशिकमलमित्यादीनिवाक्यानि इहेत्यन्तस्थितेनाधिकरणवाचिनाद्रव्यदीपकेनदीप्यतेतदेतद्रसनादीपकन्नामादिदीपकभेदः ॥ १० ॥ मालायथा । इमिणासरएणससीससिणाविणिसाणिसा इकुमुअवणम् । कुमुअवणेणअपुलिणं पुलिणेणअ सोहएहंसउलम् २ ॥ अत्रमालाक्रमेणपरस्परग्रथिताः कर्त्तारोहेतवश्चशशिप्रभृतयःशोभन्तइतिक्रिययादीप्यन्ते । तदेतन्मालादीपकन्नामदीपकस्यभेदः । कःपुनरस्यपूर्वस्माद्विशेषः ? । पूर्वत्रवृत्तिच्छिन्नंरसनायांसर्वत्रइहतुस्वतन्त्रमालापुष्पवत्प-

१ नव पल्लवेषु लोलतिविद्रुमेषु चलतिशिखरेषु । तिष्ठति स्थलीषुचलतेवसन्तलक्ष्मी अशोकस्य ॥ २ अनया शरदा शश्वी शशिनापि निशा निशया कुमुदवनम् । कुमुदवनेनच पुलिनं पुलिनेनचशोभते हंसकुलम् ॥

दम्पदेनयुज्यमानङ्क्रियादिभिः सम्बध्यतइतितोयम्भि-
द्यते ॥ ११ ॥ चक्रवालंयथा । संग्रामाङ्गणमागतेनभवता
चापेसमारोपितेदेवालोकय१येनयेनसहसायद्भत्समासा-
दितम् । कोदण्डेनशराः शरैररिशिरस्तेनापिभूमण्डलं
तेनत्वं भवताचकीर्त्तिरतुला कीर्त्यांचलोकत्रयम्॥अत्रसं-
ग्रामाङ्गणमागतेनभवताचापेसमारोपितइतिभावलक्षणा-
क्षिप्तस्यभावविशेषस्यद्वितीयपादेकारकवीप्सयायत्संक्षे-
पेणाभिधानन्तदेतच्चक्रवालाद्भिन्नंवमालादीपकेनविस्तरव
तावेष्टितमिदञ्चक्रवालन्नामदीपकस्यभेदः ॥१२॥१८॥इति
दीपकालंकारनिरूपणम् ॥ शब्दस्ययदिवार्थस्यद्वयोरप्य-
नयोरथ ॥ भणनम्परिपाटयायत्क्रमःसपरिकीर्तितः॥८०॥
तत्रशब्दपरिपाटिर्द्विधा । पदतोवाक्यतश्च । तयोराद्या
यथा । तस्याः प्रवृद्धलीलाभिरालापस्मितदृष्टिभिः । जी-
यन्तेवल्लकीकुन्दस्रगिन्दीवरसम्पदः ॥ अत्रालापस्मित
दृष्टिभिः पदार्थैर्वल्लकीकुन्दस्रगिन्दीवरसंपदः पदार्था
जीयन्तेइतिशब्दपरिपाट्याभणनंसेयं पदतःशब्दपरिपा-
टिःक्रमः ॥ १ ॥ वाक्यतोयथा । इन्दुर्मूर्द्धशिवस्यशैलदु-
हितुर्वक्त्रेनखाङ्कः स्तनेदेयाद्वोऽभ्युदयन्द्वयन्तदुपमामाल-
म्ब्यमानंमिथः । संवादः प्रणवेनयस्यदलनाकायैकतायां-
नतयोरूर्द्ध्वं द्वारविचिन्तितेनचहृदिध्यातस्वरूपेणच ॥ अत्रे-
न्दुर्मूर्द्धशिवस्यशैलदुहितुर्वक्त्रेनखाङ्कःस्तनइतिचान्या
र्थवाचिनौ शब्दसमुदायौक्रमेणोर्द्ध्वं द्वारविचिन्तितेनचहृ-

१देवाकर्णयेत्यपि क्वचित्पाठः ॥

दिध्यातस्वरूपेणचेतिवाक्यार्थद्वयवाचिभ्यांशब्दसमुदाया-
भ्यांसम्बध्येते । सोयंवाक्यतःशब्दपरिपाटिःक्रमः ॥ २॥
अर्थपरिपाटिर्द्विधाकालतोदेशतश्च। तयोराद्यायथा। हस्ते
लीलाकमलमलकंबालकुन्दानुविद्धन्नीतालोध्रप्रसवरजसा
पाण्डुतामाननश्रीः । चूडापाशे नवकुरबकञ्चारुकर्णे शि-
रीषंसीमन्तेचत्वदुपगमजंयत्रनीपंवधूनाम् ॥ अत्रहस्ते-
लीलाकमलमलकं बालकुन्दानुविद्धमित्याद्यर्थानां शर-
दादिकालक्रमेणभणनंसेयङ्कालतोर्थपरिपाटिःक्रमः ॥ ३॥
द्वितीयायथा । पायाद्वोरचितत्रिविक्रमतनुर्दैवःसदैत्या-
न्तको यस्याकस्मिकवर्द्धमानवपुषस्तिग्मद्युतेर्मण्डलम् ।
मौलौरत्नरुचिः श्रुतौपरिलसत्ताटङ्ककान्तिक्रमाज्जातंव -
क्षसिकौस्तुभाभमुदरेनाभीसरोजोपमम् ॥ अत्रत्रिविक्र-
मतनोर्वैकुण्ठस्य प्रवृद्धिसमयेक्रमेणैवमौलिश्रुतिवक्षउदर-
लक्षणेषु शरीरदेशेषुभास्वन्मण्डलस्यचूडारत्नताटङ्ककौ-
स्तुभनाभ्यम्बुजैर्योऽयमौपम्यलाभःसेयन्देशतोऽर्थपरिपा-
टिःक्रमः ॥ ४ ॥ उभयपरिपाटिर्द्विधा । शब्दप्रधानाऽर्थ
प्रधानाच । तयोराद्यायथा । पङ्कअ पङ्कि वहेलिअकुव
लअ खित्तनु हदहिं वालिहि बिम्बविविल्लिओ पत्तिओ
चन्दु णहहिम् । करणजणाहरवअणहिं तहि लीलावइहि
णिअसिविवि उच्चिठ्ठीणाइ पआवइहिम् ॥१॥अत्रपङ्कजकु-
वलयबिम्बीफलचन्द्रमसाङ्करनयनाधरवदनैर्यथासङ्ख्यं

१ पङ्कजंपङ्के ऽवहेल्यकुवलयंक्षिप्तं ह्रदे वारिधौ बिम्बवल्लयः प्राप्ताश्चन्द्रोनभसि ॥
करनयनाऽधरवदनैस्तौ लीलावतीभिर्निजशिल्पे पि उच्चस्थानानिप्रजापतिभिः ॥

पराजयतइतिशब्दपरिपाटीयवपङ्कजानि पङ्केन्यस्तानि, कुवलयानि हृदेक्षिप्तानि, बिम्बवृन्तेप्रकीर्णञ्चन्द्रोनभसि निरस्तइत्याधाराणामुपर्युपरिभावःक्रियाणाञ्चतयागतारतम्यमिस्यर्थपरिपाटिर्न्यगभवति । सेयंशब्दप्रधानोभयपरिपाटिःक्रमः॥५॥अर्थप्रधानायथा । गङ्गे!देवि दृशापुनीहि यमुने! मातःपुनर्दर्शनं सम्प्रश्नोऽस्तुपितःप्रयाग! भगवन्नग्रोध ! मान्ध्यास्यसि । तंहारासिलतावतंसविपुलस्थूलांसवक्षोभुजम्पुम्भावंभवतामवन्तिनगरीनाथं दिदृक्षामहे॥अत्रगङ्गायमुनाप्रयागन्यग्रोधतत्पुम्भावाऽवन्तिनगरीनाथलक्षणानामर्थानां मुख्यक्रमेणदेविदृशापुनीहि, मातःपुनर्दर्शनं, पितःसंप्रश्नो,भगवन् मान्ध्यास्यसीतिमुख्यक्रमेणैवसम्भ्रमद्विर्वचोविशेषैरभ्यर्चा भवतामेवपुम्भावमवन्तिनगरीनाथन्दिदृक्षामहइति येयमभ्यर्थनाभङ्गिस्वार्थपरिपाटिकृतातस्याञ्चगङ्गेयमुनेप्रयागन्यग्रोधेतिहारासिलतावतंसविपुलस्थूलांसवक्षइतिचशब्दपरिपाटीपररूपरमुपमानोपमेयभूतेन्यग्भवतः सेयमर्थप्रधानोभयपरिपाटिःक्रमः ॥ ६ ॥ १९ ॥ इतिक्रमालंकारनिरूपणम् ॥ मिषंयदुक्तिभङ्गिर्यावसरोयःससूरिभिः ॥ निराकाङ्क्षोऽथसाकाङ्क्षःपर्यायइतिगीयते ॥८१॥ तेषुनिराकाङ्क्षमिषंयथा । मयाविमुक्ताबहिरेववल्लकीव्रजेदवश्यायकणैश्चसार्द्रताम् । द्रुतन्तदेनाङ्करवैनिचोलकेकयाचिदेवम्मिषतोविनिर्ययेौ ॥ अत्रकयाचिदेवं मिषतोविनिर्ययइत्युदर्कामिधानेनाकाङ्क्षानिराकृतेर्निराकाङ्क्षमेतन्मिष-

ङ्गामपर्यायभेदः ॥ १ ॥ तदेव साकाङ्क्षं यथा । दशत्यसौ परभृतः सहकारस्यमञ्जरीम् । तमहंवारयिष्यामियुवाभ्यां स्वैरमास्यताम् ॥ अत्रकयाचिदेवम्भिषतोविनिर्ययेइति बहुदर्शनाभिधानात्साकाङ्क्षमेतन्निषन्नामपर्यायस्यभेदः ॥ २ ॥ निराकाङ्क्षोक्तिभङ्गिर्यथा । राजन्!राजसुतानपाठयतिमान्देव्योपितूष्णींस्थिताःकुब्जेभोजयमांकुमारकुशलान्ताम्राज्जुकेभुज्यते । इत्थन्नाथ!शुकस्तवारिभवनेमुक्तोच्छगैः पञ्जराच्चित्रस्थानवलोक्य वेश्मवलभीघ्रेकैकमाभाषते ॥ अत्रानयोक्तिभङ्ग्या शून्यीकृतारिनगरस्य नरपतेःकश्चित्प्रतापंवर्णयतितत्रवाक्यस्यपरिपूर्णत्वेननिराकाङ्क्षत्वान्निराकाङ्क्षेयमुक्तिभङ्गिः ॥ ३॥ साकाङ्क्षायथा । शान्त्यैवोऽस्तुकपालदाम जगतामप्यर्यदीयांलिपिंङ्काःपिङ्काःपिगणाःपठन्तिपदशोनातिप्रसिद्धाक्षराम् । विश्वंसृक्ष्यति वक्ष्यति क्षितिमपामीशिष्यते शिष्यते नागैरागिषुरंस्यतेऽत्स्यतिजगन्निर्वक्ष्यतिद्रामिति ॥ अत्रानयोक्तिभङ्ग्याब्रह्माद्यस्तसमयेप्यनस्तमितस्यभगवतोमहेश्वरस्यप्रभावोवर्ण्यतेतत्रचयदीयांलिपिङ्काःपिङ्काःपिगणाःपठन्तिपदशोनातिप्रसिद्धाक्षरामित्यनेनैववाक्येस्मिन्नाकाङ्क्षोत्थाप्यते।सावविश्वंसृक्ष्यतीत्यस्मिन्नीदृशीब्रह्मणाङ्गचतुर्युगसहस्रान्तेदिनमेकमिति मानेनैषवर्षशतजीवी विश्वंसृक्ष्यतिब्रह्मेतिज्ञाप्यते । कपालङ्गास्यभगवतीभूषणम्भविष्यतीति । वक्ष्यतिक्षितिमित्यस्मिन्नीदृशीब्रह्मणामयंवर्षशतेनैकन्दिनमितिमानेनैषपुरुषायुष्य जीवीक्षितिंवक्ष्यतिविष्णुरिति

१ ङ्गे उपमातः ॥

ज्ञाप्यते कपालज्ञास्यभगवतोभूषाभविष्यतीति । एवम-
पामीशिष्यतइत्यादिषु वरुणवायुकामयमेन्द्रविषयत्वेन
योजनीयंसेयमनेकप्रकारेणब्रह्मादीनांसाक्षादनभिधानेन
साकाङ्क्षोक्तिभङ्गिः ॥ ४ ॥ अवसरोनिराकाङ्क्षोयथा । अप
तैःपरिदेवितास्रैर्हृदयेदिग्धशरैरिवार्दितः । रतिमभ्युप-
पत्तुमातुराम्मधुरात्मानमदर्शयत्पुरः ॥ अत्र "क्वनुतेहृदय-
ङ्गमःसखाकुसुमायोजितकार्मुकोमधुः । नखलूग्रुषा पि-
नाकिनागमितःसोपिसुहृद्गताङ्गतिम्" इतियानि रतेःप-
रिदेवितास्राणितैराकृष्टहृदयस्य मधोर्योयमात्मदर्शनाय
प्रस्तावःसोयन्नकिञ्चन काङ्क्षतीतिनिराकाङ्क्षोयमवसर
पर्यायस्यभेदः॥५॥साकाङ्क्षोयथा । अज्जविबालोदामो-
अरोतिइअजम्पिएजसोआए।कण्हमुहपेसिअच्छण्णिहुअं
हसिअंवअवहूण२। अत्राद्यापिबालोदामोदर इति कृत
प्रस्तावनस्य कृष्णस्यवक्त्रेविन्यस्तलोचनयातद्रहस्यवादि
न्याव्रजवधूमतल्लिकयायदेतन्निभृतंहसितन्तत्तवाम्बाबा-
लन्त्वाम्ब्रूतेत्वन्तुमादृशीभिर्निधुवनविदग्धाभिर्दिवानि-
शंयमुनानिकुञ्जोदरेषु विहरसीत्यादिनार्थजातेनसाकाङ्-
क्षमितिसाकाङ्क्षोयमवसरःपर्यायस्यभेदः ॥६॥२०॥ इतिप
र्यायालंकारनिरूपणम् ॥ विवक्षायाविशेषस्यलोकसीमा
तिवर्तिनी ॥ असावतिशयोक्तिःस्यादलङ्कारोत्तमाचसा ॥
८२॥ साचप्रायोगुणानाञ्चक्रियाणाञ्चोपकल्पते ॥ नहिद्र-

१ अचतरेतिनिपातितः ॥ २ अद्यापि दामोदरो बालोस्तीति च जल्पितै
यशोदया ।कृष्णमुखप्रेषिताक्षं निभृतं हसितं व्रजवधूभिः ।

ध्यस्यजातेर्वाभवत्यतिशयःक्वचित् ॥८३॥ प्रभावातिशयो यश्चयश्चानुभवनात्मकः ॥ अन्योन्यातिशयोयश्चतेपिनातिशयात्पृथक् ॥८४॥ अलङ्कारान्तराणामप्येकमाहुःपरायणम् ॥ वागीशमहितामुक्तिमिमामतिशयाढ्याम् ॥ ८५॥ तत्रगुणातिशयेनमहत्वातिशयोयथा । अहोविशालम्भूपाल!भुवनत्रितयोदरम् । मातिमातुमशक्योपियशोराशिर्यदत्र ते॥अत्रैवं यशोराशेरशक्यमानस्याप्यतिशयोक्त्याविशेषविवक्षा । येन त्रिभुवनोदरमपिसङ्कीर्णमाशङ्क्यते । सोयम्महत्वातिशयोनामातिशयभेदः ॥१॥ तनुत्वातिशयोयथा । स्तनयोर्जघनस्यापिमध्येमध्यम्प्रयेतव । अस्तिनास्तीति सन्देहोनमेऽद्यापि निवर्तते॥अत्रैवम्मध्यस्यलोकसीमातिक्रमेणतनावतिशयविवक्षायेनतदस्तिनास्तीतिवासन्दिह्यते । सोयन्तनुत्वातिशयोनामातिशयभेदः ॥ २ ॥ कान्त्यतिशयोयथा । मल्लिकामालभारिण्यः१ सर्वाङ्गीणार्द्रचन्दनाः । क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नाया मभिसारिकाः ॥ अत्रैवज्ञुन्द्रालोकस्य लोकसीमातिक्रमेण बाहुल्योत्कर्षविवक्षा । येन तस्मिन्समानाभिहारेणाभिसारिकाअपिनलक्ष्यन्तेसोयङ्कान्त्यतिशयोनामातिशयभेदः । अथास्यपिहितात्कोविशेषः?। उच्यते । पिहितेचन्द्रातपस्योत्कर्षेणाभिसारिकातिरस्कारोविवक्ष्यते । इहत्वभिसारिकातिरस्कारेण चन्द्रातपोत्कर्षइति ॥३॥ प्रभावातिशयोयथा । तन्दइआहिण्णाणज्झंम्मिविअङ्गम्मिराहवेणण-

१ इष्टकेषीकामालानांचिततूलभा रेषुइतिपर्वपदस्यइस्वः ॥

णिमिअम्। सीआपरिगव्वेणवऊढेतिणविणिरन्तरंरोम-
ञ्चोइ। अत्रदयिताभिज्ञानस्ययोयंरोमाञ्चक्रियाविशेषःस
क्रियातिशयस्यैव भेदः प्रभावातिशयउच्यते ॥४॥ अनुभा
वातिशयोयथा। विमलिअरसाअलेणविविसहखइणा-
अइठ्ठमूलछेअम्। अप्पन्ततुङ्गसिहरन्तिहुअणहरणेपव-
ट्टिएणविहरिण २॥ अत्ररसातलमपिमृदनताशेषेणापि
च तस्यमूलन्नदृष्टं त्रिभुवनमप्युल्लङ्घयताहरिणाऽपिनतुङ्ग
शिखराणिप्राप्तानीतियदेतल्लोकसीमातिक्रमेणविशेषव्य-
वस्थयापर्वतानुभावभणनंसोयमनुभूयमानमाहात्म्याति
शयस्यैवभेदोनुभावातिशयउच्यते ॥५॥ अन्योन्यातिशयो
यथा। रणदुज्जओदहमुहोसुराअवज्झाअतिहुअणस्स
इमे। पडइअणत्थोत्तिफुडंविहीसणेणपुडिआहरणीस-
सिअम् ३॥ अत्रदशास्यःसमरेनजीयतेसुराश्चामरत्वान्न
वध्यन्ते। तयोश्चपररपरंसङ्घट्टक्रियातिशयात्त्रिभुवन-
मपिक्षयंयास्यतीति येयमन्योन्यातिक्रियातिशयभणना-
ल्लोकसीमातिक्रमेणविशेषविवक्षा। सोयंक्रियातिशयोना
मातिशयएवान्योन्यातिशयउच्यते ॥६॥२१॥ इतिअतिश-
योक्त्यलंकारनिरूपणम्॥ श्लेषोनेकार्थकथनम्पदेनैकेनक
थ्यते॥ पदक्रियाकारकैःस्याद्भिन्नाभिन्नैःसषड्विधः॥८६॥

१ तन्दयिताभिज्ञानं जन्मन्यपि अङ्के रांघवेननिर्मितम्। सीतापरिगर्वेणैव
ऊढेति नवनिरंतरं रोमाञ्चः॥ २विमृदितरसातलेनापि विषधरपतिना अदृष्ट-
मूलच्छेदम्। अप्राप्ततुङ्गशिखरं त्रिभुवनहरणे प्रवर्त्तितेनापि हरिणा॥ ३ रण-
दुर्जयोदशमुखः सुराअवध्यास्त्रिभुवनस्यैमे। पतति अनर्थोतिस्फुटं विभीषणेन
स्फुरिताधरं निश्वसितम्॥

तेषुभिन्नपदोयथा । दोषाकरेणसंबन्धन्नक्षत्रपथवर्तिना राज्ञाप्रदोषोमामित्थमप्रियङ्किन्नबाधते ॥ अत्रप्रदोषोरात्रेःप्रथमोयामः किमिति प्रियारहितंमांनबाधत इत्युक्तेर्युक्तिमाह । इत्थमनुभूयमानेनप्रकारेणराज्ञासंबन्धंकीदृशेनदोषाकरेणनक्षत्रपथवर्तिनेति । योहिदोषाणामाकरेण राजमार्गातिगामिनाच राज्ञा प्रकृष्टदोषःसंबध्यतेसोऽप्रियमवश्यम्बाधते एव तदत्रपूर्वस्मिन्प्राकरणिकेर्थेद्वितीयोर्थोऽप्राकरणिकःपदभेदेनोपश्लिष्यमाणोभिन्नपदश्लेषापदेशमासादयति ॥१॥ अभिन्नपदोयथा । असावुदयमारूढःकान्तिमान्रक्तमण्डलः । राजाहरतिलोकस्यहृदयं मृदुभिःकरैः॥ अत्रायमुदीयमानश्चन्द्रमा लोकस्यहृदयंहरतीत्युक्तेर्युक्तिमाह । राजानुरक्तमण्डलउदयीमृदुकरःकान्तिमानितियोहेयंभूतोराजासोवश्यं लोकस्य हृदयहारी भवति । अत्रापिचप्राकरणिकेर्थेऽप्राकरणिकउपश्लिष्यमाणःपदानामभेदेनाभिन्नपदश्लेषोभवति ॥२॥ भिन्नक्रियो यथा । मधुरारागवर्द्धिन्यःकोमलाःकोकिलागिरः । आकर्ण्यन्ते मदकलाःश्लिष्यन्ते चासितेक्षणाः ॥ अत्राकर्ण्यन्ते श्लिष्यन्ते चेतिक्रियापदंद्वितयस्यप्राधान्यतःसमुच्चयेनोपात्तस्य मधुराइत्यादिभिःश्लिष्टपदैःकोकिलागिरइत्यसितेक्षणाइतिवाविशेष्यैकपदवर्जंपर्यायतः संबन्धोभवतितदा-था । आकर्ण्यन्तेकाःकोकिलागिरःकीदृश्योमधुरारागवर्द्धिन्यःकोमलाःपुनरपिकिंभूताआसितेक्षणाआसितेउपवेशितेअन्तःप्रमोदानुभावादीक्षणेयाभिस्तास्तथा । सर्वोपि

हिमधुरंशब्दमाकर्णयन्निश्चलाक्षोभवति । श्लिष्यन्ते चका
असितेक्षणाहरिणचक्षषःकिंभूता मदकलाः कोकिलागिरः
कोमलारागवर्द्धिन्योमधुराइतिसोयंद्वयोर्विभिन्नक्रिययो
र्भिन्नार्थेचरूपिणांपदार्थानामुपश्लेषोभिन्नक्रियःश्लेषउ-
च्यते ॥३॥ अभिन्नक्रियोयथा । स्वभावमधुराःस्निग्धाः
शंसन्त्योरागमुत्लवणम् । दृशोदूत्यश्चकर्षन्तिकान्ताभिःप्रे-
षिताःप्रियान् । अत्रकर्षन्तीत्येतस्यांक्रियायांदृशांदूतीना
ञ्चश्लिष्टपदत्वेनावेशादयमभिन्नक्रियो नामश्लेषविशेषः ।
प्रथमयोरस्यवाकोविशेष?इतिचेत्। तत्रैकस्यैवप्राकरणिक
त्वमत्रतुद्वयोरपीत्ययंचभिन्नकारकोभवति॥४॥ भिन्नका-
रकोयथा । गतिर्वेणीचनागेनवपुरूरूचरम्भया। ओष्ठौपा-
णीप्रवालैश्चतस्यास्तुल्यत्वमाययुः ॥ अत्रैकस्मिन्पक्षेधर्म
धर्मिणोरभेदोपचारान्नागगतिर्गृह्यते । तत्रगतेर्वेण्याश्च
नागेनहस्तिनाअहिनाचतुल्यत्वंवपुरूर्वीश्चरम्भयाकदल्या
अप्सरोभिश्चतुल्यत्वमोष्ठयोःपाण्योश्चप्रवालैर्विद्रुमैर्नवप-
ल्लवैश्चवर्णनीययोःश्लेषप्रभावाल्लभ्यतेसोयमनेककर्तृकत्वा
द्भिन्नकारकइतिश्लेषोभवति ॥५॥ अभिन्नकारकोयथा ।
कृष्णार्जुनानुरक्ताऽपिदृष्टिःकर्णावलम्बिनी । यातिविश्वस-
नीयत्वङ्कस्यतेकलभाषिणि॥अत्रहेकलभाषिणि कस्य तेदृ-
ष्टिर्विश्वास्याभवतीत्युक्तेर्युक्तिमाह । कृष्णार्जुनानुरक्ता-
पिकर्णावलम्बिनीतियाहिकृष्णार्जुनेनाऽनुरज्यतेकथंसाक
र्णपक्षपातिनीभवति । याचैवमुभयगतातस्याःकीदृग्विश्वसि-
तिसचायमेककर्तृकत्वादभिन्नकारकइतिश्लेषोभवति॥६॥

१२॥ इतिश्लेषालङ्कारनिरूपणम् ॥

स्वाभिप्रायस्यकथनंयदिवाप्यन्यभावना॥अन्यापदेशोवा यस्तुत्रिविधंभाविकं विदुः॥८७॥मतेचास्माकमुद्भेदोविद्य-तेनैवभाविकात्।व्यक्ताव्यक्तोभयाख्याभिस्त्रिविधःसोऽपि कथ्यते॥८८॥तत्र भाविकभेदेषु स्वाभिप्रायकथनं यथा। णाविज्जइदुग्गेज्जिआदिठ्ठम्मिजम्मिभिउडिआजत्थणअ व्वाहारओघिप्पइआहसत्तएविछुहइ । अहिणिज्जएजत्थ णसोवंअंसिआतम्मेकहहु माणअज्जइमेइछहुजिअजम्१। अत्र भ्रूभेदासम्भाषणप्रियतमावक्षेपणरूपान्प्रत्यनभिम-तप्रतिपादनरूपस्याभिप्रायस्यकथितत्वादिदं स्वाभिप्राय-कथनंनाम भाविकम् । अन्यभावनायथा। दंसणवलिअ-न्दढकंविघणन्दीहरंसुपरिणाहम् । होइइघरेसाहीणम्मु-सलनधण्णाणमहिलाण२।अत्रमेढ्रभावनयामुसलरूपस्यो-क्तत्वादिदमन्यभावनाभिधानम्भाविकम् । अन्यापदेशोय-था । आसाइअंणाएण जत्तिअविअंविहीणओरम्मसुव-सहएन्हिंरक्खिज्जइगहवछेत्तम्३। अत्रपरक्षेत्रस्यघस्मर-वृषनिवारणापदेशेनचिरात्परिज्ञातउपपत्तिर्वार्यते।तदि-दमन्यापदेशाख्यम्भाविकम्॥२॥उद्भेदेषुव्यक्तोयथा। मन्ते-सिमहुमहपणअंसन्दाणेसितिअसेसपाअवरअणम । ओ

१ न विद्यते दुर्ग्राह्यादृष्टे यस्मिन् भ्रुकुटिका यत्र न च व्याहारो गृह्यते आहसति विक्षुभ्यते । अभिनन्दके यत्र न सोपदर्शिता तंमेकथय मानंयदिमे इ-च्छसि जीवनम् ॥ २ दर्शनवलितं दृढमपि घनं दीर्घं सुपरिणाहम् । भवति गृ-हे स्वाधीनं मुसलं धन्यानां महिलानाम् ॥ ३ आसादितं नागेन यात्रिक इव विहीनको रमव वृषभ इह रक्ष्यते गृहपतिक्षेत्रम् ॥

जसुसुद्धसहावंसम्भावंसुसुरणाहजावअलोजम्१।अत्रमाया विनोमहेन्द्रस्याभिप्रायः सत्यकेनव्यक्तमेवोद्विन्नइतिव्यक्तोयमुद्भेदः॥३॥अव्यक्तोयथा। निःशेषच्युतचन्दनंस्तनतटंनिर्मृष्टरागोधरोनेत्रेदूरमनञ्जनेपुलकितातन्वीतवेयन्तनुः। मिथ्यावादिनि दूतिबान्धवजनस्याज्ञातपीडागमावापींस्नातुमितोगतासि न पुनस्तस्याधमस्यान्तिकम्॥ अत्रवापींस्नातुमितोगतासिनपुनस्तस्याधमस्यान्तिकमित्याक्षेपवताप्रकृतोदाहरणेनयद्यपिदूत्यान्दुश्चेष्टितंनिर्भिन्नम्।तथापिनपूर्ववद्व्यक्तव्यमित्यव्यक्तोयमुद्भेदः।उभयरूपोयथा।अम्लानोत्पलकोमलेसखिदशौनील। ञ्जनेनाऽञ्जितेकर्पूरच्छुरणाञ्चगण्डफलकेयंवेल्लितः पाण्डिमा। श्वासाःसन्तुचकन्दुकभ्रमिभुवःकिन्तुप्रभावाऽहिनामङ्गानाङ्क्रशिमानमुत्कटममुंको नाम नोत्प्रेक्षते । अत्रदृशोर्म्लानतागण्डयोः पाण्डुरत्वंश्वासानान्दैर्घ्यमित्युत्कण्ठाचिह्ननिह्नवाययोयमविनयवत्यानीलाञ्जनादिप्रयोगस्तस्यतत्त्वाभ्युपगमेऽप्यङ्गानांक्रशिमानमुत्कटममुंकोनामनोत्प्रेक्षतइतियोयंसखीव्याहारस्तेनतदभिप्रायउद्विन्नोऽनुद्विन्नश्चभवतीत्यनुभयरूपोयमुद्भेदः । तेऽमीत्रयोप्युद्भेदाभाविकान्न भिद्यन्ते ॥ २३ ॥ इतिभाविकालङ्कारनिरूपणम् ॥ संसृष्टिरिति विज्ञेयासर्वाऽलङ्कारसङ्करः॥ सातुव्यक्तातथाऽव्यक्ताव्यक्ताव्यक्तेतिचत्रिधा ॥ ८९ ॥ तिलतन्दुलद्वयक्ताछा-

१ मन्त्रयसि मधुमम प्रणयं संदानयसि चिदशेश पादरत्नम् । शुद्धस्वभाव संभावय सुरनाथ यावदलीकम् ॥

यादर्शवदेवच ॥ अव्यक्ताक्षीरजलवत्पांसुपानीयवच्च सा ॥९०॥ व्यक्ता ऽव्यक्ता च संसृष्टिर्नरसिंहवदिष्यते ॥ चित्रवर्णवदन्यस्मिन्नानालङ्कारसङ्करे ॥ ९१ ॥ व्यक्तातिलतण्डुलवदथा । पिनष्टीव तरङ्गाग्रैरुदधिः फेनचन्दनम् । तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः ॥ अत्रोत्प्रेक्षाद्वयं रूपकद्वयञ्च तिलतण्डुलवत्सङ्कीर्यते ॥१॥ व्यक्तैव च्छायादर्शवद्यथा । निर्मलेन्दु नभो रेजे विकचाब्जम्बभौ सरः । परस्पर्यश्रुवदनौ मल्लतुर्भ्रातरावुभौ । अत्रादर्शच्छायेवहेत्वलङ्कारेरामलक्ष्मणमुखयोरिन्दुपद्मौपम्येन सदृशाऽसदृशव्यतिरेको दृश्यते ॥२॥ अव्यक्ता क्षीरजलवदथा । क्षीरक्षालितचन्द्रेव नीलीधौताम्बरेव च । टङ्कोल्लिखितसूर्येव वसन्तश्रीरदृश्यत ॥ अत्रोपमोत्प्रेक्षेक्षीरनीरवन्मिश्रे संसृष्टेन व्यज्येते॥३॥अव्यक्तैव पांसूदकवद्यथा । कृष्णार्जुनानुरक्ताऽपिदृष्टिः कर्णावलम्बिनी । याति विश्वसनीयत्वं कस्य ते कलभाषिणि!१ । अत्रपांसूदकयोरिव मृत्पिण्डेक्षेषविरोधयोरव्यक्तयोरेवव्याजस्तुतावङ्गभावोगम्यते ॥४॥ व्यक्ताऽव्यक्ता नरसिंहवदथा । रजोभिस्तुरगोत्कीर्णैर्गजैश्च घनसन्निभैः।भुवस्तलमिवव्योम कुर्वन्व्योमेवभूतलम् । अत्रनरसिंहजातावविसिंहनरशरीरभागयोः!परिवृत्त्यलङ्कारहेतूपमयोरङ्गभावोव्यक्ताऽव्यक्तरूपःपरिस्फुरन्नुपलभ्यते ॥ ५॥ व्यक्ताव्यक्तैव चित्रवर्णवद्यथा । मयूरारावमुखराम्प्रावृषं सतडिल्लताम् । महाटवीमिवोल्लङ्घ्यतो

१ कृष्णःश्रीकृष्णोवर्णश्च । अर्जुनः पार्थो धवलश्च । कर्णःश्रोत्रं राधेयश्च

यानिमुमुचुर्घनाः। अत्रपटावयवस्थानान्नीलादीनामिव पटावयव्याश्रिते चित्रवर्णे श्लेषरूपकोपमार्थश्लेषाणामपदपदार्थाश्रयाणां शरद्वर्णनवाक्याश्रयिणि समाध्यलङ्कारे व्यक्ताव्यक्तरूपोऽङ्गाऽङ्गिभावः, प्रतीयते ॥ ६ ॥ २४॥ चतुर्विंशतिरित्येताः क्रमेणोभयसंश्रयाः ॥ काव्यालङ्कृतयःप्रोक्तायथावदुपमादयः॥२५॥इति श्रीमहाराजाधिराजश्रीभोजदेवविरचिते सरस्वतीकण्ठाभरणे उभयालङ्कारविवेचनोनामचतुर्थः परिच्छेदः ॥

॥ श्री सरस्वत्यैनमः ॥

॥ सरस्वतीकण्ठाभरणे पञ्चमः परिच्छेदः ॥

रसोभिमानोऽहंकारः शृङ्गार इति गीयते ॥ योऽर्थस्तस्याऽन्वयात्काव्यं कमनीयत्वमश्नुते ॥ १ ॥ विशिष्टादृष्टजन्मायं जन्मिनामन्तरात्मसु ॥ आत्मसम्यग्गुणोद्भूतेरेको हेतुः प्रकाशते ॥ २ ॥

शृङ्गारीचेत्कविःकाव्ये जातं रसमयञ्जगत् ॥ सएव चेदशृङ्गारीनीरसं सर्वमेवतत्॥३॥"पश्यति स्त्रीतिवाक्ये"हि न रसः प्रतिभासते ॥ "विलोकयति कान्तेति" व्यक्तमेव प्रतीयते ॥ ४ ॥ "कन्ये कामयमानम्मान्त्वन्न कामयसे कथम्" इतिग्राम्योयमर्थात्मा वैरस्यायैव कल्पते ॥ ५ ॥ "कामङ्कन्दर्पचाण्डालो मयि वामाक्षि निर्दयः ॥ त्वयिनिर्मत्सरोदिष्टेत्यऽग्राम्योर्थो रसावहः ॥ ६ ॥ नवोर्थःसूक्तिरग्राम्या श्रव्योबन्धः स्फुटाश्रुतिः ॥ अलौकिकार्थ-

युक्तिश्च रसमाहर्त्तुमीशते ॥ ७ ॥ वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयम् ॥ सर्वानुग्राहिणीं तासु रसोक्तिं प्रतिजानते ॥ ८ ॥ भावोजन्मानुबन्धोऽथ निष्पत्तिः पुष्टिसङ्करौ॥ हासाभासौशमःशेषोविशेषःपरिपोषवान्॥९॥ विप्रलम्भोऽथसम्भोगस्तच्चेष्टास्तत्परीष्टयः ॥ निरुक्तयः प्रकीर्णानि प्रेमाणः प्रेमपुष्टयः ॥ १० ॥ नायिकानायकगुणाः पाकाद्याः प्रेमभक्तयः॥ नानाऽलङ्कारसंसृष्टेः प्रकाराश्च रसोक्तयः ॥ ११ ॥ चतुर्विंशतिरित्युक्ता रसान्वयविभूतयः॥ स्वरूपमासां यो वेद स काव्यङ्कर्त्तुमर्हति॥१२॥ आलम्बनविभावेभ्यः स्वेभ्यःस्वेभ्यः समुन्मिषन् ॥ रसोरत्यादिरूपेण भाव इत्यभिधीयते ॥ १३ ॥ रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा ॥ जुगुप्सा विस्मयश्चाऽष्टौ स्थायिभावाः प्रकीर्त्तिताः ॥ १४ ॥ स्तम्भस्तनूरुहोद्भेदो गद्गदः स्वेदवेपथू । वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्विका मताः ॥ १५ ॥ स्मृतिर्वितर्कश्चोत्कण्ठा चिन्ता चपलतामतिःगर्वः स्नेहोधृतिर्व्रीडाऽवहित्थम्मूढतामदः॥१६॥ हर्षोऽमर्षोविसूयेर्ष्या विषादो दैन्यमुग्रता ॥ त्रासः शङ्का गदोग्लानिरुन्मादः सम्भ्रमः श्रमः ॥ १७ ॥ निर्वेदोजाड्यमालस्यन्निद्रा सुप्तम्प्रबुद्धता । इतिभावास्त्रयस्त्रिंशद्विज्ञेया व्यभिचारिणः ॥ १८ ॥ चिरञ्जितेऽवतिष्ठन्ते सम्बध्यन्तेऽनुबन्धिभिः । रसत्वम्प्रतिपद्यन्ते प्रबुद्धाः स्थायिनोऽत्रते ॥१९ ॥ रजस्तमोभ्यामस्पृष्टम्मनः सत्वमिहोच्यते । निर्वृतयेस्यतद्योगात्प्रभवन्तीति सात्विकाः

॥२०॥विशेषेणाभितः काये स्थायिनञ्चारयन्ति ये। अनुभावादिहेतूँस्तान्वदन्ति व्यभिचारिणः ॥२१॥ जनित्वाये न जायन्ते तेऽथवा व्यभिचारिणः।स्मृत्यादयो हि प्रेमादौ भवन्ति न भवन्ति च ॥२२॥ रतौ सञ्चारिणः सर्वान् गर्वस्नेहौ धृतिम्मत्तिम्। स्थास्नूनेवोद्भुतप्रेयः शान्तोदात्तेषु जानते॥२३॥संस्कारपाटवादिभ्यो ऽनुभावं वा निजाश्रये। सञ्चारिणं वा जनयन्सात्विकं वा न जायते ॥ २४॥ उद्दीपनविभावेभ्यः स्मृतिहेतौ पटीयसि। अनुबन्धोऽनुभावादेरनुबन्धोऽस्यकथ्यते ॥२५॥ विभावस्यानुभावस्य सात्विकव्यभिचारिणोः ॥ संयोगे तस्य निष्पत्तिमात्रन्निष्पत्तिरिष्यते ॥ २६॥ विषयाश्रयसंस्कारगुणप्रकृतिपाटवैः। दीपनातिशयैश्चाऽस्य प्रकर्षः पुष्टिरुच्यते ॥ २७॥ तुल्यकालबलोत्पत्तिहेतौ भावान्तरोदये ॥ संसर्गस्तस्य यस्तेन सङ्करः स निगद्यते ॥ २८॥ रसान्तरतिरस्कारादन्यद्रागाच्च तस्य यः ॥ भवत्यपचयोवृद्धेस्तद्ध्रासन्तम्प्रचक्षते ॥ २९॥ हीनपात्रेषु तिर्यक्षु नायकप्रतियोगिषु ॥ गौणेष्वेव पदार्थेषु तमाभासं विजानते ॥३०॥ बलवत्सूपजातेषु प्रतिकूलेषु हेतुषु ॥ सर्वात्मना समुच्छेदः प्रशमस्तस्य वर्ण्यते ॥ ३१॥ आश्रयात्प्रकृतेर्वापि संस्कारस्थैर्यतो ऽपि वा ॥ योऽस्यात्यन्तमविच्छेदः स शेष इति शब्द्यते ॥ ३२॥ शृङ्गारादा रसा येच येच शान्तोद्भुतादयः॥ येच रत्यादिभेदास्तान्विशेषानऽस्य मन्वते ॥ ३३॥

१ निष्पत्तिः प्रकटीकरणं न तूत्पत्तिः ॥

विभावश्चानुभावश्च संचारीचाश्रयश्चयः ॥ येच लीलादयो यूनां परिपोषः स कीर्त्यते ॥ ३४ ॥ आश्रयोयस्यरत्यादिःप्रेमादिरुपजायते ॥ विषयो यत्र योषादौ सो ऽस्य जन्माऽधिगच्छति ॥ ३५ ॥ आलम्बनविभावः स ज्ञानकारणमुच्यते॥तेनादरादिरूपेण संस्कारस्तेनजायते॥३६॥ अन्यतः पटुरभ्यस्त आश्रयादेर्गुणेन सः ॥ तत्प्रबोधाय माल्यर्तुचन्दनेन्दूदयाऽऽदयः ॥ ३७ ॥ उद्दीपनविभवास्ते सतैः स्मरति वाञ्छति ॥ द्वेष्टिप्रयततेऽवैति मन्यतेवक्ति चेष्टते ॥३९॥ तेऽनुभावास्तदा ये स्युः स्वेदरोमोद्गमादयः ॥ हर्षामर्षादयो येच ज्ञेयाः सञ्चारिणोऽत्रते॥३९॥ स्मृतीच्छायत्नजन्मानोमनोवाक्कायसंश्रयाः॥ विलासा ये वरस्त्रीणां ज्ञेया लीलादयस्तु ते ॥४०॥ लीला विलासो विछित्तिर्विभ्रमः किलकिञ्चितम् ॥ मोट्टायितं कुट्टमितं बिब्बोकोललितन्तथा ॥ ४१ ॥ विहृतङ्क्रीडितङ्केलिरिति स्त्रीणां स्वभावजाः ॥ हेलाहावादयश्चान्ये ज्ञेयाः स्त्रीपुंसयोरपि॥९२॥उपसङ्ख्यानमेतेषामनुभावेषु मन्वते॥ पश्चाद्भावाऽनुभूतिभ्यां स्मरणाद्यनुभाववत् ॥ ४३ ॥ स्मृत्यादयोऽनुभावाश्च भावाः संश्चारिणश्चये ॥ नाग्रेऽनुक्रियमाणास्तेनटैरभिनयाः स्मृताः ॥ ४४ ॥ भावोयदा रतिर्नामप्रकर्षमधिगच्छति । नाऽधिगच्छति चाभीष्टं विप्रलम्भस्तदोच्यते ॥४५॥ पूर्वानुरागोमानश्च प्रवासः करुणश्च सः । पुरुषस्त्रीप्रकाण्डेषु चतुःकाण्डः प्रकाशते ॥४६॥ प्रागसङ्गेतयोर्यूनोरभिलाषः प्रवर्तते । सङ्कल्परमणीयोऽनु-

रागः सप्राच्यउच्यते ॥४७॥ अहेरित्वगतिःप्रेम्णः स्वभाव-
कुटिलेति सः। अहेतोर्नेतिनेत्युक्ते हेतोर्वा सा न उच्यते॥
४८॥ देशान्तरादिभिर्यूनोर्व्यवधानञ्चिराय यत्। नवेऽनु-
रागे प्रौढे वाप्रवासःसोऽभिधीयते॥४९॥लोकान्तरगते यू-
निवल्लभे वल्लभा यदा। भृशं दुःखायते दीनःकरुणःस तदो-
च्यते ॥५०॥ रतिरेवेष्टसंप्राप्तौपुष्टःसम्भोग उच्यते । सो-
पिपूर्वानुरागादेरानन्तर्याच्चतुर्विधः ॥५१॥ नविना विप्रल-
म्भेन सम्भोगः पुष्टिमश्नुते॥ कषायिते हि वस्त्रादौ भूयान्रा
गो ऽनुषज्यते॥५२॥स्त्रीपुंसयोर्विप्रलम्भे वैचित्त्याकल्पना
दयः ॥ चेष्टाविशेषाःसम्भोगेचुम्बनालिङ्गनादयः ॥५३॥
विप्रलम्भे ऽभियोगाद्यैः सम्भोगे साध्वसादिभिः ॥ ५४ ॥
मिथःपरीक्षा याः प्रेम्णो निर्दिष्टास्ताः परीष्टयः। विप्रल-
म्भादिशब्दानां लोकसिद्धेषु वस्तुषु ॥५६॥ प्रकृत्यादिवि-
भागेन विनिवेशा निरुक्तयः । संश्रुत्य विप्रलम्भार्थान्
गृधिवञ्चेर्गोःप्रलम्भने।इत्यादिज्ञापकाद्ज्ञेयः प्रपूर्वोवञ्चने
लभिः ॥५६॥ आदानञ्च प्रतिश्रुत्य विसंवादनमेव च ॥
कालस्य हरणञ्चाहुः प्रत्यादानञ्च वञ्चनम् ॥५७॥ पूर्वानुरा
गपूर्वेषु विप्रलम्भेषु तत्क्रमात्। विशेषद्योतकेनेह व्यप-
सर्गेण सूच्यते ॥५८॥ प्रतिश्रवोहि पूर्वानुरागवक्रेक्षिता-
दिभिः । अभीष्टालिङ्गनादीनामादानंह्रीभयादिभिः ॥५९॥
माने निवारणन्तेषां विसंवादनमुच्यते । अयथावत्प्रदानं
वा व्यलीकस्मरणादिभिः ॥६०॥ प्रवासेकालहरणं व्यक्त-
मेषां प्रतीयते । प्रोष्यागतेष्विहैतानि कान्ताः कान्तेषु यु-

तुरोर्थान्प्रयुञ्जते ॥६३॥ त्रिविधश्च विरुद्धश्च व्याविद्धश्च क्रमेण सः । त्रिनिषिद्धश्च पूर्वानुरागादिषु विषज्यते ॥६४॥ पूर्वानुरागे त्रिविधं वर्णनं व्रीडितादिभिः । माने विरुद्धत्तत्प्राहुः पुनरीर्ष्यायितादिभिः ॥६५॥ व्याविद्धन्दीर्घकालत्वात्प्रवासे तत्प्रतीयते । त्रिनिषिद्धस्तु करुणे करुणत्वेन गीयते ॥६६॥ रागोनुसहपश्चाद्वानुरूपोऽनुगतोपि वा । यूनोरपूर्वः पूर्वोऽनुरागशब्देन शब्द्यते ॥६७॥ राजतेरञ्जतेर्वापि रागः करणभावयोः ॥६८॥ घञाद्यन्यकारके भावेनलोपेन निष्पद्यते । मान्यते प्रेयसा येन यस्मिन्प्रयत्नेन मन्यते । मनुते वामिमीते वा प्रेममानः स कथ्यते ॥६९॥ महाभाष्यकृतः "कोसावनुमान,, इति स्मृतेः । त्यङन्तोपि न पुल्लिङ्गो मानशब्दः प्रदुष्यति ॥७०॥ यत्राङ्गना युवानश्च वसते न वसन्ति च । सप्रवासः प्रशब्देन प्रतीपार्थेन कथ्यते ॥७१॥ चिन्तोत्कण्ठादिभिश्चेतो भृशं वासयतीह यः । प्रवासयति वा यूनः सप्रवासो निरुच्यते ॥७२॥ प्रपूर्वको वसिर्ज्ञेयः कारितान्तःप्रमापणे[1] । तूष्णीम्प्रवासयेदेनमिति वृद्धानुशासनात् ॥७३॥ अभूतोत्पादनायां कृञ् दृष्टः कुरुवटं यथा । दृष्टश्चोच्चारणे चोरङ्कार[2]माक्रोशतीति वत् ॥७४॥ दृष्टो ऽवस्थापने ऽश्मानमितः कुरु यथोच्यते ॥७५॥ अभ्यञ्जनेपि च यथा पादौमे कुरु सर्पिषा । मूर्छाविलापौ कुरुते कुरुते साहसंमनः ॥७६॥ करोति दुःखचित्तेन योसौ क

१ कारितं यदन्तः प्रमापणमाभ्यंतरोवधइत्यर्थः ।
२ कर्मख्याक्रोशे कृत्यनेन खमुञ् । चोरशब्दमुच्चार्येत्यर्थः ।

रूप उच्यते।भुजिः पालनकौटिल्याभ्यवहारानुभूतिषु॥७७।
भुनक्तिभुग्नोभुङ्क्तेननम्भुङ्क्तेसुखमितीष्यते। समीचीनाऽर्थसम्पूर्णात्ततो घञ् प्रत्यये सति॥७८॥भावे वाकारकेऽपि रूपं सम्भोग इष्यते। स पावनार्थः पूर्वानुरागानन्तर उच्यते॥७९॥उत्पन्ना हि रतिस्तस्मिन्नानुकूल्यं न पाल्यते। स मानानन्तरम्प्राप्तःकौटिल्यार्थं विगाहते॥८०॥स्वतोऽपि कुटिलम्प्रेम किमुमानान्वयेसति। प्रवासानन्तरेतस्याऽभ्यवहारार्थतेष्यते॥८१॥ तत्र रद्युपोषितैरन्नमिव निर्विश्यते रतिः। करुणानन्तरगतोऽनुभावार्थःसकथ्यते ८२ विस्रम्भत्रिरस्मिद्भिः सुखमेवानुभूयते। यदि वा भोग इत्यस्य सम्प्रयोगार्थवाचिनः॥८३॥समा समासे चतुराश्चतुरोर्थान्प्रचक्षते। स संक्षिप्तोऽर्थसङ्कीर्णःसम्पूर्णःसम्यगृद्धिमान्॥८४॥ अनन्तरोपदिष्टेषु सम्भोगेषूपपद्यते। नवे हि सङ्गमे प्रायो युवानःसाध्वसादिभिः॥८५॥ संक्षिप्तानेव रत्यर्थमुपचारान्प्रयुञ्जते। मानस्यानन्तरे तेषां व्यलीकस्मरणादिभिः॥८६॥ रोषशेषानुसन्धानात्सङ्करःकेन वार्यते। सम्पूर्णःपूर्णकामानाङ्गामिनां प्रौढ्यसङ्गमे॥८७॥ उत्कण्ठितानाम्भूयिष्ठमुपभोगः प्रवर्तते। प्रत्यागतेपि यत्रैषा रतिपुष्टिः प्रयोजने॥८८॥ साकिमावर्ण्यते यूनान्तत्रैव मृतजीविते। पूर्वानुरागपूर्वाणां व्युत्पत्तिमिरुदाहृतः॥८९॥ अनन्तराणां सर्वेषान्तत्समासे निरुक्तयः। वृद्धिरत्राऽजहत्स्वार्थाजहत्स्वार्था ऽपि वर्तताम्॥९०॥प्रधानमनुपस्कृत्य न तदर्थो निवर्तते। प्रथमानन्तरे वृत्तेरजहत्स्वा

र्थतेष्यते ॥ ९१ ॥ नात्यन्तमजहत्स्वार्थान्ताम्मानानन्तरे विदुः । प्रवासानन्तरेत्वीषदजहत्स्वार्थतेष्यते ॥९२॥ करुणार्थस्य गन्धोपि नास्त्येव तदनन्तरे । अष्टमीचन्द्रकः कुन्दचतुर्थीसुवसन्तकः ॥९३॥ आन्दोलनचतुर्थ्यैकशाखलीमदनोत्सवः। उदकक्षवेडिका शोकोत्तंसिका चूतभञ्जिका ॥९४॥ पुष्पावचायिका चूतलतिका भूतमातृका । कादम्बयुद्धानि नवपत्रिका बिसखादिका॥९५॥शक्राचार्यकौमुदीयक्षरात्रिरभ्यूषखादिका । नवेक्षुभक्षिका तोयक्रीडापेक्षादिदर्शनम्॥९६॥द्यूतानि मधुपानञ्च प्रकीर्णानीति जानते । नित्यो नैमित्तिकश्चान्यः सामान्यो ऽन्योविशेषवान् ॥९७॥ प्रच्छन्नोन्यः प्रकाशोन्यः कृत्रिमाऽकृत्रिमावुभौ सहजाऽऽहार्यनामानौ परौ यौवनजोऽपरः॥९८॥विश्रम्भजश्च प्रेमाणौ द्वादशैते महर्द्धयः । चक्षुःप्रीतिर्मनःसङ्गः सङ्कल्पोत्पत्तिसन्ततिः ॥९९॥ प्रलापो जागरः कार्श्यमरतिर्विषयान्तरे । लज्जात्रिसर्जनं व्याधिरुन्मादो मूर्छनम्मृतिः॥१००॥ मरणञ्चेति विज्ञेयाः क्रमेणप्रेमपुष्टयः। नायकः प्रतिपूर्वीयमुपपूर्वोनुनायकः ॥ १०१ ॥ नायिकाप्रतिपूर्वा सावुपपूर्वाऽनुनायिका । नायिकानायिकाभासावुभयाभासइत्यपि ॥२॥ तिर्यक्षु च तदाभासा इति द्वादश नायकाः । तेषु सर्वगुणोपेतः कथाव्यापी च नायकः ॥ ३ ॥ अन्यायवॉस्तदुच्छेद्य उद्धतः प्रतिनायकः । ततः कैश्चिद्गुणैर्हीनः पूज्यश्चैवोपनायकः ॥४॥ समोन्यूनो ऽपि वा तस्य कनीयाननुनायकः । स्यात्कथाव्यापिनीसर्वगुणयुक्ता ऽथ

नायिका॥५॥ हेतुरीर्ष्यायितादीनां सपत्नीप्रतिनायिका। ततः कैश्चिद्गुणैर्हीना पूज्या चैवोपनायिका ॥६॥ समा न्यूनापि वा किञ्चित्कनीयस्यनुनायिका। तदाभासास्त थैवस्युर्भेदास्तेषाङ्गुणादिभिः ॥७॥ नायकस्तत्र गुणत उ- त्तमो मध्यमोऽधमः। प्रकृतेः सात्त्विकः सस्याद्राजसस्ता- मससस्तथा ॥८॥ साधारणोनन्यजातिः स विज्ञेयः परि- ग्रहात्। उद्धतो ललितः शान्त उदात्तो धैर्यवृत्तितः ॥९॥ शठो धृष्टोनुकूलश्च दक्षिणश्च प्रवृत्तितः॥गुणतो नायिकापि स्यादुत्तमामध्यमाधमा ॥१०॥ मुग्धामध्याप्रगल्भा च व- यसा कौशलेन च। धीराऽधीरा च धैर्येण स्वान्यदीयापरिग्रहात् ॥११॥ उढानूढोपयमनात् क्रमाज्ज्येष्ठा कनीय- सी। मानर्द्धरुद्धतोदात्ता शान्ता च ललिता च सा ॥१२॥ सामान्या च पुनर्भूश्च स्वैरिणी चेति वृत्तितः। आजीव- तस्तु गणिका रूपाजीवा विलासिनी ॥ १३ ॥ प्रवस्थातो ऽपराश्चाष्टौ विज्ञेयाः खण्डितादयः। निद्राकूणिततास्रा- क्षो नारीनखविभूषितः ॥१४॥ प्रातरेति प्रियो यस्याः कु- तश्चित्खण्डितेति सा। चाटुकारमपि प्राणनाथङ्कोपाद- पास्य या ॥ १५ ॥ पश्चात्तापमवाप्नोति कलहान्तरिता तु सा। दूतीमहरहःप्रेष्यकृत्वा सङ्केतकं क्वचित् ॥ १६ ॥ य- स्या न मिलितः प्रेयान्निष्प्रलब्धेति तां विदुः। सा तु वा सकसज्जास्यात्सज्जिते वासवेश्मनि ॥१७ प्रियमास्ती- र्णपर्यङ्के भूषिता या प्रतीक्षते। स्वधीनपतिका सा तु य- स्याः पार्श्वान्नमुचति॥१८॥प्रियश्चित्ररतक्रीडासुखास्वाद-

नलोलुपः। पुष्पेषु पीडिताकान्तं याति या साभिसारिका ॥१९॥प्रियो देशान्तरे यस्याः सा तु प्रोषितभर्तृका। यस्याः समुचितेप्यह्नि प्रवासी नैति वल्लभः॥२०॥विरहोत्कण्ठिता सा तु द्वात्रिंशदिति नायिकाः । हीनपात्राणि शेषाणि पीठमर्दोविटूषकः २१ विटचेटौ पताकोश्वसख्यश्चैषाम्परिग्रहः । महाकुलीनतौदार्यंमहाभाग्यङ् कृतज्ञता ॥२२॥ रूपयौवनवैदग्ध्यशीलसौभाग्यसम्मदः । मानितोदारवाक्यत्वमदरिद्रानुरागिता ॥ २३ ॥ द्वादशेति गुणानाहुर्नायकेष्वागमिकान् । मृद्वीकानारिकेराम्रपाकाद्याः पाकभक्तयः ॥ २४ ॥ नीलीकुसुम्भमञ्जिष्ठारागाद्या रागभक्तयः।अन्नव्यञ्जनहिर्व्याजनिर्व्याजाव्याजभक्तयः॥२५॥ धर्मार्थकामोदर्काश्च प्रेमसम्पर्कभक्तयः । वाक्यवज्रप्रबन्धेषु रसालङ्कार सङ्करात् ॥ २६ ॥ निवेशयन्त्यनौचित्यपरिहारेणसूरयः । चतुर्वृत्त्यङ्गसम्पन्नञ्चतुरोदात्तनायकम् ॥ २७ ॥ चतुर्वर्गफलङ्कोनप्रबन्धम्बान्धवीयति। मुखम्प्रतिमुखङ्गर्भोऽवमर्शश्चमनीषिभिः ॥ २८ ॥ स्मृतानिर्वहणञ्च सन्धिप्रबन्धेपञ्चसन्धयः । अविस्तृतमसंक्षिप्तं श्रव्यवृत्तं सुसन्धि च ॥ २९ ॥ भिन्नसर्गान्तवृत्तञ्चकाव्यं लोकोभिनन्दनि।पुरोपवनराष्ट्रादिसमुद्राश्रमवर्णनैः॥३०॥ देशसम्पत्प्रबन्धस्य रसोत्कर्षाय कल्पते। ऋतुरात्रिन्दिवार्कैन्दूदयास्तमयवर्णनैः॥ ३१॥ कालःकाव्येषु सम्पन्नोरसपुष्टिन्नियच्छति। राजकन्याकुमारस्त्रीसेनासेनाङ्गभङ्गिभिः ॥ ३२ ॥ पात्राणां वर्णनात्काव्येरसस्रोतोधिति-

ष्ठति । उद्यानसलिलक्रीडामधुपानरसोत्सवाः ॥ ३३ ॥ विप्रलम्भविवाहाश्च चेष्टाः काव्ये रसावहाः। मन्त्रदूतप्रयाणाजिनायकाभ्युदयादिभिः ॥ ३४ ॥ पुष्टिःपुरुषकारस्य रसङ्काव्येषु वर्षति । नावर्णनन्नगर्वादेर्दोषायविदुषाम्मत्तम् ॥ ३६ ॥ यदिशैलर्तुरात्र्यादेर्वर्णननैव तुष्यति। गुणतः प्रागुपन्यस्य नायकन्तेनविद्विषाम् ॥ ३६ ॥ निराकरणमित्येष मार्गः प्रकृतिसुन्दरः । वंशवृत्तश्रुतादीनिवर्णयित्वा रिपोरपि ॥३७॥ तज्जयान्नायकोत्कर्षकथनञ्चधिनोतिनः ॥ १३७ ॥ अथैषां लक्षणोदाहरणानि। मनोनुकूलेष्वर्थेषु सुखसंवेदनंरतिः। आसम्प्रयोगविषयासैवप्रीतिर्निगद्यते ॥ १३९ ॥ तद्रूपेण रसस्य भावो यथा। हरस्तुकिञ्चित्परिवृत्तधैर्यश्चन्द्रोदयारम्भइवाम्बुराशिः । उमामुखेबिम्बफलाधरेष्ठेव्यापारयामास विलोचनानि। अत्रबिम्बेष्ठत्वादिभिर्मनोनुकूलेपार्वतीमुखेविलोचन - व्यापारानुमितो महेश्वरस्याभिलाषविशेषः सात्विको रत्यनुत्पादात्सुखानुभवस्योत्पत्तिमात्रमनुमापयति ॥ १॥ तद्रूपेणैव सात्विकोत्पत्तौ जन्मयथा । अभूद्वरः कण्टकितप्रकोष्ठःस्विन्नाङ्गुलिः संवृत्तेकुमारी । तस्मिन्द्वयेतत्क्षणमात्मवृत्तिः समंविभक्तेव मनोभवेन। अत्र स्वेदरोमोद्भेदयोः सात्विकयोरुत्पादाद्रसस्य रतिरूपेणाविर्भावो ऽवगम्यते ॥२॥ जन्मैवसञ्चार्युत्पत्तौ यथा । तयोरपाङ्गप्रविचारितानिकिञ्चिद्वयवस्थापितसंहृतानि । ह्री-

१ परिलुप्तेत्यपिपाठः ॥

यन्त्रणामानशिरमनोज्ञामन्योन्यलोलानि विलोचनानि॥
अत्र ह्रीःसंचारिभावो जायमानो रसस्य जन्म ज्ञापयति
॥३॥ तदत्रानुभवोत्पत्तौ यथा। ततः सुनन्दावचनावसा-
ने लज्जाम्मृदूकृत्य नरेन्द्रकन्या। दृष्ट्या प्रसादामलया
कुमारम्प्रत्यग्रहीत्संवरणस्रजेव। अत्र दृष्टिलक्षणः शरी-
रारम्भेनुभावोभवन् साविर्भावं लक्षयति॥४॥अनुभावा-
देरनेकस्यैकस्य वापुनरुत्पत्तिरनुबन्धः। सोनेकस्य यथा।
विवृण्वती शैलसुतापि भावमङ्गैः क्वचिद्वालकदम्बकल्पैः।
साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन।
अत्र देव्याः स्मरारौ पूर्वमुत्पन्नारतिः साभिलाषतदव-
लोकनेन विविक्तवसन्तादिभिरुद्दीप्यमानारोमाञ्चावहि-
त्थलक्षणाभ्यां सात्विकव्यभिचारिभ्यामनुबध्यते ॥ ५॥
एकस्यैव पुनःपुनर्यथा। यान्त्यामुहुर्वलितकन्धरमानन-
न्तदा वृत्तवृन्तशतपत्रनिभं वहन्त्या। दिग्धोऽमृतेन च
विषेण च पक्ष्मलाक्ष्या गाढन्निखातइव मे हृदयेकटाक्षः॥
अत्र मालत्या माधवविषये पूर्वमुत्पन्ना रतिर्वसन्तावि-
तारतत्सन्निधिविशेषप्रदर्शनादिभिरुद्दीप्यमाना पुनःपु-
नरुत्पन्नेन वलितग्रीवकटाक्षविक्षेपलक्षणेन शरीरार-
म्भानुभावेनानुबध्यते। अत्रैव माधवस्य मालतीविषये
तदहरुत्पन्ना रतिस्तैरेवोद्दीपनैरुद्दीप्यमाना हर्षधृति-
स्मृतिमतिव्याध्यादिभिः सञ्चारिभावैर्वागारम्भेण चानु-
भावेनानुबध्यते ॥६॥ रतिरूपेणैव रसनिष्पत्तिर्यथा। तं
वीक्ष्य वेपथुमती सरसाङ्गयष्टिर्नक्षेपणाय पदमुद्धृतमर्पय-

न्ती । मार्गाचलव्यतिकराकुलितेव सिन्धुः शैलाधिराजतनया न ययौ न तस्थौ । अत्र जन्मान्तरानुभवसंस्काराद्प्रतिकूलेपि शूलिनि शैलात्मजायाः सर्वकालमेवाविच्छिन्नाऽतिस्थिरं वियुक्तस्य दुश्चरेणापि तपसा प्रार्थनीयसङ्गमस्यतस्याकस्मिकदर्शनेनोद्दीप्यमानासदः समुपजायमानसात्विकस्वेदस्तम्भवेपथूपलक्षितैर्हर्षधृतिस्मृत्यावेगसाध्वसादिभिर्व्यभिचारिभिर्भावैः पदविक्षेपलक्षणेन च शरीरानुभावेनसंसृज्यते । सोयंविभावानुभावव्यभिचारिसंयोगैरतिरूपेण रसो निष्पद्यते ॥७॥ रतिरूपेणैव रतिपुष्टिर्यथा । पीनश्रोणिगभीरनाभिनिभृतम्मध्येभृशोच्चस्तनरूपायाद्वः परिरब्धमध्विदुहितुः कान्तेन कान्तं वपुः । स्वावासानुपघातनिर्वृतमनास्तत्कालमीलद्दृशे यस्मै सोच्युतनाभिपद्मवसतिर्वेधाः शिवन्धयायति । अत्र सर्वदैव श्रीवत्सलक्ष्मणो लक्ष्मीविषये महाकुलीनतौदार्यस्थिरानुरागितारूपयौवनवैदग्ध्यशीलसौभाग्यमहाभाग्यादिभिः समुत्पन्ना रतिस्तदवयवविशेषकामनीयकविभावनेनोद्दीपनविभावातिशयेनोद्दीप्यमानाब्रह्मणः समक्षमप्यालिङ्गनलक्षणेन शरीरारम्भानुभावेनानुमीयमानां लज्जाप्रणाशलक्षणाम्प्रेमपुष्टेरष्टमीमवस्थामध्यास्ते अत्र चानुक्ता अपि सात्विकाव्यभिचारिणोन्यपि चानुभावविशेषाः प्रतीयन्ते । स्त्रियोपि च समग्रात्मगुणसम्पदाश्रये श्रीवत्सलक्ष्मणि तथाभूता तदभ्यधिकाव्यारतिः प्रवृद्धप्रेमप्रियतमालिङ्गनलक्षणेनोद्दीपनविभावेनो

दीप्यमानांनयननिमीलनानुमेयां समस्तसात्विकानुभावव्यभिचारिहेतुम्प्रेमपुष्टेरुत्तरामवस्थामाश्रयति । सोयं विषयसौन्दर्यादाश्रयप्रकृतेः संस्कारपाटवादुद्दीपनातिशयाच्च पराङ्कोटिमावहन् रसः पुष्टइत्युच्यते । अत्रैव ब्रह्मणः श्रियम्प्रतिमानोहराममेयां सृष्टिरिति रत्नाकरस्येयमात्मजेति चन्द्रामृतादीनामियंसोदर्येति विष्णोरियम्प्रियतमेति कामस्येयं जननीत्यादिभ्य आलम्बनेभ्यः समुत्पन्ना प्रीतिः स्त्रावासानुपघातिना शरीरसन्निवेशेन द्रुङ्मीलनजनितया च तदुपघातशङ्कया उद्दीप्यमाना तत्क्षणोपजायमानतया वेगस्मृतिवितर्कोन्मादमोहचिन्तादिभिर्व्यभिचारिभावैस्तदनुमेयैश्च स्तम्भवेपथुप्रभृतिसात्विकैः शिवानुध्यानलक्षणेन युद्धारम्भानुभावेन संसृज्यमानापरम्प्रकर्षमारोहतीति प्रतीयते ॥ ८ ॥ रतौ भयादिसङ्करो यथा । राहोश्चन्द्रकलामिवाननचरीन्दैवात्समासाद्यमेदस्योरस्य कृपाणपातविषयादाच्छिन्दतःप्रेयसीम् । आतङ्काद्विकलन्द्रुतङ्करुणया विक्षोभितं विस्मयात्क्रोधेन ज्वलितम्मुदाविकसितञ्चेतः कथं वर्तताम् । अत्र माधवस्य मालत्याम्पूर्वमुत्पन्नारतिस्तदवस्थालोकनादिभिरुद्दीपनविभावैरुद्दीप्यमाना भयशोकविस्मयक्रोधहर्षैरपिरसान्तरैःपृथक्पृथगविभावानुभावव्यभिचारिसंयोगान्निष्पद्यमानैः सङ्कीर्यमाणा मनोवाग्बुद्धिशरीरारम्भानुभावैर्भयाद्यनुरूपैश्च सात्विकव्यभिचारिभिः सम्पर्कैःपरम्प्रकर्षमारोहन्ती प्रतीयते।तत्र "चेतसो वैकल्या-

दिपरिभावनम्मन आरम्भो वाक्योच्चारणं"वागारम्भः रा-
हीरिवदस्योश्चन्द्रकलामिव प्रेयसीमित्यादि„बुद्ध्यारम्भः।
आच्छिन्दत इत्यादि"शरीरारम्भः।भयादीनाञ्चपञ्चाना-
मपि यथाक्रमं राहोरिति चन्द्रकलामिवाननचरीमिति दै
वात्समासाद्यम इति दस्योरस्य कृपाणपातविषयादिति
आच्छिन्दतः प्रेयसीमित्यालम्बनविभावास्तत्स्वरूपपरि
भावनान्युद्दीपनविभावाः विकलन्द्रुतं विक्षोभितञ्चलितं
विकसितमित्यनुभावाः। आतङ्ककरुणाविस्मयक्रोधमुद-
नुरूपाश्च कम्पाश्रुस्तम्भवैवर्ण्यरोमाञ्चादयः सात्विकामो-
हविषादोदर्कौग्र्यधृत्यादयोव्यभिचारिणश्चानुमीयमा-
नानिष्पत्तिहेतवो भवन्ति। सोयन्तुल्यकालबलोत्पत्ति-
कारणानाम्भयादिनिष्पत्तीनां रतौ संसर्गः सङ्कर इत्यु-
च्यते ॥९॥ रतिरूपेण रसप्रकर्षस्य ह्रासो यथा। क्रोपो
यत्र भ्रुकुटिरचनानिग्रहो यत्र मौनं यत्राऽन्योन्यं स्मितम-
नुनयो दृष्टिपातः प्रसादः। तस्य प्रेम्णस्तदिदमधुना वै-
शसम्पश्यजातन्त्वम्पादान्ते लुठसि नच मे मन्युमोक्षः
खलायाः।अत्र योषितिरोषाख्यरसान्तरतिरस्कारात्पुरुषे
चान्यरागाद्रतिप्रकर्षस्य ह्रासोऽवगम्यते ॥१०॥ रतिरूपेण
हीनपात्रेषु रसाभासो यथा। विक्किणइ माहमासम्मि
पामरोपारणं बिइल्लेण। णिद्धूममुम्मुरेसामलीएथ-
णएणिअच्छन्तो १ ॥११॥ तिर्यक्षु यथा। पअपाडिअंसो

१ विक्रीणीते माघमासे[1]पामरः प्रावरणं बलीवर्देन। निर्धूम मुर्मुरश्याम-
लायास्तनौनियच्छमानः।

हग्गन्तं वाए उवसहगोठ्ठमज्झम्मि।दुट्ठवसहस्स सिङ्गेअ-
छिउडङ्कडुअन्तीए १॥१२॥नायकप्रतियोगिषु यथा। पुलअ
ङ्गणेति दहकन्धरस्स राहवसरासरीरस्मि। जणअसुआ
फअंसमहग्घविअकरअलाठ्ठविमुक्का २॥१३॥ गौणेषु य-
था॥उव्वहइ णवतिणंकुररोमञ्चपसाहिआइ अङ्गाइं। पाउ-
सलच्छीएपओहरेहिंपडिवेल्लिओविज्झो३॥ एतेचत्वारोपि-
रसाभासा उच्यन्ते ॥१४॥ रतावेवलज्जारोषरूपरसान्तर-
यीः प्रशमो यथा। दृष्टे लोचनवन्मनाङ्मुकुलितम्पार्श्व-
स्थिते वक्त्रवन्न्यग्भूतम्बहिरासितमपुलकवत्स्पर्शसमात-
न्वति। नीवीवन्धवदागतं शिथिलतामाभाषमाणे ततो
मानेनापगतं ह्रियेव सुदृशः पादस्पृशिप्रेयसि। अत्र ब-
लवद्भ्यां प्रियप्रेमानुनयाभ्यां ह्रीरोषयोरुपशमः क्रियते॥
१५॥ रतावेवरोषरूपरसस्यशेषो यथा। एष्यत्युत्सुकमा-
गते विवलितं सम्भाषिणि स्फारितं संश्लिष्यत्यरुणं गृ-
हीतवसने कोपाञ्चितभ्रूलतम्। मानिन्याश्चरणानतिव्य-
तिकरे बाष्पाम्बुपूर्णेक्षणञ्चक्षर्जातमहोप्रपञ्चचतुरञ्जाता-
गसिप्रेयसि। अत्र कस्याश्चिद्बलवताप्रेमोन्मूलितस्यापि
मानस्य शेषेऽनुवर्तते। तएते भावा दशापि रसप्रकारा हा-

१ प्रतिपादितं सौभाग्यं त्वयैवेह वृषभ गोष्ठमध्ये। दुष्टवृषभस्यशृङ्गे अच्छि
पुटं कण्डूयन्त्या।

२ पुलकं जनयन्ति दशकन्धरस्य राघवशराः शरीरे। जनकसुता स्पर्शम-
हार्घित करतलाकृष्टविमुक्ताः॥

३ उद्वहतिनवतृणाङ्कुर रोमाञ्चप्रसाधितानि अङ्गानि। प्रावृट्लक्ष्मीः पयो-
धराभ्यां प्रतिवेल्लितोविन्ध्यः।

सादिष्वपि प्रायशो दृश्यन्ते । ग्रन्थगौरवभयान्न क्वचिदुदाहियन्ते॥१६॥ तत्र । न्यङ्गः १ क्रीडादिभिश्चेतो विकासो हास उच्यते । तद्रूपेण रसस्य भावो यथा । कनककलशस्वच्छे राधापयोधरमण्डले नवजलधरश्यामामात्मप्रतिम्प्रतिबिम्बिताम् । असितसिचयप्रान्तभ्रान्त्या मुहुर्मुहुरुत्क्षिपन् जयति जनितव्रीडाहासः प्रियाहसितो हरिः। अत्र राधया हरिन्यङ्गादुरेस्तु व्रीडातो हासस्य सत्तामात्रमप्रतीयते॥१॥शोकश्चित्तस्य वैधुर्यमभीष्टविरहादिभिः॥१४१॥ तद्रूपेण रसस्य निष्पत्तिर्यथा । हृदयान्नापयातोसि दिक्षु सर्वासु दृश्यसे । वत्स रामगतोसीति सन्तापादनुमीयसे । अत्र दशरथस्य रामवियोगादुत्पन्नस्तद्गुणस्मरणादिभिरुद्दीपितश्चिन्तासन्तापादिर्व्यागारम्भेण चानुषज्यमानः शोकरूपेण रसो निष्पद्यते॥२॥ प्रतिकूलेषुतैक्ष्ण्यस्य प्रबोधः क्रोध उच्यते॥१४२॥ तद्रूपेण रसस्य निष्पत्तिर्यथा। मय्येवमस्मरणदारुणचित्तवृत्तौ वृत्तं रहः प्रणयमप्रतिपाद्यमाने। भेदादुभुवोःकुटिलयोरतिलोहिताक्ष्या भग्नं शरासनमिवातिरुषास्मरस्य।अत्र "यद्यपि विभावाऽनुभावसञ्चारि संयोगलक्षणाया रसनिष्पत्तेरधिकमतिरुषातिलोहिताक्ष्येति प्रकर्षनिमित्तमतिशब्दोपादानं विदधते"तथाप्युत्तमनायिकाश्रयः प्रियविषये न रोषः प्रकर्षमासादयति॥३॥कार्यारम्भेषु संरम्भःस्थेयानुत्साहइष्यते॥१४३॥

१ सोक्षुण्ठनं वचः।

तद्रूपेण रसस्य जन्म यथा । मूर्द्ध्नाजाम्बवतोभिवाद्यच रणावापृच्छ्य सेनापतीनाश्वास्याश्रुमुखान्मुहुः प्रियसखी न्प्रेष्यान्समादिश्यच । आरम्भञ्जगृहे महेन्द्रशिखरादम्भो निधेर्लङ्घने रंहस्वी रघुनाथपादरजसामुच्चैःस्मरन्मारुतिः॥ अत्राभिवादनाप्रश्नाश्वासनासमादेशनाद्रिशिरारोहणेष्ट-देवतास्मरणानां पूर्वरङ्गपर्यवसायित्वेनाऽनुद्दीपनविभाव-त्वादनुत्साहानुभावत्वाच्च नायमनुबन्धो निष्पत्तिः प्रक-र्षो वा भवति ॥४॥ भयञ्चित्तस्यवैक्लव्यं रौद्रादिजनितं वि-दुः॥१४४॥तद्रूपेण रसस्यानुबन्धो यथा । मन्त्रान्मृत्युजि-तो जपद्भिरसकृद्ध्यायद्भिरिष्टान्सुराञ्छुष्यत्तालुभिराकु-लाकुलपदैर्निर्वाग्भिरुत्कम्पिभिः । अध्वन्यैरिहजीवितेश महिषव्याधूम्रधूमाविलालङ्घ्यन्ते करिमांसघस्मररणत् कौलेयकाः पल्लयः॥ अत्र "यद्यपि पल्लीनामालम्बनत्वन्त द्विशेषणयोरुद्दीपनत्वम्मन्त्रजपादेरनुभावत्वन्तालुशोषा दीनां व्यभिचारित्वमिति विभावानुभावव्यभिचारिसंयो गोऽस्ति"तथापि मन्त्रजपेष्टदेवतानुध्यानयोर्लङ्घनोपाय-परत्वान्न भयरूपेण रसनिष्पत्तिः ॥ अध्वन्यानां हि त-न्निष्पत्तावल्पसत्वतयास्तम्भमोह मूर्छामरणादिभिरुपा-यप्रयोगो न घटते॥५॥ जुगुप्सा गर्हणाऽर्थानान्दोषसन्द-र्शनादिभिः ॥१४५॥ तद्रूपेण रसस्यानुगमो यथा । रेहस्त दक्षिण मृतस्य शिशोर्द्विजस्य जीवातवे विसृज शूद्रमुनौ कृपाणम् । रामस्य गात्रमसि निर्भरगर्भखिन्नसीताप्रवा सनपटोः करुणा कुतस्ते॥अत्र "यद्यपि द्विजशिशोर्जीव-

नाय मुनिरपि शूद्रो वध्य इति न रामस्यात्मकर्मनिन्दा" तथाप्यनपकारिणञ्जिघांसतो घृणा प्रवर्तत इति सीतापरित्यागविषयत्वेनैवात्र जुगुप्सानुगमो ग्रहीतव्यः।शम्बूकविषये पुनरस्याजन्ममात्रमेवेति ॥६॥विस्मयश्चित्तविस्तारः पदार्थातिशयादिभिः ॥१४६॥तद्रूपेण रसस्य जन्म यथा। कृष्णेनाङ्गगतेन रन्तुमधुना मृद्भक्षिता स्वेच्छया सत्यं कृष्ण क एव माहमुसलीमिथ्याग्रह पश्याऽननम्। व्यादेहीति विदारिते तु वदने दृष्टा समस्तञ्जगन्माता यस्य जगाम विस्मयवशम्पायात्स वः केशवः। अत्र शिशोर्मुखेजगद्दर्शनमालम्बनविभावः। तत्सामग्र्यशैशवाद्यालोककनमुद्दीपनविभावो विस्मयवशञ्जगामेत्यनेनाऽनुपात्ता अपि सञ्चारिणोनुभावाश्च गृह्यन्ते॥७॥स्तम्भश्चेष्टाप्रतीघातो भयरागामयादिभिः॥१४७॥तद्रूपेण रसस्य पुष्टिर्यथा। तन्ताणहअच्छाअंणिच्चलोअणसिहम्पउत्थपआवम्।आलेक्खपईवाण व्वणिअअम्पअइचडुलत्तणम्पि विअलिअम्।१ अयञ्च पुष्टोपि सात्विकत्वात्सदैवान्यानुयायीति नानुभावादिभिरनुबध्यते॥८॥हर्षादद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया॥१४८॥तद्रूपेण रसस्य जन्म यथा॥करिमरिअआलगज्जिरजलआसणिपडिरवोएसो। पइणोधणुरवकञ्चिणिरोमञ्चङ्किम्मुहावहसि २। अस्यापि

१ एतच्छ्लोकच्छाया चतुर्थपरिच्छेदे (२२) पृष्ठे गता

२ किमीरितजालगर्जित जलदाग्रनि प्रतिरवोएषः। पत्युर्धनूरवकाञ्चिणि रोमाञ्चं किं मुधावहसि ॥

सात्विकत्वादन्यानुबन्धानजायन्ते॥९॥मदप्रमदपीडादेवै-श्वर्यङ्गद्गदं विदुः॥१४९॥तद्रूपेण रसस्य निष्पत्तिर्यथापि-पिप्रियससस्वयंमुमुमुखासवन्देहि मे ततत्यज दुदुद्रतम्भ भभभाजनङ्काञ्चनम्। इति स्खलितजल्पितम्मदवशात्कु रङ्गीदृशः प्रगे ह्रसितहेतवे सहचरीभिरध्यैयत॥ अयमपि सात्विकत्वान्निष्पन्नो नान्यैरनुबध्यते॥१०॥वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः॥१५०॥तद्रूपेणरसस्य जन्म यथा। हिमव्यपायाद्विशदाधराणामापाण्डुरीभूतमुखच्छवीनाम्। स्वेदोद्गमः किम्पुरुषाङ्गनानां चक्रे पदं पत्र विशेषकेषु।अत्रापि पूर्ववदन्यानुषङ्गो न भवति॥११॥ रागरोषभयादिभ्यः कम्पो गात्रस्य वेपथुः ॥१५१॥ तद्रूपेण रसस्य जन्म यथा। मा गर्वमुद्वह कपोलतले चकास्ति कान्तस्वहस्तलिखितामम मञ्जरीति। अन्यापि किन्न सखिभाजनमीदृशीनां वैरी न चेद्भवति वेपथुरन्तरायः। अयमपि प्राग्वदेवनान्यैरनुगम्यते॥१२॥विषादमदरोषादेर्वर्णान्यत्वं विवर्णता॥१५२॥तद्रूपेण रसस्य निष्पत्तिर्यथा। सहिसाहसंतेण समं अहम्पिकिण्णिग्गआपहाअम्मि।अण्णच्चिअदीसइ जेणदप्पणेकाविसासुमुही१।अयमपि नान्यैरनुबध्यते॥१३॥अश्रुनेत्रोद्गतं वारि दुःखशोकप्रहर्षजम्॥१५३॥तद्रूपेण रसस्यानुबन्धो यथा। उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्ति वाष्पं कुरु स्थिरतया शिथिलाऽनु-

१ सखिसाहसंतेन सममहमपिकिं निर्गताप्रभाते। अन्यैवदृश्यते येन दर्पणे कापिसासुमुखी।

बन्धम्। अस्मिन्नलक्षितनतेऽन्नतभूमिभागे मार्गे पदानि खलु ते विषमी भवन्ति। अत्र वाष्पशब्देन लोचनाश्रय-मश्रूच्यते। नकण्ठाद्धाश्रयोदुःखावेशः यथा। विललाप सगद्गदम्।मुहुर्लग्नः कण्ठे तरलयति वाष्पस्तनतटीमि-ति॥१४॥ प्रलयस्तीव्रदुःखादेरिन्द्रियास्तमयोमतः ॥१५४॥ तद्रूपेण रसस्य निष्पत्तिर्यथा। तीव्राभिषङ्गप्रभवेन वृत्ति म्मोहेन संस्तम्भयतेन्द्रियाणाम्। अज्ञातभर्तृव्यसनामुहू र्तङ्कृतोपकारेव रतिर्बभूव। अत्र मोहशब्देन मूर्च्छोच्य-ते। न वक्ष्यमाणलक्षणोमोहः।१५॥स्मृतिः पूर्वानुभूतार्थवि षयं ज्ञानमुच्यते ॥१५५॥ तद्रूपेण रसस्यानुबन्धो यथा। इतः प्रत्यादेशात्स्वजनमनुगन्तुं व्यवसिता स्थितातिष्ठेत्यु च्चैर्वदति गुरुशिष्ये गुरुसमे। पुनर्दृष्टिम्बाष्पप्रकरकलु-षामर्पितवती मयि क्रूरे यत्तत्सविषमिव शल्यन्दहति माम्। अत्र सविशेषास्मृतिरिच्छया वागारम्भेण चानु-बध्यते। निष्पत्त्यादयः पुनरस्या रत्यादिनिष्पत्तिष्वेव द्रष्ट व्याः। रत्यादयो हि स्मृतिमूलत्वात्तत्प्रकर्षाऽपकर्षावनुव-र्तन्ते॥१६॥उहोवितर्क इत्युक्तः पदार्थेषु यथामति॥१५६॥ तद्रूपेण रसस्य निष्पत्तिर्यथा।चित्ते निवेश्य परिकल्पित-सत्वयोगाद् रूपोच्चयेन घटिता मनसा कृता नु।स्त्रीरत्न-सृष्टिरपरा प्रतिभाति सा मे धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः।सेयमसत्यः सत्यो वा स्मृतिज्ञानचिन्तनादिद्वारेण निश्चयान्तो निष्पन्न इत्युच्यते॥१७॥ उत्कण्ठेष्टानवाप्तौ योऽभिलाषः स्यात्तदाप्तये ॥१५७॥ तद्रूपेण रसनिष्पत्ति-

हासौ यथा । यास्यत्यद्यशकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया बाष्पस्तम्भितकण्ठवृत्तिवचनं चिन्ताजडत्वदर्शनम्। वैक्लव्यं ममतावदीदृशमिदं स्नेहादरण्यौकसः पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः अत्र विभावानुभावव्यभिचारिसंयोगात्प्रीतिरिवोत्कण्ठापि तदनुषङ्गिणी निष्पन्ना उत्तरार्द्धप्रतिपाद्येन तथाविधेनैव विस्मयादिना ऽभिभूयमाना हास इत्युच्यते प्रकर्षश्चास्य ममारण्यौकस इत्यनेन निवार्यते ॥ प्रयत्नपूर्विकार्थपुरःसृतिश्चिन्तेति कथ्यते॥१५८॥ तद्रूपेण रसस्य प्रकर्षो यथा । चिन्ताणिअदइअसमागमम्मि कअमण्णुआइरूभरिऊणासुण्णङ्कलहाअन्तीसहीहिंरुण्णाणओहसिआ१॥अत्र सखीरोदनेन शून्यकलहः शून्यकलहेन साक्षात्कारः साक्षात्कारेण चिन्ता चिन्तया तु मूलभूता रतिः प्रकृष्यते ॥ आत्मप्रकाशनपरा चेष्टा चपलतोच्यते ॥ १५९ ॥ तद्रूपेण रसस्य जन्मयथा । कश्चित्करास्यामुपगूढनालमालोलपत्राभिहतद्विरेफम् । राजोभिरन्तः परिवेषबन्धि लीलारविन्दम्भ्रमयाञ्चकार॥ अत्र लीलारविन्दभ्रमणचेष्टयाकश्चिदिन्दुमत्यै तिष्ठते ॥ शास्त्रोक्तार्थानुसन्धानादर्थनिर्द्धारणंमतिः ॥ १६० ॥ तद्रूपेण रसस्याऽनुबन्धोयथा । असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः । सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणस्य वृत्तयः ॥ अत्र पूर्वार्द्धोक्ता-

१ चिन्तानीतदयितसमागमे कृतमन्युना भूता भूत्वा ॥ शून्यं कलहायन्ती सखीभी रुदितान आहसिता ॥

र्थनिर्द्धारणरूपा मतिरुत्तरार्द्धेनाऽनुबध्यते ॥ गर्वोऽन्येषा-
मवज्ञानमात्मसम्भावनादिभिः ॥ १६१ ॥ तद्रूपेण रसपु-
ष्टिर्यथा । धृतायुधो यावदहन्तावदन्यैः किमायुधैः । य-
द्वा नसिद्धुमस्त्रेण मम तत्केन सेत्स्यति ॥ अत्र कर्णस्यात्म-
सम्भावनया ऽन्यत्थामन्यवज्ञानम्प्रकृष्यते । अहेतुरनिष-
र्त्या च स्नेहश्चित्तार्द्रता मता॥६२॥तद्रूपेण रसस्यनिष्यष्टि-
र्यथा॥अनेन कस्यापि कुलांकुरेण स्पृष्टेषु गात्रेषु सुखम-
मेतत् कान्निर्वृतिर्ज्ञेतसि तस्य कुर्याघस्यायमङ्गात्कृति-
नः प्ररूढः॥अत्र दुष्यन्तस्य सत्वदमनदर्शनादुत्पन्नस्तद-
ङ्गस्पर्शसुखादिभिरुद्दीपितः स्पृहामतिवितर्कव्यागारम्भैः
संसृज्यमानः स्नेहोनिष्यन्दते ॥ अभीष्टार्थस्य सम्प्राप्तौ-
स्पृहापर्यायप्रता धृतिः॥१६३॥ तद्रूपेण रसप्रकर्षोयथा । नी-
तौ विक्रमबाहुरात्मसमताम्प्राप्तेयमुर्वीतले सारं सार-
रिका ससागरमहीप्राप्तेरकहेतुः प्रिया । देवीप्रीतिमुपा-
गता च भगिनीलाभाज्जिताःकोसलाः किन्नास्ति त्वयि स-
त्यमात्थवृषभेयस्मिन्करोमि स्पृहाम् । अत्रवत्सराजस्य-
सर्वात्मनामनोरथसिद्धयो धृतेः प्रकर्षमावहन्ति ॥ चेतो-
निमीलनं व्रीडा न्यङ्गरागस्तवादिभिः॥१६४॥तद्रूपेण रसप्र-
कर्षात्कोपशोकाभ्यांसङ्करो यथा॥अक्षुद्रारिकृताऽभिमन्यु-
निधनात्सङ्क्रान्ततीव्रक्रुधः पार्थस्याऽकृतशात्रवप्रतिकृ-
तेरन्तः शुचा मुह्यतः।कीर्णा बाष्पकणैः पतन्ति धनुषि व्री-
डाजडा दृष्टयो हा वत्सेतिगिरः स्फुरन्ति न पुनर्निर्यान्ति-
कण्ठाद्बहिः । अत्रार्जुनस्याऽन्यायेनाऽभिमन्युवधाद्दुःखभू-

तौ दीप्तावेव क्रोधशोकावुद्भूतस्मितप्रतिकारोत्थया तथाविधयैव व्रीडया सङ्कीर्यते।तथा हि,क्रोधशोकयो रनुभावभूता दृष्टयो वाचश्च व्रीडाजडा इति विशेषणानि संबध्यन्ते । अवहित्यन्तु लज्जादेर्हर्षादाकारगोपनम् ॥ १६५ ॥ तद्रूपेण रसस्याऽनुबन्धो यथा ॥ एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी । लीला कमलपत्राणि गणयामास सपार्वती । अत्र । प्रणम्य शितिकण्ठायविधुवास्तदनन्तरम् । चरणौरञ्जयन्त्यस्याश्चूडामणिमरीचिभिरित्यादेर्मुनिवाक्यादुद्भूतप्रहर्षाकारौ गुरुसन्निधौ लज्जितयालीलाकमलपत्रगणनेन गौर्या गोप्यते। सुखदुःखादिजनितो मोहश्चित्तस्य मूढता ॥१६६॥ तद्रूपेण रसस्य निष्पत्तिर्यथा।कान्ते तल्पमुपागते विगलिता नीवीस्वयम्बन्धनाद्वासश्च स्खलमेखलागुणधृतङ्किञ्चिन्नितम्बेस्थितम् । एतावत्सखि वेद्मि साम्प्रतमहन्तस्याङ्गसङ्गे पुनः को ऽसौ कास्मि रतञ्च किङ्कथमिति स्वल्पापि मे न स्मृतिः ॥ अत्र स्थायिनीरतिर्मोहनिष्पत्त्या प्रकृष्यते ॥ सम्मोहानन्दसम्भेदोमदिरादिकृतोमदः ॥ १६७ ॥ तद्रूपेण रसस्य निष्पत्तिर्यथा । घूर्णमाननयनं स्खलत्कथंस्वेदबिन्दुमदकारणस्मितम् । आननेन ननु तावदीश्वरश्चक्षुषा चिरमुमामुखम्पपौ॥अत्रनयनघूर्णनाकारेण स्मितादयः सम्मोहानन्दसम्भेदा उद्भवन्तो मदनिष्पादयन्ति । मनः प्रसादो हर्षः स्यादिष्टावाप्तिस्तवादिभिः॥१६८॥तद्रूपेण रसस्य प्रकर्षो यथा। जातस्य ते पितुरपीन्द्रजितो निहन्तुर्वत्सस्य वत्स कति नाम

दिनान्यमूनि। तस्याप्यपत्यमधितिष्ठति वीरधमंदिष्टया-
गतन्दशरथस्य कुलम्प्रतिष्ठाम् । अत्रदशरथसुहृदः सु-
मन्त्रसारथेः प्रभुकुलप्रतिष्ठामाशंसतस्तत्सूनुमिन्द्रजितो
हन्तारंपश्यतो मनोरथावाप्तग्राहर्षोनिष्पन्नस्तदपत्येपि
वीरधर्ममाचरिष्णौ प्रकृष्टो दिष्टेरर्थव्ययेन सूच्यते ॥ क्रो-
धः कृतापराधेषुस्थिरो ऽमर्षत्वमश्नुते॥१६९॥तद्भूपेणरसस्य
प्रकर्षोयथा। लाक्षागृहाऽनलविषान्नसभाप्रवेशैः प्राणेषु
वित्तनिचयेषु च नः प्रहृत्यआकृष्टपाण्डववधूपरिधानकेश-
स्वस्था भवन्ति मयि जीवति धार्त्तराष्ट्राः । अत्रभी-
मसेनस्य धार्त्तराष्ट्रेषुस्वस्था इति नाम्नोप्यसहना लाक्षा
गृहाद्यपकारजन्मा ऽमर्षः प्रतीयते । असूया ऽन्यगुणद्वो-
नामौद्धत्यादसहिष्णुता॥१७०॥तद्भूपेण रसस्य जन्म यथा।
वन्द्यास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्त्तते सु-
न्दस्त्रीनिधनेप्यखण्डयशसो लोके महान्तो हि ते। यानि
त्रीण्य कुतोमुखान्यपि १ पदान्यासन्खरायोधने यद्वा कौ-
शलमिन्द्रसूनुदमने तत्रा ऽप्यभिज्ञो जनः॥ अत्रयद्यपि-
सोल्लुण्ठदोषकीर्त्तनादिभिर्जुगुप्सानिष्पद्यते तथापि न
तया स्वनिष्पत्तिहेतुरसूया सङ्कीर्त्यते ! ईर्ष्यामाहुः समा-
नेषु मानदानाद्यमर्षणम् ॥१७१॥तद्भूपेण रसस्य प्रकर्षो-
यथा। हुणूणिल्लज्ज समोसरताबिअ अणुणेसु जाइदे एअ-
म् । पाअग्गङ्गु ट्ठालत्तएण तिलअं विणिम्मवि अम्२॥

१ अकुतोभयान्य पीत्यपिपाठः ॥
२ हुं निर्लज्ज समपसर तामेवाऽनुनयस्व यादेष इदम् ॥ पादा पाङ्गुष्ठा
लक्तकेन तिलकं विनिर्मितम् ॥

अत्र कस्याश्चित्प्रेयसि सपत्नीम्प्रसादयितुङ्कृते तन्मानमभ्यमाणायाः समुत्पन्नेर्ष्या प्रियानुनयादिभिर्भृशायमानतया निष्यन्नाऽलक्तकतिलकानुमेयैस्तत्पादपतनादिभिरुद्बोधा हुङ्कारक्षेपभर्त्सनप्रतिभेदाविनाभूतभूभेदाङ्गताडनाङ्गक्षेपस्वेदगद्गदादिभिः संसृज्यमाना प्रकृष्यते॥विषादश्चेतसो ग्लानिरुपायाभावनाशयोः ॥१७२॥ तद्रूपेणरसस्यप्रकर्षोयथा । व्यर्थं यत्र कपीन्द्रसख्यमपि मे वीर्यं हरीणां वृथा प्रज्ञा जाम्बवतोपि यत्र न गतिः पुत्रस्य वायोरपि . मार्गंयत्र न विश्वकर्मतनयः कर्त्तुंक्षलोपि क्षमः सौमित्रेरपि पत्रिणामविषयस्तत्र प्रिया क्वापि मे। अत्र सीतासमागमविषये रामस्यदुष्टावदानसुग्रीवसख्यादेरुपायस्याऽभावाद्विषादः प्रकृष्यते॥ सत्त्वत्यागादनुत्कर्षो वाक्यादेर्दैन्यमुच्यते ॥ १७३ ॥ तद्रूपेण रसस्यानुबन्धो यथा । अस्मान्साधु विचिन्त्य संयमधनानुच्चैःकुलञ्चात्मनस्त्वय्यस्याः कथमप्यबान्धवकृताम्भावप्रवृत्तिञ्च ताम् । सामान्यप्रतिपत्तिपूर्वकमियन्दारेषु दृश्या त्वयो भाग्याधीनमतः परन्न खलु तद्वाच्यं वधूबन्धुभिः१॥अत्रस्नेहप्रभवत्वमपादत्रयोक्तमर्थितादैन्यन्तुरीयपादोपक्षिप्तयाञ्चा दैन्यान्तन्तरेणाऽनुबध्यते ॥ विदुर्वाद्वगडपारुष्यमुग्रतामपकारिषु ॥ १७४ ॥ तद्रूपेण रसस्य प्रकर्षोयथा । प्रणयिसखीसलोलपरिहासरसाधिगतैर्ललित-

१ सा दारेषु अन्यप्रतिपत्तिपूर्वकं त्वयामाद्दृश्या किंतु ममैवेयमित्याग्रहपूर्वक मित्यर्थः अथवा सामान्यप्रतिपत्तिपूर्वकं त्वयातेषुदृश्या यतो। हि वयंसंयमधनाः इति सम्यक्विचार्येत्यर्थः ॥

शिरीषपुष्पहननैरपि ताम्यति यत् । वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः पततु शिरस्य काण्डमदण्ड इ-वैष भुजः। अत्र माधवस्यप्रकृष्टापकारिण्यघोरचण्टेविष-येप्रकृष्टमेववाक्यारुष्यन्दण्डपारुष्यञ्च जायते । त्रासश्चि-त्तचमत्कारआकस्मिकभयादिभिः ॥ १७५ ॥ तद्रूपेण-रसस्य जन्मयथा । परिस्फुरन्मीनविघट्टितोरवःसुराङ्ग-नास्त्रासविलोलदृष्टयः । उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम् । अत्र लोलदृष्टिता-करावधूननञ्च स्त्रीणां स्वभावभीरुत्वविलासित्वाभ्यामपि भवतीति त्रासाविर्भावेप्यसमर्थमिति नानुबन्धोभवतो-ति ॥ अनिष्टाभ्यागमोत्प्रेक्षां शङ्कामाचक्षते बुधाः ॥१७६॥ तद्रूपेण रसस्य प्रकर्षो यथा । सहसा मासाहिज्जउ पिआगमो तीअविरहकिसिआए । अच्चन्तपहरिसेण वि-जाअ मुआसामुं अव्वेअ अत्र १ ॥ विरहिण्याःकार्श्याति-शयमुद्वीक्ष्यमाणायाःकस्याश्चिद्वयस्यायाःस्नेहातिशयात्प्रे-म पश्यति भयान्यपदे पीति प्रियागमहर्षातिशयभावे ऽ-प्यसहिष्णुतया तन्मरणशङ्काप्रकृष्यते ॥ विरहादेर्मन-स्तापः शरीरातङ्कदो गदः ॥ १७७ ॥ तद्रूपेण रसस्य ज-न्मयथा । स्थितमुरसिविशालमप्यविनीपत्रमेतत्कथय-ति न तथा ऽन्तर्मन्मथोत्थामवस्थाम्। अतिशयपरिताप-ग्लापिताभ्यां यथास्यात् स्तनयुगपरिणाहम्मण्डलाभ्या-

१ सहसामा आवयत प्रियागमं तच्चे विरहकृशितायैः ॥ अत्यन्त प्रहर्षेणापि यान्मृता सान्मृतैव स्यात् ॥

म्ब्रवीति ॥ अत्रसागरिकायाः स्तननिहितसरोजिनीदल-म्लापनेन वपुःसन्तापो निष्पद्यते॥ बलस्यापचयो ग्ला-निराधिव्याधिप्रकर्षभूः ॥ १७८ ॥ तद्रूपेण रसस्यानुब-न्धीयथा । किसलयमिवमुक्तंम्बन्धनाद्विप्रलूनं हृदयकुसु-मशोषी दारुणो दीर्घशोकः । ग्लपयतिपरिपाण्डु क्षाम-मस्याः शरीरं शरदिज इव घर्मःकेतकीगर्भपत्रम् । छा-म्र प्रकृष्टशोकानुबन्धिनीग्लानिर्वैवर्ण्यक्षामताभ्यामनुब-ध्यते ॥ उत्कण्ठाहर्षशोवादेरुन्मादश्चित्तविप्लवः ॥ १७९ ॥ तद्रूपेणरसस्य निष्पत्तिर्यथा । क्षाऽकार्यङ्कलाधरस्यच कुलम्भूयोपि दृश्येत सा दोषाणामुपशान्तये श्रुतमहो कोपेपि कान्तम्मुखम् । किं वक्ष्यन्त्यपकरुमषाः कृतधि-यो रेखैव सा ऽन्यादृशी चेतः स्वास्थ्यमुपेहि कः खलु यु-वा धान्यो ऽधरन्धास्यति ॥ अत्र विरहिणो ययातेरुत्क-ण्ठादिभिरसत्प्रलापरूप उन्मादो निष्पद्यते ॥ आदरा-तिशयाच्चेतस्यावेगः सम्भ्रमो मतः ॥ १८० ॥ तद्रूपेणरस-स्यसङ्करोयथा । अलमलमतिमात्रं साहसेनाऽमुना ते त्व-रितमपिविमुञ्च त्वं लतापाशमेनम् । चलितमिव निरो-द्धुञ्जीवितञ्जीवितेशे क्षणमिह मम कण्ठे बाहुपाशन्निधे-हि । अत्र रतिजन्मा सम्भ्रमातिशयो रतिजन्मनैव मति-प्रकर्षेण सङ्कीर्यते ॥ मनःशरीरयोः खेदः क्रियातिशयतः-श्रमः ॥ १८१ ॥ तद्रूपेण रससङ्करो यथा । स्खलयति व-चनंमे संभ्रमत्यङ्गमङ्गजनयति मुखचन्द्रोद्भासिनः स्वेद-बिन्दून् । मुकुलयति च नेत्रे सर्वथासुभु खेदस्त्वयि विल-

सति तुल्यं वल्लभालोकनेन । अत्र मालत्याः पुष्पात्रघ्रायजन्माश्रमो माधवावलोकनजा च रतिः स्वेदगद्गदाङ्गसादनयनमुकुलनैस्तुल्यधर्मिणीमिथःसङ्कीर्यते । चित्तस्यखेदोनिर्वेदस्तत्त्वज्ञानोदयादिभिः ॥ १८२ ॥ तद्रूपेण रसस्य शेषो यथा । जरामरणदौर्गत्यव्याधयस्तावदासताम् । मन्येजन्मैव धीराणाम्भूयोभूयस्त्वपाकरम् ॥ अत्र मोक्षायोत्साहमानस्य कस्यचिन्निर्वेदागमो गम्यते ॥ क्रियास्वपाटवज्ञाडशङ्खिन्तोत्कण्ठाभयादिभिः ॥ १८३ ॥ तद्रूपेण रसस्यनिष्पत्तिर्यथा । शिथिलशिथिलन्नस्य स्वैरंन्धनुःशिखरेशिरो नयनसलिलैः कुर्वन्मौर्वीलतामपरामिव । अहह विकलः स्रुत्वा स्रुत्वा घनस्तनितध्वनिङ्किमपि किमपि ध्यायन्नार्यो न याति न तिष्ठति ॥ अत्र विरहिणो रामस्य क्रियास्वपाटवन्निष्पद्यते ॥क्रियाविद्वेषआलस्यं सुखसंविन्मदादिभिः॥ १८४ ॥ तद्रूपेण रसस्य निष्पतिर्यथा । घरिणिघणत्थणपेल्लणसुहे णिपडिअस्स होन्तिपहिअस्स।अवसउणङ्कार अवारविट्ठिदिअसासुहवेन्ति१॥अत्र रतिसुखानुभवाज्जिगमिषोरपमगच्छत आलस्यन्निष्पद्यते ॥ निद्राव्यापारवैमुख्यमिन्द्रियाणां श्रमादिभि॥१८५॥ तद्रूपेण रसस्याऽनुबन्धो यथा२। निद्दालसघुम्मिरतसंघलन्तद्वातारआलोआ । कामस्सविदुव्विसहादिट्ठिणिवा-

१ गृहिणीघनस्तन प्रेरण सुखेति पनितस्य भविष्यत्पथिकस्य । अपशकुनाङ्कारक वार विष्टिदिवसाः सुखयन्ति ॥

२ निद्रालसघूर्मित संवलितार्द्रता रकालोकाः ॥ कामस्यापि दुर्विसहा दृष्टिनिपाताः शशिसुख्याः ॥

आ ससिमुहीए॥अत्र रतिश्रमजागरादिजनितनिद्रालसदृष्टिनिपातास्तारकाघूर्णनास्खलनादिभिरनुबध्यन्ते । निद्रादिजनितं सुप्तस्याह्येन्द्रियनिमीलनम् ॥ १८६ ॥ तद्रूपेण रसप्रकर्षो यथा।ओसुअइ दिण्णपडिवक्खवेअणप्पसिढिलेहिं अङ्गेहिम्। णिव्वत्तिअसुरअरसाणुबन्धसुहणिम्मरंसोणूहा ॥१॥ अत्रनिर्भरपदेनैव प्रकर्षः प्रतिपाद्यते । निद्रापगमहेतुभ्यः प्रबोधश्चेतनागमः ॥ १८६ ॥ तद्रूपेण रसस्याऽनुबन्धो यथा । प्रत्यग्रोन्मेषजिह्माक्षणमनभिमुखीरत्नदीपप्रभाणमात्मव्यापारगुर्वी जनितजललवाजृम्भणैः साङ्गभङ्गैः । नागाङ्गम्मोक्तुमिच्छोः शयनमुरुफणाचक्रवालोपधानन्निद्राच्छेदातिताम्रा चिरमवतु हरेर्दृष्टिराकेकरा वः । अत्रदृष्टेःप्रत्यग्रोन्मेषजिह्मतादिभिः प्रबोधो नाद्यापिनिष्पद्यतइति प्रतीयते ॥ उक्ताभावादिभेदेन तेमी रत्यादयो रसाः।अथैतेष्वेव केषाञ्चिद्विशेषानभिदधमहे ॥१८७॥ तत्र । शृङ्गारवीरकरुणा रौद्राद्भुतभयानकाः । बीभत्सहास्यप्रेयांसःशान्तोदात्तोद्धता रसाः ॥१८८॥ रतिर्निसर्गसंसर्गौपम्याध्यात्माभियोगजा ॥ सम्प्रयोगाभिमानोत्था विषयोत्थाच कथ्यते ॥ १६६ ॥ प्रीतिरप्येवमेव स्यान्नत्वस्यां साम्प्रयोगिकी ॥ अभ्यासिकीतु तत्स्थाने तदुदाहृतयोयथा ॥ १६७ ॥ उदाहरणम् ॥ मृतेतिप्रेत्यसङ्गन्तुं ययामेमरणम्मतम् । सैवावन्तीमयाल-

१ आखपिति दत्तप्रतिपक्षवेदनंप्रशिथिलैरङ्गैः । निर्वर्तित सुरत रसानुबन्धसुखनिर्भरं स्नुषा ॥

दधा कथमत्रैव जन्मनि ॥ अत्र स्थायिनो विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति रतिरेव शृङ्गारस्वरूपेण निष्पद्यते । अत्रालम्बनविभावभूतायाः सकाशादुत्पन्नो वत्सेश्वरस्य रतिस्थायिभावस्तस्याः पुनर्जीवनादिभिरुद्दीपनविभावैरुद्दीप्यमानो मृतेत्यादिना वागारम्भानुभावेनानुभीयमानैर्हर्षधृतिप्रभृतिभिः सुखात्मभिर्व्यभिचारिभिः संसृज्यमानः करुणानन्तरसम्भोगशृङ्गाराख्यां लभते ॥ अजित्वा सार्णवामुर्वीमनिष्ट्वा विविधैर्मखैः ॥ अदत्वा चार्थमर्थिभ्यो भवेयम्पार्थिवः कथम् ॥ अत्र वसुधाविजयादेरालम्बनविभावादुत्पन्नः स्याद्युत्साहभावस्थैर्यधैर्यादिभिरुद्दीप्यमानः समुत्पन्नेषु वागारम्भानुभीयमानेषु स्मृतिमतिवितर्कादिषु निष्पन्नो वीररससंज्ञया व्यवह्रीयते ॥ २ ॥ यस्याः कुसुमशय्यापि कोमलाङ्ग्या रुजाकरी। सा ऽधिशेते कथन्देवी हुताशनवतीञ्चिताम् ॥ अत्र चालम्बनविभावभूतदेवीमरणादुत्पन्नः शोकस्थायिभावश्चितानिवेशनहुताशनाङ्गज्वालादिभिरुद्दीपनविभावैरुद्दीप्यमानो वागारम्भानुभेयैर्निर्वेदग्लानिवैवर्ण्यादिभिर्व्यभिचारिभिः संसृज्यमानः करुण इति ज्ञायते ॥ ३ ॥ निगृह्य केशेष्वाकृष्टा कृष्णा येन ममाग्रतः । सो ऽयन्दुःशासनः पापो लब्धः किञ्जीवति क्षणम् ॥ अत्र दुःशासनालम्बनविभावाय-क्रुध्यतो भीमसेनस्य पूर्वमुत्पन्नः क्रोधस्थायिभावस्तदवाप्तेःस्मर्यमाणसमक्षकृतद्रौपदीनिग्रह

केशाकर्षणादिभिरुद्दीपनविभावैरुद्दीप्यमानः समुत्पन्नेषु वागारम्भेष्वनुमीयमानेष्वसूयावेगवेपथुस्रस्तादिषु दुःखात्मकेषु व्यभिचारिषु निष्पद्यमानो रौद्र इति निष्पद्यते ॥४॥ अंशुकानि प्रवालानि पुष्पं फलं हारादि भूषणम् । कल्पद्रुमभूनि हर्म्याणि शाखा नन्दनशाखिनाम् ॥ अत्र शाखिनामप्रवालपुष्पफलशाखासम्पन्ननिजं रूपम् । नन्दनशाखिनामपुनः प्रवालादिस्थाने ऽशुकहारमधुमन्दिराणि तदेतदाश्चर्यमतश्चैतेभ्य य आलम्बनविभावेभ्यः कस्य चिद्विस्मयभूयङ्गतस्यसमुत्पन्नो विस्मय स्थायिभावस्तदीयावयवदर्शनादिभिरुद्दीपन विभावैरुद्दीप्यमानः समुत्पन्नेषु वागारम्भानुमेयेषु हर्षरोमोद्गमस्वेदगद्गदादिषु व्यभिचारिषु निष्पद्यमानो ऽद्भुत इत्युच्यते ॥ ५ ॥ इदम्मघोनः कुलिशन्यासन्निहितानलम् । स्मरणं यस्य दैत्यस्त्रीगर्भपाताय कल्पते अत्र महेन्द्रकुलिशाङ्गारासन्निहितानलादालम्बनविभावात्स्मर्यमाणादपि दैत्यस्त्रीणामुत्पन्नो भयस्थायिभावस्तद्विदीर्णदानवमरणस्मरणादिभिरुद्दीपनविभावैरुद्दीप्यमानः स्वगर्भपातादिभिरनुभावैस्तदनुभावैस्तदनुमितैश्च स्वेदस्तम्भवेपथुप्रभृतिभिर्व्यभिचारिभिः संसृज्यमानो भयानकरसरूपेण निष्पन्नः केनचिदाख्यायमानोपि भयानक इत्याख्यायते ॥ ६ ॥ पायम्पायन्तवारीणां शोणितङ्गरसस्पुटैः । कौणपाः सह नृत्यन्ति कबन्धैरन्त्रभूषणाः ॥ अत्रालम्बनविभावभूतेभ्यः कौणपेभ्यः कस्य

द्विपुविजयार्शसिनः पुंस उत्पन्नो जुगुप्सास्थायिभावः शिरश्छेदविगलद्रुधिरधारापरिप्लुतप्रनर्त्तितकबन्धकौणपान्त्रभूषणशोणितपानादिभिरुद्दीपनविभावैरुद्दीप्यमानः समुत्पन्नेषु वागारम्भानुमेयेषु भयावेशशङ्कावहित्यादिषु व्यभिचारिदिषु निष्पन्नोबीभत्स इति निगद्यते ॥ ७ ॥ इदमम्लायमानाया लग्नं स्ननतटे तव। छाद्मतामुत्तरीयेण नवन्नखपदं सखि ॥ अत्र काञ्चित्सखीम्पूर्वम्भर्त्तरिप्रगृहीतमानां तेनैव नवनखपदाङ्कितस्तनीमालम्बनविभावभूतामुपलभमानायाः कस्या श्चित्सख्या उत्पन्नो हासस्थायिभावस्तदीयमानपरिग्रहस्मरणादिभिरुद्दीपनविभावैरुद्दीप्यमानः समुत्पन्नेषु वागारम्भानुमितेषु शङ्कावहित्यगद्गदादिव्यभिचारिषु निष्पाद्यमानो हास्यशब्देनाभिधीयते ॥ ८ ॥ यदेव रोचते मह्यन्तदेव कुरुतेप्रिया । इति वेत्ति न जानाति यत्प्रियन्तत्करोति सा । अत्र वत्सलप्रकृतेर्धीरतया ललितनायकस्य प्रियानुभावादुत्पन्नः स्नेहस्थायिभावोविषयसौकुमार्यात्मप्रकृत्यादिभिरुद्दीपनविभावैरुद्दीप्यमानः समुपजायमानैर्मोहमतिधृतिस्मृत्यादिभिर्व्यभिचारिभावैरनुभावैश्च प्रशंसादिभिः संसृज्यमानो निष्पन्नः प्रेयानिति प्रतीयते ॥ रतिप्रीत्योरपि चायमेव मूलप्रकृतिरिष्यते ॥ यदित्यमाहुः, । अहेतुःपक्षपातोयस्तस्यनास्तिप्रतिक्रिया । सहि स्नेहात्मकस्तन्तुरन्तर्मर्माणि सीव्यति ॥ ९ ॥ सर्वाः सम्पत्तयस्तस्य सन्तुष्टं यस्य मानस-

मू। उपानद्गूढपादस्य ननु चर्मावृतैव भूः॥ अत्र कस्यचिदुपशान्तं प्रकृतेर्द्वीरप्रशान्तनायकस्य यथोपनतमनोनुकूलदारादिसम्पत्तेरालम्बनविभावभूतायाः समुत्पन्नोधृतिस्थायि भावो वस्तुतत्त्वालोचनादिभिरुद्दीपनविभावैरुद्दीप्यमानः समुपजायमानस्मृतिमात्यादिभिर्व्यभिचारिभावैर्वागारम्भादिभिरनुषज्यमानो निष्पन्नः शान्त इति गीयते॥ अन्ये पुनरस्य शममप्रकृतिमामनन्ति। सतु धृतेरेव विशेषो भवति॥ १०॥ साधारण्यान्निरातङ्कः कन्यामन्योपियाऽचते। किम्पुनर्जगताञ्जेता प्रपौत्रः परमेष्ठिनः॥ अत्र रामस्योदात्तप्रकृतेर्निसर्गत एव तत्वाभिनिवेशिनीमतिर्नाकृत्यविषये प्रवर्तते। न च प्रवृत्तोपरमति। साच सीतेयम्मम स्वीकारयोग्येत्येवंरूपेण प्रवृत्ता रावणप्रार्थनाक्षणप्रोत्साहनाभ्यामुद्दीप्यमाना समुपजायमानचिन्तावितर्कव्रीडाऽवहित्थस्मृत्यादिभिः कालोचितोत्तरानुमीयमानैश्च विवेकचातुर्यौदार्यधैर्यादिभिः संसृज्यमानोदात्तरसरूपेण निष्पद्यते॥११॥ अपकर्ता हमस्मीति मा ते मनसि भूद्भयम्। विमुखेषु नं मे खड्गः प्रहर्त्तुञ्जातु वाञ्छति॥ अत्र मया ऽस्यापकारः कृत इति यत्ते चेतसि भयन्तन्मा भूत्। न मम खड्गः पराङ्मुखेषु कदाचिदपिप्रहर्त्तुमुत्सहत इति सर्वदैव रूढाहङ्कारः प्रतीयते सो ऽयङ्गर्वप्रकृतिरुद्धतो नाम रसः। केचित्पुनः। "आस्थामालम्ब्यनीतेषु वशं क्षुद्रेश्वरातिषु। व्यक्तिमायाति महतामाहात्म्यमनुकम्पयो। इत्ये-

वमूर्जस्वीत्युदात्तपक्षे निक्षिपन्तः पूर्वोक्तमेव गर्वप्रकर्षोदाहरणम्। धृतायुधो यावदहमित्याद्युद्भूतनिष्पत्तौ वर्णयन्ति ॥ १२ ॥ रतिविशेषेषु नैसर्गिकी यथा। इयमम्हेन्द्रप्रभृतीनधिश्रियश्चक्रुर्दिगीशानवमत्य मानिनीं। अरूपहार्यम्मदनस्य निग्रहात् पिनाकपाणिम्पतिमाप्तुमिच्छति। अत्र जन्मान्तर वासनया निसर्गत इयम्भवति ॥१३॥ सांसर्गिकीयथा। भित्वा सद्यः किसलयपुटानूर्ध्ववदारुद्रुमाणां ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः। आलिङ्गन्ते गुणवति मयाते तुषारावाद्रिवाताः पूर्वंस्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ अत्र शैत्यसौरभादिभिर्विरहिणामुद्दीपनीया अपि वायवः प्रियतमाङ्गसंसर्गसम्भावनया समालिङ्गन्त इति संसर्गादियं रतिर्भवति॥१४॥औपमानिकी यथा। अपि जनकसुतायास्तच्च वच्चानुरूपंस्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति। ननु पुनरिव तन्मेगोचरीभूतमक्ष्णोरभिनवशतपत्रग्रीवमास्यम्प्रियायाः॥ सेयं सीताविषयिणी रतिस्तदुपमानदर्शनेन रामं रमयते ॥ १५ ॥ अध्यात्मिकीयथा ॥ कामम्प्रत्यादिष्टं स्मरामि न परिग्रहम्मुनेस्तनयाम्। बलवत्तु दूयमानम्प्रत्याययतीव मे चेतः॥ अत्र सेयन्दुर्वाससः शापाद्विस्मृतविवाहादिवृत्तान्तस्य दुष्यन्तस्य शकुन्तलायां रतिरध्यात्मम्भवति ॥ १६ ॥ आनियोगिकीयथा। अलसचलितमुग्धहिग्धनिष्यन्दसन्दैरधिकविकसदन्तविस्मयस्मेरतारैः। हृदयमशरणाः

म्मे पक्ष्मलाक्ष्याः कटाक्षैरपहृतमपविद्धुम्पीतमुन्मूलितञ्च सेयमनुरागातिशयसूचकमालतीकटाक्षाभियोगे माधवस्य रतिरुत्पद्यते ॥ १७ ॥ साम्प्रयोगिकी यथा । उन्नमय्य सकचग्रहमास्यञ्चुम्बति प्रियतमे हठवृत्या । हुंहुम्मुच मम मेति च मन्दञ्जल्पितञ्जयति मानधनायाः॥ अत्र तर्जनार्थमोक्षार्थवारणार्थानान्मन्दम्मन्दम्प्रयोगान्मानवत्याः सम्प्रयोगे रत्युत्पत्तिः प्रतीयते ॥ १८ ॥ प्राभिमानिकी यथा । इयङ्गे हे लक्ष्मीरियममृतवर्त्तिर्नयनयोरसावस्याः स्पर्शोवपुषि बहलश्चन्दनरसः । अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥ अत्र रुचिविशेषो ऽभिमानस्तत एवम्प्राया रतयो भवन्ति ॥ वैषयिकी शब्देषु यथा । विलासमसृणो ह्रसन्मुसललोलदीःकन्दलीपरस्परपरिस्खलद्वलयनिस्वनोद्दन्तुराः । हरन्ति कलहङ्क्वतिप्रसभकम्पितोरस्थलत्रुटद्धमकसंकुलाः कलमकण्ठनीगीतयः ॥ २० ॥ स्पर्शे यथा । बध्नन्ननङ्गेषु रोमाञ्चं कुर्वन्मनसि निर्वृतिम् । नेत्रेनिमीलयन्नेष प्रियास्पर्शः प्रवर्त्तते ॥ २१ ॥ रूपे यथा । ता राघवस्यदृष्टिभिरापिबन्त्यो नार्यो न जग्मुर्विषयान्तराणि।तथा हि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा २२ ॥ रसे यथा कस्य नो कुरुते तन्वि पिपासाकुलितम्मनः । अयन्ते विद्रुमच्छ्यो[1] मरुमार्ग इवाऽधरः ॥ २३ ॥ गन्धे यथा ।

१ विगताद्रुमाणांइचाणांछायायस्यसःपक्षेविद्रुमच्छायःप्रवालकान्तिः ॥

रन्धणकम्मणिउणिए माऊरसुरत्तपाडलसुअन्धम्। मुहमारुअम्पिअन्तो धूमाइसिहीणपज्जलइ१ ॥ प्रीतिविशेषेषु नैसर्गिकी यथा। आलक्ष्य दन्तमुकुलाननिमित्तसारानव्यक्तवर्णरमणीयवचः प्रवृतीन्। अङ्कागतान्प्रणयिनस्तनयान्वहन्तो धन्यास्तदङ्गरजसा मलिनीभवन्ति। अत्र "यदायदाजायते तदातदापुत्रेषु स्निह्यति पुत्ररूपेण वा जायत इति, जन्मान्तरवासनारूपो निसर्गः सङ्गच्छते॥ सांसर्गिकी यथा। विश्वम्भरा भगवती भवतीमसूत राजा प्रजापतिसमो जनकः पिता ते। तेषां वधूस्त्वमसि नन्दिनि पार्थिवानां येषां कुलेषु सविताच गुरुर्वयञ्च॥ अत्र विश्वम्भरादिसंसर्गात्सीतायांवसिष्ठमिश्राःस्निह्यन्ति॥ २३ ॥ औपमानिकी यथा। कुवलयदलस्निग्धश्यामः शिखण्डकमण्डनो बटुपरिषदंपुण्यश्रीकः श्रियैव सभाजयन्। पुनरपि शिशुर्भूत्वा वत्सः स मे रघुनन्दनो झटिति कुरुतेदृष्टः को यन्दृशोरमृताञ्जनम्। अत्र रामोपम्यात्लवे जनकः प्रीयते॥२७॥ आध्यात्मिकी यथा। परितस्तम्पृथासूनुः स्नेहेन परितस्तरे। अविज्ञाते ऽपि बन्धौहि बलात्प्रह्लादते मनः॥ अत्राविज्ञानोपि वासवः स्वसूनुमर्जुनन्दृष्टः प्रीणयति॥२८॥ आभियोगिकीयथा। दुःखैकबन्धुरयमृक्षहरीश्वरोमे पौलस्त्य एष समरेषु पुरः प्रहर्त्ता। इत्यादृतेन कथितौ र-

१ रन्धनकर्मनिपुणाया मालूरसुरक्तपाटलसुगन्धम्॥ सुखमारुतं पिबन्धूमायसि क्षिनप्रज्वलसि॥

घुनन्दनेन व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववन्दे ॥ अत्र सीतान्वेषणादेरभियोगाद्रामस्य सुग्रीवविभीषणयोः प्रीतिरुत्पद्यते ॥ २९ ॥ साम्प्रयोगिकी स्थाने आभ्यासिकी यथा । इति विस्मृतान्यकरणीयमात्मनः सचिवावलम्बितधुरन्नराधिपम् । परिवृद्धरागमनुबद्धसेवया मृगया जहार चतुरेव कामिनी । अत्र "शब्दादिभ्योबहिर्भूता या कर्माभ्यासलक्षणा । प्रीतिः साभ्यासिकी ज्ञेया मृगयादिषु कर्मसु" इति लक्षणङ्घटते ॥ ३० ॥ आभिमानिकी यथा । दत्तेन्द्राभयदक्षिणैर्भगवतो वैवस्वतादामनोर्दुष्प्रानान्दहनाय दीपितनिजक्षात्रप्रतापाग्निभिः । आदित्यैर्यदि विग्रहो नृपतिभिर्धन्यम्ममैतत्ततो दीप्तास्स्फुरदुग्रदीधितिभरैर्नीराजितज्यन्धनुः ॥ अत्राभिमतप्रतिद्वन्द्विलाभाल्लवानुपदीकुशस्तुष्यति ॥ ३१ ॥ वैषयिकीषु शब्दे यथा । लावण्यैः क्षणदाविराममधुराः किञ्चिद्विनिद्रालसं स्रोत्रैः सव्रणमुग्धचारणवधूदन्तच्छदावासिनः । पीयन्ते मृदुवक्त्रपीतमरुतः पौराणगीतिक्रमव्यलोलाङ्गुलिरुद्धमुक्तसुषिरश्रेणीधरा वेणवः ॥ ३२ ॥ स्पर्शे यथा । प्रशान्तघर्माभिभवः शनैर्विवान् विलासिनीभ्यः परिमृष्टपङ्कजः ॥ ददौ भुजालम्बमिवात्तशीकरस्तरङ्गमालान्तरगोचरोऽनिलः ॥३३॥ रूपे यथा । अयमभिनवमेघश्यामलोन्तुङ्गसानुर्मदमुदितमयूरीबद्धविस्रब्धनृत्यः । शकुनिशबलनीलानोकहस्निग्धवर्ष्मा विततरति बृहदश्मा पर्वतः प्रीतिमक्ष्णोः ॥ ३४ ॥ रसे यथा॥

इक्षुदण्डस्य मण्डस्य दधनः पिष्टघृतस्य च। वाराहस्य च मांसस्य सोऽयङ्गच्छति फाल्गुनः ॥ ३५ ॥ गन्धे यथा। कपोलकण्डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम्। यत्र स्रुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति ॥ ३६ ॥ उपलक्षणञ्चैतत्। तेनोत्साहस्य युद्धदानदयावीरादयः, क्रोधस्यभीमन्युत्रासादयो, हासस्य स्मितहसितविहसितादयः, प्रसुप्तप्रलयमत्यादीनां स्वप्नमरणशमादयो भेदा जायन्ते ॥ तत्र यद्यपि "अजित्वा सार्णवामुर्वीमि"त्यनेनयुद्धवीरो, "ऽनिष्ठा विविधैर्मखैरि"त्यनेनदानवीरो "ऽदत्वा चार्थमर्थिभ्य इत्यनेन दयावीरश्चोत्साहरूपेण रसनिष्पत्तौ वर्त्तते तथाप्येकशोप्येतद्रसनिष्पत्तिरस्तीति प्रदर्श्यन्ते ॥ तेषु युद्धवीरो यथा। एतां पश्य पुरस्तटीमिह किल क्रीडाकिरातो हरः कोदण्डेन किरीटिना सरभसञ्चूडान्तरे ताडितः। इत्याकर्ण्य कथादुभुतं हिमनिधावद्रौ सुभद्रापतेर्मन्दम्मन्दमकारि येन निजयोर्दोर्दण्डयोर्मण्डनम् ॥ ३७। दानवीरो यथा। दधिक्षीरघृताम्भोधिञ्जनस्पृहणीयया। महादानोत्सवेयस्य हन्त कारायितम्भुवा ॥ ३८ ॥ दयावीरो यथा। स त्वम्मदीयेन शरीरवृत्तिन्देहेन निर्वर्त्तयितुं यतस्व। दिनावसानोत्सुकबालवत्सा विमुच्यतां धेनुरियम्महर्षेः ॥ ३९ ॥ क्रोधस्य यद्यपिभीकादयो विंशेषाश्चतुर्विंशतिः सम्भवन्ति तथापि ललितालालितोभयभेदेन रूपेण क्रमेण सर्वसङ्ग्रहात्तत्र त्रयः प्रकाराः प्रदर्श्यन्ते। तेषु स्त्रीणां ल-

लितः कोपाभावो यथा। भ्रूभेदिभिः प्रकम्पोष्ठैर्ललिताङ्गुलितर्जनैः। यत्र कोपैः कृताः स्त्रीणां सम्प्रसादार्थिनः प्रियाः ॥ ४० ॥ प्रियापराधजन्मा दुःखोत्पीडो मन्युर्यथा। धणुओवप्पणवल्लरिविरइअकण्णावअंसदुप्पेच्छे। वाहगरुईणिसम्मइ वाहीएबहुमुहेदिट्ठी१॥ नन्वियमीर्ष्याकस्मान्न भवति?। नात्र मानदानामर्षणमात्रविवक्षा। अपि तु तज्जनितो दुःखातिशय इति ॥ ४१ ॥ प्रियादिषु व्याजनिन्दोत्प्रासो यथा। पहवन्ति व्विअपुरिसामहिलाणङ्किक्खुसुहअविहिओसि। अणुराअलोल्लिआएकोदोसोअपहिजाईए२॥४२॥हासस्य यद्यप्युपहासादयोभेदाः सम्भवन्ति तथापि विहसितेन तेषां संग्रहादितिन्यूनाधिकमिति त्रयस्तद्भेदा उदाहियन्ते । तत्रेषद्धसितं स्मितं यथा। पुष्पंप्रवालोपहितं यदि स्यान्मुक्ताफलंवा स्फुटविद्रुमस्थम्। ततो ऽनुकुर्याद्विशदस्य तस्यास्ताम्रोष्ठपर्यस्तरुचः स्मितस्य ॥ ४३ ॥ दृष्टदशनकान्ति हसितं यथा । तिमिरनिरुद्धभीमरजनीमुखचन्द्रिकया गणपतितारुण्डत्राभिनयदशनदीपिकया । अभिभवसि त्वमद्य शशिनः स्त्रियमुत्कटया दशनमयूखमञ्जरितया हसितप्रभया ॥ ४४ ॥ तदेव सविशेषं विहसितं यथा । च्युतामिन्दोर्लेखां रतिकलहभग्नञ्च वलयन्द्वयञ्चक्रीकृत्य प्रहसितमुखी शैलतनया । अवोचद्यम्पश्येत्यवतु स शि-

१ धनुषोर्पणवल्लरिविरचितकर्णावतंसदुःप्रेक्षे। बाष्पगुर्वी निशम्यते वाहीकवधूमुखे दृष्टिः ॥ २ ॥ प्रभवन्त्येव पुरुषा महिलानां किं खलुसुभगविदितोसि। अनुराग लुलितायाः कोदोषोभिजातः ॥

वः सा च गिरिजा स च क्रीदाचन्द्रोदशनकिरणापूरितत-
नुः ॥ ४५ ॥ सुप्तविशेषः स्वप्नोयथा । जाने कोपपराङ्-
मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया मा मा संस्पृश पाणि-
नेति रुदती गन्तुं प्रवृत्ता पुरः । नोयावत्परिरभ्य चा-
टुकशतैराश्वासयामि क्षणं भ्रात! स्तावदहं शठेन विधि-
ना निद्रादरिद्रीकृतः ॥ ४६ ॥ मूर्छाविशेषो मरणं यथा॥
क्षणमात्रसखीं सुजातयोस्तनयोस्तामवलोक्य विह्वला ।
निमिमील नरेन्द्रसुन्दरी हृतचन्द्रा तमसेव शर्वरी ॥४७॥
मतिविशेषः शमो यथा । यदासीदज्ञानं स्मरतिमिरसं-
स्कारजनितन्तदा दृष्टञ्चारीमयमिदमशेषञ्जगदपि । इ-
दानीमस्माकम्पटुतरविवेकाञ्जनजुषां समीभूता दृष्टि-
स्त्रिभुवनमपि ब्रह्म मनुते ॥ ४८ ॥ एवमन्येपि विज्ञेया
रसा भावादिसंश्रयाः ॥ विशेषः प्राप्तकालोऽथपरिशे-
षो[1] निगद्यते ॥ ४७ ॥ तत्राश्रयस्त्रिधा । पुमान्स्त्रीतिर्य-
गादयः । तेषु पुमान्यथा । आश्चर्यमुत्पलदृशो वदनाम-
लेन्दुसान्निध्यतो मम मुहुर्जडिमानमेत्य । जात्येनचन्द्रम-
णिनेव महीधरस्य संधार्यत द्रवमयोमनसा विकारः ॥१॥
स्त्री यथा । तेनाथ नाथ दुरुदाहरणातपेन सौम्या ऽपि
नाम परुषत्वमभिप्रपन्ना । जज्वाल तीक्ष्णविशदाःसह-
सोद्गिरन्ती वागर्चिषस्तपनकान्तशिलेव सीता ॥ २ ॥
तिर्यगादिषु यथा । उत्कूजति श्वसितिमुह्यति याति
तीरन्तीरात्तरुन्तरुतलात्पुनरेव वापीम् । वाप्यान्नरज्य-

१ परिशेषश्त्यपिपाठः पुस्तकान्तरे ।

ति नचात्ति मृणालखण्डञ्चक्रः क्षपासु विरहे खलु चक्रवाक्याः ॥ ३ ॥ त्रिषयस्त्रिधा। चेतनस्तिर्यगचेतनश्च। तेषु चेतनो यथा। इयंसा लोलाक्षी त्रिभुवनललामैकवसतिः सञ्चायन्दुष्टात्मा स्वसुरपकृतं येन मम तत्। इतस्तीव्रः कामोगुरुरयमितः क्रोधदहनः कृतोवेषश्चायङ्कथमिदमिति भ्राम्यति मनः ॥ १ ॥ तिर्यग्यथा। आयाते दयिते मरुस्थलभुवां सञ्जिन्त्य दुर्लङ्घतामङ्गैर्हिन्या परितोषबाष्पतरलामासाद्य दृष्टिम्मयि। दत्त्वा पीलुशमीकरीरकवलान्स्वेनाञ्चलेनादरादुन्मृष्टङ्करभस्य केसरसटाभारागलग्नं रजः ॥ २ ॥ अचेतनो यथा। क्षिप्तम्पुरो न जगृहे मुहुरिक्षुकाण्डन्नापेक्षतेरम निकटोपगताङ्करेणुम्। सस्मार वारणपतिः परिमीलिताक्षमिच्छाविहारवनवासमहोत्सवानाम् ॥ ३ ॥ ज्ञानं त्रिधा दृष्टं श्रुतमनुमानञ्च। तेषु दृष्टं यथा। सरसिजमनुविद्धं शैवलेनापि रम्यम्मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीन्तनोति। इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणाम्मण्डनन्नाकृतीनाम् ॥ १ ॥ श्रुतं यथा। किं रूपं स्फुटमेव सा शशिमुखी धत्ते तदत्यद्भुतम्मामुत्साहयितुम्परापकरणे चित्तङ्किमस्मत्स्वसुः। इत्यन्तर्विकसद्वितर्कविधुरञ्जेनस्तथा वर्त्तते स्वल्पोप्येष मम प्रयाति पुरतः पन्था यथादीर्घताम् ॥ २ ॥ अनुमानं यथा। शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहाऽस्य। अथवा भवितव्यानान्द्वाराणि भवन्ति सर्वत्र ॥ ३ ॥ संस्कार-

स्त्रिया। आदृतःपटुरभ्यस्तश्च। तत्राश्रयगुणेनादरादुत्पन्नआदृतोयथा। कन्यारत्नमयोनिजन्म भवतामास्ते वयञ्चार्थिनो रत्नं यत्क्वचिदस्ति तत्परिणमत्यस्मासु शक्रादपि। कन्यायाश्च परार्थतैव हि मता तस्याः प्रदानादहम्बन्धुर्वो भविता पुलस्त्यपुलहप्रष्ठाश्च सम्बन्धिनः ॥ १ ॥ विषयगुणे पटुप्रत्ययादुत्पन्नः पटुर्यथा। उत्पत्तिर्दैवयजनाद्ब्रह्मवादी नृपः पिता। सुप्रसन्नोज्ज्वला मूर्तिरस्याः स्नेहं करोति मे ॥३॥ ज्ञानपौनःपुन्येनाभ्यासप्रत्ययादुत्पन्नोऽभ्यस्तः स यथा। भूयोभूयः सविधनगरीरथ्यया पर्यटन्तन्दृष्ट्वादृष्ट्वा भवनवलभीतुङ्गवातायनस्था। साक्षात्कामनवमिव रतिर्मालती माधवं यद्गाढोत्कण्ठालुलितलुलितैरङ्गकैस्ताम्यतीति ॥ अत्र यद्यपि विषयगुणात्पटुराश्रयगुणाच्चादृतोपि प्रत्ययः पटुमादृतं संस्कारम्प्रसूयते। तथाप्यभ्यासात्पटीयानादृततमश्च जायमानो ऽभ्यस्त इत्युच्यते ॥ १ ॥ उद्दीपनविभावेषु माल्यवस्त्रविभूषणादयो माल्यादयः ॥ तेषुमाल्यंयथा। अशोकनिर्भर्त्सितपद्मरागमाकृष्टहेमद्युति कर्णिकारम्। मुक्ताकलापीकृतसिन्दुवारं वसन्तपुष्पाभरणं वहन्ती। । १ ॥ वस्त्रं यथा। आवर्जिता किञ्चिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम्। सुजातपुष्पस्तबकावनम्रसञ्चारिणी पल्लविनी लतेव ॥ २ ॥ विभूषणं यथा। कण्ठस्य तस्याःस्तनबन्धुरस्य मुक्ताकलापस्य च निस्तुलस्य। अन्योन्यशोभाजननाद्बभूव साधारणो भूषणभूष्यभावः ॥ ३ ॥ ऋतु-

वयोमदादयो ऋत्वादयः । तेषु ऋतुर्यथा । इदमसुलभवस्तुप्रार्थनादुर्निवारम्प्रथममपि मनो मे पञ्चबाणः क्षिणोति । किमुत मलयवातोन्मूलितापाण्डुपत्त्रैरुपवनसहकारैर्दर्शितेष्वङ्कुरेषु ॥ १ ॥ वयो यथा । माममुहत्खलु भवन्तमनन्यजन्मा मा ते मलीमसविकारघनामतिर्भूत् । इत्यादि नन्विह निरर्थकमेव यस्मात्कामश्च जृम्भितगुणो नवयौवनञ्च ॥ २ । मदो यथा । तत्क्षणंविपरिवर्त्ति तद्वियोर्नेष्यतोः शयनमिद्धरागयोः । सा बभूव वशवर्त्तिनी तयोः शूलिनः सुवदना मदस्य च ॥ ३ ॥ चन्दनस्नानधूपादयश्चन्दनादयः ॥ तेषु चन्दनं यथा । चन्दनं विषधराश्रयः शशी वारुणी च विषमोदरावुभौ । तापयन्ति विरहे किमुच्यते मारयन्ति नयदेतदद्भुतम्॥१॥ स्नानं यथा । आअम्बलोअणाणं उल्लुंसुअ पअडंरुजहणाणम् । अवरुण्हमज्जिरीणंकएणकामोवहइचावम्॥१॥ २ ॥ धूपो यथा । स्नानार्द्रमुक्तेष्वनुधूपवासं विन्यस्तसायन्तनमल्लिकेषु । कामो वसन्तात्ययमन्दवीर्यः केशेषु लेभे बलमङ्गनानाम् ॥ ३ ॥ चन्द्रोदयोघनध्वनिरुपकारस्मरणमित्यादावाश्चन्द्रोदयादयः । तेषु चन्द्रोदयो यथा । विलिम्पत्येतस्मिन्मलयरजसार्द्रेण महसा दिशां वक्त्रञ्चन्द्रे सुकृतमथ तस्या मृगदृशः । दृशोर्बाष्पः पाणौ वदनमसवः कण्ठकुहरे हृदि त्वं ह्रीः पृष्ठे वचसि च

१ कादम्बलोचनानामुदंशुकप्रकटजघनानाम् । अवरुग्णमञ्जरीणांकृते कामो वहति चापम् ।

गुणाएव भवतः॥१॥ घनध्वनिर्यथा। अज्जमए तेणविणा
अणुभूअ सुहाइंअणिसम्भरन्तीए। अहिणवमेहणंरवो-
णिसामिओवज्झपडहोव्व॥ २॥ उपकारस्मरणं यथा॥
तन्मेमन्नःक्षिपति यत्सरसप्रहारमालोक्यमामगणितस्ख-
लदुत्तरीया॥ त्रस्तैकहायनकुरङ्गविलोलदृष्टिरा श्लिष्टवत्यमृ-
तसंवलितैरिवाङ्गैः॥ ३॥ अनुभावेस्मरतिर्यथा। खणमे-
त्तंपि ण फिट्टइ अणुदिअहं दिण्णगरुअसन्तावा। पच्छण्ण-
पावसङ्कव्व सामली मज्झहिअआहि२॥१॥ वाञ्छतिर्य-
था। ए मेअअकअउण्णाअप्पत्तमणोरहा विवज्जिस्सम्।
जणवाओ वि ण जाओतेणसमंहलिअउत्तेण३॥१॥ द्विषि-
र्यथा॥ गोत्तक्खलणं साऊण पिअअमे अज्जमामि छणदि-
अहे।वज्झपहिसस्स मालव्व मण्डणंसे ण पडिहाइ४॥२॥
प्रयततेयथा। अनुगच्छन्मुनिननयां सहसा विनयेन वा-
रितप्रसरः। स्वस्थानादचलन्नपि गत्वेव पुनः प्रतिनिवृ-
त्तः॥ ३॥ अवैतिर्यथा। चन्दसरिसम्मुहंसेसरिसोअम-
अस्स मुहरसोतिस्सा। सकअग्गहरहसुज्जअचुम्बणङ्क-
स्स सरिससेइ॥४॥ मन्यतेयथा। परिवट्टन्दिवणिसंसह म-
ण्डलिअकुसुमाऊहंवअणङ्गम्॥ विरहम्मि मण्डइ हरी

१ अद्य मया तेनविनाऽनुभूतसुखानि अनिशं स्मरन्त्या। अभिनवमेघानां रवो निशामितो वध्यपटह इव॥ २ क्षणमात्रमपि न स्फुटति अनुदिवसं दत्तगुरुसंतापा। प्रच्छन्नपापशङ्केव श्यामली अस्मद् हृदया हि॥ ३ एवमेवाऽतृप्ता अप्राप्तमनोरथा विवर्त्यते। जनवादोऽपि न जातस्तेन समं हलिक पुत्रेण॥ ४ गोत्रस्खलनंश्रुत्वा प्रियतमे अद्य मामि! उत्सवदिवसे। वध्यमहिषस्यमालेव मण्डनमस्या न प्रतिभाति॥ ५ अनुयास्यन्नित्यपिपाठो दृश्यते॥ ६ एतच्छाया ४ परिच्छेदेदृष्टे २ गता॥

णहे अणत्थे पडिउत्थिअम्मिअङ्कम्१ ॥ ५ ॥ वक्तियथा । आलाओ मा दिज्जउ लोअविरुद्धत्तिणाम काऊण । समुहा पडिएकोवरिएविदिट्ठिपाणंडेइ२ ॥ ६ ॥ चेष्टतेयथा । अज्ज मए गन्तव्वङ्गणान्धआरम्मितस्स सुहअस्य । अज्जा णिमीलिअच्छी पअ पडिवाडिंवरेकुणइ३ ॥ ७ ॥ सञ्चारिषुस्वेदरोमाञ्चवेपथवो यथा । दिट्ठे जम्पुलइज्जसि रहवरसिपिअम्मिजंसमासण्णे । तुहसम्भासणसेओलिफंसणेकिंविणिज्जिहसि४॥८॥अश्रुयथा । णअणब्भतरघोलन्तबाहभरमन्थराएदिट्ठीए । पुणरुत्तपेच्छरीए वालअकिञ्चभणिओसि५ ॥ ९ ॥ हर्षोयथा । सवस्सम्मिविदठ्ठे तहविहुहिअअस्स णिव्वुदिच्चेअ । जन्तेणणअरडाहेहत्थाइत्थिकुंडेागहिओ६॥१०॥ अमर्षोयथा । कत्तोसम्पडइमहम्पिअसहिपिअसङ्गमोपओसेवि। जञ्जिअइ गहिअकूरणिअरखिरीचन्दचण्डालो।७॥११॥ लीलादिषुप्रियजचेष्टानुकृतिर्यथा । जञ्जङ्करेसि जञ्जञ्जम्पसिजञ्जसिअच्छेसि। तन्तमणुसिक्खरीएदीहेादिहओणसम्पडइ८॥१२॥नेत्रभ्रूव-

१ परिक्षत्तं दिवानिशं सति मण्डलितकुसमायुधमिवालङ्कम् । विरहे मन्यते हरिनखे अनर्थेपतितोत्थितं मृगाङ्कम् ॥ २ आलापो मा दीयतां लोकविरुद्ध इति नाम कृत्वा । संमुखापतिते कोपाईपि दृष्टिं न पातयति ॥ ३ अद्यमया गन्तव्यं घनान्धकारे ऽपि तस्य सुभगस्य । आर्या निमीलिताक्षी पदपरिपाटीं गृहे कुरुते ॥ ४ दृष्टे यत्पुलकयसि रहोगृहं प्रिये समासन्ने । तव संभाषणसेकार्द्रस्पर्शने किमपि निर्जिहीर्षे ॥ ५ नयनाभ्यन्तर घूर्णद्बाष्पभरमन्थरया दृष्टया । पुनरुक्तप्रेक्षणीयया बालक किं यत्नभणितो ऽसि ॥ ६ सर्वस्मिन्नपि दग्धे तयापि खलुनिर्वृतिरेव। यत्ते न नगरदाहे हस्ताहस्ति कुण्डो गृहीतः ॥ ७ कुतः संपततिमां प्रियसखि प्रियसंगमः प्रदोषेपि । यज्जयति गृहीतकरनिकरश्चीथन्द्रचण्डालः ॥ ८ यद्यत्करोषि यद्यज्जल्पसियद्यन्नियच्छसि । तत्तदनग्निचितायां

कृत्रकर्मणांविशेषेणलसनंविलासोयथा॥ सभ्रूविलासमथ सोयमितीरयित्वा सप्रत्यभिज्ञमिव मामवलोक्य तस्याः। अन्योन्यभावचतुरेण सखीजनेन मुक्तास्तदा स्मितसुधामधुराः कटाक्षाः॥ १३॥ विभूषणादीनामनादरविन्यासोविच्छित्तिर्यथा। अङ्गानि चन्दनरजःपरिधूसराणि ताम्बूलरागसुभगोऽधरपल्लवश्च॥ अच्छाञ्जने च नयने वसनन्तनीयः कान्तासु भूषणमिदं विभवश्च शेषः॥१४॥ विभूषणादीनामस्थानप्रयोगोविभ्रमोयथा। चकार काचित्सितचन्दनाङ्के काञ्चीकलापं स्तनभारपृष्ठे। प्रियम्प्रति प्रेषितचित्तवृत्तिर्निवम्बबिम्बेच बभार हारम्॥ १५॥ स्मितरुदितहसितादीनांहर्षादेकीकरणङ्किलकिञ्चितंयथा। पाणिपल्लवविधूननमन्तः सीत्कृतानि घनरोमविभेदाः। योषितां रहसि गद्गदवाचामस्त्रतामुपययुर्मदनस्य॥१६॥ इष्टजनकथायान्तद्भावभावनोल्लसितविकारोमोट्टायितं यथा। तव सा कथासु परिघट्टयति श्रवणं यदङ्गुलिमुखेन मुहुः। घनतांध्रुवन्नयति तेन भवद्गुणपूगपूरितमलघुतया॥ १७॥ केशस्तनाधरादिग्रहणाद्दुःखेपिसुखबुद्धिचेष्टा कुट्टमितं यथा। ह्रीभरादवनतपरिरम्भेरागवानवटुजेष्ववक्ष्य। अर्पितोष्ठदलमाननपद्मं योषितोमुकुलिताक्षमधासीत्॥ १८॥ अभीष्टप्राप्तावभिमानगर्वसम्भावनानादरकृतोविकारोबिब्बोकोयथा। नि-

दीर्घोद्दिवसोन संपतति॥

विभुज्यदशनच्छदव्रनोद्वाचि भर्त्तुरवधीरणापरा । शैलराजतनया समीपगामाललापविजयामहेतुकम् ॥ १९ ॥ सुकुमारतयाकरचरणाङ्गन्यासोललितं यथा । गुरुतरकलनूपुरानुरावं सुललितनर्त्तितवामपादपद्मा । इतरदनतिलोलमादधानापदमथमन्मथमन्थरङ्गगाम ॥ २० ॥ वक्तव्यसमयेऽपि वचसाऽनभिधाप्यक्रियानुष्ठानंविहृतं यथा । पत्युः शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वम् । सा रञ्जयित्वा चरणौ कृताशीर्मात्येन तां निर्वचनञ्जघान ॥ २१ ॥ बाल्यकौमारयौवनसाधारणोविहारविशेषःक्रीडितं यथा । मन्दाकिनीसैकतवेदिकाभिः सा कन्दुकैः कृत्रिमपुत्रकैश्च । रेमे मुहुर्मध्यगता सखीनां क्रीडारसन्निर्विशतीव बाल्ये ॥ २२ ॥ क्रीडितमेवप्रियतमविषयेकेलिर्यथा । व्यपोहितं लोचनलोमुखानिलैरपास्यन्तं किलपुष्पजं रजः । पयोधरेणोरसि काचिदुन्मनाः प्रियञ्जघानोन्नतपीवरस्तनी ॥ २३ ॥ हेलादिषु रागतःसहसाप्रवृत्तिहेतुश्चित्तोल्लासो हेला । साङ्खियांयथा । रेहइ पिअपरिरम्भणपसारिअं सुरअमन्दिरद्दारे । हेलाहल हलिअथोरथणहरम्भुअलआजुअलम् १ ॥ २४ ॥ सैव पुरुषे यथा । उत्तिष्ठन्त्या रतान्ते भरमुरजपतौ पाणिनैकेन कृत्वा धृत्वाचान्येन वासो विलुलितकबरीभारमंसे वहन्त्याः । भूयस्त-

१ राजते प्रियपरिरम्भणप्रसारितं सुरतमन्दिरद्वारम् । हेलाहलहलायमान स्थूलस्तनभरे भुजलतायुगलम् ।

त्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः शय्यामालिङ्ग्यनीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु॥२५॥ हेलैव सवचनविन्यासो हावः। सस्त्रियां यथा। जइ ण छिवसि पुप्पवइं पुरओताकीसवारिओठासि। छित्तौसिचुलुचुलन्तेहिंम्पहाविऊणमहहत्थेहिम्१॥२६॥ सएवपुरुषेयथा। लोओझूरइझूरउवयणिज्जंहोइहोउतं णाम। एहिणिसिज्जसुपासेसुप्फवइणएइमेणिद्दा२॥ २७॥ आदिग्रहणाद्भावादयोगृह्यन्ते। तेषुभावःस्त्रियांयथा। तावच्चिअरइसमएमहिलाणंविब्भमाविराअन्ति। जाव ण कुवलयदलसच्छहांइम्मउलेन्तिणअणाइम्३॥२८॥ व्याजःपुंसोयथा। अलिअपसुत्तविणिमीलिअछदेसुहअमज्झओआसम्। गण्डपरिउम्बणाफुलइअङ्गणउणोचिराइस्सम्४॥ २९॥ विस्रम्भभाषणंस्त्रियांयथा। जाओसो वि विलच्छोमएविहसिऊणगाढमुवऊढो। पढमोपसरिअस्सणिअसणस्सगण्ढिविमगन्तो५॥३०॥ चाटुस्त्रीपुंसयोर्यथा। एक्कम्पहरुच्चाअंहत्थेमुहमारुएणवीअन्तो। सोविहसन्तिएमएगहिओढुवीएणकण्ठम्मि६॥ ३१॥ प्रेमाभिसन्धानम्पुंसो-

१ यदि न स्पृशसि पुष्पवतीं पुरतस्तत्किमिति वारितस्तिष्ठसि। स्पृष्टोऽसि चञ्चलैतै र्धावित्वा ऽस्माकं हस्तैः॥ २ लोकोनिन्दति निन्दतु अवचनीयं भवति भवतु तन्नाम्। एहि निमज्जपार्श्वे पुष्पवति न एति मे निद्रा॥ ३ तावदेव रतिसमये महिलानां विभ्रमा विराजन्ते। यावन्न कुवलयदलसच्छायानि मुकुलन्ति नयनानि॥ ४ अलीकप्रसुप्तविनिमीलिताक्षदेहिसुभगमे अवकाशम्। गण्डपरिचुम्बनपुलकिताङ्ग नपुनरपि चिरयिष्ये॥ ५ जातः सोपि विलक्षो मयापि हसित्वा गाढमुपगूढः। प्रथममपसरितस्यनिवसनग्रन्थिं विमार्गयन्॥ ६ एकं प्रहारोच्चाटं हस्तं मुखमारुतेनवीजयन्। सोपिहसन्त्यामयागृहीतोद्वितीयेन कण्ठे॥

यथा । केलीगोत्तक्खलणेवरस्सपप्फुल्लइन्दिहिन्देइ । बहुवासअवासहरेबहुएवाहोल्लिआ दिठ्ठी१॥३२॥परिहासः स्त्रियांयथा॥ अइ दिअरकिंणपेच्छसि आआसङ्किम्मुहापलोएसि । जाआएबाहुमूलम्मिअहुअन्दाणपडिवाडिम२॥३३॥ कुतूहलम्पुंसोयथा । असमत्तमण्डणंविअ वच्चघरंसेसकोउहल्लस्स । वोलविअहलहलस्सपुत्तिवित्तेणलग्गिहसि३॥३४॥ चकितंस्त्रियांयथा । णवलइआपाहरन्तुठ्ठाए तङ्कअङ्किम्पिहलिअसोण्हाए । जंअज्जविजुवइजणो घरंघरेसिक्खउम्भमइ४॥ ३५ ॥ हेलाहावश्च भावश्च व्याजोक्तिश्चमभाषणम् ॥ चाटुप्रेमाभिसन्धानम्परिहासः कुतूहलम्॥ १७२ ॥ चकितञ्चेति निर्दिष्टाश्चेष्टाः काश्चिद्विलासिनाम् ॥ शेषाणां विप्रलम्भादौ रूपमाविर्भविष्यति ॥ १७३ ॥ तत्रनायकयोः प्रागसङ्गतयोः सङ्गतयोश्च सङ्गतवियुक्तयोर्वा मिथोदर्शनश्रवणाभ्यामवस्थिताभिमानजन्मा पररूपरागोवाभिलाषिणीयालिङ्गनादीनामनवाप्तौसत्यां समुपजायमानैस्तैस्तैरुत्कण्ठादिभिर्व्यभिचारिभावैर्मनोवाग्बुद्धिशरीरारम्भजन्मभिश्चानुभावैरनुषङ्गः प्राप्तप्राप्यप्रकर्षावस्थो विप्रलम्भशृङ्गाराख्यां लभते ॥

१ केलीगोत्रस्खलने वरस्य प्रफुल्लयति चिह्नति । बहुवासकवासगृहेवध्वावाप्यार्द्रितादृष्टिः ॥ २ अयि देवर किं न प्रेक्षसे अकाण्डे किं मुधा विलोकयसि । जायाया बाहुमूले अर्द्ध चन्द्राणां परि पाटीम् ॥ ३ असमाप्तमण्डनेव वज्रगृहस्य कौतूहलस्य । व्यतिक्रान्तहलहलस्य पुत्रि वित्ते न लगिष्यसि ॥ ४ नवलतिकाप्राकारे तुष्टया क्षतं किमपि हलिकस्नुषया । यदद्यापि युवतिजनो गृहेगृहे भिक्षितुंभ्रमति ॥

स चतुर्द्धा पूर्वानुरागो मानः प्रवासः करुणश्च । तेषु प्राग सङ्गतयोः पूर्वानुरागः पुरुषप्रकाशखंडे यथा। दूरमुक्तालतया विसंसितया विप्रलभ्यमानो मे। हंसइव दर्शिताशो मानसजन्मा त्वया नीतः ॥ अत्र पुण्डरीकस्य माहाश्वेतायाम्प्रागसङ्गतायां समुत्पन्नः सङ्कल्परमणीयोभिलाषस्तदनाप्रावुक्तप्रकारेण प्रकृष्यमाणस्त्वया मे मानसजन्मा दूरन्नीतइत्युत्तरकामावस्थया प्रकाश्यते ॥ १ ॥ सएव स्त्रीप्रकाशखंडे यथा । दुल्लहजणाणुराओ लज्जा गरुई परवसो अप्पा। पिअसहि विसमम्पेम्म मरणं सरणं णवरि एक्कम् १ ॥ अत्रापिप्राग्वदेव सागरिकाया वत्सराजेऽनुरागः प्रकृष्यमाणो मरणं शरणमित्युत्तरयैवकामावस्थया कथ्यते ॥ २ ॥ सङ्गतयोर्मानः स निर्हेतुर्यथा । अत्थक्करूसणङ्गणपसिज्जणंअलिअवअणणिब्बन्धे । उम्मच्छरसन्तावो पुत्तअ पअवीसिणेहस्स२ ॥अत्रप्रेमगतेःस्वभावकौटिल्याद्धेतुमन्तरेणोपजायमानोनिर्हेतुरुच्यते ॥३॥ सएवसहेतुर्यथा । पडिउत्थिआ ण जम्पइ गहिआ विप्फुरइ चुम्बिआ रुसइ । तुण्हिक्कम्भुआ णवबहुआ कआवराहेण दइएण ३ ॥ यद्यप्यालिङ्गनादेर्मतिनेत्यादिभिःप्रतिषेधोनविद्यते तथापितदर्थोस्त्येवेतिमानलक्षणंघटते ॥ ४ ॥ संगतवियुक्तयोःप्रवासःसनवानुरागोयथा ।

१ दुर्लभ जनानुरागो लज्जा गुर्वी परवशआत्मा । प्रियसखि विषमं प्रेम शरणं शरणं केवलमेकम् ॥ २ अत्र क्रोधः क्षणं प्रसादो ऽलीकवचननिर्बन्धे । उन्मत्सरसंतापः पुत्रक पदवीस्नेहस्य ॥ ३ प्रत्युत्थिता न जल्पति गृहीता विस्फुरति चुम्बिता रुष्यति । तूष्णींभूता नववधूः कृतापराधेन दयितेन ॥

प्रियमाधवे किमसि मय्यवत्सला ननु सोहमेव यमनन्द-यत्पुरा । अयमागृहीतकमनीयकङ्कणस्तवमूर्त्तिमानिव महोत्सवः करः ॥ अत्रविवाहानन्तरमेवमालत्याःकपालकुण्डलयापहारान्माधवमालत्योरयन्नवानुरागःप्रवासउच्यते ॥ ५ ॥ सएवप्रौढानुरागोयथा । त्वामालिख्यप्रणयकुपितां धातुरागैःशिलायामात्मानंते चरणपतितंयावदिच्छामि कर्त्तुम् । अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालिप्यते मे क्रूरस्तस्मिन्नपि न सहते सङ्गमन्नौकृतान्तः ॥ अत्र प्राचीनप्रणयकोपप्रसादनादिभिरनुरागस्य प्रौढिरवगम्यते ॥ ६ ॥ सङ्गतयोरेवान्यतरव्यपायेकरुणः । सम्भोव्यपायेपुरुषस्ययथा । ध्रुवमस्मि शठःशुचिस्मिते कलितः कैतववत्सलस्त्वया । परलोकमसन्निवृत्तये यदनामन्व्यगतासि मामितः ॥ अत्रेन्दुमतीव्यपायादजस्यदुःखातिशयःकरुणउच्यते ॥ ७ ॥ सएवपुरुषव्यपायेस्त्रियायथा । हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवम् । उपचारपदन्नचेदिदन्त्वमनङ्गः कथमक्षता रतिः ॥ अत्राऽनङ्गविषयेरतेः शोकप्रकर्षात्करुणइत्याख्यायते ॥ ८ ॥ हीनपात्रादिषु चैतदाभासा भवति ॥ तत्र । हीनपात्रेषुपुंसिप्रेमानुरागो यथा । कअलीगब्भसरिच्छे ऊरूदट्ठूणहलिअसोण्हाए । उल्लइण-हरङ्गणचदिलस्ससेउल्लिअकरस्स १ ॥ ९ ॥ अत्रैव

१ कदलीगर्भसदृक्षेऊरू दृष्ट्वा हलिकस्नुषायाः । उल्लसन्ति नखरञ्जनकाङ्क्षिणः स्वेदार्द्रितकरस्य ॥

स्त्रियांमानोयथा । पठमघरिणीअसमहन्तुहपिण्डा-
रेदरं कुणन्तम्मि । णवबहुआइसरोससव्वच्चिअवच्छ-
आमुक्का १ ॥ १० ॥ तिर्यक्षु पक्षिणि प्रवासोयथा । आ-
पृच्छामि व्यथयति मनो दुर्बलावासर श्रीरेह्यालिङ्ग क्षप-
य रजनीमेकिका चक्रवाकि!।नान्यासक्तो न खलु कुपितो
नानुरागच्युतो वादैवाधीनः सपदि भवतीमस्वतन्त्रस्त्य-
जामि॥११॥अत्रैव करिणीकरुणोयथा।नान्तर्वर्त्तयति ध्वन
त्सु जलदेष्वामन्द्रमुद्गर्जितन्नासन्नात्सरसः करोति कव-
लानावर्जितैः शैवलैः। दानज्यानि२विषण्णमूकमधुपव्यास-
ङ्गदीनाननोनूनम्प्राणसमावियोगविधुरः। स्तम्बेरमस्ता-
म्यति ॥ १२ ॥ अथसम्भोगः। तत्रनायकयोः प्रागसङ्गत-
योःसङ्गतिवियुक्तयोर्वामिथःसमागमे प्रागुत्पन्नस्तदानी-
न्तनोवारत्याख्यः स्थायिभावोभिलषणीयालिङ्गनादीना-
मवाप्तौ सत्यां समुपजायमानैर्हर्षधृतिस्मृतिमतिप्रभृति-
भिर्व्यभिचारिभावैः संसृज्यमान ऋतूद्यानोपगमनजल-
क्रीडापर्वतोपदेशप्रसाधनगृहमधुपानेन्दूदयादिभिरुद्दी-
प्यमानः सविभ्रमभ्रूकटाक्षविक्षेपालापसम्भ्रमस्मितादि-
भिरनुभावैरभिव्यज्यमान ईप्सितमासादयञ्जिहासितं
वा जिहानः प्राप्तप्राप्यप्रकर्षारम्भःसम्भोगशृङ्गाराख्यां
लभते। स चतुर्द्धा। प्रथमानुरागानन्तरो,मानानन्तरः,प्र-
वासानन्तरः,करुणानन्तरइति । तेषुप्रथमानुरागानन्त-

१ प्रथमगृहिण्यां समये तवपिण्डैरादरं कुर्वन्त्याम्। नवबध्वाईषद्रोषं संवर्त्य-
वत्सा मुक्ता ॥ २ क्षयः

रीयथा । पाणिग्गहणेच्चिअ पव्वइअणाअं सहीहिं सोहग्गम् । पशुपइणा वासुइकंकणम्मिओसारिएदूरम् १॥१॥ मानानन्तरीयथा ॥ उव्वहइदइअगहिआहरोट्ठक्खिज्जन्तरोसपडिराअम् । पाणीसरन्तमइरंचसअंवणिअंमुहंबाला २॥२॥ प्रवासानन्तरीयथा । मङ्गलबलअंजीअंअरक्खिअंजपउञ्झिऊअइआए । पत्तपिअदंसणूससिअचाहुलइआएतंमिलम् ॥ ३ ॥ करुणानन्तरीयथा । णमुअम्मिममुएविपिएदिट्ठोउणपिअम्मोजिअंतीए । इअलज्जाअपरिहारो लीएहिअएणसंआइ ॥४॥ तेऽमी चत्वारोपिसंभोगाश्चतुर्भिरेवविप्रलम्भैः प्रकर्षमाप्नुवन्ति । तेषुप्रथमानुरागेणयथा ॥ इन्दुर्यत्रनिरन्तरेतनमधुरं दूतीवचःश्रूयतेनालापा निपतन्तिबाष्पकलुषानोपैतिकापर्यवपुः । स्वाधीनामनुकूलिनींनिजवधूमालिङ्गय्ययत्सुप्यतेतत्किं प्रेमगृहाश्रमव्रतमिदंकष्टंसमाचर्यते ॥ ५॥ मानेनयथा । रहविग्गहम्मिकुठीकआओधाराओपेम्मखग्गस्स । आणम्मआइंवसिज्जन्तिमाणसाइंणइमिहुणाण ॥ ६ ॥ प्रवासेनयथा । शापान्तोमेभुजगशयनादुत्थितेशार्ङ्गपाणौआस्यानेतत्फलमयचतुरो लोचनेमीलयित्वा । पश्चादाब्धिरहगुणितंतंतमात्मानियोगंनिर्वेक्ष्यावः परिणतशरच्चन्द्रिकासुक्षपासु ॥ ७॥ करुणेनयथा । नमर्त्यलोकस्तिदिवात्प्रहीयतेमिथेतनार्यद्धिरलङ्घभोजनः । निवृत्तमें

१ पाणिग्रहणएव पार्वत्याज्ञातं सखीभिः सौभाग्यम् । पशुपतिना वासुकिकङ्कण अपसारितंदूरम् । २ उद्वहति दयितगृहीताधरोष्ठक्षीयमाणरोषप्रतिराग्रम् । प्राप्यवसरमदिदं चम्पकमिव निजसखं बाला ।

वत्रिदिवप्रयोजनंमृतः सचेज्जीवतएवजीवति ॥ ८ ॥ तिर्यगादिषुचैतदाभासाभवन्ति । तेषुसरीसृपमृगयोर्यथा । मधुद्विरेफः कुसुमैकपात्रेपपौप्रियांस्वामनुवर्त्तमानः । शृङ्गेणसंस्पर्शनिमीलिताक्षींमृगीमकण्डूयतकृष्णसारः ॥९॥ पशुपक्षिणोर्यथा । ददौसरः पङ्कजरेणुगन्धिगजायगण्डूषजलंकरेणुः । अर्द्धोपभुक्तेनबिसेनजायांसंभावयामासरथाङ्गनामा ।१० किन्नरेषुयथा । गीतान्तरेषुश्रमवारिलेशैरीषत्समुद्यत्रासितपत्त्रलेखम् । पुष्पासवाघूर्णितनेत्रशोभिप्रियामुखंकिंपुरुषश्चुचुम्बे ॥ ११॥ तरुषुयथा । पर्याप्तपुष्पस्तवकस्तनीभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः । लतावधूभ्यस्तरवोप्यवापुर्विनम्रशाखाभुजबन्धनानि ॥ १२ ॥ विप्रलम्भचेष्टासुप्रथमानुरागेस्त्रियायथा । पेछइअलद्धलछदीहण्णीससईसुण्णअं हसइ । जहजम्पइअप्फुडन्तह से हिअअठ्ठिअङ्किम्पि १ ॥ १३ ॥ पुंसोयथा । सो तुह कएण सुन्दरितह च्छीणेसुमहिअलओहलिअऊत्तो । जह से मछरिणीअविदोव्वज्जाआइपडिवण्णम् ॥ १४ ॥ मानेस्त्रियायथा । कणुज्जुआवराईसाअज्जतएकआवराहेण । जम्भाइआरुक्खपलोअइआइन्दिअहेणसिक्खविआ ॥ १५ ॥ पुंसोयथा । अविभाविअ रअणिमुहन्तस्सअसच्चरिअविमलचन्दुज्जोअम् । जाअम्पिआरोहेवड्ढन्ताणुसआमू

१ पश्यति अलब्धलक्ष्यं दीर्घं निश्चिसिति शून्यकं हसति । जथा जल्पति अस्फुटं तथास्या हृदयस्थितं किमपि ।

ठलक्खंहिअम्हम् ॥ १६ ॥ प्रवासेस्त्रियायथा । पिअस-म्भरणपओट्टन्तवाहधाराणिआअभीआए । दिज्जवङ्क गीवाइदीवओपहिअजाआए ॥ १७ ॥ पुंसोयथा । मज्झण्णपत्थिअस्सेवि गिह्मे यहिअस्स हरइ सन्ताबम् । हिअअठ्ठिअजामुहमिअङ्कजोह्णाजलप्पवाहे १ ॥१८॥ करुणेस्त्रियायथा । णवरिअपसारिअङ्गीरअभरिऊप्प हपइस्सवेणीबान्धा । पडिआउरसन्दाणिअमहिअल-बङ्कूलइअत्थणीजणअसुआ ॥१९॥ पुंसोयथा । अन्तोहुत्त ठज्जइजामासुसेघरेहलिअउतो । उक्खत्तणिहाणा-इवरमिअठ्ठाणाणिपेक्खन्तो २ ॥२०॥ एवमन्यत्रापि । करुणवर्जेस्त्रियायथा । सौधादुद्विजते त्यजत्युपवनन्द्वेष्टि प्रभामैन्दवीन्द्वारात्त्रस्यति चित्रकेलिसदनेवेषंविषं मन्यते । आस्तेकेवलमब्जिनीकिसलयप्रस्तारशय्या-तले सङ्कल्पोपनतत्वदाकृतिरसायत्तेनचित्तेन सा ॥२१॥ स्त्रियाएवप्रथमानुरागवर्जंयथा । तिष्ठ द्वारि भवाङ्गणे व्रज बहिः सद्मेति वर्त्मेक्षते शालामञ्च तमङ्गमञ्च व-लभीमञ्चेति वेश्माचचेन्ति । दूतीं सन्दिशसन्दिशेति बहुशः सन्दिश्य सास्ते तथा तल्पे करुपमयीवनिर्घृण! यथानान्तन्निशा गच्छति ॥२२॥ प्रथमानुरागवर्जम्पुं-सोयथा । रम्यन्द्वेष्टि यथापुराप्रकृतिभिर्नप्रत्यहंसेव्यतेश

१ मध्याह्न प्रस्थितस्यापि ग्रीष्मः पथिकस्यबहरतिसन्तापम् । हृदयस्थित जायामुखमृगाङ्क ज्योत्स्ना जलप्रवाहः ॥ २ अन्तर्मूर्तिं दह्यते जायाशून्ये गृहे हलिकपुत्रः । उत्खातनिधानानीवरमितस्थानानि पश्यन् ।

य्योपान्तविवर्त्तनैर्विगमयत्युन्निद्र एव क्षपाः । दाक्षिण्येन ददाति वाचमुचितामन्तः पुरेभ्योयदागोत्रेषुस्खलितस्तदा भवतिच व्रीडाविलक्षश्चिरम् ॥ २३ ॥ पुंसएवप्रवासकरुणेयथा । सीतावेश्मयतोनिरीक्ष्यहरते दृष्टिंझटित्याकुलामन्योन्यार्पितचञ्चुदत्त करणैः पारावतैर्भूयते । इन्दोर्दूरतएव नश्यति विशत्यन्तर्गृहन्दुःखितः प्रच्छाद्याननमञ्चलेन रजनीष्वस्तत्रपं रोदिति ॥ २४ ॥ सम्भोगचेष्टासुपूर्वानुरागानन्तरेचुम्बनंयथा ॥ आअरपणामिओट्ठंअघडि अणासंअसङ्घलिअणिडालंवणघअलुप्पमुहीएतीएपरिउम्बणम्भरिमो १ ॥२५॥ अत्रैवालिङ्गनंयथा । तावमवणेइनतहाचन्दनपङ्कोविकामिनिहुणाणम् । जहदूसहेगिह्मेअण्णोण्णालिङ्गणसुहेल्ली २ ॥ २६ ॥ मानानन्तरेचुम्बनंयथा । जहजहसेउम्बइमण्णुभरिआइणिहुवणेदइओ । अच्छीइंउवरिउवरितहतहभिण्णाइंविगलन्ति ३ ॥ २७ ॥ अत्रैवालिङ्गनंयथा । माणदुमयरुसपवणस्समामिसव्वङ्गणिव्वुदिकरस्स । उवऊहणस्सभद्दंरइणाडअपुव्वरङ्गस्स ४ ॥ २८ ॥ प्रवासानन्तरञ्चुम्बनंयथा । केनचिन्मधुरमुल्लवणराङ्गम्बाष्प

१ आदर प्रणामितोष्ठमघटितन्यासमसंवलितनिटलिम् । व्रणभयलुप्तमुख्यास्तस्याः परिचुम्बनं स्मरामः ॥ २ तापमपनयतिनतथा चन्दन पङ्कोपि कमिमिथुनानाम् । ३ यथा दुस्सहे ग्रीष्मे अन्योन्यालिङ्गनसुखम् । यथा यथाऽस्य चुम्बति मन्युभरितानि निधुवने दयितः । अक्षीणि उपरि उपरि तथा तथा भिन्नानि विगलन्ति ॥ ४ मानद्रुम परुषपवनस्य मामि सर्वाङ्ग निर्वृतकस्य । उपगूहनस्यभद्रं रति नाटकपूर्वरङ्गस्य ।

तप्तमधिकं विरहेषु । ओष्ठपल्लवमपास्य मुहूर्त्तं सुभ्रुवः सरसमक्षि चुचुम्बे ॥ २९ ॥ करुणानन्तरमालिङ्गनं यथा । चन्द्रापीडं सा च जग्राह कण्ठे कण्ठस्थानञ्जीवितञ्च प्रपेदे । तेनापूर्वांसासमुल्लासलक्ष्मीमिन्दुं स्पृष्ट्वासिन्धुवेलेव भेजे ॥३०॥ प्रथमरागानन्तरन्दशनक्षतं यथा । णासं व साकबोले अज्ज वि तुह दन्तमण्डलं बाला । उब्भिणपुलअपरिवेढपरिगअरक्खइवराई १ ॥ ३१ ॥ तदेवमानानन्तरे यथा । पवणुवेल्लिअसाहुलिथएवसुठठिअदन्तमण्डलेऊरू । चटुआरअम्माहुपुत्तिजणहासणं कुणसु ॥ ३२ ॥ प्रवासानन्तरे दन्तक्षतादयो यथा । दन्तक्खअङ्कबोलेकअग्गहुव्वेल्लिओअधम्मिल्लो । पडिघुम्मिराजदिठ्ठीपिआगमंसाहइबहूए २ ॥ ३३ ॥ प्रथमानुरागानन्तरे नखक्षतं यथा । अज्जाइणवणहक्खणिविक्खणेगरुअजोब्बणुतुङ्गम् । पडिमागअणिअणअणुप्पलञ्जिअंहोइथणवट्टम् ३ ॥३४॥ अत्रैव पुरुषायितं तथा । दरवेविरोरुजुअलासुमउलिअछोसुललिअचिहुरासु । पुरुसाइरीसुकामोपिआसुसज्जाउहोवसइ ४ । ३५ ॥ सर्वं सर्वत्र यथा । पोढमहिलाणजञ्जंसुठठुसिक्खिअतंरवएसुहावेदि ५

१ न्यासमिव सा कपाले अद्यापि तव दन्तमण्डनं बाला । उद्भिन्नपुलकपरिवेषपरिगतं रक्षति वराकी ॥ २ दन्तक्षतं कपोले कचग्रहोद्वलितो धम्मिल्लः । परिघूर्णितात्रदृष्टिः प्रियागमं साधयति वध्वाः ॥ ३ आर्याया नवनखक्षतं निधिरक्षणं गुरुयौवनोत्तुङ्गम् । प्रतिमागतनिजनयनोत्पलं चित्तं भवति स्तनपट्टम् ॥ ४ दरवेपमानोरुयुगलासु मुकुलिताक्षीषु ललितचिकुरासु । पुरुषायितासु कामः प्रियासु सज्जायुधो वसति । ५ पौढमहिलानां सुष्ठु शिक्षितं रतये सुखयति । यद्येनाशिक्षितं नववधूनां तत्तद्विरति ददाति ॥

जङ्घेणअसिक्खिअंणवबहूणन्तन्तन्थिरइन्देइ ॥ ३६ ॥ विप्रलम्भपरीप्सुभियोगतः प्रेमपरीक्षायथा । हंहोक-ण्णुल्लीणाभणामिरेसुह अहक्किम्पिमाझूर । णिज्जण पारद्धीसुकहम्पिपुण्णेहिंलद्धोसि ॥ ३७ ॥ प्रत्यभियोग तोयथा । गोलाविसमोआरछलेणअप्पाउरम्मिसेमुक्को । अणुअम्पाणिद्दोसन्तेणविसागाढमुवऊढा ॥ ३८ ॥ वि षहणेनयथा । अज्जविसेअजलोल्लम्पच्छाइणसीअहलि-असीहूणाए । फग्गुछणचिक्खिल्लंज्जन्तइदिणन्थणुछङ्गे[1] ३९॥ विमर्शनयथा । तत्तोच्चिअणेत्तिकहाकिअसन्तितहिंत हिंसमथ्थन्ति । किम्मण्णेमाउच्छाएक्कजुआणोइमोगामो ४०॥ बहुमानेनयथा । तेणइरणबलआएदिस्सोपहरोइमी अथणवट्ठे । गामतरुणीहिंअज्जविदिअहम्परिवालि आभमइ ॥४१॥ श्लाघयायथा । सातइसहत्थदिण्णम्फगु छणकद्दमन्थणुछङ्गे । परिकुविआइवसाहइसलाहरीगा-मतरुणीणम् ॥ ४२ ॥ इङ्गितेनयथा । जइसोणबल्लहच्चि-णामग्गरुणेणतस्ससहिकीस । होइमुहन्तेरविअरफंसवि सट्टंव्वतामरसम् ॥४३॥ दूतसम्प्रेषणेनयथा । सेउल्लि असव्वङ्गीणामग्गहणेणतस्ससुहअस्स । हूरंअप्पाहेन्तीत स्सेअघरगणम्पत्ता ॥ ४४॥ दूतप्रश्नेनयथा । कहणुगआ कहदिठ्ठीकिम्भणिआकिच्चुतेणंपडिवअणम् । एअच्चि अणसमप्पइपुणरुत्तज्जम्पमाणीए ॥ ४५ ॥ लेखविधाने

१ अद्यापि स्वेदजलार्द्रं प्रत्येतिनतस्या हलिकस्तुषाया । फल्गूत्सवकर्दमोयस्त यादत्तस्तनोत्सङ्गः ।

नयथा । वेविरिसिस्सकरङ्गुलिपरिग्गहक्खलिअलेहणी मग्गे । सोत्थिञ्चिअणसमप्पइपिअसहिलेहम्मिकिंलि हिमो ॥४६॥ लेखवाचनेनयथा । प्रीत्या स्वस्तिपदं वि लोकितवती स्थानं स्तुतन्तुष्टया पश्चाज्ञातमनुक्रमेणपु रतस्तत्तावकन्नामकम् । तन्व्या सम्मदनिर्भरेण मनसा तद्वाचयन्त्या मुहुर्नप्राप्तोघनबाष्पपूरितदृशालेखेपि क ण्ठग्रहः ॥ ४७॥ सम्भोगपरीष्टिषुप्रथमानुरागानन्तरेसा ध्वसेनपुंसोयथा । लीलाइओणिअसणेरक्खउतंराहिआ इथणबट्टे । हरिणोपढमसमागमसङ्कसवरेहिंवेविरोह त्थो ॥४८॥ अत्रैवदोहदेनमुग्धायथा । किङ्किन्देपडि हासइसहीहिंइअपुछिआएमुद्धाए । पढमुल्लुअहलिदो णीएणवरिदइअङ्गआदिठ्ठी ॥४९॥ अत्रैव प्रगल्भायाः प्रियवाक्यवर्णनंयथा । हुंहुदेभणसुपुणोणसुअन्तिकरेइका त्रिक्खेवम् । घरिणीहिअसुहाइम्पइणोकस्समणन्तस्स ॥ ५० ॥ मानानन्तरंस्त्रियाः कैतवस्वप्नेयथा । भरिमोसे सअणपरम्मुहीएविअलन्तममाणपसराए । कइअवसु त्तुव्वत्तणथणहरप्पेल्लणसुहेल्लिम् ॥ ५१ ॥ स्त्रियाएवस खीवाक्यस्याक्षेपेणयथा । भिउडीहिम्पलोइस्संणिम्भच्छि स्सम्परम्मुहीहोस्सम् । जम्भणहतङ्करिस्संसहिओजइतं णपेच्छिस्सम् ॥५२॥ तस्याएवतदनुष्ठानविघ्नेनयथा । ग्रन्थिमृदग्रथयितुं हृदयेशे वाससः स्पृशति मानध नायाः । भ्रुयुगेन सपदि प्रतिपेदे रोमभिश्च सममेवविभेदः ॥ ५३ ॥ प्रवासानन्तरंस्त्रियायथा । अत्थक्कागम

अहिअएबहुआदइअउम्मिजणपुरओ । झुरइविअंल
न्ताणंहरिसविसट्टाणवलआण ॥ ५४ ॥ अत्रैवस्त्रीपुं
सयोर्यथा । रमिऊणपइम्मिगए जाहेअवगूहिअम्पडि
णिऊतो । अहअम्पडत्थपइअव्वनक्खणंसोपवासिव ॥
५५ ॥ सामान्यतएवप्रवाससाध्वसेनस्त्रियायथा । हो
न्तपहिअस्सजाआआउछणजीवधारणरहस्सम् । पुछ
न्तींभमइघरङ्घरेणपिअविरहसिहिरीओ ॥ ५६ ॥ प्रवा
सविलम्बेनैवपुंसोयथा । एक्कोविकालसारोणदेइगन्तु
म्पआहिणवलन्तो । किंउणबाहाउलिअंलोअणजुअलं
मअछीए ॥ ५७ ॥ परिहारेस्वदादिभिः स्त्रियायथा ।
उल्लाअइसेअङ्गऊरूवेवन्तिकूवलोगलइ । छुछुएलेहिअ
अम्पिआगमेपुफुइआए ॥ ५८ ॥ करुणानन्तरंपुंसो
यथा । करस्पर्शारम्भोत्पुलकितपृथूरोजकलशेश्रमा
म्भोवामार्द्धेवहतिमदनाकूतसुभगम् । विभोर्वारंवारङ्
कृतसमयिकोद्धूलनविधेस्तनौ भस्मस्नानङ्कथमपिसमाप्तं
विजयते ॥ ५९ ॥ विप्रलम्भनिरुक्तिषुप्रथमानुरागेप्रति
श्रुत्यादानंयथा । किंणभणिओसिबालअगामणिधूआ
एगुरुअणसमक्खम् । अणिमिसवङ्कवलन्तवअणणअण
द्धिदिठ्ठेहिम् ॥ अत्रवक्रेक्षितादिभिः प्रतिश्रुत्यालिङ्गना
दयोह्रीभयादिभिर्नदीयन्ते ॥६०॥ मानेविसंवादनंयथा ।
अणुअणाहंकुविआउबहूअसुकिमुहापसाएसि । तुहमणु
समुप्पण्णोणमज्झमाणेणविणकज्जम् । अत्रमा
निनीपूर्वमालिङ्गनादीन्निषिध्यपश्चादयथावत्प्रयच्छति

यथाकश्चिदष्टशतन्दास्यामीति प्रतिश्रुत्याष्टाभिरधिकंश
तम्प्रयच्छतिनत्वष्टौशतानीति । तदेतद्व्यलीकविप्रयोगा
दिभिरालिङ्गनादीनान्निराकरणमयथावत्प्रदानत्वाद्विसं
वादनमेवोच्यते ॥ ६१ ॥ प्रवासेकालहरणंयथा । एहि
इसोपउत्थोअहअंकुप्पेज्जस्सोअणुणेज्ज । इअफलइ
कस्सविमणोरहाणमालापिअअम्मि ॥ अत्रालिङ्ग-
नादीनांव्यक्तैवकालहरणप्रतीतिः ॥६२॥ करुणेप्रत्यादा
नंयथा । समसोक्खदुक्खसंबट्ठिआणकालेणरूढपेम्मा-
ण । मिहुणाणंमरइजन्तङ्कुजिअइइअरम्मुहंहोइ ॥ अत्र
"सुहृदिवप्रकटय्यसुखप्रदः प्रथममेकरसामनुकूलताम् ।
पुनरकाण्डविवर्त्तनदारुणः प्रविशिनष्टि विधिर्मनसो
रुजम् ।,, इत्ययमर्थः सम्बध्यते । तस्यचप्रत्यादानमे-
वार्थोभवति ॥ ६३ ॥ प्रथमानुरागेवञ्चनंविविधंयथा ।
दिट्ठाएजंण्णदिठ्ठोआलविआएजंण्णआलत्तो । उवआ
रोजंण्णकओतञ्चिअकलिअञ्छइल्लेहिम् । अत्रव्रीडादि
भिर्दर्शनादिभिर्वञ्चनाभिर्वैविध्यम्प्रतीयते ॥ ६४ ॥
मानेविरुद्धंयथा । णमुअन्तिदीहसासेणरुअन्तिणहो-
न्तिविरहकिसिआओ । धण्णओताओजाणम्बहुवल्लह
वल्लहोनसुमम् ॥ अत्रेर्ष्यायितादिभिर्वल्लभालिङ्गनादि
विरुद्धैर्मानवतीवञ्च्यते ॥ ६५ ॥ प्रवासेव्याविद्धंयथा ।
कइआगओपिओअज्जपुत्तिअज्जेणकइदिणाहोन्ति ।
एकोएदृहसेतोभणिअम्मोहङ्गआबाला ॥ अत्रएकस्या
पिदिवसस्यवर्षायमानतयाप्रियालिङ्गनादिवञ्चनयावि

शेषतोद्वैर्घ्यम्प्रतीयते ॥ ६६ ॥ करुणेनिषिद्धंयथा । आ
वाअभअअरञ्चिअणहोइदुक्खस्सदारुणमवसाणम् ।
णाहजिअन्तीएमएदिठ्ठंसहिअंअतुहइअअवसाणम् ॥
तदेतद्रामविषयंसीतायाश्चिराशंसिसमागमसुखावा-
प्तिव्यपायरूपंवचनङ्करुणमितिनिषिध्यते ॥ ६७ ॥
प्रथमानुरागेणसहरागोयथा । सामहइतस्सण्हाउं
अणुसोत्तेसाविसेमुव्वहइ । थणवट्टभिउणविलुलिअ-
कल्लोलमहग्घिएसलिले ॥ अत्रशुद्धयोरप्येककाल-
मन्योन्यानुरागः प्रतीयते । तत्रैकालावण्यादिनार-
ज्यते । द्वितीयस्तुस्नेहादिनारज्यतइति ॥ ६८ ॥ त-
त्रैवपश्चाद्यथा । मामिहिअअंवपीअन्तेणजुवाणेणम
ज्जमाणाए । ण्हाणहलद्दाकडुअंअणुसोत्तजलंविअन्ते-
ण ॥ अत्रैकस्यानुरागन्दृष्ट्वापश्चाद्द्वितीयोरज्यते ॥६९॥
तत्रैवानुरूपोयथा । सच्चंजाणइदट्ठुंसरिसम्मिजणम्मि-
जुज्जएराओ । मरउणतुमंभणिस्सम्मरणम्पिसलाहणि-
ज्जंसे ॥ अत्रनकेवलंलावण्यादिनैवरज्यते । किन्तर्हि
अनुरूपविषयिणाऽभिलाषेणापीतिप्रतीयते ॥७०॥ तत्रै-
वानुगतोयथा । गहवइसुएणसमअंसच्चंअलिअंवकिंवि
आरेइ । धण्णइहलिअउमारिआइठाणम्मिजणवाओ ॥
अत्रयद्यपिसौभाग्यादिप्रसिद्धिकृतमानरूप्यन्नविद्यते
तथापिस्त्रियाउत्तमप्रार्थनमगर्हितत्वादनुगतमेवभव-
ति । सोयङ्करणसाधारणसाधनोत्पत्तिपक्षउक्तः ॥७१॥
भावसाधनपक्षेतुसर्वत्रसहार्थादिविशिष्टारतिर्दीप्तिर्वानु

रागशब्देनोच्यते । प्रथमंचोपजायमानत्वाद्यंप्रथमानुरागइतिप्रथमतोमाने । मान्यतेयेनेतियथा । पाअपडणाणमुट्ठेरहसबलामोडिअच्छिअव्वाण । दंसणमेत्तपसिज्जरिचुक्कावहुदाणसोक्खाण ॥ अत्रमानपूजायामितिधातोः स्वार्थेणिजन्ताण्णिघञ्चिमानइति रूपम् । सहिप्रेयांसमस्याः पादपतनादिपूजायांप्रयोजयति ॥ ७२ ॥ यंप्रियत्वेनमन्यतेयथा । कारणगहिओविमएमाणोएनेअजंसमोसरिओ । अत्थक्कपुल्लिअंकोल्लनुज्झनम्मत्थएपडउ ॥ अत्रमनज्ञानइतिधातुः । तथाहि । मानम्प्रियत्वेनमन्यमानातदपहारिणेऽकोल्लाय कापिमानिनीकुप्यति ॥ ७३ ॥ यः प्रेममनुतेयथा । जत्थणउज्जागरओजत्थणईसाविरूवणम्माणम् । सम्बावचाहुअञ्जुत्थणत्थिणेहोतहिंणत्थि ॥ अत्रमनुअववोधनेधातुः । मानेनहिप्रेमास्तिनास्तिवेतिजनोबुध्यते तस्य चकरणभूतस्यापिप्राधान्यादत्रकर्त्रत्वोपचारः । तद्यथा "प्रज्ञापश्यति नोचक्षुर्दृष्टिः सारस्वतीहिसे,,ति ॥७४॥ प्रेमामिमीतेयथा । ऊविआअसच्चहासासमेविवहुआणवरमाणक्खलणे । पाअडिअहिअअसारोप्रेमासङ्खरिसोपअट्टईमच्छू ॥ अत्रमाङ्मानइतिधातोः [कृत्यल्युटो बहुलमिति] कर्त्तरिल्युट् । कोसावनुमानइतिभाष्यप्रयोगात् । तेनच यद्यपि करणभूतेनैवात्मनि रुक्मिण्यांचप्रियप्रेम्णः परिमाणंसत्यभामाप्रत्याययतितथापि पूर्ववदिहप्रायशङ्कर्त्रत्वेनोपयुज्यते ॥ ७५ ॥ प्र-

वासेवसतइत्युपलक्षणेनात्मानमङ्गनामूषयन्तियथा । साहीणेविपिअअमेपत्तेविछणेणमण्डिओआप्पा । दुक्खिअपउत्थवइअंसअज्जिअंसण्ठवन्तीए ॥ अत्रवस-आच्छादनइत्यस्यप्रस्मरतीत्यादिवन्निषेधार्थप्रपूर्वस्य-घञिचप्रवासइतिरूपन्निरूप्यते ॥ ७६ ॥ युवानः प्रिया सन्निधौनवसन्तियथा । विरहाणलोसहिज्जइआसावन्धेणदुल्लहजणस्स । एक्कग्गामपवासोमाएमरणविसेसेइ ॥ अत्रदूरस्थयोरिवान्तिकस्थयोरपिसन्निकर्षाभावात्प्रवासोभवति ॥ ७७ ॥ उत्कण्ठादिभिश्चेतोवासयतियथा । आलोअन्तिदिसाओमसन्तजम्भन्नगन्तरोअन्त । मुज्झतपडन्तहसन्तपहिअकितेणपउत्थेण ॥ अत्रोत्कण्ठादिनिर्वासितेचेतसिशून्यावलोकनादयोनुभावाजायन्ते ॥ ७८ ॥ प्रमापयतियथा । सञ्जीवणोसहिम्मिवपिअस्सरक्खेइअणण्णयावारा । सासूणकवृदंसणकण्ठागअज्जीविअंसोण्हम् ॥ अत्रप्रसादङ्करोतीत्यादिवत्प्रमापणोपक्रमोपिप्रमापणमुच्यते ॥७९॥ करुणैकरोतेरनुभूतोपादानार्थत्वेकुरुतेमूर्छांयथा ॥ विअलिअविओअविअणन्तक्खणपब्बठ्ठराममरणाआसम् । जणअतणआएणवरंलब्धम्मुछाणिमीलिअछीअसुहम् ॥ अत्रसीतायाः पतिशोकप्रकर्षेणभूतामूर्छोत्पद्यते ॥ ८० ॥ उच्चारणार्थत्वेकुरुतेविलापंयथा । पुहवीअहोइहिपईबहुपुरिसविसेसचञ्चलाराअसिरी । कहतामहच्चिअइमंणिसामण्णंउवठ्ठिअंवेहवम् ॥ अत्रप्रवासदुःखेनसी-

हाविलपन्तीदमुच्चरति ॥ ८१ ॥ अवस्थापनार्थत्वेकु-
तेसाहसेमनोयथा । इयमेत्यपतङ्गवर्त्मना पुनरङ्का-
श्रयणीभवामि ते । चतुरैः सुरकामिनीजनैः प्रिय! या-
वज्जनविलुप्यसेदिवि ॥ अत्ररतेः कामशोकेनमरणसा-
हसंमनोवस्थाप्यते ॥८२॥ अभ्यञ्जनार्थत्वेकरोतिचित्त-
न्दुःखेनयथा । दलतिहृदयङ्गाढोद्वेगन्द्विधा न तु भि-
द्यते वहतिविकलः कायोमोहन्नमज्जति चेतनाम् ।
ज्वलतिच तनूमन्तर्दाहः करोति न भस्मसात्प्रहरतिवि
धिर्मर्मच्छेदी न कृन्तति जीवितम् ॥ अत्ररामादेः दुः-
खेनचित्तमभ्यज्यते ॥ ८३ ॥ सम्भोगनिरुक्तिषुप्रथमानु-
रागानन्तरेपालनार्थोयथा । दृष्टादृष्टिमधोदधाति कु
रुतेनालापमाभाषिता शय्यायाम्परिवृत्य तिष्ठति ब-
लादालिङ्गिता वेपते । निर्यान्तीषु सखीषु वासभवना-
न्निर्गन्तुमेवेहते जाता वामलयैव सम्प्रति मम प्रीत्यै
नवोढाप्रिया ॥ अत्राप्रागल्भ्यवामताभ्यामननुकूलाया
मपिनवोढायामिच्छानुवृत्त्यारतिः पाल्यते ॥ ८४ ॥
मानानन्तरेकौटिल्यार्थोयथा । पादेमूर्द्धनि तामृतामु-
पजले कर्णोत्पले चूर्णिते छिन्ने हारलतागुणे करतलेस-
म्पातजातव्रणे । अप्राप्तप्रियताडनव्यतिकराहन्तुम्पुन
श्चेतसा वाञ्छन्ती मुहुरेणशावनयना पर्याकुलं रोदि-
ति ॥ अत्रप्रेम्णः स्वभावकुटिलत्वान्मानवत्याः कचग्र-
हणैनखत्पादताडनादिरूपाः कुटिलाएवजायन्ते ॥ ८५॥
प्रवासानन्तरेअभ्यवहारार्थोयथा । वसिष्ठधेनोरनुया-

यिनन्तमावर्त्तमानं वनिता वनान्तात् । पपौ निमेषा-
लसपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्याम् ॥ अ-
ग्रोत्तरार्द्धेउपोषितस्यान्नोपयोगइवप्रियालोकजन्मापि-
बतेरम्यव्यवहारःकथ्यते॥८६॥करुणानन्तरेनुभवार्थोयथा।
अणुमरपत्थिआएपच्चागअजीएम्मि पिअअम्मि। वेह-
व्वमंडणंकुलबहूअसोहग्गअङ्गाअम् ॥ अत्रयथेयम्मत्प्रा
णभूतैवमस्याअहमपिजीवितमेवेति परयाविस्रम्भजो
रागः पत्न्याः पुनः प्रेत्यापियत्सङ्गमोमयाभिलषितः सो
यञ्जीवन्त्यैवजीवितेश्वरः समासादितइतिविस्रम्भादति
सुखमेवानुभूयते ॥८७॥ अत्रप्रथमानुरागानन्तरेसम्भो
गः संक्षिप्तोयथा । अपेतव्याहारच्युतविविधशित्पव्य-
तिकरङ्करस्पर्शारम्भे प्रगलितदुकूलान्तशयनम् । मुहुर्व-
ल्गोत्कम्पन्दिशिदिशिमुहुः प्रेरितदृशोरहस्यासुत्रास्णोः
क्षणिकमिहतत्सङ्गतमभूत् ॥ अत्रसंक्षेपोनिगदेनैवव्या-
ख्यायते ॥ ८८ ॥ सएवसमानान्तरेसङ्कीर्णोयथा । अणु-
णिअखणलद्धसुहेपुणोविसम्भरिअमण्णुदूमिअविहलो ।
हिअएमाणत्रईणंचिरेणपणअगरुओपसप्पइरोसो ॥ अ
त्रावस्थिताप्रकृष्टाचरतिर्थलीकस्मरणादिभिःसंकीर्यते॥
८९ ॥ प्रवासानन्तरेसम्पूर्णोयथा । शापान्तोमे भुज-
गशयनादुत्थितेशार्ङ्गपाणौ मासानेतान् गमय चतुरो-
लोचने मीलयित्वा। पश्चादावां विरहगुणितन्तन्तमा-
त्माभिलाषनिर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥
अत्रामुनाविरहिवाक्येनापिनिर्वेक्ष्याव इतिभविष्यत्का

लोपार्थः प्रवेशानन्तरं प्यविरुद्ध्यमानेनतन्तम्मात्माभिला
षमित्यादिनातदानीन्तनभोगस्यसम्पूर्णत्वं वर्ण्यते ॥९०॥
करुणानन्तरेसमृद्धोयथा । तीर्थेतोयव्यतिकरभवेजह्नु-
कन्याशरय्वोर्देहत्यागादमरगणनालेखमासाद्यसद्यः ।
पूर्वाकाराधिकचतुरया १ सङ्गतः कान्तयासौलीलागा-
रेष्वरमतपुनर्नन्दनाभ्यन्तरेषु ॥ अत्रोत्तरार्द्धेनेन्दुमत्य-
जयोर्लोकान्तरप्रत्युज्जीवनेनसम्भोगसमृद्धिः प्रतिपा-
द्यते ॥ ९१ ॥ प्रथमानुरागानन्तरेसहार्थान्वयोयथा ।
मुहपेछओपईसेसाविहुपिअरूअदंसणुम्मइआ । दोवि
कअत्थायुहविअपुरिसमहिलन्तिमण्णन्ति ॥ अत्रपूर्वा-
र्द्धेरञ्जयत्यर्थः । उत्तरार्द्धेराजत्यर्थः । प्रथमानुरागेस-
हसिद्धभावेनसिद्धस्तदनन्तरेपितथैवानुवर्त्तते ॥ ९२ ॥
तत्रैवपश्चादर्थान्वयोयथा । अद्यप्रभृत्यवनन्ताङ्गि ! त-
वास्मिदासः क्रीतस्तपोभिरिति वादिनिचन्द्रमौलौ ।
अह्नाय सानियमजंक्लममुत्ससर्ज क्लेशः फलेनहिपुनर्न-
वतांविधत्ते ॥ अत्ररञ्जयत्यर्थः प्रथमानुरागेपुंसिपश्चा
द्भावेनसिद्धस्तदनन्तरेपितथैवानुवर्त्तते ॥ ९३ ॥ अत्रै-
वानुरूपार्थान्वयोयथा । शशिनमुपगतेयङ्कौमुदीमेघमु-
क्तञ्जलनिधिमनुरूपञ्जह्नुकन्यावतीर्णा । इतिसमगुणयो-
गप्रीतयस्तत्रपौराः श्रवणकटु नृपाणामेकवाक्यंविव-
व्रुः ॥ अत्रराजत्यर्थः प्रथमानुरागेस्त्रिपुंसयोरण्यानुरू-
प्येणसिद्धस्तदनन्तरेपितथैवानुवर्त्तते ॥ ९४ ॥ तत्रैव
गतार्थान्वयोयथा । स्थाने तपोदुश्चरमेतदर्थमपर्णयापे

१ पूर्वाकाराधिकतररुचेतिपुस्तकान्तरे ।

लवमाधिलग्नम् । या दास्यमप्यस्य लभेत नारी सा स्यात्कृतार्थाकिमुताङ्कशय्या ॥ अत्रपूर्वार्द्धेरङ्गयत्पर्थः प्रथमानुरागेनुगतार्थत्वेनसिद्धस्तथैवानुवर्त्तते । सोयङ्गरसस्साधनः प्रत्ययोत्पत्तिपक्षउक्तः ॥ भावसाधनपक्षे तुसर्वत्रसहार्थादिविशिष्टारतिर्दीप्तिर्वानुरागशब्देनोच्यमानातदनन्तरेपिसमासस्तामर्थ्यादनुवर्त्तते । कः पुनरत्रसमासः । षष्ठीलक्षणस्तत्पुरुषः प्रथमानुरागस्यानन्तरइतिप्रथमानुरागानन्तरइति । कात्रवृत्तिः । अजहत्स्वार्था । नह्यत्रनायकीमिथः समागतावपिप्रथमानुरागमुत्सृजतः । युक्तम्पुनर्यदजहत्स्वार्थपरार्थाभिधानरूपावृत्तिःस्यात् । अवश्यह्यनेनपरस्यार्थमभिदधतास्वार्थउत्सृष्टव्यः । बाढंयुक्तम् । एवंहिदृश्यतेलोकेभिक्षुकोनद्वितीयामभिक्षामासाद्यपूर्वाज्जुहोतिसंवपायैव यतते । एवन्तर्हिद्वयोर्द्विवचनमिति द्विवचनम्प्राप्नोति । करस्याविभक्तेः । षष्ठ्याःनषष्ठी।समर्थेनन्तरः।तर्हिप्रथमायाः । नप्रथमासमर्थः प्रथमानुरागः । सम्बन्धाधिक्यात् । अभिहितःसोर्थोत्रान्तर्भूतः प्रातिपदिकार्थः सम्पन्नइतिसामर्थ्यम्भविष्यति । नैवम् । इहप्रथमानुरागानन्तरइत्यस्मात्समुदायाद्विभक्त्याउत्पत्तव्यन्तेनसमुदायेनएकोर्थः सपिण्डो२ मृत्पिण्डइवाविभागोत्पन्नपांसूद्धवविभागोवयवार्थशक्त्यानुगृहीतः पृथगव्यपदेश्यावयवशक्तिरभिधीयते। तस्मिंश्चसमुदायार्थैकत्वंसमर्थैतमतोविद्यमानायामप्यवयवसङ्घातानन्तदाश्रयासुवृत्तिर्नभविष्यति ॥९५॥

१ यदजहत्स्वार्थाभिधानरूपावृत्तिरितिपुस्तकान्तरे । २ एकार्थपिण्ड इति च

मानानन्तरेपूजार्थान्वयोयथा । नस्पृष्टोपित्रिदशस-
रिता दूरमीर्ष्यानुबन्धान्नाप्युत्सृष्टोभुजगपतिनातर्ज्ज
नाभिर्जयायाः । मानस्यान्तेनयनसलिलैः क्षलितः शै-
लपुत्र्या पत्युर्मौलौ नतियुजि जयत्यात्मनः पादपांसुः ॥
अत्रपादपतनादिपूजामानसिद्धातदनन्तरेप्यनुवर्त्तते ॥
१६ ॥ अत्रैवमानम्प्रतिप्रियत्वाभिमानान्वयोयथा । वि
हायैतन्मानव्यसनमनयोरुच्चकुचयोर्विधेयः प्रेयांस्तेय
दिवयमनुल्लङ्घ्यवचसः । सखीभ्यः स्निग्धाभ्यः शि
वमितिनिशम्यैणनयनानिवापाम्भोदत्तेनयनसलिलैर्मा
नसुहृदे ॥ अत्रमानम्प्रतिप्रियत्वाभिमानोमानानन्त-
रेप्यनुवर्त्तते ॥ १७ ॥ अत्रैवप्रेमावरोधार्थान्वयोयथा ।
दूमेतिजेमुहुत्तङ्कुविअन्दासव्वजेपसाअन्ति । तेच्चिअम
हिलाणपिआसेसासामिच्चिअवराआ ॥ अत्रास्याम-
पिप्रेमास्तिनवेतिजिज्ञासुः प्रियः प्रियाङ्केलीगोत्रस्खल-
नादिनादुनोतिसाचप्रेमवत्यवश्यमस्मैकुप्यतिसचोपल-
ब्धप्रेमानदासवदेनाम्प्रवासयति । अथैषात्मनिप्रेमा-
स्तित्वमवबुद्ध्यते । सोयम्मानसिद्धोर्थस्तदनन्तरेप्यनु-
वर्त्तते ॥ १८ ॥ तत्रैवप्रेमप्रमापणार्थान्वयोयथा । सुर-
कुसुमेहिंकलुसिअञ्जइतेहिंविअपुणोद्यसाएमितुमम् ।
तोपेम्मस्सकिसोअरिअवराहस्सअणमेकअंअणुरूअम् ॥
अत्ररुक्मिण्याः सुरकुसुममञ्जरीदत्ताममतुसुरतरुरेवप्रे-
यसाप्रतिपन्नस्तदहमस्याः सहस्रगुणेनप्रियतमेतिसत्य
भामास्वप्रेमाणम्मिमीतेसचायमर्थोमानसिद्धस्तदनन्त-

रेपिसमाससामर्थ्यादनुवर्त्तते। कःपुनरत्रसमासः। षष्ठी तत्पुरुषएव। कावृत्तिः। प्रथमानुरागानन्तरमजहत्स्वार्थैव। युक्तन्तत्रविस्रम्भणादावपि प्रथमानुरागस्यविद्यमानत्वात्। इहतुमाननिवृत्तौमानापगमादयोजायन्ते। अन्वयाद्विशेषणम्भविष्यति। तद्यथा। घृतघटस्तैलघटइति। निषक्तेपि घृतेतैलेवायंघृतघटोऽयन्तैलघटइत्यन्वयात्पूर्वपदार्थोविशेषणम्भवति। भवतितत्रयावयावतीवार्थमात्राइहापितत्तुल्यमेव। तथाहि। सकअग्गहतंसुण्णामिआणणापिअइपिअअमविइण्णम्। थोअत्थोअंरोसोमहंवमाणंसिणीमइराम्॥ सकषायैरेववाक्यैर्नायकन्निस्तुदन्तीशयनीयङ्गच्छेदितिमानशेषान्वयोदृश्यते॥ ९९॥ प्रवासानन्तरेप्रियानवसतइत्यर्थस्यान्वयोयथा। वसनेपरिधूसरेवसानानियमक्षामतनुःकृतैकवेणिः। अतिनिष्करुणस्यदुःखशीलाममदीर्घंविरहज्वरंबिभर्त्ति॥ अत्रदुष्यन्तेनशकुन्तलायाः प्रवासेविभूषणाद्यग्रहणं यदवगतन्तदनन्तरेप्यनुवर्त्तमानप्रेमप्रकर्षायभवति॥१००॥ अत्रैवयुवानः प्रियासन्निधौनवसन्तीत्यर्थस्यान्वयोयथा। समर्थये यत्प्रथमम्प्रियांप्रतिक्षणेन तन्मे परिवर्त्ततेऽन्यथा। अतोविनिद्रे सहसाविलोचने करोमि न स्पर्शविभावितप्रियः॥ अत्रपुरूरवाः प्रवासान्मत्तउर्वशीबुद्ध्यालतादिकंयद्यदासादयतितत्तदनेकशोन्यथा बभूवतत्तत्संस्काराच्चायं यस्यालतारूपपरिवर्त्तनम्प्रत्येतिसोयम्प्रियासन्निधौयूनामवासः प्रवासः संसि

दुस्तदनन्तरेप्यनुवर्त्तते ॥ १०१ ॥ अत्रैवोत्कठादिभिश्चे
तोवासयतीत्यर्थस्यान्वयोयथा ॥ अव्वोदुक्करआरअपु-
णोवितत्तिङ्करेसिगमणस्स । अज्जविणहोन्तिसरलावे-
णीअन्तरङ्गिणोविहुरा ॥ अत्रप्रवासोद्भूतभृशोत्कण्ठादि
भिश्चित्तवासनाः प्रवासानन्तरेपितस्यानोपशाम्यतीति
वेणिकावर्णनादिनासूच्यते ॥१०२॥ अत्रैवप्रमापयतीत्यर्थ
स्यान्वयोयथा । त्वद्वियोगोद्भवे चण्डि!मया तमसि म
ज्जता । दिष्ट्याप्रत्युपलब्धासिचेतनेवगतासुना ॥ अ-
त्रोर्वशीविरहेपुरुरवाउत्तराङ्कामावस्थामापन्नः प्रिया-
प्राप्तौप्रेत्येवप्रत्युज्जीवितस्तदेवानुसन्धत्ते । सोयम्प्र-
मापणार्थः प्रवाससिद्धस्तदनन्तरेपिसमाससामर्थ्यादनु-
वर्त्तते । कःपुनरत्रसमासः । षष्ठीतत्पुरुषएव । कावृत्तिः ।
नतावदनुत्सृष्टस्वार्था । नहिप्रोष्यसमागतयोः प्रवासस-
म्बन्धोपिविद्यते । उत्सृष्टस्वार्थातदिहभवतु । युक्तम्पुन-
र्यदुत्सृष्टस्वार्थानामवृत्तिः स्यात् । बाढंयुक्तम् । एवंहि
दृश्यतेलोके । पुरुषोयम्परकर्मणिप्रवर्त्तमानः स्वकर्मोत्सृ-
जति । तद्यथा । तक्षाराजकर्मणिप्रवर्त्तमानस्तक्षकर्मोत्सृ-
जति । नन्वेवंराजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानय
नम्प्राप्नोति । नैषदोषः । उत्सृजन्नप्यसौस्वार्थन्नात्य-
न्तामुत्सृजति यः परार्थविरोधीस्वार्थस्तमेवोत्सृजति ।
तद्यथा । तक्षाराजकर्मणिप्रवर्त्तमानस्तक्षकर्मोत्सृजति ।
ननुस्थितविहसितकम्पनादीनि । नचायमर्थः परार्थ-
विरोधीविशेषणन्नामतस्मान्नोत्स्रक्ष्यति ॥१०३॥ करु-

णानन्तरेऽनुभूतप्रादुर्भावान्वयार्थीयथा । जयन्तिजा-
याश्लिष्टस्यशम्भोरमोघिमन्यने । मग्नामृतविषास्वाद-
मदमूर्छामनोमुदः ॥ अत्रदाक्षायण्याहैमवतीत्वेनकरुणा
नन्तरत्वन्तत्रकरुणेदुःखेनमूर्छादयः प्रादुरासन् । इह
त्वानन्देनतेप्रादुर्भवन्ति ॥ १०४ ॥ तत्रैवोच्चारणान्वया-
र्थीयथा । क्लाम्यन्ती यदुपेक्षितासि पुरतः कामो यदग्रे
हतः क्लिष्टं यत्तपसा वपुर्यदपि च प्रोक्ता बहुच्छद्मना ।
तत्सर्वंम्प्रणतस्य मेऽद्य दयिते दाक्षायणि क्षम्यतामित्यु-
क्त्वा चरणाब्जयोर्विजयते तुष्यज् शिवायाः शिवः ॥ अत्र
करुणावस्थायाम्प्रियापादाब्जयोर्लुण्ठता शोकेन यो
विलापः कृतः स इह प्रकर्षालापत्वेन परिणमति ॥१०५॥
अत्रैव मनोऽवस्थापनान्वयार्थी यथा । अखण्डितं
प्रेम लभस्व पत्युरित्युच्यते ताभिरुमा स्म नम्रा । त-
या तु तस्यार्द्धशरीरलाभादधः कृताः स्निग्धजनाशिषो-
पि ॥ अत्रैव "यदैव पूर्वं ज्वलने शरीरं सा दक्षरोषात्सु-
दती ससर्ज । ततः प्रभृत्येव विमुक्तसङ्गः पतिःपशूना-
परिग्रहोऽभूत,, इति करुणावस्थायामतिस्नेहेनापरिग्रह
त्वसाहसे यन्मनोवस्थापितन्तदिहार्द्धशरीरप्रदानमहासा
हसमेवाऽवतिष्ठते ॥१०६॥ तत्रैवाभङ्गनान्वयार्थी यथा।
भिन्ने सद्यः समाधावुपरमति परज्योतिषि स्यन्दसंज्ञे
संज्ञामापद्यमाने मृदुमनसि मनागुन्मिषत्स्विन्द्रियेषु ।
व्यापारे पारवश्यं विसृजति मरुति ब्रह्मसब्रह्मचारी[1]वा
मार्द्धस्पर्शजन्मा जयति पुररिपोरन्तरानन्दपूरः ॥ अत्र

१ ब्रह्मतुल्यइतियावत् ।

यत्करुणावस्थायाम्मनः शोकप्रकर्षेणाभ्यक्तमासीत्तदिह प्रियाश्लेषजन्मना परमानन्देनाभ्यज्यते । सोयङ्करुणधर्मसमन्वयः ॥ तदनन्तरेपि समासस्सामर्थ्याद्भवति । कः पुनरत्रसमासः । षष्ठीतत्पुरुषएव । कावृत्तिः । जहत्स्वार्था । नह्यत्र करुणार्थस्य गन्धोपि । कथन्तर्ह्यन्वयः । यथामल्लिकापुटश्चम्पकपुटइति । अत्र निष्क्रीर्णस्वपि सुमनस्सु मल्लिकादिर्वासनावशाद्विशेषणम्भवत्ययम्मल्लिकापुटोऽयञ्चम्पकपुट इति । एवन्निवृत्तेपि स्वार्थे वासनावशात्करुणोऽनन्तरस्य विशेषणम्भवति । अस्तुवा प्रथमानुरागादिष्वपि जहत्स्वार्थैव वृत्तिः । नन्वेवं राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनंप्राप्नोति । नैषदोषः । वृत्तौ समर्थाधिकारः क्रियते । सामर्थ्यञ्च भेदः, संसर्गः, उत्सर्गः, उभयंवा । तत्र राज्ञ इत्युक्ते सर्वं स्वंप्रसक्तम् । पुरुष इत्युक्ते सर्वः स्वामी प्रसक्तः । इहेदानींराजपुरुषमानयेत्युक्ते राजा पुरुषंनिवर्त्तयत्यन्येभ्यः स्वामिभ्यः पुरुषोपि राजानमन्येभ्यः । एवमस्मिन्नुभयतोव्यवच्छिन्ने यदि राजार्थौ निवर्त्तते ॥ कामन्निवर्त्ततान्नजातु क्वचित् पुरुषमात्रस्यानयनंभविष्यति । प्राक्चवृत्तेरकृतार्थस्य निवृत्तौ सामर्थ्याभावाद्वृत्तिरेव न स्यात् । वृत्तिनिमित्तावनिवृत्तिस्तस्माददोषइति । तत्र राज्ञःपुरुष इत्यत्र यदा तावदवधृतपरायत्तवृत्तिरयंपुरुषो न स्वतन्त्रस्तदा स्वामिसंसर्गस्यावगतत्वात् । स्वामिविशेषज्ञानायोपादीयमानो राज

शब्दःस्वाम्यन्तरेभ्यः पुरुषं व्यावर्त्तयति सोयं स्वाम्यन्तरव्यवच्छेदो भेद इत्युच्यते । यदा पुनरवगतपरायत्तभावस्य पुरुषस्य स्वामिसंबन्धद्योतनाय राजशब्दः प्रयुज्यते तदा विशेषसंसर्गस्य शब्दोपादानस्यादनवकाशो विशेषान्तरसंपातइत्यशाब्दी स्वाम्यन्तरनिवृत्तिरवसीयते । यदा त्वर्थान्तरनिवृत्तिस्वात्मसंसर्गश्चाभिसंधायोपसर्जनपदानिप्रयुज्यन्ते । तदा शब्दार्थसामर्थ्ययोः प्रतिपत्तिनिबन्धनयोरभेदापेक्षायाम्भेदसंसर्गसमुदायः सामर्थ्यंभवति । यथानीलञ्चतदुत्पलञ्चेति नीलोत्पलम् । प्रथमश्चासावनुरागश्चेति प्रथमानुराग इति । प्रथमानुरागानन्तर इत्यादिषु च भेदसामर्थ्यं यथा राज्ञोभृत्य इति यतोनन्तरइत्युक्तेऽवधृतमिदंकस्याप्यवधेरनन्तरोऽयन्नस्वतन्त्रइति सर्वोवधिः प्रसक्तः प्रथमानुरागस्येत्युक्ते सर्वः संबन्धी प्रसक्तः । इहेदानीं प्रथमानुरागानन्तरइत्युक्ते प्रथमानुरागोनन्तरन्निवर्त्तयत्यन्येभ्योऽवधिभ्यः । अनन्तरः [प्रथमानुरागन्निवर्त्तयत्यन्येभ्यः सम्बन्धिभ्यः । तत्र योऽसौ भेदस्तत्सामर्थ्यन्तन्निमित्ता च वृत्तिः । भेदनिमित्तायाञ्च वृत्तौ सत्यां वृत्त्यभिमुखस्य भेदमुपजनय्योपसर्ज्जनस्य प्रथमानुरागस्यार्थो निवर्त्तते । यस्यापि प्रधानस्यानन्तरस्याऽधिमतोनिवर्त्तते । सोप्यवधिमवच्छिनत्ति । एवमुभयतो व्यवच्छेद निर्ज्ञातिऽनन्तरविशेषे समुदायार्थैचान्यस्मिन्प्रादुर्भवति यदि प्रथमानुरागाद्यर्थोनिवर्त्त

ते। कामन्निवर्त्ततान्न जातु क्वचिदवधिवन्मात्रस्य सं प्रत्ययो भविष्यति। ननु चान्वयव्यतिरेकाभ्याञ्जहत्स्वार्थत्वन्नोपपद्यते। तथाहि। प्रथमानुरागानन्तरे इत्युक्ते कश्चिच्छब्दः श्रूयते प्रथमानुरागेत्यनन्तरेति च प्रतीयमानविभागोऽर्थोपि कश्चिदवगम्यते। कन्याविस्रम्भणादिरवधिमत्त्वञ्च। मानानन्तरेइत्युक्ते कश्चिच्छब्दभागो हीयते कश्चिदुपजायते कश्चिदन्वयी प्रथमानुरागेतिहीयते मानेत्युपजायते। अनन्तरइत्यन्वयी। अर्थोपि कश्चिद्धीयतेकश्चिदुपजायतेकश्चिदन्वयीकन्याविस्रम्भणादिर्हीयते। मानशैथिल्यादिरुपजायते। अवधिमत्त्वमन्वयि तेनमन्यामहेयः शब्दभागो हीयते तस्यासावर्थो योर्थो हीयते। यउपजायतेतस्यायमर्थो योर्थउपजायते। योन्वयीतस्यासावर्थोयोर्थोन्वयीति। मैवम्। यतोऽनन्यथासिद्धाभ्यामेवान्वयव्यतिरेकाभ्यां शब्दार्थयोः संबन्धावधारणमन्यथा सिद्धौचेमौ। तथाहि। यत्र वृंहितं हीयते ह्रेषितमुपजायते। रेणुचक्रमन्वयि। तत्रहस्तिनोहीयन्तेअश्वाउपजायन्ते पिपीलिका अन्वयिन्यो न च तावतारेणुचक्रादिपिपीलिकाः कारणं भवति॥ यत्रवाक्षीरंहीयते दध्युपजायते। पात्रमन्वयि तत्र माधुर्यं हीयते ऽम्लतोपजायते। तृप्तिरन्वयिनी नैतावता पात्रस्य तृप्तिः कार्यंभवति। अवधृतं हि सामर्थ्यमन्वयव्यतिरेकाभ्यां प्रविभज्यते। यथा लोके बधिरोपि चक्षुष्मानालोकयति। सत्यपि

श्रोत्रउपहतचक्षुर्नालोकयतिरूपमित्यन्वयव्यतिरेकाभ्या
ञ्चक्षुः श्रोत्रसन्निधानेरूपालोकनं चक्षुषएवावस्थाप्यते।
न श्रोत्रस्य । यस्य केवलस्यार्थोवगतः पदार्थान्तरस
न्निधानेपि तस्य स एव । नहि रसनमसन्निधौदर्श
नस्य मधुरादिव्यञ्जकदर्शनसन्निधौ नीलादिव्यक्तिंप्रति
सामर्थ्यं लभते प्रथमानुरागशब्दस्य च केवलस्योत्कण्ठा
दिषु मानशब्दस्येर्ष्यायितादिष्वनन्तरशब्दस्य पुनरव-
धिमत्स्वेवसामर्थ्यमवधृतमतस्तेषान्तावामेवार्थौभव
ति यः पुनः पदयोरन्योन्योपक्षेपाद्विस्रम्भणादिर्मान
शैथिल्यादिर्वावधिमद्विशेषोन्यावधिकः प्रतीयतेवाक्या
र्थः संभवतीति यदिचयथानपेक्षितावयवार्थावृक्षश्रो-
त्रियशकृगोपादयः स्वसामर्थ्यनियतमर्थमाचक्षते तथा
सङ्घाता एवैते प्रथमानुरागान्तरादयः । राजपुरुषा-
दयस्त्वनपेक्षितावयवार्था यथासामर्थ्यमर्थेषु निवि-
शन्ते । ननु चाव्यपदेश्यपूर्वापरविभागाभिन्नार्थाभि-
धायिनो वृक्षादयः प्रतीयमानभागभेदानुयाताः स-
म्बन्धिपदार्थोपहितभेदं वृत्त्यभिधायिनः पुनरिमे त
त्कथम्प्रथमानुरागानन्तरादयो वृक्षादिवद्रूढिशब्दा भ
वितुमर्हन्ति । तदसत् । रूढिशब्दायौगिका इति हि
विभागोऽभेददर्शनादर्शनाभ्यामभिनिविशतेऽभिनिवि-
ष्टबुद्धेः प्रतिपादनोपाय एव । अपथाभिनिविष्टोह्ययङ्
क्रमेणतस्मादपदार्थान्निवर्त्तयितव्यस्ततोस्याप्रत्यभिज्ञा
यमानप्रकृतयः श्रोत्रियक्षत्रियादयोदृश्यन्ते । नह्यत्र प्र

कृतिरूपमवसीयते। यतः प्रकृत्यर्थावच्छिन्नः प्रत्ययार्थोऽभिधीयते। ततोऽवसीयमानावयवविभागारूढयः काश्चिदुपन्यस्यन्ते। यत्रात्यन्तमसम्भवोऽवयवार्थस्य यथा-शक्तीवास्तैलपायिकामण्डयतीति। पुनः कदाचित्सन्निहितावयवार्थजातिविशेषाभिधायिनः सप्तपर्णकृतमालादय उद्दाह्रियन्ते। यतः प्रपलाशोऽप्यनुद्भिन्नपलाशोऽपि च वनस्पतिः सप्तपर्णान्यस्य पर्वणीति सप्तपर्ण इत्याख्यायते। तथानिष्कीर्णकुसुमस्तरुरारग्वधकलिकाजालोऽपि कृतामालानेनेतिकृतमाल इत्यभिधीयते। अथ पञ्चाङ्गुलमित्राम्रकर्णइवपर्णमस्येति उपचरितार्थात्रयवाजातिवाचिनएवपञ्चाङ्गुलाम्रकर्णादयोऽवयन्ते। तेषुहिपञ्चाङ्गुलादिव्यपदेशः प्रोद्भिद्यमानप्रवालमालमपियावदनुवर्त्तते। ततः सन्निधीयमानेप्यनाश्रीयमाणवृत्तिपदार्थालोहितशालिः गौरखरइत्यादयो निगद्यन्ते। तत्र हि सन्नपिवर्णविशेषः समुदायस्य जातिवचनत्वाच्छब्दार्थत्वेननावसीयते। तदेवमयंशक्लीकृतवृत्तिपदार्थाभिनिवेशः प्रथमानुरागानन्तरादाविव राजपुरुषादावप्यवयवाभिनिवेशं शक्यते त्याजयितुम्। अतएव प्रथमानुरागादीनां विप्रलम्भसम्भोगादीनाञ्च पारिभाषिकोऽपिसंसर्गः सन्निधीयतइति १०७॥ प्रकीर्णकेषु स्पृहयन्ती व्रतमष्टमीचन्द्रकः स हि चैत्रचतुर्थीतोष्टमचतुर्थ्यामुपादीयमानः कामिनीभिरर्च्यतेयथा। अवसहिअज्जो पइणा सलाहमाणेणए-

ञ्चिरं हसिओ । अन्दोत्ति तुज्झ मुहदिण्णकुसुमञ्जलिवि-
लक्खो ॥१०८॥ यस्यां यवस्तस्तरं ध्रुवला लोलन्ति सा कु-
न्दचतुर्थी यथा । लुलिआगहवइ धुआविसंवफलञ्जवे-
हिंसविसेसम् । गिहंअणिवारिअसेवगोहणउचवरच्छे-
त्तम्मि ॥१०९॥ वसन्तावतारदिवसः सुवसन्तको यथा ।
छणघिट्ठधूसरत्थणि महुमअन्तम्बछिक्कवलआहरणे ।
कण्णकअचूअमञ्जरि पुत्ति तुए सहिओ गामो ॥११०॥ य
त्रस्त्रियो दोलामारोहन्ति सा आन्दोलनचतुर्थी यथा ।
अन्दोलणक्खणोट्ठिआए दिट्ठे तुमम्मि मुद्धाए । आ
सङ्किज्जइकाओ करपेल्लणणिच्चला दोला ॥१११॥ एकमेव
सुकुसुमनिर्भरं शाल्मलिवृक्षमाश्रित्य सुनिमीलितका-
क्षिभिः खेलनाक्रीडा एकशाल्मली यथा । को एसोत्ति
पलोहुं संवलिवलिअम्मिअपरिक्खसइ । हलिअसुअ-
म्मुद्धवहू सें अजलोल्लेण हत्थेण ॥११२॥ त्रयोदश्यांकाम
देवपूजा मदनोत्सवो यथा । गामलरुणीओ हिअअंहर
न्ति पोढाणत्थणहरिल्लीओ । मअणसविम्भिअकोसम्भ-
कञ्चुआ हरणमेत्ताओ ॥११३॥ गन्धोदकपूर्णवंशनाडी-
स्पृङ्काद्भिर्यूनाम्प्रियजनाभिषेककर्दमेन क्रीडा उ-
दकक्षेडिका यथा । अह धाविऊण संझाअएण सव्व-
ङ्गिअम्पडिच्छन्ति । पज्जुन्नहे तरुणीओ गहवइसुअहत्थ
क्खित्तखल्लम् ॥ ११४ ॥ यत्रोत्समस्त्रियः पादाभिघातेना-
शोकं विकाश्य तत्कुसुममवतंसयन्ति साशोकोत्तंसि-
का यथा । उत्तंसिऊण दोहलविअसि असोअमिन्दुव-

णाए । विरहिणो णिप्फलक्कङ्खिक्करणसहो समुप्पु
लिओ॥११५॥ यत्राङ्गनाभिर्भ्रूभङ्गमञ्जरीवल्ल्यानंग।यो[1]ण
लेनद्वायंदायमवतंस्यते सा चूतभञ्जिका यथा। रइप्पभि
ता णसोहइ रइजोग्गङ्गामिणीणेवच्छम्। कण्णे आवण
रइज्जइ कओलघोणन्तपल्लवसहआरम् ॥११६॥ यत्र यु-
वतयो मदिरागण्डूषदोहदेन बकुलं विकाश्य सत्पुष्पा-
ण्यवचिन्वन्ति सा पुष्पावचायिका यथा । पीणत्थण-
ए सुकेसरद्दोहलदाणुम्मुहीअणिवलन्तो । तुङ्गसिहरग्गा
पडणत्थजम्फलन्तन्तष्ठ पत्तम् ॥११७॥ यत्र कस्तेप्रियत-
म इति पृच्छद्भिः पलाशादिनवलताभिः प्रियो जनो ह-
न्यते सा चूतलतिका यथा। णवलग्गपहरअङ्गे जहिज्ज
हिममहइदेअरोदाउम् । रोमञ्चदग्गडराई तहिन्तहिन्दी
सङ्ग वहूए ॥११८॥ पञ्चात्यनुनयन्तीभूतमातृका यथा ।
विहलइसेणे वच्छन्तममाअइममगडणङ्गईखलइ । भूअच्छ
णणच्छणम्मिसुहअमाणम्घुलोएसु॥११९॥वर्षासुकदम्बनी
पहारिद्रकादिकुसुमैः प्रहरणभूतैर्द्विगादलंविभज्य कामि
नीनांक्रीडाः कदम्बयुद्धानि यथा । सहिआहिम्मिपअ-
म्बिसज्जिअकलम्बरअभरिअणिअमरुकूओ । दीसइ क-
लम्बधवओ व्वअणहरो हलिअसोण्हाए ॥ १२० ॥ प्र-
थमवर्षण प्ररूढनवतृणाङ्कुरासु स्थलीषु शाद्वलमर्चय
भुक्तपीतानांकृत्रिमविवाहादिक्रीडानवपत्रिका तत्र च
वरणविधानादौ लेषामेवं विधाः परिहासा भवन्ति
यथा। ता कुणहकालहरणन्तुअरन्तम्मिविवरेविवास्स।

१ अनङ्गायदायंदायमिति २ पुस्तके

जाव पण्डुणहवआइंहोन्तिकुमारीअ अङ्गाइम् ॥१२१॥ अभिनवबिसाङ्कुरोद्भेदाभिरामं सरः समाश्रित्य कामि मिथुनानांक्रीडा बिसखादिका यथा। गेण्हन्तिपिअम्अ मा पिअम्अमाणवअणा हि बिसलअट्ठाइम्। हिअआइं वि कुसुमाउहबाणकआणेअरंट्ठाइम् ॥ १२२ ॥ शक्रोत्सवदिवसः शक्रार्चायथा। सञ्चिअकट्ठमओ सुरणाहो जे ण हलिअधीआए। हत्थेहिङ्कमलदलकोमलेहि च्छित्तोणपल्लविओ ॥१२३॥ आश्विनेपौर्णमासीकौमुदी यथा। अहतह महत्थदिस्से कहकहविखलन्तमत्तजणम ज्झे। तिण्णायणेपुजाओ विलेवणङ्केमुईबासो ॥१२४॥ दीपोत्सवोयक्षरात्रिर्यथा। अक्खे विहिहोन्तिछणाणंउणो दीआलिआसरिच्छोदे। जत्थ जहि छङ्गअइ पिअवसदीदीअवम्मिसेण ॥१२५॥ शमीधान्यशूकधान्यानामाद्रणामेवाग्निपक्वानामभ्यवहारोभ्युपखादिका यथा। वाअणग्गिणाकरीमे दड्ढोत्ति पुणोपुणोच्चिअकहेहिइ। हालिक्कसुआमलिअछुखदोहलापामरजुवाणे ॥१२६॥ प्रथमतएवेक्षुभक्षणन्नवेक्षुभक्षिकायथा। दिअरस्ससरअमड्डअंसूमइलेनदेईहत्थेण। पढमंहिअअंवहुआपच्छागरुअं सदन्तवणम् ॥१२७॥ ग्रीष्मादौजलशयावगाहनन्तोयक्रीडायथा। पिसुणेन्तिकामिणीणजललुक्कपिआवऊहहासु हेल्लिम्। कण्ठइअकवोतापुलणिच्चलछीइवअणाइम् ॥१२८॥ नाट्यादिदर्शनम्प्रेक्षायथा। णच्चिहिइणडोपेछिहिइजणवओभोरओनायकस्सोविदूसिहिइ। जइरङ्ग-

विहङ्गणअरीगहवइधुआणयवञ्चिहिइ ॥१२९॥ आलिङ्गनादिग्लहादुरोदरादिक्रीडादूतानियथा । आक्षेपेप्रथमक्रमेणविजितेहृष्टाधरस्यार्पणेकेलीदूतविधौपणम्प्रियतमेकान्ताम्पुनः पृच्छति । सान्तर्हासनिरुद्धसम्भृतरसोद्वेदस्फुरद्गण्डयातूष्णींशारिविसारणायनिहितःस्वेदाम्बुगर्भः करः॥१३०॥ रागोद्दीपनायमाध्वीकादिसेवामधुपानंयथा । थोआरूढमहुमआखणपल्लट्टावराहदिण्णुल्लावा । हसिऊणसण्ठविज्जइपिएणसम्भरिअलज्जिआकाविपिआ ॥ १३१ ॥ प्रेमप्रकारेषुविप्रियादिभिरप्यविनाशनीयोनित्योयथा । दिट्ठाकुविआणुणआपिआसहस्सजणपेल्लणम्मिविसहिआम् । जस्सणिसण्णइउरेसिरीअपेम्मेणलहुअइओअप्पाणो ॥ १३२ ॥ तपश्चरणादिजन्मानैमित्तिकोयथा । एयेषसाक्षर्त्तुमनश्चर्यरूपतांसमाधिमास्थायतपोभिरात्मनः । अवाप्यतेवाकथमन्यथाद्वयन्तथाविधम्प्रेमपतिश्चतादृशः ॥ १३३ ॥ अनिर्दुर्वारितविशेषः सामान्योयथा । कुविआओपसण्णमुहीओविसमाणीओ । जहगहिआतहहिअअन्थोरेतिअणिच्चुअम्बाला ॥ १३४ ॥ निर्दुर्वारितविशेषप्रकारोविशेषवान्यथा । णवित्तहअणालवन्तीहिअअन्दुम्मेइमाणिईणीअहिअम् । जहदूरविअम्भिअगरुअरीसमज्झत्थअणिषेण ॥१३५॥ इङ्गितादिभिरप्यनवगम्यः प्रच्छन्नोयथा । दिअहेदिअहेरूसङ्केअअभङ्गवड्ढिआसङ्का । आवण्डुरोवणमुहीकलमेणसमङ्कलमगोवी ॥१३६॥ सख्यादि-

भिरवगतः प्रकाशोयथा। जइहोसिणतस्सपिआतादीअह णीसहेहिअङ्गेहि। णवसूअपिअपेऊसमत्तपाडिव्वकिंसु-असि॥१३७॥ कारणोपाधिकः कृत्रिमोयथा। अद्धंसणे णपुत्तअसुठ्ठुविणेहाणुबन्धगहिआइ। हत्थउडंपाणि-आइंविकालेणवाल्लन्तिपेम्माइम्॥१३८॥ कारणनिरपेक्षो ऽकृत्रिमोयथा। जहजहजरापरिणओहोइपईदुग्गओवि रूवोवि। कुलपालिआएतहतहअहिअअरंवल्लहोहोइ १३९ जन्मान्तरसंस्कारजनितः सहजोयथा। आणिअपुलओ ब्भेओसवत्तिपणअपरिधूसरम्मिविगरुए। पिअदंसणेप वड्ढइमह्मठ्ठाणेविरुम्मिणीअपहरिसो॥१४०॥ उपचा रापेक्षप्रकर्षआहार्योयथा। घरिणीअकइअव्वञ्चडुलप्पि अअमेकुणन्तस्मि। अकअत्थाइंविजाआइन्हत्तिसिढि-लिआइंअङ्गाइम्॥१४१॥ यौवनजोयथा। तम्बमुहक-आहोआजहथणआकिलेन्तिकुमारीणम्। तहतहलद्धा-वासोव्ववम्महोहिअअमाविसइ॥१४२॥ उपचारानपेक्षो विस्रम्भजोयथा। णवितहछेअरआइंहरन्तिपुणरुत्तरा अरमिआइम्। जहजत्थवतत्थवजहवतहवसम्भावर-मिआइम्॥१४३॥ प्रेमपुष्टिषु चक्षुःप्रीतिर्यथा। उत्पत्तिर्दे वयजनाद्ब्रह्मवादीनृपः पिता। सुप्रसन्नोज्ज्वलामूर्त्ति-रस्याः स्नेहङ्करोतिमे॥१४४॥ मनः सङ्गोयथा। एषामनो-मेप्रसभंशरीरात्पितुः पदम्मध्यममुत्पतन्ती। सुराङ्गना-कर्षतिखण्डिताग्रात्सूत्रमृणालादिवराजहंसी॥१४५॥ सङ्कल्पोत्पत्तिर्यथा। तम्पुलइअम्पिपेच्छइतञ्चाणि-

उक्काअइइतीअगेण्हइगोत्तम्। ठाइअतस्सक्खमअणेअण्ण
म्पिविचिन्तअम्मिसञ्चिअहिअए ॥ १४६ ॥ प्रलापोयथा ।
अमअमअगअणसेहररअणीमुहनिलंअचन्ददेछिवसु ।
छित्तोजेहिम्पिपिआममम्पितेहिचिअकरेहिम् ॥ १४७ ॥
जागरोयथा । लुहविरहुज्जागरिओसिविणेविसदेइदंसण
सुहाइ। बाहेणजहाछोअणविलोअणम्पिसेविइअम्। १४८॥
कार्श्यंयथा । आइकोवणाविसासूरुआविआगअवई-
एसोहूणाए । पाअपउणोणआएदोसुविगलिएसुवलएसु
॥१४९॥ अरतिर्विषयान्तरेयथा। असगत्तोविसमप्पइअ-
परिअग्गहिअलहुओपरगुणालाओ । तस्यपिआपडिव
ढाणसमप्पइरसुहासमत्ताविकहालज्ज ॥ १५० ॥ विस-
र्जनंयथा। अगणिअसेसजुअणावाअवोलीणलेअमज्जा
आ। अहसाम्मइदिसामुहपसारिअछीतुहहकएण ॥१५१
व्याधिर्यथा । असहणतीरइच्चिअपरिवड्डन्तुड्डअगरुअ-
संतावम्। मरणविणोएणविणाविरमावेउविरहदुःखम्
॥१५२॥ उन्मादोयथा । अवलम्बहमांसङ्कुणइमगलङ्
घिआपरिब्भमइ । अत्थक्कगज्जिअउत्तन्तहित्थहिअ-
आपहिअजाआ ॥१५३॥ मूर्छायथा । जम्मुच्छिआणअ-
सुओकलमबगन्धेणतङ्गुणेपडिअम्। इअरहगज्जिअस
ड्ढोजीएणविणाणवोलिन्तो ॥१५४॥ मरणंयथा । अज्ज-
म्पितावएक्कम्मासंवारेहपिअसहिरुअन्तिम्। पहिऊण-
तम्मिगएजइणमरिस्सण्णारोइस्सम्॥ताइमाविप्रलम्भज
न्मानोद्वादशापिप्रेमपुष्टिभूमयः सम्भोगेषुस्वानुरूपामे-

वप्रेमप्रकर्षभूमिकामास्कन्दयन्ति ॥१५५॥ नायकैकदेशव्यापीनायकीयथा । गुरोः शासनमत्येतुन्नशशाकसरा घवः । योरावणशिरश्छेदकार्यभारेप्यविक्लवः ॥ १५६ ॥ प्रतिनायकीयथा । जेतारंलोकपालानान्तैर्मुखैरर्चितेश्वरम् । रामस्तुलितकैलासमरातिम्बहुमन्यत ॥ १५७ ॥ उपनायकीयथा । सहत्वावालिनंवीरन्तत्पदेचिरकाङ्क्षिते । धातोः स्थानइवादेशंसुग्रीवंसन्यवेशयत् ॥१५८॥ अनुनायकीयथा । समारुतसुतानीतमहौषधिहृतव्यथः । लक्ष्मणक्षीणाम्पुनश्चक्रे विलापाचार्यकंशरैः ॥ १५९॥ कथाव्यापिनीनायिकायथा । तीएसविसेसदूमिअसवत्तिहिअआइणिव्वरणेन्तसिणेहम् । पिअगरुइआइणिमिअंसोहग्गगुणाणअग्गभूमीअपअम् ॥१६०॥ प्रतिनायिकायथा । तन्निअसकुसुमदामंहरिणाणिम्महिअसुरहिगन्धामोअम् । अप्पणइअम्मिदूम्मिअपणइपि हिअएणरुम्भिणीअविइण्णम् ॥१६१॥ उपनायिकायथा । देवीस्वीकृतमानसस्यनियतंस्वप्नायमानस्यमेतद्भोत्रग्रहणादियंसुवदनायायात्कथन्नव्यथाम् । हृत्थंयन्त्रणयाकथङ्कथमपिक्षीणानिशाजाग्रतोदाक्षिण्योपहतेनसाप्रियतमास्वप्नेपिनासादिता ॥१६२॥ अनुनायिकायथा । श्लाघ्यानांगुणिनान्धुरिस्थितवतिश्रेष्ठान्ववायेत्वयिप्रत्यस्तव्यसनेमहीयसिपरम्प्रीतोस्मिजामातरि । तेनेयम्मदयन्तिकादभवतः प्रीत्यैभवत्प्रेयसेमित्त्रायप्रथमानुरागघटितापास्माभिरुत्सृज्यते ॥ १६३ ॥ आभासेषुनायकाभासोयथा । क

हस्समाझिज्जउमज्झोइमीअकन्दोहदलसरिछेहिम्। अ-
छीहिंजोणदीसइघणथणहररुद्धपसरेंहिम् ॥१६४॥ नायि
काभासोयथा । कृतसीतापरित्यागः सरत्नाकरमेख
लाम्। बुभुजेपृथिवीपालः पृथिवीमेवकेवलाम् ॥१६५॥उ
भयाभासोयथा । अवऊहिअपुव्वदिसेसमयञ्जोण्हाए-
सेविअपओसम्मुहे । माइणझिज्जउअरणीवरदिसाहुं
तपत्थिअम्मिमिअङ्के ।१६६। तिर्यगाभासोयथा। ओरन्त
पङ्कअमुहिंवम्महणडिअंवसलिलसअणणिसण्ण। अल्लिअ
इतीरणलिणिवाआइगमेइसहवरिंवक्काओ ।१६७। नायके
षुसर्वगुणसम्पद्योगादुत्तमः सयथा । रामोयञ्जगतीह
विक्रमगुणैर्यातः १ प्रसिद्धिम्परामस्मद्भाग्यविपर्ययाद्यदि
परन्देवोनजानातितम् । बन्दीवैषयशांसिगायतिम-
रुद्यस्यैकबाणाहतिश्रेणीभूतविशालतालविवरोद्गीर्णैः स्व
रैःसप्तभिः ॥१६८॥ पादोनगुणसम्पद्योगान्मध्यमोयथा।
किन्नोव्याप्तदिशाम्प्रकम्पितभुवामक्षौहिणीनाम्फलङ्कि
न्द्रोणेनकिमङ्गराजविशिखैरेवंयदिक्लाम्यसि । जीवदभ्रा-
तृशतस्यमेभुजवन२च्छायांसुखामाश्रितात्वन्दुर्योधनके-
सरीन्द्रगृहिणीशङ्कास्पदङ्किन्तव ॥१६९॥ अर्द्धगुणसम्पद्यो
गात्कनिष्ठोयथा । एकस्मिन्शयनेमयामयसुतामालि-
ङ्ग्यनिद्रालसामुन्निद्रं शयितेनमच्चरणयोः संवाहनव्या-
पृता । पादाग्रेणतिलोत्तमा स्तनतटेसस्नेहमापीडिता
हर्षादेवसमर्पितानिपुलकान्यद्यापिनोमुञ्चति ।१७०। सत्त्व
प्रधानः सात्त्विकोयथा । शक्त्यावक्षसिमग्नयासहमया

१ रामोयं भवनेषु विक्रमगुणैःप्राप्तइति २ पुस्तके । २ घनच्छाये २ पुस्तके

मूढेप्लवङ्गाधिपेनिद्राणेषुचविद्रवत्सुकपिषु प्राप्तावकाशे द्विषि। माभैष्टेतिनिरुन्धतः कपिभयन्तस्योद्भटभ्रूस्थितेर्म र्मच्छेदविसंष्ठुलाक्षरजडावाचस्त्वयानश्रुताः ॥१७१॥ रजः प्रधानोराजसोयथा। सामन्तमौलिमणिरञ्जितशासनाङ्ग मेकातपत्रमवनेर्नतथा प्रभुत्वम्। अस्याः सखे! चरण- योरधिगम्यसम्यगाज्ञाकरत्वमहमद्ययथाकृतार्थः॥१७२॥ तमःप्रधानस्तामसोयथा। तपोवाशस्त्रंवाव्यपदिशतियः कश्चिदिहवः सदर्पादुद्दामन्द्विषमसहमानङ्कलयतु। अ- रामां निःसीरध्वजदशरथीकृत्यवसुधामतृप्तस्तत्कुल्या मपिपरशुरामः शमयति॥१७३॥ अनेकजानिः साधारणो यथा। स्नातातिष्ठतिकुन्तलेश्वरसुतावारोङ्गराजस्वसु- र्द्यूतैरात्रिरियञ्जिताकमलयादेवीप्रसाद्याद्यच। इत्य न्तः पुरसुन्दरीः प्रति मयाविज्ञायविज्ञापितेदेवेनाप्र- तिपत्तिमूढमनसाद्वित्राः स्थितन्नाडिकाः।१७४। अनन्यजा निरसाधारणोयथा। आविवाहसमयाद्गृहेवनेशैश वेतदनुयौवनेपुनः। स्वापहेतुरनुपासितोन्ययारामबा- हुरुपधानमेषते।१७५।अहंकारप्रधानोधीरोद्धतोयथा। च क्रंवामधुहाकृतान्तगृहिणीदत्ताग्रपञ्चाङ्गुलंवज्रंभूधरपक्ष- शोणितसुरापानोन्मदंवावृषा। शूलंवासुररक्तबिन्दु निचितङ्गृह्णातुशूलायुधोधृष्टद्युम्नमहन्निहन्मिसमरेक श्चित्परित्रायताम्।१७६। रत्युपचारप्रधानोधीरललितोय था। आधातुंविनयन्निरागसिनरेकुप्यन्तुनामेश्वरास्ते नस्वाशयशुद्धिरेवसुकराप्रायः प्रभूणाम्पुरः। मिथ्यामा

निनि मन्यसे यदितदानित्यम्मनोवर्त्तिनी ध्याता तामरसा
क्षि ! चित्रफलकेकावान्वदन्यामया ।१७७। उपशमप्रधा
नोधीरप्रशान्तोयथा । कुलममलिनंभद्रामूर्त्तिर्मतिः श्रुति
शालिनी भुजबलमलंस्फीतालक्ष्मीः प्रभुत्वमखण्डित-
म् । प्रकृतिसुभगाह्येतेभावामदस्यचहेतवोव्रजतिपुरुषो
यैरुन्मादन्तएवनवाङ्कुशाः ।१७८। विश्रब्धोदारकर्माधी-
रोदात्तः सयथा । कपोलेजानक्याः करिकलभदन्तद्युति-
मपिस्मरस्मेरङ्गण्डोडुमरपुलकंवक्त्रकमलम् । मुहुः प-
श्यञ्शृण्वन्व्रजनिचरसेनाकलकलञ्जटाजूटग्रन्थिन्द्रढयति-
रघूणांपरिवृढः ॥१७९॥ कैतवप्रधानः शठोयथा । दृष्ट्वै
कासनसङ्गतेप्रियतमेपश्चादुपेत्यादरादेकस्यानयनेनिमी
ल्यविहितक्रीडानुबन्धच्छलः । ईषद्वक्रितकन्धरः सपुल
कः प्रेमोल्लसन्मानसामन्तर्हासलसत्कपोलफलकान्धूर्त्तो
ऽपराञ्चुम्बति ।१८०। कृतापराधोप्यविलक्षोधृष्टोयथा ।
शतंवारानुक्तः प्रियसखि वचोभिः सपरुषैः सहस्रन्नि
र्द्धूतः पदनिपतितः पार्ष्णिहतिभिः । कियत्कृत्वोबद्धः
पुनरिहनवेद्मिभ्रुकुटयस्तथापिक्लिश्यन्मांक्षणमपिनधृ-
ष्टोविरमति ।१८१। हृदयङ्गमप्रवृत्तिरनुकूलोयथा । मुञ्च
कोपमनिमित्तकोपने ! सन्ध्ययाप्रणमितोस्मिनान्यया ।
किन्नवेत्सिसहधर्मचारिणञ्चक्रवाकसमवृत्तिमात्मनः ।१८२
औपरोधिकप्रवृत्तिर्दक्षिणोयथा । अनेनकल्याणि!मृणाल
कोमलंव्रतेनगात्रंग्लपयस्यकारणम् । प्रसादमाकाङ्क्षति
यस्तवोत्सुकः सकिन्त्वयादासजनः प्रसाद्यते ।१८३। नायि

कागुणेषुसर्वगुणसम्पद्योगादुत्तमायथा । हसिआइं समंसलकोमलाइंवीसंभकोमलंवअणम् । सब्भाव कोमलपुलाइअवचणमिमोसुमहिलाणम् ।१८४। पादोनगुणसंपद्योगान्मध्यमायथा । णिअदाइअदंसणुक्खित्तपहिअअण्णेणवव्वसुपहेण । गहवइइवहुआदुल्लङ्घिवाउराहअइहग्गामो ।१८५। अर्द्धगुणसंपद्योगादधमायथा । तङ्किरखणाविरज्जसितङ्किरउवहससिअलमहिलाओ । एहेहिंवारवालिइअंसूमइंमलंसमुप्पिसिमो ।१८६। वयः कौशलाभ्यामसम्पूर्णामुग्धायथा । सहिआहिम्भण्णमाणाथणएलग्गंकुसुम्भपुप्फन्ति । मुद्धवहुआहसिज्जइपप्फोडन्तीणहवआइम् ।१८७। वयसापरिपूर्णामुग्धायथा । पढिवक्खमण्णुउडेलावण्णउडेअण्णङ्गअकुम्भे । पुरिससअहिअअधरिएकीसथणन्तीथणेवहसि ।१८८। वयः कौशलाभ्यांसंपूर्णाप्रगल्भायथा । खिण्णस्सठवेइउपइणोगिम्हावरण्हरमिअस्स । ओल्लङ्गलन्तउप्फंण्हाणसुअन्धञ्चिउरभारम् ।१८९। यत्नापनेयमानाधीरायथा । णवितहअणालवन्तीहिअअन्दूमेइमाणिणीहिअअम् ॥ अहदूरेविअम्हिअगरुअरोसमज्झत्थभणिएहिम् ।१९०। अयत्नापनेयमानाऽधीरायथा । अवलम्बिअमाणपररंमुहीअएतस्समाणिणिपिअस्स । पुट्ठिपुलउग्गामोतुहकहेइसमुहट्ठिअंहिअअम् ।१९१। आत्मीयास्वायथा । घरिणीएमहाणसकम्मलग्गमसिमइलेणहत्थेण । छित्तंमुहंहसिज्जइचन्दावत्थङ्गअपइण ।१९२। परकीयान्यदी

यायथा । वइविवरणिग्गअदलोएरण्णोसाहइद्यतरुणा-
णम् । एत्थघरेहलिअवहूएद्दहमेत्तत्थणीवसइ ।१९३ पा-
णिगृहीताऊढायथा । वलत्तणदुल्ललिआएअज्जअणज्ज
ङ्कअंणंववहूए । भाआमिघरेएआइणित्तिणित्तोपईरु-
द्धो ।१९४ कुमारीअनूढायथा । कस्सकरोबहुपुण्यफलेकत-
रुणोतुहंणिसम्मिहिइ । थणपरिणाहेचम्महणिहाणा-
कलसेबव्वपारोहो ।१९५ प्रथमोढाज्येष्ठायथा । उपण-
अंपढमपिआएरक्खिनकामोविमधुरेहिम् । छेअवरो-
विणलिज्जइअहिणववहुआविलासेहिम् ।१९६ पश्चादू-
ढाकनीयसीयथा । उठ्ठन्तमहारम्भेथणएदठ्ठूणमु
द्धवहुआए । ओसिण्णकवोलाएणीससिअंपढमघरि-
णीए ।१९७ अहङ्कारर्द्धिरुद्धतायथा । अण्णमहिलाप-
सङ्गन्दैदेक्ककरेसुअम्हदरअस्स । पुरिसाएकन्तरसाणहु
दोसगुणेविआणन्ति ।१९८ गूढमानर्द्धिरुदात्तायथा । जा-
णाइजाणावेउंअणुणअविहीणरीअमाणपरिसेसम् ।
रइविक्कमंसिविणआवलम्बणंसच्चिअपङ्कुणन्ती ॥१९९
निर्वाणमानाशान्तायथा । जइआपिओणदीसइभ-
णहहलाकस्सकीरएमाणो । अहदिउम्मिविमाणोतात-
स्सपिअत्तणङ्कंसो ॥२००॥ श्लाघनीयमानाललितायथा ।
हसिएहिंउआलम्भाअच्चुवआरेहिरूसिअद्याइ । अंसू
हिम्भण्डाइएसोमण्णेसुमहिलाणम् ॥ २०१ ॥ अनि-
यतानेकोपभोग्यासामान्यायथा । कडूएधूमङ्घारेअ-
द्भुतणमग्गिणोसमप्पिहिइ । मुहकमलचुम्बणलेहलम्मि

पासठ्ठिएदिअरे ॥२०२॥ पत्यन्तरम्प्राप्तापुनर्भूर्यथा। तहसाजाणइपावालोएपछण्णमविणअङ्काउम्। जहपढमञ्चिअसच्चिअलिइमज्झंचरित्तवत्तीण ॥२०३॥ कलाचतुःषष्टिविद्गणिकायथा। सच्छन्दरमणदंसणरसवड्ढिअगरुअवम्महविलासम्। सुविअड्ढसवेवितआरमिअङ्कोवण्णिउन्तरइ ॥ २०४ ॥ रूपयौवनमात्रोपजीविनी रूपाजीवायथा। अयमेवदह्यमानस्मरनिर्गतधूमवर्त्तिकाकारः। चिकुरभरस्तव सुन्दरि! कामिजनङ्किङ्करीकुरुते ॥ २०५ ॥ कुट्टमितादीनाङ्कर्त्रीविलासिनीयथा। सामण्णसुन्दरीणंबिब्भममावहइअविणओच्चेअ। धूमच्चिअपज्जलिआणवहुमओसुरहिदारूण ॥ २०६ ॥ यथोक्तलक्षणासुखण्डितायथा। पच्चसागअणुरवाअवत्तन्तइलोअलोअणणन्दम्। अण्णत्थखविअसव्वरिणहभूसणदिणवइणमोदे ॥२०७॥ कलहान्तरितायथा। अहसोविलक्खहिअओमएअहव्वाइअगणिअप्पणओ। परवज्जणच्चिरीहिन्तुम्हेंहिउवेक्खिओजन्तो ॥ २०८ ॥ विप्रलब्धायथा। अहसातहिन्तहिञ्चिअवाणीरवणम्मिचुक्कसङ्केओ। तुहदंसणंविअग्गइपब्भट्ठणिहणठाणंव ॥ २०९ ॥ वासकसज्जायथा। एहिइपिओत्तिणिमिंसंवजग्गिअञ्जामिणीअपढमद्धम्। सेसंसतापयरव्वसाएवरिसंववोलीणम् ॥ २१० ॥ स्वाधीनपतिकायथा। सालोएच्चिअसूरेघरिणीघरसामिअस्सघेत्तूण। णेच्छन्तस्सविपाएधुअइहसन्तीहसन्तस्स ॥ २११ ॥ अभिसा

रिकायथा । गम्मिहिसितस्सपासम्माझूरसुतरुणिवड्ढउमिअङ्को । दुद्धेदुद्धम्मिवचन्दिआएकोपेच्छाइमुहन्ते ॥ २१२ ॥ प्रोषितभर्तृकायथा । गिम्हेदवग्गिमंसिमइलिआंइदीसन्तिविंझसिहराइम् । आसउम्पउत्थपइएणहोन्तिणवपाउसब्भाइम् ।२१३ विरहोत्कण्ठितायथा। अस्मिन्वर्षम्महेनवर्त्ततइदंयत्कामदेवोत्सवेस्थेयम्पुत्रि!निरन्नयातदधुनाकिञ्चिन्मुखेदीयताम् । इत्युक्तंजरतीजनेनकथमप्यध्वन्यवध्वा ततः पर्यस्तेऽहनिकल्पितश्चकवलोधौतश्चधाराम्बुभिः ॥ २१४॥ हीनपात्रेषुशकारोयथा । पलिच्चलेलंणवदशाकलाअम्पावालंअशुत्तशब्देणछत्रम् । मंशञ्चखादन्तुहओठ्ठञ्चकाहिचुकुश्चुकुश्चुष्कुचुकुशुकुन्ति ।२१५ ललकोयथा। कम्बलिवाण्णिएकत्तिकुट्टम्मलदन्तिधिद्धितुद्धिएमइवेआलसि । लत्तिंसोवरिजग्गिरिक्कतुमंसहिङ्खराविदुपोप्फलिणलोकीसिणआगसि ॥ २१६ ॥ अमात्यादिरासन्नार्हः पाखण्डादिर्वापीठमर्दः । तयोरमात्येषुमाल्यवान्यथा। हावत्साः खरदूषणत्रिशिरसोवध्याः स्थ पापस्यमेहाहावत्सविभीषणत्वमपिमेकार्येणहेयः स्थितः । हामद्वत्सलवत्सरावणमहत्पश्यामितेसङ्कटंवत्सेनैकशिहाहतासिनचिरंत्रीन्पुत्रकान्द्रक्ष्यसि ॥ २१७ ॥ पाखण्डेषुभैरवानन्दोयथा । दंसेमितम्पिससिणंवसुहावइण्णन्थभेमितस्सविरदस्सगईणहद्धे । आणेमिजक्खसुरसिद्धगणङ्गणाओतंणत्थिभूयिवलयेमहजंणसज्जम् ॥२१८॥

वैहासिकः क्रीडनकोविश्वास्यश्चविदूषकः ।१९५। यथा। पु
ल्लुक्करङ्कलमकूरसमंवहन्तिजेसिन्दुवारविडआमहवल्ल-
हादे । जंगालितस्समहिसीदहिणेसरिछारुच्चन्तिमुद्धवि-
अइल्लपसूणपुज्जा ॥२१९॥ मान्यः कलत्रवान्भुक्तविभवो
गुणवान्विटः ॥१९६॥ सयथा। शकारकिम्प्रार्थनयाप्रावारे
णमिषेणवा। अकार्यवर्जम्मेब्रूहिकिमभीष्टङ्करोमिते २२०॥
धात्रेयकादिश्चेष्टोयथा। चन्द्रापीडोथसञ्जातपीडः काद
म्बरीम्प्रति। प्राहिणोत्स्रस्तकेयूरः केयूरकमुपस्थितम्
॥२२१॥ पताकासु। स्वात्मोपयोगिन्यन्योपयोगिन्यनुप
योगिनी। पताकेत्यापताकेतिप्रकरीतिप्रकीर्त्यते॥१९७॥ता
सुपताकाहनूमान्यथा। दिष्ट्यासोयम्महाबाहुरञ्जनानन्द
वर्द्धनः। यस्यवीर्येणकृतिनोवयञ्चभुवनानिच ॥२२२॥ आ
पताकाप्रकर्यौमारीचजटायुषौयथा ॥ रक्षसामृगरूपेण
रञ्जयित्वासराघवौ। जहारसीताम्पक्षीन्द्रप्रवासक्षणवि
घ्नितः ॥२२३॥ सहजापूर्वजागन्तुः सखीहत्रिविधोच्यते
॥१९८॥ तासुलवङ्गिकादिः सहजायथा। उज्ज्वलालोकया
स्निग्धात्वयात्यक्तामराजते। मलीमसमुखीवर्त्तिः प्रदी-
पशिखयायथा ॥ २२४ ॥ कामन्दक्यादिः पूर्वजायथा।
तथाविनयनम्रापिमयामालत्युपायतः। नीताकतिप-
याहोभिः सखीविस्रम्भसेव्यताम् ॥ २२५ ॥ त्रिजटादि
रागन्तुर्यथा। जाणहसिणेहमणिअम्मारअणिरित्तिमे-
जुउछसुवअणम्। उज्जाणंमिवणिम्मिअंजंसुरहिंतेल-
आणघेप्पइकुसुमम् ॥ २२६ ॥ नायकगुणेषु महा-

कुलीनत्वंस्पुंसोयथा । वासिष्ठैः सुकृतोद्भवोध्व-
रशतैरस्त्यग्निकुण्डोद्भवोभूपालः परमारइत्यधिपतिः
सप्ताब्धिकाञ्चेर्भुवः । अद्याप्यद्भुतहर्षगद्गदगिरोगाय-
न्तियस्योद्भटंविश्वामित्रजयोर्जितस्यभुजयो र्विस्फूर्जितं
गुर्ज्जराः ॥ २२७ ॥ औदार्यंयथा । दिङ्मातङ्गघटा-
विभक्तचतुराघाटामहीसाध्यतेसिद्धासापिवदन्तएवहि
वयरोमाञ्चितः पश्यत । विप्रायप्रतिपाद्यतेकिमपरं
रामायतस्मैनमोयस्मादाविरभूत्कथाद्भुतमिदंयन्नैवचा
स्तङ्गतम् ॥ २२८ ॥ महाभाग्यंयथा । दोर्निष्पेषवि-
शीर्णवज्रशकल प्रत्युप्तरूढव्रणग्रन्थ्युद्भासिनिमग्नमोघ-
मघवन्मातङ्गदन्तोद्यमे । भर्त्तुर्नन्दनदेवताविरचितस्र-
ग्दाम्निभूमेः सुतावीरश्रीरिवतस्यवक्षसिजगद्वीरस्य-
विश्राम्यतु ॥ २२९ ॥ कृतज्ञतायथा । कृतककुपितैर्बा
ष्पाम्भोभिः सदैन्यविलोकितैर्वनमसिगतायस्यप्रीत्या
धृतापितथात्वया । नवजलधरश्यामाः पश्यन्दिशोभ
वतींविनाकठिनहृदयोजीवत्येवप्रियेसतवप्रियः ॥२३०॥
रूपसम्पद्यथा । व्यूढोरस्कोवृषस्कन्धः शालप्रांशुर्महा-
भुजः । आत्मकर्मक्षमंदेहंक्षात्रोधर्मइवाश्रितः ॥ २३१ ॥
यौवनसंपद्यथा । महोक्षतांवत्सतरःस्पृशन्निवद्विपेन्द्रभ
वंकलभः श्रयन्निव । रघुःक्रमाद्यौवनभिन्नशैशवः पुपो
षगम्भीरमनोहरंवपुः ॥ २३२ ॥ वैदग्ध्यसम्पद्यथा ।
कोयम्भामिनिभूषणङ्कितवतेशोणः कथंकुङ्कुमात्कू-
र्पासान्तरितः प्रियेविनिमयः पश्यापरंक्वास्तिमे । प-

श्यामीत्यभिधायसान्द्रपुलकौमृद्नन्मृडान्याः स्तनौह-
स्तेनप्रतिनिर्जितेन्दुरवताद्द्यूतेहसन्वोहरः ॥२३३॥ शी
लसम्पद्यथा । कात्वंशुभेकस्यपरिग्रहोवाकिंवामदभ्या
गमकारणन्ते । आचक्ष्वमत्वावशिनांरघूणाम्मनः पर
स्त्रीविमुखप्रवृत्ति ॥ २३४॥ सौभाग्यसम्पद्यथा । असौ-
विद्याधारः शिशुरपिविनिर्गत्यभवनादिहायातः सम्प्र-
त्यविकलशरच्चन्द्रमधुरः । यदालोकस्थानेभवतिपुनरु-
न्मादतरलैः कटाक्षैर्नारीणाङ्कुवलयितवातायनमि-
व ॥ २३५ ॥ मानितायथा । यदात्थकामम्भवतासयाच्य
तामितिक्षमन्नैतदनल्पचेतसाम् । कथम्प्रसह्याहरणै-
षिणाम्प्रियाः परानुवृत्त्यामलिनीकृताः श्रियः ॥ २३६ ॥
उदारवाक्यत्वंयथा । ख्याताएववयञ्जगत्सुचरितैवा-
ग्भिः किमाख्यायतेसंयत्तोभवशक्तिरस्तिभवतः सत्य-
म्मनुष्योभवान् । शस्त्रैरव्यवधीयमानयशसः प्रायोव-
यन्तेषुचेत्प्रायस्तेननुसन्तितेपिगिरयोयैर्वानराः शस्त्रि-
णः ॥ २३७ ॥ स्थिरानुरागितायथा । ततः कैरप्युक्तेपरि-
णयविधौकाष्ठमुनिभिः पुराणैरातङ्कग्लपितहृदयेनक्षि-
तिभृता । विनावाचन्नैतत्क्षममितिनिधायाननमधःपत-
द्बाष्पाम्भोभिर्निखिलमिवदत्तंप्रतिवचः ॥ २३८॥ नायि-
कागुणेषुस्त्रियामहाकुलीनतायथा । मानुषीषुकथंबा-
स्यादस्यरूपस्यसम्भवः । नप्रभातरलञ्ज्योतिरुदेतिवसु-
धातलात् ॥ २३९ ॥ औदार्यंयथा । भ्रूभेदेसहसाकृतेपिव
दनन्नीतंपरान्नम्र तामीषन्माम्प्रतिभेदकारिहसितन्नोक्तं

वचोनिष्ठुरम् अन्तर्वाष्पजलीकृतम्प्रभुतयाचक्षुर्नविस्फारि
तङ्कोपश्चप्रकटीकृतोदयितयामुक्तश्चनप्रश्रयः ॥ २४० ॥ म
हाभाग्यंयथा तान्नारदः कामचरःकदाचित्कन्यांकिलप्रेक्ष्य
पितुः समीपे । समादिदेशैकवधूम्भवित्रीम्प्रेम्णाशरीरा-
र्द्धहरांहरस्य ॥ २४१ ॥ कृतज्ञतायथा । परिससरिस-
न्तुहइमंकवरससरिसङ्कम्निसाअखइणा । कहआ-
चिन्तिज्जम्म हिलासरिसन्ननसम्पणइमेमरणम् ॥ २४२ ॥
रूपसम्पद्यथा । आभरणस्याभरणम्प्रसाधनविधेः प्र
साधनविशेषः । उपमानस्यापिसखेप्रत्युपमानंवपुस्त-
स्याः ॥२४३॥ यौवनसम्पद्यथा । उन्मीलितंतूलिकयेवचि
त्रंसूर्यांशुभिर्भिन्नमिवारविन्दम् । बभूवतस्याश्चतुरस्रशो
भिनवपुर्विभक्तन्नवयौवनेन ॥ २४४ ॥ वैदग्ध्यसम्पद्यथा ।
एकत्रासनसङ्गतिः परिहृताप्रत्युद्गमादूरतस्ताम्बूला
नयनच्छलेनरभसाश्लेषोपिसंविहितः । आलापोपिन-
मिश्रितः परिजनंव्यापारयन्त्यान्तिकेकान्तम्प्रत्युपचा
रश्चतुरयाकोपः कृतार्थीकृतः ॥ २४५ ॥ शीलसम्पद्य-
था । चतुरघरिणीपिअदंसणाअबालाप उत्थवइआअ
असइसअण आअणगखण्डअंशीलम् ॥ २४६ ॥ सौ-
भाग्यसम्पद्यथा । सञ्चारिणीदीपशिखेवरात्रौयंयंव्य
तीयायपतिंवरासा । नरेन्द्रमार्गाट्टइवप्रपेदेविवर्णभावं
सससूमिपालः ॥२४७॥ मानितायथा । शैलात्मजापिपि
तुरुच्छिरसोभिलाषंव्यर्थंसमर्थ्यललितंवपुरात्मनश्च । स-
ख्योः समक्षमितिचाधिकजानलज्जाशून्याजगामभवना

भिमुखंकथञ्चित् ॥ २४८ ॥ उदारवाक्यत्वंयथा । यथाश्रुतंवेदविदांवर ! त्वयाजनोयमुच्चैः पदलङ्घनोत्सुकः । तपःकिलेदन्तदवाप्तिसाधनम्मनोरथानामगतिर्नविद्यते ॥ २४९ ॥ स्थिरानुरागितायथा । अलंविवादेन यथाश्रुतन्त्वयातथाविधस्तावदशेषमस्तुसः । ममात्रभावैकरसगमनः स्थिरंनकामवृत्तिर्वचनीयमीक्षते ॥ २५० ॥ पाकभक्तिष्वादावस्वाद्वन्तेस्वादुमृद्वीकापाकोयथा । प्राक्कामन्दहताकृतः परिभवोयेनाथसन्ध्यानतौसेर्ष्यावोषतुचण्डिकाचरणयोस्तंपातयन्तीपतिम् । कुर्वन्त्याभ्यधिकंकृतेप्रतिकृतम्मुक्तेनमौलौमुहुर्बार्ष्पेणाद्वतकज्जलेव लिखितंलक्ष्मेवचन्द्रे यथा ॥२५१॥ आद्यन्तयोःस्वादुनारिकेलीरीतिपाकोयथा । जहइच्छातहरमिअज्जाआपत्तापइङ्गआधूआ । घरसामिअस्सअज्जविसोकोऊहछाइअइम् ॥२५२॥ आदिमध्यान्तेषुस्वादुस्वादुतरस्वादुतममित्याम्रपाकंयथा । शापादसिप्रतिहतास्मृतिलोपरूक्षेभर्त्तुर्व्यपेततमसिप्रभुनातवैव । छायानमूर्छतिमलोपहतप्रसादेशुद्धेतुदर्प्पणतलेसुलभावकाशा ॥ २५३ ॥ यन्नापैतिनचातिशोभतेतन्नीलीरागंयथा । हित्वासीतान्दशमुखरिपुर्नोपयेमेयदन्यान्तस्याएवप्रतिकृतिसखोयत्क्रतूनाजहार । वृत्तान्तेनश्रवणविषयप्रापिनातेनभर्त्तुः सादुर्वारव्यथमपिपरित्यागदुःखंविषेहे ॥ २५४॥ यदपेतिनचशोभतेचतत्कुसुम्भरागंयथा । बहुवल्लहस्सनाहोइवल्लहाकहविपउच दिहिअहाइँ । सकिअझडथम्मगाइ कन्तोमिट्टच्छञ्चबहु-

अच ॥ २५५ ॥ यन्नापैत्यतिचशोभतेतन्मञ्जिष्ठारागंय-
था । वेवइ जस्स सबिडिअन्तलिअम्महइ छल्लआइअ-
त्थणअलसम् । पेम्मसहवविमुहिअंवाओवासगममु-
अंवामद्धम् ॥ २५६ ॥ गूढव्यलीकमन्तर्व्याजंयथा । प्र-
त्यग्रोज्झितगोकुलस्यशयनादुत्स्वप्नमूढस्यमेसागोत्रस्ख
लनादपैतुचदिवाराधेतिभीरोरिति । रात्रावस्वपतोदि
वाचविजनेनामेतिचाभ्यस्यताराधाप्रस्मरतः श्रियंरम-
यतः खेदोहरेः पातुवः ॥ २५७ ॥ अगूढव्यलीकंबहि
र्व्याजंयथा । चक्षुर्यस्यतवाननादपगतन्नाभूत्क्वचिन्निर्वृ
तंयेनैषासततन्त्वदेकशयनंवक्षस्थलीकल्पिता । येनोक्ता
सिबिनात्वयाममजगच्छून्यंक्षणाज्जायतेसोयन्दम्भधृत
व्रतः प्रियतमः कर्तुङ्किमभ्युद्यतः ॥२५८॥ अव्यलीकनिर्व्या
जंयथा । किङ्कण्ठेशिथिलीकृतोभुजलतापाशः प्रमादान्म
या निद्रोच्छेदविवर्त्तनेष्वभिमुखन्नाद्यासिसंभाषिता । अ
न्यस्त्रीजनसङ्कथालघुरहंस्वप्नेत्वया वीक्षितोदोषम्प
श्यसिकिम्प्रियेपरिजनोपालम्भयोग्येमयि ॥ २५९ ॥ ध-
र्मानुबन्धिधर्मोदर्कंयथा । अथसविषयव्यावृत्तात्मायथा
विधिसूनवेनृपतिककुदन्दत्त्वायूनेसितातपवारणम् । मु
निवनतरुच्छायान्देव्यातयासहशिश्रियेगलितवयसामि
क्ष्वाकूणामिदंहिकुलव्रतम् ॥२६०॥ अर्थानुबन्ध्यर्थोदर्कंय
था । भूत्वाचिरायचतुरन्तमहीस पत्नीदौष्यन्तिमप्रतिरथ
न्तनयंप्रसूय । तत्सन्निवेशितभरेणसहैवभर्त्रा[1] शान्तेक
रिष्यसिपदम्पुनराश्रमेस्मिन् ॥२६१॥ यत्पुनःकाममेवानु

१ भर्त्रा तदर्पित कुटुम्बभरेणसार्द्धमिति २ पुस्तके

बध्नातितत्कामोदर्कं यथा । अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यद्विश्रामो हृदयस्य यत्र जरसा यस्मिन्महार्यो रसः । कालेनावरणात्ययात्परिणते यत्स्नेहसारे स्थितम्भद्रन्तस्य सुमानुषस्य कथमप्येकहि तत्प्रार्थ्यते ॥२६३॥ "नानालङ्कारसंसृष्टेः प्रकाराश्च रसोक्तय" इत्युक्तन्तत्रालंकारसंसृष्टेरित्येव वक्तव्ये नानाग्रहणं गुणरसानामुपसंग्रहार्थम् । तेषामपि हि काव्यशोभाकरत्वेनालङ्कारत्वात् । यदाह । काव्यशोभाकरान्धर्मानलंकारान्प्रचक्षते । ते चाद्यापि विकल्प्यन्ते कस्तान्कार्त्स्न्येन वक्ष्यति ॥१८९॥ काश्चिन्मार्गविभागार्थमुक्ताः प्रागप्यलंक्रियाः । साधारणमलंकारजातमन्यत्प्रदर्श्यते ॥१९९॥ तत्र काव्यशोभाकरानित्यनेन श्लेषोपमादिवत्तद्गुणरसभावतदाभासप्रशमादीनप्यनुगृह्णाति । मार्गविभागकृतङ्गुणानामलंक्रियोपदेशेन श्लेषादीनां गुणत्वमिवालङ्कारत्वमपि ज्ञापयति । श्लेषः प्रसादः समता माधुर्यं सुकुमारता । अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः ॥२००॥ इति वैदर्भमार्गस्य प्राणा दशगुणाः स्मृताः । तेषां विपर्ययः प्रयोगौडवर्त्मनि लक्ष्यते ॥२०१॥ इति श्लेषादीनान्दशानामेव मार्गप्रतिभाकारितां ब्रुवन् काव्यशोभाकरत्वेन गुणान्तराणामप्यलङ्कारत्वमुपकल्पयति । तदाह "कस्तान्कार्त्स्न्येन वक्ष्यती"ति । युक्तमिदमुक्तमयुक्तन्त्विदमुक्तम् । रसानामलङ्कारतेति तेषां गुणानामिवालङ्कारव्यपदेशाभावात् । नायुक्तम् । युक्तोत्कर्षाणामूर्जस्विरसवत्प्रेयानामुपदेशेन । तद्यथा । प्रेयः प्रियतराख्या

नंरसवद्रसपेशलम् । ऊर्जस्विरूढाहंकारयुक्तोत्कर्षवचतत्त्रयम् । तत्रोर्जस्विरूढाङ्कारमित्येनेनात्मविशेषनिष्ठस्योत्कृष्टादृष्टजन्मनोनेकजन्मानुभवसंस्काराहितद्रढिम्नः सङ्ग्रामेणसम्पदुत्पातातिशयहेतोरलंकारविशेषस्योपसंग्रहादहङ्काराभिमानश्रृङ्गारापरनाम्नोरसस्यमानमयविकारूपेणाभिमानिनाम्मनसिजाग्रतः पराङ्कोटिमुपवर्णयति । रसवद्रसपेशलमित्यनेनविभानुभावव्यभिचारिसात्त्विकसंयोगाद्रसनिष्पत्तिरितिरत्यादिरूपेणानेकधाविर्भवतोऽभिवर्द्धमानस्यपरप्रकर्षगामिनः श्रृङ्गारस्यमध्यमावस्थांसूचयति । प्रेयतराख्यानमित्यनेनसमस्तभावमूर्द्धाभिषिक्तारतेः परप्रकर्षाधिगमाद्भावनाभिगमेभावरूपतामुल्लङ्घ्य प्रेमरूपेणपरिणतायामुपादानाद्भावान्तराणामपिपरप्रकर्षाधिगमेरसरूपेणपरिणतिरिति ज्ञापयन्नहंकारस्योत्तरांकोटिमुपलक्षयति । सर्वेषामपिहिरत्यादिप्रकर्षाणांरतिप्रियो,रणप्रियः, परिहासप्रियो,ऽमर्षप्रियइतिप्रेमण्येवपर्यवसानम्भवति । युक्तोत्कर्षंचतत्त्रयमित्यनेनायुक्तोत्कर्षाणांत्रयाणामप्यूर्जस्विप्रभृतीनाङ्गुणत्वमेवनालङ्कारत्वमित्यवस्थापयति । तथाहि । और्जित्यम्भाविकम्प्रेयइतिगुणेषुभण्यतेकुतः पुनरिदमेकदोर्ज्जस्विरसवत्प्रेयसामलङ्कारत्वमुच्यते ॥ भूमनिन्दाप्रशंसासुनित्ययोगेतिशायने । संसर्गेऽस्तिविवक्षायाम्भवन्तिमतुबादयः । यथागोमान्देशो, वाचालोबटु, वाग्मीविपश्चित्, फलिनोवृक्षा; बलवान्मन्दो,दण्डी,

१ संस्क[illegible] २ पाठः २ पुस्तके ।

शोभती, शोणेति । तत्रोर्ज्जस्विरसवतोरलङ्कारत्वविवक्षायामतिशायनेवा, भूम्निवामतुबर्थीयः १ । गुणत्वविवक्षायान्तुप्रशंसानित्ययोगयोरितिद्रष्टव्यम् । नित्योहिकाव्ये गुणयोगइवरसादियोगः । गुणवतोरसवतश्चनिश्चितैवाख्यप्रशंसा । संसर्गस्तुगुणानामवश्यमुपादानेषु निन्दापुनर्दोषहानेर्नवितरति । गुणेषुप्रेयइतिरूपाभेदात्कथमलङ्कारत्वेतदुत्कर्षप्रतीतिः । यथा । युधिष्ठिरः श्रेष्ठतमः कुरूणामिति । तत्रातिशायिगुणान्तरेणतदवगतिरितिचेत्, इहापियुक्तोत्कर्षश्चतत्त्रयमितिवाक्यान्तरेणभविष्यति । नचातिशायिकाः स्वार्थातिरिक्तङ्किमपिब्रुवतेऽपितुप्रकृत्युपात्तमेवप्रकर्षादिकङ्गमयन्ति । स्वार्थिकेष्वेतेविधीयन्ते । एवमवस्थापितेगुणरसानामलङ्कारत्वे षट्प्रकारको रसालङ्कारसंकरः सम्भवति । गुणसंकरो, ऽलंकारसंकरो, गुणालंकारसंकरो, रससङ्करो, रसगुणसंकरो, रसालङ्कारसंकरश्चेति । नन्वत्रगुणानांसङ्करव्यवहारोनोपपद्यतेत्रहुष्वपिगुणेषुगुणवदित्येवव्यपदेशात् । मैवम् ॥ त्रिविधागुणाः । शब्दगुणा, अर्थगुणा, दोषगुणाश्च । तेतुप्रत्येकन्द्विधा । उल्लेखवन्तोनिरुल्लेखाश्च । तत्रशब्दगुणेषुसमाधिमाधुर्य्योदार्यगाम्भीर्यादयः सोल्लेखाः । श्लेषप्रसादसमतासौकुमार्यादयोनिरुल्लेखाः । अर्थगुणेषुप्रसादरीतिकान्त्यादयः । अर्थव्यक्तिसौक्ष्म्यगाम्भीर्यसंमितत्वादयोनिरुल्लेखाः । दोषगुणेषुग्राम्यपुनरुक्तापार्थान्यार्थादयः । शब्दहीनसंभ्रमापक्रमविसंध्यादयोनिरु

१ मत्वर्थीयइतिपुस्तकान्तरे

ल्लेखाः । तत्रसजातीयानांसोल्लेखानामेवंविजातीयाना न्तुनिरुल्लेखानामपिसङ्करव्यवहारः प्रवर्त्तते । सजाती यानांशब्दगुणेषुसमाध्यादीनांयथा । णवपल्लवेसुलोलइ घोलइविलवेसुवलइसिहरेसु । थवइथवएसुअमहावसन्त लच्छीअसोअस्स ॥ अत्रान्यधर्माणामन्यत्रारोपणंसमा धिः, पृथक्पदतामाधुर्यं,बन्धविकटत्वमुदारता,ध्वनिम त्ता गाम्भीर्यमिति सजातीयाः सङ्कीर्यन्ते । यतोवसन्तल क्ष्मीरशोकस्यइतिपदयोः शब्दध्वनिरपिपरिस्फुरति । य थाकस्यचिदशोकस्यमानिनोङ्गेषुप्रियाङ्गनासविलासउच्चे ष्टतेतथाऽस्येयमिति ॥ २६३ ॥ अन्यार्थगुणेषुश्लेषा दीनांयथा । जनः पुण्यैर्यायाज्जलधिजलभावञ्जलमुच- स्तथावस्थंचैनन्निदधतुशुभे शुक्तिवदने । ततस्तांश्रे- योभिः परिणतिमसौविन्दतुयथारुचिन्तन्वन्पीनस्तनि हृदितवायंविलुठति ॥ अत्रसंविधानेसुसूत्रताश्लेषो, ऽर्थस्य प्राकट्यम्प्रसाद, उत्पत्त्यादिक्रियाक्रमोरीति, र्दीप्तरसत्वङ्कान्ति रित्यर्थगुणाः सजातीयाः सङ्कीर्यन्ते ॥ २६४ ॥ दोषगुणेषुश्रमादीनांयथा । हन्यतेसावरारो- हास्मरेणाकाण्डवैरिणा । हन्यतेचारुसर्वाङ्गीहन्यतेमञ्जु भाषिणी ॥ अत्रहन्यतइत्यमङ्गलार्थं,वरारोहेत्यश्लीलार्थं, हन्यतइतिपुनरुक्तं,चारुसर्वाङ्गीत्युक्तौवरारोहेतिव्यर्थम् । तएतेसजातीयाश्चत्वारोपिदोषगुणाः सङ्कीर्यमाणाः क- स्यचिदुन्मत्तभाषिणोऽनुकम्पाद्यतिशयविवक्षायामभ्यनु ज्ञायन्ते । यदाह । अनुकम्पाद्यतिशयोयदिकश्चिद्विवक्ष्य

ते। नदोषः पुनरुक्तादौप्रत्युतेयमलङ्क्रिया ॥ २०२॥ अथासजातीयानां शब्दगुणानामर्थगुणानाञ्च सङ्करोयथा। कोनाम मोदयतिनास्तमुपैतिकोवालोकोत्तरः पुनरयंसविताजगत्सु। यत्रोदयास्तमयभाजिरुचान्निधानेद्वेधाभवत्यहरितिक्षणदेतिकालः ॥ अत्रयावदर्थपदतासम्मितत्वं, सम्यग्बन्धविकटत्वमुदारता, विशेषणगुणयोग उदात्तत्वमिति शब्दगुणा उक्तार्थनिर्वहणं प्रौढि, रर्थप्राकट्यंप्रसादो, रूढाहङ्कारतौर्जित्यमित्यर्थगुणाःसङ्कीर्यन्ते ॥ २६५ ॥ शब्दगुणानांदोषगुणानाञ्चयथा। एह्येहिवत्सरघुनन्दनपूर्णचन्द्रचुम्बामिमूर्द्धनिचिरायपरिष्वजेत्वाम्। आरोप्यवाहृदिदिवानिशमुद्वहामिवन्देथवाचरणपुष्करकद्वयन्ते ॥ अत्रभावतोवाक्प्रतिपत्तिर्भाविकत्वं, प्रसिद्धार्थपदताप्रसादः, प्रियार्थपदोपादानम्प्रेय इति शब्दगुणा एह्येहीति पुनरुक्तं, वत्सेत्युक्त्वात्वत्पादाब्जद्वयंवन्दइतिविरुद्धं, मूर्ध्निचुम्बामिहृदिवहामीत्यादौवन्दइतिक्रियास्वनुपयोगात्, पूर्णचन्द्रेतिदर्शनादिक्रियोपयोगिव्यर्थंचेतिदोषगुणाःपरस्परंसङ्कीर्यन्ते। रसाक्षिप्तचित्तादौहिपुनरुक्तादयोनदुष्यन्ति ॥ २६६ ॥ अर्थगुणानान्दोषगुणानांयथा। किन्द्वारिदैवहतिके! सहकारकेणसंवर्द्धितेनविषपादपएषपापः। अस्मिन्मनागपिविकाशविकारभाजिभीमाभवन्तिमदनज्वरसन्निपाताः ॥ अत्रदीप्तरसत्वङ्कान्ति, रर्थप्रकाट्यंप्रसाद, उक्तार्थनिर्वहणम्प्रौढिरित्यर्थगुणा

दैवहतिकेङ्गिति, विषपादपोयम्पापहृत्यमङ्गलार्थंग्राम्यंकिमनेनसंवर्द्धितेन इत्यत्रमदनज्वरसन्निपाताङ्गत्यत्रचक्रत्यप्रयोजनादेर्विरहिणो द्रष्टुरित्यादेश्चाध्याहारादसम्पूर्णवाक्यतायामर्थव्यक्तिविपर्ययो, ऽस्मिन्निकाशविकारभाजीतिविकाशशब्दस्यपुष्प विषयस्यवृक्षेपिप्रयोगेऽवाचकत्वादसमर्थइतिदोषगुणा मिथः सङ्कीर्यन्ते । यतोरसाक्षेपात्परिहासलेशोत्थामङ्गलम् । प्रविशपिण्डीं द्वारं रक्षयेतिन्यायात्प्रसिद्धाध्याहारः । वदन्तिसवचाः क्षोभयन्तिङ्गइतिप्रयोगदर्शनादाधाराधेययोरभेदोपचारश्चविरुद्धलक्षणादिभिः प्रयुज्यमानोनदोषायेति ॥२६७॥ अथालङ्कारसङ्करः । सयद्यपिव्यक्ताव्यक्तोभयात्मतयातिलतण्डुलकादिभेदैः प्रधानाङ्गभावसमकक्षताभ्यामपुरस्तादुक्तः । तथापितेषांगुणादिसङ्करासाधारणत्वात्सकलप्रतिसाधारणः प्रकारउच्यते । सषोढा शब्दालङ्कारसंकरो, ऽर्थालङ्कारसंकर, उभयलंकारसंकरः, शब्दार्थालंकारसंकरः, शब्दोभयालंकारसंकरो, ऽर्थोभयालंकारसंकर इति । तेषुशब्दालंकारसंकरोयथा । हंसालीभयातरलासारासरसासरासरसारसरासा । अम्बररमारूढासारासरसासरासुसारसरासा । अत्रसंस्कृतप्राकृतभाषाश्लेषो गतप्रत्यागतभिन्न, पादावृत्तियमकं, वर्णानुप्रासश्चेतिचत्वारः ॥ २६८ ॥ शब्दालंकारसंकरोयथा । वासात्रस्थिततामूचूडवयसामामिमिः कूजितैर्दूरादप्यनुमीयमानवसतिर्ग्रामोयमन्तर्व्रणः । यत्रोद्दीप्तसृगाल१कूटविसरक्रव्यान्यनंघूर्णतेश

१ क्रुकूलकण्ठविसरदितिपुस्तकान्तरे

न्ध्यान्तोल्लसदच्छभल्लपटलच्छायाजटालंतमः । अत्रताम्
चूडत्रयसांकूजितैरित्यनुमानं, यत्तमोघूर्णतइतिज्ञापकहे
तुरुद्दीप्तसृगाल१ कण्ठविसरद्धू म्यान्धनमितिसंध्यान्तो
ल्लसदच्छभल्लपटलच्छायाजटालमिति चकारकहेतुर्जा-
यमानपदार्थस्वरूपाभिधानज्ञातिरित्यर्थालंकाराश्चत्वा
रोमिथः संकीर्यन्ते ।। २६९ ।। उभयालंकारसंकरोयथा ।
णहुणवरन्दीवसिहासारिच्छच्छरूपएहिपडिवक्खम् । कज्ज
लकज्जम्मिकअंउअरिभमन्तेहिंभमरेहिम् ।। अत्रचम्प-
कादीनाम्प्रदीपशिखाभिराकारकाङ्क्षितमुपमाविरहिणी
हृदयदाहोद्दामद्योतनार्थक्रियाभ्यांसाम्यंकज्जलपटला-
नामिवोपरिभ्रमरपटलानांमेलनान्मेलितञ्चम्पकदीपक
कलिकयोरिवभ्रमरकज्जलपटलयोरीपम्यादि सबन्धात्
समुच्चयइत्युभयालंकाराश्चत्वारोमिथःसंकीर्यन्ते ।।२७०।।
शब्दार्थालंकारसंकरोयथा । सर्वाशारुधिदग्धचीरधिरु
षासारङ्गबद्धक्रुधिक्षामक्ष्मारुहि मन्दमुन्मुधुलिहिस्वच्छ
न्दकुन्दद्रुहि । शुष्यत्स्रोतसितप्रभूमिरजसिज्वालायमा
नाम्भसिज्येष्ठेमासिखराकंतेजसिकथम्पान्थव्रजोजीवसि
अत्रावन्तिकारातिः पदमुद्राविभक्तिमुद्राअनुप्रासश्चेतिश
ब्दालङ्कारा जालिर्ज्ञापककारकहेतू चित्रहेतुश्चेतिअ-
र्थालङ्कारा मिथःसङ्कीर्यन्ते ।।२७१।। एवमुभयालंकारस
ङ्करोयथा । स्तोकंस्तोकममूभिरम्बरतलेतारा भिरस्तङ्गत
ङ्गच्छत्यस्तगिरेः शिरस्तदनुचच्छायादरिद्रः शशी । प्रत्या
सन्ननरोदयस्यतरणेर्विम्बारुणिम्नाततोमज्जिष्ठारसली-

हिनीदिगपिचप्राचीसमुन्मीलति ॥ अत्रसमुन्मीलतीति विभक्तिमुद्रास्तोकंस्तोकमस्तंगतंगच्छतीत्यादिरनुप्रास-श्चशब्दालङ्कारा हेतूपमासमाधिरनुक्रमः समुच्चयोक्ति श्चेतिउभयालङ्कारामिथः सङ्कीर्यन्ते ॥२७२॥ अर्थोभयालंकारसंकरोयथा । स्खंवस्ते कलविङ्ककण्ठमलिनंकादम्बिनीकम्बलचर्च्चापारयतीवददुंरकुलंकोलाहलैरुन्मदम् । गन्धम्मुञ्चतिसिक्तजालसुरभिंवर्षेणदग्धास्थलीदुर्लक्ष्योपिविभाव्यतेकमलिनीहासेनभासाम्पतिः ॥ अत्रजातिरनुमानंकारकज्ञापकहेतूचेत्यर्थालंकारा, रूपकोपमाहेतूपमोत्प्रेक्षोपमाचेतिउभयालंकारा मिथःसंकीर्यन्ते । एतेनगुणालंकारसंकरोपिव्याख्यातः । अतोयद्यपिगुणवत्येववाक्येसंकरयोगस्तथापिक्वचिद्गुणस्यप्राधान्यंक्वचिदलंकारस्येतिप्रधानाङ्गभावेनगुणालंकारयोःसंकरव्यवहारःप्रवर्त्तते ॥२७३॥ षषोढा । शब्दगुणप्रधानो,ऽर्थगुणप्रधानो, दोषालंकारप्रधानः, शब्दालंकारप्रधानो,ऽर्थालंकारप्रधान,उभयालंकारप्रधानश्चेति । तेषुशब्दगुणप्रधानोयथा । प्राप्तश्रीरेषकस्मात्पुनरपिमयितंमन्यखेदंविद्ध्याश्लिष्टामप्यस्यपूर्वामनलसमनसोनाप्यहंतर्कयामि । सेतुंबध्नात्विभूयः किमितिचसकलद्वीपनाथानुयात्तस्त्व-य्याशातैवितर्कीनितिविदधतिइवाभातिकम्पः पयोधेः ॥ अत्रहेतूत्प्रेक्षाभिधानेस्वयीत्यादीपदंविष्णोः स्वरूपाध्यासेनतद्भावापन्नौसमाधेः प्राधान्यमिहप्रतीयते । ननुचायमर्थस्यप्राकट्यात्प्रसादोर्थगुणः कस्माद्भवति । अ

स्मिन्नपितद्व्यपदेशेनशब्दशक्तेराधिक्यात्। ननुचत्वयी
त्येष इत्यस्येतियुष्मदेतदिदमदः कश्चिन्नविष्णुवाची
सकथंवर्णनीयेवस्तुनितमर्थमभिदध्यात्। उच्यते। सर्व
नामत्वेनैषांसर्ववाचित्वात् सर्वनामानिहिसर्वाभिधायी
न्यपिप्रकरणादिगम्यंविशेषमर्थं चब्रुवते। सचेह प्राप्त
श्रीरित्येवमादिभिरतिव्यक्तमेवाभिगम्यतेइति ॥२७४॥
अर्थगुणप्रधानोयथा। लक्ष्मीवशीकरणचूर्णसहोदरा-
णित्वत्पादपङ्कजरजांसिचिरंजयन्ति। यानिप्रणामसमि-
लितानिनृणांललाटेलुम्पतिदैवलिखितानिदुरक्षराणि॥
अत्रहेतुवाक्यउभयालंकारप्राधान्येनार्थप्रकट्यमर्थगुणः
प्रतीयते ॥२७५॥ दोषगुणप्रधानोयथा। येनापवि
द्धसलिलस्फुटनागसद्मादेवासुरैरमृतमम्बुनिधिर्मम-
न्थे। व्यावर्त्तनैरहिपतेरयमाहिताङ्कः खंव्यालिखन्ति
वविभातिसमन्दराद्रिः॥ अत्रव्यावर्त्तनैरहिपतेरयमा-
हिताङ्कइतिज्ञापकहेतोः खंव्यालिखन्निवेत्युत्प्रेक्षावय-
वाच्चदेवासुरैरितिनित्य वैराविवक्षायांबहुवचनम्। अ
मृतमम्बुनिधिर्मन्थइति द्विकर्मकेष्वपिमथिप्रभृतीना-
मुपसङ्ख्यानमित्यमृतशब्दाद्द्वितीयेतिदोषगुणयोः प्रा
धान्यम्प्रतीयते। ननुचात्राप्यर्थस्यप्राधान्यन्नभवतित-
द्विषयस्यज्ञापकहेतुनापहृतत्वात्। सोप्यर्थालंकारएव।
गुणालंकारयोश्चतुल्यकक्षतायामलंकारः प्रधानम्भवति-
नगुणः। गुणैर्हिगुणभूतैरेवालंकारा प्रायश्चारभ्यन्ते।
तद्यथा। अस्पृष्टादोषमात्राभिः समग्रगुणगुम्फिता।

विपञ्चीस्वरसौभाग्यावैदर्भीरीतिरिष्यते ॥ समस्तेत्युत्कटपदामोजकान्तिसमन्विताम् । गौडीयांतांविजानन्ति रीतिंरीतिविचक्षणाः ॥ आश्लिष्टश्लथभावाञ्चपुराणच्छायमाश्रिताम् । मधुरांसुकुमाराञ्चपाञ्चालींकवयो विदुः ॥ माधुर्यमपिवाञ्छन्तः प्रसादञ्चसुमेधसः । समासवन्तिभूयांसिनपदानि प्रयुञ्जते ॥ लाटीयावन्त्ययोरीत्योर्मागध्यांचक्वचित्क्वचित् । केचिदोजोभिधित्सन्तः समस्यन्तिवहून्यपि ॥ प्रतीतशब्देह्योजस्वीसुश्लिष्टपदसन्धिता ॥ प्रसादिस्वभिधानंचायमकंकृतिनांमतमिति ॥ माभूदलंकारतुल्यकक्षतयार्थस्यप्राधान्यं गुणस्यतुश्लाघ्यविशेषगुणयोगउदात्तत्वमित्यादेः किमितिप्राधान्यञ्जभवति । दोषगुणानामतीवोल्लेखविधित्वेनप्रधान्यात् ॥ यथा । सावामनप्रसिद्धिर्लङ्घितनभसोबलिद्विषोऽद्यापि । मत्सरिणःखलुलोकामर्माण्येवानुबध्नन्ति ॥ दोषस्ययोगुणीभावः सततोप्यधिकंप्रकाशतइति ॥ २७६ ॥ शब्दालङ्कारप्रधानोयथा । यच्चन्द्रकोटिकरकोरकमारभाजिबभ्रामबभ्रुणिजटापटलेहरस्य । तद्वः पुनातुहिमशैलशिलानिकुञ्जटाङ्कारडम्बरबिराविसुरापगाम्भः ॥ अत्रार्थप्राकट्यम्प्रसादो, विभवोत्कर्षउदात्तता, मृदुप्रस्फुटोन्मिश्रवर्णानामवैषम्यं समता, बन्धगाढतौर्जित्यमित्यादिभ्योगुणेभ्यः प्राधान्येनशब्दालंकारानुप्रासःप्रतीयते ॥ २७७ ॥ अर्थालंकारप्रधानोयथा । आश्लेषिणः पृथुरतक्लमपीतशीतमायामिनीर्घनमुदोरजनी-

र्युवानः । ऊर्वोर्म्मुहुर्व्वलनबन्धनसन्धिलोलपादान्त-
संवलितलोलपटाः स्वपन्ति ॥ अत्रबन्धविकटत्वमुदा
रता, श्लाघ्यविशेषणयोग उदात्तता, विभवोत्कर्षऔदा-
र्यं, दीप्तरसत्वं कान्तिरित्यादिभ्योगुणेभ्यः प्राधान्ये
नजातिरर्थालंकारः प्रतीयते ॥२७८॥ उभयालंकारप्रधा
नोयथा । अभ्युद्धृतावसुमतीदलितंरिपूरः क्षिप्रक्रमं
कवलिताबलिराजलक्ष्मीः । अत्रैकजन्मनिकृतंयदनेन
यूनाजन्मत्रयेतदकरोत्पुरुषः पुराणः ॥ अत्रोक्तिपरिपा
कः प्रौढि,र्बन्धविकटत्वमुदारता, आशयोत्कर्षउदात्त
त्वम्, अर्थप्राकट्यम्प्रसाद इत्यादिभ्योगुणेभ्यः श्लेषो
पसर्जनाविशेषोक्तिरुभयालंकारः प्राधान्येनप्रतीयते
॥ २७९ ॥ रससंकरोपिचालंकारसंकरवदेवरसाभासप्र-
शमानान्तिलतण्डुलादि प्रकारेणसंकरः षट्प्रकारोभव
ति । तत्रभावानान्तिलतण्डुलप्रकारोयथा । न्यक्कारोहृ
दिवज्रकीलइवमेतीव्रः परिस्पन्दतेघोरान्धेतमसीवम
ज्जतिमनः सम्मीलितंलज्जया । शोकस्तार्क्ष्यविपत्तितो
दहतिपन्नास्त्येवयस्मिन्क्रियामर्माण्येवपुनश्छिनत्ति
करुणासीतांवराकींप्रति ॥ अत्रामर्षलज्जाशोकानुक-
म्पाः समकक्षतयामिथस्तिलतण्डुलवत्संकीर्यमाणारा
मस्यविरहिणो वागारम्भानुरागोक्तिपरतयाप्रतीयन्ते
॥ २८० ॥ क्षीरनीरप्रकारोयथा । मानोन्नतेत्यसहने-
त्यऽतिपण्डितेति मय्येवधिक्कृतिरनेकमुखीसखीना-
म् । दाक्षिण्यमात्रमसृणेनविचेष्टितेनधूर्त्तस्यतस्यतु

गुणानुपरञ्जयन्ति ॥ अत्रसखीषुशेषः प्रियगुणेषुचासू-
याक्षीरनीरवन्मिथः संकीर्यमाणौस्वामिनीवागारम्भ-
वरतयाप्रतीयेते ॥ २८१ ॥ छायादर्शप्रकारोयथा ।
आःसीतंपतिगर्वविभ्रमभरप्रान्तभ्रमद्बान्धवप्रध्वंसस्मि
तकान्तिमत्तवतदाजातंयदेतन्मुखम् । सम्प्रत्येवहठा
दहंवकुरुतेकेशीञ्चयोत्कर्षणत्रासोत्तानितलोललोचनप
तद्बाष्पप्लुतरावणः ॥ अत्रक्रोधाभासेछायादर्शन्या
येनरत्याभासः संकीर्यते ॥ २८२ ॥ नरसिंहवद्यथा ।
किन्द्वारिदैत्यहतिकेसहकारकेणसंवर्द्धितेन विषपादपए
षपापः । अस्मिन्ममागपिटिकासविकारभाजिभीमाभ
वन्तिमदनज्वरसन्निपाताः ॥ अत्रनरसिंहजातावित्रसिं
हनरशरीरभागारम्भानुसारेण सखीविषयानुक्रम्पासह
कारविषयाचकुत्साभिधःसङ्कीर्यते । तथाहि । दैत्यहतिके
शब्देनलब्धायांक्रियत्युपाधौसबंधैत्रानुक्रम्यमानतायां
सहकारसंवर्द्धननिबन्धनत्वमेवास्याः कनाक्षीत्यते । एवं
नामत्वन्दैवोपहतासियत्सहकार विषपादपद्वारिसंवर्द्ध
यसिविषपादपशब्देनलब्धायांसहकारस्यसबंधैवकुत्सा
यांविकासकालेकामिनीनामसह्यस्मरज्वरसन्निपातहेतु
कत्वमेवास्याः कन्प्रत्ययेनप्रत्याय्यते । तदुक्तं "कुत्सितत्वे
नकुत्सावान्सम्यग्वापिहिकुत्सितः । स्वशब्दाभिहितेकेन
विशिष्टोर्थःप्रतीयते ॥ नचसाम्प्रतिकीकुत्साशब्दाभेदेप्र
तीयते । पूज्यतेकुत्सितत्वं पिप्रशस्तत्वंपिकुत्स्यते,, इति ।
तद्यथा । एकइहजीवलोकेजीवतिरूपः । यः

प्रेम मात्रपाशेमृगइवनमृगीदृशांपतति ॥२८३॥ पांसूदकप्र
कारोयथा। मागर्वमुद्वहकपोलतलेचकास्तिकान्तस्वहस्त
लिखिताममम्जरीति। अन्यापिकिंनसखिभाजनमीदृशी
नांवैरीनचेद्भवति वैपथुरन्तरायः ॥ अत्रस्वसौभाग्यव
र्णनामृत्पिण्डेपांसूदकयोरिवाविभागमापाद्यमानयोर-
सूयागर्वयोः सङ्करउपपद्यते ॥ २८४॥ चित्रवर्णप्रकारो-
यथा। विरोधोविश्रान्तः प्रसरतिरसोनिर्वृतिघनस्तदौ
द्धत्यंक्वापिव्रजतिविनयः प्रह्वयतिमाम्। झटित्यस्मिन्दृ
ष्टेकिमपिपरवानस्मियदिवामहार्घस्तीर्थानांकिमिहम-
हताङ्कोप्यतिशयः॥ अत्रवीरौद्धत्यस्वातन्त्र्यरसानामा
नन्दप्रशमपारवश्यरसैस्तिरस्क्रियमाणानाम्पटवर्णनी-
लादिभिः सितादीनाम्प्रशमारामदर्शनप्रभावोद्भवेलव
स्यविस्मयातिशयप्रशमजन्मनिवागारम्भानुभावोपमा
द्भवेदेतच्चित्रवर्णवत्सङ्कीर्यमाणाःसमुपलभ्यन्ते ॥ २८५॥
अथकोयंगुणसङ्करः। ननुचदोषहानमिव१ गुणोपादान
मपिनियमनिवर्त्यम्। अलङ्कारयोगइवरसावियोगोप्यव
श्यंविधेयः। कदाचिदलङ्कारयोगोपित्यज्यते। नतुरसा२
दिव्यभिचरितसम्बन्धाविति। अत्रोच्यते। यत्रचित्रवर्णव
न्नरसिंहवत्पांसूदकवदवयवावयविन्यायेनजातिव्यक्ति
न्यायेनवापृथक्प्रयत्नानिर्वर्त्यानाङ्गणरसानां वाक्ये स
न्निवेशस्तत्रसङ्करव्यवहारोनप्रवर्त्तते। तद्यथा। मधुरं
रसवद्वाचिवस्तुन्यपिरसस्थितिः। येनमाद्यन्तिधीमन्तो
मधुनेवमधुव्रताः ॥ कामंसर्वोप्यलङ्कारोरसमर्थेनिषि

ञ्चति । तथाप्यग्राम्यतैवैनम्भारंवहतिभूयसा ॥ शृङ्गा
रएवसर्वेषुपरप्रह्लादनोरसः । तन्मयङ्काव्यमाश्रित्यमा
धुर्यम्प्रतितिष्ठति ॥ शृङ्गारेविप्रलम्भाख्येकरुणेचप्रकर्षव
त् । माधुर्यमार्द्रतांयातियतस्तत्राधिकम्मनः ॥ रौद्रा
दयोरसादीप्त्यालक्ष्यन्तेकार्यवतिनः । तद्व्यक्तिहेतु
शब्दार्थोवोजोधिष्ठायतिष्ठति ॥ समर्पकत्वंवाप्यस्यय
त्तुसर्वरसान्प्रति । सप्रसादेगुणोज्ञेयः सर्वसाधारण
क्रियः ॥ सेयंगुणानांरसारम्भकत्वेसंकराप्रसिद्धिः ।
एवंरसानांगुणारम्भकत्वेपि । तद्यथारूढाहंकारतौर्जि-
त्यंभावतोवाक्प्रवृत्तिर्भाविकत्वंक्रोधादावप्यस्यतीव्रत्वं-
माधुर्य्यमाशयोकर्षउदात्तमत्वर्थस्याभीष्टतमताप्रेयोदी
प्तरसत्वंकान्तिरिति । यत्रतुतिलतण्डुलवत्क्षीरनीरव-
च्छायादर्शवत्तुल्यकक्षतयैवगुणरसानांवाक्यैःपृथक्प्र
यत्ननिर्वर्त्यानां विनिवेशस्तत्रसङ्करव्यवहारःप्रवर्त्तते
एव । सषोढा । गुणप्रधानो, रसप्रधान, उभयप्रधान,
उभयाप्रधानो,गुणाधिको,रसाधिकइति । तेषुगुणप्रधा
नोयथा । अत्रान्तरेललितहारलतानितम्बसंवाहनस्ख
लितवेगतरङ्गिताङ्गी । देवीव्यपास्यशयनन्धृतमानतन्तु
रन्तुः पुरंगतवतीसहसौविदल्लैः ॥ अत्रार्थप्राकट्यौदार्य
योरर्थशब्दगुणयोः प्राधान्यञ्चभवति क्रोधयोरितिगुण
प्रधानः ॥ २८६ ॥ रसप्रधानोयथा । अस्मिन्नगृह्यतपि
नाकभृतासलीलमारब्धवेपथुरधीरविलोचनायाः । वि
न्यस्तमङ्गलमहौषधिरीश्वरायाः स्रस्तोरगप्रतिसरेणक-

रेखपाणिः ॥ अत्रश्लाघ्यविशेषणयोगउदात्तत्वं बन्ध
विकटत्वमुदारताअर्थप्राकट्यम्प्रसादो दीप्तरसत्वङ्का
न्तिरितिगुणाः साध्वसविलासानुरागसंगमरसैरतिश
य्यन्तइतिरसप्रधानः ॥२८७॥ उभयप्रधानोयथा । आ
पातमात्ररसिकेसरसीरुहस्यकिम्बीजमर्पयितुमिच्छसि
वापिकायाम् ॥ कालःकलिर्जगदिदंनकृतज्ञमज्ञेस्थित्वा
हरिष्यतितवैवमुखस्यशोभाम् ॥ अत्रभणितिविशेषउक्तिः
संविधानेसुसूत्रताश्लेषइति शब्दगुणयोर्लावण्यविला
सवर्णनीयरसयोश्चतुल्यकक्षतयानिर्दिशत्युभयप्रधानः
॥२८८॥ उभयाप्रधानोयथा । अभिनववधूरोषस्वादुःकरी
षतनूनपादसरलजनाक्षेपश्लेषक्रूरस्तुषारसमीरणः ॥
गलितविभवस्याज्ञेवाद्यद्युतिर्मसृणारवेर्विरहिवनिताव
क्त्रक्लैब्यंबिभर्त्तिनिशाकरः ॥ अत्रस्वादुक्रूरमसृणक्लैब्य
मित्यन्यधर्माणामन्यत्रारोपणं समाधिरभिनववधूरोषा
दीनाञ्चतुर्णामप्यर्थानांस्वाद्वादीनाञ्चलक्षणादिलक्षिता
नाम्प्राकट्यंप्रसादो ऽभिनववधूरोषस्वादुःकरीषतनून
पादितिविशेषणविशेष्याणामुपक्रमेणनिर्वहणंरीतिःपाद
चतुष्टयेचतुर्णामर्थानांविभज्यसमत्वेननिवेशः सम्मितत्व
मितिचत्वारोगुणा श्चत्वारश्चरत्यमर्षविषादजुगुप्सा
त्मानोरसाः कालावस्थानिवेदनपरत्वेनप्रतीयन्तइत्युभ
याप्रधानः ॥ २८९ ॥ गुणाधिकोयथा । अजननिरस्तु
विभूतेरपूरणिर्भवतुसर्वकामानाम् । मायाचिषिमासेवि
षिमासहिषिपराभवन्धनिनः ॥ अत्रसुप्तिङुत्पत्तिःसौश

ङ्गं वाक्यानाम्परिपूर्णत्वमर्थव्यक्तिरर्थस्यप्राकट्यम्प्र
सादोविभूतेरनुत्पत्तौकामानपूर्यन्तेऽपरिपूर्णकामोयाच
तेयाचमानस्तदनाप्नुवन्धनिनः सेवन्तेसेवमानास्तुतैः प
रिभूयतेइत्युत्पत्यादिक्रियाक्रमोरीतिरितिगुणाश्चत्वारः।
रसस्तुनिर्वेदएवैकइतिगुणाधिकः ॥ २९० ॥ रसाधिको
यथा । कमलमनम्भसिकमलेचकुवलयेतानिकनकलति
कायाम् । साचसुकुमार सुभगेत्युत्पातपरपराकेयम् ॥
अत्रकमलमनम्भसि कमले च कुवलयेतानिकनकलति
कायामित्यन्यधर्माणामन्यत्रारोपणंसमाधिः साचसुकु
मारसुभगेत्युत्पातपरम्पराकेयमित्यश्लीलामङ्गलार्थौदो
षगुणावपि श्लाघ्यविशेषणगुणयोगउदात्तत्वंविकटब
न्धत्वमुदारतोपक्रमभेदोरीतिरर्थस्यप्राकट्यम्प्रसादोऽनि
ष्ठुरतासौकुमार्यमाभीष्टतमताप्रेयो दीप्तरसत्वङ्कान्ति
रितिगुणादश। रसास्तुरत्युत्कर्षहर्षधृत्युत्कण्ठावेगवि-
स्मयमतिवितर्कचिन्ताचपलताहासोत्साहस्तम्भगद्गदो-
न्मादव्रीडाऽवहित्थाभयशङ्काविंशतिर्वागारम्भानुभवेशृ
ङ्गारिणः प्रियाचाटुकारस्यकस्यचित्प्रतीयन्तइतिरसा
धिकः ॥ २९१ ॥ रसालङ्कारसङ्करोप्येतेनव्याख्या
तः । रसवन्तिहिवस्तूनि सालङ्काराणिकानिचित् ।
एकेनैवप्रयत्नेनविवर्त्यन्तेमहाकवेः ॥ रसाक्षिप्तत-
यायस्यबन्धः शक्यक्रियोभवेत् । अपृथग्यत्ननिर्वर्त्यः
सोलङ्कारः प्रहृष्यते ॥ रसभावादिविषयंविवक्षाविरहे
सति । अलङ्कारनिबन्धोयः सकविभ्योनरोचते ॥ तत्रर

सालंकारसंकरोद्विधा । रसप्रधानोलंकारप्रधानश्च । त
योर्येनुभवित्रैववर्ण्यतेसरसप्रधानः । तत्रह्यलंकारवतो
वाक्यस्यवागारम्भानुभावत्वं भवति । तत्ररतावुपमायाः
संकरोयथा । तीएदंसणसुहएपणअएवलणजणिओमुह
म्मिमणहरे । रोसोविहरइहिअअम्मअअम्पङ्कोवमअ-
तद्वलण्णिनिसण्णे । अत्रोपमातिरस्कारेणरसवतोहरेर्व-
चसिवागारम्भरूपेरुक्मिणीप्रदत्तपारिजातमञ्जरीविलो
कनप्रभवंसत्यभामायारोषरामणीयकम्प्राधान्यतः प्रती
यते ॥ २९२ ॥ रतावेवविपरीतोपमायथा । यत्त्वन्ने
त्रसमानकान्ति सलिलेमग्नन्तदिन्दीवरम्मेघैरन्तरितः
प्रियेतवमुखच्छायानुकारी शशी । येपित्वद्गमनानुका
रिगतयस्तेराजहंसागतास्त्वत्सादृश्यविनोदमात्रमपिमे
दैवेननक्षम्यते ॥ अत्रविरहिणोरामस्यप्रियावयवसा
दृश्यदर्शनेनात्मानंविनोदयत उपायभ्रंशारतिप्रभविषा
दवागारम्भेस्वरूपाभिधानोपक्षीणशक्तिरप्राधान्येनो-
पमाप्रतीयते ॥ २९३ ॥ रतावेवविपर्ययोयथा । किङ्गुरु-
जहणभरोतिभावअक्करअलग्गतुलिआए । विहिणोख-
त्तङ्गुलियगाविम्भमवंहइसतिवली ॥ अत्रयद्यपिरतिप्रभ
वेभ्योविस्मयादिभ्यः संशयहेतूत्प्रेक्षोपमाभ्यश्चपर्याया
लंकारः प्राधान्येनप्रतीयते । तथाप्यसौवागारम्भानुभा
वइतिरतावप्यप्राधान्यमेवानुभवति ॥ ९४ ॥ रतावेवस
माधिर्ययथा । कृच्छ्रादूरुयुगव्यतीत्यसुचिरंभ्रान्त्वानित
म्बस्थलेमध्येस्यास्त्रिवलीतरङ्गविषमेनिष्पन्दतामागता ।

मद्दृष्टिस्तृषितेव सम्प्रतिशनैरारुह्यतुङ्गौस्तनौसाकाङ्क्षम्मुहुरीक्षतेजलभरप्रस्यन्दिनीलोचने ॥ अत्रवत्सराजेनस्वदृष्टौप्राणिधर्माः समाधीयमानाः सागरिकादर्शनार्थेवागारम्भेन्यग्भवन्ति ॥ २९५ ॥ रतावेवार्थश्लेषयथा ॥ कपोलेपत्त्रालीकरतलनिरोधेनमृदितानिपीतोनिश्वासैरयममृतहृद्योधररसः । मुहुर्लग्नः कण्ठेनरलयतिबाष्पस्तनतटीप्रियोमन्युर्जातस्तवनिरनुरोधेनतुवयम् ॥ अत्रयद्यप्याक्षेपेणवाक्योपसंहारस्तथापिप्रियइत्यादिभिः प्रधान्येनाभिधीयमानः श्लेषएवशृङ्गारिणोवागारम्भानुभावाङ्गत्वमङ्गीकरोति ॥ २९६ ॥ रतावेवपर्यायोक्तेर्यथा। मुक्ताः कन्धरयावृताः स्तनतटेनोत्तुङ्गता कुम्भयोरूरुभ्याम्परिणाहिताक्रमवती हस्तस्यपद्भ्याङ्गतिः । एतद्वः करिघातिनस्तुकठिनञ्चर्मैव कोयंहठश्चण्डीति त्रिपुरारिकेलिवचनैरार्यान्वितम्पातुवः ॥ अत्रभगवतश्चाटूक्तिवागारम्भेदेव्याः पर्यायवर्णनाश्लेषभावंलभते ॥ २९७ ॥ यत्रउदासीनेनवर्ण्यतेसोलङ्कारप्रधानः । सहिरसभावादेः सङ्करप्रकारमभिधित्सुः स्वभावोक्तिंवक्रोक्तिंवावलम्बते । तत्रस्वभावोक्तिपक्षेजातिः । साविधिमुखेनयथा । थोओउसरतरोसन्थोअपरिवट्टमानपहरिसम् । होइअदरपआसंउहअरसाअत्तविम्भमन्तीअमुहम् ॥ अत्र सत्यभामायारोषस्यापसज्जतः प्रहर्षस्य च प्रसर्पतो येऽनुभावाजिह्मावलोकनमुखप्रसादादयस्त इह संकीर्यमाणाः कविनोभय

रसायत्तविभ्रममित्यनेन यथावदवस्थिता भवन्तीति विधिमुखेनाभिधीयन्ते ॥ २९८ ॥ जातिरेव निषेधमुखेन यथा । धीरेणमानभङ्गोमाणक्खलणेन गुरुअधीरारम्भो । उल्ललइतुलिजँतेएकम्मिविसेथिरन्नलग्गइहिअअम् ॥ अत्र यद्यपि हेतूपन्यासो वर्त्तते तथापि तस्य स्वभावाख्यानपरिकरत्वेनाप्राधान्येन हृदयक्रियास्वरूपमेवहिनिषेधमुखेनाभिधीयते इतीयञ्जातिरेव भवति ॥ २९९ ॥ सैवविधिनिषेधाभ्यां यथा । हेलोदस्तमहीधरस्य तनुतामालोक्य दोष्णोहरेर्हस्तेनास तदावलम्ब्य चरणावारोप्यतत्पादयोः । शैलोद्धारसहायताञ्जिगमिषोरस्पृष्टगोवर्द्धना राधायाः सुचिरञ्जयन्तिगगने बह्व्यः करभ्रान्तयः ॥ अत्र राधाया प्रेषसि हरौ यथावदवस्थिताद्भुतवृत्तिस्नेहशङ्कोत्साहा मिथः संकीर्यमाणाभयावेगस्मृतिमतिवितर्कादिभिर्व्यभिचारिभावैरालम्बनचरणाक्रमणसहकृतायांकरभ्रान्तौ शरीरारम्भानुभावेप्रतीयमानाअस्पृष्टगोवर्द्धनाबन्ध्या इतिनिषेधमुखेनजयन्तीतिविधिमुखेनचाभिधीयन्ते ॥ ३०० ॥ वक्रोक्तिपक्षउपमादय तेषुउपमायथा । चोराभअसतहणम्पुणोपेसअयतिदिव्वीओ । अहिरस्थिअनिहिकलसेथयोक्कहलपूइखणुत्सङ्गे । अत्रचौरगतभयानुरागयोः संकरस्वभावोक्तिमभिभूयोत्तरार्द्धागतमौपम्यम्प्राधान्येनप्रतीयते॥३०१॥ उपमैवरसाभाससंकरविषयायथा । एकेनार्कम्प्रविततरुषापाटलेनास्तसंस्थांपश्येत्युक्त्वासजलतरलेना

परेणात्मकान्तम् । अह्नश्छेदे दयितविरहाशङ्किनी चक्रवाकी द्वौ संकीर्णौ रचयति रसौ नर्तकीव प्रगल्भा ॥ अत्र निगदेनैव व्याख्यायते स्पष्टतयैवोपमायाः प्रधानत्वेन प्रतीतिः ॥ ३०२ ॥ रसप्रशमयोरुपमासहोक्तिर्यथा । दृष्टे लोचनवन्मनाङ्मुकुलितम्पार्श्वस्थितेवक्रवन्न्यग्भूतम्बहिरासितम्पुलकवत्स्पर्शंसमातन्वति । नीवीबन्धवदागतंशिथिलतामाभाषमाणेततोमानेनापगतं ह्रियेवसुतनोरङ्घ्रिस्पृशिप्रेयसि ॥ अत्रकस्याश्चित्सखी विख्यातमानसंविधानकोपान्मानवत्याः प्रियसन्दर्शनादालम्बनविभावादुत्पन्नप्रकृष्टरतिप्रभवहर्षस्थायिभावे तत्पार्श्वेपि समर्पणादिभिरुद्दीपनविभावैरुद्दीप्य १ मानेषु पुलकादिषुसमुत्पद्यमानेषुव्यभिचारिषुनयननिमीलनाधीमुख्यनीवीविस्रंसनादिभिरनुभावैः प्रकर्षारोपणादानन्दरसतामापाद्यमानेस्थायिनिप्रबलविरोधिभावान्तरोदयादेतेभ्य एव कारणेभ्यः प्रतिक्षणमपचीयमानयोर्लज्जारोषयोः प्रशमसङ्करावभिभूय प्राधान्येनोपमासहोक्तिः संकीर्यते २ ॥ ३०३ ॥ श्लेषाद्यलङ्कारसंकरात्तु ३ क्वचिदवास्तवमपिरसाभाससंकरं कवयो वर्णयन्ति ॥ सरूपकश्लेषेण यथा । राममन्मथशरेणताडितादुःसहेन हृदये निशाचरी । गन्धवद्रुधिरचन्दनोक्षिताजीवितेशवसतिञ्जगामसा ॥ अत्रबीभत्सोरसः श्लेषरूपकसामर्थ्यादविद्यमानेनापिशृङ्गाररसेनसंकीर्णइवप्रतीयते ॥३०४॥ श्लेषानुविद्धार्थान्तरन्यासेनयथा । दठ्ठोठ्ठहोअसिल-

१ समुत्पद्यमानेष्विति २ पुस्तके । २ प्रकाश्यत इति २ पुस्तके । ३ साम

वाअव्वाओदेविमउलावइलोअणभउन्तोवेवि । सुपओ
हरकुवलअपत्तिलच्छिकहमोनुभाइणगाजणवच्छि ॥ अ
त्रवीरोरसः श्लेषसामर्थ्यादविद्यमानेनापिविश्रम्भशृ-
ङ्गारेणसंकीर्यते ॥३०५॥ श्लेषोपमायथा । क्षिप्तोहस्ताव
लग्नः प्रसभमभिहतो ऽप्याददानोंशुकान्तं गृह्णन्केशेष्व
पास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण । आलिङ्ग
न्योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः कामी
वार्द्रापराधः स दहतु दुरितंशाम्भवो वः शराग्निः ॥ अ
त्रकरुणोरसः श्लेषोपमासामर्थ्येनाविद्यमानेनापि वि
प्रलम्भशृङ्गारेणसंकीर्यते ॥ ३०६ ॥ श्लेषव्यतिरेकेणय
था । पद्भ्यामूरुयुगंविभज्यभुजयोर्मध्यन्निपीड्योरसा
पार्श्वेषुप्रसभंप्रहृत्यनखरैर्दन्तैर्विलूयाधरम् । सुप्तान
प्यवबोध्य युष्मदहितान्भूयोपिभुङ्क्ते वने किं कान्ता सु
रतैषिणीनहिनहिव्याघ्रीकरालानना ॥ इहश्लेषसाम
र्थ्यादपारमार्थिकीशृङ्गारप्रतीतिःपारमार्थिकेनबीभत्स
रसेनव्यावर्त्तमानातद्धर्मिणाम्मिथःसंसर्गवद्बुद्धिमुत्पाद
यति ॥३०७॥ श्लेषरूपेणयथा । अन्त्रैः कल्पितमङ्गलप्र
तिसराःस्त्रीहस्तरक्तोत्पलव्यक्तोत्तंसभृतःपिनह्यसहसाहृ
त्पुण्डरीकस्रजः । एताः शोणितपङ्ककुङ्कुमजुषः सम्भू
यकान्तैः पिबन्त्यस्थिस्नेहसुराः कपालचषकैः प्रीताः
पिशाचाङ्गनाः ॥ अत्रबीभत्सोरसः शब्दसामर्थ्यादाक्षिप्तेन
शृङ्गाराभासेनसङ्कीर्यते ॥३०८॥ समाधिरूपकेणयथा ।
शिखण्डेखण्डेदुःशशिदिनकरौकर्णयुगलेगलेतारास्ता-

राञ्चलमुडुपचक्रञ्चकुचयोः । तडित्काञ्चीसन्ध्यासिचय रुचयः कालि तदयन्तवाकल्पः कल्पव्यपरमविधेयो वि जयते ॥ अत्र भयानको रसः समाधिरूपकादुपकल्पि ताकल्परामणीयकाक्षिप्तेन शृङ्गाराभासेन संकीर्यमाणः श्रोतुः प्रेयोरसाङ्गतांगच्छन्संगच्छते ॥३०९॥ एवमियम नेकप्रकारा संसृष्टिर्गुणालंकारसंकरप्रभवाऽभिमन्तव्या । तत्रापिप्रधानाङ्गभावेनसमकक्षतयाचव्यक्ताव्यक्तोभया त्मकस्तिलतण्डुलक्षीरजलच्छायादर्शकादयोभेदायथायो गमवगन्तव्याः । तेकिंवक्तव्याः ? । नवक्तव्याः । क थमनुक्तागम्यन्ते ? । उक्तेष्वेवान्तर्भावात् । तद्यथाऽर्थो भयालंकाराभिधाने "खंवस्त" इति "चर्चाम्पारयती" तिविभक्तिमुद्रा, कलविङ्ककण्ठमलिनं कादम्बिनीकम्ब लमितिपदमुद्राचशब्दालङ्कारावपिसङ्कीर्यमाणौप्रतीये ते ॥ एवमन्यत्रापि । अङ्गाङ्गिभावावस्थानंसर्वेषांसमक क्षता । इत्यलङ्कारसंसृष्टेर्लक्षणीयाद्वयोगतिः ॥३०७॥ त त्राङ्गाङ्गिभावेनावस्थानंयथा । आक्षिपन्त्यरविन्दानि मुग्धेतवमुखश्रियम् । कोषदण्डसमग्राणिकिमेषामस्ति दुष्करम् ॥ अत्रारविन्दानिमुग्धेतवमुखश्रियमाक्षिपन्ती त्युपमाकोषदण्डसमग्राणाङ्किमेषामस्तिदुष्करमिति श्लेषोपसर्जनानामर्थान्तरन्यासः । प्रभवन्तिचारविन्दानि कोषदण्डसमग्राणि । तेनकिंतेषान्नकिञ्चिदशक्यमस्तिको षदण्डयोर्विजयसाधनत्वात् । एतेनश्लेषस्यसाधनभूता र्थसमर्पकत्वादुपमायास्तुप्रस्तुतसाध्यवस्तुविशेषकत्वा-

दर्थान्तरन्यासम्प्रत्यङ्गभावोविज्ञायते ॥३१०॥ सर्वेषांस मकक्षतायथा । लिम्पतीवतमोऽङ्गानिवर्षतीवाञ्जननभः । असत्पुरुषसेवेव दृष्टिर्विफलतांगता ॥ ननुचा सम्बन्धःसमत्वात्स्यादिति कथंसर्वेषान्तुल्यकक्षतयास म्बन्धोत्पत्तिः?। एवंमन्यते । यदोत्प्रेक्षोपमादयोलंकारविभावानुभावव्यभिचारिवर्णनापरतयारसादेरङ्गतामप्रतिपद्यन्तेतदाभवतितेषान्तुल्यकक्षतेति । तत्रलिम्पतीवतमोऽङ्गानिवर्षतीवाञ्जनन्नभइतिद्वेउत्प्रेक्षे । असत्पुरुषसेवेवदृष्टिर्विफलतांगतेत्युपमा वर्णनीयस्यतमसउद्दीपनविभावभूतस्यसमतयैवोत्कर्षापादकत्वेनाऽङ्गभावमुपगतेति नास्तिलक्षणानुपपत्तिरिति । ननूपमाइमास्तिस्रोपिकस्मान्नोच्यते? । इवोहिवाक्यान्तरेषूपमायाएवदृश्यते । नैवम् । उपमानोपमेयशब्दप्रतिपन्नस्यसादृश्यार्थस्यद्योतनमिवेनक्रियते । नचलिम्पतीत्यादावुपमानमुपमेयंवास्ति । यत्सादृश्यद्योतनायइवः प्रयुज्येत । नचतिङन्तेनोपमानमस्ति । तस्यसाध्यार्थाभिधायित्वेनासत्त्वार्थत्वात् । तदाह "सिद्धस्यहि समानार्थमुपमानं विधीयते । तिङन्तार्थस्यसाध्यत्वादुपमार्थोनविद्यते" इति । नचोपमायामेवेवशब्दोभवतितद्यथा । कथमिवैतद्भविष्यति । अस्तुचालिम्पतितमसोरूपमानोपमेयभावस्तथापितुल्यधर्मोनदृश्यते । यत्रोपमानोपमेयभावायप्रभवतिकिमन्येनलेपनमेवभवतिनलिम्पतिनाकेनभाव्यञ्चहिलेपनंलिम्पेः पृथग्भवि-

तुमीष्टे । ननुचेहद्वयंचकास्तिधातुर्लिम्पतिशब्दार्थश्च लेपनम्? । मैवम् । एवंसतिलिम्पतिरिवेतिस्यात् । ननु लिम्पतीवेति । अथ यथाराहोः शिरइतिभेदाभावेप्य वयवावयविभावस्तथेहधर्मधर्मिभावोभविष्यति ? मैव म् । उपमानोपमेयभावस्यभेदसादृश्यप्रतिपत्तिनिबन्ध नत्वात् । तदभावेपियस्तन्मनुतेसकथन्नोन्मत्तः स्या त् । तदुक्तम् "सएवधर्मीधर्मीचेत्युन्मत्तोपिनभाषते" इ ति । अस्तुतर्हितिङ्वाच्यः कर्त्तोपमानमितिचेत् । न्य ग्भूनोसौक्रियापदेइति । कथम्पुनरसौक्रियापदेन्यग्भू तोभवति ? । श्रूयताम् । षडर्थास्तिङन्तेनप्रतीयन्ते । क्रिया, काल, उपग्रहः, साधनं, सङ्ख्या, पुरुषश्चेति । तेषुक्रियाकालात्मनेपदपरस्मैपदनिमित्तानि प्रकृतिर भिधत्ते । प्रत्ययः साधनंसङ्ख्याम्पुरुषञ्च । एतेषां तुक्रियार्थत्वात्क्रियाप्रधानम् । कालात्मनेपदनिमि त्तेक्रियाविशेषणत्वेन । सङ्ख्यापुरुषौसाधनविशे षणत्वेनतयोरेवन्यग्भवतः । साधनं पुनः प्रकृतिप्रत्ययौ यत्रसहार्थंब्रूतइतिन्यायात्प्रधानभूतमपिभूतंभव्यायोप दिश्यतइतिन्यायेन क्रियासिद्धावुत्पन्नव्यापारंपरा र्थंतस्याङ्क्रियायांन्यग्भवति । तेनायङ्कर्त्तास्वक्रिया सिद्धावाकुलः कथमुपमानत्वेनोपमेयत्वेनचान्यदपे क्षितुंक्षमते । एवन्तर्हियोऽङ्गानिलिम्पतितेनक्रियोपल क्षितेनकर्त्रातुल्यंतमइत्यर्थः प्रपत्स्यते ? । मैवम् । क्रियो पलक्षितस्यकर्तुरुपमानभूतस्य शब्दन्यायबलादप्रति-

पत्तिः । शब्दोहि मुख्यागौणीलक्षणाभिरर्थप्रकरणादिसम्पादितसाचिव्यादिभिस्तिसृभिरेववृत्तिभिरर्थविशेषप्रतिपत्तिनिमित्तम्भवति । तद्यथा । गौरित्ययं शब्दो मुख्ययावृत्त्यासास्नादिमन्तमर्थम्प्रतिपादयतिस एवतिष्ठन्मूत्रत्वादिगुणसम्पदमपेक्ष्यवाहीकादौप्रयुज्यमानो गौणीवृत्तिमनुभवति । यदा तु मुख्यया गौण्या वा उपात्तक्रियासिद्धौ साधनभावङ्गन्तुमसमर्थस्तदालक्षणयास्वार्थाविनाभूतमर्थान्तरंलक्षयति । यथा "गङ्गायाङ्घोषः प्रतिवसती"ति । गङ्गाशब्दोविशिष्टौदकप्रवाहेनिरूढाभिधानशक्तिर्घोषकर्तृकायाः प्रतिवसनक्रियायाम्प्रधिकरणभावङ्गन्तुमसमर्थः स्वार्थाविनाभूतंयत्तटंलक्षयतीति । नचैतासामिहान्यतमाऽपिवृत्तिः संगच्छते । तथाहि । लिम्पतेः क्रियावचनत्वान्मुख्यानापिक्रियाकर्त्तारःसादृश्येन शुक्तिकादौ रजतादिवत्तद्भावापत्तिः । क्रियागुणानाङ्कर्त्तृसम्भवात् । साक्षादिवप्रयोगाच्चनगौणी । क्रियायाश्चस्वयमेवधर्मरूपत्वात् । बुद्धिः पश्यतीतिवदन्यधर्माणामन्यत्राधिरोपणमुपचारइतिनगौणीभेदउपचरिता । इवशब्दस्यचासादृश्येपिदर्शनात् । नलक्ष्येतयदिहीवशब्दः सादृश्यमेवद्योतयतितदालिम्पतिक्रियायाः सत्त्वभूतेनतमतासादृश्यन्नसम्भवतीतिस्वार्थाविनाभूतङ्कर्त्तारमाक्षिपति । नचेहलक्षितलक्षणाविरुद्धलक्षणादयोपिवर्त्तन्ते । यथाप्रियेजनेनास्तिपुनरुक्तं, स्वल्पे

रसावपिनदृश्यतएवकालैरिति । नचशब्दान्यविल म्बिनीपदार्थव्युत्पत्तिः प्रेक्षावद्भिरादृियते । यद्यप्यध्या हारादिभिरिदमपिस्यात्तथापितुल्यधर्मोमार्गणीयस्तद्व देवविप्रतिपत्तेः । नचेन्दुमुखादिवदनमिधीयमानस्यापि तुल्यगुणस्यप्रत्ययोभवतीतिवाच्यम् । यथेन्दुरिवतेवक्त्र मितिकान्तिः प्रतीयते । नतथालिम्पतेर्लेपादन्यदत्रप्रती यते ॥२०८॥ तदुपश्लेषणार्थोयंलिम्पतिर्ध्वान्तकर्तृकः । वर्षणार्थश्चविद्वद्भिरुत्प्रेक्ष्यतइतीक्ष्यताम् ॥२०९॥ मन्ये शङ्के ध्रुवम्प्रायोनूनमित्येवमादिभिः । उत्प्रेक्षाव्यज्य तेशब्दैरिवशब्दोपितादृशः ॥२१०॥३११॥ वाक्यवदे वप्रबन्धेष्वनौचित्यपरिहारेणगुणालङ्कारसङ्करनिवेशो भवति । तत्रानौचित्यपरिहारोयथा । मायया कैकेयीदशरथाभ्यांरामः प्रलम्भितोनमातापितृभ्यामि तिनिर्दोषदशरथे, राममेवयोधयन्रामेणवालीनि हतोनसुग्रीवमितिमहावीरचरिते, रुधिरप्रियराक्षसेन दुःशासनस्य रुधिरंपीतन्नभीमसेनेनेतिवेणीसंहारे, दु र्वाससोऽपध्यानाद्दुष्यन्तः शकुन्तलास्वीकारंविसस्मा र नानवस्थितानुरागतयेतिशाकुन्तले, लवणप्रयुक्तरा क्षसाभ्यांवासोपस्करेणतदभिधायसीतापरित्याजिता नकैकेयीमन्थराभ्यामितिच्छलितरामे, किंचदग्धा यामपिवासवदत्तायांवैरप्रतिचिकीर्षयापद्मावतीमयो ढावसितेचसमीहितेतयाविनाक्षणमपिनजीवामीत्यवि ज्ञातवासवदत्तासन्निधेर्वत्सराजस्याग्निप्रवेशाध्यवसा-

यः प्रियाहृदयतो व्यलीकशल्यमुच्चखानेति तापसव-
त्सराजे, मरीचाक्षः स्वामिकार्यसाधयामीतिप्रभू
क्त्यानिरपराधामपिप्रेयसींहित्वास्वामिकार्यापेक्षयाह
मेतावन्तिदिनानिजीवितोद्धनुकृतस्वामिकार्यस्तामे
वानुगच्छामीतिशिवगणः शूद्रकनिमित्तम्मायामयीञ्चि
ताम्प्रियासमक्षम्प्रविवेशसापितत्प्रेमावदातदर्शनाप-
हृतप्रियव्यलीकातद्वियोगकातरातत्रैवात्मानम्प्रतिचिक्षे
पेतिविक्रान्तशूद्रके इति। तद्देषदोषहानम्। गुणोपादा
नन्तुसम्यगगुणयोगेनसंविधानेसुसूत्रता ॥२१२॥ अपिच
चतुर्वृत्यङ्गसम्पन्नमितिचतस्रोवृत्तयोभारत्यारभटीकै
शिकीसात्वतीचेति। तत्रा यावाक्प्रधानानृपतिप्रयो
ज्यास्त्रीवर्ज्जितासंस्कृतयाथयुक्ता। स्वनामधेयैर्भरतप्र
योज्यासाभारतीनामभवेत्तुवृत्तिः ॥२११॥ यत्रावपातप्लुतल
ङ्घितानिच्छेद्यानिमायाकृतमिन्द्रजालम्। चित्रा।णियुद्धा
निचतत्रवृत्तिमेंतादृशीमारभटिं वदन्ति ॥ २१२ ॥ याश्ल
क्ष्णनेपथ्यविशेषयुक्ता स्त्रीसङ्गता या बहुगीतवृत्ता।
कामोपभोगप्रचुरोपचारातामाहुरैशिकीं वृत्तिमुदाहरन्ति
॥ २१३ ॥ यासात्त्विकेनात्मगुणेनयुक्तात्यागेनवृत्तेन
समन्विताच। हर्षोत्कटासंहृतशोकभारासासात्वतीति
प्रथितेहवृत्तिः ॥२१४॥ आसामङ्गानिषोडश । तेषुप्र
रोचना,प्रस्तावना, वीथी,प्रहसनमितिचत्वारिभार-
त्यङ्गानि । तत्रवक्तुर्यर्थप्रशंसापरंवचः प्ररोचना
यथा। जयतिभुवनकारणंस्वयम्भूर्जयतिपुरन्दरनन्द

नोमुरारिः । जयतिगिरिसुतानिरुद्धदेहोदुरितभयापह
रोहरश्चदेवः ॥३१३॥ प्रस्तुतवस्तूपपादनावसरसूचकं
वच. प्रस्तावनायथा रत्नावल्याम् । द्वीपादन्यस्मादपि
मध्यादपिजलनिधेर्दिशोप्यन्तात् । आनीयझटितिघ-
ष्टयति विधिरभिमतमभिमुखीभूतः ॥ ३१४॥ उद्घात्य
कादीनामङ्गानाम्प्रवृत्तिर्वीथी । उद्घात्यकः,कथोद्घा
तः, प्रयोगातिशयः, प्रवर्त्तको,ऽवलगितमिति तत्रोद्घा-
त्यकोयथा । कोजयतिजयतिशर्वःकेनजितञ्जितमन-
ङ्गदहनेन । त्रिपुरारिणा भगवता बालशशाङ्काङ्कित
जटेन ॥३१५॥ कथोद्घातोयथा । साकम्पङ्कजजन्मनासु
रपतेरभ्यर्थनायावशादिक्ष्वाकोः शरदिन्दुबिम्बविम
लेवंशेवतीर्यस्वयम् । निःशेषात्तपदंत्रयीपथजुषांविद्वे
षिणं राक्षसंयःपौलस्त्यमहन्सपातुभवतोरामभिधानो
हरिः ॥३१६॥ प्रयोगातिशयोयथा उत्थापितमवतुहरेः
क्ष्मामुद्धरतोवराहवपुषोवः । शेषफणारत्नदर्पणसहस्रस
क्रान्तबिम्बस्य ॥३१७॥ प्रवर्त्तकोयथा । आसादितप्रकट
निर्मलचन्द्रहासः प्राप्तःशरत्समयएवविशुद्धकीर्तिः । उ-
त्खातगाढतमसंघनकालमुग्रोरामोदशास्यमिवसम्भृत
बन्धुजीवः ॥३१८॥ अवलगितंयथा । अमुमेवशरत्सम
यमाश्रित्यागीयत तथाह्यस्याम् । सत्पक्षा मधुरगिरः
प्रसाधिताशा मदोद्धतारम्भाः । निपतन्तिधार्त्तराष्ट्राः
कालवशान्मेदिनीपृष्ठे ॥३१९॥ स्वधर्मविप्रचलितानां
तापसादीनामपहासपरंवचः प्रहसनं यथा । श्रमणः

श्रावकवध्वाः सुरतविधौदशतिनाधरन्दन्तैः । मक्षि-
राक्षि! मांसभक्षणमस्मत्समये निषिद्धमिति ॥ ३२० ॥
संक्षिप्तिका,ऽवपातो, वस्तूत्थापनं,संस्फोटश्चतिचत्वार्या
रभट्यङ्गानि । तेषुमाहेन्द्रजालमेपथ्यादिर्वावस्तुसंक्षेपः
संक्षिप्तिकायथा । रक्षसामृगरूपेणवञ्चयित्वासराघ-
वौ । जहारसीतामम्पक्षीन्द्रप्रयासक्षणविच्छिनतः ॥ ३२१॥
भयादिभिर्विद्रवादिकर्मानुप्रवेशनिर्गमनमवपातोयथा।
मृगरूपम्परित्यज्य विधायत्रिकटंवपुः । नीयतेरक्षसा
तेनलक्ष्मणोयुधिसंशयम् ॥३२२॥ अविद्रवः सविद्रवोवा
सर्वरसभावसमासोवस्तूत्थापनंयथा । राहोश्चन्द्रकला-
मिवाननचरींदैवात्समासाद्यमेदस्योरस्यकृपाणपातवि
षयादाच्छिन्दतः प्रेयसीम् । आतङ्काद्विकलन्द्रुतङ्कृणपा
विक्षोभितंविस्मयात्क्रोधेनज्वलितम्मुदाविकसितञ्चेतः
कथंवर्त्तताम् ॥ ३२३ ॥ नानास्त्रयुद्धनियुद्धादिभिः
ससंरम्भंसम्प्रहारः संस्फोटोयथा । कृष्टायेनशिरोरुहे
षुपशुनापाञ्चालराजात्मजा येनास्याः परिधानमप्य-
पहृतंराज्ञांगुरूणाम्पुरः । यस्योरःस्थलशोणितासव
महम्पान्तुम्प्रतिज्ञातवान्सोयम्मद्भुजपञ्जरेनिपतितः
संरक्ष्यताङ्कौरवाः ॥३२४॥नर्म,नर्मस्फिजो,नर्मस्फोटो,न
र्मगर्भश्चतिचत्वारिकैशिक्यङ्गानि । तेषुस्थापितम्शृङ्गारंव
चो,विचेष्टितं वा सपरिहासन्नर्मयथा । वयंतथानामयथा
स्थकिंचदाम्ययन्त्वकस्माद्विकलः कथान्तरे । कदम्ब-
गोलाकृतिमाश्रितः कथंविशुद्धमुग्धः कुलकन्यकाजनः

॥ ३२५ ॥ प्रथमसम्भोगेनवावस्थानंसम्भोगाश्रयवाक्यादिनर्मनर्मस्फिजो यथा । प्राप्तासौवृषपर्वणः प्रियसुतासङ्केतखण्डेनवेवृष्टिः सेयमनम्बुदामृतमयीगात्राणिमेसिञ्चति । किञ्चानासिविनोदयिष्यतिमनः सन्तप्तमेवाद्यमेदुर्वात्येवनिवर्त्तयिष्यतिनभोस्तान्देवयानीयदि ॥ ३२६ ॥ आविर्भूताभिलाषानुभावयोरकाण्डसम्भोगभङ्गोनर्मस्फोटोयथा । इतः परानर्भकहार्यशस्त्रान्वैदर्भि ! पश्यानुमता मयासि। एवंविधेनाहवचेष्टितेन त्वम्प्रार्थ्यसे हस्तगतामभैमिः ॥३२७॥ कार्यहेतोः स्वरूपविज्ञानादिप्रच्छादनन्नर्मगर्भोयथा । अथा जिनाषाढधरः प्रगल्भवाग्ज्वलन्निवब्रह्ममयेनतेजसा। विवेशकश्चिज्जटिलस्तपोवनंशरीरबद्धः प्रथमाश्रमोयथा ॥ ३२८ ॥ उत्थापकः,परिवर्त्तकः,संलापकः,सङ्घात्यकइतिचत्वारिसास्वत्यङ्गानि । तेषुपरम्परीभूयार्थसूत्थापनमुत्थापकोयथा । प्रहरममतुकायम्प्राक्प्रहारप्रियोहम्मयितुकृतविघातेकिंविदध्याः परस्मात् । स्फुटितिविततबहून्यङ्गारभास्वत्कुठारप्रविघटितकठोरस्कन्धबन्धःकबन्धः ॥३२९॥ प्रस्तुतार्थत्यागादन्यार्थभञ्जनम्परिवर्त्तकोयथा । मुनिमभिमुखतां निनीषवो याः समुपययुः कमनीयतागुणेन । मदनमुपदधेस एवताभ्योदुरधिगमाहिगतिः प्रयोजनानाम् ॥ ३३० ॥ सदसिनानावाक्यैर्मिथोधिक्षेपः संलापकोयथा । कथमपिननिषिद्धो दुःखिनाभीरुणावाद्रुपदतनयपाणि-

स्तेनपित्रा ममाद्य । तवभुजबलदर्पाध्मायमानस्य
नामः शिरसि चरण एष न्यस्यतेधारयैनम् ॥३३१॥ का
र्यमन्त्रानुभावदैवादिभिः संघातभेदः संघात्यकोयथा ।
अपश्यद्विरिवेशानरणान्निववृतेगणैः । मुह्यत्येवंहिक्र
च्छ्रेषुसम्भ्रमाधिगतम्मनः॥३३२॥चतुर इत्यनेनशास्त्रीय
लौकिकव्यवहारवेदिनो नायकस्यधर्मार्थकाममोक्षेषु वैच
क्षण्यमुच्यते ॥३३३॥ उदात्त इत्यनेनप्राशयविभूत्योरा-
भिजात्ययौवनादीनाञ्चोत्कर्षः प्रकाश्यते ॥३३४॥ चतु
र्वर्गफलं कोनप्रबन्धं बान्धवीयतीत्यनेनश्रोतृणां रामा
दिवद्वर्त्तितव्यन्नरावणवदितिविधिनिषेधनिबन्धस्या
भीष्टतमत्वमाख्यायते ॥३३५॥ मुखम्प्रतिमुखमित्यादि
नातुपञ्चागमप्रबन्धशरीरमभिधीयते । तदङ्गानिचोपक्षेप
परिकरादीनिचतुः षष्टिरपिमुखादिष्वेवान्तर्भवन्ति । य
स्तद्वदेवपञ्चसन्ध्येकमपिबाह्यं प्रबन्धव्यपदेशमासा
दयति । तद्यथा । "कथमपिकृतप्रत्यासत्तौप्रिये" इति
मुखम्, "स्खलितोत्तरे"इतिप्रतिमुखम्„ "विरहकृशया
कृत्वाव्याजम्प्रजल्पितमश्रुनमि"तिगर्भो, "ऽसहनसखी
श्रोत्रप्राप्तिप्रसादससम्भ्रमविवलितभ्रुशे" तिविमर्षः,शू
न्येगेहेसमुच्छ्वसितन्तदेतिनिर्व्वहणम् । एतेनप्राचीन-
प्रबन्धार्थेप्येकवाक्योक्तेन प्रबन्धत्वमित्याख्यातम्भव-
ति । तद्यथा । तुरगनिचयव्यग्रानुर्वीभिदःसगराध्वरेक
पिलमहसारोषात्प्लुष्टान्पितुःप्रपितामहान् । अगणितस
नूपातंतप्त्वातपांसिभगीरथोभगवतिःतवस्पृष्टानद्भिश्चि

राद्रुद्दीधरत् ॥३३६॥ अविस्तृतमसंक्षिप्तमित्यनेनविस्तरभीरूणाङ्कथारसविच्छेदशङ्किनाऽचचिन्नमावर्ज्जयते ॥३३७। अभ्यवृत्तमित्यनेनवृत्तान्तरैराश्वासकादिपरिसमाप्तिरितिपरिश्रान्ताः श्रोतारआश्वास्यन्ते स्वगादिसन्निवेशादिवत्सन्दर्भेचाश्वासादयोविभाव्यन्ते ॥३३८॥ पुरोपवनेत्यादिनाचदेशकालपात्रसम्पदुपवर्णनादालम्बनोद्दीपनविभावाः कथ्यन्ते ॥३३९॥ उद्यानसलिलक्रीडादयुपलक्षणेनकामिनीनांदिवाचेष्टा, मधुपानं रतोत्सवइत्यनेन च रात्रिचेष्टा उच्यन्ते ॥ ३४० ॥ विप्रलम्भा इत्यनेन चत्वारोपिप्रथमानुरागादयः परामृष्यन्ते ॥३४१॥ विवाहाइत्युपलक्षणेनप्रथमानुरागोविवाहान्तो,मानःप्रेमान्तः,प्रवासः प्रसङ्गमान्तः,करुणःप्रत्युज्जीवनान्तःप्रबन्धेकर्त्तव्यइत्युपदिश्यते ॥३४२॥ मन्त्रदूतेत्यादिपुरुषाकारायत्तसिद्धिसूचनेना द्यूनतादिनिरासान्नायकस्यसत्त्वोत्कर्षः प्रकाश्यते ॥३४३॥ नावर्णनन्नगर्यादेर्दोषायेत्यादिनात्पुरुषार्थासन्नोपकारकारित्वेन शैलर्त्तूद्यानचन्द्रोदयमधुपानरतोत्सवादीनां मन्त्रदूतप्रयोगाद्यनायकाभ्युदयादीनाञ्चनियमेनप्रयोगः, शेषाणान्तुप्रबन्धशरीरानुरोधेनेति प्रतिपाद्यते ॥३४४॥ गुणतः प्रागुपन्यस्तनायकन्तेन विद्विषाम्। निराकरणमित्यनेनगुणवतामाख्यन्न गुणद्वेषिणेतिज्ञाप्यते ॥३४५॥ वंशवीर्यश्रुतादीनि इत्यादिनापुनराभिजात्यौद्धत्यशौटीर्यवीर्यादयएव शत्रौवर्णनीया नत्ववच्छेदहेतवोन्या-

व्याचरणविनयादयइति प्रत्याय्यते ॥३४६॥ धिनोतिनइ
त्यनेनत्वयमेवपक्षःश्रेयानितिग्रन्थकारेण स्वाभिप्रायः
प्रकाश्यते ॥३४७॥

इतिनिगदितभङ्गयानङ्गसर्वस्वमेतद्
विविधमपि मनोभिर्भावयन्तोस्यखेदम् ॥
तदनुभवसमुत्थानन्दसम्मीलिताक्षाः
परिषदिपरितोषंहन्त सन्तः प्रयान्तु ॥२१५॥
यावन्मूर्ध्नि हिमांशुकन्दलभृति स्वर्वाहिनीघूर्जटे
र्यावद्वक्षसिकौस्तुभस्तबकिते लक्ष्मीर्मुरद्वेषिणः ॥
यावच्चित्रभुवस्त्रिलोकविजयप्रौढंधनुः कौसुमं
भूयात्तावदियं कृतिःकृतधियांकर्णावतंसोत्पलम्
॥ २१६ ॥

इतिश्रीमन्महीमहेन्द्रमहाराजाधिराज
श्रीभोजदेवविरचिते "सरस्वतीकण्ठाभरणा" भिधेऽलंकार
शास्त्रेरसविवेचनोनाम पञ्चमः परिच्छेदः ॥

॥ समाप्तश्चायंग्रन्थः ॥

॥ शुभं भवतु ॥

॥ श्रीमल्लक्ष्मीव्यङ्कटेशाभ्यांनमः ॥